(निर्णयसागर प्रेस, बम्बई के पूर्व संस्करण से पुनर्मुद्रित)

॥ श्रीः ॥

श्रीमन्महर्षिपतञ्जलिविनिर्मितम्

व्याकरणमहाभाष्यम्

श्रीमदुपाध्यायकैयटप्रणीतेन
भाष्यप्रदीपेन
श्रीमन्नागेशभट्टविरचित-
भाष्यप्रदीपोद्द्योतोद्भासितेन
समुल्लसितेन

तत्रेदम्

सप्तमाऽष्टमाध्याय-व्याख्यानभूतम्

अङ्गाधिकार-प्रकीर्णविधि-रूपम्

षष्ठं खण्डम्

तच्च

पण्डित-दधिरामशर्मणा, संशोधितम्

चौखम्बा संस्कृत प्रतिष्ठान
३८ यू. ए., जवाहरनगर, बंगलो रोड
दिल्ली ११०००७

VYĀKARAṆAMAHĀBHĀṢYA

OF

PATAÑJALI

With

THE COMMENTARY BHĀṢYAPRADĪPA

OF

KAIYAṬA UPĀDHYĀYA

&

THE SUPER COMMENTARY BHĀṢYA-

PRADĪPODDYOTA

OF

NĀGEŚA BHAṬṬA

Volume VI

ANGADHIKARA-PRAKIRNA VIDHIRUPAM

(As depicated in Chapters VII & VIII of Ashtadhyayi)

Edited by

Pandit Dadhiram Sharma

CHAUKHAMBA SANSKRIT PRATISHTHAN

38 U. A., Jawaharnagar, Bungalow Road

DELHI 1110007

॥ श्रीः ॥

श्रीमद्भगवत्पतञ्जलिमुनिविरचितं—

व्याकरण-महाभाष्यम्

उद्द्योतोद्भासितप्रदीपविराजितम् ।

सप्तमाध्यायस्य प्रथमः पादः ।

तस्यैव प्रथममाह्निकम्

युवोरनाकौ ॥ ७।१।१ ॥

युवोरनाकावित्युच्यते कयोर्युवोरनाकौ भवतः ? ॥ प्रत्यययोः ॥ कथं

प्रदीपः] **युवोरनाकौ** । इह 'युवो'रिति समाहारद्वन्द्वे 'युवुन' इति प्राप्नोति, इतरेतरयोगे तु 'युव्वो'रिति । तत्र सौत्रत्वान्निर्देशस्य नुममकृत्वोकारलोपं वा कृत्वा निर्देश इत्यदोषः । के चित्तु कर्मधारयं व्याचक्षते, अवयवधर्मेण समुदायस्य व्यपदेशात् । यथा 'समं चूर्णं' 'कृष्णैत' इति । एवं युश्चासौ समुदायो युवुलक्षणो वुश्चासाविति । तत्र समुदायस्याऽङ्गनिमित्तत्वाऽसंभवादवयवयोर्यथासङ्ख्यं कार्यविज्ञानम् । यथा च भाष्यं 'कयोर्युवो'रिति तथेतरेतरयोगे द्वन्द्व इति निर्णयः ॥ अतिप्रसङ्गं मत्वा पृच्छति—**कयोरिति** । **प्रत्यययोरिति** । अङ्गाधिकारादङ्गस्य निमित्ते यौ युवू तयोरनाकाविति सूत्रार्थाश्रयणात् ॥ **कथं**

उद्द्योतः] **युवोरनाकौ** । 'युवो'रिति निर्देशानुपपत्तिमुद्भाव्य परिहरति—**इहेति** । नपुंसकत्वान्नुमः प्राप्तेरिति भावः । **युवोरिति** । ओसि यणादेशप्रसङ्गादिति भावः । आद्ये समाधत्ते—**नुममकृत्वेति** । सौत्रत्वादिति भावः । द्वितीये आह—**उकारलोपं वेति** । छान्दसो वर्णलोप इति भावः । **समं चूर्णमिति** । **चूर्ण**-कणस्य समुदायः । तत्राऽवयवसाम्यात्समुदायस्य तथा व्यपदेशः । 'कृष्णैत' इत्यत्रावयवयोः कृष्णैतत्वात्समुदायस्य तथा व्यपदेशः । वर्णो वर्णेने'ति समानाधिकरणसमासः । नन्वेवं समुदायस्याऽनाऽकौ स्यातामत आह—**तत्रेति** । **यथा चेति** । छान्दसश्च वर्णलोप इति तद्भावः । **अतिप्रसङ्गमिति** । 'युत्वा'

पुनरङ्गस्येत्यनुवर्त्तमाने प्रत्यययोः स्याताम् ? ॥ युशब्दवुशब्दान्तमेतद्विभक्तावङ्गं भवति ॥ यदि युशब्दवुशब्दान्तस्याऽङ्गस्यानाकौ भवतः, सर्वादेशौ प्राप्नुतः ॥ 'निर्दिश्यमानस्यादेशा भवन्ती'त्येवं न भविष्यतः ॥ यत्र तर्हि विभक्तिर्नास्ति-नन्दना कारिकेति ? ॥ अत्रापि प्रत्ययलक्षणेन विभक्तिः ॥ यत्र तर्हि प्रत्ययलक्षणं नास्ति-नन्दनप्रियः कारकप्रिय इति ॥

मा भूतां यासौ सामासिकी विभक्तिस्तस्याम्, यासौ समासाद्विभक्तिस्तस्यां भविष्यतः ॥ न वैतस्यां युशब्दवुशब्दान्तमङ्गं भवति ॥ भवेद्यो युशब्दवुशब्दाभ्यामङ्गं विशेषयेत्तस्यानन्त्ययोर्न स्यातां, वयं खल्वङ्गेन युशब्दवुशब्दौ विशेषयिष्यामः,-'अङ्गस्य युवोरनाकौ भवतो यत्र तत्रस्थयो'रिति ॥

यत्र तर्हि समासाद्विभक्तिर्नास्ति-नन्दनदधि कारकदधि ? ॥ एवं तर्हि-

---

प्र.] **पुनरिति** । अङ्गस्येत्यधिकारादङ्गस्यैव कार्यित्वं युक्तमिति भावः । सिद्धान्तवादिना तु वैयधिकरण्येन संबन्धो दर्शयितव्यः । संप्रति तु सामानाधिकरण्येन संबन्धमाश्रित्य समाधीयते-**युशब्दवुशब्दान्तमिति** । कृत्तद्धितान्तत्वाद्युवुशब्दान्तस्य प्रातिपदिकत्वाद्विभक्तावुत्पन्नायां सत्यङ्गत्वेऽनाकौ क्रियेते इत्यर्थः । **यत्र तर्हि विभक्तिर्नास्ति नन्दना कारिकेति** । लौकिके प्रयोगेऽत्यन्तमत्र विभक्तेरभावः । अत्राहुः-विभक्तावुत्पन्नायामनाऽकयोः कृतयोरकारान्तलक्षणेन टापा भाव्यं, ततो हल्ङ्यादिलोपेनेत्यानुपूर्व्या सिद्धमेतत्, यथा-'या' 'से'ति, ततश्चाऽग्रन्थोऽयमिति । 'नन्दनकारके'ति पाठो युक्तः । 'नन्द् यु स्' इति स्थिते संबुद्धिगुणे कृतेऽकृते वा नित्यत्वादेङ्ह्रस्वात्संबुद्धेरिति लोपे कृतेऽङ्गत्वाऽभावादनाऽकाऽप्रसङ्गः । **नन्दनप्रिय इति** । 'अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते' इति लुकि कृते 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणप्रतिषेधादनाऽकयोरप्रसङ्गः । **भवेदिति** । विशेषणविशेष्यभावे कामचारादङ्गेन युवू विशेष्येते । न च तावङ्गान्तौ संभवतः । न च विशेष्येण तदन्तविधिर्भवतीति युवुभ्यां तदन्तविध्यभावाद्यत्र तत्र स्थितयोरङ्गावयवयोर्युवोरनाऽकौ भवतः [इति] । **नन्दनदधीति** । 'स्वमोर्नपुंसका'दिति लुकि नित्यत्वात्कृते

उ.] 'भुज्यु'रित्यादौ । **अङ्गस्यैवेति** । युवुशब्दान्तस्याङ्गस्येत्यर्थ इति भावः । यद्यपि सिद्धान्तिनो वैयधिकरण्यसम्बन्धोऽभिमतस्तथापि शिष्यबुद्धिपरीक्षार्थं तदनाश्रयणेन परिहरतीत्याह—**सिद्धान्तवादिना त्विति** । ननु शास्त्रतोऽत्र विभक्तिरस्त्येवेत्यत आह—**लौकिके इति** । **नित्यत्वादिति** । अकृते गुणे ह्रस्वान्तत्वात्कृते एङन्तत्वाल्लोपप्राप्तेरिति भावः । **अन्तरङ्गानपीति** । एतेनाऽन्तरङ्गत्वात्पूर्वमनाऽकाभ्यां भाव्यमित्यपास्तम् । नन्वङ्गस्य विशेषणत्वात्तदन्तविधिः स्यादत आह—**न च ताविति** । नापि युवुभ्यामित्याह—**न च विशेष्येणेति** । **नित्यत्वादिति** ।

॥ * ॥ नवा परं निमित्तं संज्ञा च प्रत्ययलक्षणेन[2] ॥ * ॥ **न चेह[3] परं निमित्तमाश्रीयते-'अस्मिन्परतो युवोरनाकौ भवत' इति ॥ किं तर्हि ? ॥ 'अङ्गस्य युवोरनाकौ भवत' इति । अङ्गसंज्ञा च भवति प्रत्ययलक्षणेन ॥**

अथवा तयोरेव यदङ्गं तन्निमित्तत्वेनाश्रयिष्यामः ॥ कथम् ? ॥ अङ्गस्येति

प्र.] 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणप्रतिषेधादादेशाऽप्राप्तिः । **न वा परमिति** । न हीह विभक्तिः, प्रत्ययान्तरं वा—परं निमित्तत्वेनोपात्तमिति प्रत्ययलक्षणत्वमनाऽकयोर्नास्तीति 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणप्रतिषेधस्याऽयमविषयः । केवलमङ्गस्य युवोरनाकौ भवत इत्युच्यते । अस्ति हि प्रत्ययलक्षणेनाऽङ्गसंज्ञा । नहि तस्यां विधीयमानायां 'न लुमताऽङ्गस्ये'ति प्रतिषेधः प्रवर्तते, लब्धाऽङ्गसंज्ञस्य कार्यान्तरे विधातव्ये स प्रतिषेधः प्रवर्त्तते । न चाऽङ्गसंज्ञाऽङ्गस्य कार्यमिति प्रतिषेधाऽभावः । ननु चाऽङ्गस्येत्यत्राऽऽसप्तमाध्यायपरिसमाप्तेरङ्गाधिकारे 'वव्रश्चे'त्यत्रोरदत्त्वस्य परनिमित्तकत्वात्स्थानिवद्भावे सति 'न संप्रसारणे संप्रसारण'मिति वकारस्य संप्रसारणप्रतिषेध उक्तः स इहत्येन 'न वा परं निमित्त'मित्यनेन ग्रन्थेन विरुध्यते; नास्ति विरोधो दर्शनभेदात् । 'यथोद्देशं संज्ञापरिभाष'मिति पक्षमाश्रित्य 'न वा परं निमित्त'मित्याद्युक्तम् । 'कार्यकालं संज्ञापरिभाष'माश्रित्य 'वव्रश्चे'त्युक्तम् । तत्र हि पक्षे उरदित्यत्राऽङ्गसंज्ञासूत्रोपस्थानात्संनिहितः प्रत्ययो निमित्तत्वेनाऽऽश्रीयत इति परनिमित्तत्वं भवति ।

अथ वेति । भवतु कार्यकालपक्षस्तत्रापि न दोष इति भावः । **निमित्तत्वे-**

उ.] 'अन्तरङ्गानपीति न्यायाच्चे'त्यपि बोध्यम् । **प्रत्ययलक्षणत्वं**—प्रत्ययनिमित्तकत्वम् । **न चाङ्गसंज्ञेति** । 'न लुमता तस्मि'न्निति वार्तिकरीत्या प्राप्तेः । सूत्रेऽप्यङ्गपदं पूर्वोपलक्षणमेवेति चिन्त्यमेतत् । तस्मान्निषेधाऽनित्यत्वादङ्गसंज्ञा भवतीत्येव भाष्याशयः । **विरुध्यत इति** । उरदत्त्ववदस्यापि परनिमित्तत्वादिति भावः । **सन्निहित इति** । स च लक्ष्यानुरोधादावृत्त्याऽत्वस्याँऽपि विशेषणमिति भावः । प्रकृते त्वावृत्त्या निमित्तत्वे न मानमित्येव भाष्याशयो युक्तः । यथोद्देशपक्षे तु सर्वथाऽसन्निधानमेवेति तत्पक्षेणैव भाष्यं योजितमुपाध्यायैः । **कार्यकालपक्ष इति** । आवृत्तेरप्युपलक्षणमिदम् । **अन्ये** तु यथोद्देशेऽपि संज्ञापरिभाषादेशे कार्याणां गमनमिति 'क्ङिति चे'ति सूत्रकैयटोक्तरीत्या सन्निधानं दुर्वारमिति भाष्याऽसङ्गतिरेव कैयटोक्तव्याख्याने इत्याहुः । **परे** त्वङ्गसंज्ञायाः परनिमित्तत्वेन तद्द्वाराऽत्वस्याऽपि परनिमित्तत्वमिति स्थानिवद्भावप्रवृत्तिरत्वस्य साक्षात्परनिमित्तकत्वाभावेऽपि । अत एवाऽजर्घा इत्यादावत्वसिद्धिरितीदं तच्च सममिति न कश्चिद्भाष्ययोर्विरोध-

संबन्धसामान्ये षष्ठी विज्ञास्यते,–अङ्गस्य यौ युवू ॥ किं चाङ्गस्य युवू ? ॥ निमित्तम् । ययोर्युवोरङ्गमित्येतद्भवति ॥ कयोश्चैतद्भवति ? ॥ प्रत्यययोः ।

॥ * ॥ युवोरनाकाविति चेद्धातुप्रतिषेधः ॥ * ॥ **युवोरनाकाविति चेद्धातुप्रतिषेधो वक्तव्यः । युत्वा । युतः । युतवान् ।** ॥ * ॥ भुज्य्वादीनां च ॥ * ॥ **भुज्य्वादीनाञ्च प्रतिषेधो वक्तव्यः । भुज्युः । कंयुः । शंयुः ।** ॥ * ॥ अनुनासिकपरत्वात्सिद्धम् । ॥ * ॥ **[अनुनासिकपरत्वात्सिद्धमेतत् ॥**

प्र.] **नेति** । अनाऽकादेशविधाने । **संबन्धसामान्ये षष्ठीति** । निमित्तनिमित्तिभावलक्षणश्च संबन्धोऽन्तरङ्गत्वादाश्रीयते । प्रत्ययनिमित्तत्वाच्चाऽङ्गव्यपदेशस्य प्रत्यययोरेव ग्रहणं विज्ञायते । **धातुप्रतिषेध इति** । नन्वधुनैवोक्तं प्रत्यययोर्ग्रहणमिति ?, सत्यमुक्तं, न तु लभ्यते । सामानाधिकरण्येन संबन्धसंभवे वैयधिकरण्यपक्षाश्रयणस्याऽयुक्तत्वात् । भेदे हि निमित्तनिमित्तिभावो भवति । अभेदे च संभवति कथं भेद आश्रीयते । अथ वा भाष्यकारेण पूर्वं स्वातन्त्र्येणोक्तमिदानीं वार्त्तिकमवतारितमित्यदोषः ॥

भुज्य्वादीनाञ्चेति । भुज्य्वादीनां संबन्धिनः प्रत्ययस्येत्यर्थः । सत्यपि वैयधिकरण्येन संबन्धेऽतिप्रसङ्गः । **भुज्युरिति** । 'भुजिमृङ्भ्यां युक्त्युकौ चे'ति युक् प्रत्ययः । 'मृत्यु'रित्यत्र त्युः प्रत्ययो न युरिति मत्वा भाष्यकारेण 'मृत्यु'रिति नोदाहृतम् । **कंयुरिति** । 'कंशंभ्यां बभयुस्तितुतयस' इति युस् प्रत्ययः । **ननु**

उ.] प्रसङ्ग इत्याहुः । ननु 'युवोरङ्गनिमित्तत्व'मित्यङ्गस्य निमित्तत्वोक्तिरयुक्तेत्यत आह-**अनाकेति** । तयोरेव यद्रूपं 'यु'–'वु' इति, तदङ्गं प्रति निमित्तत्वेनाश्रयिष्याम इति भाष्यार्थ इति भावः । संबन्धान्तरस्याऽपि संभवादाह—**अन्तरङ्गत्वादिति** । शब्दयोश्च निमित्तनिमित्तिभावो वा, स्थान्यादेशभावो वा । तत्रान्त्यस्याऽसंभवादाद्यस्यैव ग्रहणमिति भावः । युक्त्यन्तरमाह—**प्रत्ययनिमित्तत्वाच्चेति** ।

वैयधिकरण्याश्रयणस्याऽयुक्तत्वमुपपादयति-**भेदे हीति** । भेदस्य हि संबन्धितावच्छेदकयोर्यो विरोधस्तज्ज्ञानसापेक्षज्ञानकत्वात् । अविरोधे संभवति विरोधस्याऽन्याय्यत्वात्स न न्याय्यः । अत एव निषादस्थपतौ कर्मधारय एवाश्रीयते । न च कर्मधारये स्वामिवाचकस्थपतिशब्दस्य पूर्वनिपातापत्तिः; राजदन्तादिषु पाठादित्याहुः । **वार्तिकमिति** । तदर्थप्रतिपादकमित्यर्थः । भुज्य्वादीनां प्राप्त्यभावादनर्थकः प्रतिषेधोऽत आह—**सम्बन्धिन इति** । **सत्यपीति** । यदि अङ्गनिमित्तयुव्वोरित्यर्थेन युत्वादावदोष इत्युच्यते तथाप्ययं दोष इत्यर्थः । **न युरितीति** । एवञ्च तत्र योरङ्गनिमित्तत्वाऽभावादप्राप्तेस्तन्नोदाहृतमित्याशयः । अवग्रहे अवान्तर-

कथम् ? ॥] अनुनासिकपरयोर्युवोर्ग्रहणं, न चैतावनुनासिकपरौ ॥ यद्यनुनासिकपरयोर्ग्रहणं—नन्दनः कारकः, अत्र न प्राप्नुतः, नह्येताभ्यां युशब्दवुशब्दाभ्यामनुनासिकं परं पश्यामः ॥ 'अनुनासिकपरत्वा'दिति नैवं विज्ञायतेऽनुनासिकः पर आभ्यां ताविमावनुनासिकपरौ, अनुनासिकपरत्वादिति ॥ कथं तर्हि ? ॥ अनुनासिकः परोऽनयोस्ताविमावनुनासिकपरौ, अनुनासिकपरत्वादिति ॥ यद्यनुनासिकपरयोर्ग्रहणमित्संज्ञा प्राप्नोति ॥ तत्र को दोषः ? ॥ ॥ * ॥ तत्र ङीम्नुमोः प्रतिषेधः । ॥ * ॥ [तत्र] ङीम्नुमोः प्रतिषेधो वक्तव्यः । नन्दनः कारकः । नन्दना कारिका । उगिल्लक्षणौ ङीम्नुमौ प्राप्नुतः ॥ * ॥ धात्वन्तस्य च [प्रतिषेधः] ॥ * ॥ धात्वन्तस्यच प्रतिषेधो वक्तव्यः । दिवु सिवु ॥ * ॥ षिट्टित्करणं तु ज्ञापकमुगित्कार्याऽभावस्य ॥ * ॥ यदयं युशब्दवुशब्दौ षिट्टितौ करोति 'शिल्पिनि ष्वुन्' 'ल्युट्युलौ तुट्चे'ति, तज्ज्ञापयत्याचार्यो न युवोरुगित्कार्यं भवतीति ॥ कथं कृत्वा ज्ञापकम् ? ॥ षिट्टित्करणे एतत्प्रयोजनं षिट्टित इतीकारो यथा स्यात् । यदि चात्रोगित्कार्यं स्यात् षिट्टित्करणमनर्थकं स्यात् । पश्यति त्वाचार्यो,–'न युवोरुगित्कार्यं भवती'ति, ततो युशब्दवुशब्दौ षिट्टितौ करोति ॥*॥ न वा–षित्करणं ङीष्विधानार्थम् ॥ * ॥ नैतदस्ति ज्ञापकम् । अस्ति ह्यन्यदेतस्य वचने प्रयोजनम् ॥ किम् ? ॥ ['षित्करणं ङीष्विधानार्थम्'] । षित्करणं क्रियते ङीष्विधानार्थम् । 'षित' इति ङीष्यथा स्यात् ॥ * ॥ टित्करणमनुपसर्जनार्थम् ॥ * ॥

प्र.] सित्करणं पदत्वे सति हल्यनुस्वारार्थमिति तत एवादेशो न भविष्यति । नैतदस्ति । अवग्रहाय सित्त्वं स्यात्, अहलादावप्यनुस्वारार्थं वा । न ह्येताभ्यामिति । रञ्जेः क्नुन्वुञ्ध्वुन्नित्यादीनामेव प्रसङ्गः । अनुनासिकः परोऽनयोरिति । अवयवान्तरापेक्षया लब्धपरव्यपदेशोऽवयव एवाऽनुनासिक आश्रीयते नाऽन्यः । न च 'भुज्यु'रित्यादावुकारस्य साऽनुनासिकत्वं प्रतिज्ञातमिति दोषाऽभावः । इत्संज्ञा प्राप्नोतीति । लोपस्तु भवतु मा वा भूदिति न विचार्यते, कृतेऽपि उकारलोपेऽवशिष्टस्यादेशविधानेन रूपनिष्पादनात् । धात्वन्तस्येति । 'दिवु' इत्ययमपि अनुनासिकपर इत्यादेशप्रसङ्गः । न वा षित्करणमिति । ङीपि सतीकारोऽनुदात्तो भवति, ङीषि तूदात्त इति सति प्रयोजने न ज्ञापकं षित्करणम् । टित्करणमिति ।

उ.] पदस्य नियामकतायाः प्रायेणाऽदर्शनादाह—अहलादावपीति । नन्दनादावप्रवृत्तावप्यनाकयोरवकाशं दर्शयति—क्नुन्वुनिति । अवयवान्तरेति । एवञ्चोकार एवानुनासिक इत्याश्रितमित्यर्थः । दिवु इतीति । 'उदितो वे'तीड्विकल्पार्थं हि तत्रोकारोऽनुनासिकः । ङीम्ङीषोर्विशेषं दर्शयति—ङीपीति ।

टित्करणेऽप्यन्यत्प्रयोजनमस्ति ॥ किम् ? ॥ अनुपसर्जनाट्टित इतीकारो यथा स्यात् ॥ टितोऽनुपसर्जनाद्भवति, उगित उपसर्जनाच्चानुपसर्जनाच्च ॥ एवं तर्हि,
॥ * ॥ विप्रतिषेधाट्टापो बलीयस्त्वम् ॥ * ॥ **विप्रतिषेधाट्टापो बलीयस्त्वं भविष्यति । टापोऽवकाशः—खट्वा माला । ङीपोऽवकाशः—गोमती यवमती । इहोभयं प्राप्नोति नन्दना कारिका । टाब्भवति विप्रतिषेधेन ॥ नैष युक्तो विप्रतिषेधः, 'विप्रतिषेधे पर'मित्युच्यते पूर्वश्च टाप् परो ङीप् ॥ ङीपः परष्टाप् करिष्यते ॥ सूत्रविपर्यासः कृतो भवति ॥ एवं तर्हि उगितो ङीब्भवतीत्यत्राप्यतष्टाबित्यनुवर्तिष्यते ॥ एवमप्यकारान्तादुगित इहैव स्यात् नन्दना कारिका । गोमती यवमतीत्यत्र न स्यात् ॥ एवं तर्हि संबन्धाऽनुवृत्तिः करिष्यते—'अजाद्यतष्टाप्' । 'ऋन्नेभ्यो ङीप्' । अतष्टाप् ॥ 'उगितश्च' । ङीब्भवति । अतष्टाप् । 'वनो र च' । [वनो ङीब्भवति । 'उगितोऽतष्टाप्' ।]**

प्र.] 'टिड्ढे'त्यत्रानुपसर्जनादिति वर्तते । अत्रोगिल्लक्षणे ङीप्यविशेषेण प्राप्तेऽनुपसर्जनादेव यथा स्यादिति नियमार्थं टित्करणं स्यादित्यज्ञापकमुगित्कार्याऽभावस्य । **विप्रतिषेधादिति** । पूर्वविप्रतिषेधोऽत्र विवक्षितः । **एवं तर्हीति** । यदीष्टवाची परशब्दो न गृह्यते तदाऽनुवृत्तिर्वाक्यभेदश्चाश्रीयत इत्यर्थः । **एवमपीति** । एकवाक्यताश्रयणेन पर्यनुयुङ्क्ते । तत्राऽदन्तादुगितः पर्यायेण टाब्ङीपोः प्रसङ्गः । **एवं तर्हि संबन्धानुवृत्तिरिति** । यद्यपि वाक्यभेदेन संबन्धे दोषाऽभावः, 'उगितो ङीब्भवति, अदन्तादुगितष्टाब्भवती'ति, तथापि परिहाराऽन्तरसद्भावप्रतिपादनायेदमुक्तम् । **उगितश्च ङीब्भवतीति** । 'अतष्टा' बित्युत्तरार्थमत्राऽनुवर्तते । 'वनो रचे'त्यत्रा 'ऽत उगितष्टा' बिति वर्तते, तत्र वन्नन्तस्याऽनुगित्त्वाददन्तत्वाऽसंभवाच्च वाक्यभेद आश्रीयते—'वन्नन्तस्य ङीब्रौ भवतः', 'उगितोऽदन्तान्ङीबपवादष्टा' बिति । अतः 'टा' बित्यस्योत्तरत्रोपस्थानाय प्रतिसूत्रमनुवृत्तिं दर्शयति । 'टाबृची'त्यत्र टाब्ग्रहणं

उ.] । **वाक्यभेद इति** । उगितो ङीप्, अदन्तादुगितष्टाबित्यर्थ इति भावः । वाक्यभेदे प्रमाणन्तु उगितश्चेति सूत्रमेवेति बोध्यम् । **उत्तरार्थमत्रानुवर्तते इति** । इह तु न फलं । न चोगितोऽदन्ताट्टाब्विधानं फलम्, 'उगित' इत्यस्य ङीपा सहसंबद्धतया पूर्वक्लृप्तप्रकृतेरत ईत्यस्य तद्वाक्येऽसंबन्धेन तस्य फलस्य वक्तुमशक्यत्वमिति भावः । नन्वेवं 'वनो रचे'त्यनेनैकवाक्यतयैव संबन्धः स्यादत आह—**तत्रेति** । **अदन्तत्वासंभवाच्चेति** । 'यज्वभ्या'मित्यादावपि बहिरङ्गविभक्तिनिमित्तनलोपस्याऽसिद्धत्वादिति भावः । नन्वेवमपि 'पादोऽन्यतरस्या'मित्यादावनुवृत्तिप्रदर्शनं व्यर्थमत आह—**अतष्टाबिति** । अतोऽनन्तरमित्यर्थः । उत्तरत्रोपस्थितेः फलन्दर्शयति—**टाबृचीति** । नन्वेवमपि टाप एव सा दर्श्यतामत-

'पादोऽन्यतरस्यां' । ङीब्भवति । उगितः, अतष्टाप् । ततः 'ऋचि' । ऋचि [च] टाब्भवति । उगितोऽत इति निवृत्तम् । तत्रायमप्यर्थो द्विष्टाब्ग्रहणं न कर्तव्यं भवति प्रकृतमनुवर्तते ॥ सिध्यत्येवं यत्त्विदं वार्तिककारः पठति— 'विप्रतिषेधाट्टापो बलीयस्त्व'मिति, एतदसङ्गृहीतं भवति ॥ एतच्च सङ्गृहीतं भवति ॥ कथम् ? ॥ इष्टवाची परशब्दो 'विप्रतिषेधे परं यदिष्टं तद्भवती'ति ॥ * ॥ धात्वन्तस्य चार्थवद्ग्रहणात् ॥ * ॥ **अर्थवतोर्युवोर्ग्रहणं । न च धात्वन्तोऽर्थवान् ॥**

॥ * ॥ नुम्विधौ झल्ग्रहणम् ॥ * ॥ **नुम्विधौ झल्ग्रहणं कर्तव्यं । झलन्तस्य उगित इष्यते । 'उगिदचां सर्वनामस्थानेऽधातोर्झल' इति । तच्चावश्यं कर्तव्यम् ॥** * ॥ लिङ्गविशिष्टप्रतिषेधार्थम् ॥ * ॥ **प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवतीति यथेह भवति गोमान् यवमान् एवं गोमती यवमतीत्यत्रापि स्यात् ॥** * ॥ न वा विभक्तौ लिङ्गविशिष्टाग्रहणात् ॥ * ॥ **न वा वक्तव्यम् ॥ किं कारणम् ? ॥ ['विभक्तौ लिङ्गविशिष्टाऽग्रहणात्'] 'विभक्तौ लिङ्गविशिष्टग्रहणं ने'त्येषा परिभाषा कर्तव्या ॥ कः पुनरत्र विशेषः—एषा वा परिभाषा क्रियेत, झल्ग्रहणं वेति ? ॥ अवश्यमेषा परिभाषा कर्तव्या, बह्वून्येतस्याः परिभाषायाः प्रयोजनानि ॥ कानि ? ॥**

प्र.]न कर्तव्यं भवतीति टाप उत्तरत्रानुवृत्तिरुपयुज्यते । टापः स्वातन्त्र्यनिरसकरणाय 'अत' 'उगित' इत्येताभ्यां संबन्धः । **उगितोऽत इति निवृत्तमिति** । उगित इत्यस्य निवृत्तिराख्यायते । 'अत' इत्येतत्सर्वत्र प्रकरणेऽनुवर्तते—'शितिर्ब्राह्मणी'ति ङीब्नकारौ मा भूतामिति, 'कृकवाकु'रित्यत्र जातिलक्षणो ङीष् मा भूदित्येवमर्थम् । **धात्वन्तस्य चार्थवद्ग्रहणादिति** । वर्णसमुदायग्रहणमिह न वर्णग्रहणमित्यर्थवद्ग्रहणपरिभाषोपतिष्ठते । 'प्रत्ययाऽप्रत्यययोः प्रत्यये संप्रत्यय' इत्ययमप्यत्र परिहारः संभवति । **एवं गोमतीति** । ईकारात्परो नुम्प्राप्तोऽझलन्तत्वान्न भवति । एवं 'नन्दनः' 'कारक' इत्यत्राऽझलन्तत्वान्नुमभावः । **न वा विभक्ताविति** । विभक्तौ यत्कार्यं विधीयते लिङ्गविशिष्टस्य तन्न भवतीत्यर्थः । **शुनेति** । 'सावेकाच' इति प्राप्तं विभक्तेरुदात्तत्वं 'न गोश्व'न्निति प्रतिषिध्यते । **शुन्येति** । गौरादित्वान्ङीषि कृते 'उदात्तयणो हल्पूर्वा'दित्यस्य विभक्तिस्वरस्य प्रतिषेधप्रसङ्गः ।

ननु विभक्तेरेतत्कार्यं न तु विभक्तौ परतः पूर्वस्येति कथं लिङ्गविशिष्टपरि-

---

उ.]उगित इत्यनयोस्तत्प्रदर्शनं व्यर्थमत आह—**टापः स्वातन्त्र्येति** । 'पादोऽन्यतरस्यामित्यत्रे'ति शेषः । **अत इत्येतदिति** । समुदायस्यैव निवृत्तिः कथ्यते । एकदेशस्त्वनुवर्तत एवेति भावः । **वर्णसमुदायेति** । उकारविशिष्टयोर्ग्रहणादिति भावः । **इत्ययमपीति** । अस्याः परिभाषाया असाधारणप्रयोजनस्य भाष्येऽदर्शना-

॥ * ॥ प्रयोजनं शुनः स्वरे ॥ * ॥ [शुनः स्वरे प्रयोजनं]। **यथेह भवति शुना शुने एवं शुन्या शुन्या इत्यत्रापि स्यात् ॥** * ॥ यूनः संप्रसारणे ॥ * ॥ **यूनः सम्प्रसारणे प्रयोजनम् । यथेह भवति 'यूनः पश्ये'ति, एवं 'युवतीः पश्ये'त्यत्रापि स्यात् ॥** * ॥ उगिदचां नुम्विधौ ॥ * ॥ **उगिदचां नुम्विधौ प्रयोजनम् । यथेह भवति—गोमान् यवमान्, एवं गोमती यवमतीत्यत्रापि स्यात् ॥** * ॥ अनडुहश्चाम्विधौ ॥ * ॥ **अनडुहश्चाम्विधौ प्रयोजनम् । यथेह भवति—अनड्वानित्येवमनडुहीत्यत्रापि स्यात् ॥ न वा भवत्यनड्वाहीति ? ॥ भवत्यन्येन यत्नेन 'आमनडुहः स्त्रियां वे'ति । लिङ्गविशिष्टग्रहणादीकारान्तस्य प्राप्नोति ॥** * ॥ पथिमथोरात्त्वे ॥ * ॥ **पथिमथोरात्त्वे प्रयोजनम् । यथेह भवति पन्थाः मन्थाः—एवं पथी मथीत्यत्रापि प्राप्नोति ॥ न केवलः पथिशब्दः स्त्रियां वर्तते ? ॥ उपसमस्तस्तर्हि** वर्तते **सुपथीति** ॥ * ॥ पुंसोऽसुङ्विधौ ॥ * ॥ **पुंसोऽसुङ्विधौ प्रयोजनम् । यथेह भवति पुमान्, एवं पुंसीत्यत्रापि स्यात् ॥ न केवलः पुंशब्दः स्त्रियां वर्तते ॥ उपसमस्तस्तर्हि वर्तते—सुपुंसीति** ॥ * ॥ सख्युर्णित्त्वानङौ ॥ * ॥ **सख्युर्णित्त्वानङौ प्रयोजनम् । यथेह भवति**

प्र.] भाषायाः प्रतिषेधः ?, नैष दोषः । विभक्तेर्यत्कार्यं, यच्च विभक्तौ परतः पूर्वकार्यं तत्सर्वं विभक्तौ कार्यमिति सर्वत्र प्रतिषेधप्रवृत्तिः । **एवं युवतीरिति** । एवमर्थमन इत्युभयोः शेष इति नाश्रयितव्यं भवति । **पथीति,**—समासैकदेश उदाहृतः ।

इतर एतावदेवोदाहृतमिति मत्वाह—**न केवल इति** । **सुपथीति** । शोभनः पन्था अस्यामिति बहुव्रीहिः । 'न पूजना'दिति समासान्तप्रतिषेधः । 'ऋन्नेभ्यो ङी'बिति ङीप् । 'भस्य टेर्लोप' इति टिलोपः । **सुपुंसीति** । शोभनाः पुमांसोऽस्यामिति बहुव्रीहिः । उरःप्रभृतिषु 'पुमा'निति विभक्त्यन्तपाठस्य प्रयोजनमुक्तम्—'एकवचनान्तस्यैव नित्यः कब्यथा स्या'दिति, तेनात्र 'शेषाद्विभाषे'ति विकल्पो भवति ।

उ.] दियं निष्फलेति **केचित्** । भाष्ये—नुमापत्तिदोषं परिहरति—**नुम्विधाविति** ।

नैष दोष इति । 'विभक्ता'विति विषयसप्तमीति भावः । नन्वस्य दोषस्याऽन इत्यपकर्षेण परिहृतत्वात्कथमेतत्प्रयोजनमत आह—**एवमर्थमिति** । साधुत्वान्वाख्यानप्रवृत्तस्य भगवतोऽसाधुशब्दोच्चारणमनुचितमत आह—**समासैकदेश इति** । भाष्ये—**उपसमस्त इति** । समस्तपर्यायोऽयम् । आचारक्विबन्तात्कर्तृस्त्रियां क्विबनभिधानान्नेति भावः । आचारक्विबेव नेत्यन्ये । ननु 'ऋक्पू'रिति समासान्ते सति टापि सुपथेति भाव्यमत आह—**न पूजनादिति** । वस्तुतः षचः प्राचीनेष्वेव स इति सिद्धान्तादिनः स्त्रियामिति कपो दुर्वारत्वादिदं चिन्त्यम् ।

सखा सखायौ सखायः । एवं सखी सख्यौ सख्य इत्यत्रापि प्राप्नोति ॥

॥*॥ भवद्भगवदघवतामोद्वावे ॥*॥ भवद्भगवदघवतामोद्वावे प्रयोजनम् । यथेह भवति भोः भगोः अघोरिति; एवं भवति भगवत्यघवतीत्यत्रापि स्यात् ॥ एतान्यस्याः परिभाषायाः प्रयोजनानि यदर्थमेषा परिभाषा कर्तव्या, एतस्यां [च सत्यां] नार्थो झल्ग्रहणेन ॥

तदेतदनन्यार्थं झल्ग्रहणं कर्तव्यं नुम्प्रतिषेधो वा वक्तव्यः ? ॥ उभयं न वक्तव्यम् । उपरिष्टाज्झल्ग्रहणं क्रियते तत्पुरस्तादपकक्ष्यते ॥ एवमपि सूत्रविपर्यासः कृतो भवति ॥ एवं तर्हि योगविभागः करिष्यते 'उगिदचां सर्वनामस्थानेऽधातोः' । 'युजेरसमासे' । ततो–'नपुंसकस्य' । नपुंसकस्य [च] नुम् भवति । 'झल' इत्युभयोः शेषः । ततो'ऽचः' । अजन्तस्य च नपुंसक[लिङ्ग]स्य नुम्भवति ॥

यद्यपि तावदेतदुगित्कार्यं परिहृतमिदमपरं प्राप्नोति–शातनितरा पातनितरा । 'उगितो नद्या घादिषु ह्रस्वो भवती'त्यन्यतरस्यां ह्रस्वत्वं प्रसज्येत, नित्यं चेष्यते ॥ 'उगितो या नदी'–एवमेतद्विज्ञायते ॥ उगित एषा नदी ॥

प्र.] 'पातेर्डुम्सु'न्निति प्रत्ययस्योगित्वादुगितश्चेति ङीप् । **सखी सख्याविति** । 'सख्यशिश्वीति भाषाया'मिति ङीष् । अनङ्णित्वे अत्र प्राप्नुतः । ङीष्विधानं तु सखीभ्यामित्याद्यर्थं स्यात् । **भवद्भगवदिति** । यदा संबुद्ध्या भवदादयो विशेष्यन्ते तदा भवत्यादीनामपि प्रसङ्गः । यदा त्ववशब्दो विशेष्यते तदा येन नाव्यवधानमित्येकवर्णव्यवधाने ओत्वं प्रवर्तते । भवत्यादौ तु वर्णद्वयव्यवधानादोत्वाऽभावः । तदभावात्तत्संनियोगविहितस्य रुत्वस्याऽप्यभाव इति केचिदाहुः । **नार्थो झल्ग्रहणेनेति** । गोमत्याद्यर्थेनेत्यर्थः । **पुरस्तादिति** । 'उगिदचां सर्वनामस्थानेऽधातोर्झल' इति । ततो 'युजेरसमासे' 'नपुंसकस्याच' इति । अत्र 'झल' इति वर्तते ।

उभयोः शेष इति । युजेर्झलन्तत्वाऽव्यभिचारादाद्यन्तावेव योगावपेक्ष्येते । 'झ'लिति लुप्तषष्ठीकं पदमाश्रीयते । **शातनितरेति** । शातिपातिभ्यां करणे ल्युटि कृते गौरादिषु शातन-पातनेति पाठान्ङीष् । **उगितो या नदीति** । उगिच्छब्दोच्चारणेनेति

उ.] 'समासान्तविधेरनित्यत्वात्तदभाव' इत्युचितम् । **पातेर्डुमिति** । 'सूतेः सप् प्रसवे पुमा'निति 'स्त्रिया'मिति सूत्रस्थभाष्यात् सूतेर्म्सुन्प्रत्ययो ह्रस्वश्चेति वक्तुमुचितम् । **केचिदाहुरिति** । प्रत्ययस्य प्रकृत्यंशे उत्थिताकाङ्क्षतया भवदादिविशेषणत्वमेव युक्तमिति अत्रारुचिः । भाष्ये—**एवं भवति भगेति** पाठः । भाष्ये—**योगविभाग इति** । योगविभागे क्रमभङ्गाऽभावान्न विपर्यास इति भावः । ननु 'झल' इत्यस्य सूत्रत्रयेऽपि संबन्धा'दुभयोः शेष' इत्ययुक्तमत आह—**युजेरिति** ।

ननु 'झल' इति करणे सूत्रभेदः स्यादत आह—**झलितीति** । **करण इति** ।

'उगितो या परा ॥ अत्र चैव दोषो भवति, उगितो ह्येषा परा नदी, ऐषुमतितरायां च प्राप्नोति ॥ उगितो या परा विहिता ॥ उगित एषा विहिता ॥ 'उगित' इत्येवं या विहिता ॥ एवमपि भोगवतितरायां दोषो भवति–भोगवतितरा । भोगवतीतरा ॥ तस्मादुगितो या नद्युगितो या विहितेत्येवमेतद्विज्ञास्यते ॥ एवं विज्ञायमाने शातनितरायां दोष एव ॥*॥ सिद्धं तु युवोरनुनासिकत्वात् ॥*॥ **सिद्धमेतत् ॥ कथम्? ॥ यकारवकारयोरेवेदमनुनासिकयोरिह ग्रहणम् । सन्ति हि यणः सानुनासिका निरनुनासिकाश्च ॥** [युवोरनाकौ] ॥

प्र.] भावः । इतरोऽगृहीताभिप्राय आह–**उगित एषेति ।** पूर्वेणैवाऽभिप्रायेणाह–**उगितो या परेति ।** उगिच्छब्दव्यापारेण विहितोगितः परेत्यर्थः । इतर आह–**अत्र चैवेति ।** इषवोऽस्य सन्तीतीषुमान् । 'तस्येद'मित्यण् । ङीप् । 'यस्ये'ति लोपे कृते 'उगितः परा नदी'ति विकल्पेन ह्रस्वत्वं प्राप्नोति, नित्यं चेष्यते । पूर्वोक्तेनाऽभिप्रायेणाह–**उगितो या परा विहितेति ।** ऐषुमतितरायां चाऽणन्तान्नदी विहिता न तूगितः । इतरस्तु शातनितरामाश्रित्याह–**उगित एषेति । भोगवतितरेति ।** शार्ङ्गरवादिषु 'भोगवद्गौरिमतोः संज्ञाया'मिति पाठान्ङीन् प्रत्यय 'उगित' इत्येवं न विहित इति विकल्पेन ह्रस्वत्वं न प्राप्नोति । 'उगितस्तु विहित' इति विधानाश्रयणाद्विकल्पः सिध्यति, शातनितरायां तु विकल्पः प्राप्नोति ।

सिद्धं त्विति । भाष्यकारीयमिदं वाक्यमित्याहुः । अन्ये त्वनुनासिकपरत्वादिति वाक्यमेवाऽनेन व्याख्यातमित्याहुः । अनुनासिकप्रधानत्वादिति हि तस्यार्थः । अनुनासिकयणौ 'युवू' इहानुकृतावित्यतिप्रसङ्गाऽभावः । उकारस्तु निरनुनासिक एवेत्युगित्कार्याऽभावः । **[युवोरनाकौ]** ॥

उ.] भावे स्त्रीत्वाऽनुपपत्तिरित्यर्थः । **गौरादिष्विति ।** टित्त्वान्ङीपि सिद्धे गौरादिपाठकल्पने मानञ्चिन्त्यम् । वस्तुतो 'ण्यासश्रन्थे'ति युजर्थः स पाठ आवश्यक इति तत्त्वम् । **इतर आहेति ।** 'अगृहीताभिप्राय' इति शेषः । भाष्ये–**अत्र चैव दोष इति ।** अत्र दोषः, चादैषुमतितरायामपि दोष इति भाष्यार्थः । न चोगितः परेत्यर्थेऽपि पूर्वस्मात्परस्य ह्रस्वे कर्तव्येऽणो लोपस्य स्थानिवत्त्वादैषुमतितरेत्यत्र न दोष इति वाच्यम्, बहिर्भूत'तर'निमित्तकत्वेन बहिरङ्गह्रस्वस्य स्थानिवत्सूत्रदृष्ट्या असिद्धत्वेन पूर्वत्रासिद्धीय इव तत्र स्थानिवत्त्वाऽप्रवृत्तेः । पञ्चमीसमासस्याऽनित्यत्वाच्च । **विधानाश्रयणे त्विति ।** विधानमेवाश्रीयते न तु स्वरूपपरत्वमिति भावः । भाष्ये–**सिद्धन्तु युवोरिति । केचित्तु**–युशब्द उकार उच्चारणार्थः । वस्तु केवल एव, विभक्त्यचैवोच्चारणे सहायसंपादनात् । प्रत्ययेष्वप्युकार उच्चारणार्थ एव । एवं चाऽङ्गाधिकारादङ्गसंज्ञानिमित्तय्वोरादेशविधानादतिप्रसङ्गाऽभावेन य्वोरनुनासिकत्वप्रतिज्ञाफलं चिन्त्यमिति वदन्ति । तन्न । विधेय-

आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् ॥७।१।२॥

॥*॥ आयनादिषु उपदेशिवद्वचनं स्वरसिद्ध्यर्थम् ॥*॥ **आयन्नादिषूपदेशिवद्भावो वक्तव्यः। उपदेशावस्थायामायन्नादयो भवन्तीति वक्तव्यम्॥ किं प्रयोजनम् ? ॥ 'स्वरसिद्ध्यर्थम्' । उपदेशावस्थायामायन्नादिषु इष्टः स्वरो यथा स्यादिति । शिलेयम् । तैत्तिरीयः । अक्रियमाणे ह्युपदेशिवद्भावे प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तत्वे कृते आन्तर्यत आदेशा अस्वरकाणामस्वरकाः स्युः** ॥*॥ न वा क्व चिच्चित्करणात् [उपदेशिवद्वचनानर्थक्यम्] ॥*॥ **न वा वक्तव्यम्॥ किं कारणम्?॥ 'क्व चिच्चित्करणात्' । यदयं क्व चिद्धादींश्चितः करोति,**

प्र.] आयनेयीनी ॥ आयन्नादिष्विति । अङ्गाधिकारे विधानात्प्रकृतिप्रत्ययापेक्षा बहिरङ्गा आयन्नादयः । प्रत्ययाद्युदात्तत्वं तु प्रकृतिनिरपेक्षत्वादन्तरङ्गमिति तदेव पूर्वं प्राप्नोतीत्युपदेशिवद्वचनं कर्तव्यम् । **शिलेयमिति ।** शिलेव शिलेयम् । 'शिलाया ढः' । तित्तिरिणा प्रोक्तमधीते । 'तित्तिरिवरतन्तुखण्डिके'ति छण् ।

अस्वरकाः स्युरिति । प्रवृत्तिकालापेक्षयेदमुच्यते । प्रयोगे तु स्वररहितस्याऽच उच्चारणाऽभावादनुदात्तं पदमेकवर्जमिति वचनाच्चाऽनिष्टस्वराः प्राप्नुवन्ति ।

केचित्त्वा**न्तर्यत** इत्यन्यथा व्याचक्षते, यथानुदात्तोच्चारणे गात्राणां स्रंसनं, स्वरस्य स्निग्धता, कण्ठविवरस्य महत्त्वं च भवति एवं व्यञ्जनोच्चारणेऽप्ययोग्यत्वादनुदात्तधर्मोपजनो व्यञ्जनेषु नास्ति,–तदेव**मस्वरकाणा**मुदात्तत्वरहितानाम**स्वरका** इष्टोदात्तत्वरहितत्वादनुदात्ता एव स्युरित्यर्थः ।

नवेति । सत्यप्यङ्गाधिकारेऽङ्गत्वमनपेक्ष्य प्रत्ययोत्पत्तिकाल एवायन्नादयो भवन्तीति चित्करणेन ज्ञाप्यते । तत्राऽङ्गानपेक्षत्वादसति बहिरङ्गत्वे परत्वान्नित्यत्वाच्च

उ.] विषये उच्चारणार्थानामपीत्संज्ञायास्तस्य लोप इति सूत्रे उक्तत्वात् । तस्मादनुनासिकयण्विशिष्टयोर्युवोरिमावादेशाविति भाष्यतात्पर्यम् । **उकारस्त्विति ।** 'ल्युडादि'ष्विति शेषः । यत्र ल्युडादावनाकाविष्येते ते अनुनासिकयणः पठनीयाः । 'भुज्यु'रित्यादयश्च निरनुनासिका इति दोषाऽभावः । [**युवोरनाकौ**] ॥

आयनेयी । आयनादिषु 'झोऽन्त' इत्यन्तादेशोऽपि गृह्यत इति 'धातो'रिति सूत्रस्थभाष्यस्वरसः । 'ठस्येक' इत्ययमपि गृह्यत इति **कश्चित् ।** ननु परत्वादाद्युदात्तात्पूर्वमायनादयो भविष्यन्तीत्यत आह—**अङ्गाधिकारे इति । प्रकृतिनिरपेक्षत्वादिति ।** 'प्रत्ययसन्नियोगशिष्टत्वा'दित्यपि बोध्यम् । उपदेशिवद्वचने तु कृताऽऽयनादीनामेव फन्नादीनामाद्युदात्तत्वविशिष्टानां विधानान्न दोषः । अन्यथा 'शिलेय'मित्यादौ व्यञ्जनस्यैवादेशादन्तोदात्तत्वं प्राप्नोति, मध्योदात्तत्वं चेष्यत इति भावः । ननु स्वररहितस्याऽच उच्चारणाऽयोगात्कथमस्वरकाः स्युरत आह—**प्रवृत्तिकालेति । अनुदात्तधर्मेति ।** अनुदात्तत्वरूपधर्मेत्यर्थः । **परत्वान्नित्यत्वा-**

'अग्राद्यद्धच्छौ च' तज्ज्ञापयत्याचार्यः,–'उपदेशावस्थायामायन्नादयो भवन्ती'ति ॥ कथं कृत्वा ज्ञापकम् ? ॥ चित्करणे एतत्प्रयोजनं 'चित' इत्यन्तोदात्तत्वं यथा स्यादिति । यदि चोपदेशावस्थायामायन्नादयो भवन्ति ततश्चित्करणमर्थवद्भवति ॥

॥ * ॥ तत्रोणादिप्रतिषेधः ॥ * ॥ तत्रोणादीनां प्रतिषेधो वक्तव्यः । शङ्खः षण्ढ इति ॥*॥ धातोर्वैयङ्वचनात् ॥*॥ अथ वा यदयमृतेरीयङिति धातोरीयङं शास्ति तज्ज्ञापयत्याचार्यो 'न धातुप्रत्ययानामायन्नादयो भवन्ती'ति । यदि हि स्युः 'ऋतेश्छ'ङित्येव ब्रूयात् । सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति न च ऋतेश्छङा सिध्यति । छङि सति वलादिलक्षण इट् प्रसज्येत, इटि कृतेऽनादित्वादादेशो न स्यात् । इदमिह संप्रधार्यम् । इट क्रियतामादेश इति; किमत्र कर्तव्यम् ? । परत्वादिडागमः ॥ नित्य आदेशः । कृतेऽपीटि प्राप्नोत्यकृतेऽपि ॥ अनित्य आदेशो नहि कृत इटि प्राप्नोति ॥ किं कारणम् ? ॥ अनादित्वात् ॥ अन्तरङ्गस्तर्ह्यादेशः ॥ काऽन्तरङ्गता ?'' इदानीमेवह्युक्तमायन्नादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति । तदेतदृतेरीयङ्वचनं ज्ञापकमेव 'न धातुप्रत्ययानामायन्नादयो भवन्ती'ति ॥

॥ * ॥ प्रातिपदिकविज्ञानाच्च पाणिनेः सिद्धम् ॥ * ॥ प्रातिपदिक-

---

प्र.]कृतेष्वायन्नादिषु[2] प्रत्ययाद्युदात्तत्वं भवतीतीष्टस्वरसिद्धिः । **तत्रोणादिप्रतिषेध इति ।** ये त्वनुणादयः खल्घञादयस्तेषु खघयोरित्संज्ञया भाव्यम् । 'खित्यनव्ययस्य' 'चजोः कुघिण्ण्यतो'रिति लिङ्गात् । तद्धितेषु सावकाशेनादेशविधानेनेत्संज्ञा न बाध्यते । **नित्य आदेश इति** । उपदेशे यः प्रत्ययादिस्तस्याऽऽदेश इति कृतेऽपीटि प्राप्नोति । **अनादित्वादिति** । सांप्रतिकं प्रत्ययादित्वमाश्रित्यादेशो विधीयते ।

उ.] **चेति**। इदं चिन्त्यम्, आद्युदात्तत्वविशिष्टानामेव प्रत्ययानां विधानात् । तस्माच्चित्करणेन प्रत्ययसंबन्ध्यादेशानामुत्पत्तिसन्नियोगशिष्टकार्यादपि पूर्वं प्रवृत्तिर्ज्ञाप्यत इति भाष्यार्थः । प्रत्ययविध्येकवाक्यतया कृतायनादेशानामेवाऽऽद्युदात्तत्वविशिष्टानां तत्तच्छास्त्रैर्विधानमिति तात्पर्यम् । **न बाध्यत इति** । ततश्चोपदेश एवेत्त्वे लोपे चाऽऽदेशाऽप्राप्तिरिति 'उणादीना'मित्येवोक्तमिति भावः । इटि कृते प्राप्त्यभावात्कथमादेशानां नित्यत्वमत आह—**उपदेशे इति** । 'इति मन्यत' इति शेषः ।

सांप्रतिकमिति । 'उपदेश' इति पदाऽभावादित्यर्थः । सांप्रतिकसद्भावे भूतपूर्वगत्याश्रयणस्याऽयुक्तत्वादिति भावः । भाष्ये–**ज्ञापकमेवेति** । न च 'छसुना' विति वाच्ये 'तरबीयसुना'वित्युक्तिः प्रातिपदिकप्रत्ययानामप्यादेशाऽभावं ज्ञापयेत्; आयनादीनां निर्विषयत्वापत्तेः । फघछानां धातुप्रत्ययेष्वभावात् । चफञादीनां चित्त्वस्य ण्यक्षत्रियेत्यादिनिर्देशानां चाऽसङ्गत्यापत्तेश्चेत्याहुः । भाष्ये–**प्रातिपदिक-**

विज्ञानाच्च भगवतः पाणिनेराचार्यस्य सिद्धम् ॥ * ॥ उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ * ॥ [**आयनेयीनीयियः**] ॥

झोऽन्तः ॥ ७।१।३ ॥

॥ * ॥ झादेशे धात्वन्तप्रतिषेधः ॥ * ॥ **झादेशे धात्वन्तस्य प्रतिषेधो वक्तव्यः । उज्झिता । उज्झितुमिति** ॥ * ॥ प्रत्ययाधिकारात्सिद्धम् ॥ * ॥ [**प्रत्ययाधिकारात्सिद्धमेतत् ॥कथं ?॥**] **प्रत्ययग्रहणं प्रकृतमनुवर्तते ॥ क्व प्रकृतम् ? ॥ 'आयनेयीनीयियः फढखछघां प्रत्ययादीना'मिति** ॥ * ॥ प्रत्ययाधिकारात्सिद्धमिति चेदनादेरादेशवचनम् ॥ * ॥ **प्रत्ययाधिकारात्सिद्धमिति चेदनादेरादेशो वक्तव्यः । अपि नः श्वो [वो] विजनिष्यमाणाः पतिभिः सह शयान्तै ॥ एवं तर्हि प्रत्ययग्रहणमनुवर्तते आदिग्रहणं निवृत्तम् ॥ कथं पुनः समासनिर्दिष्टानामेकदेशोऽनुवर्तते एकदेशो वा निवर्तते** ॥ * ॥ असमासनिर्देशात्सिद्धम् ॥ * ॥ [**असमासनिर्देशात्सिद्धमेतत् ।**] **असमासनिर्देशः करिष्यते—'प्रत्ययस्यादीना'मिति ॥ स तर्ह्यसमासनिर्देशः कर्तव्यः ? ॥**

प्र.] **प्रातिपदिकविज्ञानादिति** ।' पक्षान्तरैरपि परिहाराः संभवन्ती'त्यव्युत्पत्तिपक्षाश्रयः । [**आयनेयी**] ॥

झोऽन्तः । इह प्रत्ययग्रहणेऽनुवर्त्तमाने एकसमासनिर्दिष्टमादिग्रहणमप्यनुवर्तते । तथा च 'शयान्तै' इत्यत्राऽनादित्वाज्झस्यान्तादेशो न स्यादिति प्रत्ययग्रहणं नानुवर्त्यमिति मत्वाह—**झादेश इति** । झकारोपदेशस्तु प्रत्यय इव लाघवार्थः स्यात् । **शयान्ता इति** । शीङ 'उपसंवादाशङ्कयोश्चे'ति लेट् । तस्य झः । 'लेटोऽडाटा'वित्याडागमे टेरेत्वं । 'वैतोन्यत्रे'त्यैत्वं । झोऽन्तादेशः । शब्लुक् । 'शीङः सार्वधातुके गुण' इति गुणः ।

कथं पुनरिति । यदाऽर्थाऽधिकारपक्षः, उपात्तार्थशब्दाधिकारपक्षो वा तदाऽयं पर्यनुयोगः । वर्तिपदार्थस्य समुदायेऽर्थेऽन्तर्भावात्पृथगनुवृत्त्यसंभवात् । यदा त्वनाश्रितार्थं शब्दमात्रं प्रतिज्ञातस्वरितत्वमनुवर्तत इति पक्षस्तदा नास्ति चोद्या-

---

उ.] **विज्ञानाच्च पाणिनेरिति** । अत्र 'पाणिने'रित्युक्त्या 'सर्पिषा' 'यजुषे'त्यादि कतिपयातिरिक्तोणादिषु पाणिनेरव्युत्पत्तिपक्ष एवाऽभिप्रेत इति दर्शयति । वस्तुतः 'सर्पिषे'त्यादौ षत्वमपि बहुलग्रहणादिति सर्वथाऽव्युत्पत्तिरेवैतेष्विति बोध्यम् । [**आयने**] ॥

झोऽन्तः । **अनादित्वादिति** । अन्तरङ्गत्वादन्तादेशात्पूर्वमेवाऽडागम इति भावः । नन्वेवं धातुषु झकारोपदेशो व्यर्थोऽत आह—**झकारोपदेशस्त्विति** । प्रत्यये 'जुस्' 'अत्' 'अन्ते'ति त्रिरुच्चारणाऽभावाल्लाघवम्, अत्र तु बहुवर्णोच्चारणाऽभावो लाघवमिति बोध्यम् । **यदार्थाऽधिकारेति** । अर्थाध्याहारपक्षवत्तदा बोधनिर्वाहः । पदजन्योपस्थितेः शाब्दबोधाङ्गत्वेऽप्याह—**उपात्तार्थेति** । **अन्तर्भावात्**—

न कर्तव्यः । क्रियते न्यास एव ॥ कथम् ? ॥ अविभक्तिको निर्देशः, प्रत्यय आदीनामिति ॥*॥ तत्र शयान्ता इत्यनकारान्तत्वादङ्गस्याद्भावप्रतिषेधः ॥*॥ **तत्रैतस्मिन्प्रत्ययग्रहणेऽनुवर्तमाने आदिग्रहणे निवृत्ते 'शयान्तै' इत्यनकारान्तत्वादङ्गस्याऽद्भावः प्राप्नोति तस्य प्रतिषेधो वक्तव्यः** ॥*॥ सिद्धमनानन्तर्यादनकारान्तेनाऽद्भावनिवृत्तिः ॥*॥ **सिद्धमेतत् ॥ कथम् ? ॥ ['अनानन्तर्यात्'] । अनानन्तर्यादनकारान्तेनाद्भावो न भविष्यति । कथं कृत्वा चोदितं कथंकृत्वा परिहारः॥ अनकारान्तग्रहणं प्रत्ययविशेषणमिति कृत्वा चोदितम्, झकारविशेषणमिति कृत्वा परिहारः ॥ यद्यनकारान्तग्रहणं झकारविशेषणं, 'शेरते' अत्र न प्राप्नोति**॥*॥ तत्र रुटि सन्नियोगवचनात्सिद्धम् ॥*॥ **तत्र रुटि सन्नियोगः करिष्यते ॥ क एष यत्नश्चोद्यते सन्नियोगो नाम ? ॥ चकारः कर्तव्यः, 'रुट् च' ॥ किं 'च' ? ॥ यच्चान्यत्प्राप्नोति ॥ किं चान्यत्प्राप्नोति ? ॥ अद्भावः ॥ स तर्हि चकारः कर्तव्यः ? ॥ न कर्तव्यः । योगविभागः करिष्यते—'शीङः' । शीङ उत्तरस्य झस्याद्भावो भवति । ततो-रुट् । रुट् च भवति शीङ इति ॥**

प्र.] ऽवकाशः। 'सङ्ख्याव्ययादेर्ङी' बित्यतो 'दामहायनान्ताच्चे' त्यत्राऽव्ययग्रहणाननुवृत्तावपि सङ्ख्याग्रहणानुवृत्तिदर्शनात् । **तत्रेति** । अन्तरङ्गत्वादाटि कृतेऽन्तादेशापवादोऽदादेशः प्राप्नोति । अनकारान्तादङ्गात्प्रत्ययस्य परत्वात् । **सिद्धमिति** । अनकारान्तेनाऽङ्गेन प्राधान्याच्च झकार एव विशेष्यते । तत्र व्यवधानाददादेशाऽभावः । अन्तादेशस्त्ववधिमनुपादाय विधीयमानो व्यवधानेपि भवति । **शेरत इति** । प्रतिपदविधेर्बलवत्वाद्रुटि कृते व्यवधानाददादेशो न प्राप्नोति । 'निर्दिश्यमानस्यादेशा भवन्ती'ति वचनाज्झकारमात्रस्यादेशो विधीयते । तच्च रुटा व्यवधीयते । **रुटि संनियोगवचनादिति** । आगमादेशयोः सहविधानादागमेन स्थानिनो व्यवधानाऽ-

---

उ.] पृथगुपस्थित्यभावादिति भावः। **यदात्विति**—पक्षाङ्गीकार फलमाह—**सङ्ख्याव्ययादेरिति । सङ्ख्याग्रहणेति** । सङ्ख्यादिग्रहणेत्यर्थः। **अन्तरङ्गत्वादाटि कृते इति** । इदं वस्तुस्थितिकथनम् । अन्तरङ्गत्वञ्चाऽङ्गसंज्ञानपेक्षणात्, लावस्थायामेव अट्प्रवृत्तेर्वा । 'अनकारान्तादङ्गातपरप्रत्ययावयवझस्याऽ'दित्यर्थादाटः प्रत्ययभक्तत्वेन व्यवधायकत्वाऽभावादिति भावः । **प्राधान्यादिति** । तस्य स्थानित्वेन प्राधान्यम् । प्रत्ययस्त्ववयवित्वेन तद्विशेषणम् । अत्राऽङ्गस्येत्यत इत्यनुरोधातपञ्चम्या विपरिणम्यते । 'झोऽन्त' इत्यत्र त्वङ्गनिमित्तप्रत्ययावयवझस्येत्यर्थान्नाऽवध्युपादानमिति भावः । **प्रतिपदविधेरिति** । शीङो हि झस्य रुट् क्रियते, स चाऽनवकाशः । तत्राऽवश्यं प्राप्ते आरम्भादिति भावः । एतेन परत्वान्नित्यत्वाद्रुडित्यपास्तम् ।

ननु रुडपि 'झोन्त' इत्यतोऽनुवृत्तवर्णस्यैवेति रुटि सति तत्सहितस्यादेशेन भाव्यमिति कथं तस्य व्यवधायकत्वमत आह—**निर्दिश्यमानस्येति** । तादृशं झकाररूपं च व्यवहितमेवेति भावः। भाष्ये—**एवमपि पर्याय इति**। योगविभागपक्षेऽयं दोषः ।

एवमपि पर्यायः प्रसज्येत ॥ एवं तर्हि अच्शब्दस्य रुटं वक्ष्यामि ॥ तद-च्छब्दग्रहणं कर्तव्यम् ? ॥ न कर्तव्यम् । प्रकृतमनुवर्तते ?॥ क्व प्रकृतम् ? ॥ 'अदभ्यस्ता'दिति ॥ तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः ! ॥ शीङ इत्येषा पञ्चमी अदिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति, तस्मादित्युत्तरस्येति॥

शीङो रुट् ॥७।१।६॥

॥ * ॥ रुटि दृशिगुणप्रतिषेधः ॥ * ॥ **रुटि दृशिगुणः प्राप्नोति । अदृश्रन्नस्य केतव इति,-तस्य प्रतिषेधो वक्तव्यः ॥ न वक्तव्यः, परस्मिन्निति क्ङिति चेति प्रतिषेधो भविष्यति ॥ एवमदृश्रमस्य केतव इत्यत्रापि प्राप्नोति ॥ एवं तर्हि पूर्वान्तः करिष्यते** ॥ * ॥ पूर्वान्ते शीङो

प्र.] भावः । **एवमपि पर्याय इति** । अद्भावे कृते रुट् न प्राप्नोति, झस्य रुड्विधानाद-ल्विधित्वात्स्थानिवत्त्वाभावाद्रुटि कृतेऽद्भावो न प्राप्नोति व्यवधानात्ततो विरोधा-त्तुल्यबलवत्त्वाच्च पर्यायप्रसङ्गः । **एवं तर्हीति** । अच्छब्दस्य रुटि सत्यवयवावयवोपि समुदायाऽवयवो भवतीति रुटा व्यवधानाऽभावाद्गुणः शीङः प्रवर्तते ॥

शीङो रुट् । **अदृश्रन्निति** । दृशेर्लुङि झेरन्तादेशे इरितो वेत्यङि तस्य चाऽन्त-रङ्गत्वाद्गुणात्पूर्वं रुटि कृते 'ऋदृशोऽङि गुण' इति गुणप्रसङ्गः । **परस्मिन्निति** । यदा 'क्ङिति चे'त्यत्र निमित्तसप्तमीपक्षस्त्यक्तः परसप्तमीपक्ष आश्रितस्तदैतदुच्यते । 'वार्णादाङ्गं बलव'दित्यनपेक्षिते वर्णाश्रयत्वादन्तरङ्गे एकादेशे कृते तस्य परं प्रत्यादि-वद्भावान्ङिच्चसार्वधातुकं परमाश्रित्य 'क्ङिति चे'ति गुणप्रतिषेधः प्रवर्तते । येन नाप्राप्तिन्यायेन तन्निमित्त एव प्रतिषेधो गुणेन बाध्यते न तु ङित्सार्वधातुक-निमित्तः । 'प्रतिषेधाश्च बलीयांसो भवन्ती'त्युभयप्रसङ्गे प्रतिषेधः प्रवर्तते ।

अदृश्रमिति । मिबादेशस्याऽमः पित्त्वान्ङित्त्वाऽभावान्नास्ति गुणप्रतिषेधः । **एवं तर्हीति** । पूर्वान्ते रुटि अलघूपधत्वाद्गुणाऽभावः । लघूपधगुणस्यैव हि 'ऋदृशोऽङि गुण' इति गुणप्रत्यापत्तिः क्रियते । अथ वा गुणश्रुत्येक इत्युपस्थानात्तस्यैवाऽङो-

---

उ.] सहविधानबोधकचशब्दाऽभावात् । तदाह—**अद्भावे कृते इत्यादि** । चकार-करणे तु तत्करणप्रयुक्तं गौरवमेव दोष इति भावः । नन्वच्छब्दस्य रुटि तेन समुदायस्य व्यवधानाच्छीङः सार्वधातुके इति गुणो न स्यादत आह—**अच्छब्द-स्येति** । रुड्विशिष्टस्यैव सार्वधातुकत्वादिति भावः ॥ [**झोऽन्तः**] ॥

शीङो रुट् । **गुणात्पूर्वं रुटीति** । बहुलं छन्दसीति अङ्गसंज्ञानिमित्त-प्रत्ययमात्राश्रयो रुडन्तरङ्गः । गुणस्तु प्रकृतिप्रत्ययोभयाश्रयत्वाद्बहिरङ्ग इति भावः ।

कृते इति । तत्र कृतेऽपीत्यर्थः । ननु प्रतिषेधविषयोऽयं गुणः प्रतिषेधं बाधेते-त्यत आह—**येन नेति** । **तन्निमित्त एवेति** । अङ्निमित्त एवेत्यर्थः । नन्वेवमपि परत्वाद्गुणः प्रतिषेधं बाधेतेत्यत आह— **प्रतिषेधाश्चेति** । विध्युन्मूलकत्वादिति भावः । **प्रत्यापत्तिः**—प्रतिप्रसवः । यदि दृशोऽपूर्वो गुणो विधीयत इत्याश्रीयते

गुणविधिः ॥*॥ **पूर्वान्ते शीङो गुणो विधेयः । शेरते ॥ [सिद्ध्यत्येवं] सूत्रं च भिद्यते ॥ यथान्यासमेवास्तु ॥ ननु चोक्तं 'रुटि दृशिगुणप्रतिषेध' इति ॥ पूर्वान्तेऽप्येष दोषः ॥ कथम् ? ॥ अयं दृशिगुणः प्रतिषेधविषय आरभ्यते स यथा 'क्ङिति चे'त्येतं प्रतिषेधं बाधते एवमनुपधाया अपि प्रसज्येत । तस्मादुभाभ्यामेव दृशेरक्प्रत्ययान्तरं वक्तव्यं, पितरं च दृशेयं मातरं च दृशेयमित्येवमर्थम्** ॥*॥ झादेशादाड्लेटि ॥*॥ **झादेशादाड् लेटि भवति विप्रतिषेधेन । झादेशस्यावकाशः–लुनते । लुनताम् । अलुनत । आटोऽवकाशः–पताति दिद्युत् । उदधिं च्यावयाति । इहोभयं प्राप्नोति-'अपि नः श्वो विजनिष्यमाणाः पतिभिः सह शयान्तै' । आड् लेटि भवति विप्रतिषेधेन ॥ स तर्हि पूर्वविप्रतिषेधो वक्तव्यः ?** ॥*॥ न वा नित्यत्वादाटः ॥*॥ **नवा वक्तव्यः ॥ किं कारणम् ? ॥ 'नित्यत्वादाटः' । नित्यआडागमः ॥ स कथं नित्यः ? ॥ यद्यनकारान्तग्रहणं झकारविशेषणम् ॥ अथ हि प्रत्ययविशेषणम् ? ॥ झादेशोपि**

प्र.] विशेषणाद्येननाव्यवधानमित्येकवर्णव्यवहितस्य गुणो भवति । रुटि कृते न भवति । **शेरत इति ।** रुकि सत्यनिगन्तत्वाद्गुणप्रसङ्गः । **पूर्वान्तेपीति ।** 'क्ङिति चे'ति गुणे प्रतिषिद्धे अपूर्वः 'ऋदृशोऽङि गुण' इति गुणो विधीयते । स यथैव प्रतिषेधविषये प्रवर्तते तथैवाऽनुपधाया अपि इकः प्रवर्तेत । अङ्ग्रहणं च श्रुतत्वात् दृशेरेव विशेषणं नेकः । **दृशेरक्प्रत्ययान्तरमिति ।** यश्च लिङ्याशिष्यङ्यश्चेरितीवेत्यङ् तत्प्रसङ्गे छन्दसि दृशेरग्वक्तव्यः । अथ भाषायामदर्शन्नित्यत्र ङित्सार्वधातुकनिमित्तः प्रतिषेधः कस्मान्न भवति ?; क्ङितीतिनिमित्तसप्तमीविज्ञानाद्वार्णादाङ्गं बलीय इत्येकादेशात्पूर्वमेव गुणविधानाद्वा, स्थानिवद्भावाद्वा, एकादेशस्य व्यवधानात्कृतार्थस्य वा प्रतिषेधस्य परत्वाद्गुणेन बाधनात् । **झादेशोपि नित्य इति ।** द्वयोश्च नित्यत्वे 'न वा नित्यत्वादाट' इति न शक्यते वक्तुम् । झविशेषणपक्षेऽप्यभेदाश्रयेणाऽऽटो नित्यत्वम् । भेददर्शने तु शब्दान्तरप्राप्त्याऽऽडप्यनित्यः । **यदि**

उ.] तदाऽपि न दोष इत्याह–**अथवेति । अनुपधाया अपीति ।** निषेधसूत्राणां परिभाषावद्विध्येकवाक्यतया क्ङितीत्यस्य उपधाया इत्यस्य च बाधे विनिगमकाऽभावादिति भावः । नन्विकोऽङ्ग विशेषणान्न दोष इत्युक्तन्तत्राह–**अङ्ग्रहणञ्चेति ।** लिङ्गाच्छ्रुतेर्बलवत्त्वादिति भावः । **लिङ्याशिष्यङिति ।** 'दृशेय'मित्यत्राऽस्याऽप्राप्तिः । **स्थानिवद्भावाद्वेति ।** 'अचः परस्मि'न्नित्यनेन । **कृतार्थस्य वेति ।** 'भिन्न' इत्यादौ । अत्र विधेरेव निषेधापवादकत्वेन 'निषेधाश्च बलीयांस' इत्यस्याऽविषय इति भावः । **झादेशादिति ।** पूर्वप्रतिषेधवार्तिकमाटोऽन्तरङ्गत्वं लावस्थायामाटः प्रवृत्तिं चानभ्युपगम्येति बोध्यम् । अत्रत्यसिद्धान्तोऽप्येवमेव, 'शयान्तै' इत्यत्र पूर्वमाटोऽप्रवृत्तौ अदादेशः स्यात्पूर्वमाटि तु तेन व्यवधानान्नाऽदादेश इति भावः ।

नित्यः । * अन्तरङ्गलक्षणत्वाच्च * । अन्तरङ्गः खल्वपि आडागमः ॥ कथमन्तरङ्गः ?॥ यदि प्राग्लादेशाद्धात्वधिकारः ॥ अथ हि लादेशे धात्वधिकारोऽनुवर्तते उभयं समानाश्रयम् ॥ यद्येव अनकारान्तग्रहणं प्रत्ययविशेषणम्, अथापि लादेशे धात्वधिकारोऽनुवर्तते उभयथापि पूर्वविप्रतिषेधेन नार्थः ॥ कथम् ? ॥ 'बहुलं छन्दसी'त्येवमत्र शपो लुङ् भविष्यति । तत्राऽनत इति प्रतिषेधो भविष्यति ॥ [शीङो रुट्] ।

वेत्तेर्विभाषा ॥७।१।७॥ बहुलं छन्दसि ॥७।१।८॥
अतो भिस ऐस् ॥७।१।९॥ बहुलं छन्दसि ॥७।१।१०॥

[॥ * ॥ इदं द्विःक्रियते एकं शक्यमकर्तुम् ॥ * ॥] इदं 'बहुलं छन्दसी'ति द्विःक्रियते एकं शक्यमकर्तुम् ॥ कथम् ? ॥ यदि तावत्पूर्वं क्रियते परं न करिष्यते, 'अतो भिस ऐ'सित्यत्र 'बहुलं छन्दसी'त्येतदनुवर्तिष्यते । अथ परं क्रियते पूर्वं न करिष्यते, 'बहुलं छन्दसी'त्यत्र रुडप्यनुवर्त्तिष्यते ॥ अपर आह—[॥ * ॥ उभे बहुलग्रहणे एकं छन्दोग्रहणं शक्यमकर्तुम् ॥ * ॥] उभे बहुलग्रहणे एकं छन्दोग्रहणं शक्यमकर्तुम् ॥ कथम् ? ॥ इदमस्ति 'वेत्तेर्विभाषा' । ततः 'छन्दसि' । छन्दसि च विभाषा । ततः ['अतो भिस ऐस् ।'] अतो भिस ऐस् भवति । छन्दसि विभाषेति ॥

अतो भिस ऐस् ॥७।१।९॥

इह वृक्षैः प्लक्षैरिति परत्वादेत्त्वं प्राप्नोति । [एत्वे कृते विहतनिमित्तत्वा-

---

प्र.] प्राग्लादेशादिति । तदा प्रत्ययमात्रापेक्षत्वादाडन्तरङ्गः ॥ [शीङो रुट्] ॥

वेत्तेर्विभाषा । बहु[लं छन्दसि] । **अतो भिस ऐसित्यत्रेति** । वाक्यभेदेन संबन्धाद्भाषायामपि ऐस् भवति । **छन्दसि च विभाषेति** । प्रत्ययमात्रस्य छन्दसि रुड्विधीयते विभाषा । व्यवस्थितविभाषाविज्ञानाच्च यथाप्रयोगं रुड्विधिः । [वेत्ते] ।

अतो भिस ऐस । **परत्वादिति** । एत्वस्याऽवकाशो—वृक्षेष्विति । ऐसोऽवकाशः कृत एत्वे। प्रागेत्वादुभयप्रसङ्गे परत्वादेत्वप्रसङ्गः । मुख्यशब्दार्थाश्रयणेनाऽनवकाशं

उ.]शब्दान्तरप्राप्त्या आटोऽनित्यत्वं स्यादित्याशङ्क्याह—**अभेदाश्रयेणेति** । स्थानिविशेषमनादृत्य कार्यमात्रस्याऽभेदाश्रयेणेत्यर्थः । **भेदेति** । कार्यिभेदात्कार्यभेदाश्रयण इत्यर्थः । [शीङो रुट्] ॥

वेत्तेर्विभाषा । ननु बहुलग्रहणाऽभावे 'शीङो रु'डिति सूत्रभाष्योक्ते'ऽदृश्र'-मित्यादौ रुड् न स्यादत आह—**प्रत्ययमात्रस्येति** । नन्वेवमपि सर्वस्य प्रत्ययमात्रस्य विभाषा रुट् स्यादत आह—**व्यवस्थितेति** । [वेत्तर्विभाषा] ।

अतो भिसः । **मुख्यशब्दार्थेति** । साम्प्रतिकेत्यर्थः । एवञ्चैत्वमपवादत्वा-

दैस्त्वं न भविष्यति । ॥*॥ एत्वं भिसि परत्वाच्चेदतऐस् क्व भविष्यति? ॥*॥]

ऐस्भाव इदानीं क्व भविष्यति ? ॥ * ॥ कृते एत्वे भौतपूर्व्यात् ॥ * ॥ **कृते एत्वे भूतपूर्वमकारान्तमिति ऐस् भविष्यति** ॥ * ॥ ऐस्तु नित्यस्तथा सति ॥ * ॥ **एवं सति नित्य ऐस्भावः, कृतेऽप्येत्वे प्राप्नोत्यकृतेऽपि प्राप्नोति । नित्यत्वादैस्त्वे कृते विहतनिमित्तत्वादेत्वं न भविष्यति ॥**

॥ * ॥ एत्वं भिसि परत्वाच्चेदत ऐस् क्व भविष्यति ?
कृते एत्वे भौतपूर्व्यादैस्तु नित्यस्तथा सति ॥ * ॥

नेदमदसोरकोः ॥७।१।११॥

इमौ द्वौ प्रतिषेधावुच्येते उभौ शक्यावववक्तुम् ॥ कथम् ? ॥ एवं वक्ष्यामि–'इदमदसोः का'दिति; तन्नियमार्थं भविष्यति-'इदमदसोः कादेव नान्यत' इति ॥[नेदमदसोरकोः] ॥

टाङसिङसामिनात्स्याः ॥७।१।१२॥

किमर्थमिनादेश उच्यते न नादेश एवोच्येत ?॥ का रूपसिद्धिः–वृक्षेण प्लक्षेण ? ॥ एवं योगविभागः करिष्यते ॥ कथम् ? ॥ इदमस्ति 'बहुवचने झल्येत्' । 'ओसि च' । ततः–'आङि च' । आङि च परतोऽत एत्वं भवति—वृक्षेण प्लक्षेण । तत 'आपः संबुद्धौ च' । आपः [सम्बुद्धौ च—] **आङि च ओसि चेति ॥ नैवं शक्यम्—इह हि 'अनेने'ति इद्रूपलोपः प्रसज्येत ॥ झलि लोपः करिष्यते ॥ न शक्यो झलि लोपः कर्तुम्—इह हि**

प्र.] मत्वा पृच्छति—**ऐस्भाव इदानीमिति । कृत एत्वे इति ।** साम्प्रतिकाऽभावे भूतपूर्वगतिराश्रीयते । ननु नाऽप्राप्त एत्वे ऐसारभ्यमाणस्तस्याऽपवादो युक्तः, उत्सर्गापवादयोश्चाऽयुक्तो विप्रतिषेधः । एवं तर्हि पूर्वपक्षवादिनोत्सर्गापवादमनाश्रित्य चोदितमिति तदनुसारेणैव सिद्धान्तवादी परिहरति—**ऐस्तु नित्य इति ॥**

टाङसिङसाम् । आङि चेति । स्थानिवद्भावान्नादेशे एत्वं विज्ञायते । **अनेनेति ।** नस्य हलादित्वाल्लोपे सति एनेति प्राप्नोति । **झलि लोप इति ।** 'हलि-लोप' इत्यपनीय 'झलि लोप' इति सूत्रं कर्तव्यम् । नकारस्तु झल्न भवतीति

उ.] द्बाधित्वा ऐसिति भावः। **अनाश्रित्येति ।** सर्वथाऽसंभवे एव बाधकत्वमिति वार्तिकरीत्येत्यर्थः । **'तथा सती'**त्यनेनाऽनवकाशत्वमेव दृढं कृतं । कृते चारितार्थ्यमङ्गीकृत्य परत्वादेत्वमित्यङ्गीकारे इति हि तदर्थः । **अङ्गीकार** इत्यनेनाऽनवकाशत्वं सूचितम् । [**अतो भिस ऐस्**] ॥

टाङसि । नादेशे आङोऽभावादाह-**स्थानिवद्भावादिति ।** नच परत्वादेत्वे नादेशविधायकवैयर्थ्यापत्तिः । तत्सामर्थ्यादेव पूर्वं नादेशे एत्वमिति क्रमाश्रयणा-

दोषः स्यात्—अया विष्टेति ॥ एवं तर्हि अन् लोपापवादो विज्ञास्यते ॥ कथम् ? ॥ एवं वक्ष्यामि-'अन् ने च आपि चे'ति । तन्नकारग्रहणं कर्तव्यम् ? ॥ न कर्तव्यम् । क्रियते न्यास एव-लुप्तनिर्दिष्टो नकारः ॥ यद्येवं 'नोपधाया' इति दीर्घत्वं प्राप्नोति ॥ सौत्रो निर्देशः ॥ अथ वा नपुंसकनिर्देशः करिष्यते ॥

अथ किमर्थमाादत्युच्यते, न अदेवोच्येत ॥ का रूपसिद्धिः-वृक्षात्प्लक्षात् ? ॥ सवर्णदीर्घत्वेन सिद्धम् ॥ न सिध्यति । 'अतो गुणे पररूप'मिति पररूपत्वं प्राप्नोति ॥ अकारोच्चारणसामर्थ्यान्न भविष्यति ॥ यदि प्राप्नुवन्विधिरुच्चारण-सामर्थ्याद्बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति ॥ नैष दोषः । यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते । पररूपं प्रत्यकारोच्चारणमनर्थकं, सवर्णदीर्घस्य पुनर्निमित्तमेव ॥

प्र.] लोपाऽभावः । **अयेति** । इदमश्चतुर्थ्येकवचनस्य 'सुपां सुलु'गिति याদेशः । तस्या झलादित्वादिद्रूपलोपाऽप्रसङ्गाद्धलि लोप इति वक्तव्यं, तथा चानेनेति न सिध्यति । **एवं तर्हीति** । नश्च आप् च नाप् , तस्मिन्परत इदमोऽनादेश इति सूत्रार्थ आश्रीयते । **लुप्तनिर्दिष्ट इति** । निर्दिश्य लुप्त इत्यर्थः । यद्येवं नलोपस्या-ऽसिद्धत्वाद्दीर्घत्वं प्राप्नोति—यथा राजेति । नैष दोषः । 'छन्दोवत्सूत्राणि भवन्ति' 'सुपां सुलु' गिति लुकि कृते 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणप्रतिषेधाद्दीर्घत्वाऽभावः । **सौत्र इति** । सूत्रे कृतः सौत्रः । 'कृतलब्धे'त्यण् । **अकारोच्चारणसामर्थ्यादिति** । अन्यथा तकार एव विधीयेत । 'आदेः परस्ये'त्यादेस्तकारे विहिते संयोगान्तलोपे च 'वृक्ष'दिति सिध्यति । तदेवं भाष्यकारेण नादेशोऽदादेशश्च व्यवस्थापितः । **अन्ये** त्वतिजरसिनाऽतिजरसादिति सिद्धये इन आच्च विहितावित्याहुः सन्निपात-परिभाषाया अनित्यत्वाज्जरसादेशं वदन्तः । **भाष्यकारस्तु**—सन्निपातपरिभाषा-माश्रित्य जरसादेशमनभ्युपयन्नतिजरेणाऽतिजरादिति भाव्यमिति मत्वा गौरवमुद्भा-वितवान् । [**टाङसिङसामिनात्स्याः**] ॥

उ.] ददोषः । **लोपे**-इदो लोपे । **नश्चाप्चेति** । 'अन् नापी'ति छेद इत्यर्थः । 'लुप्तनिर्दिष्ट' इत्यत्र 'पूर्वकालैके'ति समासे पूर्वं लुप्तः पश्चान्निर्दिष्ट इत्यर्थः प्रतीयते सोऽयुक्त इत्यत आह-**निर्दिश्येति** । भाष्यकारवचनात्परकालस्याऽपि पूर्वनिपात इति भावः । द्वितीयो नकारः पदान्तत्वाल्लुप्त इति तात्पर्यम् ।

ननु सूत्रेऽपि लक्षणानुसारेणैव निर्देशो युक्त इत्ययं परिहारोऽयुक्त इत्यत आह-**छन्दोवदिति** । छान्दसत्वानाश्रणेऽपि परिहारमाह-भाष्ये—**अथवेति** । शब्दस्वरूपं विशेष्यमित्याशयः । प्रत्याख्यानेनेदं ध्वन्यते—'एतत्क्लेशपरिहार्थ एवे-कारो न त्वस्य फलान्तरकल्पनेऽभिनिवेष्टव्य'मितिदिक् । **अनभ्युपयन्निति** । इणः शतरि रूपम् । इदं 'जराया' इति सूत्रे स्फुटीभविष्यति । **इति भाव्यमिति** ।

ङेर्यः ॥७।१।१३॥

किमिदं चतुर्थ्येकवचनस्य ग्रहणमाहोस्वित्सप्तम्येकवचनस्य ग्रहणं? ॥ कुतः सन्देहः? ॥ समानो निर्देशः ॥ चतुर्थ्येकवचनस्य ग्रहणम् ॥ कथं ज्ञायते? ॥ 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवे'ति ॥ इहापि तर्हि चतुर्थ्येकवचनस्य ग्रहणं स्यात्,-'ङेराम्नद्याम्नीभ्यः'॥ एवं तर्हि 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षण'मितीह चतुर्थ्येकवचनस्य ग्रहणं व्याख्यास्यामस्तत्र सप्तम्येकवचनस्येति ॥ [ङेर्यः] ॥

सर्वनाम्नः स्मै ॥७।१।१४॥

॥ * ॥ अश एकादिष्टत्वात्स्मायादीनामुपसङ्ख्यानम् ॥ * ॥ अश एकादिष्टत्वात्स्मायादीनामुपसङ्ख्यानं कर्तव्यम्-अथो अत्रास्मै, अथो अत्रास्मात्, अथो अत्रास्मिन्निति; एकादेशे कृते 'अत' इति स्मायादयो न

प्र.] ङेर्यः । कुतः सन्देह इति । प्रयोगे 'वृक्षाये'त्यादौ चतुर्थ्यर्थावगमादयुक्तः सन्देह इति भावः । इतरो लक्षणमात्रशरणो भूत्वाऽऽह-समानो निर्देश इति । लक्षणप्रतिपदोक्तयोरिति । चतुर्थ्येकवचनस्य 'ङेः' इति रूपं प्रतिपदोक्तम्। सप्तम्येकवचनस्यतु 'घेर्ङिती'तिगुणे कृते 'ङे'रिति लाक्षणिकं रूपम् । इहापि तर्हीति । 'ङे'रितिषष्ठ्यन्तं रूपमुपात्तं, तच्चोभयोरपि लाक्षणिकमितिपरिभाषाया अयमविषयः । अथ प्रत्ययात्पूर्वस्य भागस्य लाक्षणिकत्वप्रतिपदोक्तत्वसंभवापेक्षा परिभाषाप्रवृत्तिस्तदाऽन्यत्रापि प्रवर्तेत । एवं तर्हीति। लिङ्गदर्शनं चास्य—'तस्मै प्रभवति सन्तापादिभ्यः' । 'तदस्यां प्रहरणमिति क्रीडायां ण'इति ॥ ['ङेर्यः'] ॥

सर्वनाम्नः स्मै । अश एकादिष्टत्वादिति । लोकेऽर्थप्रतिपादनाय वाक्यमु-

---

उ.] इत्येव भाव्यमित्यर्थः । नच विभक्त्यादेशेभ्यः परत्वाज्जरसादेशोऽतिजरसेत्याद्यपीति-'इत्येवे'त्यसङ्गतम् । 'अतिजरांसी'त्यत्र जसः शिभावे कृते नुम्जरसोः प्राप्तौ नुम् विप्रतिषेधेनेति 'जराया' इति सूत्रस्थभाष्येण विभक्तिवज्ञानप्रकृतिप्रत्ययोभयापेक्षजरसादेशापेक्षया विभक्तिकार्याणामन्तरङ्गत्वात्पूर्वं प्रवृत्तिस्वीकारेणाऽदोषात् । 'टाङसी'त्यादीनामङ्गनिमित्तटादीनामित्यर्थ इति नोभयापेक्षत्वम् । एतेन प्रत्ययविशेषापेक्षत्वेनादेशा बहिरङ्गा इत्यपास्तम् । तादृशबहिरङ्गत्वस्य भाष्ये क्वाप्याश्रयणाऽभावात् । किञ्च परत्वाज्जरसादेशे एतत्कैयटग्रन्थस्याऽसंभवदुक्तिकतैव, पूर्वं जरसादेशे इनाद्यप्राप्त्या तदभावपक्षे च तस्याऽप्राप्त्या 'सन्निपातपरिभाषयाऽनभ्युपय'न्नित्यस्याऽसङ्गतत्वादिति दिक् ॥ [टाङसिङसामिनात्स्याः ।]

ङेर्यः । 'ङे'रित्यत्र प्रकृतिरूपस्य लाक्षणिकत्वादि कथ्यत इत्याह-चतुर्थ्येकवचनस्येति । [ङेर्यः] ।

सर्वनाम्नः । पदसंस्कारपक्षे, स्वार्थद्रव्यलिङ्गादिक्रमेणाऽन्वाख्यानपक्षे च

प्राप्नुवन्ति ॥ किं पुनः कारणमेकादेशस्तावद्भवति न पुनः स्मायादयो, न परत्वात्स्मायादिभिर्भवितव्यम् ? ॥ न भवितव्यम् ॥ किं कारणम् ? ॥ ॥ * ॥ नित्यत्वादेकादेशः ॥ * ॥ नित्य एकादेशः कृतेष्वपि स्मायादिषु प्राप्नोत्यकृतेष्वपि । नित्यत्वादेकादेशे कृते 'ऽत' इति स्मायादयो न प्राप्नुवन्ति ॥

किमुच्यते अश इति, नेहापि कर्तव्यम्—अत्रास्मै अत्रास्मात् अत्रास्मिन्निति; एकादेशे कृते अत इति स्मायादयो न प्राप्नुवन्ति ॥ * ॥ आनुपूर्व्या सिद्धमेतत् ॥ * ॥ नात्राऽकृतेषु स्मायादिषु हलादिर्विभक्तिरस्ति, हलादौ च इदूपलोपो न चाऽकृते इदूपलोपे एकादेशः प्राप्नोतितदानुपूर्व्या सिद्धम् ॥ तत्तर्ह्युपसङ्ख्यानं कर्तव्यम् ? ॥ * ॥ न वा बहिरङ्गलक्षणत्वात् ॥ * ॥ न वा कर्तव्यम् ॥ किं कारणम् ? ॥ 'बहिरङ्गलक्षणत्वात्' । बहिरङ्गलक्षण एकादेशोऽन्तरङ्गाः स्मायादयः ॥ * ॥ 'असिद्धं बहिरङ्गमन्तरङ्गे' ॥ * ॥

जसः शी ॥७।१।१७॥ जश्शसोः शिः ॥७।१।२०॥

किमर्थं शीभावः शिभावश्चोच्यते, न शिभाव एवोच्येत ? ॥ का रूपसिद्धिः—ते ये के ॥ आद्गुणेन सिद्धम् ॥ नैवं शक्यम्—इह हि त्रपुणी जतुनी, दीर्घश्रवणं न स्यात् ॥ एवं तर्हि शीभाव एवोच्येत ॥ नैवं शक्यम् । इह हि कुण्डानि वनानीति ह्रस्वस्य श्रवणं न प्रसज्येत । तस्माच्छीभावः शिभावश्च ॥ [जसः शी] ॥

औङ आपः ॥७।१।१८॥

किमर्थो ङकारः ? ॥ सामान्यग्रहणार्थः । 'औ' इत्युच्यमाने प्रथमा-

---

प्र.] च्चार्यते, तदेव व्याकरणेऽपि विभज्याऽन्वाख्यायते। ततश्च अत्र 'अ–ए' इति स्थिते नित्यत्वादेकादेशः प्राप्नोति, तस्मिन् कृतेऽदन्तत्वाभावाद्वर्णविधावन्तादिवद्भावाऽभावात्ताद्रूप्यानतिदेशात्स्मायाद्यसिद्धिरिति भावः। आनुपूर्व्येति । अत्र 'इदम्–ए' इति स्थिते त्यदाद्यत्वे कृते स्मायादयः । ततो नित्यत्वादाद्गुणं बाधित्वा इदूपलोपे कृते सवर्णदीर्घत्वेन रूपं सिद्धमित्यर्थः । नवेति । पदद्वयाश्रयत्वादेकादेशो बहिरङ्गः । एकपदाश्रयत्वात्स्मायादयोऽन्तरङ्गाः । [सर्वनाम्नः स्मै] ॥

जसःशी । शीभावशिभावयोः क्वचिद्रूपाऽभेदं दृष्ट्वा प्रश्नः—किमर्थमिति ।

उ.] दोषाऽभावादाह-लोके इति । 'वर्णविधा'वित्यस्य-प्रत्याख्यानेऽप्याह—ताद्रूप्येति ॥

औङ आपः । ननूभयसङ्ग्रहार्थं ङकारोच्चारणस्य सत्त्वात् 'किमर्थं' इति प्रश्नानुपपत्तिरत आह—औङित्तीति । असिद्धस्याऽनुवादे न प्रयोजनमित्यर्थः ।

द्विवचनस्यैव स्यात् ॥ अथापि 'औ'ङित्युच्यते एवमपि द्वितीयाद्विर्वचनस्यैव स्यात् ॥ अस्ति प्रयोजनमेतत् ? ॥ किं तर्हीति ॥ ङित्कार्यं तु प्राप्नोति—खट्वे । माले । याडाप इति याट् प्राप्नोति ॥ नैष दोषः । नैवं विज्ञायते ङकार इदस्य सोऽयं ङित्, ङितीति ॥ कथं तर्हि ? ॥ ङ एव इत् ङित्, ङितीति ॥ एवं सति वर्णग्रहणमिदं भवति, वर्णग्रहणेषु चैतद्भवति—'यस्मिन्विधिस्तदादावल्ग्रहण' इति,—न दोषो भवति ॥

अथ वा वर्णग्रहणमिदं भवति न चैतद्वर्णग्रहणेषु भवति 'अननुबन्धक-

---

प्र.] औङ आपः । 'औ'ङिति भूतानुवादः । न क्वचिदौङिति रूपं विज्ञातमभूत्तस्य च भूतवदुपादाने किं प्रयोजनमिति प्रश्नः । **किमर्थं इति । औ इत्युच्यमान इति** । निरनुबन्धकपरिभाषयेति भावः । यद्यपि टकारः प्रत्याहारार्थत्वात्समुदायानुबन्धस्तथाप्य**नेकान्ता अनुबन्धा** इति दर्शने, **'एकान्ता'** इति दर्शने वा अवयवावयवस्याऽपि समुदायावयवत्वदर्शनात् प्रत्ययस्या(ऽप्य)नुबन्धः स्यात् । 'प्रयोजनाभावात्प्रत्ययानुबन्धो न भविष्यती'ति चेदिह तस्य ग्रहणं मा भूदिति प्रयोजनं स्यात् । यद्येवमौङ इत्युच्यमाने 'तदनुबन्धकग्रहणेनाऽतदनुबन्धकस्ये'ति द्वितीयाद्विर्वचनग्रहणं न प्राप्नोति । ङकारोच्चारणसामर्थ्याद्भविष्यतीत्यदोषः ।

ङित्कार्यं त्विति । 'औङ' इति वचनात्प्रथमाद्वितीयाद्विवचनयोरौङो विधायकं वाक्यमनुमीयत इत्युपदेशेऽन्त्यत्वान्ङकारस्येत्संज्ञायां सत्यां ङित्कार्यप्रसङ्गः ।

अथ वेति । 'औङ' इति वर्णमात्रं निर्दिश्यते, ङकारस्त्वसन्देहार्थो नाऽनुब-

---

उ.] **अनेकान्ता इति** । अत्र पक्षे आनन्तर्यमेव संबन्धो नत्ववयवावयविभावः । तच्चसमुदायस्येव प्रत्ययस्याऽप्यस्तीत्यर्थः । **अवयवावयवस्यापीति** । 'द्विगता अपि हेतवो भवन्ति आम्राश्च सिक्ताः पितरश्च तृप्ता' इतिन्यायादवयवस्य समुदायस्य चाऽवयवत्वं न विरुध्यत इति भावः । **इह**—शीविधौ । **तस्य**-द्वितीयाद्विवचनस्य । **न प्राप्नोतीति** । अत्र टकारस्याप्यनुबन्धस्य भावादिति भावः ।

नन्वौङो विधानाऽभावेनोपदेशाऽभावात्प्रत्ययाद्यन्तत्वाभावाच्चेत्संज्ञाऽभावेन कथमित्कार्यापादनमत आह—**औङ इतीति** । चित्रङ इवेति भावः ।असिद्धानुवादाभावात्तदनुपपत्त्या औऔटोरौङ् भवतीति वाक्यमनुमीयत इति तात्पर्यम् । नच याटि अवश्यं प्राप्ते शीभावारम्भादयमपवाद इति न दोषः । कृते चारितार्थ्येनाऽसंभव एव बाधकत्वमिति वार्त्तिकरीत्या शङ्कासत्त्वात् । इत्संज्ञकङ्कारादाविति व्याख्याने 'आङ्याजयारामुपसङ्ख्यान'मिति 'सुपां सुलुक्'सूत्रस्थवार्तिकविहिताऽऽङः 'प्रवाहवे'त्युदाहरणमसङ्गतं स्यादित्यरुचेराह—**भाष्ये—अथवा वर्णेति** ।

असन्देहार्थ इति । 'आव' इत्युच्यमाने किमयमाव् उत 'औ' इति सन्देहः स्यादितिभावः । ननु निरनुबन्धकत्वे औटः सानुबन्धकत्वाद्ग्रहणं न स्यादत आह—

ग्रहणे न सानुबन्धकस्ये'ति ॥ अथ वा पूर्वसूत्रनिर्देशोऽयं, पूर्वसूत्रेषु च येऽनुबन्धा न तैरिहेत्कार्याणि क्रियन्ते ॥

॥ * ॥ औकारोऽयं शीविधौ ङिद्गृहीतो ङिच्चास्माकं नास्ति कोऽयं प्रकारः ? ।
सामान्यार्थस्तस्य चासञ्जने स्मिन्ङित्कार्यं ते श्यां प्रसक्तं स दोषः ॥ १ ॥
ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादौ ।
वर्णश्चायं तेन ङित्त्वेऽप्यदोषो निर्देशोऽयं पूर्वसूत्रेण वा स्यात् ॥ २ ॥ * ॥

अष्टाभ्य औश् ॥७।१।२१॥

॥ * ॥ औशघौ ॥ * ॥ **औशघाविति वक्तव्यम् ॥ किमिदमघाविति ? ॥ अनुत्तरपद इति॥ किं प्रयोजनम् ?॥ इह मा भूत्—अष्टपुत्रः अष्टभार्य इति ।** ॥ * ॥ अस्तु लुक्तत्र ॥ * ॥ **अस्त्वत्रौश्त्वं, लुग्भविष्यति** ॥ * ॥ षड्भ्यो-

---

प्र.] न्धार्थः। 'ऋदोर'बिति यथा दकारः। अङ्गाक्षिप्तश्च प्रत्यय औकारेण विशेष्यत-इति औकारान्तस्य शीभावो विधीयमानोऽन्तवद्भावात्केवलस्याप्यौकारस्य प्रवर्तते । प्रत्ययस्य चानुबन्धभावाऽभावाभ्यां निरनुबन्धकपरिभाषा व्यवस्थां करोति न वर्णस्य । **अथ वेति ।** पूर्वाचार्यैर्द्वे अपि द्विवचने ङितौ पठिते। **न चेह** क्वचिदप्यौङ्-प्रत्ययोऽस्ति, सामान्यग्रहणार्थं च पूर्वसूत्रनिर्देशः, तेन यः पूर्वसूत्रे औङ् तस्य ग्रहणं भवतीति प्रथमाद्वितीयाद्विवचनयोर्ग्रहणसिद्धिः । **वर्णश्चायमिति ।** औकारो वर्ण एव निर्दिष्टो न प्रत्यय इत्यर्थः । **तेन ङित्त्वे न दोष इति ।** ङित्त्वे सति यो दोषः स नास्ति, ङित्त्वस्यैवाऽभावादित्यर्थः । [**औङ आपः**] ॥

अष्टाभ्य औश् । औशघाविति । औशादेशो नाप्राप्ते लुक्यारभ्यमाणो विशेषाऽभावात्सर्वस्य लुको बाधकः प्राप्नोतीति भावः । इतरो येन नाप्राप्तिन्यायेन 'षड्भ्यो लु'गित्यस्यैवायमपवादो 'न सुपो धातुप्रातिपदिकयो' रित्यस्यापीति मत्वा-ऽऽह–**अस्त्विति ।** भवत्वौशादेशस्तस्य लुग्भविष्यतीत्यर्थः । एतच्चौशादेशप्रवृत्ति-

---

उ.] प्रत्ययस्य चेति । तदेतद्भाष्ये उक्तं—**नचैतद्वर्णग्रहणेष्वित्यादिना ।** अनेन 'औ' इत्युच्यमाने प्रथमाद्विवचनस्यैव स्यादिति दोष उद्धृतः । ङित्वाऽभावाच्च याट्प्राप्ति-रेव नेति बोध्यम् । ननु संभवति प्रत्ययग्रहणे कुतो वर्णग्रहणं स्यादित्यरुचे-राह—**भाष्ये—अथवेति । नचेहेति ।** एवञ्च सामर्थ्यात्पूर्वसूत्रनिर्देशः, तत्फलं च सामान्यग्रहणमिति भावः । **भाष्ये—कोऽयं प्रकार इति ।** अयुक्तोऽयं निर्देश-प्रकार इत्यर्थः । **ङित्त्वे विद्याद्वर्णेति ।** 'याडाप' इत्यत्रानुवृत्तं 'ङिती'ति कर्मधार-येण वर्णनिर्देश इत्यर्थः । तदादिविधौ च स्वरूपसत्सप्तम्येव निमित्तं नत्वर्थ-निर्देश इत्युक्तम् । **वर्णश्चायमिति । चशब्दो** वार्थे । ननु ङित्त्वस्यैवाऽभावे 'ङित्त्वे न दोष' इत्ययुक्तमत आह—**ङित्त्वे सतीति** ॥ [सर्वनाम्नः स्मै] ॥

अष्टाभ्य औश् । सर्वस्य-'षड्भ्य' इत्यस्य, 'सुपो धा'त्वित्यस्य च । **प्रवृत्ति-**

ऽप्येवं प्रसज्यते ॥ * ॥ [**षड्भ्योऽप्येवं प्रसज्यते ।] इहापि तर्हि प्राप्नोति— अष्टौ तिष्ठन्ति अष्टौ पश्येति** ॥ * ॥ अपवादः ॥ * ॥ **अपवादत्वादत्रौश्त्वं लुकं बाधिष्यते ॥ इहापि तर्हि बाधेत—अष्टपुत्रः अष्टभार्यः** ॥ * ॥ यस्य विषये ॥ * ॥ **यस्य लुको विषये औश्त्वं तस्यापवादः** ॥ * ॥ यो वा तस्मादनन्तरः ॥ * ॥ **अथ वाऽनन्तरस्य लुको बाधकं भविष्यति ॥ कुत एतत् ?** ॥ * ॥ 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वे'ति॥ * ॥ **अथेह कस्मान्न**

प्र.] मभ्युपगम्योच्यते । नित्यत्वात्पूर्वमेव लुका भाव्यम् । 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति वा । इतरो लुको विशेषमपश्यन्न्यव्यपवादे प्रवृत्ते उत्सर्गः प्रवर्तते तदाऽतिप्रसङ्ग इत्याह—**षड्भ्य इति** । सूत्रैकदेशानुकरणमेतत् । 'षड्भ्यो लु'गित्ययमप्यौशो लुक् प्राप्नोति । अथ विधानसामर्थ्यान्न भवति तदाऽष्टपुत्र इत्यत्रापि न प्राप्नोतीत्यर्थः । इतरो येन नाप्राप्ते तस्य बाधनमित्याश्रित्याह—**अपवाद इति** । 'षड्भ्यो लु'गिति सर्वत्र प्राप्नोतीति स एवौशा बाध्यते, 'सुपो धातुप्रातिपदिकयो'रित्ययं तु क्वचित्प्राप्नोतीति तं प्रत्यस्य बाधकत्वाऽयोगादन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति पूर्वमेव लुक् प्रवर्तते। **यो वा तस्मादिति** । औशः 'षड्भ्यो लु'गित्ययमनन्तरः । द्वितीयाध्यायविहितस्तु व्यवहितः । ननु 'मध्येऽपवादा' इति द्वितीयाध्यायविहितस्यैव लुको बाधः प्राप्नोति । नैष दोषः । यत्र द्वावपि व्यवहितौ पूर्वोत्तरौ तत्र पूर्वानुभवाहितसंस्कारोपजनितस्मृत्युपारूढस्य पूर्वस्य युक्तो बाधः । इह त्वनेकाध्यायव्यवहितो द्वितीयाध्यायविहितो लुग्व्यहता यत्नेन स्मरणीयोऽनन्तरस्त्वनुभवनीय इति स एव बाध्यते । अथ वा सत्यामसत्यां चोपलब्धौ प्रत्यासत्त्याऽनन्तरस्यैव बाधेन भाव्यम् । एतच्च लुकः समकक्षत्वमभ्युपगम्योक्तम् । भिन्नकक्षौ त्वेतौ लुकौ, एकस्य सर्वत्र प्राप्त्याऽपरस्य क्वचित्प्राप्त्या । **अथेहेति** । 'अष्टाभ्य' इति विभक्तौ लक्षणवशादाकारो निर्दिष्टो-

---

उ.]मभ्युपगम्येति । वस्तुतोऽस्त्वत्रौश्त्वमित्यस्य—प्राप्नोत्वत्रौश्त्वमित्यर्थः । **लुग्भविष्यती**त्यस्य लुग्बाधको भविष्यतीत्यर्थ इति न दोषः । गौणेऽप्यस्य प्रवृत्तिर्भवतीत्याशयेन—'औशधा'विति वार्तिकं प्रवृत्तमिति बोध्यम् । प्रियाष्टादीनां त्वनभिधानमेवेति तदाशयः । **क्वचिदिति** । समासादावित्यर्थः । ननु समासेऽप्यन्तरङ्गत्वादौश् प्राप्नोतीत्यत आह—**अन्तरङ्गानपीति** । **व्यवहिताविति** । कालतस्तुल्यावित्यर्थः । **तत्र पूर्वेति** । तत्र 'को बाध्यता'मिति विशेषचिन्तायां पूर्वस्यैव बाधो न्याय्य इति भावः । पूर्वानुभवसंस्कारजन्यस्मृतिविषयस्येत्यक्षरार्थः । उत्तरस्य तु —अननुभवात्स्मृत्ययोगः, न्यायान्तरसत्त्वेऽपि प्रत्यासत्तिन्याय एवाऽत्राश्रीयत इत्यर्थो 'यो वा तस्मादनन्तर' इति भाष्यस्येत्याह—**अथवेति** । येन नाप्राप्त्या यत्रोभयबाधकत्वं प्राप्तं तत्रैव एते न्याया व्यवस्थापका इत्याशयेनाह—**एतच्चेति** । एवञ्च 'यस्य विषये' इत्येष एव समाधिर्मुख्य इति भावः । ननु कृतात्वनिर्देशा-

भवत्यौश्त्वम्—अष्ट तिष्ठन्ति अष्ट पश्येति ? ॥ * ॥ आत्वं[1] यत्र[2] तु तत्रौश्त्वम् ॥ * ॥ **यत्रैवात्वं तत्रैवौश्त्वेन भवितव्यम्** ॥ **कुत एतत् ?** ॥ ॥ * ॥ तथा ह्यस्य ग्रहः कृतः ॥ * ॥ **तथा ह्यस्यात्वभूतस्य ग्रहणं क्रियते—'अष्टाभ्य' इति ॥ ननु च नित्यमात्वम् ॥ एतदेव ज्ञापयत्याचार्यो 'विभाषा आत्व'मिति यदयमात्वभूतस्य ग्रहणं करोति—'अष्टाभ्य' इति । इतरथा हि 'अष्टन' इत्येव ब्रूयात्** ॥

॥ * ॥ औशघावस्तु लुक्तत्र षड्भ्योऽप्येवं प्रसज्यते ।
अपवादो यस्य विषये यो वा तस्मादनन्तरः ॥ १ ॥ * ॥
॥ * ॥ आत्वं यत्र तु तत्रौश्त्वं तथा ह्यस्य ग्रहः कृतः ।
स्वमोर्लुक्[3] च त्यदादीनां कृते ह्यत्वे न लुग्भवेत् ॥ २ ॥ * ॥

स्वमोर्नपुंसकात् ॥७।१।२३॥

॥ * ॥ स्वमोर्लुक्त्यदादिभ्यश्च ॥ * ॥ **स्वमोर्लुक्त्यदादिभ्यश्चेति वक्तव्यम् । इहापि यथा स्यात्—तद्ब्राह्मणकुलमिति ॥ किं पुनः कारणं न सिध्यति ?** ॥

प्र.]ऽशक्त औशं विषयविशेषे व्यवस्थापयितुम् । **आत्वं तु यत्रेति ।** कृताकारस्यानुकरणमष्टाशब्दः । **ननु चेति ।** लक्षणवशाद्विभक्तावाकारं विधाय निर्देशः कृत इति चोदकाशयः । **एतदेवेति ।** लाघवार्थमष्टन इति वक्तव्ये कृतात्वस्येदमनुकरणम्, तस्य चैतत्प्रयोजनं—'कृतात्वाद्यथा स्यादकृतात्वान्मा भू'दिति । यदि च नित्यमात्वं स्यात्ततो[5] व्यवच्छेद्याऽभावात्कृतात्वानुकरणमनर्थकं स्यात्तस्मात्कृतात्वानुकरणनिर्देश आत्वविकल्पस्य ज्ञापकः ।

स्वमोरिति—उत्तरसूत्रोपस्थाप्यमानार्थसङ्ग्रहः । [**अष्टाभ्य औश्**] ॥

उ.]दात्वाऽभावे कथमतिव्याप्तिरत आह—**अष्टाभ्य इति । अष्टन इतीति । न च** यथान्यासे बहुवचनेन गौणेऽस्याऽप्रवृत्तिः । तव तु तदभावे गौणेऽपि स्यादिति दोष इति वाच्यम्; आत्वपक्ष एव प्रवृत्तिरित्यर्थबोधनार्थं बहुवचनस्य चारितार्थ्येनेतरार्थकल्पने मानाऽभावात् । न च कृतात्वानुकरणादेकवचनेनैव सिद्धौ बहुवचनं गौणेऽप्रवृत्त्यर्थमिति वाच्यम्; 'अष्टन इत्येव ब्रूया'दिति भाष्यविरुद्धसूत्राशयकल्पनाया अनुचितत्वात् । शब्दबाहुल्येन बहुवचनस्य न्यायप्राप्तत्वाच्च । 'तिसृभ्यो जस' इतिवद्गौणानां प्रियाष्टादीनामनभिधानस्य 'ष्णान्ता षट्'सूत्रे भाष्ये उक्तत्वाच्च ।

ज्ञापक इति । इदञ्च 'हली'त्यननुवृत्तिपक्षे । तदनुवृत्तिपक्षे तु जश्शसोर्विषये आत्वस्याऽपीदमेव ज्ञापकमिति बोध्यम् । **उत्तरसूत्रोपस्थाप्यमानेति ।** उत्तरसूत्रे उपसङ्ख्यायमानेत्यर्थः । [**अष्टाभ्य औश्**] ॥

॥ * ॥ कृते ह्यत्वे न लुग्भवेत् ॥ * ॥ अत्वे कृते लुङ्न प्राप्नोति । इदमिह संप्रधार्यमत्वं क्रियतां लुगिति, किमत्र कर्तव्यम् ? ॥ परत्वादत्वम् ॥ नित्यो लुक् , कृतेऽप्यत्वे प्राप्नोत्यकृतेऽपि ॥ अनित्यो लुक्, नहि कृतेऽत्वे प्राप्नोति । 'अतोऽ'मित्यम्भावेन भवितव्यम् । तस्मात्त्यदादिभ्यश्चेति वक्तव्यम्॥

इदं विचार्यते—शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं वा स्यादर्थग्रहणं वेति ? ॥

प्र.] **स्वमोर्नपुंसकात्** । **तदिति** । 'तदोः सः सा'विति सत्वमप्यत्र प्राप्नोति । **नित्यो लुगिति** । अत्वं तु लुकि कृते 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणप्रतिषेधाद्विभक्त्यभावान्न प्राप्नोतीत्यनित्यम् । **अनित्यो लुगिति** । 'यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्य'मित्येतत्तु पाक्षिकम् । यदा द्वयोर्लक्षणयोः संप्रधारणं क्रियते तदा यल्लक्षणप्रवृत्तावपि यस्य द्वितीयस्य लक्षणस्य प्रवृत्तिव्याघातो नास्ति तत्प्रति न तस्य दौर्बल्यं, लक्षणान्तरेण चैतत्प्रवृत्तिनिवारणात् । यथा वालिसुग्रीवयोर्युद्धे भगवता रामेण वालिनो वधेऽपि न सुग्रीवापेक्षं दौर्बल्यमभिदधति शूरमानिनः । एतद्दर्शनसंश्रयेणोच्यते—**'यस्य च लक्षणान्तरेणे'ति** । यदा त्वेष न्याय आश्रीयते लक्षणान्तरप्रवृत्तिनिमित्तमुपसंहरल्लक्षणं बलवद्भवति, इतरत्तु तदुपसंहृतनिमित्तलक्षणान्तरोपपादितप्रवृत्तिविघातं दुर्बलमेव । तथा च भगवद्वासुदेवसहायत्वात्पाण्डवा बलिनो दुर्बलान्धार्तराष्ट्रान् विजिग्यिरे तदा नास्त्येव—'यस्य च लक्षणान्तरेणे'ति । **केचित्तु**—'अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते'इत्यत्रापिग्रहणान्नित्यानां च परेषां च लुका बाधनमिच्छन्तस्त्यदाद्यत्वं लुका बाध्यतइत्याहुः । तथा चोच्यते—'सर्वविधिभ्यो लुग्विधिर्बलवा'निति । **शिशीति** । अङ्गस्येत्यनुवर्तनादङ्गस्य य औङ्-

---

उ.] **स्वमोर्नपुंसकात्** । **सत्वमपीति** । सात्वे कृते लुगप्राप्ताविति भावः । **पाक्षिकमिति** । कृताऽकृतप्रसङ्गित्वमात्रेणाऽपि क्वचिन्नित्यताभ्युपगमादिति भावः । तदेवोपपादयति—**यदा द्वयोरिति** । **उपसंहरदिति** । सम्पादयदित्यर्थः । यथाऽत्वशास्त्रम् । **इतरत्त्विति** । यथा—लुक्शास्त्रं । **तदुपसंहृतेति** । तच्छब्देन प्रकृतेऽत्वविधायकं परामृश्यते । तत्संपादितनिमित्तकेनाऽतोमिति लक्षणान्तरेणोपपादितः संपादितः प्रवृत्तिविघातो यस्य तल्लुक्शास्त्रं दुर्बलमित्यर्थः । यथा वासुदेवसहायत्वेऽपि पाण्डवानां बलवत्त्वमेव व्यवहरन्ति तद्वदित्यर्थः । **वासुदेवसहायत्वादिति**,—ल्यब्लोपे पञ्चमी । तत्सहायत्वं प्राप्येत्यर्थः । **विजिग्यिर इति** । 'इत्यभिदधती'त्यनुषज्यते । वचनं विनाऽपीष्टसिद्धिन्दर्शयति-**केचित्त्विति** । 'त्यदादिभ्यश्चेति वक्तव्य'मिति भाष्ये काकुः । न वक्तव्यमित्यर्थः । हेतुस्तु प्रसिद्ध एव—'अन्तरङ्गानपी'ति न्यायरूप इति तदाशयः । एतेनैतद्भाष्यबलादन्तरङ्गानपीति न्यायः सामासिकलुग्विषय एवेति भ्राम्यन्तः परास्ताः, एङ्ह्रस्वादिति सूत्रस्थभाष्यविरोधात् । **अङ्गस्य य औङिति** । अङ्गस्य निमित्तमित्यर्थः । **नपुंसकाद्यो विहित**

कश्चात्र विशेषः ? ॥ * ॥ शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधः ॥ * ॥ **शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधो वक्तव्यः । बहुत्रपुः बहुत्रपू बहुत्रपव इति ॥**

अस्तु तर्ह्यर्थग्रहणम् ॥ यद्यर्थग्रहणं-प्रियसक्थ्ना ब्राह्मणेनेत्यत्रानङ् प्राप्नोति ॥ अस्तु तर्हि शब्दग्रहणमेव ॥ ननु चोक्तं—"शिशीलुङ्नुम्विधिषु नपुंसकग्रहणं शब्दग्रहणं चेदन्यपदार्थे प्रतिषेधः ॥" इति ॥

॥ * ॥ सिद्धं तु प्रकृतार्थविशेषणत्वात् ॥ * ॥ **सिद्धमेतत् ॥ कथम् ? ॥ ['प्रकृतार्थविशेषणत्वात्'] । प्रकृतस्यार्थो विशेष्यते ॥ किं च प्रकृतम् ? ॥ अङ्गम् । अङ्गस्य शिशीलुङ्नुमो भवन्ति नपुंसके वर्तमानस्य ॥ कथं–प्रियसक्थ्ना ब्राह्मणेन ? ।** ॥ * ॥ अस्थ्यादिषु शब्दग्रहणम् ॥ * ॥

प्र.] नपुंसकात्परस्तस्य शीतिविज्ञायमाने शब्दग्रहणं भवति । यदाप्यङ्गादितिविभक्तिविपरिणाम आश्रीयते नपुंसकेन चाङ्गं विशेष्यते 'नपुंसकान्तादङ्गात्परस्ये'ति तदापि शब्दग्रहणम् । यदा तु 'नपुंसकाद्यो विहित' इत्याश्रीयते, प्रधानं वा नपुंसकमङ्गेन विशेष्यते 'नपुंसकादङ्गात्परस्ये'ति,–तदाऽर्थग्रहणं । शब्दद्वारकं चार्थेन पौर्वापर्यादिकमाश्रीयते ।

प्रियसक्थ्नेति । 'नपुंसकस्य झलच' इत्यतो नपुंसकग्रहणमस्थ्यादिसूत्रेऽनपुंसकसंज्ञाशब्दनिवृत्त्यर्थमनुवर्तते । यद्यपि–**'अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः । शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिष्वि'**तिसंज्ञाशब्दानामप्रसङ्गः, तथापि न्यायानुसरणे गौरवप्रसङ्गान्नपुंसकानुवृत्तिराश्रीयते । उत्तरार्थं च । 'ई च द्विवचने' इत्यत्र 'नपुंसकस्ये'ति 'पुंव'दिति चानुवर्तते, तेन छन्दसि नपुंसकस्य पुंवद्भावान्मधोर्गृह्णातीत्यादौ नुमभावसिद्धिः ।

सिद्धं त्विति । विषयविभागाश्रयेणाभिमतार्थसिद्धिः । शिशीलुङ्नुम्विधिष्वर्थग्रहणमस्थ्यादिषु शब्दग्रहणमित्यर्थः । **अस्थ्यादिष्विति** । विशेषणविशेष्यभावे कामचारान्नपुंसकार्थविशिष्टैरस्थ्यादिभिरङ्गं विशेष्यत इति नपुंसकाऽस्थ्याद्यन्तस्याऽङ्गस्याऽनपुंसकस्याप्यनङ् भवति । 'पदाङ्गाधिकारे तस्य च ग्रहणं तदुत्तरपदस्य चे'ति

उ.] **इति** । नपुंसकादर्थादित्यर्थः । **नपुंसकादङ्गादिति** । नपुंसकत्वविशिष्टाऽङ्गार्थादित्यर्थः । कथं पुनरर्थेन पौर्वापर्यमत आह—**शब्दद्वारकञ्चेति** । आदिना विधानं । 'स्त्रिया' इति सूत्रस्थेन 'न ह्यर्थेन पौर्वापर्यमस्ती'ति भाष्येणेदं विरुध्यते । तस्मादर्थग्रहणमित्यस्य भाष्यस्य,–नपुंसकार्थादङ्गात्परस्येत्यर्थः । अर्थपरस्य 'नपुंसक'-शब्दस्याऽर्थप्रतिपादके लक्षणेति भावः । अनङ्विधौ नपुंसकग्रहणाभावात्कथमव्याप्त्युद्भावनमत आह—**नपुंसकस्येति । तेन छन्दसीति** । वाक्यभेदेन संबन्धादिति भावः ॥ 'व्यत्ययो बहुल'मिति लिङ्गव्यत्ययेनाऽपीदं सिध्यति । किञ्चाऽभिव्यक्तेति न्यायः पदकार्य एवेति नाऽत्र तस्य विषयः । अतएव सर्वनामसंज्ञायां संज्ञाप्रति-

अस्थ्यादिषु नपुंसकग्रहणं शब्दग्रहणं द्रष्टव्यम् ॥ युक्तं पुनरिदं विचारयितुम् । नन्वनेनाऽसन्दिग्धेनार्थग्रहणेन भवितव्यं, नहि नपुंसकं नाम शब्दोऽस्ति ॥ किं तर्ह्युच्यतेऽस्थ्यादिषु शब्दग्रहणमिति, अत्राप्यर्थग्रहणमेव ॥

अत्रैतावान् सन्देहः—क्व प्रकृतस्यार्थो विशेष्यते, क्व गृह्यमाणस्येति?॥ शिशीलुङ्नुम्विधिषु प्रकृतस्यार्थो विशेष्यतेऽस्थ्यादिषु गृह्यमाणस्य ॥

अदड्डतरादिभ्यः पञ्चभ्यः ॥७।१।२५॥

॥ * ॥ अड्भावे पूर्वसवर्णप्रतिषेधः ॥ * ॥ अड्भावे पूर्वसवर्णस्य प्रतिषेधो वक्तव्यः । कतरत्तिष्ठति । कतरत्पश्य । ॥ * ॥ सिद्धमनुनासिकोपधत्वात् ॥*॥ सिद्धमेतत् ॥ कथम् ? ॥ ['अनुनासिकोपधत्वात्'] अनुनासिको-

---

प्र.] वचनात्केवलानामप्यस्थ्यादीनामनङ् भवति ।

इदानीं भाष्यकारो विचारमेव पूर्वोक्तमाक्षिप्यमाण आह—**युक्तं पुनरिति** । अर्थमनपेक्ष्य शब्दग्रहणपक्षाऽसंभव इति भावः । **किं तर्ह्युच्यत इति** । नैवेदं वक्तव्यमित्यर्थः । कस्मान्न वक्तव्यमित्याह—**अत्रापीति** । अर्थधर्मत्वाल्लिङ्गस्य नपुंसकार्थाभिधायित्वादस्थ्यादयो नपुंसकशब्देनाभिधीयन्त इत्यर्थग्रहणमेव भवति । तस्माद्विशेषणविशेष्यभावविचार एव युक्तो न तु यथेष्टसिद्ध्यनङ्गत्वादसंभवादेकतरपक्षग्रहणविचारः ॥ [**स्वमोर्नपुंसकात्**] ॥

अदड्डतरादिभ्यः पञ्चभ्यः । अड्भाव इति । सुस्थानिकेऽदादेशोऽयं दोषः । अमादेशे त्वदि स्थानिवद्भावादमिपूर्वइतिपूर्वरूपं सिद्धमिति । **सिद्धं त्विति** । अनुनासिकत्वेन निवृत्तिर्लक्ष्यते । तेनोच्चारणार्थोऽकारो दकारमात्रं त्वादेशः । 'आदेः परस्ये'-

---

उ.] षेध आरब्ध' इत्यन्ये । 'अस्थ्यादिषु शब्दग्रहण'मित्यनेन गृह्यमाणाऽस्थ्यादिविशेषणं नपुंसकग्रहणमित्युक्तमित्याह—**विशेषणेति** । **नपुंसकार्थविशिष्टैरिति** । 'गुणः कृतात्मसंस्कार' इति न्यायादिति भावः । **नैवेदमिति** । किंशब्द आक्षेपे इत्यर्थः । **न त्वित्यस्य**,—'एकतरपक्षग्रहणविचार' इत्यनेनान्वयः । 'युक्त' इति च शेषः । तत्र हेतुः—**यथेष्टेत्यादिः** । शब्दग्रहणपक्षस्य यथेष्टसिद्ध्यनङ्गत्वादर्थपक्ष एवेष्टसङ्ग्रहादसंभवाच्चाऽस्य पक्षस्य कोट्यन्तराऽभावेन वार्तिककृतो विचारो न युक्त इत्यर्थः । एवञ्च गृह्यमाणसंभवे तद्विशेषणमेव लिङ्गग्रहणं, तदभावे प्रकृतस्याङ्गस्येति निर्णयः । 'अतएव 'वा शा'विति नाऽसूत्रि । तत्र हि नपुंसकग्रहणं गृह्यमाणशत्रन्तस्यैव नपुंसकत्वे यथा स्यादित्यर्थं, तेन बहवो ददतो येषु तानि बहुददतीत्यत्र न । बहूनि ददन्ति येषु ते 'बहुददन्त' इत्यत्र च नुम्भवतीति बोध्यम् ॥ [**स्वमोर्नं**]

अदड्ड । अमादेशे त्विति । 'कतरत्पश्ये'ति भाष्योदाहरणस्य हे कतरत्त्वं पश्येत्यर्थो बोध्यः । **निवृत्तिर्लक्ष्यत इति** । इत्संज्ञायां फलाऽभावादिति भावः ।

पधोऽच्छब्दः करिष्यते ॥ * ॥ दुक्करणाद्वा ॥ * ॥ **अथवा दुग् डतरादीनामिति वक्ष्यामि** ॥ * ॥ डित्करणाद्वा ॥ * **अथवा डिदच्छब्दः करिष्यते ॥ स तर्हि डकारः कर्तव्यः ? ॥ न कर्तव्यः । क्रियते न्यास एव । द्विडकारको निर्देशः,–'अद्ड्डतरादिभ्य' इति** । [अद्ड्डतरादिभ्यः] ॥

नेतराच्छन्दसि ॥ ७।१।२६॥

॥ * ॥ इतराच्छन्दसि प्रतिषेधे एकतरात्सर्वत्र ॥ * ॥ **इतराच्छन्दसि प्रतिषेधे एकतरात्सर्वत्रेति वक्तव्यम् । एकतरं तिष्ठति । एकतरं पश्य ॥** ॥ * ॥ नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन ॥*॥ **नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन । नपुंसकादेशानामवकाशः—त्रपु त्रपुणी त्रपूणि । युष्मदस्मदोर्विभक्त्यादेशानामवकाशः—त्वं ब्राह्मणः, अहं ब्राह्मणः, युवां ब्राह्मणौ, आवां ब्राह्मणौ, यूयं ब्राह्मणाः, वयं ब्राह्मणाः । इहोभयं प्राप्नोति—त्वं ब्राह्मणकुलम् अहं ब्राह्मणकुलम् । युवां ब्राह्मणकुले आवां ब्राह्मणकुले । यूयं ब्राह्मणकुलानि, वयं ब्राह्मणकुलानि । युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन ॥**

प्र.]त्यम आदेर्भवति । मकारस्य तु 'संयोगान्तस्य लोप'इतिलोपः । उच्चारणार्थानां त्वनुनासिकत्वप्रतिज्ञायां 'ब्रुवो वचि'रिति वच्यादीनां नुम्प्रसङ्गः । एतस्मिन्पक्षे 'हे कतर'दित्यत्र संबुद्धिलोपप्रसङ्गं मत्वाह–**दुक्करणाद्वेति** । कार्यिभेदाच्च दुका लुङ्न बाध्यते । **द्विडकारक इति** । दकारस्य ष्टुत्वं स्वरूपविनाशप्रसङ्गान्न कृतं, नापि डकारस्य संयोगान्तलोपः ॥ [अद्ड्डतरादिभ्यः] ॥

नेतरा । नपुंसकादेशेभ्य इति । 'अलिङ्गे युष्मदस्मदी' इत्यनाश्रित्याऽयं विचारः । स्वौजसमां लुक्शीशयः परत्वादमा बाध्यन्त इत्यर्थः । [नेतराच्छन्दसि] ।

उ.] **संयोगान्तस्य लोप इति** । उत्तरसूत्रे झल्ग्रहणेन क्वचिदझलोऽपि लोप इत्यभिप्रेत्येदम् । ननूच्चारणार्थस्याऽपि निवृत्तयेऽनुनासिकत्वमावश्यकमत आह—**उच्चारणार्थानान्त्विति । परे** तु विधेयविषये उच्चारणार्थस्याऽपि निवृत्तिर्यत्नं विना दुर्लभेति अनुनासिकत्वमावश्यकं । वच्यादौ नुम् तु न, धातूपदेशे इदित्त्वाऽभावात् । येषां हि पदार्थोपस्थितिकाले धातुत्वं तेषामुपदेशो धातूपदेशोऽस्य तु विधानोत्तरमतिदेशेन धातुत्वं, स्थानिवद्भावेन भाव्यातिदेशिकधातुत्वं गृहीत्वेकः सत्त्वाच्चेत्याहुः ।

ननु येन नाप्राप्तिन्यायेन दुका लुको बाधे 'कतर'दित्यादिरूपाऽसिद्धिरत आह—**कार्यिभेदाच्चेति** । ननु कार्यिभेदेऽपि नुम्नुटोरिव बाधकत्वं दुर्वारमित्यरुचेराह—भाष्ये—**अथवा डिदिति** । ननु त्रिडकारक इति वक्तुं युक्तमत आह—**दकारस्येति । स्वरूपेति** । विवक्षितादेशरूपेत्यर्थः । **नाऽपीति** । पूर्वोक्तहेतोरेव । एतदर्थमेव विधेयस्याऽप्यदः पूर्वं निर्देशः । [अद्ड्डतरादिभ्यः] ।

नेतरा । अमा बाध्यन्त इति । विभक्त्यादेशशब्देनाऽमेवोच्यते । स्थानिभेद-

अथेदानीं युष्मदस्मदोर्विभक्त्यादेशेषु कृतेषु पुनः प्रसङ्गाच्छिशीलुङ्नुम्विधयः कस्मान्न भवन्ति ? ॥ * ॥ सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ॥ * ॥—इति ॥

युष्मदस्मद्भ्यां ङसोऽश् ॥७।१।२७॥

किमर्थः शकारः ? ॥ सर्वादेशार्थः । शित्सर्वस्येति सर्वादेशो यथा स्यात् ॥ नैतदस्ति प्रयोजनम्—अक्रियमाणेऽपि शकारेऽलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्याऽकारे कृते त्रयाणामकाराणामतो गुणे पररूपत्वे सिद्धं रूपं स्यात्—तव स्वम् मम स्वम् ॥ यद्येतल्लभ्येत कृतं स्यात्तत्तु न लभ्यम् ॥ किं कारणम् ? ॥ अत्र हि तस्मादित्युत्तरस्यादेः परस्येत्यकारस्य प्रसज्येत ॥

अत उत्तरं पठति—॥ * ॥ ङस आदेशे शित्करणानर्थक्यमकारस्याकारवचनानर्थक्यात् ॥ * ॥ ङस आदेशे शित्करणमनर्थकम् ॥ किं कारणम् ? ॥ 'अकारस्याकारवचनानर्थक्यात्' । अकारस्याऽकारवचने प्रयोजनं नास्तीति कृत्वाऽन्तरेणापि शकारं सर्वादेशोभविष्यति । ॥ * ॥ अर्थवत्त्वादेशे लोपार्थम् ॥ * ॥ अर्थवत्त्वकारस्याऽऽकारवचनम् ॥ कोऽर्थः ? ॥ 'आदेशे लोपार्थम्' ।

प्र.] युष्मदस्मद्भ्यां ङसोऽश् । किमर्थ इति । अकारस्याऽकारवचने प्रयोजनाऽभावादादेः परस्येत्यस्याऽनुपस्थानादलोन्त्यस्येति सकारस्याऽकारः । 'अतो गुण'इति-पररूपेण सिद्धमिति भावः । इतरस्त्वस्त्यकारस्याकारवचने प्रयोजनमिति मत्वाह—शित्सर्वस्येति । अन्तरेणापि शकारं सर्वादेशो भविष्यतीति । आद्यानुसंहारा-

---

उ.] माश्रित्य बहुवचनं । 'यूय'मित्यादावमादौ कृतेऽन्त्यस्य शेषे लोपे तन्निमित्तके कृते 'जशः शी'त्यादि तु न, सन्निपातपरिभाषाविरोधात् । ईदृशेष्वपि सन्निपातपरिभाषाप्रवृत्तावत्र पूर्वपक्षसिद्धान्ताऽकरणपरं भाष्यमेव मानम्। 'ङे प्रथमयो'रित्यत्राऽममनुवर्त्याऽम् अमेवेति व्याख्याने पुनःप्रसङ्गेन श्याद्यापादानपरभाष्यविरोधः। अङ्गवृत्तपरिभाषा तु न क्वाऽपि लक्ष्यसिद्ध्यै भाष्ये आदृता, शिशीविषयेऽपि पूर्वपक्षाऽसङ्गतेश्च । अतएव 'ज्यादादीयसो' 'ज्ञाजनोर्जा' 'रीङृत' इत्येतेषु एतत्परिभाषाज्ञापनोत्तरं 'किमेतस्या ज्ञापने प्रयोजन'मितिप्रश्ने 'पिबेर्गुणप्रतिषेधो न वक्तव्यो भवती'त्येवोक्तं, न तु किञ्चिदपि लक्ष्यं प्रयोजनत्वेनोक्तम् । 'भ्यसोऽभ्य'-मित्यत्र सिद्धान्ते 'अभ्य'मित्येवच्छेद इति स्पष्टं 'युष्मदस्मदोरनादेशे' इति सूत्रे भाष्ये । भाष्ये–'शिशीलुग्विधय' इत्येव पाठः । क्वचिन्नुम्विधय इति पठ्यते सोऽपपाठः, अमः सर्वनामस्थानत्वाऽभावात्प्रकृतेरिगन्तत्वाऽभावाच्चेत्याहुः। [अद्भु-]।

युष्मदस्मद्भ्यां ङ । अस्त्यकारस्येति । शेषे लोप इत्यर्थः । संपद्यते इति । सर्वादेशफलसंपत्त्या सर्वादेशो भविष्यतीत्युक्तमिति भावः । नचाऽन्त्यस्यादेशोऽपि विभक्तेरनादेशरूपत्वाद्योऽचीति दुर्वारं, पररूपे विभक्तेरेवादेशरूपत्वात् । न च 'वाण ।-

यः स 'शेषे लोपः' आदेशे स विज्ञायते ॥ ननु चादेशो या विभक्तिरित्येवमेतद्विज्ञायते ॥ आदेश एषा विभक्तिः ॥ कथम् ? ॥

* सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥१॥ *

॥ * ॥ तस्माच्छित्करणम् ॥ * ॥ तस्माच्छकारः कर्तव्यः ॥ न कर्तव्यः ॥ क्रियते न्यास एव ॥ कथम् ? ॥ प्रश्लिष्टनिर्देशोऽयम्—अ अ अ इति । सोऽनेकाल्शित्सर्वस्येति सर्वस्य भविष्यति ॥ [युष्मदस्मद्भ्यां] ॥

ङे प्रथमयोरम् ॥७।१।२८॥

'प्रथमयो'रित्युच्यते कयोरिदं प्रथमयोर्ग्रहणं, किं विभक्त्योराहो स्वि-

---

प्र.] भावेऽन्त्यानुसंहाराद्द्वयोरकारयोः पररूपमित्यर्थात्सर्वादेशः संपद्यते । **यः स शेषे लोप इति ।** अनादेशे आत्वयत्वविधानादादेशः शेषः । **ननु चेति ।** 'शेषे लोप' इत्यत्र 'विभक्ता'वित्यनुवर्तते । तद्विशेषणं च शेषग्रहणमित्यादेशो या विभक्तिरिति विज्ञायते । नहि तदादिविधिरस्ति यत आदेशादाविति विज्ञायेत । तस्मात्सत्यप्यादेशादित्वे विभक्तेरनादेशत्वान्नैवाऽयं शेषः । ततो नास्त्यकारस्याऽकारवचने प्रयोजनम् । **सर्वे सर्वपदादेशा इत्यादि ।** 'विकारद्वारेण विभक्तेरेवादेशो विधीयत' इति विभक्तिरेवादेशः स्यादिति शित्त्वं सर्वादेशार्थं क्रियते । **सर्वपदादेशा** इत्यत्र 'पद'शब्देन न सुप्तिङन्तमुच्यते, किं तर्हि ?, पद्यते प्रतीयते येनार्थः—अन्वयव्यतिरेकाभ्यां कल्पिताभ्यां यस्य कल्पितार्थवत्ता तदभिधीयते । तत्राऽनन्यार्थादकारविधानादेकदेशद्वारेण विभक्तिरेवादेशः । **प्रश्लिष्टनिर्देश इति ।** ततश्चाऽकारद्वयलक्षणः समुदायः । अनेकाल्त्वात्सर्वादेशः प्रवर्तते । तस्मिन्प्रवृत्तेऽतो गुण इति पररूपमिति सिद्धमिष्टम् । [**युष्मदस्मद्भ्यां ङसोऽश्**] ।

ङे प्रथमयोरम् । प्राधान्यलक्षणस्य प्रथमार्थस्येहाऽसंभवात्सांनिवेशापेक्षयाद्यस्य तावद्ग्रहणं विज्ञायते तत्र विशेषज्ञानाय पृच्छति—**कयोरिति ।** यदि स्त्रीलिङ्गेन निर्देशस्ततो विभक्त्योर्ग्रहणेन भाव्यं, पुँल्लिङ्गेन निर्देशे तु प्रत्यययोः । तत्र यद्यन्तरङ्गं प्राथम्यमाश्रीयते ततः पुँल्लिङ्गेन निर्देशात्प्रत्ययग्रहणम् । वर्गस्याऽसमाप्तावेव प्रत्ययोः

उ.]दाङ्ग बलीय' इति पररूपात्पूर्वमेव यत्वम् । एकस्थानिकत्वे एव वार्णाङ्गयोस्तत्प्रवृत्तेरित्याशयात् । **अनादेश इति ।** नचादेशवत्त्वात्कथमयं शेष इतिवाच्यम्, अनादेशपदे लाघवेन तत्पुरुषस्यैवाङ्गीकारादिति भावः । **नहि तदादीति ।** अल्ग्रहणे तद्विज्ञानादिति भावः । ननु विभक्तेरयमादेशो न पदस्येति कथमत्राऽयं न्यायोऽत आह—**पदशब्देनेति ।** अस्य च न्यायस्य शित्करणमेव ज्ञापकमिति बोध्यम् ॥

ङे प्रथमयोः । ननु प्रथमशब्दस्याऽनेकार्थत्वेनाऽऽद्यर्थवृत्तेरेव ग्रहणमिति निश्चयाऽभावेन कुतोऽयमेव सन्देहोऽत आह—**प्राधान्येति ।** लिङ्गविषयसन्देहः

त्प्रत्यययोः ? ॥ 'विभक्त्यो'रित्याह ॥ कथं ज्ञायते ? ॥ अन्यत्रापि हि प्रथमयोर्ग्रहणे विभक्त्योर्ग्रहणं विज्ञायते न प्रत्यययोः ॥ क्वान्यत्र ? ॥ 'प्रथमयोः पूर्वसवर्ण' इति ॥ अस्ति कारणं येन तत्र विभक्त्योर्ग्रहणं विज्ञायते ॥ किं कारणम् ? ॥ 'अची'ति तत्र वर्तते न चाजादी प्रथमौ प्रत्ययौ स्तः। ननु चैवं विज्ञायते—अजादी यौ प्रथमावजादीनां वा यौ प्रथमाविति ॥ यत्तर्हि तस्मा-च्छसो नः पुंसीत्यनुक्रान्तं पूर्वसवर्णं प्रतिनिर्दिशति तज्ज्ञापयत्याचार्यो— 'विभक्त्योर्ग्रहण'मिति ॥ इहाप्याचार्यप्रवृत्तिर्ज्ञापयति—'विभक्त्योर्ग्रहण'मिति यदयं 'शसो ने'ति प्रतिषेधं शास्ति ॥ नैष प्रतिषेधो, नत्वमेतद्विधीयते ॥ सिद्ध-

प्र.] प्राथम्यसंप्रत्ययात्। अथ तु 'सपूर्वायाः प्रथमाया विभाषा' 'प्रथमायाश्च द्विवचने' इत्यत्र शास्त्रे प्रसिद्धिराश्रीयते ततः स्त्रीलिङ्गनिर्देशाद्विभक्तिग्रहणम् । प्रत्ययग्रहणपक्षे च युष्मदस्मदोः प्रातिपदिकत्वात्प्रातिपदिकप्रत्यययोः 'सु' 'औ' इत्यनयोर्ग्रहणेन भाव्यम् । ननु द्वयोः कथं प्राथम्यं, यावताऽऽद्यापेक्षया परस्य द्वितीयत्वम् । नैष दोषः । राश्यपेक्षया द्व्यात्मकस्य समुदायस्य प्राथम्याऽविरोधात् । प्रथमसाहचर्याद्वा द्वितीयस्यापि प्रथमव्यपदेशः,—यथाऽर्धर्चाः पुंसि चेति,—गोमयादीनामर्धर्चव्यपदेशः। अन्यत्रापीति—प्रसिद्धिमाह । अस्ति कारणमिति । यस्मात्कारणात्तत्र विभक्ति-ग्रहणं तदिह नास्ति । न चाजादी इति । प्रथमयोर्विशेष्यत्वमचीत्यस्य विशेषणत्व-मिति भावः। न चाऽजादित्वं सोः संभवतीति सामर्थ्यात्तत्र विभक्तिग्रहणं विज्ञायते । अजादी यौ प्रथमाविति । अजादी विशेष्यौ, प्राथम्यं विशेषणं, तेन चाजादित्वा-ऽभावात् सुः परिहृतः औजसोः प्राथम्यं न विहन्ति। यथा ब्राह्मणाऽब्राह्मणपङ्क्तौ 'ब्राह्मणौ प्रथमावानये'त्युक्ते अब्राह्मणः प्रथमोऽपि चोदनायामनन्तर्भावाद्ब्राह्मणयोर्न प्रथम-व्यपदेशविघातहेतुः । अजादीनां वेति । 'अची'त्यनुवृत्तं निर्धारणसप्तम्यन्तं विज्ञायते । यदयं शसो नेति । 'ङेप्रथमयो'रित्यम्भावस्य प्राप्तस्य 'शसो ने'ति प्रतिषेधः क्रियते। ततो 'योऽची'ति यत्वे प्राप्ते 'द्वितीयायां चे'त्यात्वे कृते 'प्रथमयोः पूर्वसवर्ण' इति पूर्वसवर्णे 'तस्माच्छसो नः पुंसी'ति नत्वे 'युष्मानस्मा'निति रूपं सिद्ध्यति । इतरः प्रतिषेध आश्रीयमाणे पुंस्येव नत्वं स्यान्न स्त्रीनपुंसकयोरिति मत्वाह—नैष प्रतिषेध इति। 'आदेः परस्ये'त्यादेर्नकारे कृते सकारस्य संयोगान्त-

उ.] स्याऽपि निदानमाह—तत्र यदीति । अन्तरङ्गत्वमेव दर्शयति—वर्गस्येति । ननु प्रत्यययोर्ग्रहणे तिङामावयोः प्रत्यययोस्तिप्तसोर्ग्रहणं कुतो नेत्यत आह— प्रत्ययग्रहणेति । स्त्रीलिङ्गनिर्देशे तु प्रथमादिशब्दानां सुपां त्रिकेष्वेव रूढत्वादन्य-ग्रहणसंभव एव नेति भावः । समुदायस्येति । उद्भूतावयवभेदस्येत्यर्थः । साह-चर्याद्वेति । 'ङे' इति लुप्तषष्ठीकं पृथक् पदमेव । एवञ्च द्विर्वचननिर्देशसामर्थ्या-द्द्वितीयोऽपि प्रथमशब्देन लक्ष्यत इति भावः । अजादी विशेष्याविति । पूर्वं तदादिविधिः पश्चाद्विशेषणत्वम् । शब्दरूपं विशेष्यमादाय भाष्यप्रामाण्यात्तदादि-

मत्र नत्वं 'तस्माच्छसो नः पुंसी'ति ॥ यत्र तेन न सिध्यति तदर्थम् ॥ क्व च तेन न सिध्यति ? ॥ स्त्रियां नपुंसके च । 'युष्मान् ब्राह्मणीः पश्य' 'अस्मान्ब्राह्मणीः पश्य' । 'युष्मान्ब्राह्मणकुलानि पश्य' 'अस्मान् ब्राह्मणकुलानि पश्ये'ति ॥ यत्तर्हि 'युष्मदस्मदोरनादेशे' 'द्वितीयायां चे'त्याह तज्ज्ञापयत्याचार्यो–'विभक्त्योर्ग्रहण'मिति ॥ [ङे प्रथमयोरम्] ॥

भ्यसोभ्यम् ॥७।१।३०॥

किमयं भ्यम्शब्द आहो स्विदभ्यम्शब्दः ? ॥ कुतः सन्देहः ? ॥ ॥ * ॥ समानो निर्देशः ॥ * ॥ किं चातः ॥ यदि तावद्भ्यम्शब्दः शेषे लोपश्चान्त्यस्य,–एत्वं प्राप्नोति । अथाऽभ्यम्शब्दः शेषे लोपश्च टिलोपः, उदात्त-

---

प्र.] त्वाल्लोपः । एतच्चाभ्युपगम्य लिङ्गवत्त्वमुक्तम् । यत्तर्हीति । यदि प्रत्यययोरिदं ग्रहणं स्यात्ततो द्वितीयाया अनादेशत्वात्तस्यामात्वं सिद्धमेवेति 'द्वितीयायां चे'त्यात्वविधानमनर्थकं स्यात् । ननु च 'योऽची'ति यत्वे प्राप्ते तद्बाधनार्थमात्वविधानं स्यादिति कथं ज्ञापकम् ? । उच्यते । यद्येतावत्प्रयोजनं स्यात्–'योच्यनमौटो'रिति ब्रूयात् । यत्वे प्रतिषिद्धे आत्वस्य भावात् । युष्मानस्मानित्यत्रापि शसो नकारे कृते 'शेषे लोप' इति लोपे 'सुपि चे'ति दीर्घत्वं भविष्यति । [ङे प्रथमयोरम्] ।

भ्यसोभ्यम् । किमयमिति । संहितायां निर्देशस्य साम्याद्विचारः । चत्वारोऽत्र पक्षाः संभवन्ति–भ्यमादेशः, शेषे लोपोऽन्त्यलोपः । भ्यमादेशः, शेषे लोपष्टिलोपः । अभ्यमादेशः, शेषे लोपोऽन्त्यलोपः । अभ्यमादेशः, शेषे लोपष्टिलोप इति । तत्र यदा भ्यमादेशस्तदा शेषे लोपोऽन्त्यलोप एवाश्रयितव्यः, टिलोपे रूपाऽसिद्धिप्रसङ्गात् । अभ्यमादेशे शेषे लोपेऽन्त्यलोपे च द्वयोरकारयोः पररूपमेकादेश उदात्तेनोदात्त इत्युदात्तत्वं भवति । युष्मदस्मदोः प्रातिपदिकस्वरेण प्रत्ययस्वरेण वाऽन्तोदात्तत्वात् । टिलोपपक्षे चाऽकारोच्चारणमर्थवत्, अन्त्यलोपेऽप्येत्त्वनिवृत्त्यर्थमिति,–अकारोच्चारणसामर्थ्यात्सवर्णदीर्घत्वेन भाव्यमिति न चोदनीयम् । तदेवं

उ.] विधिरिति भावः । निर्द्धारणेति । वचनविपरिणामेनेत्यर्थः । आदेर्नकार इति । 'शसो ने'त्युच्चारणार्थोऽकारेणाऽविभक्तिको निर्देश इत्यर्थः । एतच्चेति । तदनभ्युपगमे तु पुंस्यपि असिद्धिरिति भावः । 'लिङ्गत्व'मितिपाठेऽर्श आद्यजन्तात्त्वः । आत्वं सिद्धमिति । 'युष्मदस्मदो'रित्यनेन । ननु 'युष्मा'नित्यत्रादेशविभक्तित्वात्कथमात्वमत आह— युष्मानित्यादि । लोपे इति । अन्त्यलोप इत्यर्थः । स एव च सिद्धान्त इति भावः । [ङे प्रथमयोरम्] ।

भ्यसोऽभ्यम् । शेषेलोपष्टिलोप इति । 'शेष' इति विषयसप्तम्या स्थानीनिर्दिष्टः । मपर्यन्ताच्च शेष इति भावः । टिलोपे रूपेति । एवञ्च टिलोपान्त्यलोपयोर्लक्ष्यानुरोधेन व्यवस्थेति भावः । टिलोपपक्षे चेति । अभ्यमादेशपक्षे

निवृत्तिस्वरः प्राप्नोति ॥*॥ यथेच्छसि तथास्तु ॥*॥ **अस्तु तावद्भ्यम्शब्दः शेषे लोपश्चान्त्यस्य ॥ ननु चोक्त'मेत्वं प्राप्नोती'ति ॥ नैष दोषः, 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्ये'ति न भविष्यति ॥**

अथ वा पुनरस्त्वभ्यम्शब्दः **शेषे लोपश्च टिलोपः ॥ ननु चोक्तमुदात्त-निवृत्तिस्वरः प्राप्नोतीति ॥ नैष दोषः–उक्तमेतत्–'आदौ सिद्ध'मिति ॥**

साम आकम् ॥७।१।३३॥

किमर्थं सामः ससकारस्य ग्रहणं क्रियते न 'आम आक'मित्ये-वोच्येत ? ॥ केनेदानीं ससकारस्य भविष्यति ? ॥ आमोऽयं सुड्भक्त आम्ग्रहणेन ग्राहिष्यते ॥ अत उत्तरं पठति–॥ * ॥ साम्ग्रहणं यथागृहीत-

---

प्र.] द्वितीयः पक्षोऽत्यन्तदुष्टः । तृतीयस्तु निर्दोष इति तत्परिहारेण पक्षद्वयाश्रयो भाष्ये विचारः । **उदात्तनिवृत्तिस्वर इति ।** 'कर्षात्वतो घञोऽन्त उदात्त' इत्यतोऽन्त-ग्रहणमनुदात्तस्य च यत्रोदात्तलोप इत्यत्रानुवर्तते, ततश्चाऽन्तोदात्तं पदं प्राप्नोति, मध्योदात्तं चेष्यते । **अङ्गवृत्त इति ।** एत्ववत् 'सुपि चे'ति दीर्घत्वमपि न भवति । **आदौ सिद्धमिति ।** अन्तग्रहणं नानुवर्तते । उच्चारणक्रमप्रत्यासत्त्या चाऽऽदेरेवोदात्तत्वम् । [**भ्यसोभ्यम्**] ।

साम आकम् । किमर्थमिति । युष्मद्-आमिति स्थिते आदेशेनाऽत्र भाव्य-मिति यत्वं न प्रवर्तते । आदेशश्च शेष इति अकृत आदेशे शेषत्वाऽभावाल्लोपा-ऽप्रसङ्गः । त्यदाद्यत्वमपि नास्ति, द्विपर्यन्तानां विधानात्, ततश्चाऽनकारान्तत्वादा-देशप्रवृत्तिकाले सुण्नास्तीति नार्थः ससकारनिर्देशेन । कृतेऽप्याकमादेशे शेषे लोपे टिलोपे च तथैव सुण्नास्तीति भावः । इतरः कृत आदेशे शेषे लोपेऽन्त्यलोपे च सुट् प्राप्नोतीति भाविनः सुटो निवृत्त्यर्थं ससुट्कोपादानं कर्तव्यमिति मत्वाह—**केनेदानी-मिति ।** स एव परमतमाशङ्कते—**आमोऽयमिति ।** सुडप्ययमाम्भक्त इति यदि

उ.] इदम् । **अत्यन्तदुष्ट इति ।** रूपाऽसिद्धेरिति भावः । नन्वभ्यम आद्याऽकारस्यो-दात्तनिवृत्तिस्वरेऽपि न कश्चिद्दोषोऽत आह—**कर्षात्वत इति । उच्चारणक्रमेति ।** इदं चिन्त्यं—'निजान्त्रयाणा'मित्यत्र 'त्रयाणां'ग्रहणादाद्युदात्तश्चेत्यादावादिग्रहणा-चाऽस्या अत्र शास्त्रेऽनाश्रयणात् । तस्मान्निमित्तत्वानादरेण यत्रानुदात्ते परत उदात्त-लोपस्तस्योदात्त इत्यर्थादादेरेवेति बोध्यम् । [**भ्यसोऽभ्यम्**] ॥

साम आकम् । आदेशेनात्र भाव्यमिति । एवञ्च नित्यत्वादाकमिति भावः । 'शेषे लोपे टिलोपे चे'ति पाठे **चो** वाक्यालङ्कारे । **इतर इति ।** ससुट्कोपादानं विना भाविसुण्निवृत्तये नान्यो हेतुर्विद्यत इति भाष्यार्थः । 'शेषे लोपेऽन्त्यलोपे चे'ति पाठेऽपि चः पूर्ववत् । यद्युत्तरवादिनोऽयमाशयस्तर्ह्यामोयमिति चोदकवचोऽनुपपन्न-

स्यादेशवचनात् ॥ * ॥ साम्ग्रहणं क्रियते ॥ [किमर्थं ? ॥ 'यथागृहीतस्यादेशवचनात्' ।] 'निर्दिश्यमानस्यादेशा भवन्ती'त्येवं ससकारस्य न प्राप्नोति, इष्यते च स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति—साम आकम्—,एवमर्थमिदमुच्यते ॥ * ॥ न वा द्विपर्यन्तानामकारवचनादामि सकाराऽभावः ॥ * ॥ न वैतत्प्रयोजनमस्ति ॥ किं कारणम् ? ॥ 'द्विपर्यन्तानामकारवचनात्' । द्विपर्यन्तानां हि त्यदादीनामत्वमुच्यते । तेनामि सकारो न भविष्यति ॥ * ॥ सुट्प्रतिषेधस्त्वादेशे लोपविज्ञानात् ॥ * ॥ सुट्प्रतिषेधस्तु वक्तव्यः ॥ किं कारणम् ? ॥ 'आदेशे लोपविज्ञानात्' । यः स शेषे लोप आदेशे स विज्ञायते ॥ * ॥ न वा टिलोपवचनादादेशे टाप्प्रतिषेधार्थम् ॥ * ॥ न वा सुट्प्रतिषेधो वक्तव्यः ॥

प्र.] त्वं मन्यसे तत इदमुच्यते । साम्ग्रहणमिति । निर्दिश्यमानस्येति । यदि ससकारको न निर्दिश्येत तदादेशविधानकालेऽसंनिहितः पश्चादन्त्यलोपे कृते प्राप्नुवन् सुट्केन निवर्त्येत ? । इष्यते च तन्निवृत्तिरित्येवमर्थं ससकारग्रहणम् । अथवा त्यदाद्यत्वे कृते सुटि च निर्दिश्यमानस्यादेशा इति सुट्सहितस्य न प्राप्नोति । यस्तु निर्दिश्यते तस्य वचनसामर्थ्यान्निर्दिष्टग्रहणपरिभाषानुपस्थानाद्व्यवहितस्याकमादेशः प्राप्नोति, ससुट्कनिर्देशात्ससुट्कस्य भवति । अत्र पक्षे 'आमोऽयं भक्त आम्ग्रहणेन ग्रहीष्यते' इति चोदकस्यैव ग्रन्थः । इतरस्तु पूर्वां व्याख्यामबुध्वा-उत्तरां च दोषवतीमवगम्याह—न वेति । टिलोप इति । वक्ष्यमाणमपर्यन्तस्थान्यपेक्षया शेषे विज्ञायमाने टिरेव शेष इति तस्यैव लोपो विज्ञायते । 'शेष' इति स्थानी

उ.] मत आह—स एवेति । 'अत उत्तरं पठती'त्येतद्व्याचष्टे—तत इदमिति । यदि ससकारक इति । निर्दिश्यमानस्य भाविनो विद्यमानस्य वादेशा निवर्तका भवन्तीति सकाराऽभावे ससकारस्य निवृत्तिर्न प्राप्नोतीति भाष्यार्थ इतिभावः । अत्र व्याख्याने नवेत्याद्यग्रिमभाष्याऽस्वारस्यं मत्वा पक्षान्तरमाह—अथवेति । 'द्विपर्यन्ताना'मित्यनभ्युपगम्येदम् । ननु निर्दिश्यमानस्य तर्हि व्यवहितत्वान्न स्यादत आह—यस्त्विति । वचनसामर्थ्यादिति । चिन्त्यमिदम् । 'अतित्वाक'मिति गौणे चरितार्थत्वात् । तस्मादत्र न स्यादित्येव भाष्याशयः । इतरस्त्विति । चोदक इत्यर्थः । उत्तराञ्चेति । 'त्यदाद्यत्वे कृते' इति यत्—तदनुपपन्नमित्यनेन प्रतिपाद्यत इत्यर्थः । भाष्ये—सुट्प्रतिषेधस्त्विति । आदेशात्पूर्वन्तु सुड् दुर्लभः । आदेशोत्तरं जातस्य तु निवृत्तिः कर्तुमशक्येति सुट्प्रतिषेध एव वक्तव्य इत्यर्थः । 'आदेशे स विज्ञायत' इत्यनेन तत्रान्त्यलोपविज्ञानमुक्तं, तेन च सुट्प्राप्त्युपपादनं बोध्यम् । ननु षष्ठ्या निर्देशाभावात्कथं तस्य स्थानित्वमत आह—शेष इतीति ।

भाष्ये—यः स इति । यः (उद्देश्यः स) प्रसिद्ध आदेशे शेषे लोपः स टिलोपो वक्तव्य इत्यक्षरार्थः । नन्वत्र पक्षे शेषग्रहणस्य विभक्तिविशेषणत्वाऽभावादादेशे

किं कारणम् ? ॥ 'टिलोपवचनात्' । आदेशे यः स शेषे लोपष्टिलोपः स वक्तव्यः ॥ किं प्रयोजनम् ?॥ 'टाप्प्रतिषेधार्थम्' । टाप्मा भूदिति ॥ स तर्हि टिलोपो वक्तव्यः ? ॥ [न वक्तव्यः] ॥*॥ न वा लिङ्गाभावाट्टिलोपवचनानर्थक्यम् ॥*॥ **न वा वक्तव्यम् ॥ किं कारणम् ? ॥ 'लिङ्गाऽभावात्' । अलिङ्गे युष्मदस्मदी ॥ किं वक्तव्यमेतत् ? ॥ न हि ॥ कथमनुच्यमानं गंस्यते ॥ न ह्यस्ति-विशेषो युष्मदस्मदोः स्त्रियां पुंसि नपुंसके वा ॥ अस्ति कारणं येनैतदेवं भवति ॥ किं कारणम् ? ॥ योऽसौ विशेषवाची शब्द[स्त्रीप्रत्ययष्टाप्शब्द]स्तदसांनिध्यात् । अङ्ग ! हि भवांस्तमुच्चारयतु गंस्यते स विशेषः ॥**

ननु च नैतेनैवं भवितव्यम्, न हि शब्दनिमित्तकेन नामाऽर्थेन भवितव्यम् ॥ किं तर्हि ? ॥ अर्थनिमित्तकेन नाम शब्देन भवितव्यम् ॥ तदेतदेवं दृश्यताम्—

प्र.] विषयसप्तम्या निर्दिष्टः । लोपस्य चाऽस्मिन् पक्षे उत्सर्गत्वादनादेशे आत्वयत्वविधानादादेश एव विभक्ताववस्थितः । **टाप्प्रतिषेधार्थमिति** । टापोऽनुत्पत्त्यर्थमित्यर्थः । युष्मदस्मदोर्द्रव्यवाचित्वाद्द्रव्यस्य च लिङ्गसङ्ख्यासंबन्धादन्त्यलोपे सत्यकारान्तत्वाट्टाप्प्राप्नोति । संनिपातपरिभाषायाश्च दोषः पठितः— 'त्यदाद्यकारष्टाब्विधे'रिति टापि सा नाश्रीयते । **अलिङ्गे इति** । अभिधेयस्याऽलिङ्गत्वादलिङ्गे । शब्दशक्तिस्वाभाव्याल्लिङ्गरहित एव ताभ्यामर्थोऽभिधीयते इति टाब्निवृत्त्यै टिलोपो नाश्रयितव्यः । **योऽसौ विशेषवाचीति** । ननु द्योतकाष्टाबादयः, तदुक्तम्— 'सिद्धं तु स्त्रियाः प्रातिपदिकविशेषणत्वात्स्वार्थे टाबादय' इति । नैष दोषः । इदमप्युक्तम्— 'अथ वा पुनरस्तु स्त्रियामभिधेयाया'मिति । 'अथ वा वचिर्द्योतने वर्तते' । वाचकेन खल्वप्युत्पत्तव्यम् । 'वाचकश्चेत्प्रयोक्तव्यो वाचकश्चेत्प्रयुज्यता'मित्यत्र वचिर्द्योतने प्रयुक्तः ।

न हि शब्दनिमित्तकेनेति । ननु शब्दनिमित्त एवार्थस्तथा चैकरूपोऽप्यर्थो भिन्न-

---

उ.] इति कथं लक्ष्यतेऽत आह—**लोपस्य चेति** । **अवस्थित इति** । अस्य 'लोप' इति शेषः । 'अवस्थिति'रिति पाठान्तरं । प्रतिषेधशब्देनानुत्पत्तिर्विवक्षितेत्याह— **टाप इति** । **टापि सेति** । अन्यथा या सेत्यादौ न टाप्स्यात् । तेन सन्निपातपरिभाषया टान्न स्यादिति न शङ्क्यमिति भावः । ननु लिङ्गस्याऽर्थधर्मत्वा'द्युष्मदस्मच्छब्दरूपे अलिङ्गे' इत्यनुपपन्नमत आह— **अभिधेयस्येति** । नन्वनयोर्द्रव्यवाचित्वेन लिङ्गयोग आवश्यकोऽत आह— **शब्दशक्तीति** । द्रव्यत्वं तद्वाच्यस्याऽर्थस्य सङ्ख्याकारकत्वाभ्यां योगादेवेति भावः । भाष्ये— '**विशेषवाची**'त्यनेन टाबादिर्विवक्षितः । तत्र तेषां द्योतकत्वाद्वाचीत्यनुपपन्नमिति शङ्कते— **नन्विति** । 'वाचकेन खल्वपी'त्यादि— 'अतिशायने तम'बित्यत्रोक्तम् । तेषाञ्च द्योतकत्वमेवाभ्युपगतमिति भावः । **ननु शब्दनिमित्त एवेति** । शब्दानुसारेणैवाऽर्थावगतिर्न वस्त्वनु-

अर्थरूपमेवैतदेवंजातीयकं, येनात्र विशेषो न गम्यत इति ॥ अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते–, योऽसौ विशेषवाची शब्द[:स्त्रीप्रत्ययष्टाप्शब्द]स्तद्-सांनिध्यादत्र विशेषो न गम्यत इति–, इहापि तस्य विशेषो न गम्येत–

प्र.] शब्दोच्चारणान्नानारूपः प्रतिभाति। यथा 'पचति' 'पाकं करोति' 'पाकक्रियानिर्वृत्तिं करोती'ति । तथा च 'बलाहकाद्विद्योतते' 'बलाहके विद्योतते' 'बलाहको विद्योतते' इति । कंसादीनां च साधनत्वं शब्दोपहितरूपाणां बुद्धिविषयाणां 'हेतुमति चे'त्यत्र प्रतिपादितम् । एवं तर्हि यः शब्दो लोकेऽत्यन्तमदृष्टप्रयोगस्तन्निमित्तोऽर्थो न भवतीत्युच्यते, शब्दं प्रयुयुक्षमाणेन लोकस्यानुसरणात् । स्वसामर्थ्येन हि शब्दोऽर्थं प्रत्याययति, तच्च सामर्थ्यं लौकिकप्रयोगादवधार्यम् । **अर्थरूपमिति** । सत्यपि वस्तुतो लिङ्गवत्त्वे युष्मदस्मद्भ्यां न तत्प्रत्याययितुं शक्यत इत्यर्थः । युष्मदस्मदभिधेयं चार्थरूपशब्देनोच्यते, न वस्तुरूपम् । तस्यैव वस्तुनो ब्राह्मणादिशब्दैर्लिङ्गयुक्तस्य प्रतिपादनात । न चाऽयं नियमः—'सत्त्वभूतोऽर्थोऽवश्यं लिङ्गसङ्ख्यायुक्तः प्रतीयत' इति; पञ्च सप्तेति लिङ्गानवगमात् । तथा च षट्संज्ञकेभ्यः स्त्रीप्रत्ययप्रतिषेधः प्रत्याख्यायते । केचिल्लिङ्गविशेषनिषेधं मन्यमाना लिङ्गसर्वनामनपुंसकयोगं युष्मदस्मदोरिच्छन्ति । तथा च शिशीलुङ्नुमां युष्मदस्मद्विभक्त्यादेशानां च विप्रतिषेध उक्तः । अन्ये तु दर्शनभेदेन शिशीलुङ्नुमां विप्रतिषेधः, पुंसि नत्वं च लिङ्गवत्त्वाभ्युपगमेन प्रदर्शितम् । सत्त्वभूतस्यार्थस्याऽवश्यं लिङ्गसङ्ख्यायोगः । तथा च

उ.] सारेण, तदुच्यते–'यच्छब्द आह तदस्माकं प्रमाण'मिति। 'पचती'त्यत्र क्रिया प्रधानं, द्वितीये पच्यर्थस्याऽप्राधान्यं, कर्मत्वेन प्रतीतिश्च । तृतीये तु क्रियाया अप्यप्राधान्यं । तथा 'बलाहके' इत्यत्र 'स्थित्वे'ति, द्वितीये 'निःसृत्ये'ति, तृतीये विद्युद्बलाहकयोरभेदाध्यवसायः । वस्तु त्वेकमेव सर्वत्राऽपि । शब्दजबुद्धौ प्रतिभासमान एव शब्दार्थ इत्यत्र दृष्टान्तान्तरमाह—**कंसादीनाञ्चेति । बुद्धिविषयाणामिति** । कथकश्रोत्रोरिति भावः । कंसादीनामिदानीमविद्यमानत्वादिति तात्पर्यम् ।

यः शब्द इति । लोकव्यवहारायस्य शब्दस्य यत्रार्थे सामर्थ्यमवगतं ततोऽन्यो योऽर्थः स तन्निमित्तो न भवति, व्युत्पत्तिसिद्धार्थप्रत्यायनाय शब्दप्रयोगादिति 'अर्थनिमित्तकेन शब्देन भवितव्य'मिति भाष्यार्थ इति भावः। '**अर्थरूपशब्देने**'ति निरनुस्वारः पाठः । युष्मदस्मच्छ्रवणानन्तरं यो बौद्धोऽर्थः प्रतीयते सोऽत्र अर्थरूपशब्देनोच्यत इत्यर्थः । वस्तुरूपस्य लिङ्गवत्त्वं दर्शयति—**तस्यैवेति** । ततश्च-केवलयुष्मदस्मद्भ्यां लिङ्गविशेषानवगमादलिङ्गत्वमुक्तमिति भावः। पञ्च सप्तेत्याद्यर्थस्य सत्त्वरूपत्त्वन्तु कारकत्वेनाऽन्वयादेवेति बोध्यम् । 'प्रत्याख्यायते' इत्यस्य'कैश्चिद्वृत्तिकारादिभि'रिति शेषः । नन्वत्र वार्तिककृताऽनयोरलिङ्गत्वमुक्तं, पूर्वत्र तु लिङ्गवत्त्वमाश्रित्य विप्रतिषेध उक्त इति विरोधोऽत आह—**केचिदिति** । अत्र लिङ्ग-

दृषत् समिदिति ॥*॥ तस्मात्सुट्प्रतिषेधः ॥*॥ **तस्मात्सुट्प्रतिषेधो वक्तव्यः** ॥ **"ससकारग्रहणं वा" कर्तव्यम्** ॥

अथ क्रियमाणेऽपि ससकारग्रहणे कस्मादेवात्र सुण्न भवति ? ॥ **ससकारग्रहणसामर्थ्याद्भाविनः सुट आदेशो विज्ञायते** ॥ [साम आकम्] ।

आत औ णलः ॥७।१।३४॥

इह पपौ तस्थाविति त्रीणि कार्याणि युगपत्प्राप्नुवन्ति—द्विर्वचनमेकादेश

प्र.] षट्संज्ञेभ्यः स्त्रीप्रत्ययनिषेधः कृतः । इह त्वलिङ्गत्वेन टाप्परिहृत इति विरोधं परिहरन्ति । **तस्मादिति** । टाबभावे टिलोपानाश्रयणादन्त्यलोपे सति सुटः प्राप्तस्य प्रतिषेधो विधेयः, लाघवात्सकारग्रहणं (वा) कर्तव्यम् । **अथेति** । आदेशप्रवृत्तिकाले संनिहित आदेशेन निवर्त्यो नान्यः । **ससकारग्रहणसामर्थ्यादिति** । न हि सत आदेशेन निवृत्तिः (क्रियते) । किं तर्हि?, अत्यन्ताभावस्तस्मिन्विषये तस्यानेनोपायेनाख्यायते । शास्त्रेण तु प्रसङ्गवतो निवृत्तिराख्यायत इति भाविनः सुटो निवृत्तिः ससुट्कनिर्देशेन प्रतिपाद्यते । [**साम आकम्**] ॥

आत औ णलः । त्रीणि कार्याणीति । लित्स्वरस्तु प्रयोजनाभावान्नोपन्यस्तः ।

उ.] वस्त्वपक्ष एव युक्तः, सूत्रवार्तिकोभयसंमतत्वात् । टिलोपस्त्वनर्थक एव, सन्निपातपरिभाषया टापोऽप्राप्तेः । अत एव वार्तिककृता त्यदाद्यत्वविषय एव टाब्विधौ तस्या दोष उक्तो नतु सामान्यतष्टाब्विधौ । अत्र 'न वा लिङ्गाऽभावा'दित्युक्तिस्त्वेकदेशिनः, अतितुच्छत्वात्, सूत्रवार्तिकविरुद्धत्वाच्च न तत्खण्डने भगवत आदर इति बोध्यम् । **टाबभावे इति** । अलिङ्गत्वात्सन्निपातपरिभाषया वा तदभावे सिद्धे इत्यर्थः । 'ससकारग्रहणं वे'त्येव ज्याय इत्याह—**लाघवादिति** । अत्र सूत्रे सकारग्रहणं भाष्यकैयटयोः सुड्ग्रहणं चागमोपलक्षणं, तेन 'प्रत्ययोत्तरपदयोश्चे'ति सूत्रभाष्योदाहृतेऽतित्वाकमित्यादौ भाविनुटोऽपि व्यावृत्तिः । **नहि सत इति** । शब्दाऽनित्यत्वप्रसङ्गादिति भावः । **किन्तर्हीति** । यथार्द्धधातुकविषयेऽस्तेरप्रयोगो भूशब्दस्य च प्रयोगोऽस्तेर्भूरित्यनेनोपायेन प्रतिपाद्यत इति भावः । कथन्तर्हि 'स्थानिनं निवर्त्यादेशः क्रियते' इति शास्त्रे व्यवहारोऽत आह—**शास्त्रेणेति** । **प्रसङ्गवतः**-बुद्धिस्थितस्य । अस्त्युपदेशात्सर्वत्राऽस्तिबुद्धौ प्रसक्तायामार्द्धधातुके भूबुद्धिप्रतिपादनेन तद्बुद्धिनिवृत्तिः क्रियते । सैव च विषये आरोप्यत इति भावः । **भाविनः सुट इति** । भाविसुड्बुद्धेरित्यर्थः । तन्निवृत्तिश्चामोऽभावात् । अत्र सामः स्थानित्वोक्त्याऽऽकमि स्थानिवत्त्वेन साम्त्वमेव न त्वाम्त्वम्, अत्र एवाऽतित्वाकमित्यादौ 'प्रत्ययोत्तरपदयो'रिति सूत्रभाष्योदाहृते आकन्नुडभावौ सिद्धौ । आम्येव साम्त्वस्याहार्यारोपेणादेशः । आदेशस्याम्त्वाऽभावाच्चात्र न नुट् । न च यत्र भावी सुट् तत्रैवाऽयं; सामो भावित्वस्य सर्वथा दुरुपपादत्वादिति भाष्यविरुद्धकल्पना व्यर्थेतिदिक् ॥

आत औ । सर्वथेति । सत्यसति च लित्स्वरे 'एकादेश उदात्तेनोदात्त' इत्य-

औत्वमिति । तद्यदि सर्वत औत्वं लभ्येत कृतं स्यात् । अथापि द्विर्वचनं लभ्येत एवमपि कृतं स्यात् । तत्तु न लभ्यम् ॥ किं कारणम् ? ॥ अत्र हि परत्वादेकादेशो द्विर्वचनं बाधते ॥ परत्वादौत्वम् ॥ नित्य एकादेश औत्वं बाधेत ॥ कं पुनर्भवानौत्वस्यावकाशं मत्वाह–'नित्य एकादेश' इति,– अनवकाशमौत्वमेकादेशं बाधिष्यते । औत्वे कृते द्विर्वचनमेकादेश इति ; यद्यपि परत्वादेकादेशः स्थानिवद्भावाद्द्विर्वचनं भविष्यति ॥ [आत औ] ॥

प्र.] सर्वथाऽन्तोदात्तत्वस्य सिद्धत्वात्। **औत्वं लभ्येत कृतं स्यादिति**। एकादेशे कृते औत्वाऽप्राप्तिदोषस्तावत्परिहृत इत्यभिसन्धाय द्विर्वचनाऽसिद्धावपि 'कृत'मित्युक्तम् । **द्विर्वचनं लभ्येतेति** । एकादेशे कृते व्यपवर्गाभावाद्या द्विर्वचनाऽप्राप्तिः सा परिहृता भवतीत्येतावता द्विर्वचनसिद्ध्या 'कृत'मित्युक्तम् । **परत्वादेकादेश इति** । वर्णाश्रयत्वादन्तरङ्गत्वादपीति द्रष्टव्यम् । **नित्य एकादेश इति** । यद्यप्यकृते औत्वे सवर्णदीर्घत्वं प्राप्नोति, कृते तु वृद्धिः, तथापि व्यक्तिभेदमनाश्रित्यैकादेशसामान्याश्रयं नित्यत्वमुच्यते । औत्वं तु कृते एकादेशे नैव प्राप्नोतीत्यनित्यम् । **अनवकाशमौत्वमिति** । सावकाशस्य सवर्णदीर्घस्य बाधकमित्यर्थः। **यद्यपीति** । 'वार्णादाङ्गं बलीय' इति पूर्वं द्विर्वचनं भवति, अथाप्यङ्गाधिकारविहितमाङ्गमुच्यते तथापि न दोष इति भावः। **स्थानिवद्भावादिति** । 'द्विर्वचननिमित्तेऽचि परतोऽजादेशः स्थानिवद्भवती'ति सूत्रार्थमाश्रित्यैकादेशे कृतेऽचःपरत्वाभावात्स्थानिवद्भावाऽभाव आशङ्कितः । 'अचि यो विहितोऽजादेशः स स्थानिव'दितिसूत्रार्थाश्रयणेन तु स्थानिवद्भाव उक्तः । नहि स्थानिवद्भावस्य परभूतोऽज निमित्तभूत आश्रीयते । किं तर्हि ? । अजादेशस्य । यदि तर्हि स्थानिवद्भावाद्द्विर्वचनं, ततो नित्यं तदिति पूर्वमेव तेन प्रवर्त्यम् । नैतदस्ति। एकादेशोपि नित्योऽन्तरङ्गश्चेति स एव पूर्वं प्रवर्तते । क्रमप्रतिपत्त्यर्थं चानवकाशत्वमौत्वस्याश्रितम् । वृद्धिलक्षणं चैकादेशमौत्वं न बाधते, न हि तस्मिन् नाप्राप्ते औत्वमारभ्यते । [आत औ णलः] ॥

उ.] नेनाऽन्तोदात्तत्वसिद्धेरिति भावः। एतेन 'त्रीणि' इति न्यूनमित्यपास्तम् । नन्वौत्वेपि द्वित्वात्पूर्वमन्तरङ्गत्वादेकादेशे व्यपवर्गाऽभावेन द्वित्वं न स्यादिति 'कृत'मित्युक्तमत आह—**एकादेशे इति** । ननु द्वित्वे एकादेशे औत्वं न स्यादिति कथं कृतं स्यादत आह—**एकादेशे इति** । भाष्ये–**परत्वादौत्वमिति** । एकादेशबाधकमिति पूर्वः पक्षः । **वार्णादाङ्गमिति** । प्रत्यये परतः पूर्वस्य विधानादिदमप्याङ्गमिति भावः । **स्थानिवद्भावाऽभाव इति** । तत्र सति परत्वादेकादेश आशङ्कित इत्यर्थः । चोदकेन स्थानिवत्त्वमनाश्रित्य चोदितं, तदाशयमाह—**द्विर्वचननिमित्ते इति** । **अचि परत इति** । स्थानिवत्त्वस्य निमित्तमित्यर्थः । **यदि तर्हीति** । एवञ्च 'स्थानिवद्भावा'दिति हेतुरयोग्यो नित्यत्वादिति भाष्ये युक्तमिति भावः ।

नन्वनवकाशमौत्वं दीर्घवद्वृद्धिमपि बाधेतेत्यत आह—**क्रमेति** । औत्वं ततो

विदेः शतुर्वसुः ॥७।१।३६॥

॥ * ॥ विदेर्वसोः कित्त्वम् [–वसुग्रहणे लिडादेशग्रहणार्थम्] ॥ * ॥

विदेर्वसोः कित्त्वं वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ ['वसुग्रहणेषु लिडादेशग्रहणार्थम्'] । वसुग्रहणेषु लिडादेशस्यापि ग्रहणं यथा स्यात् ॥ किं च कारणं न स्यात् ? ॥ 'अननुबन्धकग्रहणे हि सानुबन्धकस्य ग्रहणं ने'त्येवं लिडादेशस्य न प्राप्नोति, सानुबन्धको हि स क्रियते ॥ किं पुनः कारणं स सानुबन्धकः क्रियते ? ॥ अयमृकारान्तानां

प्र.] **विदेः शतुर्वसुः। वसोः कित्त्वमिति।** लिडादेशस्य कित्त्वमस्तीति तदनुरोधेनाऽस्य कित्त्वमुच्यते। अनुबन्धान्तरेणापि तस्य सानुबन्धकत्वं संपद्यते। **अननुबन्धकग्रहण इति।** स्थानिवद्भावादुगित्कार्यस्य सिद्धत्वादुकार उच्चारणार्थो नानुबन्ध इति मन्यते। सत्यपि वाऽस्य सानुबन्धकत्वे तदनुबन्धकग्रहणपरिभाषया क्वसोरग्रहणप्रसङ्गः। परिभाषोपादानं त्वग्रहणोपलक्षणम्। **किं पुनः कारणमिति।** 'असंयोगाल्लिट्कि'दिति कित्त्वस्य सिद्धत्वाद्वसुरेव लिटो विधीयताम्। **अयमिति।** यथा 'तेरतु'रित्यादौ गुणो भवति तथा वसावपि स्यादिति तद्बाधनार्थं कित्त्वं क्रियते। एतच्च प्रयोजनोपलक्षणमिति संयोगान्तार्थमपि कित्त्वमित्याहुः। तेनाऽऽजिवानित्यञ्जेः, 'रेधिवा'निति रधेर्नुमि सिद्धं भवति। ननु संयोगान्तार्थत्वे कित्त्वस्य कथं प्रतिषेधविषय आरभ्यमाणो गुणो बाध्यः ?। उच्यते। ऋकारान्तेभ्यः परस्य क्वसोरौपदेशिकातिदेशिककित्त्वद्वयसामर्थ्यात् 'क्ङिति चे'ति गुणनिषेधो द्विरुपतिष्ठते। तत्र पुनरुपस्थानं प्रतिषेधविषये गुणनिषेधं विधास्यति। केचिदाहुः—छान्दसः क्वसुः, तत-

---

उ.] वृद्धिस्ततः स्थानिवत्त्वाद्वित्वमिति क्रमप्रतिपत्त्यर्थं यदनवकाशत्वमाश्रितं तन्न नित्यत्ववदेकादेशसामान्यापेक्षं किन्तु दीर्घापेक्षमेवेति वृद्धिर्भवत्येवेत्यर्थः। तदाह—**वृद्धिलक्षणश्चेति। [आत औ णलः]।**

विदेःश। ननु वसोः कित्त्वं न गुणाऽभावाय, शतृस्थानिकत्वेन ङित्त्वादेव सिद्धेः, किन्तु सामान्यग्रहणार्थं, तस्य चानुबन्धान्तरेणाऽपि संभवात्किं ककारानुबन्धेनेत्यत आह—**लिडादेशस्येति।** ननु वसुरुकारेण सानुबन्धक इति किमुच्यते- 'अननुबन्धकग्रहणे' इति, तत्राह—**स्थानिवदिति।** ननु विधेयाविषये उच्चारणार्थस्याऽपीत्संज्ञावश्यक्येव, किञ्चाऽल्विधित्वादुगित्त्वन्दुर्लभमित्यत आह—**सत्यपि वेति। तदनुबन्धकेति।** यावदनुबन्धैरनुबन्धवत्ता तदन्यतमरहितग्रहणे तद्विशिष्टग्रहणं नेति भाष्यार्थ इति भावः। **उपलक्षणमि**त्यस्य-तथा भाष्यं व्याख्येयमित्यर्थः। ननु क्वसोः कित्त्वं गुणप्रतिषेधार्थं स्यादिति प्रश्नाऽसङ्गतिरत आह—**असंयोगादिति।** 'आजिवा'नित्यादौ नलोपः कित्त्वस्य फलं, 'रेधिवा'नित्यादौ एत्त्वाभ्यासलोपौ च। **नन्विति।** अन्यार्थत्वात्कित्त्वस्य सामर्थ्याऽभावः। **द्विरुपतिष्ठत**

लिटि गुणः प्रतिषेधविषय आरभ्यते स पुनः कित्करणाद्बाध्यते। आतीस्तीर्वान् निपुपूर्वानिति ॥ स तर्ह्यस्यैवमर्थोऽनुबन्धः कर्तव्यः ? ॥ न कर्तव्यः। क्रियते न्यास एव-द्विसकारको निर्देशः। "विदेः शतुर्वसुस्समासेऽनञ्पूर्वे क्त्वो ल्यप्" ॥ [विदेः शतुर्वसुः] ॥

समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥७।१।३७॥

॥ * ॥ ल्यबादेश उपदेशिवद्वचनम् [-अनादिष्टार्थम्] ॥ * ॥ ल्यबादेशे उपदेशिवद्भावो वक्तव्यः। उपदेशावस्थायां ल्यब्भवतीति वक्तव्यम् ॥ किं प्रयोजनम् ॥ 'अनादिष्टार्थम्'। अकृतेष्वादेशेषु ल्यब्यथा स्यात् ॥

के पुनरादेशा उपदेशिवद्वचनं प्रयोजयन्ति ? ॥ हित्वदत्त्वात्त्वेत्वेत्त्वदीर्घत्वशूडिटः। हित्वं-हित्वा। प्रधाय। हित्वम् ॥ दत्त्वं--दत्त्वा। प्रदाय।

प्र.] श्छन्दस्युभयथेति सार्वधातुकत्वान्ङित्त्वान्नलोपस्य सिद्धत्वात्संयोगान्तार्थं कित्त्वं नोपयुज्यते। द्विसकारक इति। 'वसुस्'इत्यादेशो निर्दिष्टः। तत्र सकारस्य रुत्वविसर्जनीयौ कृतौ। ततः सकारेण सानुबन्धत्वं वसोः संपद्यत इति वसुप्रदेशेषूभयोरविशेषाद्ग्रहणं सिध्यति। [विदेः शतुर्वसुः] ॥

समासेऽनञ्पूर्वे। ल्यबादेश इति। अनेकपदाश्रयसमासनिमित्तो ल्यबादेशो बहिरङ्गो हित्वादयस्त्वेकपदविषयप्रकृतिप्रत्ययापेक्षा अन्तरङ्गा इति ते पूर्वं प्राप्नुवन्तीति भावः। तत्रोपदेशे समास इति विरोधात्समासो विषयत्वेनाश्रीयते। समासविषयेऽकृत एव तस्मिन् क्त्व उपदेशावस्थायामेव ल्यब्भवति। तस्मिन् कृतेऽनल्विधाविति स्थानिवत्त्वनिषेधाद्धित्वाद्यभावः। पूर्वोक्तविरोधपरिहाराय भाष्यकारोऽतिदेशं व्याचष्टे—उपदेशिवद्भावो वक्तव्य इति। उपदेशावस्थायामिति। अत्राप्युपमानोपमेयसंबन्धो द्रष्टव्यः-कृतेऽपि समासे ल्यब्भवन्नुपदेशिवद्भवति, अकृतेषु हित्वादिषु भवतीत्यर्थः। अथ वा समास इति विषयसप्तम्याश्रयमेव भाष्यम्, उपदेशावस्थायां ल्यब्भवतीति। 'उपदेशिवद्भावो वक्तव्य' इत्येतत्तु वस्तुव्याख्यानम्। उपदेशावस्थायां ल्यब्भवन्नन्यैरुपदेशिभिस्तुल्यं भवतीत्यर्थः। अनादिष्टार्थमिति।

उ.]इति। निषेधसूत्राणां परिभाषात्वादिति भावः। केचिदिति। अत्र पक्षे कित्त्वसामर्थ्यात्प्रतिषेधविषयगुणनिषेधः सूपपादः। 'अत एके'त्यत्र ङितीत्यनुवृत्त्यैत्वाभ्यासलोपावपि सिद्धाविति भावः। [विदेः शतुर्वसुः]।

समासे नञ्पू। विरोधादिति। क्त्वोपदेशे समासाऽभावादिति भावः। अनल्विधाविति। तकारादौ हलादौ चादेशानां विधानादिति भावः। अत्राप्युपमानेति। उपदेशावस्थायामिवेत्यर्थ इति भावः। तर्हु'पदेशिवद्भाव'इति भाष्यमयुक्तं स्यादत आह—उपदेशिवद्भावो वक्तव्य इत्येतत्त्विति।

दत्वम् ॥ आत्वं–खात्वा । प्रखन्य । आत्वम् ॥ इत्वं–स्थित्वा । प्रस्थाय । इत्वम् ॥ ईत्वम्–पीत्वा । प्रपाय । ईत्वम् ॥ दीर्घत्वं–शान्त्वा । प्रशम्य । दीर्घत्वम् ॥ 'श्'–पृष्ट्वा । आपृच्छ्य । 'श्' ॥ ऊठ्–द्यूत्वा । प्रदीव्य । ऊठ् ॥ इट्–देवित्वा । प्रदीव्य [इट्] ॥

किं पुनः कारणमादेशास्तावद्भवन्ति न पुनर्ल्यप्, ननु परत्वाल्ल्यपा भवितव्यम् ॥ सन्ति चैवाऽत्र के चित्परे आदेशाः । अपि च— ॥*॥ बहिरङ्गलक्षणत्वात् ॥*॥ बहिरङ्गो ल्यप्, अन्तरङ्गा आदेशाः । "असिद्धं बहिरङ्गमन्तरङ्गे" ॥ स तर्ह्युपदेशिवद्भावो वक्तव्यः ? ॥ न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति—'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते' इति, यदयमदो जग्धिर्ल्यप्ति किती'ति किती'त्येव सिद्धे ल्यब्ग्रहणं करोति ॥

प्र.] आदेश आदिष्टं, तस्याऽभावोऽनादिष्टमित्यव्ययीभावः । **प्रखन्येति** । 'ये विभाषे'ति विकल्पेनात्वमिष्यते, 'जनसनखनां सन्झलो'रित्यनेन तु ल्यबादेशात्पूर्वं नित्यं प्राप्नोति । **प्रदीव्येति** । पूर्वमिटि कृते 'निर्दिश्यमानस्यादेशा भवन्ती'ति केवलस्य क्त्वो ल्यपि सति इटः श्रवणं प्राप्नोति । अथापि कथं चित्सेक्त्वस्य स्थाने ल्यप्स्यात्तथापि-स्थानिवद्भावान्न क्त्वा सेडिति किन्त्वप्रतिषेधाद्गुणः प्रसज्येत, दीर्घत्वस्याऽसिद्धत्वात् ।

परत्वादिति । इष्टत्वादित्यर्थः। इतरस्त्विष्टानिष्टत्वविभागो न ज्ञायत इति व्यवस्था-शब्द एवानेन परशब्दः प्रयुक्त इति मत्वाह—**सन्ति चेति** । **बहिरङ्गलक्षणत्वादिति**। समासापेक्षया बहिरङ्गं–लक्षणं–शास्त्रमस्येति समासः । अथ वा बहिरङ्गः समासो लक्षणं निमित्तमस्येत्यर्थः । **यदयमिति** । 'ति किती'त्येव जग्धिभावस्य ल्यबादेशात्प्रागेव सिद्धत्वाल्ल्यब्ग्रहणं यथोक्तमर्थं ज्ञापयति । स्थानिवत्सूत्रे

उ.] **अव्ययीभाव इति** । अर्थाभावे-। तेनादेशाऽभावार्थमित्यर्थः । तत्पुरुषेणैवार्थलाभादव्ययीभावो न युक्तो नञेति–नञ्सूत्रे निरूपितम् । नन्वेवं सति प्रखायेत्यसाध्वेव स्यादत आह—**ये विभाषेति** । भाष्ये—**ईत्वं पीत्वा प्रपायेति** । एवञ्च 'न ल्यपी'ति सूत्रमसङ्गतं स्यादुपदेशवचनाऽभावे इति भावः । **अथापीति** । तदन्तविधिविषय एवैषा परिभाषा नतु 'यदागमा' इत्येतद्विषये इति यद्यभ्युपगम्येतेत्यर्थः । इदन्तु प्रौढ्यैव, 'पादःप'दिति सूत्रस्थभाष्यविरोधात् । किञ्च सेट्त्वमशास्त्रीयत्वात्स्थानिवत्त्वेन दुर्लभमित्यन्ये । केचित्तु विशिष्टस्य निर्दिश्यमानत्वाऽभावान्निर्दिश्यमानस्य च व्यवहितत्वाल्ल्यपोऽप्राप्तिरेवाऽत्र दोष इत्याहुः। **दीर्घत्वस्य**—'हलि चे'त्यस्य । **समासापेक्षमित्यादि** । लक्षणशब्दः शास्त्रपरो निमित्तपरो वेति भावः । **ज्ञापयतीति** । एवं 'न ल्यपी'त्यपि ज्ञापकं बोध्यम् । ननु ल्यब्ग्रहणं स्थानिवत्सूत्रेऽन्यार्थज्ञापकमुक्तमिति चरितार्थं कथमस्यार्थस्य ज्ञापकं स्यादत आह—**स्थानिवत्सूत्रे इति** ।

॥ * ॥ स्नात्वाकालकादिषु च प्रतिषेधः ॥*॥ **स्नात्वाकालकादिषु च प्रतिषेधो वक्तव्यः । स्नात्वाकालकः । पीत्वास्थिरकः । भुक्त्वासुहितक इति ।** ॥*॥ तदन्तनिर्देशात्सिद्धम् ॥ * ॥ **तदन्तनिर्देशात्सिद्धमेतत् ॥ कथम् ॥ क्त्वान्तस्य ल्यपा भवितव्यं नचैतत्क्त्वान्तम्** ॥*॥ समासनिपातनाद्वा ॥*॥ **अथ वाऽवश्यमत्र समासार्थं निपातनं कर्तव्यन्तेनैव यत्नेन ल्यबपि न भविष्यति ।** ॥*॥ अनञो वा परस्य ॥*॥ **अथ वाऽनञः परस्य ल्यपा भवितव्यं, न चात्रा-**

प्र.] युष्मदस्मदोरनादेश इत्यनादेशग्रहणंतत्स्थानापत्त्या तद्धर्मलाभस्य स्वरूपविधिना निरस्तस्य ज्ञापकमुक्तम् । ल्यब्ग्रहणं त्वलाश्रयेषु कार्येषु तद्धर्मलाभाऽभावस्य । यमर्थमन्तरेण यस्यानुपपत्तिस्तस्य सर्वस्य ज्ञापकं तद्भवतीत्यनेकोप्यर्थो ल्यब्ग्रहणेन ज्ञाप्यत इति विरोधाऽभावः । **स्नात्वाकालकादिष्विति** । मयूरव्यंसकादिषु समासप्रकरणात्समासार्थ एवैषां पाठः । तत्र समासेऽनञ्पूर्वे यो व्यवस्थितः क्त्वाप्रत्ययस्तस्य ल्यब्विधीयमानोऽत्रापि प्राप्नोति । **तदन्तनिर्देशादिति** । क्त्वान्तः समास इह निर्दिश्यत इत्यर्थः । समासे इति निर्धारणे सप्तमी, सामान्यापेक्षं चैकवचनम्, अथ वा छान्दसं बहुवचनस्य स्थाने । निर्धारणञ्च समानजातीयस्य भवतीति क्त्वान्तः समासो गृह्यते । निर्धार्यमाणस्य क्त्वाग्रहणेन विशेषणात्तदन्तविधौ सत्ययमर्थो भवति—'समासेष्वनञ्पूर्वेषु क्त्वान्तस्य समासस्य ल्यब्भवति' । स च 'निर्दिश्यमानस्यादेशा भवन्ती'ति क्त्व एव भवति । **समासनिपातनाद्वेति** । समुदायानां साधुत्वमभ्यनुज्ञायते—प्राकरणिकाऽप्राकरणिककार्यभावाऽभावविधानद्वारेणेत्यर्थः । येषु चात्र स्नात्वाकालकादिषूत्तरपदानुपात्तक्रियापेक्षः क्त्वाप्रत्ययस्तेषां सापेक्षत्वेऽपि निपातनात्समासः । **अनञो वा परस्येति** । अनञ् चासौ पूर्वश्चेति समासो, निपातना-

---

उ.]यमर्थमिति । यं यमर्थमित्यर्थः । ननु मयूरव्यंसकादिपाठादेव ल्यबभावः सिद्धोऽत आह—**मयूरेति** । प्रकरणात्समासविध्यर्थ एव स पाठ इति भावः ।

ननु क्त्वान्तनिर्देशेऽपि 'स्नात्वे'ति क्त्वान्तमस्त्येवेत्यत आह—**क्त्वान्तः समास इति** । ननु विविभक्तित्वात्कथं समासपदेन क्त्वः सामानाधिकरण्यमत आह—**निर्धारण इति** । **समास इति** । सप्तमी षष्ठ्यर्थे सौत्रीति वक्तुं युक्तम् । **समुदायानामिति** । समुदायनिपातनसामर्थ्यादप्राकरणिकमपि किञ्चिन्निपातनान्निषिध्यत इति भावः ।

ननु क्रिययोः समानकर्तृकयोः पूर्वकालवृत्तिक्रियावाचकात् क्त्वाविधानेन 'स्नात्वाकालक' इत्यत्र क्त्वा दुर्लभः । 'पीत्वासुहितक' इत्येवोदाहर्तुं युक्तं । संपत्त्यादिक्रियापेक्षक्त्वाप्रत्यये तु सापेक्षत्वाद्वृत्तिर्दुर्लभेत्यत आह—**येषु चेति** । **सापेक्षत्वेऽपीति** । 'स्नात्वाकालकः संपन्न' इत्यर्थात्प्रतीयमानक्रियासापेक्षत्वेऽपीत्यर्थः ।

नन्वनञ्पूर्वे इति सूत्राक्षरेषु स्थितेषु कथमनञः परस्येत्यर्थलाभोऽत आह—**अनञ्चासाविति** । वस्तुतः पूर्वग्रहणमकृत्वा'ऽनञ' इत्येव सूत्रे पाठ्यमिति भाष्याशयः ।

ऽनञं पश्यामः ॥ **ननु च धातुरेवाऽनञ** ॥ **न धातोः परस्य भवितव्यम्** ॥ **किं कारणम्** ? ॥*॥ नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ॥*॥ **नञ्**-**युक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते** ॥ **कुत एतत्** ? ॥ ['तथा ह्यर्थगतिः'] । **तथा ह्यर्थो गम्यते । तद्यथा—'अब्राह्मणमानये'त्युक्ते ब्राह्मण-सदृशं पुरुषमानयति, नाऽसौ लोष्टमानीय कृती भवति । एवमिहाप्यनञिति नञ्प्रतिषेधादन्यस्मादनञो नञ्सदृशात्कार्यं विज्ञास्यते** ॥ **किं चान्यदन-ञ्नञ्सदृशम्** ?॥**'पद' मित्याह । अथ वा''प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवती''त्येवं धातुरपि 'क्त्वा'ग्रहणेन ग्राहिष्यते** ॥ **ननु चेयमपि परिभाषास्ति— ''कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवती''ति साऽपीहोपतिष्ठते** ॥ **तत्र**

प्र.] त्पूर्वशब्दस्य परनिपातः, विशेष्यत्वेन विवक्षितत्वाद्वा । 'अन'ञिति वा लुप्तसप्तमीकं पृथक्पदम् । सत्सप्तमी चेयम् । 'अनञि पूर्वे सति क्त्वो ल्यब्भवति, अर्थाद-नञः परस्ये'त्यर्थोऽवतिष्ठते । तदन्तविधिश्चाऽत्र नाश्रीयते, क्त्वाप्रत्ययस्य प्राधान्येन प्रक्रमाद्विशेषणत्वाऽभावात्—'येन विधिस्तदन्तस्ये'ति । प्रत्ययग्रहणपरिभाषाश्रयस्तु तदन्तविधिः परस्ताद्वक्ष्यते । 'येन नाव्यवधान'मिति च धातुना व्यवधानमाश्रीयते । **ननु चेति** । असत्त्वभूतार्थवाचित्वादिना धर्मेण धातुरपि नञ्सदृशो भवति । **न धातोःपरस्येति** । पदत्वनिबन्धनं सादृश्यमाश्रीयते न तु धर्मान्तरनिबन्धनम् ।

नाऽस्त्यत्र प्रमाणमित्याशङ्क्याह—**अथ वेति** । क्त्वाग्रहणेन धातुप्रत्ययसमुदायस्य परिग्रहात्तदवयवत्वाद्धातोः स्वावयवेन पौर्वापर्याऽसंभवाद्धातुरनञ्ग्रहणेन न गृह्यते ।

उ.] नन्वञः परस्य क्त्वान्तस्येत्यर्थ, उत क्त्व इत्येव?, नाद्यः, 'ननु च धातुरेवे'ति भाष्याऽसङ्गतेः । नान्त्यः, 'प्रकृत्ये'त्यादौ धातुना व्यवधानाल्ल्यबनापत्तेः, 'नञिवयुक्त'-न्यायेन पदात्परस्येत्यर्थादत आह—**तदन्तविधिश्चेति** । 'येन विधिस्तदन्तस्ये'ति तदन्तविधिश्चात्र नाश्रीयत इति पूर्वेणान्वेति । विशेष्याऽसन्निधानादिति भावः ।

प्रत्ययग्रहणपरिभाषेति । अस्याशयं वक्ष्यामः । नन्वेवं 'प्रकृत्ये'त्यादौ न स्यादत आह—**येन नेति** । **पदत्वनिबन्धनमिति** । लक्ष्यमूलव्याख्यानादिति भावः । **भाष्ये अथवा प्रत्ययग्रहणे इति** । न च विशेष्याऽभावात्तदन्तविधेः कथं प्राप्तिः, नाऽनेना-ऽपूर्वतदन्तविधिबोधनं किन्तु 'येन विधि'रित्यस्यैवेति वाच्यं, शब्दशास्त्रत्वेनोपस्थित-शब्दरूपं विशेष्यमादाय तदन्तविधेरदोषात् । तत्र तात्पर्यग्राहकन्तु 'यस्मा'दित्यादि वार्तिकमेव । वस्तुतोऽयं वाचनिक इत्येव युक्तम् । अन्यथा 'वनो र चे'त्यादौ 'समास-प्रत्ययविधा'वित्येनाऽस्याऽपि निषेधः स्यात् । मम तु सौत्रस्यैव स निषेध इति भावः । एवञ्च 'समासेऽनञः परस्याऽङ्गनिमित्तक्त्वान्तावयवस्य निर्दिश्यमानस्य क्त्वो-ल्य'बिति सूत्रार्थ इति स्नात्वाकालकादौ न दोष इति भावः । भाष्ये—**गतिकारक**-

को दोषः ? ॥ इह न स्यात्—प्रकृत्य । प्रहृत्य । इह तर्हि स्यात्—परममकृत्वा । उत्तमकृत्वा । न वा अत्रेष्यते ॥ अनिष्टं च प्राप्नोति, इष्टं च न सिध्यति ॥"गतिकारकपूर्वस्यैवेष्यते"॥ कुतो नु खल्वेतद्द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः 'प्रत्ययग्रहणे यस्मात्स (विहित)स्तदादेर्ग्रहणं भवति' 'कृद्ग्रहणे गतिकारकपूर्वस्ये'ति च; इयमिह परिभाषा भवति–'प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवती'ति, इयं न भवति—'कृद्ग्रहणे गतिकारकपूर्वस्यापी'ति ?॥ आचार्यप्रवृत्तिर्ज्ञापयति—इयमिह परिभाषा भवति

प्र.]प्रकृत्येति। गतेः क्त्वान्ते समुदायेऽनुप्रवेशात्पौर्वापर्याऽभावात्तद्व्यतिरिक्तनञ्सदृशशब्दान्तराऽभावाल्ल्यपोऽप्राप्तिः। **परमकृत्वेति ।** परमशब्दो न गतिर्न च कारकमिति क्त्वान्तेऽनन्तर्भूतः पूर्व इति ततः परस्य क्त्वान्तस्य ल्यप्प्रसङ्गः । 'गतिकारकपूर्वस्यापी'त्यपिशब्दात्केवलस्याऽपि 'कृत्वे'त्यादेः क्त्वान्तस्य ग्रहणात् ।

आचार्य आह—**न वै अत्रेष्यत इति**। तस्मात्कृद्ग्रहणपरिभाषाऽत्र नाश्रीयते । चोदक आह–**अनिष्टं चेति।** आचार्य आह–**गतिकारकपूर्वस्यैवेष्यत इति**। 'प्रकृत्य' 'पार्श्वतःकृत्ये'त्यादौ ल्यबादेश इष्यते । कृद्ग्रहणपरिभाषोपस्थाने च न सिध्यतीति नासावाश्रीयते । चोदक आह—**कुतो न्विति ।** प्रत्ययग्रहणपरिभाषाया अवकाशः उपगोरपत्यमौपगव इत्यत्र, तद्धितान्तस्य प्रातिपदिकत्वात्सुब्लुग्भवति । कृद्ग्रहणपरिभाषाया अवकाशः–व्यावलेखी व्यावचर्चीति । 'णचः स्त्रियाम'ञिति गतिपूर्वस्य णजन्तत्वादञि सति वृद्धिस्वरौ भवतः । अत्र हि प्रत्ययग्रहणपरि-

---

उ.]पूर्वस्यापीति। गत्यादिसन्निधाने विशिष्टस्यैव क्त्वान्तग्रहणेन ग्रहणं, तदसन्निधाने धातुप्रत्ययसमुदायस्यापीत्यर्थस्तदाह—**गतेः क्त्वान्ते इति । ल्यपोऽप्राप्तिरिति ।** सूत्रन्तु 'परमकृत्वे'त्यादौ चरितार्थं स्यादिति भावः। भाष्ये—**परमकृत्वेति ।** 'सन्महत्परमे'ति विशेषणसमासः । **केवलस्यापीति ।** यत्र तु गतिकारकपूर्वत्वं तत्र विशिष्टस्यैव क्त्वान्तत्वं न केवलस्य, अन्यत्र तु केवलस्यापि तत्त्वमिति भावः। 'गतिरनन्तर' इत्यत्र गतेः पूर्वपदभूतायाः क्त्वान्ते उत्तरपदे कार्यविधानात्तत्समवधानेऽपि केवलस्य क्त्वान्तत्वेन ग्रहणं, न चेह तथा मानमस्तीति तात्पर्यम् ।

आचार्य आह–**नवै अत्रेति।** अनञ इति नञ्भिन्नमव्ययमेव गृह्यत इति तदाशयः।

तस्मादिति । यतः 'परमकृत्वे'त्यत्र नेष्यते 'प्रकृत्ये'त्यत्र चेष्यते तस्मादित्यर्थः। **चोदक इति ।** 'आशयानभिज्ञ' इति शेषः । परिभाषाऽनाश्रयणे मानाऽभावात्। अनिष्टे 'परमकृत्वे'त्यत्रैव प्राप्नोति, इष्टे च 'प्रकृत्ये'त्यत्र न प्राप्नोतीति भावः। **आचार्य आहेति ।** भाष्ये-एवकारस्य 'परमकृत्वे'त्यादि व्यावर्त्यमिति भावः। 'पार्श्वत' इत्यत्राद्यादित्वात्सप्तम्यन्तात्तसिः । 'स्वाङ्गे तस्प्रत्यये' इति क्त्वा ।

'प्रत्ययग्रहण' इति, इयं न भवति—'कृद्ग्रहण' इति, यदयमनञिति प्रतिषेधं शास्ति ॥ कथं कृत्वा ज्ञापकम् ?॥ अयं हि नञ् गतिर्न च कारकम्, तत्र कः प्रसङ्गो यन्नञ्पूर्वस्य स्यात् ?। पश्यति त्वाचार्य इयमिह परिभाषा भवति—'प्रत्ययग्रहण' इति, इयं न भवति 'कृद्ग्रहण' इति—ततोऽन'ञिति प्रतिषेधं शास्ति ॥

॥*॥ किं नञः प्रतिषेधेन न गतिर्न च कारकम् ।
यावता नञि पूर्वे तु ल्यब्भावो न भविष्यति ॥१॥

प्र.] भाषायाः 'स्त्रीप्रत्यये चानुपसर्जने ने'ति प्रतिषेधात्तदुपस्थानाऽभावः । एवं सावकाशयोः परिभाषयोर्भिन्नफलयोर्विरोधात्पर्यायोऽप्रतिपत्तिर्वा प्राप्नोति । प्रत्ययग्रहणपरिभाषायामाश्रीयमाणायां 'प्रकृत्ये'ति गतेः क्त्वान्तेऽनन्तर्भावात्पौर्वापर्योपपत्तौ ल्यप्सिद्ध्यति न तु कृद्ग्रहणपरिभाषाश्रयणे इति फलभेदः । 'कार्यकालं संज्ञापरिभाष'मित्यत्र दर्शने समानदेशत्वात्परिभाषयोः परत्वेनाऽपि व्यवस्था नास्ति । साङ्कूटिने त्वेवमव्यवस्थाप्रसङ्गाद्यथोद्देशपक्ष आश्रयितव्यः । तत्र हि परत्वेन व्यवस्थासिद्धिः । प्रत्ययग्रहणपरिभाषा 'अङ्ग'संज्ञासूत्रे योगविभागेन व्यवस्थापिता । कृद्ग्रहणपरिभाषा तु 'गतिरनन्तर' इत्यत्र अनन्तरग्रहणेन ज्ञापनात्परा भवति ।

यदयमिति । कथं पुनरेतज्ज्ञापकं यावता सत्यामपि कृद्ग्रहणपरिभाषायामपिशब्दात्केवलस्यापि क्त्वान्तस्य ग्रहणादकृत्वेत्यादौ नञोऽगतित्वादकारकत्वाच्च क्त्वान्तेऽनन्तर्भावादसत्यनञ्ग्रहणे ल्यप्प्रसङ्गः । 'अप्रकृत्ये'त्यादौ च प्रतिषेधार्थ-

---

उ.] अत्र हि प्रत्ययग्रहणेति । यद्यपि तदादिनियमे निषिद्धे कृद्ग्रहणपरिभाषां विनाऽपि समुदायस्य तदन्तत्वात्सिद्ध्यति, तथापि तदधिकग्रहणाऽभावाय तद्विषयसत्तामात्रेणावकाशोक्तिरिति बोध्यम् । पर्यायादिबीजं विप्रतिषेधसूत्रे उक्तम् ।

कार्यकालमिति । कार्यकालपक्षेऽपि शास्त्रपाठकृतपरत्वानपगमाच्चिन्त्यमिदम् । **साङ्कूटिने त्विति** । अभिविधौ भाव इनुणः स्त्रीप्रत्ययत्वाऽभावादणिनुण इत्यत्र प्रत्ययग्रहणपरिभाषोपस्थाने 'कूटि'न्नित्यस्य वृद्धिस्वरौ स्यातामिति परत्वात्कृद्ग्रहणपरिभाषैवाऽत्राश्रयणीयेति भावः । नच कृद्ग्रहणपरिभाषायामपिशब्देन केवलस्याऽपि ग्रहणेन केवलादपि कदाचिदण्स्यादिति वाच्यं, गतिकारकसमभिव्याहारे तत्पूर्वस्य ग्रहणं, तदसमभिव्याहारे तु प्रत्ययग्रहणपरिभाषासिद्धस्याऽपीत्येवाऽपेरर्थात् । अतएव 'पुंयोगा'दिति सूत्रे साङ्कूटिनस्य 'गतिकारकोपपदाना'मिति 'कृद्ग्रहणे' इति च परिभाषाभ्यां सिद्धिरुक्ता भाष्ये । 'प्रत्ययग्रहण'मितीयमेव भवति, परत्वान्न्याय्याऽपि कृद्ग्रहणपरिभाषा न भवतीति कुत इति । एवञ्चेष्टाऽसिद्ध्यनिष्टापत्ती तदवस्थे इति भाष्यार्थः । **केवलस्यापीति** । गत्याद्यसमवधाने इति भावः । तदाह—**अकृत्वेत्यादाविति** । गत्यादिसमवधानेऽपि तत्फलमाह—**अप्रकृत्येत्यादाविति** । **केवल-**

प्रतिषेधात्तु जानीमस्तत्पूर्वं नेह गृह्यते ।
प्रत्ययग्रहणे यावत्तावद्भवितुमर्हति ॥२॥ ॥*॥

सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥७।१।३९॥

[॥*॥ सुपां च सुपो भवन्ति ॥*॥] **सुपां च सुपो भवन्तीति वक्तव्यम् ॥**

प्र.]मनञ्पूर्वस्य ग्रहणं स्यात् ? । उच्यते—अपिग्रहणेन प्रत्ययग्रहणपरिभाषा समुच्चीयते न त्वन्यपूर्वम् । तत्र समास इति वचनात्केवलस्य क्त्वादेर्ग्रहणाऽभावादपिशब्दसमुच्चेतव्यस्याऽभावाद्गतिकारकपूर्वस्यैव समासस्य ग्रहणं भविष्यतीति किमनञ्पूर्व इत्यनेन ? । तत्क्रियमाणं कृद्ग्रहणपरिभाषाया अनुपस्थानं ज्ञापयति । तदुपस्थाने तु 'तूष्णींभूय' 'नानाभूय' 'द्विधाभूये'त्यादौ ल्यब्न स्यात् । तदेवं कृद्ग्रहणपरिभाषानुपस्थाने नञ्सदृशादव्ययात्पदात्प्रत्यासत्तिन्यायात्समासावयवात्परस्य धात्वादेः क्त्वान्तस्य समासे क्त्वो ल्यब्विधीयमानः 'स्नात्वाकालकः' 'परमकृत्वे'त्यादौ न भवति । परमं कृत्वा 'परमकृत्वे'ति 'सन्मह'दिति समासः। परमत्वस्य क्रियाविशेषणत्वात्सामानाधिकरण्यात् । **तत्पूर्वमिति ।** गतिकारकपूर्वमित्यर्थः । **प्रत्ययग्रहण इति ।** प्रत्ययग्रहणपरिभाषया यावद्ग्राह्यं तावद्गृह्यते ॥ **[समासेऽनञ्पूर्वे] ॥**

सुपां सुलुक्पूर्वसवर्ण । सुशब्दे आदेश उच्यमानेऽन्ये सुपो न प्राप्नुवन्तीत्याह—**सुपां चेति ।** एतच्च सर्वं 'व्यत्ययो बहुल'मिति व्यत्ययेन सिध्यति ।

उ.] **स्येति ।** अपि शब्दसमुच्चेतव्यत्वं तत्रैवेति भावः । अयं भावः—'क्त्वान्तस्य समासस्य ल्य'बित्यर्थोऽस्तु सूत्रस्य । तत्र पूर्वपदापेक्षायां कृद्ग्रहणपरिभाषया गतिकारकरूपमेव तद्ग्रहीष्यत इति 'परमकृत्वे'त्यत्र न । 'प्रकृत्ये'त्र 'अप्रकृत्ये'त्यत्र च सिद्धम्, 'अकृत्वे'त्यादौ च न भविष्यतीत्यनञ्पूर्वग्रहणं व्यर्थमिति । **अनुपस्थानं ज्ञापयतीति ।** तदनुपस्थितौ क्त्वान्तस्य समासस्येत्यर्थोऽशक्यः। प्रत्ययग्रहणपरिभाषया तस्य क्त्वान्तत्वाऽभावात्। तथा च समासे विद्यमानस्य क्त्वान्तस्येत्यर्थो वाच्यः, एवञ्चोक्तदोषवारणायाऽनञ्पूर्वे इत्यावश्यकमिति भावः । गतिकारकपूर्वक्त्वान्तसमासस्येत्यर्थे लक्ष्याऽसिद्ध दर्शयति—**तूष्णीमिति ।** 'तूष्णीमि भुवः' 'नाधार्थप्रत्यये च्व्यर्थे' इति क्त्वा । उपपदसमासः । एतानि च न गतिसंज्ञकानि **नाऽपि** कारकाणीति भावः । एतेनाऽनञ्पूर्वग्रहणेन गत्यादिसमवधानेऽप्यपिना केवलं समुच्चीयत इत्यपास्तम् । 'अप्रकृत्ये'त्राप्यनापत्तेश्च । गत्यादिपूर्वस्य क्त्वान्तस्य समासस्यानञ्पूर्वस्येत्यर्थापत्तेरिति सुधियो विभावयन्तु । सिद्धान्तार्थे 'परमकृत्वे' त्यादावप्राप्त्युपायमाह—**नञ्सदृशादव्ययादिति ।** स्नात्वाकालकादिव्यावृत्त्यर्थमिदम् । 'अव्यया'दित्येव सिद्धे 'पदा'दिति स्वरूपकथनं । 'सुन्दरः स्नात्वाकालक' इत्यादिव्यावृत्तये-'समासावयवा'दिति। **गतिकारकपूर्वमिति**। तत्पूर्वमेवेत्यर्थः । भाष्ये-**प्रत्ययग्रहणे यावदिति।** समासे विद्यमानस्य क्त्वान्तस्येत्यर्थादिति भावः ॥ **[समासेऽनञ्]।**

सुपां सुलुक्। सुशब्द इति । लुक्साहचर्य्यादयं सुः सर्वादेशः, छान्द-

युक्ता माताऽसीद्धुरि दक्षिणायाः । 'दक्षिणाया'मिति प्राप्ते [॥*॥ तिङां च तिङो भवन्ति ॥*॥] तिङाञ्च तिङो भवन्तीति वक्तव्यम् ॥ चषालं ये अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते ॥

लुकि किमुदाहरणम् ? ॥ आर्द्रे चर्मन् । लोहिते चर्मन् ॥ नैतदस्ति । पूर्वसवर्णेनाऽप्येतत्सिद्धम् ॥ इदं तर्हि—यत्स्थ्वीयस आवसन्नुत ससन्नःपयः सक्षसाकम् ॥ ननु चैतदपि पूर्वसवर्णेनैव सिद्धम् ॥ न सिध्यति । यद्यत्र पूर्वसवर्णः स्यात्त्यदाद्यत्वं प्रसज्येत ॥ इदं चापि उदाहरणम्—आर्द्रे चर्मन् । लोहिते चर्मन् ॥ ननु चोक्तं 'पूर्वसवर्णेनाप्येतत्सिद्ध'मिति ॥ न सिध्यति । यद्यत्र पूर्वसवर्णः स्यादान्तर्यतो दकारः प्रसज्येत ॥ अस्तु—संयोगान्तलोपेन सिद्धम् ॥

॥ * ॥ इयाडियाजीकाराणामुपसङ्ख्यानम् ॥ * ॥ इयाडियाजीकाराणामुपसङ्ख्यानं कर्तव्यम् । इया—दार्विया परिज्मन् । इया ॥ डियाच्—सुक्षेत्रिया । सुगात्रिया । डियाच् ॥ ईकार—दृतिं न शुष्कं सरसी शयानम् ।

प्र.] पूर्वसवर्णेनापीति । 'चर्मन्–इ' इति स्थिते इकारस्य पूर्वसवर्णो नकारः । तस्मात्पूर्वस्य नकारस्य 'स्वादि'ष्विति पदसंज्ञायां सत्यां लोपः । एवं च 'न ङिसंबुद्ध्यो'रित्यत्र ङिग्रहणमपि न कर्तव्यं भवति, प्रातिपदिकान्तत्वाऽभावाद्विभक्तिनकारस्य नलोपाऽप्रसङ्गात् । पूर्वस्य च नकारस्य लोपस्येष्टत्वात् । यदिति । यच्छब्दात्परस्य सुपो लुक् । प्रत्ययलक्षणनिषेधात्त्यदाद्यत्वाऽभावः । येष्विति प्राप्ते । त्यदाद्यत्वमिति । सुशब्दस्य पूर्वसवर्णो भवन्नलोन्त्यस्येत्युकारस्य दकारः प्राप्नोति । ततस्त्यदाद्यत्वे 'बहुवचने झल्ये'दित्येत्त्वे 'स्कोः संयोगाद्यो'रिति सकारलोपे च 'ये'दिति स्यात् । अथाप्येकवचनस्य स्थाने पूर्वसवर्णो दकारः क्रियते तथापि स्थानिवद्भावात्स्मिभावः प्राप्नोति । आन्तर्यत इति । निरनुनासिकस्येकारस्य सदृशो दकारः । संयोगान्त(स्य)लोपेनेति । 'न ङिसंबुद्ध्यो'रिति नलोपप्रतिषेधात्संयोगान्तलोपः । अन्यथा नलोपे कर्तव्ये संयोगान्तलोपोऽसिद्धः स्यात् । एवं च नलोपप्रतिषेधे ङिग्रहणं कर्तव्यमेवेति प्रक्रियालाघवाय 'चर्म'न्नित्यत्र लुगेव विधेय इत्याहुः ।

दार्वियेति । दारुशब्दादियादेशः । सुक्षेत्रियेति । सुक्षेत्रेणेति प्राप्ते । सरसी

उ.] सत्वाद्वा । शे शकारोच्चारणन्तु 'शे' इत्यत्र विशेषणार्थम् । पूर्वसवर्णो नकार इति । घोषवत्त्वेन साम्यादित्यर्थः । उकारस्य दकार इति । निरनुनासिकत्वादित्यर्थः । येदिति स्यादिति । सर्वस्य पूर्वसवर्णेऽपि इयमेवापत्तिः । सदृशो दकार इति । घोषवत्त्वादल्पप्राणत्वाच्चेत्यर्थः । इत्याहुरिति । भाष्यकृता तु रूपसिद्धिमाश्रित्य निराकृतम् । दारुशब्दादिति । ततः परस्य सुप इत्यर्थः । डियाचो ङित्त्वं टिलोपाय ।

॥ * ॥ आङ्याजयारां चोपसङ्ख्यानम् ॥ * ॥ आङ्याजयारां चोपसङ्ख्यानं कर्तव्यम् । आङ्—प्रबाहवा । [आङ्] ॥ अयाच्—स्वप्नया सचसे जनम् । अयाच् ॥ अयार्—सनः सिन्धुमिव नावया ॥ [सुपांसुलुक्] ॥

अमो मश् ॥ ७।१।४० ॥

किमर्थः शकारः ? ॥ [॥*॥ शकारः सर्वादेशार्थः ॥*॥] 'शित्सर्वस्ये'ति सर्वादेशो यथा स्यात् । अक्रियमाणे हि शकारेऽलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्य प्रसज्येत ॥ अत उत्तरं पठति—॥*॥ अमो मश् न मकारस्य ॥*॥ 'मकारस्य मकारवचने प्रयोजनं नास्ती'ति कृत्वा तत्राऽन्तरेण शकारं सर्वादेशो भविष्यति ॥*॥ वचनादन्यबाधनम् ॥ * ॥ अस्त्यन्यन्मकारस्य मकारवचने प्रयोजनम् ॥ [किम् ? ॥ 'अन्यबाधनं' ।] येऽन्ये मकारादेशाः प्राप्नुवन्ति तद्बाधनार्थम् । तद्यथा—'मो राजि समः क्वा'विति मकारस्य मकारवचनसामर्थ्यादनुस्वारादयो बाध्यन्ते ॥ एवं तर्हि [॥*॥ द्विमकारको निर्देशः ॥*॥] द्विमकारको निर्देशः करिष्यते ॥*॥ द्विमकार इडपृक्ते ॥*॥ यदि द्विमकारकः—अपृक्ताश्रय ईण्न प्राप्नोति,—वधीं वृत्रं मरुत इन्द्रियेण ।

प्र.]इति । सरःशब्दात्परस्य ङिशब्दस्येकारः । प्रबाहवेति । प्रबाहुशब्दात्परस्य टाप्रत्ययस्याऽऽङादेशः । 'घेर्ङिती'ति गुणः । ननु 'ङित्त्वे विद्याद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तच्च विद्यात्तदादा'वित्युक्तं ततश्च गुणो न प्राप्नोति । ङित्करणसामर्थ्याद्भविष्यतीत्यदोषः। अथ वा 'ङिती'ति बहुव्रीहिराश्रीयते । तत्र परिहारान्तरमाश्रयणीयम्—'वर्णश्चायन्तेन ङित्त्वे न दोषो निर्देशोयं पूर्वसूत्रेण वा स्या'दिति ।

स्वप्नयेति । अयाचोऽकारोच्चारणं 'सुपि चे'ति दीर्घनिवृत्त्यर्थम् । नावयेति । 'उपोत्तमं रिती'ति मध्योदात्तं पदं भवति ॥ [आज्जसेरसुक्] ॥

अमो मश् । अमो मश न मकारस्येति । मकारस्य मकारः प्रयोजनाऽभावान्न भविष्यतीति शकारो न वक्तव्य इत्यर्थः । वचनादिति । 'वधीं वृत्र'मित्यादौ मकारस्यानुस्वारनिवृत्त्यर्थो मकारः स्यादित्यर्थः। द्विमकारक इति । 'अमोम्मे'ति करिष्यते, भिन्नजातीयवर्णद्वयोच्चारणे प्रयत्नस्य गौरवं भवति, समानजातीयवर्णद्वये तु लाघवात् । तत्रैकस्य मकारस्य संयोगान्तलोपः करिष्यते । ईण्न प्राप्नो-

---

उ.] चित्त्वं स्वरार्थम् । सरःशब्दादिति । एवञ्चेष्पक्षः सरसीत्यर्थकः सरसीशब्द आद्युदात्तः, संप्रति वेदेऽन्तोदात्तं पठ्यते तत्तु सरसीशब्दान्ङेर्लुकि बोध्यम् । इदन्त्वेदूतौ चेति सूत्रे भाष्ये स्पष्टं, स्वरव्यत्ययो वा बोध्यः । [सुपां सुलुक्] ॥

अमो मश् । ननु मकारकरणेन शप्रत्याख्याने न फलमत आह—भिन्नजातीयेति । पृथक्स्थानकरणव्यापाराश्रयणादिति भावः । मकारोत्तराऽकारस्तु उभयो-

॥*॥ [3]यकारादौ न दुष्यति ॥*॥ किं यकारो न श्रूयते? ॥ लुप्तनिर्दिष्टो यकारः ॥

॥*॥ अमो मश्च मकारस्य वचनादन्यबाधनम् ।

द्विमकार ईडपृक्ते यकारादौ न दुष्यति ॥१॥ ॥*॥

आज्जसेरसुक् ॥ ७।१।५० ॥

इह—ये पूर्वासो य उ परासः । 'आज्जसेरसु'गित्यसुकि कृते ज[2]सिग्रहणेन ग्रहणाच्छीभावः प्राप्नोति ॥ एवं तर्हि जसि पूर्वान्तः करिष्यते ॥ यदि पूर्वान्तः क्रियते का रूपसिद्धिः—ब्राह्मणासः पितरः सोम्यासः? ॥ सवर्णदीर्घत्वेन सिद्धम् ॥ न सिध्यति—'अतो गुण' इति पररूपत्वं प्राप्नोति ॥ अकारोच्चारणसामर्थ्यान्न भविष्यति ॥ यदि तर्हि प्राप्नुवन्विधिरुच्चारणसामर्थ्याद्बाध्यते सवर्णदीर्घत्वमपि न प्राप्नोति ॥ नैष[3] दोषः—"यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते—यस्य तु विधेर्निमित्तमेव नासौ बाध्यते ।" पररूपं च प्रत्यकारोच्चारणमनर्थकं, सवर्णदीर्घत्वस्य पुनर्निमित्तमेव ।

अथ वाऽसुट्करिष्यते । एवमपि-ये पूर्वासो य उ परास इत्यसुटि कृते जसो **ग्रहणेन ग्रहणाच्छीभावः प्राप्नोति ॥ नैष[2] दोषः—'निर्दिश्यमानस्यादेशा भवन्ती'त्येवमस्य न भविष्यति ॥ यस्तर्हि निर्दिश्यते तस्य कस्मान्न भवति ?॥**

प्र.] **तीति ।** ईटि कर्तव्ये संयोगान्तलोपस्याऽसिद्धत्वादपृक्तत्वाऽभावात् । **यकारादाविति ।** 'अमोम्मि'ति सूत्रं कर्तव्यं, तत्र यकारस्य लुप्तनिर्दिष्टत्वादनेकाल्त्वात्सर्वादेशोऽयं मो भविष्यतीति प्रत्याख्यातं शित्त्वम् । **[अमो मश्] ॥**

आज्जसेरसुक् । जसिग्रहणेनेति । 'तद्भक्तस्तद्ग्रहणेन गृह्यते' इति सागमकस्य शीभावप्रसङ्गः । **पूर्वान्त इति ।** 'अस्य जस्यसु'गिति सूत्रन्यासेन पूर्वान्तेऽसुक्यकारान्तात्परो जस् न भवतीति शीभावाऽप्रसङ्गः । **अथ वाऽसुडिति ।** असुकि-अकारोच्चारणं 'दध्यस्यती'त्याद्यर्थमिति पररूपं स्यादिति पक्षान्तरोपन्यासः ।

उ.] रुच्चारणार्थ आवश्यकः । अनुनासिकत्वेनेत्संज्ञया च तल्लोपः । **संयोगान्तलोप इति ।** क्वचिदझलोऽपि लोपाङ्गीकारादिति भावः । 'वधी'मित्यत्र 'हनो वध लुङि' । मिपोऽम् । तस्य मश् । अकार उच्चारणार्थ इति–'अस्तिसिच' इतीट् । सिच इट् । 'ईट ईटी'ति सिज्लोपः । सवर्णदीर्घः । **लुप्तनिर्दिष्टेति ।** 'लोपो व्यो'रिति लोपः । तस्य च नाऽसिद्धत्वमित्यपृक्तत्वमस्त्येव । इदं प्रत्याख्यानमेकदेशिन इति केचित् । **[अमो मश्] ॥**

आज्जसेरसुक् । सागमकस्येति । 'ग्रहणा'दिति शेषः । शीभावस्तु निर्दिश्यमानपरिभाषया प्रत्यया(ऽवयवस्या)ऽस एवेतिबोध्यम् । नन्वत्र न्यासे कथं पूर्वान्तः स्यादत आह–**अस्यजसीति ।** नन्वसुटि पररूपं स्यादत आह–**असुटीति । [आज्जसेरसुक्] ॥**

असुटा व्यवहितत्वात् ॥ सिध्यति सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवाऽस्तु । ननु चोक्तं "ये पूर्वासो य उ परासः, असुकि कृते जसिग्रहणेन ग्रहणाच्छीभावः प्राप्नोती"ति ॥ नैष दोषः,—इदमिह संप्रधार्यं—शीभावः क्रियतामसुगिति; किमत्र कर्तव्यम् ॥ परत्वादसुक् ॥ अथेदानीमसुकि कृते पुनः प्रसङ्गविज्ञानाच्छीभावः कस्मान्न भवति ? ॥ 'सकृद्गतौ विप्रविषेधे यद्बाधितं तद्बाधितमेवे'ति ॥ [आज्जसेरसुक्] ॥

अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥ ७।१।५१ ॥

॥ * ॥ अश्ववृषयोर्मैथुनेच्छायाम् ॥ * ॥ अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम् । अश्वस्यति वडवा । वृषस्यति गौः॥ मैथुनेच्छायामिति किमर्थम्?॥ अश्वीयति वृषीयति ॥*॥क्षीरलवणयोर्लालसायाम् ॥*॥ क्षीरलवणयोर्लालसायामिति वक्तव्यम् । क्षीरस्यति माणवकः । लवणस्यत्युष्ट्र इति ॥ अपर आह—॥*॥ [सर्वप्रातिपदिकेभ्यो लालसायाम् ॥*॥] सर्वप्रातिपदिकेभ्यो लालसायामिति वक्तव्यं । दध्यस्यति मध्वस्यतीत्येवमर्थम् ॥ अपर आह [॥*॥ सर्वप्रातिपदिकेभ्यो लालसायां सुक् ॥ * ॥ सर्वप्रातिपदिकेभ्यो लालसायां] सुग्वक्तव्यो दधिस्यति मधुस्यतीत्येवमर्थम् । [अश्वक्षीरवृष] ॥

आमि सर्वनाम्नः सुट् ॥ ७।१।५२ ॥

त्रेस्त्रयः ॥५३॥ ह्रस्वनद्यापो नुट् ॥ ७।१।५४॥

इमे बहव आम्शब्दाः—'कास्प्रत्ययादाममन्त्रे लिटि' । 'ङसोसाम्' । 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' । 'ङेराम्नद्याम्नीभ्य' इति, कस्येदं ग्रहणम्?॥

प्र.] असुटि 'प्रथमयोः पूर्वसवर्ण' इति दीर्घः सिध्यति । परत्वादिति । असुकोऽवकाशः —'ब्राह्मणास' इति । शीभावस्य भाषाविषयोऽवकाशः । [आज्जसेरसुक्] ।

अश्वक्षीर । अश्वस्यतीति । मैथुनेच्छाप्रतिपादनपरत्वात्प्रयोगस्याऽश्ववृषोपादानमतन्त्रमिति मनुष्यादावपि कवयः प्रयुञ्जते । लालसा—अतिशयेनाऽभ्यवजिहीर्षा । यस्तु लवणमैश्वर्यार्थमिच्छति तत्र 'लवणीयती'त्येव भवति । [अश्वक्षीरवृष] ।

आमि सर्वनाम्नः । कस्येदमिति । किमिदं सर्वेषामामां ग्रहणमथ कस्य

उ.] अश्वक्षीर । कवय इति । 'इति रामो वृषस्यन्ती'मित्यादौ । भाष्यस्वरसस्त्वेषामसाधुत्वे । अतएव 'वडवे'ति 'गौ'रिति च कर्तृपदमुपात्त । वार्तिके पञ्चमीषष्ठ्यर्थे, 'दध्यस्यति मध्वस्यतीत्येवमर्थ'मिति भाष्यस्वरसात् । द्वावेवागमिनौ । यदि वार्तिकस्थसर्वशब्दस्वारस्यादन्यत्राऽपि इष्यते—तदा 'एवमर्थ'मित्येवंशब्दः स्वार्थं न परिपुष्येदिति सुब्धातुवृत्तौ माधवः । एवंशब्दः प्रकार इत्यन्ये । [अश्वक्षीर] ॥

आमि सर्व । ननु यस्येह ग्रहणं संभवति तस्यैवोत्तरत्राऽनुवृत्तिः स्यादत

षष्ठीबहुवचनस्य ग्रहणम् ॥

अथास्य कस्मान्न भवति—'कास्प्रत्ययादाममन्त्रे लिटी'ति ? ॥ 'अननुबन्धकग्रहणे हि न सानुबन्धकस्ये'ति ॥ स तर्ह्यस्यैवमर्थोऽनुबन्धः कर्तव्य-'इहास्य ग्रहणं मा भू'दिति ? ॥ ननु चावश्यं मकारस्येत्संज्ञापरित्राणार्थोऽनुबन्धः कर्तव्यः ॥ नार्थ इत्संज्ञापरित्राणार्थेन, इत्कार्याऽभावादत्रेत्संज्ञा न भविष्यति ॥ इदमस्तीत्कार्यं–'मिदचोऽन्त्यात्पर' इत्यचामन्त्यात्परो यथा स्यात् ॥ प्रत्ययान्तादयं विधीयते, तत्र नास्ति विशेषो'मिदचोन्त्यात्पर'इति वा परत्वे, 'प्रत्ययः पर' इति वा [परत्वे] ॥ यस्तर्हि न प्रत्ययान्तात्–'इजादेश्च गुरुमतोऽनृच्छ' इति ? ॥ अत्रापि आस्कासोराम्वचनं ज्ञापकं—'नायमचामन्त्यात्परो भवती'ति ॥ कथं कृत्वा ज्ञापकम् ? ॥ न ह्यस्ति विशेषः—आम्यचामन्त्यात्परे सत्यसति वा ॥ अयमस्ति विशेषोऽसत्यामि द्विर्वचनेन भवि-

प्र.]चिदेवेति प्रश्नः । ननु च 'सर्वनाम्न' इत्युपादानाड्डादामो लिट्यामश्च ग्रहणशङ्कैव न युक्ता । उच्यते । इह तयोरसंभवेऽपि 'ह्रस्वनद्यापो नु'डित्यत्र ह्रस्वात्परयोः संभवाद्विचारः क्रियते । तत्रेह सामान्यग्रहणे सति यथासंभवं प्रकरणे कार्यप्रतिपत्तिः । अथ वा पूर्वोपात्तसदृशशब्दान्तरानुमानपक्षे उत्तरसूत्रे तयोः संभवादिह विचारः । ननूत्तरसूत्रेऽपि यस्यैवाम्नदीभ्यां परस्य संभवः स एव ह्रस्वादपि परस्तत्साहचर्याद्ग्रहीष्यते । नैतदस्ति । व्याप्तिन्यायाश्रयेण सर्वस्य ग्रहणप्रसङ्गात् । **प्रत्ययान्तादिति** । ते चाऽजन्ताः । ननु हलन्तेभ्य आचारक्विबन्तेभ्य आमस्त्येव । नैतदस्ति । एकीयमतमेतत् । तत्रापि हलन्तेभ्योऽनभिधानादाचारक्विबभावः । **यस्तर्हीति** । ईहेरूहेश्च मध्ये आमि कृते यणादेशप्रसङ्गः । **आस्कासोरिति** ।

उ.]आह—**तत्रेहेति** । **उत्तरसूत्रे इति** । अतएव भाष्ये सूत्रत्रयग्रहणं । **यस्यैवेति** । ङेरामः, षष्ठीबहुवचनस्य चेत्यर्थः । एवञ्चेतरद्वयोपादानं व्यर्थमिति भावः । 'त्रे'-रिति सूत्रे तु षष्ठीबहुवचनातिरिक्तस्याऽसंभव एवेति तात्पर्यम् । भाष्ये—**अनुबन्ध इति** । अनुनासिकत्वेनेत्संज्ञक इत्यर्थः । उच्चारणार्थानामप्यपगमायेत्त्वस्याऽऽवश्यकत्वादिति भावः । **ते चाजन्ता इति** । नच जागर्त्तेरामि तस्य मित्त्वादन्त्यादचः परत्वे स्वावयवेन पौर्वापर्याऽभावाद्गुणो न स्यादिति वाच्यम्, अङ्गाधिकारेऽयामन्तेतिण्यन्तस्याम्ययविधानेन तस्यान्तावयव इत्यस्याम्यसंबन्ध इत्याशयात् । **एकीयमतमेतदिति** । 'सर्वप्रातिपदिकेभ्यः क्वि'बित्येतत् । **तत्रापीति** । एकीयमताश्रयणेऽपीत्यर्थः । **क्विबभाव इति** । अत्र चेदमेव भाष्यं मानम् । नचावगल्भादिभ्यो हलन्तेभ्यः क्विबस्त्येव तत्रत्याकारस्यानुनासिकत्वेनेत्संज्ञकतया लोपादिति वाच्यम्, अकारान्तरप्रश्लेषेण तस्यैवानुबन्धत्वस्वीकारेणाऽदोषादिति भावः। नचाऽऽसादौ सवर्ण-

तव्यं, सति न भवितव्यम् ॥ सत्यपि भवितव्यम् ॥ कथम् ? ॥ आमस्तन्मध्यपतितत्वाद्धातुग्रहणेन ग्रहणात् । तदेतत्कासासोराम्वचनं ज्ञापकमेव— 'नायमचामन्त्यात्परो भवती'ति ॥

अथापि कथं चिदित्कार्यं स्यादेवमपि न दोषः,–क्रियते न्यास एव–'आमेऽमन्त्रे' इति । यद्येवमामाऽमन्त्र इति प्राप्नोति ॥ "शकन्धुन्यायेन निर्देशः" ॥

अथ वाऽस्त्वस्य ग्रहणं को दोषः ? ॥ इह कारयांचकार हारयांचकार चिकीर्षांचकार जिहीर्षांचकार, 'ह्रस्वनद्यापो नु'डिति नुट्प्रसज्येत ॥

लोपाऽयादेशयोः कृतयोर्न भविष्यति ॥ इदमिह संप्रधार्य–'लोपायादेशौ क्रियेतां नु'डिति; किमत्र कर्तव्यम् ? ॥ परत्वान्नुट् ॥ नित्यौ लोपाऽयादेशौ, कृतेऽपि नुटि प्राप्नुतोऽकृतेऽपि । तत्र नित्यत्वाल्लोपाऽयादेशयोः कृतयोर्विहतनिमित्तत्वान्नुग्न भविष्यति ॥

अथास्य कस्मान्न भवति—'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे'इति ? ॥ 'अननुबन्धकग्रहणे हि न सानुबन्धकस्ये'ति ॥ स तर्ह्येवमर्थोऽनुबन्धः कर्तव्यः ? ॥ ननु चावश्यमुगित्कार्यार्थोऽनुबन्धः कर्तव्यः ॥ नार्थ उगित्का-

प्र.]अन्त्यादचः परे आमि सवर्णदीर्घत्वे सति विशेषाऽभावः। **सति न भवितव्यमिति**। रूपान्तराद्धातुत्वाऽभावात् । **आम इति** । अकृत एकादेशे इदमुच्यते, कृते त्वेकादेशे रूपान्तराऽभावः। **अथापीति** । प्रतिधातु भेदादामो यत्रेत्कार्यं न संभवति तत्र मा भूदित्संज्ञा—आसिकासिचकासिषु प्रत्ययान्तेषु च धातुषु ईह्यादौ त्वित्कार्यसंभवात्स्यादेवेत्संज्ञा । अथ वा आसादिषु विधानसामर्थ्यात्सवर्णदीर्घत्वं न स्यादित्संज्ञा तु स्यादेव । व्यञ्जनान्तेषु चाचारक्विबन्तेषु इत्कार्यसंभवादित्संज्ञा प्राप्नोति । न हि व्यञ्जनान्तेभ्य आचारे क्विब्न भवतीत्यत्र किं चित्प्रमाणमस्ति । **कारया-**

उ.]दीर्घे रूपान्तराऽभावाद्धित्वसिद्धेः किं तन्मध्यपतितन्यायाश्रयेणेत्यत आह–**अकृत इति**। वार्णादाङ्गमिति न्यायेन पूर्वं द्वित्वं। द्वित्वं हि प्रत्ययनिमित्तत्वादाङ्गमिति भावः।

भाष्ये—**नायमचामन्त्यात्परो भवतीति** । एवञ्च फलाऽभावान्मस्येत्संज्ञाऽप्रवृत्त्या तत्परित्राणार्थानुबन्धस्यानावश्यकत्वेन अस्यामोऽत्र ग्रहणं स्यादेवेति पूर्वपक्षिण इदं वाक्यम् । स एवाह—**अथापि कथञ्चिदित्कार्यं स्यादिति**। अस्य 'एवमपि सूत्रभेद' इति शेषः । सिद्धान्त्याह—**एवमपि न दोषः क्रियते न्यास एवेति**। किमेत्तिङुपक्रमेण प्रवृत्ते–'अथाऽपि कथञ्चिदित्कार्यं स्या'दिति भाष्ये 'एवमपि गौरव'मिति शेषः। अपूर्वकरणे हि स दोष इत्युत्तराशयः। 'प्रत्ययान्तेषु च धातुषु' इत्यन्तं पूर्वान्वयि।**अथवेति** । उपसञ्जातविरोधन्यायादिति भावः। विधिबाधापेक्षया परार्थेत्संज्ञाबाध एवोचित इत्याशयेन 'कथञ्चि'दिति भाष्ये उक्तम् । **नहि व्यञ्जनान्तेभ्य इति** ।

यर्थेनाऽनुबन्धेन। लिङ्गविभक्तिप्रकरणे सर्वमुगित्कार्यं, न चामो लिङ्गविभक्ती स्तः । अव्ययमेषः ॥ मकारस्य तर्हीत्संज्ञापरित्राणार्थोऽनुबन्धः कर्तव्यः ॥ इत्कार्याऽभावादत्रेत्संज्ञा न भविष्यति ॥ इदमस्तीत्कार्यं—'मिदचोन्त्यात्पर' इत्यचामन्त्यात्परो यथा स्यात् ॥ नैतदस्ति । घान्तादयं विधीयते तत्र नास्ति विशेषः—'मिदचोन्त्यात्पर' इति वा परत्वे 'प्रत्ययः पर' इति वा परत्वे ॥

अथापि कथं चिदित्कार्यं स्यादेवमपि न दोषः—क्रियते न्यास एव ॥ अथ वाऽस्त्वस्य ग्रहणं को दोषः ? ॥ इह-पचतितरां जल्पतितरां,–'ह्रस्वनद्यापो नु'डिति, नुड्प्रसज्येत ॥ लोपे कृते न भविष्यति ॥ इदमिह संप्रधार्यं 'लोपः क्रियतां नु'डिति, किमत्र कर्तव्यम् ? ॥ परत्वान्नुट् ॥ एवं तर्हि 'ह्रस्वनद्यापो नु'डित्यत्र यस्येति लोपोऽनुवर्तिष्यते ॥

अथास्य कस्मान्न भवति 'ङेराम्नद्याम्नीभ्य'इति ? ॥ किं च स्यात् ? ॥

प्र.] **ञकारेति** । नुटि कृतेऽयादेशप्रसङ्गः । **अव्ययमेष इति** । अव्ययत्वात्स्त्रीत्वेन योगाऽभावादुगितश्चेति ङीन्नास्ति । तदभावादुगितश्चेति घादिषु ह्रस्वविकल्पोऽपि नास्ति । विभक्तेर्लुकि प्रत्ययलक्षणप्रतिषेधान्नुमागम उगित्कार्यं नास्ति। **इत्संज्ञा-परित्राणार्थ इति** । इत्संज्ञायाः परित्राणमिति 'साधनं कृते'ति पञ्चमीसमासः । समुदायविशेषणं च मकार इति साऽपेक्षत्वात्समासाऽभावो न चोदनीयः । परित्राणं च प्रधानं मकारमपेक्षते । भवति च प्रधानस्य सापेक्षस्याऽपि समासः ।

अथापीति । मित्त्वमेव ज्ञापकं स्यादन्यतोऽप्ययं भवतीति । ततश्च स्यादेवेत्संज्ञा ।

एवं तर्हीति । उभयोरनित्ययोः परत्वान्नुटि प्राप्ते 'ह्रस्वनद्यापो नु'डित्यत्र यस्य लोपस्तद्धित इति चानुवर्तते, तेन तद्धित आमि ह्रस्वस्य लोपो भवति-'पचतितरा'-

---

उ.] 'प्रत्ययान्तादयं विधीयते तत्र नास्ति विशेष' इति भाष्यस्य, अत्रत्याऽपिशब्दस्य, 'कथञ्चि'त्पदस्य च प्रमाणस्य सत्त्वाच्चिन्त्यमिदम् । **अयादेशप्रसङ्ग इति** । 'अया-मन्ते'त्यनेन । इदमेवाभिप्रेत्य—'अयादेशो नित्य' इति भाष्ये उक्तम् । नच मालाशब्दादाचारक्विपि लोपाऽभावेन तत्राबन्तत्वान्नुट्प्राप्तिर्दुर्वारा, भाष्यप्रामाण्येन आबन्तेभ्य आचारक्विपोऽनभिधानान्न दोषः । **विभक्तेर्लुकीति** । 'अव्ययादाप्सुप' इत्यनेन । नन्वित्संज्ञाशब्दस्य मकारसापेक्षत्वात्कथं समासोऽत आह—**समुदायेति** । ततोऽर्थशब्देन चतुर्थीसमासः । न चाऽर्थशब्दार्थतादर्थ्यं प्रति परि-त्राणस्याऽपि विशेषणतेति वाच्यम्, तस्य विभक्त्यर्थसमानार्थत्वेनाऽदोषात् । लुप्त-विभक्तेरेव सोऽर्थः, अर्थशब्दप्रयोगस्तु साधुत्वायैवेत्याशयात् । **उभयोरिति** । लोपे ह्रस्वाऽभावान्नुडप्राप्तिः । नुटि भत्वाऽभावाल्लोपाऽप्राप्तिरिति भावः । ननु नुड्विधौ 'यस्येतिचे'त्यनुवृत्तौ 'वृक्षाणा'मित्यत्राऽपि लोपः स्यादत आह—**तद्धित इति चेति** । वस्तुतो नद्याप्साहचर्याद्ध्रस्वादपि परस्य सुबाम एव ग्रहणमित्यत्र तत्त्वं, भाष्यन्तु

कुमार्यां किशोर्यां खट्वायां मालायां तस्यां यस्यामिति,—'ह्रस्वनद्याप नु'डिति नुट्प्रसज्येत ॥ आड्याट्स्याटोऽत्र बाधका भविष्यन्ति ॥ इदमिह संप्रधार्यम्—आड्याट्स्याटः क्रियन्तां, नुडिति,—किमत्र कर्तव्यम् ? ॥ परत्वादाड्याट्स्याटः ॥ अथेदानीमाड्याट्स्याट्सु कृतेषु पुनः प्रसङ्गान्नुट्कस्मान्न भवति ? ॥ 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवे'ति ॥ [ह्रस्वनद्यापो] ॥

श्रीग्रामण्योश्छन्दसि ॥ ७।१।५६ ॥

"अयं योगः शक्योऽवक्तुम्" ॥ कथं 'श्रीणामुदारो धरुणो रयीणाम्'। 'अपि तत्र सूतग्रामणीनाम्' ? ॥ इह तावच्छ्रीणामुदारो धरुणो रयीणां, विभाषाऽऽमि नदीसंज्ञा, सा छन्दसि व्यवस्थितविभाषा भविष्यति । 'अपि तत्र सूतग्रामणीना'मिति,सूताश्च ग्रामण्यश्च सूतग्रामणि । तत्र 'ह्रस्वनद्यापो नु'डित्येव सिद्धम् ॥ * ॥ इतिश्रीभगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य प्रथमपादे प्रथममाह्निकम् ॥ * ॥ ७।१।१। * ॥

इदितो नुम् धातोः ॥ ७।१।५८ ॥

अथ धातोरिति किमर्थम् ? ॥ अभैत्सीत् । अच्छैत्सीत् ॥*॥ नुम्विधा-

---

प्र.] मिति। अन्यस्य त्वामो नुड्भवति—'वृक्षाणा'मिति । [ह्रस्वनद्यापो नुट्] ॥

श्रीग्राम । विभाषेति । 'वामी'त्यनेन । तत्र दृष्टानुविधिश्छन्दसीति 'श्रीणा'-मित्येव छन्दसि भविष्यति न तु 'श्रिया'मिति।'**सूताश्च ग्रामण्यश्च सूतग्रामणी'ति।** समाहारद्वन्द्वं कृत्वैकशेषः क्रियत इति बोद्धव्यं, न त्वेकशेषे कृते समाहारद्वन्द्वः क्रियते । एवं हि बहुवचनं न स्यात् ।

'भाष्ये त्वत्रोभयं कार्यमित्येतावत्प्रदर्शितम् ।
क्रमस्तु स्वयमभ्यूह्य इष्टस्यार्थस्य सिद्धये' ॥ १ ॥

* इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे **सप्तमस्य प्रथमे** पादे **प्रथममाह्निकम्** ॥ * ॥ ७।१।१। * ॥

इदितो नुम् धातोः । धातोरिति किमर्थमिति । किमधातुनिवृत्त्यर्थं धातुग्रहणमथ धातुसंज्ञाप्रवृत्त्यवस्थायामेव प्राक्प्रत्ययोत्पत्तेर्नुम्विधानार्थमिति प्रश्नः । आचार्यदेशीयस्त्वधातुनिवृत्त्यर्थं धातुग्रहणं मत्वाह—**अभैत्सीदिति** । सिच इदितो

उ.] न्यायव्युत्पादनपरम्। भाष्योक्तप्रयोगातिरिक्तप्रयोगस्तु वेदे नास्त्येवेतिबोध्यम् ॥ ॥ * ॥ इतिश्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते **भाष्यप्रदीपोद्योते सप्तमस्याध्यायस्य प्रथमे** पादे **प्रथममाह्निकम्** ॥ * ॥७।१।१। * ॥

इदितो नुम् धातोः । इति प्रश्न इति । प्रयोजनद्वयसंभवेन सन्देहात्प्रश्न इत्यर्थः । अस्य प्रयोजनस्याऽग्रे दूषयिष्यमाणत्वादाह—**आचार्यदेशीय इति** । उपदेशो यस्य नकारस्य स उपदेशी, तद्वन्नुमिति वार्तिकार्थ इत्याह—**यथेति** ।

वुपदेशिवद्वचनं प्रत्ययविध्यर्थम् ॥*॥ **नुम्विधावुपदेशिवद्भावो वक्तव्यः । 'उपदेशावस्थायां नुम्भवती'ति वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ 'प्रत्ययविध्यर्थम्' । उपदेशावस्थायां नुमि कृते इष्टः प्रत्ययविधिर्यथा स्यात्—कुण्डा हुण्डेति** ॥*॥ इतरथा ह्यनकारे प्रत्ययः ॥*॥ **अक्रियमाणे हि उपदेशिवद्भावेऽनकारे यः प्रत्ययः प्राप्नोति स तावत्स्यात्तस्मिन्नवस्थिते नुम् ॥ तत्र को दोषः ?** ॥*॥ तत्राऽयथेष्टप्रसङ्गः ॥*॥ **तत्राऽयथेष्टं प्रसज्येत । अनिष्टे प्रत्ययेऽवस्थिते नुम् । अनिष्टस्य प्रत्ययस्य श्रवणं प्रसज्येत** ॥*॥ धातुग्रहणसामर्थ्याद्वा तदुपदेशे नुम्विधानम् ॥*॥ **धातुग्रहणसामर्थ्याद्वा तदुपदेशे—धातूपदेशे—नुम् भविष्यति ॥ ननु च अन्यद्धातुग्रहणस्य प्रयोजनमुक्तम् ? ॥ किं (तत्) ? ॥ अभैत्सीत् । अच्छैत्सीदिति ॥ नैतदस्ति प्रयोजनम् । प्रयोजनं नाम तद्वक्तव्यं यन्नियोगतः स्यात् । यच्चाऽत्रेकारेण क्रियतेऽकारेणापि तच्छक्यं कर्तुम् ॥** [इदितो] ॥

प्र.] नुम्न भवति । **उपदेशिवद्भाव इति** । यथोन्द्यादीनामुपदेशे नकारः प्रत्ययविधिकाले संनिहितस्तथा नुमपीत्यर्थः । **किं प्रयोजनमिति** । 'नन्दिता' 'नन्दक' इत्यादि प्रत्यये परतो नुमि क्रियमाणेऽपि सिद्ध्यतीति मत्वा प्रश्नः । **प्रत्ययविध्यर्थमिति** । इष्टप्रत्ययविध्यर्थमित्यथः । **अनकार इति** । असति नकारे यः प्रत्ययः प्राप्नोति स स्यादित्यर्थः । सांप्रतिकेषु शिक्षादिषु गुरुमत्सु संभवत्सु भाविगुरुमत्ताश्रयेण प्रत्ययविधानस्याऽयुक्तत्वात् । **तत्र को दोष इति** । नुमि कृतेऽपवादः प्रवर्त्तमान उत्सर्गं निवर्तयिष्यतीति भावः । **तत्राऽयथेष्टप्रसङ्ग इति** । उत्पन्ने उत्सर्गे नुमि कृते सत्यामपि गुरुसंज्ञायामुत्सर्गेणैव प्रत्ययार्थस्य प्रत्ययोत्पत्तिनिमित्तस्याऽभिधानान्निमित्तवैकल्यादपवादाऽप्रवृत्तावुत्सर्गस्यैव श्रवणप्रसङ्गः । **धातुग्रहणेति** । अधातोरिदितोऽसंभवादधातुनिवृत्त्यर्थं ग्रहणं न भवतीति धातुसंज्ञाप्रवृत्त्यवस्थोपलक्षणार्थं विज्ञायते, तेन सत्यप्यङ्गाधिकारे भाव्यङ्गत्वाश्रयः पूर्वमेव नुम् भवति, ततः प्रत्यय इत्यर्थः संपद्यते । **प्रयोजनं नामेति** । **नियमेन**—अवश्यंभावेन यदन्यथा साधयितुमशक्यं तत्प्रयोजनम् । सिचश्च नुमागमो धातुग्रहणमन्तरेणाऽपि शक्यो निराकर्तुमित्यर्थः । **यच्चात्रेति** । सकारस्योच्चारणार्थ इकारः क्रियते इत्यकारेणापि

उ.] यत्किञ्चित्प्रत्ययस्य सर्वथा प्राप्तेराह—**इष्टेति** । **स स्यादिति** । क्तिन्स्यादित्यर्थः ।

ननु भाविगुरुमत्तामाश्रित्य 'कुण्डे'त्यादौ 'गुरोश्च हल' इत्यप्रत्ययः सेत्स्यतीत्यत आह—**सांप्रतिकेष्विति** । **निवर्त्तयिष्यतीति** । लोपवज्जातनिवृत्तिः स्यादिति भावः ।

उत्पन्ने इति । उत्सर्गापवादविषये जातनिवृत्तेरदर्शनेन प्रवृत्तस्य वचनशतेनाऽपि बाधस्याऽशक्यत्वात् परदेशस्याऽवरुद्धत्वाच्चाऽपवादाप्राप्तिरित्यपि बोध्यम् ।

नन्वेवमङ्गाधिकारो विरुध्येतेत्यत आह—**तेन सत्यपीति** । नियोगशब्दार्थमाह—**नियमेनेति** । तस्यापि व्याख्यानं—**यदन्यथेति** । **अकारेणापीति** । प्रथमा-

शे मुचादीनाम् ॥ ७।१।५९ ॥

॥*॥ शे तृम्फादीनाम् ॥*॥ **शे तृम्फादीनामुपसङ्ख्यानं कर्तव्यम्। तृम्पति। तृम्फति ॥ किमर्थमिदं, न नुमनुषक्ता एवैते पठ्यन्ते ? ॥**

प्र.] 'स'जित्येवं सकारः शक्य उच्चारयितुम्। तदेतदुक्तं भवति—निरनुनासिक उच्चारणार्थः सिच इकार इतीदित्वाऽभावान्नुमभावः। 'अमंस्ते'त्यादौ 'हनः सि'जिति नलोपार्थात्किस्वविधानाज्ज्ञापकादसत्यपीदित्त्वे नलोपाऽप्रसङ्गः। नन्वन्यत्किस्वविधानस्य प्रयोजनमस्ति 'सिजाश्रयो नलोपो यथा स्यात्सार्वधातुकाश्रयो मा भूत्'। सिजाश्रयो हि नलोपोऽतो लोपेऽसिद्धो न सार्वधातुकाश्रयः। समानाश्रयं ह्यसिद्धं नतु व्याश्रयम्। नैतदस्ति। 'असिद्धं बहिरङ्गमन्तरङ्गे' इति सार्वधातुकाश्रयस्य नलोपस्य बहिरङ्गस्याऽन्तरङ्गेऽतो लोपे कर्तव्येऽसिद्धत्वादतो लोपाऽप्रसङ्गात्, उपदेशग्रहणाऽनुवृत्त्या आर्धधातुकोपदेशे यदकारान्तं तस्य लोपविधानाद्वा। तासेरपीकार उच्चारणार्थ इति नुमोऽप्रसङ्गः। 'मन्ता' 'आहन्ते'त्यादौ 'असिद्धवदत्राभा'दिति टिलोपस्याऽसिद्धत्वादनिदित्त्वेपि नलोपाऽप्रसङ्गः। **[इदितो नुम्]** ॥

शे मुचादीनाम्। शे तृम्फादीनामिति। आदिशब्दः प्रकारे। तेन नोपधा गृह्यन्ते, तेषां नलोपे कृते नुमागमः। तस्य विधानसामर्थ्यादसिद्धवदत्राभादिति वा नलोपस्याऽसिद्धत्वादुपधात्वाऽभावाल्लोपाऽभावः। **किमर्थमिति।** य एवोपदेशे नकारः पठ्यते तस्यैव श्रवणं भविष्यतीति प्रश्नः। (न) **नुमनुषक्ता इति।** नुम्ग्रहणं नकारो-

---

उं.] तिक्रमे कारणाऽभावादित्यर्थः। **निरनुनासिक इत्यादि।** इदं चिन्त्यं—विधेयविषये उच्चारणार्थानामपीत्संज्ञाप्रवृत्तेः। तस्माद्भाष्योक्तमेव सम्यक्। नन्वमंस्तेत्यादौ 'अनिदिता'मिति नलोपव्यावृत्तये इदित्वमत आह—**अमंस्तेति। सिजाश्रय इति।** 'अहसाता'मित्यादावनुदात्तोपदेशेति विहितः। ननु सार्वधातुकाश्रय उपधालोपोऽप्याभीयत्वादसिद्धः स्यादेवेत्यत आह—**समानाश्रयं हीति। बहिरङ्गस्येति।** बहिर्भूततङपेक्षत्वात्। ननु तासेरिदित्वाऽभावे 'मन्ते'त्यादौ टिलोपे तशब्दस्थानिकत्वेन ङितामकारमाश्रित्य उपधानलोपः स्यादत आह—**मन्तेत्यादाविति।** लुटः प्रथमस्य डादेशः। वस्तुत उक्तरीत्या तासिरिदिदेव, सिचीव भाष्योक्तरीत्याऽत्र नुमभावः साध्यः। तदेवं धातुग्रहणं धातूपदेशावस्थायां नुमर्थमिति स्थितम्। **[इदितो नुम्]** ॥

शे मुचादीनाम्। ननु तृपादयस्तुदादौ पठ्यन्ते तत्र व्यवस्थावाच्यादिशब्दाश्रयणे निरनुषङ्गानामपि नुम्स्यादत आह—**प्रकारे इति।** प्रकारः–सादृश्यं। ननु तेषां नुमि परस्य मस्यानुस्वारपरसवर्णयोः पूर्वनस्य श्रवणप्रसङ्गोऽत आह—**तेषां नलोप इति।** 'अनिदिता'मित्यनेन। अस्य नुमोऽपि लोपः कुतो नेत्यत आह—**तस्येति। विधानेति।** अत एव मुचादिष्वपि लोपाऽभावः। **असिद्धत्वादिति।**

॥*॥ लुप्तनकारत्वात् ॥ * ॥ लुप्यतेऽत्र नकारः—'अनिदितां हल उपधायाः क्ङिती'ति ॥ यदि पुनरिमे इदितः पठ्येरन् ? ॥ नैवं शक्यम्, इह हि लोपो न स्यात्–तृम्पितो दृम्पित इति ॥ यदि पुनरिमे मुचादिष्वेव पठ्येरन् ? ॥ न दोषः स्यात् । अथवा नैवं विज्ञायते—'इदितो नुम्धातो'रिति ॥ कथं तर्हि ? ॥ 'इदितो नुम्' । ततो 'धातो'रिति ॥ [शे मुचादीनाम्] ॥

नेट्यलिटि रधेः ॥ ७।१।६२ ॥

इमौ द्वौ प्रतिषेधावुच्येते–'उभौ शक्यावक्तुम्' ॥ कथम् ? ॥ एवं वक्ष्यामि 'इटि लिटि रधेर्नुम्' । [इटि लिटि रधेर्नुम्—] भवतीति । तन्निय-

---

प्र.] पलक्षणार्थम् । यदीति । 'इदित्त्वे तु नुमः सिद्धिर्न च लोपः प्रसज्यते' ।
यदि पुनरिति । नोपधानां मुचादिषु पाठेन्नुमः सिद्धिरित्यर्थः । अथवेति । मुचादिषु तावन्न पठिताः, गौरवप्रसङ्गश्च, नोपधानां मुचादिषु पाठेऽर्थनिर्देशः कर्तव्यः । अनोपधानामन्यत्र पाठेऽर्थो निर्देष्टव्य इति मत्वा परिहारान्तरोपन्यासः । इदितो नुमिति । नन्वेवं धातूपदेशावस्थायां नुम्न लभ्यते । नैष दोषः । 'धिन्विकृण्व्योर-चे'ति ज्ञापकाद्धातूपदेशावस्थायां नुम्भविष्यति । अत्र ह्यागन्तुरिकार उच्चारणार्थ इत्यङ्गत्वाऽभावेऽपि नुमनुषक्तपाठस्येदमेव प्रयोजनं–'धातूपदेशावस्थायामेव नुम् यथा स्यादिति । यदि 'धातो'रिति योगविभागः क्रियते तदा सर्वस्य सर्वत्र नुम्प्रसङ्गः । नैष दोषः। 'शे मुचादीना'मिति शग्रहणस्य 'धातो'रित्यत्र सिंहावलोकित-न्यायेनापेक्षणाद्योगविभागस्येष्टसिद्ध्यर्थत्वाद्वा । अन्ये तु भाष्ये योगविभागदिक्-प्रदर्शितेत्याहुः । तेन 'शे मुचादीना'मित्यत्र 'शे' इति योगविभागः क्रियते । तत्र च 'धातो'रिति वर्तते । ततो 'मुचादीना'मिति,–पूर्वयोगस्याऽसर्वविषयत्वज्ञापनार्थम् । तेनेष्टविषये नुमः सिद्धिः । [शे मुचादीनाम्] ॥

उ.]चिणो लुङ्न्यायेन । भाष्ये–तृम्पित इति । अनिट्कारिकासु श्यना निर्देशात्तौदादि-कयोः सेट्त्वादिट् ।इदित्पाठे हि सर्वत्र नुम्स्याल्लोपश्च न स्यादिति भावः । न पठिता इति । अनेन न्यासभेदे दोष उक्तः । दोषान्तरमाह—गौरवेति । द्विरर्थनिर्देशा-दिति भावः । अर्थो निर्देष्टव्य इति । अधुना तु तृपँ तृंप तृप्तावित्यादिक्रमेण पठ्यते । ननु धिन्वीति इका निर्देशादिक्प्रत्ययेऽङ्गस्य धातोर्नुमुपपन्न इति कथं ज्ञापकमत आह—अत्र हीति । अत्र चेदमेव भाष्यं मानं । वस्तुतो विभक्तं धातो-रिति सूत्रं पूर्वत्राप्यपकृष्य तत्सामर्थ्यात्तदर्थलाभ इति बोध्यम् । ननु तर्हि शे सर्व-धातोः प्रसङ्गोऽत आह—योगविभागस्येति । अत एवेदितो नुमिति चरिता-र्थम् । दिक्प्रदर्शितेति । अत्राऽरुचिबीजन्तु–भाष्यस्वारस्यभङ्गः । इष्टविषये—लुप्तनकारविषये ॥ [शे मुचादीनाम्] ॥

मार्थं भविष्यति—'लिट्येवेडादौ नान्यस्मिन्निडादा'विति ॥ [नेट्यलिटि]

आङो यि ॥ ७।१।६५ ॥

इह कस्मान्न भवति–आलभ्यते ॥ अस्तु, 'अनिदितां हल उपधायाः क्ङिती'ति लोपो भविष्यति ॥ इह तर्हि–आलम्भ्या गौः । 'पोरदुपधा'दिति यत्यवस्थिते नुम् ॥ तत्र को दोषः ? ॥ आलम्भ्येत्येषे स्वरः प्रसज्येत । आलम्भ्येति चेष्यते ॥ नैष दोषः । उक्तमेतत् ॥*॥ धातुग्रहणसामर्थ्यादुपदेशे नुम्विधानम् ॥*॥ इति ॥ [आङो यि]

न सुदुर्भ्यां केवलाभ्याम् ॥ ७।१।६८ ॥

प्र.] नेट्यलिटि रधेः । लिट्येवेति । 'इट्येव लिटी'त्येव तु नियमो न भवति, शास्त्रस्येष्टसिद्ध्यर्थत्वात् । क्वसौ 'रेधिवा'निति भवति । द्विर्वचने सति एत्त्वाभ्यासलोपयोः कृतयोरिटि नुमागमः, तस्यौपदेशिककित्त्वाश्रयो लोपः । ये तु क्वसुं छान्दसमेव मन्यन्ते तेषां विचार एवायं नास्ति, छन्दसि दृष्टानुविधानात् ॥[नेट्यलिटि]॥

आङो यि । यत्यवस्थित इति । यकारादेः प्रत्ययस्य निमित्तत्वेनोपादानात् पूर्वमेव तेनोत्पत्तव्यमिति भावः । एष स्वर इति । कृदुत्तरपदप्रकृतिस्वरेण 'यतोऽनाव' इत्याद्युदात्तत्वप्रसङ्गः । अन्तस्वरितत्वं चेष्यत इत्यर्थः । धातुग्रहणसामर्थ्यादिति । 'यी'ति विषयसप्तमी, तेन धातूपदेशावस्थायामेव यकारादौ प्रत्यये विषयभूते नुमागमस्ततोऽदुपधत्वस्य विघातात् ण्यत्प्रत्यये सतीष्टस्वरसिद्धिः ॥ [आङो यि]।

न सुदुर्भ्यां केवलाभ्याम् । 'उपसर्गात् खल्घञो'रिति प्राप्तो नुम् प्रतिषिध्यते ।

उ.] नेट्यलिटि । इट्येवेति । एवंनियमे 'ररन्धे'त्यत्र न स्यात्, 'रधिते'त्यत्र च स्यादिति–नञ्द्वयोपादानं सार्थकं स्यादिति भावः । ननु 'रेधिवा'नित्यत्र नुमि एत्वाभ्यासलोपौ न स्यातामत आह—क्वसाविति । एत्वाभ्यासलोपोत्तरं 'वस्वेकाजा'दितीट् । कृतद्वित्वानामेकाचां तत्र ग्रहात् । औपदेशिकेति । संयोगात्परत्वेनातिदेशिककित्त्वाऽभावादिति भावः । येऽस्त्विति । 'पपुष आगतं पपिवद्रूप्य'मिति 'विभाषा पूर्वाह्णे'ति सूत्रस्थभाष्यप्रयोगविरोधोऽत्राऽरुचिः । यत्तु भाष्येऽपि 'च्छान्दसः क्वसु'रित्युच्यते तस्य–'अयं क्वसुप्रयोगश्छान्दस' इत्यर्थ इति न विरोधः ॥

आङो यि । यकारादेरिति । 'यी'त्यस्य परसप्तमीत्वात्पूर्वमदुपधत्वाद्यदेव स्यान्न तु ण्यदित्यर्थः । कृदुत्तरेति । यद्यपि ण्यत्यपि नुमा विहतनिमित्ततया वृद्धेरभावाद्रूपे न विशेषस्तथापि स्वरे विशेष इत्यर्थः । अन्तस्वरित(त्व)मिति । कृदुत्तरपदप्रकृतिस्वरेणेत्यर्थः । ण्यति ह्यनुबन्धकत्वाद्यतोऽनाव इत्यस्याऽप्रवृत्तेः । ननु उपदेशे नुमि 'यी'ति सप्तम्यनुपपन्नेत्यत आह—विषयेति । [आङो यि] ॥

न सुदुर्भ्यां । अनेकस्य नुमः प्रक्रान्तत्वात्कस्याऽयं प्रतिषेध इत्यत्राह—

अथ केवलग्रहणं किमर्थं न 'न सुदुर्भ्या'मित्येवोच्येत ? ॥*॥ सुदुरोः केवलग्रहणमन्योपसर्गप्रतिषेधार्थम् ॥*॥ **सुदुरोः केवलग्रहणं क्रियते** ॥ [किमर्थम् ?॥ 'अन्योपसर्गप्रतिषेधार्थम्']। **अन्योपसृष्टान्मा भूदिति,–प्रसुलम्भम्॥ नैषोऽस्ति प्रयोगः ॥ इदं तर्हि–सुप्रलम्भम्॥ प्रेण व्यवहितत्वान्न भविष्यति ॥ इदं तर्हि अतिसुलम्भम् ॥ कर्मप्रवचनीयसंज्ञाऽत्र बाधिका भविष्यति'—सुः पूजायामतिरतिक्रमणे चे'ति ॥ यदा तर्हि नातिक्रमणं न पूजा ।**

इदं चाप्युदाहरणं–सुप्रलम्भम् । ननु चोक्तं 'प्रेण व्यवहितत्वान्न भवि-

---

प्र.] **केवलग्रहणमिति** । इह केवलग्रहणेन समानजातीय उपसर्ग एव निवर्तयितव्य इष्यते । स च सुदुर्भ्यां पूर्वो नास्ति, अनभिधानात्प्रत्ययाऽभावात् । सुदुर्भ्यां परे तु तस्मिन्पञ्चमीनिर्देशादेव व्यवधाने प्रतिषेधो न भविष्यतीति प्रश्नः ।

नैषोऽस्ति प्रयोग इति । प्रयुक्तानामिदमन्वाख्यानं न त्वनेनाऽपूर्वः शब्दोपजनः क्रियते । अपि च प्रारम्भादिविशिष्टायाः क्रियायाः सुकरत्वं दुष्करत्वं च प्रतिपाद्यमिति पूर्वं प्रेण धातोः सम्बन्धः, पश्चात्तद्विशिष्टस्य सुदुर्भ्याम् । **अतिसुलम्भमिति** । सौकर्यादिविशिष्टधात्वर्थस्य अतिर्विशेषणमिति पूर्वं सुदुर्भ्यां सम्बन्धः, पश्चादतिना । इतरस्तु पूजाया अतिक्रमणस्य वा द्योतकोऽतिशब्द इति मत्वाह—**कर्मप्रवचनीयसंज्ञेति** । ततश्चोपसर्गत्वाऽभावादतेः केवलावेवाऽत्र सुदुराविति नुम्प्रतिषेधेन भाव्यम् । न हि विजातीयः केवलत्वं विहन्ति । यथा 'देवदत्तयज्ञदत्ताभ्यां केवलाभ्यां प्रवेष्टव्य'-मित्युक्ते पुरुषान्तरस्य प्रतिषिध्यते प्रवेशो न तु शुकादेः, एवं सुदुरौ परस्परसहितौ विजातीयसहितावेकाकिनौ च केवलावेव भवतः । सुदुर्लभमतिसुलभं सुलभं दुर्लभमिति । कृच्छ्राऽकृच्छ्रार्थौ च सुदुरौ क्रियाया विशेषकत्वादुपसर्गावेव खल्निमित्ततां प्रति-

---

उ.] **उपसर्गादिति** । अनन्तरत्वात्खल्घञोरित्यनुवर्तनाच्चेति भावः । **समानजातीय इति** । केवलशब्दस्य सजातीयान्तराऽभाववचनत्वात् । **उपसर्ग इति** । पूर्वसूत्रादुपसर्गपदानुवृत्तेः । **अनभिधानादिति** । तादृशस्थलेऽनभिधानेन खलादिप्रत्ययाऽभावादित्यर्थः । ननु शास्त्रेण प्रयोगः स्यादत आह—**प्रयुक्तानामिति** । अप्रयुक्ते शास्त्राऽप्रवृत्तेरिति भावः । **अपिचेति** । इदं चिन्त्यं, सुकरत्वेन निर्णीतस्य प्रारंभदर्शनात् । तस्मादनभिधानमित्येव युक्तं । तदेव ध्वनयन्नाह—**सौकर्यादिविशिष्टस्येति । उपसर्गत्वाभावादिति** । अत्रोपसर्गादित्यस्यानुवृत्तेरिति भावः ।

नन्वतिशब्दसत्त्वे कथं केवलत्वमत आह—**न हीति । परस्परेति** । सजातीयस्योभयाऽन्यस्याऽभावात् । अत्र वदन्ति—किमत्र सुदुरोः परस्परसाहित्येन निमित्तता, उत निरपेक्षतया ? । नाद्यः–'सुलभ'मित्यसिद्ध्यापत्तेः । नान्त्यः,–'सु'घटितवाक्ये केवलपदेनान्योपसर्गव्यावृत्तेरिवैतद्व्यावृत्तेरपि वक्तुं युक्तत्वादिति चिन्त्यमेतत् । नन्वतिसुलभमित्यत्र नुम्कथं, सोऽपि कर्मप्रवचनीयत्वेनोपसर्गत्वाऽभावात् ।

ष्यती'ति?॥ नैष दोषः। 'सुदुर्भ्या'मिति नैषा पञ्चमी॥ का तर्हि?॥ तृतीया। सुदुर्भ्यामुपसृष्टस्येति। व्यवहितश्चाप्युपसृष्टो भवति॥ [न सुदुर्भ्यां]॥

विभाषा चिण्णमुलोः॥ ७।१।६९॥

॥ * ॥ चिण्णमुलोरनुपसर्गस्य ॥ * ॥ चिण्णमुलोरनुपसर्गस्येति वक्तव्यम्। इह मा भूत्-प्रालम्भि। प्रलम्भं-प्रलम्भम्॥ तत्तर्हि वक्तव्यम्?॥ न वक्तव्यम्। इहोपसर्गादित्यपि प्रकृतं, नेत्यपि। तत्राऽभिसंबन्धमात्रं कर्तव्यं 'विभाषा चिण्णमुलोः-उपसर्गान्ने'ति॥ [विभाषा चिण्णमुलोः]॥

उगिदचां सर्वनामस्थानेऽधातोः॥ ७।१।७०॥

प्र.] पद्येते। यदा तर्हीति। पूजातिक्रमणयोरतेः कर्मप्रवचनीयसंज्ञाविधानादन्यत्रोपसर्गत्वात्तत्सहितयोः सुदुरोः केवलत्वाऽभावान्नुम्भवत्येव। का तर्हीति। पञ्चमीपक्षेऽपि केवलग्रहणमतिसुलभमित्येवमर्थं कर्तव्यमिति क्रमानुल्लङ्घनाय तृतीयैवाश्रयितव्येति भावः। वाक्यकारेण पठितं 'सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वे'ष्विति, अतस्तन्मतेनाऽतिसुलभमिति सोरुपसर्गत्वाऽभावान्नुम्न प्राप्नोति। भाष्यकारेण च अत्र नुमागमोऽभ्युपगतस्तस्माद्वाक्यकारस्यापि केवलसुदुःशब्दविषय एव नुम्विधावुपसर्गसंज्ञानिषेधोऽभिमतः, षत्वेऽपि पूजायामेव। तथा च 'सुषिक्तं नाम किं तवात्रे'ति षत्वं च क्षेपे भवत्येव। [**न सुदुर्भ्यां केवलाभ्याम्**]॥

विभाषा चिमुण्णलोः। 'लभेश्चे'ति नित्ये नुमि प्राप्ते विभाषा आरभ्यते-'चिण्णमुलो'रिति। सोपसर्गस्य तु नित्यमेव नुम्भवति। **उपसर्गान्नेति।** वाक्यभेदेन विकल्प एव प्रतिषिध्यत इतिनित्यमेव नुम्भवति॥[**विभाषा चिण्णमुलोः**]॥

उ.] अकृच्छ्रार्थे हि खल्। अकृच्छ्रत्वं पूजैव। अतएव भाष्ये 'सुःपूजाया'मित्यस्यापि ग्रहणमत आह-**कृच्छ्राऽकृच्छ्रार्थौ चेति।** एवञ्चोपसर्गत्वाऽभावे खलेव न स्यात्। भाष्ये त्वनुवृत्तिप्रदर्शनार्थमेव तदुपादानम्, अकृच्छ्रत्वमात्रेण च न पूजेति भावः। एतेन सुदुरोरुपपदयोः खला घञो बाधात्सूत्रे घञ्ग्रहणं व्यर्थमित्यपि शङ्का समाहिता। कृच्छ्राऽकृच्छ्रातिरिक्तार्थयोस्तत्संभवात्। किञ्चाऽस्मात्खल्कर्मण्येवेति भावेऽपि घञः संभवो बोध्यः।

ननु सर्वथा केवलग्रहणस्य कर्तव्यत्वे भाष्ये तृतीयाश्रयणे को हेतुरत आह—**क्रमेति।** पञ्चमी हि परशब्दयोगे उपपदविभक्तिः। तृतीया तु कारकविभक्तिरिति तृतीयैवोचितेति बोध्यम्। **तस्मादिति।** भाष्यकारेणाऽत्र नुमभ्युपगमादित्यर्थः।

प्रसङ्गादाह-**षत्वेऽपीति।** इदञ्च प्रथमाध्यायशेषभाष्ये ध्वनितम्। 'षत्वञ्चे'ति चेन'सुलभं नाम किन्तवाऽत्रे'त्यादौ क्षेपे नुमित्येके। [**न सुदुर्भ्याम्**]॥

विभाषा चि। प्राप्तविभाषेयमित्याह-लभेश्चेति। नित्यमेवेति। 'अनुपसर्गस्ये'-ति विकल्पस्यैव प्रतिषेधादिति भावः। **विकल्प एवेति।** अनन्तरत्वादिति भावः।

अधातोरिति किमर्थम् ?॥ उखास्रत् । पर्णध्वत् ॥ ॥*॥ अधातोरिति शक्यमवक्तुम् ॥*॥ **कस्मान्न भवति—उखास्रत् पर्णध्वदिति** ॥*॥ उगित्यञ्चतिग्रहणात्सिद्धमधातोः ॥*॥ **उगित्यञ्चतिग्रहणाद्धातोः सिद्धम् । अञ्चतिग्रहणं नियमार्थं भविष्यति—'अञ्चतेरेवोगितो धातोर्नान्यस्योगितो धातो'रिति ॥ इदं तर्हि प्रयोजनम्—अधातुभूतपूर्वस्यापि यथा स्यात्—गोमन्तमिच्छति गोमत्यति, गोमत्यतेरप्रत्ययः—गोमानिति ॥** [उगिदचां] ॥

नपुंसकस्य झलचः ॥ ७।१।७२ ॥

॥*॥ झलचो नुम्विधावुगित्प्रतिषेधः ॥*॥ **झलचो नुम्विधावुगिल्लक्षणस्य प्रतिषेधो वक्तव्यः। गोमन्ति ब्राह्मणकुलानि, श्रेयांसि, भूयांसि। ननु च झल्लक्षण**

प्र.] उगिदचाम् । अधातोरिति किमर्थमिति । अञ्चतिग्रहणान्नियमार्थाद्धातोर्निवृत्तिः सिद्धेति भावः । **गोमानिति ।** 'क्विबन्ता धातुत्वं न जहती'ति धातुरयमित्यञ्चतिग्रहणान्नियमार्थान्न स्यात् । अधातुग्रहणात्तु भवति। तस्य ह्येतत्प्रयोजनम्—'अवस्थान्तरेऽपि यस्याऽधातुत्वं दृष्टं तस्य संप्रति धातुत्वेऽपि नुम्यथा स्या'दिति । अथाऽत्र कथं दीर्घत्वं यावताऽत्वसन्तस्य चाधातोरित्यधातोस्तद्विधीयते? । उच्यते। 'अधातो'रिति तत्र योगविभागः क्रियते । तत्र चाऽसन्तस्येत्यनुवृत्त्याऽत्वन्तस्य पर्युदासाऽभावः । **[उगिदचां सर्वनामस्थानेऽधातोः]** ॥

नपुंसकस्य । गोमन्तीति । परत्वाज्झल्लक्षणे नुमि कृते पुनःप्रसङ्गविज्ञानादुगिल्लक्षणः प्राप्नोतीति तस्य प्रतिषेधो वक्तव्यः । **ननु चेति ।** व्यक्तौ पदार्थे सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति भावः । इतर आकृतिपक्षमा-

---

उ.] उगिदचां । नियमार्थादिति । नचाऽचामिति लुप्तनकारनिर्देशेन नलोपिन एव यथा स्यान्न तु पूजार्थस्येत्येतदर्थमचामित्यस्यचारितार्थ्यात्कथं त्वदुक्तनियमार्थत्वं?। भाष्यप्रामाण्येनाऽचामित्यस्यावृत्त्या तस्याऽपि सुलभत्वात् । अत एवाऽस्य परनिपातः। अतएव च नलोपेन निर्देशोऽकारलोपाऽकरणञ्चेति बोध्यम् । **ननु क्विबन्तस्य** प्रातिपदिकत्वं न धातुत्वमत आह—**क्विबन्ता इति ।** अत एवाऽत्वसन्तस्येत्यत्र धातुग्रहणं चरितार्थं । नचौपदेशिकस्योगितो धातोश्चेदञ्चतेरेवेति नियमेन सिद्धेऽधातुग्रहणं व्यर्थमेवेति वाच्यं, सामान्यापेक्षनियमार्थत्वात् , तत्फलं नामधातावुगितश्चेति ङीबभाव इत्याहुः । **तत्र चाऽसन्तस्येति ।** योगविभागसामर्थ्यादेकदेशानुवृत्तिः । तेन 'पिण्डग्रः' इत्यादौ दीर्घाऽभावः । **[उगिदचाम्]** ॥

नपुंसकस्य । परत्वादिति । झलन्तलक्षणावकाशः—सर्पींषि । उगिल्लक्षणस्य गोमानिति । पुंसि यौगपद्याऽसंभवरूपो विरोधोऽत्र, उभयोरन्त्यादचः परत्वाऽसंभवात्सावकाशत्वेनाऽपवादत्वाऽसंभवाद्वाऽऽह—**व्यक्ताविति ।** इदमुपलक्षणं, विप्रतिषेध-

उगिल्लक्षणं बाधिष्यते ॥ कथमन्यस्योच्यमानमन्यस्य बाधकं स्यात् ? ॥ असति खल्वपि संभवे बाधनं भवति,अस्ति च संभवो यदुभयं स्यात् ॥ किं च स्याद्यद्यत्रोगिल्लक्षणोऽपि स्यात् ? ॥ द्वयोर्नकारयोः श्रवणं प्रसज्येत ॥ न व्यञ्जनपरस्यैकस्य वाऽनेकस्य वा श्रवणं प्रति विशेषोऽस्ति ॥ ननु च प्रतिज्ञाभेदो भवति ॥ श्रुतिभेदेऽसति किं प्रतिज्ञाभेदः करिष्यति ॥ ननु च श्रुतिकृतोऽपि भेदोऽस्ति । इह तावत्–श्रेयांसि भूयांसीति । परस्यानुस्वारे कृते पूर्वस्य श्रवणं प्राप्नोति । तथा कुर्वन्ति कृषन्तीति, परस्या-

---

प्र.] श्रित्याह–**कथमन्यस्येति**। उभयोर्नुमोः प्रसङ्गे परस्परप्रतिबन्धादप्रतिपत्तौ प्राप्तायां 'विप्रतिषेधे परं कार्य'मिति वचनेन परो नुम्विधीयमान उत्तरकालप्राप्तं निमित्तवन्तं पूर्वं नुमं नैव शक्नोति बाधितुम् । तथा चोच्यते–'पुनःप्रसङ्गविज्ञानात्सिद्ध'-मिति । **अन्यस्येति**। अनुमः । **अन्यस्येति**। सनुम इत्यर्थः । स्यादेतत्–अन्यस्याप्युच्यमानं कार्यमन्यस्य बाधकं भवति, यथोक्तम्—'अग्नेरीत्त्वाद्वरुणस्य वृद्धिर्विप्रतिषेधेने'त्यत आह—**असति खल्वपीति** । क्रमेण च नुमो विधानादन्त्यादचः परत्वं संभवति; यथा 'पचती'ति धात्वपेक्षं लट्शपोः । **प्रतिज्ञाभेद इति** । एकस्य प्रतिज्ञा 'एको नकार' इति, अपरस्य–'द्वौ नकारा'विति । **श्रुतिभेदेऽसतीति** । कथं पुनः श्रुतिभेदाऽभावो यावताऽनेकहल्लुच्चारणेनाऽधिकः कालो व्याप्यते एकहल्लुच्चारणे त्वल्पः । उच्यते—'अच्कालव्यतिरेकेण व्यञ्जनानि कालान्तरं नाक्षिपन्ती'ति दर्शनाश्रयेणैतदुक्तम् । यत्तु शास्त्रे व्यञ्जनानां कालः परिगण्यते तद्गुरुलाघवनिरूपणाय। अनेकोच्चारणे हि प्रयत्नस्य गौरवं भवति। लौकिके तु प्रयोगे गुरुलाघवानादराच्छ्रुत्यभेद उच्यते । अन्ये तु–व्यञ्जनानां कालभेदमिच्छन्त्येव । **परस्यानुस्वार इति** । अयोगवाहानामट्सूपदेशाज्झल्त्वाऽभावात्पूर्वस्य नकारस्याऽनुस्वारो नास्ति । ननु च वर्णग्रहणे जातिग्रहणाद्द्वयोर्नकारयोरेकोऽनुस्वार आदेशो

उ.] सूत्रभाष्योक्तस्य तन्न्यायमूलभूतस्य दृष्टान्तस्याऽपि। नन्वङ्गस्यैकत्वादन्यस्येत्ययुक्तमत आह—**अनुम इति** । **अग्नेरिति**।तत्र वृद्धौ नास्ति संभव ईत्त्वस्य, 'इद्वृद्धा'वित्यनेन बाधादिति भावः । नन्वेकस्मादन्त्यादचः परत्वं द्वयोर्नुमोर्नसंभवतीति, 'अस्ति च सम्भव' इत्ययुक्तमत आह–**क्रमेण चेति** । यद्यपि प्रयोगे न संभवति विधानकाले तु संभवतीति भावः । भाष्ये–**व्यञ्जनपरस्येति** । व्यञ्जनं परमस्येति बहुव्रीहिः । **अधिकः काल इति** । द्वयोर्व्यञ्जनयोर्मात्राकाल, एकस्य त्वर्धमात्राकाल इति भावः । **दर्शनाश्रयेणेति** । 'व्यञ्जनानामकालत्व'मिति यच्छिक्षाकृतां मतं तन्मतेनेदमुक्तमिति भावः। **यत्तु शास्त्रे इति** । 'ऐ औच्' 'हयवरट्' सूत्रादौ । **गुरुलाघवनिरूपणायेति** । प्रयत्नगौरवेण कल्पितकालभेदेनेत्यर्थः । **अन्ये त्विति** ।

ऽनुस्वारपरसवर्णयोः कृतयोः पूर्वस्य णत्वं प्राप्नोति ॥ अथैकस्मिन्नपि नुमि णत्वं कस्मान्न भवति ?॥ "अनुस्वारीभूतो णत्वमतिक्रामति" ॥ कृते तर्हि परसवर्णे कस्मान्न भवति ?॥ असिद्धे च परसवर्णः ॥

॥ * ॥ विप्रतिषेधात्सिद्धम् ॥ * ॥ विप्रतिषेधात्सिद्धमेतत् । झलक्षणः क्रियतामुगिल्लक्षण इति झलक्षणो भविष्यति विप्रतिषेधेन । झलक्षणस्यावकाशः–सर्पींषि धनूंषि । उगिल्लक्षणस्यावकाशः–गोमान् यवमान् । इहोभयं प्राप्नोति–गोमन्ति ब्राह्मणकुलानि, यवमन्ति ब्राह्मणकुलानि, श्रेयांसि भूयांसीति ? ॥ झलक्षणो भविष्यति विप्रतिषेधेन ॥

ननु च पुनःप्रसङ्गविज्ञानादुगिल्लक्षणः प्राप्नोति ॥*॥ पुनःप्रसङ्ग इति चेदमादिभिस्तुल्यम् ॥ * ॥ पुनः प्रसङ्गइति चेदमादिभिस्तुल्यमेतद्भवति । तद्यथा–युष्मदस्मदोरमादिषु कृतेषु पुनः प्रसङ्गाच्छिशीलुङ्नुमो न भवन्ति । एवं झलक्षणे कृते पुनः प्रसङ्गादुगिल्लक्षणो न भविष्यति । यदप्युच्यते"असति खल्वपि संभवे बाधनं भवति, अस्ति च संभवो यदुभयं स्या"दिति । सत्यपि संभवे बाधनं भवति। तद्यथा–'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याये'ति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति । एवमिहापि सत्यपि-संभवे झलक्षण उगिल्लक्षणं बाधिष्यते । अथवाऽस्त्वत्र उगिल्लक्षणोपि ॥ ननु-चोक्तं"द्वयोर्नकारयोःश्रवणं प्रसज्येते"ति ॥ परिहृतमेतत् "न व्यञ्जनपरस्यैकस्य वाऽनेकस्य वा श्रवणं प्रति विशेषोऽस्ती"ति ? ॥ ननु चोक्तं "प्रतिज्ञाभेदो

प्र.] विधास्यते। नैतदस्ति। स्थानिभेदादनुस्वारादेशद्वयप्रसङ्गात्। 'न' इति वा गुणत्वादेकत्वसङ्ख्याया विवक्षितत्वादेकस्यैव नकारस्याऽनुस्वारः स्यान्न तु द्वयोः । णत्वमतिक्रामतीति । न प्राप्नोतीत्यर्थः । अनुस्वारे कर्तव्ये 'पूर्वत्रासिद्ध'मिति णत्वस्यासिद्धत्वादनुस्वारो नकारस्य भवति न तु णत्वं, णत्वे च कर्तव्ये सिद्ध एवानुस्वार इति णत्वाऽभावः । असिद्धे च परसवर्ण इति । असिद्धप्रकरणे परसवर्णस्य विधानाण्णत्वे कर्तव्ये तस्याऽसिद्धत्वाण्णत्वाऽभावः । विप्रतिषेधादिति । व्यक्तिपदार्थाश्रयसहितात् । तद्यथा दधीति । यद्यपि दृष्टान्ते सामान्यविशेषभावो बाधहेतुर्दार्ष्टान्तिके तु विप्रतिषेधे परमेवेति नियमस्तथापि विनापि विरोधेन दृष्टं बाधक-

---

उ.] अत एव 'हलो यमा'मित्यादि चरितार्थं । ननु परस्याऽनुस्वारे कृते तमेव झलमाश्रित्य पूर्वस्याऽपि भवत्वित्यत आह—अयोगेति । शर्षु पाठमनाश्रित्येदं । स्थानिभेदादिति । नस्योच्चारणप्रसङ्गे इत्यर्थेन जातेस्तत्प्रसङ्गाऽभावाज्जातिग्रहणमशक्यमिति भावः । न इति वेति । इदं चिन्त्यम्, अनुवादे सङ्ख्याया अविवक्षणात् । अन्यथा नकारान्तरे न स्यात् । ननु विप्रतिषेधाश्रयपूर्वपक्षे तेनैव सिद्धान्तोऽयुक्तोऽत आह—व्यक्तीति । सकृद्गतिन्यायाश्रयणादित्यर्थः । विनाऽपि विरोधेनेति ।

भवती''ति ॥ श्रुतिभेदेऽसति प्रतिज्ञाभेदः किं करिष्यति ? ॥ ननु च श्रुतिकृतोपि भेद उक्तः,—''इह तावच्छ्रेयांसि भूयांसीति, परस्यानुस्वारे कृते पूर्वस्य श्रवणं प्रसज्येत। कुर्वन्ति कृषन्तीति—परस्यानुस्वारपरसवर्णयोः कृतयोः पूर्वस्य णत्वं प्राप्नोती''ति ॥ नैष दोषः। अयोगवाहानामविशेषेणोपदेशश्चोदितः। तत्रेह तावत्—श्रेयांसि भूयांसीति। परस्यानुस्वारे कृते तस्य झल्ग्रहणेन ग्रहणात्पूर्वस्यानुस्वारो भविष्यति। कुर्वन्ति कृषन्तीति। परस्यानुस्वारपरसवर्णयोः कृतयोस्तस्य झल्ग्रहणेन ग्रहणात्पूर्वस्यानुस्वारपरसवर्णौ भविष्यतः ॥

नैव वा पुनरत्रोगिल्लक्षणः प्राप्नोति ॥ किं कारणम्? ॥ 'मिदचोऽन्त्यात्पर' इत्युच्यते न च द्वयोर्मितोरचामन्त्यात्परत्वे संभवोऽस्ति ॥ कथं तर्हीमौ द्वौ मितावचामन्त्यात्परौ स्तो—'बहूनङ्वांहि ब्राह्मणकुलानी'ति ? ॥ विनिमित्तावेतौ ॥।।*।। तत्र बहूर्जि प्रतिषेधः ।।*।। **तत्र बहूर्जि प्रतिषेधो वक्तव्यः। बहूर्जि ब्राह्मणकुलानीति** ।।*।। अन्त्यात्पूर्वं नुममेके ।।*।। **अन्त्यात्पूर्वं नुममेके इच्छन्ति ॥ किमविशेषेण आहो स्विद्बहूर्जावेव ? ॥ किं चातः ? ॥**

प्र.] त्वमिति प्रदर्शनाय दृष्टान्तोपन्यासः। **परस्येति**। अयोगवाहानामविशेषेणोपदेशाश्रयणादनुस्वारस्य झल्त्वात्पूर्वस्याप्यनुस्वारो भवति। ततो द्वयोरनुस्वारयोः श्रुतिं प्रति विशेषाऽभावः। 'कुर्वन्ती'त्यत्रापि पूर्वस्य नकारस्य अनुस्वारपरसवर्णयोः कृतयोः परसवर्णस्याऽसिद्धत्वाण्णत्वस्याऽतिक्रमः। **न च द्वयोरिति**। ननु च यद्यपि प्रयोगे पूर्वेण नुमा परस्य नुमोऽन्त्याजपेक्षमानन्तर्यं विहन्यते तथापि क्रमेण विधाने द्वयोः संभवत्येव परत्वमित्युक्तम्। नैष दोषः। प्रयोगाश्रयेणैतदुक्तम्। प्राधान्यात्प्रयोगस्याऽन्त्यादचः परो मित्प्रयोक्तव्य इत्यानन्तर्यमेवात्र संश्रितम्। न च द्वयोर्नुमोरेकाजपेक्षमानन्तर्यं भवतीति। पचतीत्यत्र तु सार्वधातुके परतः शब्विधानाद्विकरणव्यवधानमाश्रितमेव। **विनिमित्तौ [इति]**। भिन्ननिमित्तावेत्यर्थः। उकारात्पर आम्, आमः परो नुम्। **तत्रेति**। 'झलच' इति द्वन्द्वाश्रयणे दोषः। बह्व ऊर्जो येषामिति

उ.] असंभवरूपेणेत्यर्थः। भाष्ये—**परस्यानुस्वारपरसवर्णयोः कृतयोरिति**। कृतयोरपीत्यर्थः। इदं पराभ्युपगमरीत्या। वस्तुतः परसवर्णस्याऽसिद्धत्वात्ततः पूर्वमेवानुस्वारः। **विनाऽपि विरोधेनेति**। प्रयोगेऽसंभवरूपविरोधेन विनाऽपीत्यर्थः। विधानकाले यौगपद्याऽसंभवरूपो विरोधस्त्वस्त्येवेति बोध्यम्। **णत्वस्यातिक्रम इति**। अप्राप्तिरित्यर्थः। **आनन्तर्यमेवात्रेति**। प्रयोगकालिकमेवाश्रितं, नतु विधानकालिकमित्यर्थः। **उकारात्पर इति**। आम्नुमोः प्राप्तयोः पूर्वं परत्वादुकारात्पर आम्, ततः पुनःप्रसङ्गविज्ञानादामः परो नुमित्यर्थः। 'अचः परस्य झल'-

यद्यविशेषेण, 'काष्ठतक्षी'ति भवितव्यम्। अथ बहूर्जावेव,'काष्ठतङ्क्षी'ति भवितव्यम् ॥ एवं तर्हि बहूर्जावेव । बहूर्ञ्जि ॥

स तर्हि प्रतिषेधो वक्तव्यः ? ॥ न वक्तव्यः । 'अच' इत्येषा पञ्चमी । अच उत्तरो यो झल् तदन्तस्य नपुंसकस्य नुमा भवितव्यम् । यश्चाऽत्र अच उत्तरो नाऽसौ झल्, नाऽपि तदन्तं नपुंसकम् । यदन्तं च नपुंसकं नासावच उत्तरः ॥ इहापि तर्हि न प्राप्नोति–'काष्ठतङ्क्षी'ति । अत्र योऽच उत्तरो झल् न तदन्तं नपुंसकं, यदन्तं च नपुंसकं नासावच उत्तरः ॥ नैतदस्ति,–झल्जातिः प्रतिनिर्दिश्यते,–'अच उत्तरा या झल्जाति'रिति ॥ यदि पञ्चमी, 'कुण्डानि' 'वनानी' त्यत्र न प्राप्नोति ॥ एवंतर्हि 'इकोऽचि विभक्ता'वित्यत्रा'ऽचः सर्वनामस्थाने'इत्येतदनुवर्तिष्यते । एवमपि षष्ठ्यभावान्न प्राप्नोति ॥ 'सर्वनामस्थाने' इत्येषा सप्तमी 'अच' इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति–'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति ॥ [नपुंसकस्य झलचः] ॥

इकोऽचि विभक्तौ ॥ ७। १। ७३ ॥

अज्ग्रहणं किमर्थम् ? ॥*॥ इकोचि व्यञ्जने माभूत् ॥*॥ 'इकोऽची'त्युच्यते व्यञ्जनादौ मा भूत्–त्रपुभ्यां त्रपुभिः ॥*॥ अस्तु, लोपः ॥*॥ अस्त्वत्र नुम् 'न लोपः प्रातिपदिकान्तस्ये'ति नलोपो भविष्यति ॥*॥ स्वरः कथम् ॥*॥ [कथं स्वरः ?]॥ पञ्चत्रपुभ्याम् पञ्चत्रपुभ्यः । 'इगन्ते द्विगा'वित्येष स्वरो न प्राप्नोति ॥*॥ स्वरो वै श्रूयमाणेऽपि ॥*॥ श्रूयमाणेऽपि नुमि स्वरो भवति– पञ्चत्रपुणा पञ्चत्रपुणे इति ॥*॥ लुप्ते किं न भविष्यति ॥*॥ लुप्ते इदानीं

प्र.] बहुव्रीहिः । यद्यविशेषेणेति । काष्ठंतक्ष्णुवन्तीति क्विपि कृते जसः शिभावे च ककारषकारयोर्मध्ये नुम्प्राप्नोति, तस्य झलपरत्वादनुस्वारप्रसङ्गः । अच इत्येषेति । 'झलच' इति न द्वन्द्वः, किं तर्हि 'झ'लिति लुप्तषष्ठीकं पदम् । 'अच' इति तु पञ्चम्यन्तम् । कुण्डानीति । इगन्तस्योत्तरसूत्रेण सिध्यतीत्यकारान्तस्यैव नुमोऽप्राप्तिरुच्यते । एवं तर्हीति । वाक्यभेदेनाऽजन्तस्य सर्वनामस्थाने नुम् विधीयते । सर्वनामस्थाने इत्येषेति । ननु पञ्चमीसप्तम्योर्द्वयोरपि सावकाशत्वात्परत्वात्पञ्चम्यैव प्रकल्पिकया भाव्यम् । एवं तर्हीष्टवाची परशब्दः, अतः सप्तम्यपि क्वचित्प्रकल्पिका भवतीत्यदोषः॥

इकोऽचि । अज्ग्रहणमिति । हलादौ नुमो लोपविधानात्तन्निवृत्त्यर्थमज्ग्रहणं नोपयुज्यते इति प्रश्नः । स्वरो न प्राप्नोतीति । नुमेगन्तताया विघातात् । लुप्ते किन्नेति । स्वरे कर्तव्ये नलोपस्य शास्त्रेणैवाऽसिद्धत्वं प्रतिपाद्यते न तु प्रयोगे नका-

किं न भविष्यति ? ॥ किं पुनः कारणं श्रूयमाणेऽपि नुमि स्वरो भवति? ॥ सङ्घातभक्तोऽसौ नोत्सहतेऽवयवस्येगन्ततां विहन्तुमिति कृत्वा ततः श्रूयमाणेऽपि नुमि स्वरो भवति ॥

इदं तर्हि—अतिराभ्याम् अतिराभिः । नुमि कृते 'रायो हली'त्यात्वं न प्राप्नोति ॥ इदमिह संप्रधार्यं—'नुम् क्रियतामात्व'मिति, किमत्र कर्तव्यम् ? ॥ परत्वादात्वम् ॥ इह तर्हि प्रियतिसृभ्याम् प्रियतिसृभिः । नुमि कृते तिसृभावो न प्राप्नोति ॥ इदमिह संप्रधार्यं—'नुम्क्रियतां तिसृभाव' इति, किमत्र कर्तव्यम् ? ॥ परत्वात्तिसृभावः ॥

अथेदानीं तिसृभावे कृते पुनःप्रसङ्गान्नुम् कस्मान्न भवति ? ॥ 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवे'ति ॥

अत उत्तरं पठति—॥*॥ इकोऽचिविभक्तावज्ग्रहणं नुम्नुटोर्विप्रतिषेधार्थम् ॥*॥ इकोऽचिविभक्तावज्ग्रहणं क्रियते ॥[किं प्रयोजनं ?॥ 'नुम्नुटोर्विप्रतिषेधार्थम्' ।]

प्र.]रस्य सद्भावः । ततश्च नुमः सद्भावेपि यत्र स्वरो भवति तत्राऽसद्भावे कथं न स्यादित्यर्थः । **सङ्घातभक्त इति** । अङ्गस्य विधानाद्बहिरङ्गत्वाच्च नुमोऽन्तरङ्गः स्वरः पूर्वमेव प्रवर्त्तते । **अतिराभ्यामिति** । अतिरि-भ्यामिति स्थिते नुमि कृते तेन व्यवधानाद्रैशब्दस्यात्वं न प्राप्नोति । सुब्विधौ नलोपस्याऽसिद्धत्वाच्च । अथापि 'पदाङ्गाधिकारे तस्य च ग्रहणं भवति तदुत्तरपदस्य चे'ति रैशब्दान्तस्याङ्गस्यात्वं विधीयत इति नास्ति नुमाऽङ्गस्य व्यवधानं तथापि नकारस्यात्वं प्राप्नोति तस्मिन्पूर्वस्य यणि सति अतिर्याभ्यामिति प्राप्नोति । **परत्वादात्वमिति** । आत्वमनित्यं, नुमि कृते तेन व्यवधानादप्रसङ्गात् । अथ वा शब्दान्तरप्राप्त्या नुमि कृते नकारस्य प्रसङ्गात् , अकृते त्विकारस्य । नुमप्यनित्यः, कृते आत्वे प्राप्त्यभावात् । **परत्वात्तिसृभाव इति** । शब्दान्तरप्राप्त्या नुमनित्यः । तिसृभावस्तु नुमि कृते तेन व्यधानान्न प्राप्नोतीत्यनित्यः । स हि यद्यपि त्रिशब्दान्तस्याङ्गस्य विधीयते तद्भक्तत्वाच्च नुमव्यवधायकस्तथापि 'निर्दिश्यमानस्यादेशा भवन्ती'ति त्रेरेव तिसृभावेन भाव्यं, स च नुमा व्यवहित इति

उ.] **इकोऽचि वि**। लुप्ते किन्नेत्यनेन कैमुतिकन्यायः प्रदर्श्यत इत्याह—**स्वरे इति** । हेत्वन्तरमप्याह—**बहिरङ्गत्वाच्चेति** । विभक्तिनिमित्तकत्वादिति भावः । विभक्तिविषये नुमिति भाष्याशय इत्यन्ये । **तेन व्यवधानादिति** । समुदायभक्तस्यावयवत्वं प्रति व्यवधायकत्वादिति भावः । नलोपे कृतेऽपि दोष एवेत्याह—**नलोपस्येति** । **तथापि नकारस्येति** । वस्तुतो नुमि कृते रैशब्दान्ताङ्गाऽभावादात्वं न स्यादित्येव वक्तुं युक्तम् । भाष्ये—**परत्वादात्वमिति** । नचाऽऽकारस्य वृद्धितया 'वृद्ध्यौत्वे'ति पूर्वविप्रतिषेधान्नुमेव स्यात् ; तत्र वृद्धिशब्दविहितवृद्धेरेव ग्रहणात् । अत्र चेदमेव भाष्यं मानम । रैशब्दान्तस्यात्वमिति पक्षेऽप्याह—**अथवा शब्दान्तरेति** । इदम-

नुमो नुड्विप्रतिषेधेन यथा स्यात्–त्रपूणां जतूनाम् ॥*॥ इतरथा हि नुमो नित्यनिमित्तत्वान्नुडभावः ॥*॥ **अक्रियमाणे ह्यज्ग्रहणे नित्यनिमित्तो नुम्, कृतेऽपि नुटि प्राप्नोत्यकृतेपि। नित्यनिमित्तत्वान्नुमि कृते नुटोऽभावः स्यात् ॥**

एतदपि नास्ति **प्रयोजनम्। क्रियमाणे**ऽपि **वै** अज्ग्रहणेऽवश्यमत्र **नुडर्थो यत्नः कर्तव्यः। पूर्वविप्रतिषेधो वक्तव्यः॥ इदं तर्हि** प्रयोजनं—'**नुटि कृते नुम्मा भू**'दिति ॥ किं च स्यात् ? ॥ त्रपूणां जतूनां,–'नामी'ति दीर्घत्वं न **स्यात् ॥ मा भूदेवं 'नोपधाया' इत्येवं भविष्यति ॥ इह तर्हि–शुचीनाम् 'इन्हन्पूषार्यम्णां शौ' 'सौ चे'त्यस्मान्नियमान्न प्राप्नोति** दीर्घत्वम्। **'अर्थवद्ग्रहणे नानर्थकस्ये'त्येवं न भविष्यति ॥ नैषा परिभाषेह** शक्या विज्ञातुम्, इह हि दोषःस्यात्–'वाग्ग्मी'ति॥ एवं तर्हि 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवे'ति॥ ॥*॥ उत्तरार्थं च ॥*॥ **उत्तरार्थं तर्ह्यज्ग्रहणं कर्तव्यम् 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः'**–अजादौ यथा स्यादिह मा भूत्–अस्थिभ्याम्, अस्थिभिरिति ॥ **यद्युत्तरार्थं स्यात्तत्रैवायमज्ग्रहणं कुर्वीत,इह हि क्रियमाणे** यदि किंचित्प्रयोजन-

---

प्र.] तिसृभावस्याऽप्राप्तिः। तदेवमुभयोरनित्ययोः परत्वात्तिसृभावः। **त्रपूणामिति।** सत्यज्ग्रहणे द्वयोरपि नुम्नुटोरनित्यत्वाद्विप्रतिषेधे सति 'नुमचिरतृज्वद्भावेभ्यो नु'डिति पूर्वविप्रतिषेधान्नुड्भवति। तस्मिंश्च 'नामी'ति दीर्घत्वम्। असति त्वज्ग्रहणे कृताऽकृतप्रसङ्गित्वान्नित्यत्वान्नुमेव स्यात् ॥

नुडर्थो यत्न इति। अज्ग्रहणं च कर्त्तव्यं, पूर्वविप्रतिषेधश्च वक्तव्य इति यत्र द्वयमाश्रयणीयं, तत्राऽज्ग्रहणमकृत्वैव एक एव नुडर्थे यत्नः कर्तव्य इत्यर्थः। **नुटि कृते इति।** यत्नान्तरेण नुटि कृते नुम्प्राप्नोतीत्यर्थः। **किं च स्यादिति।** नलोपे कृते दोषाऽभावं मन्यते। **नामीति।** नलोपस्य सुब्विधावसिद्धत्वादजन्तत्वाऽभावात्। **इह तर्हीति।** 'इन्ह'न्निति नियमः सर्वस्योपधालक्षणस्य दीर्घत्वस्येति व्याख्यातम्। **नैषेति।** 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेने'ति

उ.] प्युक्तरीत्या चिन्त्यं। **स च नुमेति।** विभक्तावित्यस्याऽङ्गविशेषणत्वमेव न्याय्यमितीदं चिन्त्यम्। त्रिशब्दान्ताङ्गाऽभावात्तिसृप्राप्तिरिति वक्तुं युक्तम्। विप्रतिषेधस्याऽज्ग्रहणसाध्यत्वं दर्शयति–**सत्यज्ग्रहण इति। पूर्वविप्रतिषेधादिति।** नुटोऽवकाशोऽग्नीनां, नुमोऽवकाशस्त्रपुणे। नुम्नुटोर्विशेषं दर्शयति–**तस्मिंश्चेति।**

यत्नः कर्तव्य इति। नित्यमपि बाधित्वा पूर्वविप्रतिषेधवचनसामर्थ्यान्नुडित्यर्थः। **यत्नान्तरेणेति।** पूर्वविप्रतिषेधरूपेणेत्यर्थः। सकृद्गतिन्यायमनाश्रित्येदम्।

ननु 'नलोपः प्रातिपदिकान्तस्ये'ति नलोपे कृते 'नामी'ति दीर्घः सिध्यतीत्यत्राह–**नलोपस्येति।** ननु स नियमोऽनन्तरत्वात्सर्वनामस्थाने चेति दीर्घस्यैवेत्यत आह–**सर्वस्येति।** अत एवानुनासिकस्य क्वीति दीर्घस्याऽपि नियमः। तत्राऽत्र **वा करणे**

मस्ति तदुच्यताम् ?॥ इहापि क्रियमाणे प्रयोजनमस्ति ॥ किम् ?॥ अजादौ यथा स्यादिह मा भूत्–त्रपु जतु ॥ एतदपि नास्ति प्रयोजनं, 'विभक्ता'वित्युच्यते न चाऽत्र विभक्तिं पश्यामः ॥ प्रत्ययलक्षणेन ॥ 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणस्य प्रतिषेधः ॥ एवं तर्हि सिद्धे सति यदज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो'भवतीह कश्चिदन्योऽपि प्रकारः प्रत्ययलक्षणं नामे'ति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ हे त्रपु हे त्रपो । अत्र गुणः सिद्धो भवति ॥

॥*॥ इकोऽचि व्यञ्जने मा भूदस्तु लोपः स्वरः कथम् ? ।
स्वरो वै श्रूयमाणेऽपि लुप्ते किं न भविष्यति ? ॥ १ ॥
रायात्वं तिसृभावश्च व्यवधानान्नुमा अपि ।
नुड्वाच्य उत्तरार्थं तु इह किंचित्त्रपो इति ॥ २ ॥*॥ **[इकोचिविभक्तौ]**

तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७।१।७४ ॥

किमिह पुंवद्भावेनातिदिश्यते ?॥*॥ नुम्प्रतिषेधः ॥*॥ **कथं पुनः 'पुंव'-**

प्र.]वचनात्। तथा च 'वाग्गिमन' इत्यादावपि नियमाद्दीर्घाऽभावः। **तत्रैवायमिति।** एवं (हि) स्वरितत्वं न प्रतिज्ञेयं भवति । प्रत्यक्षश्रुतिसंभवे चाऽनुमानं नाश्रयितव्यं भवति। **हे त्रपु हे त्रपो इति** । 'हे त्रपु' इति प्राप्ते 'हे त्रपो' इति भवतीत्यर्थः । केचित्तु रूपद्वयमिष्यत इत्याहुः । 'क्वचित्प्रत्ययलक्षणं लुमता लुप्तायामपि संबुद्धौ भवती'त्येतदज्ग्रहणेन ज्ञाप्यते न तु सर्वत्रेति ते वदन्ति ॥ **[इकोऽचि विभक्तौ]॥**

तृतीयादिषु । किमिहेति । अन्यत्र पराश्रयाणि कार्याण्यतिदिश्यन्ते न तु स्वाश्रयकार्याऽभावः, इह तु विपर्ययो दृश्यत इति मत्वा प्रश्नः । **कथं पुनरिति ।**

उ.]विशेषं दर्शयति–**एवं हीति । अनुमानमिति ।** स्वरितत्वाद्धि उत्तरत्र शब्दोऽनुमीयते । सूक्ष्मं शब्दोच्चारणमेवात्राऽनुमानम् । ननु प्रत्ययलक्षणप्रतिषेधाऽभावस्य ज्ञापितत्वाद्धे त्रपु इत्ययुक्तमत आह—**इति प्राप्ते इति । केचित्त्विति** । अत्र चेङ्ह्रस्वादिति सूत्रस्थं भाष्यं मानं। प्रकृतभाष्ये 'कश्चिदन्योऽपि प्रकार' इत्यपिशब्दश्च। अपिर्हि प्रत्ययलक्षणाऽभावं समुच्चिनोति । तदुपपत्तिं दर्शयति–**क्वचिदिति ।** प्रत्ययलक्षणप्रतिषेधस्याऽनित्यत्वमात्रमनेन ज्ञाप्यत इति तदाशयः । 'सर्वत्रे'त्यस्य 'काले' इति शेषः । भाष्ये–श्लोके–**व्यवधानादिति** । नुमा व्यवधानाद्रायात्वं तिसृभावश्च न प्राप्नुत इत्यपि न, 'परत्वात्सिद्धे'रिति शेषः । संहिताया अविवक्षणा**न्नुमा-अपीति** दीर्घाऽभावः। 'पूर्वविप्रतिषेधसिद्ध्यर्थमज्ग्रहण'मित्यस्योत्तरं 'नुड्वाच्य' इति। **'तु-इहे'**त्यत्रेकोऽसवर्ण इति प्रकृतिभावः । 'त्रपो-इती'त्यत्र 'संबुद्धौ शाकल्यस्ये'ति प्रगृह्यत्वम् ॥ **[इकोऽचि विभक्तौ]** ॥

तृतीयादिषु भा । अन्यत्रेति। 'गोतो णि'दित्यादौ । तत्र हि णिदाश्रयवृद्ध्या-

दित्यनेन नुम्प्रतिषेधः शक्यो विज्ञातुम् ? ॥ वतिनिर्देशोऽयं, कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा 'उशीनरवन्मद्रेषु यवाः' । 'सन्ति' 'न सन्ती'ति । 'मातृवदस्याः कलाः' । 'सन्ति' 'न सन्ती'ति । एवमिहापि पुंवत्–'भवति,' पुंवत्'न भवती'ति वाक्यशेषं समर्थयिष्यामहे । यथा पुंसो न नुम्भवत्येवं तृतीयादिषु भाषितपुंस्कस्यापि न भवतीति ॥

किमुच्यते 'नुम्प्रतिषेध' इति, न पुनरन्यदपि पुंसः प्रतिपदं कार्यमुच्यते यत्तृतीयादिष्वजादिषु विभक्तिषु भाषितपुंस्कस्यातिदिश्येत ? ॥ ॥ * ॥ अनारम्भात्पुंसि ॥ * ॥ न हि किं चित्पुंसि प्रतिपदं कार्यमुच्यते यत्तृतीयादिष्वजादिषु विभक्तिषु भाषितपुंस्कस्यातिदिश्येत । नुम्प्रकृतस्तत्र किमन्यच्छक्यं विज्ञातुमन्यदतो नुम्प्रतिषेधात् ? ॥*॥ पुंवदिति नुम्प्रतिषेधश्चेद्गुणनाभावनुडौत्त्वप्रतिषेधः ॥*॥ 'पुंव'दिति नुम्प्रतिषेधश्चेद्गुणनाभावनुडौत्वानां प्रतिषेधो वक्तव्यः । गुणः–ग्रामण्ये ब्राह्मणकुलाय । गुणः ॥ नाभावः– ग्रामण्या ब्राह्मणकुलेन । नाभावः ॥ नुट्–ग्रामण्यां ब्राह्मणकुलानाम् । नुट्॥

प्र.] 'पुंव'दित्यनेन नुम्प्रतिषेधोऽशक्योऽतिदेष्टुं, न हि पुंसि नुम्प्रतिषेधो विहितः ।

कामचारश्चेति । यत्र क्रिया शब्देन नोपात्ता तत्र कामचारः, न तु 'ब्राह्मणवत्क्षत्रिये वर्त्तितव्य'मित्यादावुपात्तक्रियेऽतिदेशे। प्रतिपत्ता चोपमाने भावाऽभावयोरन्यतरमवगत्य वाक्यशेषं कल्पयति । तत्र पुंसि नुमभावदर्शनान्नपुंसके पुंवदतिदेशान्नुमभावः प्रतीयते । तत्रेह शास्त्रे यथालक्ष्यं क्वचित्-'भवती'त्यस्याध्याहारः, क्वचित् 'न भवती'त्यस्य, क्वचिदुभयस्य। यथा स्थानिवदतिदेशे। तथा 'वाय्वो'रित्यादौ स्वाश्रययलोपाऽभावः । नहि किंचिदिति । 'तस्माच्छसो नः पुंसी'ति नत्वातिदेशस्तृतीयादिषु पुंवद्भावातिदेशात्, पूर्वसवर्णदीर्घाऽभावाच्चेह न संभवति । नुम्प्रकृत इति । अनेन प्रत्यासत्तिमाश्रयति ।

उ.] वतिदिश्यते। स्वाश्रयाऽभावस्तु नातिदिश्यते। नैवमिह । यतः स्वाश्रययोर्नुम्ह्रस्वयोरभावो दृश्यते, पुंस्त्वाश्रयनत्वादिकं तु न दृश्यते इत्यर्थः । न हि पुंसीति । 'पुंसि यद्विहितं तन्नपुंसकेऽपि भवती'ति हि पुंवदित्यस्यार्थ इति भावः । ननु क्वचिन्नियमदर्शनात्कथं कामचारत्वोक्तिरत आह—यत्र क्रियेति । कथं पुनः कदाचिद्भावस्य प्रतीतिः कदाचिदभावस्येति विभागोऽत आह–प्रतिपत्ता चेति। शास्त्रे च लक्ष्यानुसाराद्व्यवस्थेत्याह—यथालक्ष्यमिति । यथा स्थानिवदिति । 'अचः परस्मि'न्नित्यत्र तन्त्रादिन्यायेन वाक्यभेदाश्रयणादिति भावः । न संभवतीति । एवञ्च नत्वस्येह विषयेऽसंभवात् 'न हि किञ्चि'दित्युक्तमिति भावः । भाष्ये–

औत्वं–ग्रामण्यां ब्राह्मणकुले। ह्रस्वत्वमप्रतिषिद्धं ह्रस्वाश्रयाश्चैते विधयः प्राप्नुवन्ति ॥*॥ ह्रस्वाऽभावार्थञ्च ॥*॥ **[ह्रस्वाभावार्थञ्च] ॥ किं च ? ॥ नुम्प्रतिषेधार्थं [च] । कथं पुनरत्राऽप्रकृतस्याऽसंशब्दितस्य ह्रस्वत्वस्य प्रतिषेधः शक्यो विज्ञातुम् ?** ॥*॥ अर्थातिदेशात्सिद्धम् ॥*॥ **[अर्थातिदेशात्सिद्धमेतत्] ॥ नैवं विज्ञायते–'भाष्यते पुमाननेन शब्देन सोऽयं भाषितपुंस्कः, भाषितपुंस्कस्य शब्दस्य पुंशब्दो भवती'ति ॥ कथं तर्हि ? ॥ भाष्यते पुमानस्मिन्नर्थे सोऽयं भाषितपुंस्कः, भाषितपुंस्कस्याऽर्थस्य पुंवदर्थो**

प्र.] **ह्रस्वत्वमप्रतिषिद्धमिति** । तस्याऽप्रकृतत्वात् । **अर्थातिदेशात्सिद्धमिति** । यद्यपि प्रकरणमनपेक्ष्य व्याप्त्याश्रयेणापि ह्रस्वाऽभावः सिध्यति तथापि संभवात्परिहारान्तरमाश्रितम् । यदि कार्याऽतिदेशः स्यात्तदा प्रकृतत्वाऽप्रकृतत्वलक्षणो भेदः स्यात् ,अर्थे त्वतिदिश्यमाने नास्त्ययं भेदः । **नैवं विज्ञायत इति** । यदा शब्देऽन्यपदार्थे कार्यातिदेशः स्यात्तदा प्रकृतत्वात्तस्यैव नुमः प्रतिषेधः स्यान्न ह्रस्वस्य। **भाष्यते पुमानस्मिन्नर्थे इति**। अर्थोऽन्यपदार्थ आश्रीयते, स चार्थो नपुंसकलक्षणो विरोधान्नाश्रीयते । न हि नपुंसकेऽर्थे पुंसो भाषणमुपपद्यते । तस्माच्छब्दप्रवृत्तिनिमित्तलक्षणोऽर्थोऽन्यपदार्थत्वेनाश्रीयते। तद्योगाच्चाऽभिधेयं नपुंसकं तदपि भाषितपुंस्कमुच्यते । तस्याऽर्थस्य पुंस्त्वातिदेशाद्द्वावपि नुम्ह्रस्वौ न भवतः, पुंसि द्वयोरप्यभावात् । अर्थस्य चाऽपौरुषेयत्वादतिदेशाऽसंभवात्तदतिदेशद्वारेणाऽनेककार्यातिदेश एवायं संपद्यते ।' तत्र यद्यप्यन्तरङ्गो ह्रस्वस्तथाप्यपवादविषयं प्रकल्प्यो-

---

उ.] **ग्रामण्यां कुले इति** । पुंवत्त्वाऽभावे तु नुमि 'ग्रामणिनी'त्येव। **संभवादिति।** व्यापित्वाच्चेत्यपि द्रष्टव्यम् । भाष्ये 'पुंशब्दो भवती'त्यस्य पुंशब्दवत्कार्यं भवतीत्यर्थः। भाष्ये–**अस्मिन्नर्थे इति** । यत्रार्थे प्रवृत्तिनिमित्तलक्षणे बुद्धिस्थे सतीत्यर्थः । **नपुंसकलक्षण इति** । व्यक्तिरूप इत्यर्थः । **प्रवृत्तिनिमित्तेति** । यथा ग्रामण्यादिशब्दानां ग्रामनयनादि ।

ननु प्रवृत्तिनिमित्तस्य पुंवत्त्वेऽपि तदाश्रयस्य क्लीबत्वसत्त्वेन नुम्ह्रस्वौ दुर्वारावत आह—**तद्योगाच्चेति** । यदभिधेयं नपुंसकं तदपि भाषितपुंस्कमुच्यत इत्यन्वयः । अत्राऽपि पक्षे फलतः कार्यातिदेशः संपद्यत इत्याह–**तस्यार्थस्येति** । अभिधेयस्य क्लीबरूपार्थस्येत्यर्थः । नन्विदमसङ्गतम्, अर्थस्याऽजादितृतीयादिविभक्तिपरत्वाऽसंभवात् । तदुक्तं–स्त्रियाः पुंवदिति सूत्रे भाष्ये–'**नह्यर्थेन पौर्वापर्यं संभवती**'ति इति चेन्न; 'अर्थातिदेशा'दित्यस्याऽर्थविशिष्टशब्दरूपातिदेशात्सिद्धमित्यर्थेनाऽदोषात् । भाषितपुंस्कक्लीबत्वविशिष्टाऽर्थवाचकशब्दस्य पुंस्त्वविशिष्टाऽर्थवाचकशब्दरूपाऽतिदेशात्क्लीबत्वस्य निवृत्त्या तत्प्रयुक्तकार्याऽप्राप्तिरित्याशयात्। अर्थातिदेशद्वारा कार्यातिदेशाश्र-

भवती'ति ॥*॥ तद्धितलुक्प्रतिषेधश्च ॥*॥ **तद्धितलुकश्च प्रतिषेधो वक्तव्यः । पीलुर्वृक्षः । पीलु फलम् । पीलुना पीलुने इति** ॥*॥ न वा समानायामाकृतौ भाषितपुंस्कविज्ञानात् ॥*॥ **न वा वक्तव्यम् ॥ किं कारणम् ॥ ? 'समानाया-माकृतौ भाषितपुंस्कविज्ञानात्' । समानायामाकृतौ यद्भाषितपुंस्कम् [इति विज्ञायते] । आकृत्यन्तरे चैतद्भाषितपुंस्कम् ॥ किं वक्तव्यमेतत् ? ॥ नहि ॥ कथमनुच्यमानं गंस्यते ? ॥** एतदपि **"अर्थनिर्देशात्सिद्धम्"** ॥ [तृतीयादिषु]

ई च द्विवचने ॥ ७।१।७७ ॥

किमुदाहरणम् ? ॥ अक्षी ते इन्द्र पिङ्गले ॥ नैतदस्ति, पूर्वसवर्णेनाप्येत-त्सिद्धम् ॥ इदं तर्हि—अक्षीभ्यां ते नासिकाभ्याम् ॥ इदं चाप्युदाहरणम्—'अ-क्षी ते इन्द्र पिङ्गले' ॥ ननु चोक्तं "पूर्वसवर्णेनाप्येतत्सिद्ध"मिति ॥ न सिध्यति । नुमा व्यवहितत्वात्पूर्वसवर्णो न प्राप्नोति ॥*॥ छन्दसि नपुंसकस्य

प्र.] त्सर्गाणां प्रवर्तनान्नाऽत्र प्रवर्तते । ह्रस्वाऽभावाच्च गुणादीनां निमित्ताऽभावाद-प्रवृत्तिः सिद्धा । **तद्धितलुगिति** । अर्थातिदेशस्यैव प्रयोजनान्तरं चोद्यमुखेनोपन्य-स्यते । 'फले लु'गित्योरणो लुकि कृते पीलुशब्दो वृक्षाकृतौ पुँल्लिङ्गः । फलाकृतौ नपुंसकलिङ्ग इति पुंवद्भावान्नुमोऽप्रसङ्गः ।

न वेति । नन्वाकृतिरेवान्यपदार्थत्वेनाश्रिता । भाषितपुंस्कशब्दस्य तु भाषित-पुंस्कशब्दव्यपदेशो नैवाश्रितः । सत्यम् । साक्षाच्छब्दस्य भाषितपुंस्कव्यपदेशो नास्ति,अभिधेयद्वारकस्तु केन निवार्यते ? । तत्र पीलुशब्दो वृक्षाकृतौ पुँल्लिङ्गः फलाकृतौ नपुंसकलिङ्ग इति पुंवद्भावाऽप्रसङ्गः ॥ [**तृतीयादिषु**] ॥

ई च द्विवचने । पूर्वसवर्णेनेति । 'अक्षि–औ'इति स्थिते छान्दसात् पुंव-द्भावाच्छीभावे नुमि चाऽसति'प्रथमयोः पूर्वसवर्ण' इत्यनेन । **नुमा व्यहितत्वादिति** ।

उ.] यणे फलन्दर्शयति–**अनेककार्येति** । **प्रकल्प्येति** । अपवादशास्त्रवैयर्थ्यमेतन्मू-लम् । अत्राप्यर्थघटितातिदेशाश्रयवैयर्थ्यम् । नन्वर्थस्याऽन्यपदार्थत्वात्तद्धितलुक्या-कृतिभेदात् प्रतिषेधोऽनर्थक इत्यत आह–**अर्थातिदेशस्यैवेति** । वार्तिके 'तद्धितलुकः प्रतिषेध' इति समासः । तद्धितलुगन्तस्येत्यर्थः । ननु 'समानायामाकृतौ भाषित-पुंस्के'त्युक्त्या शब्दस्याऽन्यपदार्थत्वं भाति,तदयुक्तमिति शङ्कते–**नन्विति** । **साक्षादिति** । अनेन पूर्वभाष्यस्य मदुक्तरीत्या व्याख्यानं सूचितं । **वृक्षाकृतौ**—वृक्षत्वव्याप्य-जातौ । एवं फलाकृतावित्यपि । पीलोः फलमिति व्युत्पत्तावपि फलत्वावान्तरजाति-रेव प्रवृत्तिनिमित्तमिति भावः । [**तृतीयादिषु भाषितपुंस्कं**] ।

ई च द्वि । ननु परत्वान्नुमि तेन व्यवधानात्पूर्वसवर्णदीर्घेण न भाव्यं । न च पुंवद्भावः, अभाषितपुंस्कत्वादत आह—**छान्दसादिति** । ननु नुमः पूर्वं दीर्घोऽ-

पुंवद्भावः(मधोर्गृम्णामि मधोस्तृप्ता इवासते) ॥*॥ **छन्दसि नपुंसकस्य पुंवद्भावो वक्तव्यः ॥ [किं प्रयोजनम् ? ॥] 'मधोर्गृम्णामि' 'मधोस्तृप्ता इवासते' इत्येवमर्थम् ॥ पुंवद्भावेन नुमो निवृत्तिर्नुमि निवृत्ते पूर्वसवर्णेनैव सिद्धम् ॥** [॥*॥ स्वरार्थं ईकारः ॥*॥] **स्वरार्थस्तर्हीकारो वक्तव्यः। उदात्तस्वरो यथा स्यान्नपुंसकस्वरो मा भूदिति ॥ ननु च पुंवद्भावातिदेशादेव स्वरो भविष्यति ॥ अशक्यः पुंवद्भावातिदेशः स्वरे तन्त्रं श्रयितुम्। इह हि दोषः स्यात्–मध्वस्मिन्नस्ति 'मधुर्मास' इति ॥ स तर्हि पुंवद्भावो वक्तव्यः ? ॥ न वक्तव्यः। प्रकृतं 'पुंव'दिति वर्तते ॥** [ई च द्विवचने] ॥

प्र.] 'प्रथमयोः पूर्वसवर्ण' इत्यत्राऽक इति वर्तते। तेनाऽगचोः स्थाने पूर्वसवर्णदीर्घ उच्यमानो नुम्व्यवधाने नास्तीत्यक्षिणी इति प्राप्नोति। परत्वाच्च नुम्प्राप्नोति। ईकारस्तु विधीयमानः परत्वान्नुमं बाधते, तेन शीभावे कृते पूर्वसवर्णेनाऽक्षी इति सिध्यति। **नुमि निवृत्ते इति।** अप्रवृत्तिरेव निवृत्तिः। शीभावोऽपि पुंवद्भावान्न भवति। **स्वरार्थ इति।** उदात्तग्रहणानुवर्तनादीकार उदात्तः। **नपुंसकस्वर इति।** 'नब्विषयस्यानिसन्तस्ये'त्याद्युदात्तत्वम्। **ननु चेति।**—अव्युत्पत्तिपक्षे चोद्यते। व्युत्पत्तिपक्षे त्वशेर्निदिति नित्त्वादाद्युदात्तत्वेन भाव्यम्। **मधुर्मास इति।** 'मत्वर्थे मासतन्वोर्मधोर्ञ चे'ति यत उत्पन्नस्य 'लुगकारेकाररेफाश्च वक्तव्या' इति लुकि कृते मासे पुंसि मधुशब्दो वर्तते इत्याद्युदात्तत्वं न स्यात्। तस्माद्यस्याऽन्यत्र नपुंसकत्वं दृष्टं तस्याऽसत्यपि नपुंसकत्व आद्युदात्तत्वमिष्यत इति पुंवद्भावेऽपि स्वरानिवर्तनात्स्वरार्थ ईकारो विधेयः। **स तर्हीति।** मधोर्गृम्णातीत्येवमाद्यर्थः। **प्रकृतमिति।** वाक्यभेदेन संबन्धः क्रियते। 'छन्दसि नपुंसकं पुंव'दित्येकं वाक्यम्।

उ.]स्त्वत आह–**परत्वाच्चेति।** एतत्सूत्रसत्त्वे यथा सिद्ध्यति तथा दर्शयति–**ईकारस्त्विति।** इतरः प्रकारान्तरेणैतत्सूत्रं विनाऽपि नुमो निवृत्तिं दर्शयति—**छन्दसि नपुंसकस्येति** भाष्ये। 'मधोस्तृप्ता'इत्यादौ क्षीरवाची नित्यनपुंसको मधुशब्दः।

नन्वीकारविधावपि कथं तस्योदात्तत्वमत आह—**उदात्तेति। नब्विषयस्येति।** नपुंसकविषयस्येत्यर्थः। **अव्युत्पत्तीति।** अत्र पक्षे पुंवत्त्वेन नपुंसकाऽभावान्नब्विषयस्येत्यस्याऽप्रवृत्तौ प्रातिपदिकस्वरेणाऽन्तोदात्तत्वमिति भावः। **व्युत्पत्तीति।** अत्र पक्षे सत्यपि पुंवत्त्वे आद्युदात्तत्वमेवेति ईकारो वक्तव्य एवेति भावः। **तस्माद्यस्यान्यत्रेति।** 'नब्विषयस्ये'त्यत्र विषयशब्दो न नित्यनपुंसकपरः, मधुशब्दस्य माक्षिकमद्यमकरन्दान्यतमवाचकस्य शाश्वतकोशसंमतोभयलिङ्गस्य भाष्यसंमतस्वराऽनापत्तेः। **'मकरन्दस्य मद्यस्य माक्षिकस्याऽपि वाचकः। अर्द्धर्चादिगणे पाठात्पुंनपुंसकयोर्मधु'**रिति हि शाश्वतः। अत्र सूत्रेऽनुवृत्तावक्ष्यादीनामेव

नाभ्यस्ताच्छतुः ॥ ७।१।७८ ॥

कस्याऽयं प्रतिषेधः ? ॥ 'नुम' इत्याह ॥ तन्नुमो ग्रहणं कर्तव्यम् ? ॥ न कर्तव्यं, प्रकृतमनुवर्तते ॥ क्व प्रकृतम् ? ॥ 'इदितो नुम्धातो'रिति ॥ तद्वै अनेकग्रहणेन व्यवच्छिन्नमशक्यमनुवर्तयितुम् ॥ एवं तर्हि 'सर्वनामस्थान' इति वर्तते, सर्वनामस्थाने यत्प्राप्नोति तस्य प्रतिषेधः ॥ तद्वै बहुतरकेण ग्रहणेन व्यवच्छिन्नमशक्यमनुवर्तयितुम् । अथेदानीं व्यवहितमपि शक्यतेऽनुवर्तयितुं,–नुमेवानुवर्त्यः–इहार्थमुत्तरार्थं च । इहं चैव प्रतिषेधः सिद्धो भवति, इह च 'आच्छीनद्योर्नु'मिति नुम्ग्रहणं न कर्तव्यं भवति ॥ [नाभ्यस्ता]।

आच्छीनद्योर्नुम् ॥ ७।१।८० ॥

इह कस्मान्न भवति–'अदती घ्नती लुनती पुनती'ति ॥*॥ लोपे कृते-

प्र.]'अक्ष्यादीनां छन्दसि द्विवचन ईकारो भवती'ति द्वितीयं वाक्यम्॥**[ई च द्विवचने]**॥

नाभ्यस्ताच्छतुः। कस्यायमिति। 'आच्छीनद्योर्नु'मिति नुम्ग्रहणाद्व्यवहितस्यानुवृत्तिर्नाश्रिता, न चानन्तरः प्रतिषेधार्ह इति प्रश्नः। **एवं तर्हीति।** 'उगिदचां सर्वनामस्थानेऽधातो'रित्यतः सर्वनामस्थानं निषेध्यलक्षणार्थं विज्ञायते—'सर्वनामस्थाने यत्प्राप्नोति तदभ्यस्ताच्छतुर्न भवती'ति नुम एव प्रतिषेधः संपद्यते। **बहुतरकेणेति।** नुमागमश्चतुर्भिर्योगैर्विच्छिन्नः। सर्वनामस्थानं तु पञ्चभिरिति प्रकर्षप्रत्ययनिर्देशः ॥ [**नाभ्यस्ताच्छतुः**] ॥

आच्छीनद्योर्नुम्। इह कस्मादिति। सर्वत्रैवाऽवर्णस्य निवृत्त्या भाव्यं, क्व चिल्लुका, क्व चित् श्लुना, क्व चिदेकादेशेन, क्वचित् 'श्नाभ्यस्तयोरात' इति लोपेन। तत्रावश्यं भूतपूर्वगतिराश्रयितव्या। अवर्णनिवृत्तिशास्त्रस्य वा नुमागमविधानात्पूर्वविप्रतिषेधादप्रवृत्तिः। ततश्चात्रापि प्रसङ्ग इति भावः। **लोपे कृते इति।** नित्य-

उ.]द्विवचन एव पुंवत्त्वं स्यान्न तु मधोरित्यादावत आह–**वाक्यभेदेनेति।** **[ई च द्वि]**॥

नाभ्य। नन्वनन्तरस्याऽयोग्यत्वाद्व्यवहितस्यैव प्रतिषेधो भविष्यतीति प्रश्नानुपपत्तिरत आह—**आच्छीति।** यद्यत्र नुमोऽनुवृत्तिस्तर्हि तत्र तदुपादानं व्यर्थमिति स्पष्टमेवेत्यर्थः। **न चानन्तर इति।** शत्रन्तात्तद्विधानाऽभावादित्यर्थः। **निषेध्यलक्षणार्थमिति।** निषेध्योपलक्षणार्थमित्यर्थः। [**नाभ्यस्ताच्छतुः**] ॥

आच्छीनद्योः। क्वचिदित्यादि। 'अदती'त्यादौ लुका, जुह्वतीत्यादौ श्लुना, 'तुदती'त्यादावेकादेशेन, 'लुनती'त्यायौ'श्नाभ्यस्तयो'रिति। **तत्रावश्यमिति।** सांप्रतिकाऽवर्णान्तादुत्तरस्य शतुरसंभवात्। **पूर्वविप्रतिषेधादिति।** परत्वान्नुम एव प्रवृत्त्या ततः पूर्वं लुगादीनामप्रवृत्तिरित्यभिमानः। क्वचित्तु पाठः–**प्रतिबन्धा-**

ऽवर्णाऽभावात् ॥*॥ किं तर्ह्यस्मिन्योगे उदाहरणम् ? ॥ याती-यान्ती ॥ ॥ * ॥ एकादेशे व्यपवर्गाऽभावात् ॥ * ॥ अत्राप्येकादेशे व्यपवर्गाऽभावान्न प्राप्नोति । अन्तादिवद्भावेन व्यपवर्गः ॥ * ॥ उभयत आश्रये नाऽन्तादिवत् [भावः] ॥ * ॥ नोभयत आश्रयः करिष्यते । नैवं विज्ञायते-'अवर्णान्ताच्छतुर्नुम्भवती'ति ॥ कथं तर्हि ? ॥ अवर्णान्नुम्भवति तच्चेदवर्णं शतुरनन्तरमिति ॥ [आच्छीनद्योर्नुम्] ॥

शप्श्यनोर्नित्यम् ॥ ७।१।८१ ॥

नित्यग्रहणं किमर्थम् ? ॥ विभाषा माभूत् ॥ नैतदस्ति प्रयोजनं सिद्धोऽत्र पूर्वेणैव, तत्रारम्भसामर्थ्यान्नित्यो विधिर्भविष्यति ॥ तदेतन्नित्यग्रहणं सांन्यासिकं-तिष्ठतु तावत् ॥ [शप्श्यनोर्नित्यम्] ॥

सावनडुहः ॥ ७।१।८२ ॥

॥*॥ अनडुहः सावाम्प्रतिषेधो नुमोऽनवकाशत्वात् ॥*॥ अनडुहः सावा-

प्र.]त्वादन्तरङ्गत्वाच्च । पूर्वोक्तेनैवाभिप्रायेण चोदयति-**किं तर्हीति** । इतरः सांप्रतिकमवर्णान्तं दर्शयितुमाह-**यान्तीति** । **नैवं विज्ञायत इति** । एवं विज्ञायमानेऽवर्णं शता चोभयमाश्रितं स्यात् । **अवर्णान्नुम्भवतीति** । अवर्णात्पर इत्यर्थः । शत्रवयवव्यतिरिक्तश्चाऽवर्णो गृह्यते,'आ'दित्युपादानसामर्थ्यात् । **तच्चेदवर्णमिति** । शत्रवयवस्तकारः शतृशब्देनोच्यते । न ह्यन्यथा एकादेशे कृते शतुरनन्तरमवर्णं भवति, 'उभयत आश्रये च नान्तादिव'दित्युक्तम्, तस्माच्छत्रवयवस्तकारः 'शतृ'-शब्देनोच्यते, शत्रवयवाऽकारव्यतिरिक्तं चाऽवर्णमेकादेशात्मकमाश्रीयते इति न कश्चिद्दोषः । [**आच्छीनद्योर्नुम्**] ॥

सावनडुहः । आमागमः सर्वनामस्थानमात्रे विधीयमानः सोरन्यत्र सावकाशो निरवकाशेन नुमा बाध्येतेति मत्वाह-**अनडुहः साविति**। **अवर्णोपधस्येति** । नचाऽऽमा विनाऽवर्णोपधत्वसंभव इति निमित्तमेव नुम आमिति बाध्यबाधकभावा-

---

उ.] **दिति** । नुम्विधेरनवकाशत्वप्रसङ्गेन प्रतिबन्धात्पूर्वमप्रवृत्तिरित्यर्थः । अयमेव युक्तः पाठः । ननु विप्रतिषेधान्निरवकाशत्वाद्वा पूर्वं नुमि लोपलुकोरप्रवृत्तिरत आह-**नित्यत्वादिति** । **पूर्वोक्तेनेति** । निरवकाशत्वरूपेणेत्यर्थः । **व्यतिरिक्तश्चेति** । तदवयवग्रहणे तु व्यभिचाराऽभाव इति भावः । एकादेशेऽवर्णं शत्रनन्तरत्वं न संभवतीत्यत आह---**शत्रवयव इति** [आच्छीनद्योः] ॥

शप्श्यनोः। [भाष्ये]**सांन्यासिकमिति** । पूर्वसूत्रे वाग्रहणानुवृत्तौ तात्पर्यग्रहार्थं तदावश्यकमिति भावः । अन्यथा सामर्थ्येनाऽस्यैव वैकल्पिकत्वं स्यादिति बोध्यम् ॥

सावनडुहः । वार्तिके प्रतिषेधशब्देनाऽभाव उच्यते । **निमित्तमेवेति** ।

म्प्रतिषेधः प्राप्नोति ॥ किं कारणम् ? ॥ 'नुमोऽनवकाशत्वात्' । अनवकाशो नुमामं बाधते ॥*॥ न वाऽवर्णोपधस्य नुम्वचनात् ॥*॥ **न वैष दोषः ॥ किं कारणम् ? ॥ 'अवर्णोपधस्य नुम्वचनात्' ॥ अवर्णोपधस्य नुमं वक्ष्यामि ॥ तदवर्णग्रहणं कर्तव्यम् ? ॥ न कर्तव्यं, प्रकृतमनुवर्तते ॥ क्व प्रकृतम् ? ॥ 'आच्छीनद्योर्नु'मिति ॥ यदि तदनुवर्ततेऽनडुहि यावन्त्यवर्णानि सर्वेभ्यः परो नुम्प्राप्नोति ॥ नैष दोषः 'मिदचोऽन्त्यात्पर' इत्यनेन यत्सर्वान्त्यमवर्णं तस्मात्परो भविष्यति ॥** ॥*॥ पुनःप्रसङ्गविज्ञानाद्वा सिद्धम् ॥*॥ **अथ वा पुनःप्रसङ्गान्नुमि कृते आम्भविष्यति** ॥*॥ यथाऽऽत्त्वादिषु द्विर्वचनम् ॥*॥ **तद्यथा—जग्ले मम्ले ईजतुरीजुरित्यात्त्वादिषु कृतेषु पुनः प्रसङ्गाद्द्विर्वचनं भवत्येवमत्रापि नुमि कृते आम्भविष्यति ॥ नैष युक्तः परिहारः । विप्रतिषेधे पुनःप्रसङ्गो, विप्रतिषेधश्च द्वयोः सावकाशयोर्भवति, इह पुनरनवकाशो**

उ०] ऽभावः। **अनडुहि यावन्तीति।** अनडुहोऽकारान्तत्वाऽसंभवादनडुहाऽवर्णं विशेष्यते न त्ववर्णेनाऽनडुच्छब्दः, ततः सर्वाऽवर्णानां नुम्प्रसङ्गः। यद्येवं सत्यामप्यादित्यस्यानुवृत्तौ यदेव सन्निहितमवर्णं तस्यैव नुम्स्यात्तथा च नुमा आम्बाध्येत। नैष दोषः-आगमिभेदात् । आमनडुहो, नुम् त्ववर्णस्य । तस्मात्सर्वाऽवर्णान्नुम्प्रसङ्ग एव दोषः । **मिदचोन्त्यादिति ।** मित्त्वलिङ्गाच्च मित्परिभाषोपतिष्ठते । तदुपस्थानादुकारात्परो नुम्प्रसक्त 'आ'दित्यधिकारादवर्णादन्त्यात्परः क्रियते । न चाऽऽम्यकृतेऽवर्णोऽन्त्यो भवतीति सामर्थ्यादामि कृते नुम्विधीयते । अथ वोकारात्पर एव विधीयते । तत्राऽऽदित्यधिकारादयमर्थो भवति—'यथाऽवर्णात्परो नुम्भवति तथा कर्तव्यम्' । एवं चावर्णात्परो भवति यदि कृते नुम्याम् क्रियते । एवं च सत्यादित्यधिकारोऽनुगृहीतो भवति, परिभाषा च न त्यक्ता भवति। **पुनः प्रसङ्गविज्ञानाद्वेति ।** चाऽर्थे वाशब्दः । बह्वनड्वांहीति—परत्वादामि कृते पुनःप्रसङ्गविज्ञानान्नपुंसकस्य

प्र०] तथा चोपजीव्यविरोधान्न नुम्बाधक इत्यर्थः। **यद्येवमिति।** तावतैवाऽदित्यनुवृत्तिः कृतार्थेति भावः । **आगमिभेदादिति** । तद्भेदेऽपि नुम्नुटोर्बाध्यबाधकभावस्य दृष्टत्वात्संभवेऽपि बाधाच्चेदं चिन्त्यम् । तस्मान्नुमाऽऽम्बाध्येतेति पूर्वपक्ष एव भाष्यतात्पर्यमुचितम् । ननु परिभाषाऽधिकारयोः परस्परप्रतिबन्धादुभयोरप्यप्रवृत्तिः स्यादत आह—**मित्त्वलिङ्गेति** । **अथवेति** । अत्र पक्षे वाक्यभेदः क्रियते,—'अनुडुहोऽन्त्यादचः परो नु'मित्येकं, 'स चाऽवर्णात्परो यथा भवती'त्यादि द्वितीयं । तेनाऽऽमः प्रवृत्तिरनुज्ञाता भवति, तदाह—**एवञ्चेति। न त्यक्ता भवतीति** । आमश्च बाधो न भवतीत्यपि बोध्यम् । **चार्थे इति** । प्रकृतदोषस्य नेदं परिहारान्तरं, किन्तु दोषान्तरस्यैव परिहार इत्यर्थः । **परत्वादिति** । आम्-अनड्वानित्यत्र सावकाशः। नुम्-

नुमामं बाधते ॥ एवं तर्हि वृत्तान्तादेष परिहारः प्रस्थितः ॥ कस्माद्वृत्तान्तात् ? ॥ इदमयं चोद्यो भवति–'अनडुहः सावाम्प्रतिषेधो नुमोऽनवकाशत्वा'दिति, तस्य परिहारो 'न वाऽवर्णोपधस्य नुम्वचना'दिति । ततोऽयं चोद्यो भवति–'यत्र तर्ह्यवर्णप्रकरणं नास्ति तत्र ते आमा नुमो बाधनं प्राप्नोति बह्वनड्वांहि ब्राह्मणकुलानी'ति ॥ ततं उत्तरकालमिदं पठितं–'पुनः प्रसङ्गविज्ञानाद्वा सिद्ध'मिति ॥ [सावनडुहः] ॥

दिव औत् ॥ ७।१।८४ ॥

॥*॥ दिव औत्त्वे धातुप्रतिषेधः ॥*॥ दिव औत्त्वे धातोः प्रतिषेधो वक्तव्यः, अक्षद्यूरिति ॥*॥ अधात्वधिकारात्सिद्धम् ॥*॥ 'अधातो'रिति वर्तते ॥ क्व प्रकृतम् ? ॥ 'उगिदचां सर्वनामस्थानेऽधातो'रिति ॥*॥ अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषः ॥*॥ अधात्वधिकारात्सिद्धमिति चेन्नपुंसके दोषो भवति । काष्ठतक्षि कूटतक्षि । 'नपुंसकस्य झलचः–अधातो'रिति, प्रतिषेधः प्राप्नोति ॥*॥ उक्तं वा ॥*॥ किमुक्तम् ?॥ "अननुबन्धकग्रहणे हि न सानुबन्धकस्ये"ति । अथ वा "संबन्धमनुवर्तिष्यते"[इति] ॥ [दिवऔत्]॥

इतोऽत्सर्वनामस्थाने ॥ ७।१।८५॥

॥*॥ इतोऽद्वचनमनर्थकमाकारप्रकरणात् ॥*॥ इतोऽद्वचनमनर्थकम् ॥

प्र.] झलच इति नुम् क्रियते इति वाक्यार्थः । भाष्यकारस्तु न्यायव्युत्पादनार्थं विकल्पार्थं वाशब्दं व्याख्याय दूषयित्वा समुच्चयार्थमेव व्याचष्टे । **वृत्तान्तादिति** । प्रसङ्गो वृत्तान्तः । चोद्यप्रसङ्गादित्यर्थः । अथ वा वृत्तोऽतिक्रान्तोऽयं प्रबन्धश्चोद्यसमाधानलक्षणः,तदन्ते व्यवस्थितं यच्चोद्यं,तदुपचाराद्वृत्तान्तशब्दवाच्यं,तस्मादित्यर्थः॥

दिव औत् । **दिव औत्व इति**। विशेषानुपादानाद्धातोरपि प्राप्नोति। **अक्षद्यूरिति**। ऊठि कृते एकदेशविकृतस्याऽनन्यत्वादौत्त्वप्रसङ्गः। **अननुबन्धकग्रहण इति**। अव्युत्पन्नं दिविति प्रातिपदिकमननुबन्धकम्। व्युत्पत्तिपक्षेऽप्यवयवानां प्रत्ययादीनां सानुबन्धकत्वं न प्रातिपादिकस्य । **सम्बन्धमिति** । 'उगिदचा'मित्यनेन । 'दिव औ'दित्यत्र त्वधातोरिति वर्तते, 'उगिदचा'मिति निवृत्तम् ॥ [**दिव औत्**] ॥

इतोऽत्सर्वनामस्थाने। **इतोऽद्वचनमिति**। क्वचिदेकादेशविधानात्क्व चिद्दीर्घ-

---

उ.] 'श्रेयांसी'त्यादौ । **न्यायेति** । प्रकृतदोषपरिहारत्वाऽसंभवरूपेत्यर्थः । **तदन्ते इति** । प्रकृतचोद्यपरिहारे कृते 'बह्वनड्वांहीत्यत्र कथ'मिति यच्चोद्यं तस्माद्धेतोरयं परिहार इत्यर्थः । [**सावनडुहः**] ॥

दिव औत् । ननूठि दिव्रूपाऽभावोऽत आह—**ऊठीति** । **व्युत्पत्तीति** । दिवेर्डिविरिति भावः । दिव आचारक्विन्नास्त्येवेति न तत्र पक्षयोः फलभेदः ।

किं कारणम् ? ॥ 'आकारप्रकरणात्' । 'आ'दिति वर्तते । ॥*॥ षपूर्वार्थं तु ॥*॥ षपूर्वार्थं तर्ह्यद्वक्तव्यः । ऋभुक्षाणमिन्द्रम् । ऋभुक्षणमिन्द्रम् ॥

पुंसोऽसुङ् ॥ ७।१।८९ ॥

॥*॥ असुङ्व्युपदेशिवद्वचनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वात् ॥*॥ असुङ्व्युपदेशिवद्भावो वक्तव्यः । उपदेशावस्थायामेवासुङ्भवतीति वक्तव्यम् ॥ किं प्रयोजनम् ?॥ 'स्वरसिद्ध्यर्थम्' । उपदेशावस्थायामसुङि कृते इष्टः स्वरो यथा स्यात्—परमपुमानिति । अक्रियमाणे ह्युपदेशिवद्भावे समासान्तोदात्तत्वेऽसुङ् आन्तर्यतोऽस्वरकस्याऽस्वरकः स्यात् ॥ किं पुनः कारणं समासान्तोदात्तत्वं तावद्भवति न पुनरसुङ् । न परत्वादसुङा भवितव्यम् ? ॥ 'बहिरङ्गलक्षणत्वात्' । बहिरङ्गलक्षणोऽसुङ्, अन्तरङ्गः स्वरः । 'असिद्धं बहिरङ्गमन्तरङ्गे'॥ स तर्हि उपदेशिवद्भावो वक्तव्यः ? ॥ न वक्तव्यः । असुङ आद्युदात्तनिपातनं करिष्यते । स निपातनस्वरः समासस्वरस्य बाधको भविष्यति ॥ एवमप्युपदेशिवद्भावो वक्तव्यः, स यथैव हि निपातनस्वरः समासस्वरं बाधते

प्र.] विधानाच्च ह्रस्वस्य श्रवणेन न भाव्यमित्याकार एव प्रकृत इतो विधेय इत्यर्थः ।

षपूर्वार्थमिति । 'वा षपूर्वस्य निगमे' इति दीर्घविकल्पेन रूपद्वयसिद्धिः, आकारविधौ त्वेकमेव रूपं स्यात् । दीर्घविकल्पस्तु 'तक्षणं' 'तक्षाण'मित्याद्यर्थं स्यात् ।

पुंसोऽसुङ । असुङीति । 'पातेर्डुम्सु'न्नित्याद्युदात्तस्य पुंसः सकारस्याऽविद्यमानोदात्तत्वादनुदात्तस्य स्थानेऽसुङि क्रियमाणे आन्तरतम्यादनुदात्तं पदमेकवर्जमिति वचनाद्वाऽनुदात्त एव भवतीति 'पुमा'नित्यादौ दोषाऽभावः । 'परमपुमा'नित्यत्र त्वन्तरङ्गत्वात्समासाऽन्तोदात्तत्वे कृते सर्वनामस्थाने उत्पन्नेऽसुङ्क्रियमाणोऽनुदात्तः प्राप्नोति, उदात्तश्चेष्यते । ननु चोकारस्य कृतमपि समासान्तोदात्तत्वमसुङि कृतेऽनन्त्यत्वान्न व्यवतिष्ठते । नैतदस्ति । अन्तरङ्गे स्वरे कर्तव्ये बहिरङ्गस्याऽसुङोऽसिद्धत्वान्निर्वृत्तस्य चाऽनिवर्तनात् । उपदेशिवद्वचनात्तु पूर्वमसुङ्भवति, पश्चात्समासान्तोदात्तत्वम् । **अस्वरकः स्यादिति** । प्रवृत्तिकाले स्वरविशेषस्याऽनुपादानादनभिमतानुदात्तत्वप्रसङ्गाच्चाऽस्वरक इत्युच्यते, न त्वस्वरकस्याऽच उच्चारणं सम्भवति ।

उ.] **इतोत्स** । क्वचित्—पन्था इत्यादौ । क्वचित्—पन्थानावित्यादौ । [**इतोत्**] ।

पुंसोऽसु । समस्तोदाहरणदाने बीजमाह—**पातेरिति** । डुम्सुन उगित्त्वं 'बहुपुंसी'त्यादौ ङीबर्थं । सूतेः सस्य पोऽन्त्यस्य ह्रस्वो डुम्सुन्प्रत्यय इति 'स्त्रिया'मिति सूत्रे स्पष्टम् । भाष्ये—**दोषाऽभाव इति** । सर्वथाप्यनुदात्तस्यैवेष्टत्वादिति भावः । **अन्तरङ्गत्वादिति** । विभक्त्यनपेक्षत्वेनेति भावः । **अनन्त्यत्वादिति** । असुङस्त्वन्त्यत्वात्प्रवर्तयिष्यत इत्यर्थः । **अन्तरङ्गे इति** । अकृतव्यूहपरिभाषा तु नास्त्येवेति भावः । **अनभिमतेति** । एवञ्चाऽस्वरक इत्यस्याऽनभिमतस्वरक इत्यर्थ इति भावः । **अथवेति** ।

एवं प्रकृतिस्वरमपि बाधेत,–पुमान् । तस्मात्सुडुच्यते—'असुङ्युपदेशिवद्व-चनं स्वरसिद्ध्यर्थं बहिरङ्गलक्षणत्वा'दिति ॥ [पुंसोऽसुङ्] ॥

गोतो णित् ॥ ७।१।९० ॥

किमिदं गोतः परस्य सर्वनामस्थानस्य णित्त्वमुच्यते, आहो स्वित्सर्व-नामस्थाने परतो णित्कार्यमतिदिश्यते ?॥ कश्चात्र विशेषः ? ॥*॥ गोतः सर्व-नामस्थाने णित्कार्यातिदेशः ॥*॥ **गोतः सर्वनामस्थाने णित्कार्यमतिदिश्यते ।** ॥*॥सर्वनामस्थाने णिद्वचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशात् ॥*॥ **सर्वनामस्थानस्य णिद्वचने ह्यसंप्रत्ययः स्यात् ॥ किं कारणम् ? ॥ 'षष्ठ्यनिर्देशात्'।षष्ठीनिर्दि-ष्टस्यादेशा उच्यन्ते, न चात्र षष्ठीं पश्यामः ॥**

प्र.] अथ वोदात्तत्वाऽभावादस्वरक इत्युच्यते । **एवमपीति** । यस्मादुदात्तनिपातने दोषस्तस्मात्तत्परित्यागेनेत्यर्थः । **प्रकृतिस्वरमिति** । 'पुमा'नित्यादावाद्युदात्त-त्वमित्यर्थः। प्रकृतिस्वरस्य कोऽवकाश इति चेत्पर्यायः स्यात् ॥ [**पुंसोऽसुङ्**] ॥

गोतो णित् । गाङ्कुटादिसूत्रे यावन्तः पक्षा उक्तास्ते सर्वे इह संभवन्ति । तत्र णकारस्येतः सर्वनामस्थानेऽभावाद्भावे वा तदनुवादे प्रयोजनाऽभावाण्णित्त्व-व्यपदेशाऽभावः । संज्ञाकरणेऽपि ञ्णिद्ग्रहणे संज्ञिनोऽसंप्रत्ययः, शब्दभेदात्, भावनापक्षे णकार आदेशः प्राप्नोति । ण्वुलादि वा प्रसिद्धणित्त्वं प्राप्नोति । तद्वद-तिदेशस्तु निर्दोषत्वादिहाश्रीयते। भाष्ये तु भावनापक्ष एवाशङ्क्य निराकृतः, परस्तात् स्थापितश्च। **किमिदमिति**। ण् इद्यस्य तत् णित्, तस्य भावो णित्त्वम् । तेनायमर्थः–

उ.] अत्र पक्षे इष्टमुदात्तत्वं स्वरशब्देन विवक्षितमिति भावः । उभयं कर्त्तव्यमिति भाष्यार्थो न ग्राह्य इत्याह–**कस्मादिति** ।**प्रकृतिस्वरस्य**–नित्त्वप्रयुक्ताद्युदात्तत्वस्य । **पर्याय इति**। कदाचिदाद्युदात्तत्वं कदाचिदन्तोदात्तत्वमित्यर्थः । यत्तूपदेशिवद्वचनेन सर्वनामस्थान इति विषयसप्तमी व्याख्येयेति बोध्यते इति, तन्न ; एवमप्यन्तरङ्गत्वेन पूर्वस्वरस्य दुर्वारत्वात्। [पुंसोऽसुङ] ॥

गोतो णित् । यावन्त इति । ञित्त्वादिसंबन्धप्रतिपादनं, भावनं, संज्ञाकरण-मतिदेशश्चेति चत्वार इत्यर्थः । तत्राद्यः संभवन्नपि दोषसत्त्वान्नाश्रित इत्याह— **तत्र णकारस्येति** । अत्र पक्षे 'गोतः परं सर्वनामस्थानमित्संज्ञकणकारसंबन्धव'-दित्यर्थः । तत्राऽसतः संबन्धप्रतिपादनं न युक्तं । सत्त्वेऽपि दोष एवेत्याह— **भावे वेति** । तृतीयोऽपि नेत्याह–**संज्ञाकरणेऽपीति । शब्दभेदादिति** । 'णि'दिति हि संज्ञा, न तु 'ञ्णिदि'तीति भावः । कृत्रिमाऽकृत्रिमन्यायेनाऽणादीनां ग्रहणं न स्यादिति तु तत्त्वदूषणं । द्वितीये भाष्याभिसंहितं दोषमाह–**भावनेति** । अत्र पक्षे 'गोतः परस्य सर्वनामस्थानस्य णि'दित्यर्थः। तत्र कर्मधारयाश्रयणे आह—**णकार इति** । बहुव्रीहावाह–**ण्वुलादि चेति** । सूत्रे णिच्छब्देन णित्त्वयुक्तसर्वनामस्थानं

एवं तर्हि वतिनिर्देशोऽयं 'गोतो णिद्वद्भवतो' ति ॥ स तर्हि वतिनिर्देशः कर्तव्यो, न ह्यन्तरेण वतिमतिदेशो गम्यते ॥

अन्तरेणापि वतिमतिदेशो गम्यते । तद्यथा—एषे ब्रह्मदत्तः। अब्रह्मदत्तं ब्रह्मदत्त इत्याह ते मन्यामहे 'ब्रह्मदत्तवदयं भवती'ति। एवमिहाऽप्यणितं णिदित्याह । 'णिद्व' दिति गम्यते ॥ अथवा पुनरस्तु गोतः परस्य सर्वनामस्थानस्य णित्त्वम् ॥ ननु चोक्तं 'सर्वनामस्थाने णिद्वचने ह्यसंप्रत्ययः षष्ठ्यनिर्देशा'दिति ॥ नैष दोषः । 'गोत' इत्येषा पञ्चमी 'सर्वनामस्थान' इति सप्तम्याः षष्ठीं प्रकल्पयिष्यति—'तस्मादित्युत्तरस्ये'ति ॥

अथ तपरकरणं किमर्थम् ? ॥ इह मा भूत्—चित्रगुः शबलगुरिति ॥ **नैतदस्ति । ह्रस्वत्वे कृते न भविष्यति ॥ स्थानिवद्भावात्प्राप्नोति ॥**

अत उत्तरं पठति ॥*॥ तपरकरणमनर्थकं स्थानिवत्प्रतिषेधात् ॥*॥ **तपरकरणमनर्थकम् ॥ किं कारणम् ? ॥ 'स्थानिवत्प्रतिषेधात्'** । प्रतिषिध्यतेऽत्र **स्थानिवद्भावो—'गोः पूर्वणित्वात्त्वस्वरेषु स्थानिद्भावो न भवती'ति । स चावश्यं प्रतिषेधः आश्रयितव्यः** ॥*॥ इतरथा हि संबुद्धिजसोः प्रतिषेधः ॥*॥ **यो हि मन्यते तपरकरणसामर्थ्यादत्र न भविष्यतीति संबुद्धिजसोस्तेन प्रतिषेधो वक्तव्यः स्यात्,—हे चित्रगो (हे) चित्रगव इति ॥**

अथेदानीं सत्यपि स्थानिवद्भावप्रतिषेधे गुणे कृते कस्मादेवात्र

प्र.] 'अणितः सर्वनामस्थानस्य स्थाने णित्सर्वनामस्थानमादेशो भवति', ण्वुलादयस्तु तदर्थाभिधानेऽसमर्थत्वान्न भवन्ति। एतन्न्यायाश्रयेण गाङ्कुटादिसूत्रेऽपि भावनापक्षे तु न कश्चिद्दोषः । **गोतइत्येषेति** । भावनापक्षे 'गोत' इति पञ्चमी । तद्वदतिदेशपक्षे तु षष्ठी । **तपरकरणमिति** । स्थानिवत्त्वनिषेधादानर्थक्यमिति प्रश्नः । **चित्रगुरिति**। 'तपरस्तत्कालस्ये' त्यत्राऽणिति नानुवर्तते इत्यनणोऽपि तत्कालस्य ग्रहणम् ।

इतरथा हीति । यदि स्थानिवत्त्वनिषेधो नाश्रीयते तदा सत्यपि तपरकरणे

उ.] लक्ष्यत इत्याशयेनाह—**तेनायमिति**। **णित्सर्वनामस्थानमिति**। अर्थत आन्तर्यादिति भावः । भाष्येऽपि—'णित्त्व'मित्यस्येत्संज्ञकणकारसंबन्ध इत्यर्थः ।

भाष्ये—अन्त्ये विशेषमाह—**गोत इति** । कार्यातिदेश इत्येतावद्वक्तव्यमत्र पक्षे इत्यर्थः। आद्ये विशेषमाह—**सर्वनामस्थाने णिद्वचने हीति**। तथाच सर्वनामस्थानस्येति वक्तव्यमित्यर्थः । **तद्वदतिदेशपक्षे त्विति** । 'गोशब्दस्य सर्वनामस्थाने णितीव कार्यं भवती'त्यर्थादिति भावः । ननु 'चित्रगु'रित्यत्र ह्रस्वत्वेऽङ्गाधिकारे तदन्तविधिसत्त्वेन स्थानिवत्त्वाद्गोशब्दान्तत्वेन प्राप्तणिद्वत्त्वस्य निवृत्तये तपरत्वमावश्यकमत आह——**स्थानिवत्त्वेति** । 'गोः पूर्वणित्त्वात्त्वे'त्यादिनेति भावः । ननु गोशब्दस्या-

न भवति ? ॥ 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवे'ति ॥ ननु चेदानीमसत्यपि स्थानिवद्भावप्रतिषेधे एतया परिभाषया शक्यमुपस्थातुम् ? ॥ 'ने'त्याह । न हीदानीं क्व चिदपि स्थानिवत्स्यात् ॥ [गोतो णित्] ॥

तृज्वत्क्रोष्टुः ॥ ७।१।९५ ॥ स्त्रियां च ॥ ७।१।९६ ॥

अथात्र विभक्तावित्यनुवर्तते उताहो न ? ॥ किं चातः ? ॥ ॥*॥ तृज्वत्स्त्रियां विभक्तौ चेत्क्रोष्ट्रीभक्तिर्न सिध्यति ॥*॥ **तृज्वत्स्त्रियां विभक्तौ चेत्क्रोष्ट्रीभक्तिरिति न सिध्यति ॥एवं तर्हि ईकार एव तृज्वद्भावं वक्ष्यामि॥ तदीकार-**

प्र.] संबुद्धौ जसि च गुणे कृते स्थानिवत्त्वात्तत्कालत्वाच्च णित्त्वं स्यादित्यर्थः। प्रतिषिद्धे तु स्थानिवत्त्वे गुणे कृते गोरूपस्य लाक्षणिकत्वाण्णित्त्वाऽप्रसङ्गः। अव्युत्पत्तिपक्षाश्रयेणैतदुच्यते। व्युत्पत्तिपक्षे तु सर्व्व एव लाक्षणिकः। **न हीदानीमिति।** स्वाश्रया या प्राप्तिः सा लक्षणप्रतिपदोक्तपरिभाषावशान्मा भूत्, स्थानिवत्त्वनिमित्ता तु स्यादेव प्राप्तिः। न हि सा पूर्वोक्तया परिभाषया निवार्यते, स्थानिवत्त्वस्य निर्विषयत्वप्रसङ्गात्। [**गोतो णित्**] ॥

तृज्वत्क्रोष्टुः। अथात्र विभक्ताविति। 'तृज्वत्क्रोष्टु'रित्यत्र सर्व्वनामस्थानाधिकाराद्विभक्त्यधिकारस्य न दोषो न प्रयोजनम्। 'विभाषा तृतीयादिष्वची'त्यत्राप्यादिशब्दस्य व्यवस्थावाचित्वाद्विभक्तय एव गृह्यन्त इति तत्रापि न विचार इति 'स्त्रियां चे'त्यत्रैवायं विचारः क्रियते। इष्टतोऽधिकाराणां प्रवृत्तिनिवृत्तिभावात्। **क्रोष्ट्रीभक्तिरिति।** क्रोष्ट्री भक्तिरस्येति बहुव्रीहिः। भक्तिशब्दस्य प्रियादिषु पाठात्पुंवद्भावाऽभावः। अत्रान्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इति लुकि कृते विभक्त्यभावान्न लुमताङ्गस्येति प्रत्ययलक्षणप्रतिषेधाच्च तृज्वद्भावो न प्राप्नोति, तदभावादृकारान्तत्वनिमित्तो ङीबपि न प्राप्नोति। **एवं तर्हीति।**

उ.] नण्वात्कथं तत्कालग्रहणमत आह—**पर इति। व्युत्पत्तीति।** तत्पक्षेऽपि तदपेक्षयाऽस्य विलम्बोपस्थितिकत्वाच्चिन्त्यमिदम्। [**गोतो णित्**] ॥

तृज्वत्क्रोष्टुः। भाष्ये सूत्रद्वयोपादानात्सूत्रद्वयविषयोऽयं विचार इति भ्रमं निवर्त्तयति—**तृज्वदिति। विभक्त्यधिकारस्येति।** 'इकोऽची'त्यतः। **न प्रयोजनमिति।** सर्वनामस्थानस्य विभक्तित्वाऽव्यभिचारादिति भावः। **तत्राऽपीति।** अत एव तदत्र नोपात्तं। यद्यपि बहुयोगव्यवच्छिन्नत्वादननुवृत्तिरेवोचिता, तथापि कृत्वा चिन्तयाऽयं विचार इत्याह—**इष्टत इति। बहुव्रीहिरिति।** क्रोष्ट्री सेव्याऽस्येत्यर्थः। **प्रियादिष्विति।** 'जातेश्चे'त्यस्याऽप्युपलक्षणमिदं, पूर्वनिपातप्रकरणाऽनित्यत्वादाहिताग्न्यादित्वाद्वा, राजदन्तादित्वाद्वा भक्तिशब्दस्य पूर्वनिपातः। केचित्तु "क्रोष्टुशब्दस्य तस्येयमिति पुंयोगात्स्त्रियां वृत्तिः। एतेन भक्तिशब्दस्य पूर्वनिपातापत्तिः। किञ्च जातिवाचकत्वाज्जातेश्चेत्येव निषेधः सिद्ध इत्यपास्त"मिति. तन्न,

ग्रहणं कर्तव्यं ? ॥ न कर्तव्यम् । क्रियते न्यास एव । प्रश्लिष्टनिर्देशोऽयं–स्त्री ई–स्त्री, 'स्त्रिया'मिति । ॥*॥ ईकारे तन्निमित्तः सः ॥*॥ **ईकारे चेत् । तन्न ॥ किं कारणम् ? ॥ 'तन्निमित्तः सः' । तृज्वद्भावनिमित्तः स ईकारः, नाऽकृते तृज्वद्भावे ईकारः प्राप्नोति ॥ किं कारणम् ? ॥ 'ऋन्नेभ्यो ङी'बित्युच्यते । ईकारे च तृज्वद्भावस्तदिदमितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते ॥ एवं तर्हि गौरादिषु पाठादीकारो भविष्यति ।** ॥*॥ गौरादिषु न पठ्यते ॥*॥ **नहि किं चित्तुन्नन्तं गौरादिषु पठ्यते ! ॥ एवं तर्हि एतज्ज्ञापयत्याचार्यो—'भवत्यत्र ईकार' इति यदयमीकारे तृज्वद्भावं शास्ति ॥** ॥*॥तेनैव भावनं चेत्स्यादनिष्टोपि प्रसज्यते ॥*॥ **यद्यपि नास्ति विशेषो ङीपो**

प्र.] विभक्तिर्निमित्तत्वेन नाश्रीयते किं तर्हि ईकारः । **स्त्री ई स्त्रीति** । स्त्रिया ई । स्त्रीत्वस्य द्योतक ईकार इत्यर्थः । षष्ठीसमासः । अर्थगतं च स्त्रीत्वमीकारे आरोप्य नदीसंज्ञानिमित्तावामाटौ क्रियेते । **गौरादिपाठादिति** । 'पृथिवी, क्रोष्टु, पिप्पल्यादयश्चे'ति च्छेदाध्यायिनः पठन्ति । **न हि किं चिदिति** । संहिताध्यायिनो न पठन्ति । सर्वात्मनाऽपाठं प्रतिपादयितुमेतदुच्यते। **ङीपो ङीषो वेति**। 'उदात्तयणो हल्पूर्वा'दिति ङीप उदात्तत्वविधानात् । **ङीनपीति** । ततश्चाद्युदात्तत्वप्रसङ्गः । ननु ईकारे तृज्वद्भावविधानात्सति शिष्टश्चित्स्वरो नित्स्वरं बाधिष्यते, ततश्चोदात्तयणो हल्पूर्वादित्युदात्तविधानान्नास्ति विशेषः । नैतदस्ति । क्रोष्टुशब्द आद्युदात्त एव । तत्र ङीनि कृते प्रयोजनाऽभावादकृते तृज्वद्भावे नित्स्वरो न प्रवर्तेत इति पूर्वं तृज्वद्भावः, परत्वाद्वा, तत्र कृते नित्स्वरः सतिशिष्टश्चित्स्वरं बाधेत । यदि तु ज्ञापकेन पिप्पल्याद्यन्तर्भावः क्रोष्टुशब्दस्यानुमीयते तदा न

उ.] दाम्पत्यरूपपुंयोग एव तत्प्रवृत्तेः। त्वदुक्तपुंयोगे 'तस्येद'मित्यणापत्तेस्तत्रैव भाष्ये उक्तत्वाच । 'ईकार एवे'त्येवकारार्थं दर्शयति–**न विभक्तिरिति** । स्त्रीशब्देन 'स्त्रीत्व'मुच्यते । द्योतकत्वं संबन्धः षष्ठ्यर्थ इत्याह–**स्त्रीत्वस्येति** । ननु स्त्र्याख्यत्वाऽभावान्नदीत्वाऽभावे कथमामाटावत आह—**अर्थगतञ्चेति** । स्त्रीत्वरूपार्थगतमित्यर्थः । तस्याऽपि स्त्रीशब्देनाऽभिधाने स्त्रीत्वात् । आचार्याणां मतभेदेन क्रोष्टुशब्दपाठाऽपाठावुक्तावित्याह–**छेदाध्यायिन इति** । 'सर्वात्मना–अपाठ'मिति च्छेदः । गौरादिषु पठ्यते ईदृशन्तुन्नन्तं न किंचिदिति भाष्याक्षरार्थ इति भावः। सर्वथा पाठोऽप्रामाणिक इति तात्पर्यम् । ननु ङीम्ङीषोरनुदात्तत्वोदात्तत्वकृतो विशेषोऽस्तीत्यत आह–**उदात्तयण इति**।**आद्युदात्त एवेति**। तुन्नन्तत्वादिति भावः । उक्तयुक्ते'र्नहि-प्रयोजनाऽनुवर्त्ति प्रमाण'मिति न्यायविरुद्धत्वादाह–**परत्वादिति** । तृज्वत्त्वनित्स्वरयोर्युगपत्प्राप्तावाद्युदात्तत्वान्तोदात्तत्वयोर्यौगपद्याऽसंभवेन परत्वात्तृज्वद्भावः । **सतिशिष्ट इति** । तृज्वदतिदेशेन स्वरविशिष्टस्यैव रूपस्यातिदेशान्नित्स्वरः पश्चात्प्रवर्त-

वा ङीषो वा, ङीनपि तु प्राप्नोति। इह च न प्राप्नोति–पञ्चभिः क्रोष्ट्रीभिः क्रीतै रथैः–पञ्चक्रोष्टृभी रथैरिति ॥ एवं तर्हि —

॥*॥ नचाऽपरं निमित्तं संज्ञा च प्रत्ययलक्षणेन ॥*॥ **न चापरं निमित्तमाश्रीयते, 'अस्मिन्परतः क्रोष्टुस्तृज्वद्भवती'ति ॥ [किं तर्हि ?] ॥ अङ्गस्य क्रोष्टुस्तृज्वद्भवत्यङ्गसंज्ञा च भवति प्रत्ययलक्षणेन ॥**

प्र.] कश्चिद्दोषः। अपूर्व्वस्य त्वीकारस्यानुमानमाश्रित्य श्लोकवार्तिककारेण दोष उपात्तः। शार्ङ्गरवाद्यन्तर्भावानुमानमपि स्यादिति तदाशयः ॥

पञ्चभिरिति। 'तद्धितार्थे'ति समासः। 'आर्हा'ति ठक उत्पन्नस्याध्यर्द्धपूर्वेति लुक्। 'लुक्तद्धितलुकी'ति स्त्रीप्रत्ययस्य लुकि कृते 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणप्रतिषेधादीकारनिमित्तस्तृज्वद्भावो न प्राप्नोति, अन्तरङ्गाणां च विधीनां लुका बाधनात्पूर्व्वमेव तृज्वद्भावो न लभ्यते, तत्राद्येन सर्वनामस्थाने तृज्वद्भावोऽन्त्येन त्वजादिषु तृतीयादिषु विकल्पेनेति हलादौ मध्यमेनाऽप्राप्तिरुच्यते। **पञ्चक्रोष्टृभिरिति**। केचिदाहुः–'भस्याऽढे' इति, 'ठक्छसोश्चे'ति वा प्राप्तः पुंवद्भावो 'जातेश्चे'ति प्रतिषिध्यते। तदयुक्तम्। भत्वाऽभावाच्छस्सहचरितस्य ठको ग्रहणात्प्राप्तिरेव पुंवद्भावस्य नास्ति। 'जातेश्चे'ति प्रतिषेध औपसङ्ख्यानिकस्य पुंवद्भावस्य नास्त्येव। यथा हस्तिनीनां समूहो हास्तिकमिति। **अङ्गसंज्ञा चेति**। लब्धाङ्गसंज्ञकस्य यत्कार्यं प्रत्ययलक्षणं तन्न लुमताङ्गस्येत्यनेन निषिध्यते। न चाऽङ्गसंज्ञा अङ्गस्य कार्यमिति प्रत्ययलक्षणेन भवत्येव। तत्र स्त्रियां वर्तमानस्य क्रोष्टुशब्दस्य लब्धाङ्गसंज्ञकस्य तृज्वद्भावे सति ङीप्प्रत्ययः कार्यः, कार्यकालत्वे तु संज्ञापरिभाषस्याङ्ग आश्रिते प्रत्ययोऽप्याश्रितो भवति, यथा 'वव्रश्चे'ति, तदाऽङ्गस्येत्येतदत्र नापे-

---

उ.] मानः सतिशिष्ट इति भावः। वस्तुतोऽस्त्येव दोष इत्याह–**शार्ङ्गरवाद्यन्तरिति**।

भाष्ये दोषान्तरमाह–**पञ्चभिरिति**। **बाधनादिति**। 'अन्तरङ्गानपी'ति परिभाषणादिति भावः। नन्वत्र पुंवद्भावेन सिद्धान्तेऽपि तृज्वद्भावो दुर्लभोऽत आह—**केचिदित्यादि**। आद्याऽप्राप्तौ हेतुः–**भत्वाभावादिति**। लुकि प्रत्ययलक्षणाभावेन इकादेशात्पूर्वमेव ठको लुका च तत्त्वाऽभाव इति भावः। अन्त्याऽप्राप्तौ हेत्वन्तरमप्याह— **छस्सहचरितस्येति**। एवन्तदुक्ताम्पुंवद्भावप्राप्तिं दूषयित्वा तदुक्तसमाधानाऽसङ्गतिमप्याह–**जातेश्चेतीति**। **यथेति**। 'यस्येति'लोपे तु तस्य स्थानिवत्त्वान्नस्तद्धित इति टिलोपाऽनापत्तिरिति भावः। भाष्ये–**नचाऽपरमिति**। 'विभक्ता'वित्यस्य विच्छिन्नत्वाल्लक्ष्यानुरोधाच्च 'सर्वनामस्थान' इत्यस्य नाऽनुवृत्तिरितिभावः। **प्रत्ययलक्षणं**–प्रत्ययनिमित्तं। नन्वीकारे परतो विधानान्न चाऽपरमित्यनुपपन्नमत आह–**तत्र स्त्रियां वर्तमानस्येति**। प्रश्लेषो नाश्रीयत इति भावः। इदञ्च यथोद्देशपक्षाश्रयणेनेत्याह— **कार्यकालत्वे त्विति**। अत्राऽपि गतिमाह–**तदाङ्गस्येति**। अपेक्षालक्षणत्वादधि-

किं पुनरयं शास्त्रातिदेशः–'तृचो यच्छास्त्रं तददतिदिश्यते', आहो स्विद्रूपातिदेशः, 'तृचो यद्रूपं तदतिदिश्यते' इति? ॥ कश्चात्र विशेषः ? ॥

॥*॥ तृज्वदिति शास्त्राऽतिदेशश्चेद्यथा चिणि तद्वत् ॥*॥ **'तृज्व'दिति शास्त्रातिदेशश्चेद्यथा चिणि तद्वत्प्राप्नोति ॥ कथं च चिणि ? ॥ उक्तम्–'अङ्गस्येति तु प्रकरणादाङ्गशास्त्रातिदेशात्सिद्ध'मिति । आङ्गं यत्कार्यं तदतिदिश्यते ॥ एवमिहाप्यनङ्गुणदीर्घत्वान्यतिदिष्टानि रपरत्वमनतिदिष्टम् ॥ तत्र को दोषः ?॥**

॥*॥ तत्र रपरवचनम् ॥*॥ **तत्र रपरत्वं न सिध्यति, तद्वक्तव्यम् ॥ नैष-दोषः । गुणेऽतिदिष्टे रपरत्वमप्यतिदिष्टं भवति ॥ कथम् ? ॥ 'कार्यकालं संज्ञापरिभाषं' यत्र कार्यं तत्र द्रष्टव्यम्, 'ऋतो ङिसर्वनामस्थानयोर्गुणो भवति' उपस्थितमिदं भवति–'उरण्रपर' इति ॥ एवं तर्हि अयमन्यो दोषो जायते– आहत्य तृचो यच्छास्त्रं तदतिदिश्येताऽनाहत्य वेति ? ॥ किं चातः ? ॥**

प्र.] क्ष्यम् । **किं पुनरिति** । शास्त्रस्य शास्त्रं प्रत्यासन्नमिति प्रत्यासत्त्या शास्त्रातिदेशः प्राप्नोति । प्राधान्यात्तु रूपातिदेशप्रसङ्गः, रूपार्थत्वाच्छास्त्रप्रवृत्तेः । कार्यातिदेशस्तु शास्त्रातिदेशादभिन्नत्वात् पृथङ्नोपन्यस्तः । 'तृज्व'दित्यादौ रूपेऽतिदिश्यमाने सूत्रसन्निवेशस्यानपेक्षणात् प्रकरणकृतव्यवस्थाऽभावः । शास्त्रातिदेशे तु प्रत्यासत्त्या-ऽङ्गप्रकरणसन्निकृष्टस्यैव शास्त्रस्यातिदेशः स्यान्न विप्रकृष्टस्य, यथा चिण्वद्भावेन वृद्ध्यादीन्येव भवन्ति न हन्–इण्–इङादेशाः ।

रपरत्वमिति । यथोद्देशपक्षे प्रकरणान्तरे संनिवेशादिति भावः । **कार्यकाल-मिति** । प्रधानदेशत्वाद्गुणानामङ्गाधिकार एव रपरँपरिभाषायाः सन्निधान-मित्यर्थः । **आहत्येति** । उच्चार्य । उद्घोष्येत्यर्थः । शास्त्रशब्दे या शासनक्रिया

उ.] कारस्येत्यर्थः । वस्तुतस्तु कार्यकालपक्षेऽपि 'क्रोष्टुशब्दः प्रत्ययेऽङ्गसंज्ञो भवति, अङ्गसंज्ञकस्य च तृज्वाद्भव' इत्यर्थात्तृज्वत्त्वमनैमित्तिकमेव । 'उर'दित्यादौ तु अङ्ग-संज्ञाद्वारा परनिमित्तत्वमादाय स्थानिवत्त्वप्रवृत्तिः। 'न लुमते'त्यस्य चाऽनित्यत्वादङ्ग-संज्ञाविषयेऽप्राप्तिः। अतएव 'न लुमता तस्मि'न्निति न्यासे न दोष इति भाष्याशयः। अत एव 'गुणो यङ्लुको'रित्यादीनामङ्गाधिकारे पाठः सङ्गच्छते। **कार्यातिदेशस्त्विति**। शास्त्रातिदेशस्य कार्यफलकत्वादिति भावः । रूपातिदेशे तु नाऽयं दोष इत्याह–**रूपे इति** । शास्त्रातिदेशे कार्यातिदेशे च शास्त्रकार्ययोरष्टाध्यायीस्थत्वात्सूत्रसन्निवेशरूप-तदपेक्षणेन प्रत्यासत्तिन्यायावसर इति भावः । **प्रधानदेशत्वादिति** । 'उरण्रपर' इति परिभाषा कार्यकालपक्ष एव च युज्यत इति भावः । तत्तद्विध्येकवाक्यता-ऽऽपन्ने आङ्गत्वबुद्धिरप्यस्तीति तात्पर्यम् । नन्वमूर्तशब्दरूपशास्त्रस्याऽऽहननमयुक्त-मत आह—**उच्चार्येति**। तृच्छब्दमुच्चार्येति भावः । ननूत्तरकालक्रियाया अश्रवणात्

यद्याहत्य,—दीर्घत्वमतिदिष्टम्, अनङ्गुणरपरत्वान्यनतिदिष्टानि ॥ अथानाहत्य, अनङ्गुणरपरत्वान्यतिदिष्टानि, दीर्घत्वमनतिदिष्टम् ॥ अस्त्वाहत्य ॥ ननु चोक्तं "दीर्घत्वमतिदिष्टमनङ्गुणरपरत्वान्यनतिदिष्टानी"ति । नैष दोषः—दीर्घत्वेऽतिदिष्टेऽनङ्गुणरपरत्वान्यप्यतिदिष्टानि भवन्ति ॥ कथम् ? ॥ 'उपधाया' इति वर्तते, न चाऽकृतेष्वेतेषु दीर्घत्वभाविन्युपधा भवति ॥ कुतो नु खल्वेतदेतेषु विधिषु कृतेषु या उपधा तस्या उपधायाः दीर्घत्वं भविष्यति न पुनः क्रोष्टोर्योऽन्तरतमो गुणस्तस्मिन्कृतेऽवादेशे च योपधा तस्या दीर्घत्वं भविष्यति ? ॥ नैकमुदाहरणं योगारम्भं प्रयोजयतीति । तत्र तृज्वद्वचनसामर्थ्यादेतेषु

प्र.] शास्त्रकरणिका तदपेक्षपौर्वकाल्याश्रयः क्त्वाप्रत्ययः। तत्र यदि तृच्छब्दवच्छास्त्रमतिदिश्यते तदाहत्य यच्छास्त्रमिति पक्षः। अथ तु ऋकार एव तृच्छब्दे विवक्ष्यते, चकारःस्वरार्थस्तकारस्त्वप्रसिद्धाशङ्कानिवृत्त्यर्थः। 'ऋज्व'दित्युच्यमानेऽप्रसिद्धातिदेशः संभाव्येत, ऋच्छब्दनिबन्धनसमासान्तशास्त्रातिदेशविषयः सन्देहो वा स्यात् । तस्मादृकारमात्रप्रतिबद्धशास्त्रातिदेशेनाहत्येत्येष पक्ष उद्भवति । **अनङ्गुणरपरत्वानीति** । 'ऋदुशनस्पुरुदंसोऽनेहसांचे' त्यनङ् । 'ऋतो ङिसर्वनामस्थानयो' रिति गुणः। 'उर'ण्णिति रपरत्वम् । **दीर्घत्वमनतिदिष्टमिति** । नहि तद्वत इत्युच्यते, किं तर्हि 'अप्तृन्तृ'जिति तृच्छब्दोच्चारणेन । न चाऽवयवसमुदाययोर्युगपद्विवक्षा यतस्तृच्प्रतिबद्धमृकारप्रतिबद्धं च शास्त्रमतिदिश्येत । **न चाकृतेष्विति** । अचो दीर्घेण भाव्यम्, न च क्रोष्टुशब्दस्योकारान्तस्याऽजुपधा संभवति । तत्र 'क्रोष्टे'-त्यत्राऽनङि कृतेऽजुपधा भवति, 'क्रोष्टारौ' इत्यादौ तु गुणरपरत्वयोः कृतयोः ।

न पुनरिति । क्रोष्टुशब्दस्य 'जसिचे'त्युकारस्य गुणोऽस्त्येव,तस्याऽवादेशे कृतेऽकारस्य दीर्घः स्यात् । ततश्च 'क्रोष्टाव' इति स्यात् । **नैकमिति** । अन्यथा दीर्घ-

---

उ.] क्त्वानुपपत्तिरत आह—**शास्त्रशब्द इति**। शास्यतेऽनेनेति शास्त्रमिति व्युत्पादनादिति भावः । शासनमत्र—विधानं । भाष्ये 'तृच' इति शेषे षष्ठी बोध्या । **अप्रसिद्धाशङ्केति** । अप्रसिद्धत्वाशङ्केत्यर्थः । **ऋज्वदिति** । कुत्वन्तु सौत्रत्वान्न ।

अप्रसिद्धातिदेश इति। अप्रसिद्धप्रतियोगिकातिदेशसंभावनया किमत्रातिदिश्यत इत्यप्रतिपत्तिः स्यादित्यर्थः । **समासान्तशास्त्रेति** । 'ऋक्पूरब्धू'रितीत्यर्थः । **सन्देह इति** । तद्वा, ऋकारमात्रप्रतिबद्धं शास्त्रं वेति सन्देहः स्यादित्यर्थः ।

ननु 'तृज्व'दिति समुदायनिबन्धनशास्त्रस्याप्यतिदेशोऽस्त्वत आह—**नचेति** । वाक्यभेदप्रसङ्गादिति भावः । **नन्वेकोदाहरणफलकमपि** 'मुद्राद'णित्यादि शास्त्रं दृश्यतेऽत आह—**अन्यथेति** । यदि 'क्रोष्टाव' इत्येव फलं स्यात्तर्हि 'अप्तृ'न्नित्यत्रैव क्रोष्टुग्रहणं कुर्यात् । अतोऽतिदेशसामर्थ्यात्कृतेष्वनङादिषु या उपधा तस्या दीर्घत्व-

विधिषु कृतेषु योपधा तस्या दीर्घत्वं भविष्यति ॥ अथ वा किं न एतेन— 'आहत्याऽनाहत्य वे'ति । आहत्याऽनाहत्य च तृचो यच्छास्त्रं तददतिदिश्यते ॥

अथ वा पुनरस्तु रूपातिदेशः ॥ अथैतस्मिन्रूपातिदेशे सति किं प्रागा-

---

प्र.] विधावेव क्रोष्टुशब्दं निर्दिशेत् । ननु दीर्घविधौ क्रोष्टुशब्दे उपादीयमाने 'स्त्रियां च' 'विभाषा तृतीयादिष्वची'त्येवमर्थं 'तृज्वत्क्रोष्टु'रिति वक्तव्यमिति गौरवं स्यात् । **नैष** दोषः । 'अचि र ऋत' इति रादेशे प्रकृते 'क्रोष्टोः स्त्रियां च' 'विभाषा तृतीयादिष्वची'त्येवं रादेशविधानाद्गौरवाऽभावात् । ननु रादेशे 'क्रोष्टुः' 'क्रोष्टरी'ति न सिध्यति, नाप्युदात्तयणो हल्पूर्वादिति स्वरः । एवं तर्हि द्विःक्रोष्टुग्रहणं योगविभागाल्लघु । तदुक्तम्—'अक्षराधिक्यादपि योगविभागो गरीया'निति । तदेवं तृज्वद्भावविधानसामर्थ्याद्यादृशी तृच उपधा यादृशान्यनिमित्ता तादृश्या एव तादृशान्यनिमित्तायाः क्रोष्टुशब्दस्योपधाया दीर्घो भवतीत्यनङ्गुणरपरत्वेषु कृतेषु दीर्घो भवति ।

अस्मिन् परिहारे पूर्वोक्तगौरवप्रसङ्गादसमाश्वसन्परिहारान्तरमाह—**अथ वेति** । 'तृज्व'दिति समुदाय एवाश्रीयते, तत्र व्याप्तिन्यायाश्रयाद्यत्किञ्चित्तृचो दृष्टं शास्त्रं तत्सर्व्वमतिदिश्यते । एवं भूयो लक्ष्यं लक्षणं चानुगृहीतं भवति । नन्वङ्गप्रकरणोपात्त एव शास्त्रेऽतिदिश्यमाने 'क्रोष्ट्री'ति यणादेशशास्त्रस्याऽनाङ्गत्वादतिदेशो न स्यात् । एवं तर्हि स्त्रियामाङ्गशास्त्रातिदेशाऽसंभवादनाङ्गस्याऽप्यतिदेशः । 'विभाषातृतीयादिष्वची'त्यत्र तर्हि 'क्रोष्टरी' त्यत्र गुणविधावतिदेशस्य चरितार्थत्वात् 'क्रोष्ट्रा' 'क्रोष्ट्रो'रिति यणादेशाऽप्रसङ्गः, 'क्रोष्टु'रित्यत्र 'ऋत उ'दिति शास्त्रं न प्रवर्तेत । तत्रापि तृतीयादिग्रहणसामर्थ्यादनाङ्गस्याप्यतिदेशोऽन्यथा विभाषा ङावित्येव ब्रूयात् । स्यादेतत् । अभावातिदेशार्थं तृतीयादिग्रहणं स्यात् । ततश्च विलक्षणौ गुणनाभावौ न स्यातां—'क्रोष्टवे क्रोष्टुने'ति । तत्र वक्त्रधीने वाक्यशेषे भावातिदेशस्यैवाश्रयणात् । एवं तर्हि 'क्रोष्ट्री'ति स्त्रियामीकारो न प्राप्नोति । अनाङ्गमपि इकारशास्त्रमतिदेशसामर्थ्यादतिदेक्ष्यत इति एषोऽप्यदोषः । अथ वोत्तरयोर्योगयोरारम्भसामर्थ्याद्रूपातिदेश एव आश्रीयते, पूर्वसूत्रे तु पक्षभेदविचारः । **अथ वेति** । सूत्रत्रये

उ.] मिति भावः । **मिति गौरवमिति** । तत्र तु सामर्थ्याद्रूपातिदेश एवेति भावः ।

नापीति । क्रोष्ट्रेत्यादौ । क्रोष्टुशब्दस्य तुन्नन्तत्वेनाद्युदात्तत्वात्, तृज्वत्त्वे तु चित्त्वादन्तोदात्तत्वेन स्वरसिद्धिरिति भावः । **गौरवप्रसङ्गादिति** । योगविभागादक्षराधिक्यं गुर्वेवेति भावः । कथं पुनरेकेन वाक्येन पक्षद्वयलाभोऽत आह—**समुदाय एवेति** । **भूय इति** । अनङ्गुणयणादिसंबन्धि भूयो लक्षणं, तद्विषयं भूयो लक्ष्यञ्चेत्यर्थः । **आङ्गशास्त्रातिदेशादिति** । नच पञ्चभिः कर्त्रीभिः क्रीतो रथः पञ्चकर्त्ता रथः, हे पञ्चकर्तः, पञ्चकर्तरीति स्त्रीलिङ्गदृष्टस्य ङिसंबुद्ध्योर्गुणस्याऽतिदेशेन तच्चरितार्थं, 'स्त्रिया'मित्युक्त्या प्रत्यासत्तिन्यायेन स्त्रीत्वनिमित्तकस्य तन्निमित्तनिमित्तकस्य वाऽतिदेशेन तादृशस्याऽङ्गस्याऽसंभवादिति भावः । **न स्यातामिति** । तृजन्ते तयो-

देशेभ्यो यद्रूपं तदतिश्यते, आहो स्वित्कृतेष्वादेशेषु ? ॥ किं चातः ? ॥ यदि प्रागादेशेभ्यो यद्रूपं तदतिदिश्यते, ऋकार एकोऽतिदिष्टोऽनङ्गुणरपरत्वदीर्घत्वान्यनतिदिष्टानि । अथ कृतेष्वादेशेषु,–ऋकारोऽनतिदिष्टोऽनङ्गुणरपरत्वदीर्घत्वान्यतिदिष्टानि । ॥*॥ उभयथा च स्वरोऽनतिदिष्टो न हि स्वरो रूपवान् ॥*॥

प्र.] एकाकारप्रवृत्तिर्भवति, सर्वरूपसङ्ग्रहश्चेति भावः । **प्रागादेशेभ्य इति** । 'क्रोष्टृ'-इत्येतदृकारान्तम् । **कृतेष्विति** । 'क्रोष्टारा'विति रेफाद्यन्तम् । तत्र प्रागादेशेभ्यो यद्रूपं तत्प्रत्यक्षं, 'तृज्व'दित्युच्चारणात् । व्यापकं, लघु च, तस्मिन्नतिदिष्टे तन्निमित्तानामनङादीनां सर्वेषां स्वशास्त्रेण प्रवर्त्तनात् । कृतेषु चादेशेषु यद्रूपं लौकिकं तत्प्रधानं, तदर्थत्वादितरस्य । प्रक्रियालाघवं च भवतीति पक्षद्वयसंभवः । **ऋकार एक इति** । तदतिदेशसामर्थ्याच्च कार्यान्तराणामप्रसङ्गः स्यादिति मन्यते । **ऋकारोऽनतिदिष्ट इति** । किं पुनर्ऋकारातिदेशप्रयोजनं, प्रयोगसमवायिरूपातिदेशेन गतत्वात् ; अत्र केचिदाहुः—यत्र ऋकारस्य विकाराऽभावः 'पञ्चक्रोष्टृभी रथै'रिति तत्र ऋकारोऽनतिदिष्टः स्यादिति । तदयुक्तम् । न हीदं वचनं कृतेष्वादेशेष्विति, लौकिकप्रयोगरूपोपलक्षणं त्वेतत् । यथा च क्व चित्कृतेष्वादेशेषु लौकिकं रूपं तथा क्व चिदकृतेष्विति नास्ति विशेषः । अत्रोच्यते–यदि ऋकारमनतिदिश्य कृतेष्वादेशेषु यद्रूपं तदतिदिश्यते तदा 'क्रोष्ट्रे'त्यादावुदात्तयणो हल्पूर्वादिति स्वरो न स्यात्, उदात्तयणोऽभावात् । सति त्वृकारातिदेशे तत्स्थानिकस्य यण उदात्तत्वात्स्वरः सिध्यति । ननु स्वरदोषमनन्तरमेव वक्ष्यति तत्किमर्थमत्राभिधीयते, अत्रैकतरपक्षाश्रयेण स्वरदोष उच्यते, परस्तात्तु पक्षद्वयेऽपि वक्ष्यते । **नहि स्वरो रूपवानिति** । ननु शब्दस्य श्रोत्रेन्द्रियग्राह्यस्वभावो रूपम् । स्वरोपि श्रोत्रेन्द्रिय-

उ.] रभावदर्शनेन तुन्नन्तेऽप्यभावातिदेशादित्यर्थः । **रूपातिदेश एवेति** । अत एव 'पञ्चक्रोष्टृभि'रिति सिध्यति । तदेव ध्वनयन्नाह भाष्ये–**अथवेति** । उत्तरसाहचर्यादित्यादिर्भावः । तत्राद्ये उपपत्तिमाह–**तत्रेति** । प्रत्यक्षत्वे हेतुः–**तृज्वदित्युच्चारणादिति** । व्यापकत्वलघुत्वयोर्हेतुमाह–**तस्मिन्निति** । द्वितीयपक्षे उपपत्तिमाह–**कृतेषु चेति** । प्राधान्ये हेतुमाह–**तदर्थत्वादितरस्येति** । आदेशात्प्राग्रूपस्येत्यर्थः । **प्रक्रियालाघवञ्चेति** । पक्षान्तरे त्वनेन 'क्रोष्टृ' इति रूपं, ततोऽनङादिप्रवृत्तिरिति प्रक्रियागौरवमित्यर्थः । ननु ऋकारातिदेशे तत्तच्छास्त्रैरेव तेषां सिद्धेस्तान्यनतिदिष्टानीत्ययुक्तमत आह–**तदतिदेशेति** । **पञ्चक्रोष्टृभिरिति** । पञ्चभिः क्रोष्टीभिः क्रीतै रथैरित्यर्थः । **यण उदात्तत्वादिति** । उदात्तस्थानिकत्वात्तृज्वद्भावे चित्स्वरेण ऋकारस्योदात्तत्वादित्यर्थः । **एकतरेति** । लौकिकरूपातिदेशे स्वरदोषः पर्यवस्यतीति इहोच्यते । उत्तरत्र पक्षद्वयसाधारणं स्वरदोषं वक्ष्यतीत्यपौनरुक्त्यमिति भावः । **ननु शब्दस्येति** । यत्तु पृथिव्यादिवृत्ति गुणभूतं रूपं, तस्य शब्देऽसंभवः । अन्यादृशो रूपवद्व्यवहारस्तु

[उभयथा च स्वरोऽनतिदिष्टः ॥ किं कारणम् ? ॥ न हि स्वरो रूपवान् ॥]
अस्तु प्रागादेशेभ्यो यद्रूपं तदतिदिश्यते ॥ ननु चोक्तम्'ऋकारोतिदिष्टोऽनङ्गुणरपरत्वदीर्घत्वान्यनतिदिष्टानी'ति ॥ नैष दोषः–ऋकारेऽतिदिष्टे स्वाश्रया

प्र.] ग्राह्यत्वाद्रूपमेव। अथास्य व्यतिरिक्तं रूपं नास्तीति 'न हि स्वरो रूपवा'नित्युच्यते तदा तृज्रूपस्यापि रूप नास्तीति तदपि न 'रूपव'दिति–नातिदिश्येत। रूपातिदेशश्च प्रक्रान्तो न रूपवदतिदेशः। अत्रोच्यते–'प्रागादेशेभ्यो यद्रूप'मित्यत्र तावत्पक्षे स्वरोऽशक्योऽतिदेष्टुं, तद्धि रूपं शास्त्रीयं, न च स्वरो रूपत्वेनाश्रितः। शास्त्र ण्वुल्तृचावित्यस्मिन्नुच्चारणे स्वरस्य भेदहेतुत्वेनाऽनाश्रयणात्, 'लुङ्लङ्लृङ्क्ष्वडुदात्त' इत्यादावुदात्तादिग्रहणात्। याऽपि 'चितोऽन्त उदात्त' इति स्वरप्रतिपत्तिरसावप्यनुमानान्न तूच्चारणात्। 'कृतेष्वादेशे'ष्वित्यत्र तु पक्षे यद्यप्युच्चारणे उदात्तादिगुणानामभेदकत्वं ज्ञापितं तथापि यथाऽऽन्तरतम्यात्स्वर आश्रीयमाणो भेदकस्तथातिदेशादपि, किं तूदात्तयण्व्यपदेशाऽभावात्स्वराऽसिद्धिः। यद्येवं 'रूपवा'निति किमुच्यते, 'रूप'मिति हि वक्तव्यम्। तत्र के चिदाहुः-भाष्यकारवचनात्स्वार्थिको मतुप्। अथवा स्वरवानेव स्वरः। अर्शआदित्वादच्। नहि स्वरवानृकार उदात्तादिना रूपेण रूपवान् शास्त्र आश्रीयते, तस्याऽभेदकत्वात्। **ऋकारेऽतिदिष्टे इति**। तदर्थत्वादृकारातिदेशस्येति भावः। **स्वाश्रया इति**। स्वं–निमित्तं शास्त्रं वा आश्रयो येषामिति

उ.] स्वरेऽपि समान इत्यर्थः। **अथास्येति**। मतुप उपादानादिति भावः। अयुक्तश्च भाष्ये मतुप्प्रयोग इत्याह–**रूपातिदेशश्चेति**। अत्र भगवतो गूढाभिप्रायमाह—**प्रागादेशेभ्य इति**। **रूपत्वेनेति**। शास्त्रीयस्य तृजादेर्भेदकत्वेनेत्यर्थः। **अस्मिन्नुच्चारणे इति**। उच्चारणविषये इत्यर्थः। भेदहेतुत्वेनाऽनाश्रयणे हेतुः–**लुङ्ङिति**।

अनुमानादिति। उदात्तगुणबोधकशास्त्ररूपादित्यर्थः। एवञ्चातिदेशकाले स्वराऽप्रतिपत्तेस्तदतिदेशोऽशक्यक्रिय इति अस्वरकस्यैव ऋकारस्यातिदेशात्तत्स्थानिकयण उदात्तस्थानिकत्वाऽभावात्क्रोष्ट्रेत्यादौ स्वराऽसिद्धिः, 'क्रोष्ट्रा' 'क्रोष्टारा'वित्यादौ च स्वराऽसिद्धिरिति भावः। तत्राद्यपक्षे एव 'न हि स्वरो रूपवा'निति हेतुर्भाष्ये उक्तः। अन्त्ये तु स्फुट एव हेतुरिति नोक्तः। **भेदक इति**। तेन 'क्रोष्टे'त्यादौ स्वरसिद्धिरिति भावः। 'क्रोष्ट्रे'त्यादौ तु तदसिद्धिरित्याह–**किन्त्विति**। **परे** तु तृजन्तरूपस्यातिदेशः, रूपशब्देन वर्णरूपावयवसंस्थानं, तद्वदेव च शब्दस्य रूपमित्युच्यते, स्वरस्तु न तद्वानिति शब्दत्वादिवन्न शब्दस्य रूपं। तदुक्तं–'नहि स्वरो रूपवा'निति यथाश्रुतमेव भाष्यं योजयन्ति। **तदर्थत्वादिति**। 'यस्य तु विधेर्निमित्तमेव नासौ बाध्यते' इति न्यायादिति भावः। अप्रधानत्वादृकारस्य स्वशब्देन परामर्शाऽसंभवो, दीर्घस्य ऋकारानाश्रयत्वं चात आह–**स्वं निमित्तमिति**। ऋकारान्तस्याऽनङादिविधानादिति भावः। बुद्धिस्थपरामर्शकः स इति तात्पर्यम्।

अत्रैते विधयो भविष्यन्ति ॥ यदप्युच्यते–"उभयथा च स्वरोऽनतिदिष्टो नहि स्वरो रूपवा"निति । सचकारग्रहणसामर्थ्यात्स्वरो भविष्यति ॥

॥*॥ रूपातिदेश इति चेत्सर्वादेशप्रसङ्गः ॥*॥ **रूपातिदेश इति चेत्सर्वादेशः प्राप्नोति। सर्वस्य तुन्नन्तस्य तृशब्द आदेशः प्राप्नोति** ॥*॥ सिद्धन्तु रूपातिदेशात् ॥*॥ **सिद्धमेतत् ॥ कथम् ? ॥ 'रूपातिदेशात्'। रूपातिदेशोऽयम् ॥ ननु चैवमेव कृत्वा चोद्यते–"रूपातिदेश इति चेत्सर्वादेशप्रसङ्ग" इति?**॥*॥ सिद्धं तु प्रत्ययग्रहणे यस्मात्स तदादितदन्तविज्ञानात् ॥*॥ **सिद्धमेतत् ॥ कथम् ? ॥ 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य च ग्रहणं भवती'-त्येवं तुन्नन्तस्य तृजन्त आदेशो भविष्यति ॥ एवमपि किं चिदेव तृजन्तं प्राप्नोति, इदमपि प्राप्नोति–'पक्ते'ति** ॥*॥ आन्तरतम्याच्च सिद्धम् ॥*॥ **क्रोष्टोर्यदन्तरतमं तद्भविष्यति ॥ किं पुनस्तत् ? ॥ कुशेर्यस्तृज्विहितस्तदन्तम्** ॥*॥ तृज्वद्वचनमनर्थकम् ॥ **[किं कारणम् ?]**॥*॥ तृज्विषये तृचो मृगवाचित्वात्] ॥*॥ **तृज्विषये एतत्तजन्तं मृगवाचि** [॥*॥ तुनो निवृत्त्यर्थम् ॥*॥]॥ **तुनो निवृत्त्यर्थं तर्हीदं वक्तव्यम् । तुनः सर्वनामस्थाने निवृत्तिर्यथा स्यात्** ॥*॥ तुनो निवृत्त्यर्थमिति चेत्सिद्धं यथान्यत्रापि ॥*॥ **तुनो निवृत्त्यर्थमिति चेत्तदन्तरेण वचनं सिद्धं,–यथान्यत्राप्यविशेषविहिताः शब्दाः नियतविषया दृश्यन्ते ॥ क्वाऽन्यत्र ? ॥ तद्यथा घरतिरस्मायविशेषेणोपदिष्टः**

प्र.] समासः । **सचकारेति** । अन्यथा 'तृव'दिति ब्रूयात् । न च तृंस्तृज्भ्यामन्योऽर्थवांस्तृशब्दोऽस्ति यस्य ग्रहणे दोषः स्यात् । तस्मादनुमेयोऽपि स्वर उच्चारणेऽनाश्रीयमाणोऽपि चकारोच्चारणाद्भवति। **सर्वादेशप्रसङ्ग इति** । रूपातिदेशशब्दात्-स्थान्यादेशभावोऽभ्युपगतो भवतीत्यनेकाल्त्वात्सर्वादेशस्तृशब्दः प्राप्नोति ।

सिद्धमिति । तृजन्तरूपातिदेशादित्यर्थः । **आन्तरतम्यादिति** । अर्थेन रूपेण वेत्यर्थः । **तृज्विषय इति** । तृज्वद्भावविषय इत्यर्थः । **घरतिरिति** । 'गृ घृ सेचने'

उ.] **शास्त्रं वेति** । ऋकारेऽतिदिष्टे स्वंशास्त्रमाश्रित्यैते विधयः कार्याणि भविष्यन्तीत्यर्थः । ननु 'तृव'दित्युक्ते पितृमातृशब्दस्य तृशब्दस्याऽप्यतिदेशः स्यादिति दीर्घो न स्यादत आह—**न चेति** । अर्थवत्परिभाषयाऽर्थवतस्तृरूपस्यातिदेश इत्यर्थः । उणादीनामव्युत्पन्नत्वात्तत्रत्यतृशब्दोऽनर्थकः । व्युत्पत्तिपक्षेऽपि अनान्तर्यात्क्रोष्टुशब्दस्थाने मातृपितृरूपानतिदेश इति बोध्यम् । **अनुमेयोऽपि**–अतिदेशकालेऽप्रतीतोऽपि । तदेवाह–**उच्चारणे अनाश्रीयमाण इति** । नन्वतिदेशे कथं सर्वादेशप्रसङ्गोऽत आह—**रूपेति** । रूपातिदेशद्वारेणादेश एव फलतो विधीयत इत्यर्थः ।

स 'घृतं' 'घृणा' 'घर्म' इत्येवं विषयः। रशिरस्मायविशेषेणोपदिष्टः स 'राशिः' 'रश्मिः' 'रशने'त्येवं विषयः। लुशिरस्मायविशेषेणोपदिष्टः स 'लोष्ट' इत्येवंविषयः॥ इदं तर्हि प्रयोजनं–'विभाषां वक्ष्यामी'ति 'विभाषा तृतीयादिष्वची'ति ॥*॥ वावचनानर्थक्यं च स्वभावसिद्धत्वात् ॥*॥ **वावचनं चानर्थकम् ॥ किं कारणम् ? ॥ 'स्वभावसिद्धत्वात्'। स्वभावत एतत्तृतीयादिष्वजादिषु विभक्तिषु तृजन्तं च तुन्नन्तं च मृगवाची'ति** ॥*॥ गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्पूर्वविप्रतिषिद्धम् ॥*॥ **गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम्भवति पूर्वविप्रतिषेधेन ॥ तत्र गुणस्यावकाशः–अग्नये वायवे। नुमोऽवकाशः–त्रपुणी। जतुनी। इहोभयं प्राप्नोति–त्रपुणे। जतुने॥ वृद्धेरवकाशः–सखायौ सखायः। नुमः स एव। इहोभयं प्राप्नोति–अतिसखीनि ब्राह्मणकुलानीति। औत्वस्यावकाशः–अग्नौ। वायौ। नुमः स एव। इहोभयं प्राप्नोति–त्रपुणि। जतुनीति। तृज्वद्भावस्यावकाशः–क्रोष्ट्रा। क्रोष्टुना। नुमः स एव। इहोभय प्राप्नोति–कृशक्रोष्टुने अरण्याय। हितक्रोष्टुने वृषलकुलाय। नुम्भवति पूर्वविप्रतिषेधेन ॥**

स तर्हि पूर्वविप्रतिषेधो वक्तव्यः ? ॥ न वक्तव्यः। इष्टवाची परशब्दो 'विप्रतिषेधे परं-यदिष्टं तद्भवती'ति ॥*॥ नुमचिरतृज्वद्भावेभ्यो नुट् [पूर्व-

---

प्र.] इति भौवादिकः। जिघर्तीत्येतत्तु 'घृ क्षरणदीप्त्यो'रित्यस्य 'बहुलं छन्दसी' त्यभ्यासस्येत्वे कृते रूपम्। रशिलुशी अपठितावपि भाष्यकारवचनाद्धातू बोद्धव्यौ। प्रयुक्तानामिदमन्वाख्यानं न त्वस्मादपूर्वशब्दप्रतिपत्तिरिति नियतविषयत्वमुच्यते। अनेनैव न्यायेन 'अस्तेर्भू'रित्यादीन्यपि प्रत्याख्येयानि। अबुधबोधनार्थं तु किंचिद्वचनेन प्रतिपाद्यते। न्यायव्युत्पादनार्थं च आचार्यः किंचित्प्रत्याचष्टे। न ह्यत्रैकः पन्थाः समाश्रीयते। **अतिसखीनीति**। अतिक्रान्तः सखा यैरिति बहुव्रीहिः। **कृशक्रोष्टुने इति**। क्रोष्टुशब्दः स्त्रीपुंसलिङ्ग इत्यन्यपदार्थस्य नपुंसकत्वं प्रदर्श्यते।

उ.] एवञ्च क्रोष्टुशब्दस्थाने तृशब्द आदेशः प्राप्नोतीत्याशयः। ननु रूपातिदेशे एवापादिते दोषे कथं स एव हेतुरत आह–**तृजन्तेति। तृज्वद्भावविषय इति**। वार्तिके 'तृ'शब्देन तद्युक्तोऽतिदेशो लभ्यत इति भावः। **धातू बोद्धव्याविति**। धातुपाठे पठितावाचार्येणेति बोद्धव्यावित्यर्थः। **प्रत्याख्येयानीति**। अस्तेः सार्वधातुकमात्रविषयत्वादिति भावः। अबुधबोधनाय सूत्राणि, न्यायव्युत्पादनाय तु भगवतः प्रत्याख्यानमिति तात्पर्यम्। किञ्च सूत्रेषु कृतेष्वपि अनभिधानमावश्यकमिति ध्वनयन् वार्तिकमाह–**गुणेति**। तत्पुरुषे टचः प्रसङ्गादाह–**बहुव्रीहिरिति**। समासोदाहरणस्योपयोगमाह–**क्रोष्टुशब्द इति**। अन्यथा पुंवत्त्वाऽभावपक्षे 'कृशक्रोष्टृणे' इत्यपि

विप्रतिषेधेन] ॥*॥ नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन वक्तव्यः । नुमोऽवकाशः–त्रपूणि जतूनि । नुटोऽवकाशः–अग्नीनां वायूनाम् । इहोभयं प्राप्नोति–त्रपूणां जतूनाम्॥ अचि रादेशस्यावकाशः–तिस्रस्तिष्ठन्ति । चतस्रस्तिष्ठन्ति । नुटः स एव । इहोभयं प्राप्नोति–तिसृणां चतसृणाम् ॥ तृज्वद्भावस्यावकाशः–क्रोष्ट्रा क्रोष्ट्रुना । नुटः स एव । इहोभयं प्राप्नोति–क्रोष्टूनां । नुड्भवति पूर्वविप्रतिषेधेन ॥

स तर्हि पूर्वविप्रतिषेधो वक्तव्यः ? ॥ न वक्तव्यः ॥*॥ न वा नुड्विषये रप्रतिषेधात् ॥*॥ न वैतद्विप्रतिषेधेनापि सिध्यति–तिसृणां चतसृणामिति॥ कथं तर्हि सिध्यति ?॥ 'नुड्विषये रप्रतिषेधात्' । नुड्विषये रप्रतिषेधो वक्तव्यः । [स चावश्यंवक्तव्यः] ॥*॥ इतरथा हि सर्वापवादः ॥*॥ इतरथा हि सर्वापवादो रादेशः स यथैव गुणपूर्वसवर्णौ बाधते एवं नुटमपि बाधेत । ॥ * ॥ तस्मान्नुड्विषये रप्रतिषेधः ॥ * ॥ तस्मान्नुड्विषये रादेशस्य प्रतिषेधो वक्तव्यः ॥ न वक्तव्यः । आचार्यप्रवृत्तिर्ज्ञापयति 'न रादेशो नुटं बाधत' इति,यदयं 'न तिसृचतसृ' इति प्रतिषेधं शास्ति-'नामि दीर्घत्वस्य'[तृज्वत्क्रोष्टुः]॥

प्र.]क्रोष्टूनामिति। तृज्वद्भावः कृते नुट्यनजादित्वान्न प्राप्नोतीत्यनित्यो, नुडागमोपि कृते तृज्वद्भावे सन्निपातपरिभाषया न प्राप्नोतीत्यनित्यः । न वेति । नुड्रेफयोर्यो विप्रतिषेध उक्तस्स नेत्यर्थः । स यथैवेति । 'मध्येऽपवादा' इत्येतदनाश्रित्यैतदुक्तं, तत्र ह्याश्रीयमाणे गुणं न बाधेत । गुणपूर्वसवर्णग्रहणमुपलक्षणम्–'ऋत उ'-दित्युत्त्वस्यापि बाधनात्प्रियतिस्रः स्वमित्यादौ । यदयमिति । न हि रादेशे कृते

उ.] स्यादिति भाष्याशयः । ननु 'कृशक्रोष्टु-ङे' इत्यस्यामवस्थायां नुम्तृज्वत्त्वयोः प्राप्तयोः परत्वात्तृज्वत्त्वे सकृद्गतिन्यायेन नुमभावे 'कृशक्रोष्ट्रे' इत्येव रूपं, तच्चेष्टमेव पुंवत्त्वपक्षे इति पूर्वविप्रतिषेधो व्यर्थः । 'कृशक्रोष्टुने' इति तु तृज्वत्त्वाऽभावपक्षे साधु । नच पुनःप्रसङ्गविज्ञानपक्षे तत्प्राप्त्या चारितार्थ्यं, तत्पक्षाश्रयेण वचनकरणाऽपेक्षया सकृद्गतिन्यायाश्रयणेन वचनाऽनारम्भे लाघवादिति चेन्न; एतद्भाष्यप्रामाण्यात्पुंवत्त्वविषयेऽनभिधानेन तृज्वत्त्वाऽप्रवृत्तेः । तेन 'कृशक्रोष्ट्रे' इत्याद्य साध्वेवेति सुधियो विभावयन्तु । सन्निपातपरिभाषयेति । अजादिप्रत्ययसन्निपातलक्षणत्वात्तृज्वद्भावस्येत्यर्थः । भाष्ये विप्रतिषेधशब्दस्य न सामान्यपरत्वमित्याह–नुड्रेफयोरिति । अत्रत्यनुड्रेफयोर्बाध्यबाधकभावपरभाष्यविरोधाच्छ्रोरितिसूत्रस्थो भिन्नफलकस्याऽबाधकत्वपरः कैयटश्चिन्त्यः । गुणमिति । 'जसि चे'ति गुणस्य रादेशात्परत्वादिति भावः । तस्माद्रादेशो बाध्यसामान्यचिन्तया सर्वबाधक इत्यवश्यमुपेयमिति तात्पर्यम् । अनजन्तत्वादिति–मध्यमणिन्यायेनोभयान्वयि । [तृज्व]॥

चतुरनडुहोरामुदात्तः ॥ ७।१।९८ ॥

॥*॥ आमनडुहः स्त्रियां वा ॥*॥ **आमनडुहः स्त्रियां वेति वक्तव्यम्। अनडुही। अनड्वाही** ॥ [चतुरनडुहोराम्] ॥

ऋत इद्धातोः ॥ ७।१।१०० ॥ उपधायाश्च ॥ १०१ ॥ उदोष्ठ्यपूर्वस्य ॥ ७।१।१०२ ॥

॥*॥ इत्त्वोत्त्वाभ्यां गुणवृद्धी विप्रतिषेधेन ॥*॥ **इत्त्वोत्त्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन। इत्त्वोत्त्वयोरवकाशः–आस्तीर्णम्। निपूर्ताः पिण्डाः। गुणवृद्ध्योरवकाशः–चयनं चायकः। लवनं लावकः। इहोभयं प्राप्नोति आस्तरणम्, आस्तारकः। निपरणं निपारकः।–गुणवृद्धी भवतो विप्रतिषेधेन ॥ अयुक्तोऽयं विप्रतिषेधो योऽयं गुणस्येत्त्वोत्त्वयोश्च ॥ कथम्? ॥ नित्यो गुणः** ॥*॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते महाभाष्ये [**शब्दानुशासने**] सप्तमस्य प्रथमे द्वितीयमाह्निकम् ॥ **पादश्च समाप्तः** ॥ ७।१।१ ॥*॥

सिचि वृद्धिः परस्मैपदेषु ॥७।२।१॥

॥*॥ सिचि वृद्धावोकारप्रतिषेधः ॥*॥ **सिचि वृद्धावोकारस्य प्रतिषेधो**

प्र.]दीर्घस्य प्राप्तिः, अनजन्तत्वात्, नुडभावाच्च। एवं च विप्रतिषेधोऽपि न वक्तव्यः, ज्ञापकादेव नुड्भावात्। [**तृज्वत्क्रोष्टुः**] ॥

चतुरनडुहोरामुदात्तः। गौरादिष्वनडुही अनड्वाहीति पाठोऽपौराणिकः। अनडुह्शब्द एव ङीषर्थः पठित इति मत्वा वार्तिकमारब्धम्–'अनडुहः स्त्रियां वे' ति।

ऋत इद्धातोः। नित्यो गुण इति। कृताऽकृतप्रसङ्गित्वात्। 'लक्षणान्तरेण प्राप्नुवन्विधिरनित्य' इत्यनाश्रित्य कार्यप्राप्तिमात्रमङ्गीकृत्येदमुक्तम्। लक्षणभेदापेक्षायां तु लक्षणान्तरस्य प्रवृत्तावपि विप्रतिषेधविषयस्य लक्षणस्याऽप्रवृत्त्याऽनित्यत्वमेव। इति कैय्यटकृते महाभाष्यप्रदीपे सप्तमस्य प्रथमे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः॥

सिचि वृद्धिः परस्मैपदेषु। सिचि वृद्धाविति। इहाऽनिर्दिष्टस्थानिकत्वादिक्परिभाषोपस्थानादोकारस्य नास्ति प्राप्तिः। 'वदव्रजे'त्यत्र त्वच इति स्थानिनिर्देशादिक्परिभाषानुपस्थानादोकारस्य वृद्धिप्रसङ्गे वचनम्। तत्र 'सिचि वृद्धा'वित्यनेन प्रकरणं प्रदर्श्यते। अथ वा सिचि या वृद्धिर्वदव्रज(हलन्तस्याऽच) इत्यनेन तस्यामित्यर्थः। न नु च वृद्धौ कर्तव्यायां 'पूर्वत्रासिद्ध'मिति सिज्लोपादीनामसिद्ध-

---

उ.]**चतुरन। अपौराणिक इति**। विनयादित्वाट्ठक्। अपुराणो नवीन इत्यर्थः॥

ऋत इद्धातोः। नन्वकृते 'सार्वधातुकेति' गुणः, कृते 'पुगन्ते'तीति कथं नित्यत्वं, लक्षणभेदादत आह—**लक्षणान्तरेणेति**। गुणाख्यकार्यस्य कृताऽकृतप्रसङ्गित्वमात्रमाश्रित्येदमुक्तमित्यर्थः। **अनित्यत्वमेवेति**। तथा चाऽत्रत्यविप्रतिषेध-

वक्तव्यः । उदवोढाम् । उदवोढम् । उदवोढेति ॥ स तर्हि प्रतिषेधो वक्तव्यः ? ॥ न वक्तव्यः । ॥*॥ ओकाराद्वृद्धिर्विप्रतिषेधेन ॥*॥ **[ओकाराद्वृद्धिर्भवति विप्रतिषेधेन]। ओत्वं क्रियतां वृद्धिरिति। [किमत्र कर्त्तव्यं ?॥] वृद्धिर्भविष्यति विप्रतिषेधेन** ॥*॥ ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्वाऽभावः ॥*॥ **ओकाराद्वृद्धिर्विप्रतिषेधेनेति चेदोत्वस्याऽभावः । उदवोढाम् उदवोढम् उदवोढेति ॥ नैष दोषः । उक्तं तत्र वर्णग्रहणस्य प्रयोजनं वृद्धावपि कृतायामोत्त्वं यथा स्यात्** ॥*॥ पुनःप्रसङ्गविज्ञानाद्वा सिद्धम् ॥*॥ **अथ वा पुनः प्रसङ्गादत्र वृद्धौ कृतायामोत्वं भविष्यति** ॥*॥ यथा प्रसारणादिषु द्विर्वचनम् ॥*॥ **तद्यथा—जग्ले मम्ले ईजतुः ईजुरिति प्रसारणादिषु पुनःप्रसङ्गविज्ञानाद्विर्वचनं भवति ॥**

प्र.] त्वात्पूर्वं वृद्ध्या भाव्यं, ततः सिज्लोपेन, ततो ढत्वधत्वष्टुत्वढलोपेषु कृतेष्वोत्त्वेनेति वृद्धिविधानकाले ओकारस्याऽभावान्नाऽर्थः प्रतिषेधेन । उच्यते। वृद्धिरङ्गापेक्षित्वात्प्रत्ययविशेषापेक्षत्वाच्च बहिरङ्गा, सिज्लोपादयस्तु वर्णनिमित्तत्वादन्तरङ्गा इत्यसिद्धं बहिरङ्गमन्तरङ्ग इति वृद्धेरसिद्धत्वात्पूर्वत्रेतिनिर्दिष्टस्याऽसिद्धविषयस्याऽभावात् सलोपादीनामसिद्धत्वन्नास्ति । 'पूर्वत्रासिद्ध'मित्यनेन सलोपादीनामसिद्धत्वादन्तरङ्गलक्षणस्य विषयस्याऽभावात्तदपेक्षबहिरङ्गस्याऽभावादसिद्धं बहिरङ्गमन्तरङ्ग इत्येषा परिभाषा न प्रवतते । तदेवं परस्परप्रतिबद्धस्य परिभाषाद्वयस्याऽप्रवृत्तौ परत्वात्सलोपादीन् कृत्वाऽन्तरङ्गत्वात् पूर्वमोत्त्वप्रवृत्तिमभ्युपगम्य चोदयति । वदव्रजेत्यत्र चाऽन्तरेणाऽन्तग्रहणं तदन्तविधौ सिद्धेऽन्तग्रहणमौपदेशिकहलन्तप्रतिपत्त्यर्थं मन्यते । प्रत्ययलक्षणेन च सिच्परत्वम् । **ओकारादिति।** न चान्तरङ्ग ओकारः, बह्वपेक्षत्वात् । **उक्तं तत्रेति ।** 'ओदस्ये'त्युच्यमाने तादपि परस्तपर इत्यकारस्य तपरत्वाद्भिन्नकालस्य ग्रहणं न स्यादिति तस्यापि ग्रहणार्थं वर्णग्रहणं कृतमिति तत्सामर्थ्यात्कृतायामपि वृद्धावोत्त्वं प्रवर्त्तते। प्रवृत्तत्वाच्च लक्षणस्य पुनर्वृद्धेः प्रवृत्ति-

---

उ.] खण्डनमेकदेशिन इति भावः । इति **श्रीनागोजीभट्टकृते** भाष्यप्रदीपोद्योते **सप्तमस्य प्रथमे द्वितीयमाह्निकम्** ।। पादश्च प्रथमः समाप्तः ।। ७।१।२ ।।

सिचि । ओकारे प्रकृतसूत्राऽप्राप्तेराह—**इहेति । ' उच्यते इति ।** केचित्तु-तत्र 'ढ्लोपे' इति विषयसप्तमीति वार्तिकाशयमाहुः । **प्रत्ययविशेषेति । परस्मै**पदपरसिज्रूपेत्यर्थः । **अन्तरङ्गत्वादिति ।** वृद्धेर्बहिर्भूतपरस्मैपदापेक्षत्वाद्बहिरङ्गत्वं मन्यते । नन्वसिद्धत्वाऽप्रवृत्ताविदानीं हलन्तत्वाऽभावात्कथं वृद्धिप्राप्तिरत आह— **वदव्रजेत्यत्रेति । बह्वपेक्षत्वादिति ।** 'ढ्लोप' इत्यस्य बहुव्रीहित्वात्परसप्तमीत्वाच्चे-

इहापि तर्हि पुनःप्रसङ्गविज्ञानादोत्वं स्यात्—सौढामित्रिरिति ॥
॥*॥सौढामित्रौ बहिरङ्गलक्षणत्वात्सिद्धम्॥*॥ [सौढामित्रौ बहिरङ्गलक्षणत्वात्सिद्धम्।] ॥ बहिरङ्गलक्षणा वृद्धिरन्तरङ्गमोत्त्वम्। "असिद्धं बहिरङ्गमन्तरङ्गे"॥

अतो ऌान्तस्य ॥७।२।२॥

अन्तग्रहणं किमर्थं नाऽतो ऌे इत्येवोच्यत ? ॥ केनेदानीं तदन्तस्य भविष्यति ? ॥ तदन्तविधिना ॥ इदं तर्हि प्रयोजनम्—अयमन्तशब्दोऽस्त्येवाऽवयववाची । तद्यथा—वस्त्रान्तो वसनान्तः । अस्ति सामीप्ये वर्त्तते । तद्यथा—उदकान्तं गतः । उदकसमीपं गत इति गम्यते । तद्यः सामीप्ये वर्त्तते तस्येदं ग्रहणं यथा विज्ञायेत । अङ्गान्तौ यौ रेफलकारौ तयोः समीपे योऽकारस्तस्य यथा स्यात् । इह माभूत्—अश्वह्लीत् अवभ्रीत् । [अतोऌ] ॥

प्र.] न भवति । **सौढामित्रिरिति** । सोढा अमित्रा येनेति बहुव्रीहिः । विभज्यान्वाख्याने सढ् अमित्र इ इति स्थिते परत्वाद्वृद्धिं मन्यते। **बहिरङ्गलक्षणत्वादिति** । यत्र विप्रतिषेधस्तत्र पुनःप्रसङ्गविज्ञानम् । इह तु वृद्धिनिमित्ते तद्धितेऽनुपजाते एव अन्तरङ्गमोत्वं प्रवर्तते, ततोऽर्थान्तराश्रयतद्धितनिमित्ता वृद्धिः॥ [**सिचिवृद्धिः**] ।

अतो । अन्तग्रहणमिति । अवयववचनोऽन्तशब्दः । तदन्तविधिनैव च तदर्थो लब्ध इति मत्वा प्रश्नः। **तद्यः सामीप्य इति** । अन्तशब्दोपादानादेव सामीप्यार्थस्य ग्रहणम् । **अङ्गान्ताविति** । रश्च लश्च ऌं, ततः षष्ठ्याः 'सुपां सुलु'गिति लुक् । तत्र ऌेणाऽङ्गस्य विशेषणात्तदन्तविधौ ऌान्तस्याङ्गस्य योऽकारस्तस्य वृद्धिर्भवति। ततोऽन्तस्येत्यकारो विशेष्यते । सन्निधानाच्च ऌापेक्षं सामीप्यमकारस्य विज्ञायत इति सामर्थ्यादङ्गान्तरेफलकारसमीपस्याऽकारस्य वृद्धिरित्यर्थः संपद्यते । **अश्वह्लीत् अवभ्री-**

उ.] त्यभिमानः। बहिर्भूतपरस्मैपदापेक्षत्वेन वृद्धेरोत्वस्यान्तरङ्गत्वमेवेति चिन्त्यमिदं । यदि त्ववर्णग्रहणप्रत्याख्यानभाष्यव्याख्याऽवसरीयाऽस्मदुक्तरीत्या 'ढ्लोप' इत्यस्य विषयसप्तमीत्वमङ्गीक्रियते तदाऽत्रापि विषयसप्तमीति भाष्याशय इत्याहुः । **प्रवृत्तत्वाच्चेति** । विकारान्याऽनुपूर्व्या एकत्वेन लक्ष्यैक्यम् । नन्विह युगपत्प्राप्त्यभावात्कथं विप्रतिषेधोऽत आह—**विभज्येति । वृद्धिं मन्यते इति** । पुनस्तु न वृद्धिः, कृतत्वादिति भावः। **अनुपजात एवेति**। 'कुत्सिते' इति सूत्रभाष्योक्तरीत्या क्रमेणान्वाख्यानमेवोचितमिति भावः । विभज्यान्वाख्यानेऽपि बहिर्भूतनिमित्तकवृद्धेरसिद्धत्वादन्तरङ्गनिमित्तमोत्त्वमिति बोध्यम् । एवमेव भाष्यव्याख्योचिता । [**सिचिवृ**] ॥

अतो ऌान्तस्य। तदन्तविधिनैवेति । सूत्रे च 'ऌान्तस्ये'ति बहुव्रीहिः, अङ्गं चान्यपदार्थः। स चार्थोऽन्तग्रहणं विनापि सिद्ध इत्यर्थः। अप्रसिद्धार्थोपादाने बीजमाह—**अन्तशब्देति** । अङ्गान्तावित्यर्थलाभः कथमत आह—**रश्च लश्चेति** । फलितार्थकथनं

वदव्रजहलन्तस्याचः ॥७।२।३॥

हल्ग्रहणं किमर्थम्?॥ समुच्चयो यथा विज्ञायेत–'वदिव्रज्योश्च हलन्तस्य चाऽच' इति। नैतदस्ति प्रयोजनम्, अज्ग्रहणादेवाऽत्र समुच्चयो भविष्यति—'वदिव्रज्योश्चाऽचश्चे'ति॥ अस्त्यन्यदज्ग्रहणे प्रयोजनम् ॥[किम्?]॥ वदिव्रजिविशेषणं यथा विज्ञायेत—'वदिव्रज्योरच' इति॥ यद्येतावत्प्रयोजनं स्याद्वदिव्रज्योरत इत्येव ब्रूयात्। अथ वैतदपि न ब्रूयात्। 'अत' इति वर्तते॥ इदं तर्हि प्रयोजनं—हलन्तस्य यथा स्यादजन्तस्य मा भूत्॥ कस्य पुनरजन्तस्य प्राप्नोति?॥ अकारस्य। अचिकीर्षीत्। अजिहीर्षीत्॥ लोपोऽत्र बाधको भविष्यति॥ आकारस्य तर्हि प्राप्नोति—अयासीत् अवासीत्॥

प्र.]दिति। अत्राङ्गान्त्ययो रेफलकारयोः समीपे अकारो नेत्यनेन वृद्धिर्न भवति। हलन्तलक्षणा 'नेटी'ति प्रतिषिद्धा॥ [अतो ल्रान्तस्य]॥

वदव्रजहलन्तस्याचः। हल्ग्रहणं किमर्थमिति। अज्ग्रहणादेव हलन्तस्य सिद्धा वृद्धिरिति प्रश्नः। अङ्गेन चाऽचो विशेषणाद्यत्र तत्र स्थितस्याऽचो-वृद्धिर्विधीयमाना हलन्तस्य प्रवर्तते। **अजन्तस्य मा भूदिति।** असति हल्ग्रहणेऽचा-ऽङ्गस्य तदन्तविधिर्विज्ञायेत। ततश्चाऽल्लोपादीन्बाधित्वा वृद्धिः स्यात्।

लोपोऽत्रेति। विशेषणविशेष्यभावे कामचारादङ्गेनाऽज्विशेष्यते। तत्राऽपाक्षीदि-त्यादौ सावकाशा वृद्धिरतो लोपेन पूर्वविप्रतिषेधेन बाध्यते–'ण्यल्लोपावियङ्यण्गुण-वृद्धिदीर्घेभ्य' इति। अचा तु अङ्गे विशेष्यमाणे वृद्धिरनवकाशाऽतो लोपं बाधेत। **आकारस्य तर्हीति।** स्थानेऽन्तरतमपरिभाषाया अत्राऽप्रवृत्तिं मन्यते। तत्प्रवृत्तौ हि

उ.]तदिति भावः। अत्रैतत्कैयटपाठस्वरसात्, 'अङ्गान्तौ रेफलकारा'विति भाष्यस्वर-साच्च 'अतो ल्रान्तस्ये'ति पाठ इति लभ्यते। **अत्राङ्गान्त्ययोरिति।** लक्ष्यानुरोधा-द्व्यक्तिपक्ष एवाश्रीयते, जातेरन्ताऽवयवत्वाऽसंभवाच्चाऽश्वल्लीदित्यत्राऽपि दोषः। सामीप्यं चाऽव्यवहित एवेति भावः। न च 'सिची'त्यकारविशेषणेन येन नाव्य-वधानन्यायेन वाऽश्वल्लीदित्यदिव्याप्तावन्तग्रहणं व्यर्थम्। अङ्गस्य प्रत्ययांऽशे उत्थिताकाङ्क्षत्वेन तद्विशेषणताया एव न्याय्यत्वात्। [**अतो ल्रान्तस्य**]॥

वदव्रज। कथमज्ग्रहणाद्धलन्तस्य वृद्धिरत आह—**अङ्गेन चेति।** हल्ग्रहणा-ऽकरणलाघवानुरोधाद्वैयधिकरण्यमाश्रीयत इत्यर्थः। अज्ग्रहणसामर्थ्यादच इत्या-वर्त्तते। तेन 'अतो हलादे'रित्येतद्बाधनार्थाभ्यां वदव्रजिभ्यामपि संबन्धोऽङ्गावय-स्याऽच इत्यर्थश्चेति भावः। **वृद्धिरनवकाशेति।** अल्लोपादिषु नाऽप्राप्तेषु वृद्धेरारंभा-दिति भावः। **स्थानेन्तरेति।** ततश्चौकारादिर्वृद्धिः स्यादित्यर्थः। अप्रवृत्तौ बीज-माह–**तत्प्रवृत्तौ हीति।** न हि प्रधानोपरोधिना गुणेन भाव्यमिति भावः। **नास्ति**

नास्त्यत्र विशेषः—सत्यां वा वृद्धावसत्यां वा ॥ सन्ध्यक्षरस्य तर्हि प्राप्नोति ॥ नवै सन्ध्यक्षरमन्त्यमस्ति ॥ ननु चेदमस्ति ढलोपे कृते उदवोढामुदवोढ-मुदवोढेति ? ॥ असिद्धो ढलोपस्तस्याऽसिद्धत्वान्नैतदन्त्यं भवति ॥

अत उत्तरं पठति—॥*॥ हल्ग्रहणमिटि प्रतिषेधार्थम् ॥*॥ हल्ग्रहणं क्रियते ॥ [किं प्रयोजनम्?] ॥ 'इटिप्रतिषेधार्थम्'। 'नेटी'ति प्रतिषेधं वक्ष्यति स हलन्तस्य यथा स्यादजन्तस्य मा भूत्,—अलावीत् अयावीत्। ॥*॥ न वाऽनन्तरप्रतिषेधात् ॥*॥ न वैतत्प्रयोजनमस्ति ॥ किं कारणम् ? ॥ 'अनन्तरस्य प्रतिषेधात्' । अनन्तरं यद्वृद्धिविधानं तत्प्रतिषिध्यते ॥

कुत एतत् ?॥'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वे'ति॥*॥तच्चानन्त्यार्थम् ॥*॥ तच्चाऽनन्तरं वृद्धिविधानमनन्त्यार्थं विज्ञायते ॥ कथं पुनर्ज्ञायतेऽ-'नन्तरं वृद्धिविधानमनन्त्यार्थ'मिति ॥*॥ अन्त्यस्य वचनानर्थक्यात् ॥*॥

प्र.]प्रधानं वृद्धिविधानं विफलत्वादुपरुध्येत। **नास्त्यत्र विशेष इति** । विशिष्टविषय-व्यवस्थापनं प्रधानस्य गुणेन कर्तव्यमिति प्रवृत्त्यप्रवृत्त्योर्वृद्धेर्विशेषाऽभावेऽपि नास्ति प्रधानोपरोध इति प्रवर्तत एवाऽन्तरतमपरिभाषेति भावः । **सन्ध्यक्षरस्येति** । औकार ओकारस्य प्राप्नोतीत्यस्ति विशेषः। तस्याऽसिद्धत्वान्नैतदन्त्यमिति । ननु मा भूदन्त्यमनन्त्यस्याप्यविशेषविधानात्प्राप्नोति । एवं तर्हि पराभ्युपगमनिवृत्तिपरमेतत्। परेण सन्ध्यक्षरस्यान्त्यत्वमभ्युपगतं निवार्यते, अनन्त्यत्वे त्वोकारस्य यथा वृद्धिर्न-भवति तथाऽऽद्यसूत्रे प्रतिपादितम् । **हल्ग्रहणमिति**। असतीह हल्ग्रहणे 'नेटी'त्य-त्राज्ग्रहणानुवृत्तावपि या का चिदचो वृद्धिः प्रतिषिध्येत । यदि त्वज्ग्रहणानुवृत्ति-सामर्थ्यादच इत्येवं विहिता या वृद्धिस्तस्याः प्रतिषेधो विज्ञायेत तदा न स्याद्दोषः । परिहारान्तरसद्भावात्तु नेदमुक्तं । तदाह—**न वेति । अन्त्यस्य वचनानर्थक्यादिति** ।

उ.]**प्रधानोपरोध इति** । सर्वथाऽप्रवृत्तावेवोपरोधः, न तु विशेषाऽभावेऽपीति भावः ।

नवै सन्ध्यक्षरमिति । एतद्भाष्यप्रामाण्यात्सन्ध्यक्षरान्तेभ्य आचारक्विबनभिधानं-त्याहुः । 'इको गुणे'ति सूत्रस्थोऽग्रिम एतत्सूत्रस्थश्च कैयटस्तु चिन्त्य इति बोध्यम् । **अविशेषविधानादिति** । अङ्गेनाऽचो विशेषणादिति भावः । 'अनन्त्यस्य वृद्धि'रिति सिद्धान्ते दोषः स्यादेवेत्यत आह—**अनन्त्यत्वे त्विति** । **आद्यसूत्रे**— 'सिचि वृद्धि'रित्यत्र । **प्रतिपादितमिति** । 'लक्ष्ये लक्षणस्ये'ति न्यायेनेति भावः ।

या काचिदिति। 'इडादौ परस्मैपदपरे सिचि परेऽङ्गस्याऽचो न वृद्धि'रित्यर्थेन—'अयावी' दित्यादौ सिचिवृद्धेरपि स निषेधः स्यादित्यर्थः । **अनुवृत्तिसामर्थ्यादिति** । इडादौ सिचि अङ्गस्य वृद्धिर्नेत्येव सिद्धेरिति भावः। **परिहारान्तरेति** । अज्ग्रहणाऽ-

'अन्त्यस्य वृद्धिविधाने प्रयोजनं नास्ती'ति कृत्वाऽनन्तरं वृद्धिविधानमनन्त्यार्थं विज्ञायते ॥ [॥*॥ अतो विभाषार्थन्तु ॥*॥] अतो विभाषार्थं तर्हीदं वक्तव्यम् । 'अतो हलादेर्लघो'रिति विभाषा वृद्धिं वक्ष्यति सा हलन्तस्य यथा स्यादजन्तस्य मा भूत्—अचिकीर्षीत् अजिर्हीर्षीत्-[इति] ॥

॥*॥ अतो विभाषार्थमिमि चेत्तत्सिद्धं वृद्धेर्लोपबलीयस्त्वात् ॥*॥ अतो विभाषार्थमिति चेत्तदन्तरेणापि हल्ग्रहणं सिद्धम् ॥ कथम् ? ॥ 'वृद्धेर्लोपबलीयस्त्वात्' । 'वृद्धेर्लोपो बलीयान्भवती'ति ॥ इदमिह संप्रधार्यं—वृद्धिः क्रियतां लोप इति, किमत्र कर्तव्यम् ? ॥ परत्वाद्वृद्धिः ॥ नित्यो लोपः—कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि ॥ अनित्यो लोपो, न हि कृतायां वृद्धौ प्राप्नोति, परत्वात्सगिड्भ्यां भवितव्यम् ॥ नात्र सगिटौ प्राप्नुतः ॥ किं कारणम् ? ॥*॥ एकाचस्तौ वलीति वा ॥*॥ एकाचः सगिटावुच्येते । अथ वा

प्र.]क्व चिदन्त्यो विधिभाङ् संभवति । 'अयासी'दित्यादौ तु विशेषाऽभावः । तदेवमिहार्थो हल्ग्रहणस्य नास्तीति मत्वाह-**अतो विभाषार्थमिति** । असति हल्ग्रहणेऽकणीदकाणीदित्यादौ सावकाशा वृद्धिरचिकीर्षीदित्यादौ परत्वाल्लोपं बाधेत । अथ वा अतोऽङ्गस्य विशेषणात्तदन्तस्यैव स्यान्न त्वकाणीदित्यादौ । **कृतायामपीति**। 'आतो लोप इटि चे'त्यनेनेति भावः । अत्र शब्दान्तरप्राप्तिर्लक्षणान्तरप्राप्तिश्च नाश्रिता । कृताऽकृतप्रसङ्गित्वात्तु लोपाख्यस्य कार्यस्याऽनाश्रितोपाधिभेदस्य नित्यत्वमाश्रितम् ।

परत्वादिति । 'यस्य लक्षणान्तरेण निमित्तं विहन्यते न तदनित्य' मिति नाश्रितम् । लोपेनात्र वृद्धौ कृतायां न भाव्यमिति तस्याऽनित्यत्वमित्येतावदाश्रित्योच्यते । वृद्धिरेवापवादनिमित्ततामुपयान्ती लोपं विहन्तीति तदपेक्षया भवत्येव लोपस्याऽनित्यत्वम् ।

एकाचस्तौ वलीति वेति । एकीयमतमेतत् । तथा च 'वाचाऽद्यतन्या'मिति

उ.]सम्बन्धेऽप्यनन्तरस्येति न्यायेन तदर्थसिद्धिरूपलघुभूतपरिहारेत्यर्थः ।

नन्वनन्तरा वृद्धिर्हलन्तस्य यथा स्यादजन्तस्य माभूदित्यर्थं तत्स्यादित्याशङ्कायामुक्तयुक्तिं स्मारयति भाष्ये-**तच्चानन्त्यार्थमिति**।**क्वचिदिति**।'अचिकीर्षी' दित्यादौ, लोपेनापहारादिति भावः।**विशेषाऽभाव इति**। यद्यप्यत्र 'यमरमे'ति सगिड्भ्यां परत्वादपवादत्वाद्वा वृद्धिं बाधित्वा भाव्यं, तयोश्च कृतयोराकारान्तत्वं न संभवति तथापि तदभ्युपगमेऽप्यदोष इत्यर्थः । 'ण्यल्लोपा'विति पूर्वविप्रतिषेधसत्त्वादाह-**अथवेति** । कृतायां वृद्धावतो लोप इत्यस्याऽप्राप्तेराह—**अतो लोप इति** । **उपाधिभेदस्येति** । उपाधिभेदः-स्थानिभेदो लक्षणभेदश्चेत्यर्थः । **न भाव्यमिति** । बाधकसत्त्वादिति भावः । **एतदिति** । 'एकाच' इत्येतदित्यर्थः । 'वली'त्येतत्तु 'रुदादिभ्य' इत्यत्र संबन्धावश्यकत्वेन मध्येऽपि संबध्यत एवेति बोध्यम् । **अद्यतनीति**—लुङः पूर्वा-

'वली'ति तत्रानुवर्तते ॥ किं पुनः कारणमेकाचस्तौ वलीति वा ?॥ दरिद्राते-र्मा भूतामिति । दरिद्रातेर्न सगिड्भयां भवितव्यम् ॥ किं कारणम् ? ॥ उक्तमेतत्—"दरिद्रातेरार्धधातुके लोपः, सिद्धश्च प्रत्ययविधा"विति । यश्चेदानीं प्रत्ययविधौ सिद्धः सिद्धोऽसौ सगिड्विधौ ॥ एवमर्थमेव तर्ह्ये-काज्ग्रहणमनुवर्त्यम्—'अत्र सगिटौ मा भूता'मिति । स एष नित्यो लोपो वृद्धिं बाधिष्यते ॥ कं पुनर्भवान् वृद्धेरवकाशं मत्वाह—'नित्यो लोप' इति ?, अनवकाशा वृद्धिर्लोपं बाधिष्यते ॥ सावकाशा वृद्धिः ॥ कोऽवकाशः ॥ अनन्त्यः—अकणीत् अकाणीत् ॥ कथं पुनः सत्यन्त्येऽनन्त्यस्य वृद्धिः स्यात् ? ॥ भवेद्योऽताऽङ्गं विशेषयेत्तस्याऽनन्त्यस्य न स्यात् । वयं तु खल्व-ङ्गेनाऽकारं विशेषयिष्यामस्तत्राऽनन्त्यो वृद्धेरवकाशोऽन्त्यस्य लोपो बाधको भविष्यति । एवं वृद्धेर्लोपबलीयस्त्वम् ॥ [एवं वृद्धेर्लोपो बलीयान् भवति] ॥

अथ वाऽऽरभ्यते पूर्वविप्रतिषेधो—"ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्यः पूर्वविप्रतिषिद्धम्"—इति ॥ सा तर्ह्येषाऽनन्त्यार्था वृद्धिः—हलन्तस्य यथा स्याद-

---

प्र.]यदाकारलोपो दरिद्रातेर्नास्ति तदा 'अदरिद्रासी'दिति सगिटावुदाहृतावेव । सिद्धश्चेति । आर्धधातुके विषयभूत एव लोपविज्ञानात् । एवमर्थमिति । 'अचिकीर्षी'दित्यादौ वृद्धौ कृतायां सगिटौ मा भूतामतो लोपस्य नित्यत्वं यथा स्यादित्येवमर्थम् । तत्र नित्यत्वाल्लोपे कृते पारिशेष्याद्धलन्त एव वृद्धेरवस्थानान्नाऽर्थो हल्ग्रहणेन । अताऽङ्गस्य तदन्तविधिं मत्वाह–कं पुनरिति । 'नित्यादप्यनवकाशं बलव'दिति लोपं बाधित्वा वृद्धिः स्यादि-त्यजन्तनिवृत्त्यर्थं हल्ग्रहणं कर्तव्यम् । इतरस्त्विष्टसिद्धये विशेषणविशेष्यभावे कामचाराल्लघुग्रहणसामर्थ्याच्चाङ्गेनाऽज्विशेष्यत इति प्रतिपादयितुमाह—भवेदिति । 'अदरिद्रासी'दित्यादिसिद्धये सगिड्विधावेकाच इति यदा नानुवर्त्यते तदा उभयो-रनित्ययोः पूर्वविप्रतिषेधेन लोपे कृते हलन्त एव वृद्धिरवतिष्ठते । अथ वा लक्षण-भेदाच्छब्दान्तरप्राप्त्या वा लोपस्याऽनित्यत्वं यो मन्यते तं प्रत्युच्यते—अथवारभ्यत

उ.]चार्यसंज्ञा । विषयेति । अतएव दरिद्रातीति दरिद्र इत्यत्राऽजेव, न त्वादन्तलक्षणो णः । भाष्ये–सिद्धोऽसौ सगिड्विधाविति । तयोः प्रत्ययोत्पत्त्यनन्तरभावित्वादितिभावः । एवमर्थमेव तर्हि इति । वलीति संबन्धेनापि सगिटोर्वारणादुपलक्षणमिदं । लघुग्रहण-सामर्थ्याच्चेति । आकारान्ते विशेषाऽभावेन सगिड्भयां बाधाचाऽत इति तपरकर-णाच्च न तद्व्यावृत्त्यर्थं लघुग्रहणमिति भावः । ननु नित्येन कथं पूर्वविप्रतिषेधोऽत आह–अदरिद्रासीदिति । 'एकाच' इत्यस्याऽननुवृत्तावपि 'वली'त्यस्यानुवृत्तिसत्त्वा-त्सगिटोरप्राप्तौ लोपो नित्योऽत आह—अथवेति । भाष्ये—सा तर्ह्येषेति । 'अतो

जन्त्यस्य मा भूत्—अपिपठिषीत् ॥ एतदपि नास्ति प्रयोजनम् ॥ कथम्? ॥ 'हलादे'रिति नैषा बहुव्रीहेः षष्ठी-हल् आदिर्यस्य सोऽयं हलादिः, हलादेरिति ॥ का तर्हि ? ॥ कर्मधारयात्पञ्चमी-हल् आदिर्हलादिः, हलादेः परस्येति ॥ यदि कर्मधारयात्पञ्चमी-अचकासीत्,-अत्र प्राप्नोति ॥ सिचा आनन्तर्यं विशेषयिष्यामः—'हलादेः परस्य सिच्यनन्तरस्ये'ति ॥ यदि सिचाऽऽनन्तर्यं विशेष्यते-अकणीत् अकाणीत्,-अत्र न प्राप्नोति ॥ वचनाद्भविष्यति ॥ इहापि तर्हि वचनात्प्राप्नोति—अचकासीत् ॥ येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् ॥ केन च नाव्यवधानम् ? ॥ वर्णेनैकेन । सङ्घातेन पुनर्व्यवधानं भवति, न च भवति ॥ यदि सिचाऽऽनन्तर्यं विशेष्यते—अस्तु बहुव्रीहेः षष्ठी ॥ कस्मान्न भवति—अपिपठिषीदिति ? ॥ व्यवहितत्वात् ॥

एवं तर्हि—अतिदूरमेवेदं हल्ग्रहणमनुसृतम्—हल्ग्रहणमनन्त्यार्थमज्ग्रहणमनिगर्थम् ॥ [वदव्रजहलन्तस्याचः] ॥

प्र.] **इति। अपिपठिषीदिति**। अल्लोपस्य स्थानिवद्भावादजन्तमेतदङ्गं, तत्र 'य'शब्दाकारस्य वृद्धिः प्राप्नोति हल्ग्रहणान्न भवति । **अचकासीदिति** । चकाराद्धल आदेः परोऽकारो भवतीति वृद्धिप्रसङ्गः। बहुव्रीहावप्ययं दोषः । ननु चाऽटिकृते हलआदित्वन्नास्ति । नैष दोषः । सिजन्तस्याङ्गस्याडागमः क्रियमाणस्तस्यैव हलादित्वं निवर्तयति, न तु सिचि यदङ्गं तस्य । **येननाव्यवधानमिति** । ननु वचनादतो लोपो बाध्येत, सिचा ह्यानन्तर्य आश्रितेऽनन्त्यो नैव वृद्धेरवकाशः स्यात् । नैतदस्ति । लघुग्रहणमेवमनर्थकं स्याद्व्यवच्छेद्याऽभावात् । ततश्चानन्त्यस्य वृद्ध्यवकाशत्वादन्त्यस्य नित्यत्वपूर्वविप्रतिषेधाभ्यां लोपाद्व्यवधान एव वृद्ध्या भाव्यमिति निर्दिष्टग्रहणादधिकव्यवधाननिवृत्त्यर्थायेन नाव्यवधानमित्याश्रीयते । तदेवमुत्तरार्थं हल्ग्रहणं न कर्तव्यमिति स्थिते इदमुच्यते,-**एवं तर्हीति** । प्रसक्तानुप्रसक्त्या प्रयोजनकथनप्रसङ्गेन हल्ग्रहणमतिसृतं-दूरमपगतमित्यर्थः । क्वचिदनुसृतमिति पाठः । तत्राय-

---

उ.] हलादे'रित्येषेत्यर्थः । अत्र पूर्वविप्रतिषेधेनाऽल्लोपे कथमजन्तत्वमत आह—**अल्लोपस्येति । हल्ग्रहणान्न भवतीति** । हल्ग्रहणसामर्थ्यात्सिजुत्पत्तिवेलायां हलन्तो गृह्यत इति भावः । **सिजन्तस्येति** । अन्तरङ्गत्वादादौ विकरणस्ततोऽडागमः, ततो वृद्धिरिति भावः । **नन्विति** । एवञ्च येन नाव्यववधानन्यायस्याऽयमविषयः । उपसञ्जातविरोधन्यायेन च न परिभाषाबाधः, किन्तु लोपस्यैव बाधः स्यादिति भावः । 'ण्यल्लोपा'विति पूर्वविप्रतिषेधाच्चिन्त्यमिदं । **दूरमपगतमिति** । 'यद्यपी'त्यादिः । 'तथापी'ति शेषः । यद्यपि अतिदूरं गतं निष्फलतया तथापि प्रकृतसूत्रे एवाऽनन्त्यार्थमनन्त्यहलोऽपि ग्रहणार्थमिति भाष्यार्थः । तेन अराङ्क्षीदित्यादिसिद्धिः । यत्तु कैश्चिद्धल्ग्रहणस्य प्रयोजनान्तरमुक्तं तद्दूषयितुमनु-

ह्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥७।२।५॥

किमर्थं जागर्तेर्वृद्धिप्रतिषेध उच्यते ? ॥ सिचि वृद्धिर्मा भूदिति ॥ नैतदस्ति प्रयोजनम् । जागर्तेर्गुण उच्यते, वृद्धिविषये प्रतिषेधविषये च स बाधको भविष्यति ॥ गुणे तर्हि कृते रपरत्वे च हलन्तलक्षणा वृद्धिः प्राप्नोति ॥

प्र.] मर्थो—दूरं यातं सदनुसृतं न परित्यक्तम् । एतदुक्तं भवति—अत्रैव सूत्रे हल्ग्रहणस्य प्रयोजनमस्ति । तद्दर्शयति-**हल्ग्रहणमनन्त्यार्थ**मिति । केचिदाहुः—सति हल्ग्रहणे भवति—अगवीदिति । केचेचिद्दत इद्धातोरित्यतो धातुग्रहणानुवृत्त्या अगवीदित्यत्र अतो हलादेर्लघोरिति वृद्धिर्न भवतीत्याहुः । सिचा धातावाक्षिप्ते पुनर्धातुग्रहणाद्यस्य नित्यं धातुत्वं स गृह्यते । तस्मादयमर्थो—येननाव्यवधानमित्येकेन हला व्यवधाने सिजचोर्वृद्धिः स्यात् । न तु संयोगेनाऽराङ्क्षीदभाङ्क्षीदित्यादौ । हल्ग्रहणे तु सति वर्णग्रहणे जातिग्रहणात् संयोगान्तस्यापि हल्ग्रहणसामर्थ्याद्भवति । 'अनन्त्यार्थ'मित्यस्यायमर्थो-नन्त्योपि हल् कथं नाम गृह्येत । अन्तग्रहणन्तु विस्पष्टार्थम् । तदन्तरेणापि तदन्तविधिलाभात् । किन्तु हलोऽच इत्युच्यमानेऽजन्तस्याङ्गस्य हलः स्थाने वृद्धिरित्ययमप्यर्थ आशङ्केत । **अङ्ग्रहणमनिगर्थमिति** । अन्यथेक्परिभाषोपस्थानादभैत्सीदित्यादावेव स्यान्न त्वपाक्षीदित्यादौ । [वदव्रज] ॥

ह्यन्त । **किमर्थमिति** । गुणेन बाधिता वृद्धिर्न प्राप्नोतीति मन्यते । **सिचि वृद्धिर्मा भूदिति** । 'अतो ल्रान्तस्ये'त्यनेनेति भावः । इतरस्तु 'सिचि वृद्धि'रिति प्राप्तिरनेनोक्ता सा चाऽयुक्तेति मत्वाह—**नैतदस्तीति** । वृद्धिप्रतिषेधविषयादन्यत्र सामान्यलक्षणेन गुणस्य सिद्धत्वाज्जाग्रोविचिण्णल्ङित्स्विति गुणविधानं वृद्धिप्रतिषेधविषयार्थं संपद्यते । **गुणे तर्हीति** । 'अङ्गवृत्ते' इत्येतत्तु निष्ठित-

---

उ.] वदति—**केचिदिति** । 'अगवी'दित्यत्र हलन्तत्वाऽभावान्नानेन, इगन्तत्वाऽभावाच्च न पूर्वेण वृद्धिरिति तदाशयः । तद्दूषयति—**केचिदिति** । 'अतो हलादे'रित्यस्याऽभावाय तदावश्यकतया तेनैव अस्या अपि व्यावृत्तिरित्याशयः । धातुग्रहणानुवृत्त्या कथमगवीदित्यत्र वृद्ध्यभावोऽत आह—**सिचा धाताविति** । धातुपाठपठितानामेव नित्यं धातुत्वमिति भावः । **आहुरित्य**रुचिबीजं 'नवै सन्ध्यक्षरमन्त्यमस्ती' ति भाष्यप्रामाण्यात्सन्ध्यक्षरान्तेभ्य आचारक्विभाव इति । **अराङ्क्षीदिति** । न च सिचाऽङ्गस्य विशेषणात्सिद्धिः, अस्मादेव ज्ञापकादेतत्प्रकरणे इत आरभ्य वृद्धिभाज एव सिच्परत्वेन विशेषणात् । अतएव 'लावस्थायामडागम' इति पक्षेऽटो न वृद्धिः, अचकासीदित्यादौ च न वृद्धिरिति भावः । **जातिग्रहणादिति** । तज्जात्याश्रयाऽनेकग्रहणादित्यर्थः । तत्रैकस्य गौणमन्त्यत्वं बोध्यम् । स्पष्टार्थत्वमेवोपपादयति—**किन्तु हल इति** । [वदव्रजहलन्तस्याचः] ॥

ह्यन्तक्षण । गुणेनेति । जाग्रो वी'त्यनेनेत्यर्थः । गुणस्य 'सिचि वृद्धि'रित्येतद्बाधकत्वादाह—**अतो लेति** । इयं हि गुणोत्तरकालं प्राप्तेति भावः । **सामान्य-**

'नेटी'ति तस्याः प्रतिषेधो भविष्यति ॥

इयं तर्हि—प्रतिषेधोत्तरकाला वृद्धिरारभ्यते'ऽतो ल्रान्तस्ये'ति ॥

अपर आह—कक्ष्यया कक्ष्या निमातव्या । सिचि वृद्धिश्च प्राप्नोति गुणश्च । गुणो भवति । गुणे कृते रपरत्वे च हलन्तलक्षणा वृद्धिः प्राप्नोति । 'नेटी'ति च तस्याः प्रतिषेधो भवति । प्रतिषेधोत्तरकालमतो हलादेर्लघोरिति विभाषा

प्र.]त्वस्य दुर्ज्ञानत्वादनाश्रितम् । यदि तर्हि गुणे रपरत्वे च कृते लक्षणान्तरेण वृद्धिर्भवति तदा 'जागरक'इत्यादावजन्तलक्षणां वृद्धिं बाधित्वा गुणे प्रवृत्ते रपरत्वे चाऽत उपधाया इति वृद्धिः प्राप्नोति । नैष दोषः । चिण्णलोर्गुणप्रतिषेधाल्लिङ्गादुपधालक्षणा वृद्धिर्न भवतीत्यवसीयते । अन्यथा चिण्णलोर्गुणरपरत्वयोः कृतयोरुपधालक्षणया वृद्ध्या सिध्यति रूपमिति प्रतिषेधं न विदध्यात् । यदि च गुणे कृते वृद्धिमात्राऽप्रवृत्तेर्लिङ्गं चिण्णलोः प्रतिषेध आश्रीयते तदा 'जागृ'ग्रहणं शक्यमकर्तुम् ।

इयं तर्हीति । आर्थोऽयमुत्सर्गापवादयोः क्रमः । 'नेटी'ति प्रतिषेधे प्राप्ते 'ऽतो ल्रान्तस्ये'ति वृद्धेरारम्भात्प्रतिषेधोत्तरकालेत्युच्यते । पाठक्रमेण पूर्वकालाऽपि ।

अपर आहेति । पूर्वोक्त एवाऽर्थो वाचा युक्त्यन्तरेणोच्यते । **कक्ष्ययेति** । कक्ष्यां विशिष्टदेशस्थं तुलासूत्रं वणिजो व्यवहरन्ति । अत्र तु कक्ष्येव कक्ष्या । यथा कक्ष्या द्रव्याणां गुरुत्वं परिच्छिनत्ति तथा शास्त्रं कार्याणां सामान्यविशेषावस्थाभावेन बलाऽबलं व्यवस्थापयति । हर्म्यावस्थावचनो वा कक्ष्याशब्द उपचारादिहावस्थावचनः। तत्र किं कार्यं सामान्यावस्थं किं विशेषावस्थमित्येवं कक्ष्यया कक्ष्या विनिमातव्येत्यर्थः । बलं वा कक्ष्या, यथा 'तुल्यकक्ष्या'विति । तत्र 'जागृ इस् ईत्' **इति** स्थिते वार्णादाङ्गो विधिर्बलीयानिति यणादेशं बाधित्वा 'सार्वधातुकार्धधातुकयो' रिति गुणः प्राप्तस्तमपवादत्वाद्बाधित्वा 'सिचि वृद्धि'रिति वृद्धिः प्राप्ता, तामपवादत्वा-

---

उ.]**लक्षणेन**—'सार्वधातुकार्धधातुकयो'रित्यनेन। **दुर्ज्ञानत्वादिति**।अगतिकगतिरियमिति भावः । **अत उपधाया इति** । गुणस्तु 'जागरित' इत्यादौ सावकाश इति भावः । **वृद्धिमात्रेति** । गुणोत्तरभाविवृद्धिमात्रेत्यर्थः । इदं चिन्त्यम्—अत उपधाया वृद्धिबाधनेन तस्य चारितार्थ्याज्जागरक इत्यस्य सिद्धेश्चाऽनेकशास्त्रबाधे मानाऽभाव इति भाष्याशयात् । जागृग्रहणमेव च ज्ञापकं 'ज्ञापकानां सजातीयापेक्षत्वमुचित'मिति सूचयति । ननु प्रतिषेधात्पूर्वं पाठादुत्तरकालेत्ययुक्तमत आह—**आर्थोऽयमिति** । 'पाठक्रमादार्थः क्रमो बलीया'निति भावः । पौनरुक्त्यं परिहरति—**पूर्वोक्तेति** । पूर्वं प्रतिज्ञामात्रम् , इदानीं तु हेतुप्रदर्शनमिति भेदः । **तथा शास्त्रमिति** । बलवता बाधकेन दुर्बलं बाध्यत्वात्परिच्छेत्तव्यमिति भाष्यार्थ इति भावः । **हर्म्यावस्थेति** । 'द्वितीयां तृतीयां च कक्ष्यां प्रविष्ट' इति व्यवहारादिति भावः ।

विशेषवाचिनः सामान्यपरत्वं लक्षणयेत्याह—**उपचारादिति** । **बलञ्चेति** ।

वृद्धिः प्राप्नोति । न च किं चित् । 'अतो ल्रान्तस्ये'ति च वृद्धिः प्राप्नोति । नच किं चित् ॥ [ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम् ।] ॥

नेड्वशि कृति ॥७।२।८॥

किमर्थं पुरस्तात्प्रतिषेध उच्यते न विध्युत्तरकालः प्रतिषेधः क्रियेत । तद्यथा—अन्यत्रापि विध्युत्तरकालाः प्रतिषेधा भवन्ति ॥ क्वाऽन्यत्र ? ॥ 'कर्तरि कर्मव्यतिहारे' 'न गतिहिंसार्थेभ्य' इति । 'देवताद्वन्द्वे च' 'नेन्द्रस्य परस्य' [इति] ॥ तत्रायमप्यर्थो—द्विरिड्ग्रहणं न कर्तव्यं भवति, प्रकृतमनुवर्तते ॥ नैवं शक्यम्, इडर्थं सार्वधातुकग्रहणं लिङः सलोपे संनिहितं तद्विच्छिद्येत ॥ यदि पुनर्न वृद्ध्यश्चतुर्भ्य इत्यत्रैवोच्येत ? ॥ किं कृतं भवति ? ॥ विध्युत्तरकालश्चैव प्रतिषेधः कृतो भवति । द्विश्चेड्ग्रहणं न कर्तव्यम्भवति । इडर्थं च स सार्वधातुकग्रहणं लिङः सलोपे सन्निहितं भवति । तत्राऽयमप्यर्थः—द्विःप्रतिषेधो न कर्तव्यो भवति ॥ नैवं शक्यम्, इह हि तुष्टोथ दुद्रोथेति,—'ऋतो भारद्वाजस्ये'त्येतस्मान्नियमादिड्प्रसज्येत ॥ 'कृसृभृवृस्तु-

प्र.]द्वाधित्वा 'जाग्र' इति गुणःप्राप्नोति। भाष्यकारस्तु दुर्बलत्वादुत्सर्गं परिहृत्य वृद्धेरारभ्य गणयति । **न च किं चिदिति** । तस्याः पाक्षिक्या वृद्धेरपवादभूतं न किंचिद्गुणविधानमस्ति यतो जागृग्रहणमकर्तव्यं स्यात् । '**गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् । पुनर्वृद्धिर्निषेधश्च यण्पूर्वाः प्राप्तयो नवइति** सङ्ग्रहश्लोकः ॥

नेड्वशि । प्राप्तिपूर्वकत्वात्प्रतिषेधस्यार्थात्पूर्वं विधिप्रकरणं पठितव्यं पश्चात्प्रतिषेधप्रकरणं,क्रमव्यतिक्रमे प्रयोजनाऽभावादितिमत्वा पृच्छति–**किमर्थमिति** । **तत्रायमप्यर्थ इति** । न्याय्यक्रमाश्रयणादुपचयोऽप्यस्तीत्यर्थः । **इडर्थमिति** । 'रुदादिभ्यः सार्वधातुके' इत्यत्र यत्सार्वधातुकग्रहणमिड्विधावुपात्तं तदानन्तर्याल्लिङः सलोपोनन्त्यस्येत्यत्र शक्यतेऽनुवर्तयितुम् । यदि त्विड्विधेः परस्तादीड्जनोर्ध्वे चेत्यस्यानन्तरं 'नेड्वशि कृती'त्यादिप्रतिषेधप्रकरण क्रियेत, तदा तेन विच्छिन्नत्वात्सार्वधातुकग्रहणं सलोपविधौ नानुवर्तेत । **तुष्टोथेति** । यथा पपिथ ययिथेत्यादावार्धधातुकस्येतीट् प्राप्तः 'एकाच' इति प्रतिषिद्धः, क्रादिनियमात्पुनः प्राप्तोऽचस्तास्वत्थलीति प्रतिषिद्धस्तत्र 'ऋत एव भारद्वाजस्य प्रतिषेधो नान्येभ्य' इति निय-

उ.]कस्य चिद्बलेनाऽन्यबलं **निमातव्यं**–'दुर्बलमिद'मिति ज्ञातव्यमिति भाष्यार्थ इति भावः । **दुर्बलत्वादिति** । अत्यन्तसामान्यत्वेनेत्यर्थः । **प्राप्तय इति** । 'प्राप्यन्ते' इति व्युत्पत्त्या कार्याणीत्यर्थः । [**ह्मयन्तक्षणश्वस**] ॥

नेड्वशि । न्यायविरोधमुक्त्वा गौरवमप्यत्र पाठे इत्याह भाष्ये–**तत्रायमप्यर्थ इति** । प्राङ्गिषेधपाठे आर्धधातुकस्येडित्यत्र निषेधाऽसंबन्धाय पुनरिड्ग्रहणं कार्य-

द्रुस्रुश्रुवो लिटी'त्येष योगः प्रतिषेधार्थो भविष्यति ॥ यद्येष योगः प्रतिषेधार्थो य एतस्माद्योगादिड्ढरिप्राप्यते नियमात्स न सिध्यति,—पेचिव पेचिम । शेकिव शेकिम ॥ एवं तर्हि—[॥*॥ कृसृभृग्रहणं नियमार्थं, स्तुद्रुस्रुश्रुवां प्रतिषेधार्थं, वृङ्वृञो ज्ञापकार्थम् ॥*॥] ॥ **'कृसृभृ' इत्येषां ग्रहणं नियमार्थं भविष्यति, स्तुद्रुस्रुश्रुवां प्रतिषेधार्थं, वृङ्वृञोर्ज्ञापकार्थम् ॥**

एवमपि सामान्यविहितस्यैवेटः प्रतिषेधो विज्ञायेत, विशेषविहित-

प्र.]मात् पक्षे इड्भवति । एवं स्तुद्रुस्रुश्रुभ्योपि प्राप्नोतीत्यर्थः । तथाहि क्रादिनियमस्य बाधकमचस्तास्वदिति । प्रतिषेधमृतो भारद्वाजस्येति नियमो बाधते, स कथं क्रादिप्रतिषेधं न बाधेत । ननु च 'मध्येऽपवादा' इति न्यायेन भारद्वाजनियमोऽचस्तास्वदितिप्रतिषेधं बाधिष्यते, न तु क्रादिप्रतिषेधम् । नैतदस्ति । पाक्षिक एव परिहारो भेदेन लक्षणापेक्षायाम् । कार्यमात्रे तु बाध्यत्वेनापेक्षिते नैष परिहारः ॥ किं च 'न वृद्भ्यश्चतुर्भ्य' इत्यस्मादूर्ध्वमिदं प्रकरणं पठितव्यमिति प्रक्रान्तं, न तु 'ऋतो भारद्वाजस्ये'त्यस्मात्परमिति । ततो भारद्वाजनियमात्पूर्वमिदं, न तु परमिति कुतो 'मध्येऽपवादा' इति न्यायावतारः, । व्याप्तिन्यायाश्रये च सर्वप्रतिषेधबाधेन भाव्यम् । **यद्येष इति** । थलि भारद्वाजनियमादिटः प्राप्तस्य प्रतिषेधे विधेये संभवति सति नियमार्थत्वस्यानुपपत्तिः। **एवं तर्हीति** । योगैकदेशः पूर्वं योगशब्देनोक्तश्चोदकेन तु समस्त एव योगः प्रतिषेधार्थोऽनेनोक्त इति मत्वा चोदितं—**यद्येष इति** । तत्र क्रादीनामृकारान्तत्वान्नास्ति भारद्वाजनियमादिड्प्राप्तिरितितेषां नियमार्थं ग्रहणम् । स्तुद्रुश्रुस्रुवान्तु भारद्वाजनियमात् क्रादिनियमाच्च प्राप्तस्येटः प्रतिषेधार्थं ।

उ.]मित्यर्थः।**नियमात्पक्षे इति**।'नान्येभ्य' इत्यत्राऽपि 'भारद्वाजस्ये'त्यस्य संबन्धादिति भावः। ननु भारद्वाजनियमोऽनन्तरत्वादुपदेशेऽत्वत अचस्तास्वदिति निषेधस्यैव बाधक इति कथं क्रादिप्रतिषेधबाधस्तेनेत्यत आह—**तथाहीति**। **न बाधेतेति** ।बाध्यबाध्यस्य सुतरां बाध्यत्वादिति भावः । **ननु चेति** । भारद्वाजनियमात्परं क्रादिसूत्रपाठमाश्रित्येदम्। **नतु क्रादिप्रतिषेधमिति** । भारद्वाजनियमेन' अचस्तास्व'दिति—प्रतिषेधनिवृत्तावप्राप्ताऽचस्तास्वदित्यनेन न क्रादिनियमस्य बाधो, नाऽपि भारद्वाजनियमेन, उत्तरत्वादिति भावः । मध्येऽपवादन्यायाऽभावेऽपि अनन्तरस्येति न्यायो दुर्वारोऽत आह—**व्याप्तीति** । भाष्ये—**प्रतिषेधार्थो भविष्यतीति** । स्तुद्र्वादिग्रहणसामर्थ्याद्भारद्वाजनियमप्रापितस्य निषेध इत्यर्थः । ननु 'कृ सृ' इत्यस्य प्रतिषेधनियमोभयार्थत्वान्न दोष इति चेत्तदसंभवमाह—**थलि भारद्वाजेति** । भाष्ये—**नियमात्स इति** । नियमार्थाद्योगाद्य इड्ढरिप्राप्यते स न सिध्यतीत्यन्वयः ।

ननु कृत्स्नसूत्रस्य प्रतिषेधार्थत्वमुक्त्वा इदानीमेकदेशस्य तदर्थत्वकथनं पूर्वाऽपरविरुद्धमत आह—**योगैकदेश इति** । भारद्वाजनियमात् । **क्रादीति** । थलि

श्चायं–'थली'ति ॥ पुरस्तात्पुनः प्रतिषेधे सत्यनारभ्यापवादोऽयं भवति । तेन यावानिण्नाम तस्य सर्वस्यैवं प्रतिषेधः सिद्धो भवति ॥ यदि खल्वप्येषोऽभिप्रायस्तन्न क्रियेत इति, पुरस्तादपि प्रतिषेधे सति तन्न करिष्यते ॥

कथम् ? ॥ इदमस्ति 'नेड्वशि कृती'ति । ततो वक्ष्यामि—'आर्धधातुकस्य वलादे'रिति । 'इ'डित्यनुवर्तते । 'ने'ति निवृत्तम् ॥

अथ कृद्ग्रहणं किमर्थम् ? ॥ इह मा भूत्—बिभिदिव बिभिदिमेति ॥ नैतदस्ति प्रयोजनं—'कृसृभृवृस्तुद्रुस्रुश्रुवो लिटी'त्येतस्मान्नियमादत्रेड्भविष्यति ॥ नाऽत्र तेन परिप्रापणं प्राप्नोति ॥ किं कारणं ? ॥ प्रकृतिलक्षणस्य प्रतिषेधस्य स प्रत्यारम्भः प्रत्ययलक्षणश्चाऽयं प्रतिषेधः ॥ उभयोः स प्रत्या-

---

प्र.] **वृङ्वृञोरिति** । एकयोगस्था अपि नावश्यमेकधर्माणः । तत्र प्रत्ययाश्रयोऽपीट् प्रतिषेधो नियम्यत इति वृङ्वृञोर्ग्रहणेन ज्ञाप्यते । **एवमपीति** । स्तुद्रुश्रुस्रुभ्यः प्रतिषेधो येननाप्राप्तिन्यायेन क्रादिनियमप्राप्तमेवेटं निवर्तयेन्न तु भारद्वाजनियमप्राप्तमित्यर्थः । स हि थल्येव प्राप्तः । ततश्चाऽसौ स्यादेव ।

पुरस्तादिति । इण्मात्रमनाश्रितविषयविशेषमनारभ्याधीतेन प्रतिषेधेन बाध्यत इत्यर्थः । यदि तु भारद्वाजनियमात्परः प्रतिषेधः क्रियते, मध्येपवादा इति चाश्रीयेत, तदा विप्रतिषेधेन सिध्यदेव प्रतिषेधः । **अथ कृद्ग्रहणमिति** । अकृति क्रादिनियमादिड्भविष्यतीति मत्वा प्रश्नः । **नात्रेति** । भिन्नजातीयत्वादिति भावः । क्रादिनियमो हि प्रकृत्याश्रयप्रतिषेधविषयमेवेटं प्रापयेत्–बिभेदिथेति । 'नेड्वशि-

---

उ.] अस्मात्, अन्यत्र क्रादिनियमादिति विवेकः । नन्वेकसूत्रोपात्तानामेकरूपतैव युक्तेत्यत आह—**एकयोगस्था अपीति** । यथा तद्धितार्थेत्यादावेकाऽपि सप्तमी विषयभेदाद्भिद्यत इति भावः । **ज्ञाप्यत इति** । एतच्चोत्तरत्र स्फुटीभविष्यति ।

नन्वविशेषात्सर्वस्यैवेटः प्रतिषेधेन भाव्यमत आह–**स्तुद्रिति**। भाष्ये 'सामान्यविहितस्ये'त्यस्य सामान्यनियमप्राप्तस्येत्यर्थः । **अनारभ्याधीतेनेति**—हेतुगर्भं विशेषणं । **सिध्येदेवेति** । 'तुष्टोथे'त्यादौ भारद्वाजनियमप्रापितेटः कृसृभ्रिति निषेधः सिध्यतीत्यर्थः । अस्य तु न भारद्वाजनियमो निवर्तकः, मध्येऽपवादन्यायादिति भावः । किन्तु न्यासभेदस्याऽन्याय्यत्वाद्भगवतैवं नाश्रितम् । फलान्तराण्यपि 'स्वरतिसूती'त्यादौ पुरस्तात्प्रतिषेधारम्भस्य भविष्यन्तीति दिक् ।

भाष्ये–**तन्न क्रियेतेति**। इड्ग्रहणमित्यर्थः । अत्रत्यभाष्यविरोधाद्दीधीवेवीटामितिसूत्रस्थभाष्यमेकदेशयुक्तिः।अत्रेड्ग्रहणं कृत्वा गुरुतरयत्नमाश्रित्य तत्रत्येड्ग्रहणप्रत्याख्यानस्याऽनौचित्यादित्याहुः । **भिन्नजातीयत्वादिति** । सजातीयस्य हि नियमेन भाव्यमिति भावः । **प्रकृत्याश्रयेति** । 'एकाच उपदेशे' इतीत्यर्थः । अयं हि

रम्भः ॥ कथं ज्ञायते ? ॥ वृङ्वृञोर्ग्रहणात् ॥ कथं कृत्वा ज्ञापकम् ? ॥ इमौ वृङ्वृञावुदात्तौ, तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति । पश्यति त्वाचार्य-'उभयोः स प्रत्यारम्भ' इति, ततो वृङ्वृञोर्ग्रहणं करोति। [किं च]- न खल्वपि कश्चिदुभयवान्प्रतिषेधः प्रकृतिलक्षणः प्रत्ययलक्षणश्च ॥ ततः किम् ? ॥ तुल्यजातीयेऽसति यथैव प्रकृतिलक्षणस्य नियामको भवत्येवं प्रत्ययलक्षणस्यापि नियामको भविष्यति ॥ इदं तर्हि प्रयोजनम्—इह मा भूत्—रुदिवः रुदिमः ॥ एतदपि नास्ति प्रयोजनम्,—उपरिष्टाद्योगविभागः

प्र.]क्ङती'ति तु प्रत्ययाश्रयः प्रतिषेधः, तद्विषये क्रादिनियमाऽभावादिण्नभवेत् । **बिभिदिवेति** । कृद्ग्रहणमकृति प्रतिषेधनिवृत्त्यर्थम् । **वृङ्वृञोर्ग्रहणादिति** । सामान्यग्रहणं विशेषनिष्ठं संपद्यत इति प्रदर्शनार्थं वृङ्वृञोरिति भेदेनोपादानम् । वृग्रहणस्य प्रयोजनं-ववृवहे इत्यादाविण्मा भूदिति । यदि च क्रादिनियमः प्रकृत्याश्रयमेव प्रतिषेधं बाधेत न प्रत्ययाश्रयं तदा 'नेड्वशि' 'श्र्युकः किती'ति योगद्वयेन यथायोगं सिद्धत्वात्प्रतिषेधस्य नाऽर्थो वृग्रहणेन, तत्क्रियमाणं प्रत्ययाश्रयस्यापि प्रतिषेधस्य निवृत्तिं ज्ञापयति । ननु थलर्थं वृग्रहणं स्यात्, तस्य ह्यकित्त्वादवशादित्वाच्चेट् प्रतिषेधाऽप्राप्तिः । नैतदस्ति । 'ववर्थेति निगमे' इति निपातनं क्रियमाणं भाषायां 'ववरिथे'ति इटमभ्यनुजानाति । स्यादेतत्,-तुल्यजातीय एव प्रतिषेधो नियमेन बाध्यताम् । एकैकाश्रयस्तु कथं बाध्येतेत्याशङ्क्याह-**न खल्वपीति** । कृसृभृभ्यो लिटि प्रकृत्याश्रय एव 'एकाच उपदेशेऽनुदात्ता'दितीट्प्रतिषेधः प्राप्नोति । केवलायाः प्रकृतेः शब्देनोपादानात् । अथोच्येत-'चकृषे' इत्यादौ श्र्युकः कितीतीट् प्रतिषेधः प्राप्नोति, स चोभयवान्-प्रकृतिप्रत्ययविशेषाश्रयणादिति तन्न; अत्राप्यन्तरङ्गत्वात्प्रकृत्याश्रय एव प्रतिषेधः । तस्यैव नियमे विज्ञायमाने वृग्रहणमनर्थकं स्यात्तस्मात्प्रत्ययाश्रयोपि प्रतिषेधो नियम्यत इत्यत्र वृग्रहणं लिङ्गम् । प्रकृतकृसृभ्रक्षया च 'न खल्वपी' त्युच्यते न तूभयवान्नास्ति प्रतिषेधः । **रुदिव रुदिम इति** । असति कृद्ग्रहणे 'रुदादिभ्यः सार्वधातुके' इत्यस्येटोऽत्र प्रतिषेधः स्यात्तस्य त्ववशादिरवकाशो-रोदितीत्यादौ ।

उ.] 'वशी'त्युपादानात्प्रत्ययाश्रय इति भावः । ननु **वृग्रहणा**दिति वक्तुमुचितमत आह—**सामान्यग्रहणमिति** । **प्रदर्शनार्थमिति** । सर्वत्राऽयं न्यायो द्रष्टव्य इति निदर्शनार्थमित्यर्थः । **यथायोगमिति** । 'वव्रृषे' इत्यादौ'श्र्युक' इति, 'ववृवहे' इत्यादौ 'नेड्वशी'त्यस्यापि प्राप्तिसत्त्वात्तदुक्तिः । **ननु थलर्थमिति** । तत्र विध्यर्थमित्यर्थः । **निपातनमिति** । अन्यथाऽनेन निषेधेन सिद्धेस्तद्व्यर्थं स्यात् । तथा च तत्सामर्थ्यादत्र वृग्रहणं नियमार्थं सज्ज्ञापनार्थमेवेति भावः ।

अत्राप्यन्तरङ्गत्वादिति । प्रकृतिमात्राश्रयत्वादिति भावः । नन्वेवं 'श्र्युकः किती'त्यस्योभयवतः सत्त्वेन **'न खल्वपी'**ति वचोऽयुक्तमत आह—**प्रकृतेति** । कृसृभृविषये न कश्चिदुभयवानस्तीति भाष्यार्थः । **यदिकिञ्चित्तत्रे**त्यादिभाष्यस्याशय-

करिष्यते,—"आर्धधातुकस्य"। यदेतदनुक्रान्तं एतदार्धधातुकस्यैव द्रष्टव्यम्। तत'इड्वलादे'रिति। तत्र त्वेतावद्द्रष्टव्यं यदि किंचित्तत्रान्यदप्यार्धधातुकग्रहणस्य प्रयोजनमस्ति। अथ न किंचित्—इह वा कृद्ग्रहणं क्रियेत, तत्र वार्धधातुकग्रहणं, को न्वत्र विशेषः! ॥

॥*॥ नेड्वररमनादौ कृति ॥*॥ वेररमनादौ कृतीड्प्रतिषेधं प्रयोजयति। (वर—) ईशिता ईशितुम् ईश्वरः। वर ॥ र—दीपिता दीपितुम् दीप्रम्। र ॥ म—भसिता भसितुम् भस्म। म ॥ न—यतिता। यतितुम् यत्नः ॥ अथान्ये ये वशादयस्तत्र कथम्? ॥ ॥*॥ उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥*॥

तितुत्रतथसिसुसरकसेषु च ॥७।२।९॥

॥*॥ तितुत्रेष्वग्रहादीनाम् ॥*॥ तितुत्रेष्वग्रहादीनामिति वक्तव्यम्। इह मा भूत्। निगृहीतिः। उपस्निहितिः। निकुचितिः। निपठितिरिति ॥

एकाच उपदेशेऽनुदात्तात् ॥७।२।१०॥

एकाज्ग्रहणं किमर्थम्? ॥*॥ एकाज्ग्रहणं जागर्त्यर्थम् ॥*॥ एकाज्ग्रहणं क्रियते ॥ [किं प्रयोजनम्? ॥ 'जागर्त्यर्थम्।] जागर्तेरिड्प्रतिषेधो मा भूदिति। जागरिता जागरितुम् ॥ नैतदस्ति प्रयोजनम्—'उपदेशेऽनुदात्ता'दित्युच्यते जागर्तिश्चोपदेशे उदात्तः ॥ न ब्रूम 'इहार्थं जागर्त्यर्थमेकाज्ग्रहणं कर्तव्य'मिति ॥ किं तर्हि? ॥*॥ उत्तरार्थम्। ॥*॥ श्र्युकः कितीतीड्प्रतिषेधं वक्ष्यति स

प्र.]यदेतदिति। प्रतिषेधप्रकरणमित्यर्थः। ततः सार्वधातुके इट्प्रतिषेधाऽभावः। यद्यन्यार्थमार्धधातुकग्रहणं कर्तव्यं तदा योगविभागेनेष्टं साध्यते। यदा त्वस्याऽन्यप्रयोजनाऽभावः, तदा लाघवार्थं कृद्ग्रहणमेव कर्तव्यम्। प्रत्याख्यास्यते च तत्रार्धधातुकग्रहणम्। **भस्मेति**। नन्वत्रैव वक्ष्यति—उणादय इति। ततश्चाऽव्युपत्त्याश्रयणादेवेण्न भविष्यति। 'अन्येभ्योपि दृश्यते' इत्यनेनाऽत्र मनिन्प्रत्यय इत्यदोषः ॥

तितुत्र। निकुचितिरिति। 'कुञ्चेः क्तिन्नावादिभ्य' इति क्तिन्। 'कुच शब्दे तारे' इत्यस्माद्वा स्त्रियां क्तिन्। [त्रितुत्रतथ] ॥

एकाच उप। एकाज्ग्रहणमिति। एकाचामेवानुदात्तत्वप्रतिज्ञानादनुदात्त-

---

उ.]माह—**यद्यन्यार्थमिति**। 'तदा योगविभागेनेष्टं साध्यते' इति शेषो भाष्ये पूरणीय इत्याशयः। भाष्ये—**अथ न किञ्चिदिति**। 'वेदा यदि प्रमाण'मितिवदसन्देहे सन्देहोक्तिः। 'को न्वत्र विशेष' इत्यनेन न साम्यं विवक्षितं, किन्तु कृद्ग्रहणं कर्तव्यमेव, तदाह—**लाघवार्थमिति**। भाष्ये—**अथान्ये इति**। मल्लादिषु ॥ [नेड्वशि कृति] ॥

तितुत्रतथ। ननु कुञ्चेः क्तिनं बाधित्वा 'गुरोश्च हल'इत्यकारप्रत्ययः स्यादत आह—**कुञ्चेरिति**। [तितुत्रतथसिसुसरकसेषुच] ॥

जागर्तेर्मा भूदिति,—जागरितः जागरितवानिति ॥ एतदपि नास्ति प्रयोजनं—जागर्तेर्गुण उच्यते वृद्धिविषये प्रतिषेधविषये च स बाधको भविष्यति । तत्र गुणे कृते रपरत्वे च कृतेऽनुगन्तत्वादिट्प्रतिषेधो न भविष्यति ॥ ननु चोपदेशाधिकारात्प्राप्नोति ॥ उपदेशग्रहणं निवर्तयिष्यते ॥ यदि निवर्त्यते—स्तीर्त्वा पूर्त्वा—इत्त्वोत्त्वयोः कृतयो रपरत्वे चाऽनुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति ॥ नैष दोषः—आनुपूर्व्या सिद्धमेतत् ॥ नात्राऽकृत इट्प्रतिषेधे इत्वोत्वे

प्र.] ग्रहणेनैवातिप्रसङ्गवारणात्प्रश्नः । इतर उत्तरार्थत्वमभिप्रेत्याह—एकाज्ग्रहणं जागर्त्यर्थमिति । स जागर्तेर्मा भूदिति । जागर्तिरेवोगन्तोऽनेकाच् संभवतीति तन्निवृत्त्यर्थमेकाज्ग्रहणम् । ऊर्णोतिस्तु नुवद्भावात्प्रतिषेधो भवत्येव ।

चोदकः प्रतिषेधाऽप्राप्तिकारणमन्यद्दर्शयति—एतदपीति । स बाधक इति । इट्प्रतिषेधस्येत्यर्थः । उपदेशाधिकारादिति । अन्यार्थमुपदेशग्रहणमनुवर्त्यम्, उपदेशे च जागर्तिरुगन्तो भवतीति प्रतिषेधप्रसङ्गः । इतर उपदेशाऽधिकारस्य प्रयोजनान्तरमपश्यन्नाह—उपदेशग्रहणं निवर्तिष्यत इति । स्तीर्त्वा पूर्त्वेति । इत्त्वादिषु कृतेष्वनुगन्तत्वात्, लूत्वेत्यादौ च सांप्रतिकोगन्तसंभवे भूतपूर्वगत्याश्रयणस्याऽयुक्तत्वादिट्प्रतिषेधो न स्यात् । उपदेशाधिकारात्तूपदेश उगन्तत्वात्संप्रत्यनुगन्तत्वेऽपि प्रतिषेधः प्रवर्तते। आनुपूर्व्येति । 'स्तृ–त्वा' इति स्थिते कित्त्वनिषेधाश्रय इट्, इडाश्रयश्च कित्त्वनिषेध इति प्रागेव संनिहितं कित्त्वमाश्रित्येटः प्रतिषेधः प्रवर्तते, तत इत्त्वादीनीत्यर्थः । अत्र चोद्यते—कृतेष्वित्त्वादिषु प्रतिषेधनिमित्तोगन्तत्वोपगमात्पुनरिट्प्राप्नोति, तस्मिंश्च सति 'न क्त्वा से'डिति कित्त्वप्रतिषेधाद्गुणे सति 'स्तेरित्वे'ति प्राप्नोति । नैष दोषः । पूर्वमेव प्रसक्तस्योग्लक्षणप्रतिषेधेन बाधितत्वाल्लक्ष्यस्य संस्कृतत्वाद्भ्रष्टावसरत्वात्पुनः

उ.] एकाच उ । ननु जागर्त्तेर्गुणस्य वृद्धिप्रतिषेधबाधकत्वेऽपि प्रकृते किमायातमत आह—इट्प्रतिषेधस्येत्यर्थ इति । परत्वाद्गुणे रपरत्वे चेट्प्रतिषेधाऽप्राप्तेरित्यर्थः । अन्यार्थमिति । 'स्तीर्ण' इत्याद्यर्थमिति भावः । इत्त्वादिषु कृतेष्विति । अन्तरङ्गत्वादिति भावः । कित्त्वनिषेधाश्रयेति । असति कित्त्वनिषेधे प्रतिषेधप्राप्तेरिति भावः । कित्त्वनिषेधो—'न क्त्वा से'डिति । तत इत्वेति । इटि तु सत्यकित्त्वेन बाधकगुणप्रवृत्तेरिति भावः । बाधकविषयपरिहारेण च बाध्यस्य प्रवृत्तिरिति तात्पर्यम् । गुणे सतीति । दीर्घस्याऽसिद्धत्वेन लघूपधत्वात् । लक्ष्यस्य संस्कृतत्वादिति । अयञ्चेदृशे विषये भ्रष्टावसरन्यायाश्रयणे हेतुः । वस्तुतो 'निमित्तापाय'परिभाषाया भाष्येऽनाश्रयणादुगन्तत्वाऽपगमेऽपि प्रतिषेधाऽपगमाऽभावेन न पुनरिट्प्राप्तिरिति चिन्त्यमिदं । भ्रष्टावसरन्यायस्याऽत्र शास्त्रेऽनाश्रयस्येको गुणवृद्धी इति सूत्रे भाष्ये

प्राप्नुतः ॥ किं कारणम् ? ॥ 'न क्त्वा से'डिति कित्त्वप्रतिषेधात् ॥ इदं तर्हि—आतिस्तीर्षति निपुपूर्षति । इत्त्वोत्त्वयोः कृतयो रपरत्वे चाऽनुगन्तत्वादिड्प्रतिषेधो न प्राप्नोति ॥ मा भूदेवं—'श्र्युकः किती'ति, 'इङ्नि वे'त्येवं भविष्यति ॥ इदं तर्हि प्रयोजनम्—आस्तीर्णं निपूर्ताः पिण्डाः । इत्त्वोत्त्वयोः

प्र.]प्रवृत्त्यभावात्। **आतिस्तीर्षतीति**। 'श्र्युकः किती' त्यत्र विशिष्टानुबन्धोपलक्षितः प्रत्यय आश्रितः, 'सनि ग्रहगुहोश्चे'त्यत्र तु साक्षादिति विशेषमाश्रित्यास्योपन्यासः। अत्रेत्वरपरत्वयोः कृतयोरनुगन्तत्वादिड्प्रतिषेधो न स्यादुपदेशाधिकारात्त्वनुगन्तावस्थायामपि भवति । 'सनि ग्रहगुहोश्चे'त्यत्र 'च'शब्देनोगनुकृष्यते ।' श्र्युकः किती'-त्यनेन त्वत्र प्रतिषेधो नास्ति; इड्प्रतिषेधाश्रयत्वाज्झलादित्वस्य, झलादित्वाश्रयत्वात्कित्त्वस्य, कित्त्वाश्रयत्वादिड्प्रतिषेधस्येति इतरेतराश्रयप्रसङ्गात् । **इङ्नि वेति** । 'स्तृ—स' इति स्थिते ऋकारान्तावस्थायामेव पक्षे इडभावः । तथाहि—इड्विकल्पस्य निरकाशत्वात्सांप्रतिकाभावे भूतपूर्वगत्याश्रयणादनिगन्तत्वाद्वा न तावद्गुणस्य प्रवृत्तिः । तत्र इट्पक्षे 'वृतो वे'ति दीर्घविकल्पे रूपद्वयम्—आतिस्तरीषति, आतिस्तरिषतीति । इडभावपक्षे तु—आतिस्तीर्षतीति । अत्र चोद्यते,—इडभावपक्षे—कित्त्वाद्गुणे निषिद्धे इत्त्वरपरत्वयोः कृतयोः पुनरिड्प्राप्नोति । न चेङ्नि वेतिविकल्पविधानमनर्थकम्, ऋकारान्तावस्थायां पक्षे इडभावे कित्त्वे सति इत्त्वरपरत्वयोः कृतयोरिटि सति गुणे च सति 'आतिस्तेरिषती'ति रूपसम्पादनार्थत्वाद्विकल्पस्य । अत्र समाधिः—नित्यमिटि प्राप्ते विकल्प[स्य]विधानाद्भ्रष्टावसरत्वाल्लक्ष्यस्य सिद्धत्वात्पुनरिड्लक्षणं न प्रवर्तते । **आस्तीर्णमिति** । कृतेऽकृते चेटि किदेव निष्ठेत्यनेन विशेषेणास्योपन्यासः ।

उ.]ध्वनितत्वाच्च । नन्वातिस्तीर्षतीत्यत्रापि झलादेरेवं सतः कित्त्वादिदमप्यानुपूर्व्या सिद्धमित्याशङ्क्य लक्षणान्तरं तद्गतञ्च कंचिद्विशेषमाश्रित्य परिहारान्तरकथनायोदाहारीत्याह—**श्र्युक इति** । 'सनि ग्रहे'त्यनेनाऽत्रेड्प्रतिषेध इति भावः । नन्वत्रापि पूर्वेणैव सिद्धमिति किमुगनुकर्षणार्थेन चेनेत्यत आह—**श्र्युकः कितीत्यनेन त्विति** । 'सनि ग्रहे'त्यत्र तु 'किती'त्यनपेक्षणान्न दोष इति भावः । भाष्ये—**श्र्युकः कितीत्यस्य**—'उक' इत्यनुवर्तमाने 'सनि ग्रहे'त्यनेनेत्यर्थः । ननु ॠकारान्तावस्थायामेवेट्-प्रतिषेधो न पुनरीत्त्वोत्त्वे इति कथं लभ्यतेऽत आह—**तथाहीति** । ॠदन्ते 'सनि-ग्रहे'ति प्रतिषेधे प्राप्ते 'इङ्नि वे'ति विधीयमानो विकल्प इत्त्वोत्त्वयोः कृतयोर्वृत इति निमित्तस्य विहितत्वान्न स्यादिति पूर्वमेव प्रवर्तते । एवं गुणादपि । अथापि भूतपूर्वगत्याश्रयणं तदा नित्यत्वं तस्य । इत्त्वोत्त्वे तु इटि कृतेऽकित्त्वाद्गुणेन बाधिते इत्यनित्ये इति भावः । **न तावद्गुणस्येति** । उपलक्षणमिदम्—इत्त्वोत्त्वयोरपि । इट्पक्षे गुणः, तदभावे सनः कित्त्वात्तदभावे इत्त्वोत्त्वे । **पुनरिड्प्राप्नोतीति** । अनुगतत्वेन निषेधाऽप्राप्तेरिति भावः । **नित्यमिटीति** । अस्य 'तद्बाधकनिषेधे प्राप्ते' इति

कृतयोः रपरत्वे चाऽनुगन्तत्वादिड्डतिषेधो न प्राप्नोति ॥ मा भूदेवम्, 'इङ्गनि वे'ति सनि विभाषा, 'यस्य विभाषे'ति प्रतिषेधो भविष्यति ॥

इहार्थमेव तर्हि—॥*॥ वध्यर्थमेकाज्ग्रहणम् ॥*॥ [**वध्यर्थमेकाज्ग्रहणं कर्त्तव्यम्**] ॥ **वध इड्प्रतिषेधो मा भूदिति—वधिषीष्टेति ॥ एतदपि नास्ति प्रयोजनं, क्रियमाणेऽपि वै एकाज्ग्रहणे वध इड्प्रतिषेधः प्राप्नोति,—वधिषीष्टेति ॥ किं कारणं?** ॥*॥ वध इड्प्रतिषेधः सन्निपात एकाच्त्वात्प्रकृतेश्चानुदात्तत्वात् ॥*॥ **संनिपाते चैव हि वधिरेकाच्श्रूयते प्रकृतिश्चास्याऽनुदात्ता ॥**

प्र.] **यस्य विभाषेति ।** ननु ऋकारान्तस्य सनि विकल्पविधानान्नित्यत्वादित्वोत्वयोः कृतयोरनृकारान्तत्वाद्यस्य विभाषेतिप्रतिषेधाऽप्रसङ्गः । नैष दोषः । सनि विकल्पविधाने ऋकारान्तत्वाऽपेक्षणेऽपि 'यस्य विभाषे'त्यत्र यस्य क्वचिदिड्विकल्पो दृष्टः स धातुराश्रीयते नतु विकल्पकारणमृकारान्तत्वम् । भवति चेत्त्वोत्वयोः कृतयोरपि स एव धातुरिति प्रवर्त्तते प्रतिषेधः । तदेवमुपदेशग्रहणस्य उत्तरत्रानुपयोगादननुवर्तनाज्जागरित इत्यत्र गुणरपरत्वयोः कृतयोरनुगन्तत्वात् श्र्युकः किंतीतिप्रतिषेधाऽभावादुत्तरार्थमेकाज्ग्रहणं न कर्तव्यम् । **वध्यर्थमिति ।** वधशब्दोऽकारान्तोऽनेकाजादेशः । इतर उपदेशग्रहणमनुदात्तस्यैव विशेषणं न त्वेकाच इतिमन्यमान आह—**एतदपीति । वधिषीष्टेति ।** आशिषि लिङ् । कर्मण्यात्मनेपदम् । अतो लोपइत्यकारलोपेकृते वधिरेकाच् । अकारोच्चारणं त्ववधीदित्यादौ हलन्तलक्षणवृद्धिनिवृत्त्यर्थं स्यात् । **प्रकृतेश्चानुदात्तत्वादिति ।** यस्मात्प्रकृतिर्हन्तिरनुदात्ता तस्याश्चोपदेशावस्था गृह्यते । सैव चाऽनेन रूपेणाऽवस्थितेति संप्रत्ययः, ततः प्रतिषेधः प्राप्नोति । ततश्च कृतमप्येकाज्ग्रहण-

---

उ.] शेषः । भ्रष्टावसरन्यायाश्रयणे हेतुः—**लक्ष्यस्य सिद्धत्वादिति ।** संस्कृतत्वादित्यर्थः । इदमुक्तरीत्या चिन्त्यम् । **अनेन विशेषेणेति ।** एवञ्चात्राऽनुपूर्व्या न सिद्धिर्नापि निषेधान्तरप्राप्तिरिति भावः । **प्रतिषेधाप्रसङ्ग इति ।** 'आदितश्चे'ति योगविभागेन ज्ञापकेन 'यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध' इति वक्ष्यमाणत्वादिति भावः । **प्रवर्तते प्रतिषेध इति ।** 'यदुपाधे'रिति नाश्रीयत इत्यभिमानः । वस्तुतस्तु 'दरिद्रित' इत्यत्र 'यस्य विभाषे'त्यस्य वारणाय उत्तरत्रानुवृत्तिरावश्यक्येव । 'इह किंचित्रपो' इति न्यायेनेहापि फलमावश्यकमित्याशयेनानादराद्भगवता तथा नोक्तम् । **अकारान्त इति ।** अन्यथाऽवधीदित्यत्राऽतो हलादेरिति वृद्धिः स्यात् । अदन्तत्वे त्वल्लोपस्य स्थानिवत्त्वान्न दोषः । एकाज्ग्रहणे कृते तु वध्युपदेशेऽनेकाच्त्वादिड्प्रतिषेधाऽप्रसङ्ग इति भावः । हन्तेः परस्मैपदित्वादाङ्पूर्वत्वाऽभावाच्चाह—**कर्मणीति । हलन्तलक्षणेति ।** 'अतो हलादे'रिति विकल्पनिवृत्त्यर्थमित्यर्थः । अल्लोपस्य स्थानिवत्त्वेन सिच्पराऽकाराऽभावादिति भावः । **प्रकृतिर्हन्तिरिति ।** प्रकृतिशब्देन स्थान्युच्यत इति भावः । **तस्याश्चेति ।** हन्तेरेव साक्षादुपदेशो, वधेस्तु तद्विकारत्वेन प्रत्ययान्न मुख्य

किं पुनः कारणमेवं विज्ञायते—'उपदेशेऽनुदात्तादेकाचः श्रूयमाणा'दिति ॥ ॥*॥ यङ्लोपार्थम् ॥*॥ **यङ्लोपे मा भूदिति । बेभिदिता बेभिदितुम् । चेच्छिदिता चेच्छिदितुम् ।** ॥*॥ एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्क्र्यादिभ्यो लिटि नियमाऽनुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य ॥*॥ **'एकाच उपदेशेऽनुदात्ता'दित्युपदेशवचनमनुदात्तविशेषणं चेत्क्र्यादिभ्यो लिटि नियमस्याऽनुपपत्तिः ॥ किं कारणम् ? ॥ 'अप्राप्तत्वात्प्रतिषेधस्य' । द्विर्वचने कृते उपदेशेऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति । असतीट्प्रतीषेधे नियमो नोपपद्यते ॥ असति नियमे को दोषः?** । ॥*॥ तत्र पचादिभ्य इड्वचनम् ॥*॥ **तत्र पचादिभ्य इड्वक्तव्यः । पेचिव । शेकिम** ॥*॥ सनश्चेट्प्रतिषेधः ॥*॥ **सनश्चेट्प्रतिषेधो वक्तव्यः । बिभित्सति चिच्छित्सति । द्विर्वचने कृते उपदेशेऽनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति । इह च नीत्तः—**

प्र.] मनर्थकम् । **किं पुनरिति** । उभयविशेषणमुपदेशग्रहणमस्तु, ततो वधे रुपदेशेऽनेकाच्त्वात्प्रतिषेधाऽप्रसङ्गः । **बेभिदितेति** । द्विःप्रयोगे द्विर्वचने भवति भिदिरुपदेशेऽनुदात्त, उपदेशे एकाजिति, अतो लोपे कृते संप्रत्यनेकाच्त्वेऽपि प्रतिषेधप्रसङ्गः। श्रूयमाणे त्वेकाच्याश्रीयमाण आवृत्तिसङ्ख्ययैकत्वसङ्ख्याया बाधनात्प्रतिषेधाऽभावः । समुदायस्य चैकाऽङ्गसंज्ञा न तु प्रत्येकमित्येकाचोऽङ्गादित्याश्रयणात्परभिद्रूपाश्रयोऽपि प्रतिषेधो न भवति । **अनुदात्तविशेषणं चेदिति** । उभयविशेषणेऽप्यनुदात्तविशेषणं भवतीति सामर्थ्याद'नुदात्तस्यैव यदि विशेषण'मित्यवधारणं द्रष्टव्यम् ।

असति नियम इति । क्रादिसूत्रं प्रतिषेधार्थमस्तु, एवमपि 'चकृषे' इत्यादि सिध्यति, बिभिदिवेत्यादौ चैकाच्त्वाऽभावात्प्रतिषेधाभावादिट् सिध्यतीति भावः। **पेचिवेति**। एत्वाभ्यासलोपयोः कृतयोरेकाचः श्रूयमाणादितीट्प्रतिषेधप्रसङ्गः । **नीत्त इति** । ददातेः क्तप्रत्यये'ऽच उपसर्गात्त' इति तत्वे कृतेऽनच्कत्वादेकाच्त्वाभावादिट्प्रतिषेधाऽप्रसङ्गः । तत्वस्य द्विपदाश्रयत्वाद्बहिरङ्गत्वादन्तरङ्गे इट्प्रतिषेधेऽसिद्धत्वादिति

उ.] उपदेश इत्यर्थः। तदाह—**सैव वेति** । भाष्ये—**'सन्निपात'** इत्यस्य,—प्रतिषेधप्रवृत्तिकाले इत्यर्थः । **उपदेशेऽनेकाच्त्वादिति**। 'हनो वधे'त्यपि स्वरूपज्ञापनाय मुख्य उपदेश इति भावः । ननु स्थाने द्विर्वचने उपदेशे एकाजनुदात्तरूपस्य नष्टत्वात्कथं यङ्लोपे इट्प्रतिषेधः । नच स्थानिवत्त्वम्, अल्विधित्वादिति । अत आह—**द्विःप्रयोग इति** । ननु यङा व्यवधानात्कथमत्र निषेधप्रसङ्गोऽत आह—**अतो लोपे कृते इति** । यलोपस्याप्युपलक्षणमिदम् । अनेन यङ्लुग्विषयत्वमस्य भाष्यस्य नेति दर्शयति । अत एवाग्रे स्थानिवत्त्वेन समाधानपरं भाष्यं सङ्गच्छते। ननु परस्य मिद्रूपस्य संप्रत्येकाच्त्वात्तदाश्रयः प्रतिषेधः स्यादत आह—**समुदायस्य चेति** । यथा चैतत्तथा 'एकाचो द्वे' इत्यत्र व्युत्पादितं भाष्ये । **तत्वे कृते इति** । परत्वा-

तत्वे कृतेऽनच्कत्वादिड्प्रतिषेधो न प्राप्नोति ॥ नैष दोषः । आनुपूर्व्या सिद्धमेतत् । नात्राऽकृते इट्प्रतिषेधे तत्वं प्राप्नोति ॥ किं कारणम् ॥ 'ति किती'-त्युच्यते ॥ यदप्युच्यते—"एकाच उपदेशेऽनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्क्रादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्ये"ति, मा भून्नियमः ॥ ननु चोक्तं–"तत्र पचादिभ्य इड्वचन"मिति ॥ नैष दोषः–उक्तं तत्र थल्ग्रहणस्य प्रयोजनम् ॥ [किं ?]॥ समुच्चयो यथा विज्ञायेत–'थलि च सेटि, क्ङिति च सेटी'ति ॥

यदप्युच्यते "सनश्चेट्प्रतिषेध" इति ॥*॥ उभयविशेषणत्वात्सिद्धम् ॥*॥ उभयमुपदेशग्रहणेन विशेषयिष्यामः—'उपदेशेऽनुदात्तादुपदेशे एकाच' इति ॥ "यङ्लोपे कथम् ? ॥" ॥*॥ यङ्लोपे च तदन्तद्विर्वचनात् ॥*॥ सन्यङन्तस्य स्थाने द्विर्वचनं तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः स भवति यः स एकाजुपदेशेऽनुदात्तः ॥ अथापि द्विःप्रयोगो द्विर्वचनमेवमपि न दोषः॥ न ह्यस्य भिद्युपदेश उपदेशः ॥ किं तर्हि ? ॥ बेभिद्युपदेश उपदेशः॥

प्र.] परिहारान्तरस्य सद्भावान्नाश्रितः । तदेव दर्शयति–**आनुपूर्व्या सिद्धमिति । थल्ग्रहणस्येति ।** आरम्भसामर्थ्यादत एकहल्मध्येऽनादेशदेर्लिटीत्यनुवर्तनाच्चान्तरेणापि थल्ग्रहणं थल्येव सेट्येत्वाभ्यासलोपयोः सिद्धत्वात्थल्ग्रहणं क्ङिता समुच्चयार्थम् । ततश्चेटि कृते एत्वाभ्यासलोपयोर्विधाने 'पेचिवे'त्यादीनि रूपाणि सिध्यन्तीति नार्थः क्रादिनियमेन । **उभयविशेषणत्वादिति ।** एवं सत्युभयं विशेषणत्वेन संस्पर्शादनुगृहीतं भवति । एतदर्थं चोपदेश इति मध्ये पठितम् । उभयविशेषणे च क्रादिनियमात्पचादिभ्य इटः सिद्धत्वात्थलि च सेटीत्यत्र थल्ग्रहणं विस्पष्टार्थम् । **सन्यङन्तस्येति ।** 'सन्यङो'रिति षष्ठी । तत्र 'भिद'शब्दस्य प्रकृतिप्रत्ययसमुदायस्य 'सर्वे सर्वपदादेशा' इति शब्दान्तर आदेशे कृतेऽयं धातुरयं प्रत्यय इति विभागाऽभावादिड्प्रतिषेधाऽभावः । नन्वेवं 'बिभित्सती'त्यत्रापि प्रतिषेधाऽप्रसङ्गः । इडप्यस्मिन्पक्षे न प्राप्नोतीत्यदोषः । अथ वाऽत्राऽसमाश्वासात्पक्षान्तराश्रयेणाह–**अथापीति । न ह्यस्येति ।** आचार्यस्य । भिद्युपदेशाश्रये ह्येकाच्त्वादनुदात्तत्वाच्चेड्प्रतिषेधः स्यात् । यङन्तस्य तूपदेशे गृह्यमाण तस्याऽनेकाच्त्वा-

---

उ.] दिति भावः। **द्विपदेति।** उपसर्ग-क्तान्त'दा'रूपेत्यर्थः। उत्तरपदाधिकारे बहिरङ्गपरिभाषाया अप्रवृत्तिरिति 'इच एकाचोऽ'मिति सूत्रस्थं भाष्यन्त्वकदेश्युक्तिरिति भावः।

थल्येवेति । अक्ङितः सेट्लिट्स्थल एव संभवादित्यर्थः । **क्ङितेति ।** सेटीत्युभयविशेषणं । तत्र सेड्ग्रहणं कालावधारणार्थं । 'थली'त्येव थलि, पूर्वेण च क्ङिति सिद्धेस्तदाह—**इटि कृते इति । विस्पष्टार्थमिति ।** प्रतिपत्तिलाघवार्थमित्यर्थः । **अत्राऽसमाश्वासादिति ।** द्विःप्रयोगपक्षस्यैव युक्तत्वादिति भावः । इदंशब्दार्थमाह–

अथापि भिद्युपदेश उपदेश एवमपि न दोषः—अकारेण व्यवहितत्वान्न भविष्यति ॥ ननु च लोपे कृते नास्ति व्यवधानम् ? ॥ स्थानिवद्भावाद्व्यवधानमेव ॥ न सिध्यति । पूर्वविधौ स्थानिवद्भावो न चाऽयं पूर्वविधिः ? ॥ एवं तर्हि—पूर्वस्मादपि विधिः पूर्वविधिः ॥

कः पुनरुपदेशो न्याय्यः ? ॥ यः कृत्स्नः ॥ कश्च कृत्स्नः ? ॥ य उभयोः ॥

प्र.]दुदात्तत्वाच्च प्रतिषेधाऽप्रसङ्गः। ननु च 'प्रत्यक्षमाख्यानमुपदेश' इत्युक्तम्, यङादीनां च प्रत्ययानामुपदेशोऽस्ति, न तु तदन्तानां शब्दानामनुमेयरूपाणाम् । नैषदोषः । सङ्कीर्णावुद्देशोपदेशावित्यपि तत्रोक्तम् । अत एव चेत्संज्ञायां करणसाधन उपदेशशब्दः शास्त्रवाच्याश्रितः । इह तु भावसाधन आश्रीयते । तेन प्रतिपादनमात्रं गुणैर्वा प्रत्यक्षेण वोपदेश उच्यते । यङ्विधानद्वारेण च 'बेभिद्ये'त्यस्य समुदायस्य क्रियाविशेषवचनस्याऽऽद्यप्रतिपत्तिरस्तीति **'बेभिद्युपदेश'** इत्युक्तम्। 'बेभिद्य'-शब्दादिक्श्तिपाविति इक्प्रत्ययेऽल्लोपयलोपयोर्बेभिदिरिति भवति । अथ चेत्संज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यते, तदुक्तम्—'उद्देशश्च प्रातिपादिकानां नोपदेश' इति, इह तु प्रतिपादनवचन इति विरोधाऽभावः, अथापि भिद्युपदेश इति उच्चारणवचनेऽप्युपदिशौ गृह्यमाणे प्रत्यक्षमाख्यानवचने वा न दोष इत्यर्थः । द्विःप्रकार उपदेश उक्ते पृच्छति—**कः पुनरिति** । किं भिद्युपदेशोऽथ बेभिद्युपदेश इत्यर्थः । **यः कृत्स्न इति** । कृत्स्नकारित्वात्कृत्स्नः । स च भिद्युपदेश एव । स हि सर्वसाधारणो, भेत्ता बेभिद्यते इत्येवमादीनां प्रतिपत्तिहेतुत्वात् । **उभयोरिति** । केवलस्य भिदेर्बेभिद्यादेश्च तदवयवसमुदायस्य धातोर्ग्राहक इत्यर्थः । एतदुक्तं भवति—भिदादीनामेवोपदेशोऽस्ति न तु सनाद्यन्तानामवयवसमुदायानाम्, उपदेशशब्दस्य साक्षात्प्रतिपत्ति-

उ.]**आचार्यस्येति** । **अननुदात्तत्वाच्चेति** । प्रत्ययस्वरेणान्तोदात्तत्वादित्यर्थः। **इत्युक्तमिति** । 'उपदेशेऽजनुनासिक' इत्यत्र । **गुणैः**—प्रकृतिप्रत्ययादिभिः । नन्वनिर्ज्ञातस्य स्वरूपज्ञापनमुपदेश इति भिदेरेव स इति कथं बेभिद्युपदेश उपदेश इत्यत्राह—**यङ्विधानद्वारेण चेति** । 'अथवे'त्यादि प्रौढ्या, तत्रत्यभाष्यविरोधात् । **इह त्विति** । धातूनामनेकार्थत्वादिति भावः । वस्तुतस्तस्योपदेशत्वमेव नेति मनसि निधायाह—**अथापि भिद्युपदेश इति**—भाष्ये । भाष्ये—**पूर्वस्मादपीति** । तदनित्यत्वेऽपि विहितविशेषणान्न प्रागुक्तः कोऽपि दोषः । स्पष्टञ्चेदमेकाचो द्वे इत्यत्र भाष्ये इति बोध्यम् । कारणे कार्यवाचिशब्द उपचारात्प्रयुक्त इत्याह—**कृत्स्नकारित्वादिति** । अस्य कृत्स्नकारित्वं दर्शयति—**सहीति**। अत्रार्थे 'उभयो रिति भाष्यं योजयति—**केवलस्येति** । **तदवयवेति**—बहुव्रीहिः । 'अवयवसमुदायाना'मिति षष्ठीतत्पुरुषः । तत्र हेतुमाह—**उपदेशशब्दस्येति** । **शास्त्रवाचिन इति** । करणल्युटपत्त्येति भावः । यद्यप्येवंव्याख्याने 'वध इड्प्रतिषेध' इति उत्तरभाष्यानुत्थितिः, वधेः

यदि तर्हि य उभयोः स कृत्स्नः स च न्याय्यो वध इट्प्रतिषेधः प्राप्नोति—आवधिषीष्टेति ॥ नैष दोषः—आद्युदात्तनिपातनं करिष्यते स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति ॥ एवमपि उपदेशिवद्भावो वक्तव्यो यथैव हि स निपातनस्वरः प्रकृतिस्वरं बाधते एवं प्रत्ययस्वरमपि बाधेत—आवधिषीष्टेति ॥ नैष दोषः—आर्धधातुकीयाः सामान्येन भवन्त्यनवस्थितेषु प्रत्ययेषु । तत्रार्धधातुकसामान्ये वधिभावे कृते सति शिष्टत्वात्प्रत्ययस्वरो भविष्यति ॥

अथ के पुनरनुदात्ताः ? ॥ आदन्ताः—अदरिद्राः । इवर्णान्ताश्श्वाऽश्रिश्विडीशीदीधीवेवीङः । उवर्णान्ताः—युरुणुक्षुक्ष्णुस्नूर्णुवर्जम् । ऋदन्ताश्चाऽजागृवृङ्वृञः । शकिः—कवर्गान्तानाम् । पचिवचिसिचिमुचिरिचिविचिप्रच्छित्यजिभजिसृजित्यजिभुजिभ्रस्जिमस्जिरुजियुजिणिजिविजिसञ्जिस्वञ्जयश्चवर्गान्तानाम् । अदिसदिशदिहदिछिदितुदिनुदिस्विदिभिदिस्कन्दिक्षुदिखिद्यतिविन्दि[विन्ति]विद्यतिराधियुधिबुधिशुधिक्रुधिरुधिसाधिव्यधिबन्धिसिध्य-

प्र.]हेतुशास्त्रवाचिन आश्रयणात् । वध इट्प्रतिषेध इति । भिद्युपदेशस्थानीयो हन्त्युपदेश,:तत्र हन्तिरेकाजनुदात्तश्चेति सत्यपि वधेरुपदेशोऽनेकाच्त्वे हन्त्युपदेशधर्माश्रय इट्प्रतिषेधप्रसङ्गः । न चाऽकारलोपस्य यङन्त इवात्रापि स्थानिवद्भावेन व्यवधानम्, सत्यपि स्थानिवत्त्वे प्रकृतिप्रत्यययोरानन्तर्यात्यङन्ते तु स्थानिवत्त्वादकारेण भिदिप्रत्यययोरानन्तर्यविच्छेदात् । आद्युदात्तनिपातनमिति । तत्सामर्थ्यादुपदेशविषयानुदात्तत्वाश्रय इट्प्रतिषेधो न भवति । न ह्येतदाद्युदात्तत्वं प्रयोगसमवायि, प्रत्ययस्वरेण तस्य बाधनात् । आर्धधातुकीया इति । आर्धधातुके भवा इति वृद्धाच्छः । यदि तर्ह्यार्धधातुकविशेषनिमित्ताऽप्यनवस्थितेषु प्रत्ययेषु भवन्ति तदा—यदुक्तं—'वधिभावात्सीयुटि चिण्वद्भावो विप्रतिषेधेने'ति तद्विरुध्यते । अन्तरङ्गत्वाद्वधेर्बहिरङ्गत्वा-

उ.]साक्षात्प्रतिपत्तिहेतुशास्त्रस्य सत्त्वात् । अवच्छेदकावच्छेदेनान्वयस्यौत्सर्गिकत्वेन लक्ष्यानुरोधेन चोपदेशत्वावच्छेदेनैकाच इत्यर्थात्, तथापि एतदभिप्रायमजानानस्य उभयोः स्थान्यादेशयोर्यस्तस्यैव ग्रहणमित्यर्थं मन्वानस्य सा शङ्का, तथैव च सिद्धान्त्येकदेशिन उत्तरम् । उपदेशविषयेति । हन्त्युपदेशविषयेत्यर्थः । अनवस्थितेषु प्रत्ययेष्विति । आर्द्धधातुक इत्यादेर्विषयसप्तमीत्वाश्रयणादिति भावः । तद्विरुध्यत इति । चिण्वद्भावेऽपि विषयसप्तमीति तदाशय -इति निरूपितमस्माभिः प्राक् । वस्तुतोऽत्रावच्छेदकावच्छेदेनान्वयरूपोऽस्मदुक्तः समाधिर्बोध्यः । भाष्ये—उवर्णान्ता इति । य्वादिपर्युदासाद्ध्रस्वोवर्णान्ता इत्यर्थः। अत एव 'बभूथाततन्थे'ति सङ्गच्छते ॥

तिहनिमन्यतयस्तवर्गान्तानाम् । तपितिपिवपिशपिछुपिलुपिलिपिस्वप्यापिक्षि-पिसृपितृपिदपियभिरभिलभियमिरभिनमिगमयः—पवर्गान्तानाम् । रुशिरिशि-दिशिविशिलिशिस्पृशिदशिक्रुशिमृशिदंशिल्विषिमृषिकृषिश्लिषिविषिपिषितुषि-दुषिद्विषिघसिवसिदहिदिहिवहिदुहिनहिरुहि[वहि]लिहिमिहयश्रोष्मान्तानाम् । वसिः प्रसारणी ॥ [एकाच उपदेशे] ।

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥७।२।१३॥

॥*॥ क्र्यो ऽसुटः ॥*॥ कृञोऽसुट इति वक्तव्यम् । इह माभूत्—संचस्करिव । संचस्करिम ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम्—गुणे कृते रपरत्वे चाऽनुगन्तत्वादिट्प्रतिषेधो न भविष्यति ॥ एवमप्युपदेशाधिकारात्प्राप्नोति तस्मादसुट इति वक्तव्यम् ॥ [कृसभृत्र]

श्वीदितो निष्ठायाम् ॥७।२।१४॥

श्विग्रहणं किमर्थं, न प्रसारणे कृते प्रसारणपूर्वत्वे चोगन्तादित्येव सिद्धम् ? ॥

प्र.]च्चिण्वद्भावस्य विप्रतिषेधाऽयोगादिति चिन्त्योऽत्र समाधिः । [एकाच उपदेशे]॥

कृसृ[भृवृ] । **कृञोऽसुट इति** । कृतेऽपि सुटि करोतिर्भवत्येवेति प्रतिषेधप्रसङ्गः । **गुणे कृते इति** । 'ऋतश्च संयोगादेर्गुण' इत्यत्र 'संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्तव्य'मिति वचनेन । **अनुगन्तत्वादिति** । 'श्र्युकः किती'त्यत उग्ग्रहणमिहाऽनुवर्तत इति मन्यते । **एवमपीति** । यद्यपि संप्रति नोगन्तस्तथाप्युपदेश उगन्त इति स्यात्प्रतिषेधः । किमर्थमुपदेश इत्यनुवर्तत इति चेत्, 'तुष्टोथे'त्यादौ कृतेऽपि गुणे इट्प्रतिषेधार्थम् । यद्येवमुक इत्यपि नानुवर्त्यम् । एवं तर्ह्येतदनेनोक्तं भवति—सत्यसति चोगधिकारे 'कृञोऽसुट' इत्यवश्यवाच्यमिति नार्थ उगधिकारेण ॥ **[कृसभृत्र]** ॥

श्वीदितो निष्ठायाम् । स्तीर्वा स्तीर्णमित्यादीनामुपदेशग्रहणानुवृत्तिमन्तरेण सिद्धेरभिधानादुपदेशाधिकारोऽत्र नास्तीति मत्वाह—**श्विग्रहणं किमर्थमिति** । ननु च 'श्वि—त' इति स्थिते संप्रसारणात्परत्वादिट् प्राप्नोति । नित्यत्वात्संप्रसारणं भविष्यतीति मन्यते । 'यस्य लक्षणान्तरेणे'ति क्व चिन्नाश्रीयत इति पूर्वमेवोक्तम् । संप्रसारणनिमित्तत्वादिडभावस्य तस्मिन् कृते इटोऽप्रवर्तनादनित्यलम् । संप्रसारणस्य तु

उ.] **कृसभृ** । कृते सुटि शब्दान्तरत्वादप्राप्तेराह—**कृतेऽपीति** । 'यदागमा' इति न्यायादिति भावः । नन्वत्र 'उक' इत्यस्याऽभावेनाऽनुगन्तत्वादित्ययुक्तमत आह—**श्र्युक इति** । वार्तिके **'वक्तव्य'**मित्यावश्यके कृत्य इति दर्शयति—**अवश्यवाच्यमिति** । [कृसभृत्र] ॥

श्वीदितो । ननु 'श्र्युक' इत्यत्रोपदेश इत्यनुवृत्त्या श्वेरुपदेशेऽनुगन्तत्वात्प्रश्नोऽयमयुक्तोऽत आह—**स्तीर्वेत्यादि** । इटोऽनित्यत्वोपपादनायाह—**यस्य लक्षणा-**

अत उत्तरम्पठति—॥*॥ श्विग्रहणमिदन्तत्वादुपदेशस्य ॥*॥ **श्विग्रहणं क्रियते [किङ्कारणम् ?॥] इदन्तत्वादुपदेशस्य। 'उपदेशे उगन्ता'दित्युच्यते । श्वयति-श्वोपदेशे इदन्तः॥** [श्वीदितो निष्ठायाम्] ॥

यस्य विभाषा ॥७।२।१५॥

॥*॥ यस्य विभाषाऽविदेः ॥*॥ **यस्य विभाषाऽविदेरिति वक्तव्यम् । इह**

प्र.] कृताऽकृतप्रसङ्गित्वान्नित्यलम् । **श्विग्रहणमिदन्तत्वादिति ।** एकाज्ग्रहणोत्तरार्थताप्रत्याख्यानायाऽऽनुपूर्व्या सिद्धमित्यादि तत्रोक्तम् । तत्त्वेकाज्ग्रहणमन्यार्थं स्थितं सदुत्तरत्रापि प्रतिपत्तिगौरवपरिहारायानुवर्त्यम् । ततश्च 'जागरित' इत्यत्र 'श्र्युकः किती'तीट्प्रतिषेधो न भवति। ननु वध्यर्थमप्येकाज्ग्रहणं प्रत्याख्यातमेवाद्युदात्तनिपातनाश्रयेण, हन्त्युपदेशे गृह्यमाणे तदुक्तम् । वध्युपदेशे चाश्रीयमाणे एकाज्ग्रहणेनैव वधेरिट्साध्यते । आद्युदात्तनिपातने त्वाश्रीयमाणे वधिर्वाष्टेत्याद्युदात्तत्वप्रसङ्गनिवारणाय 'लिङी'ति विषयसप्तम्याश्रयणीया। तथा च 'घानिषीष्टे'ति विप्रतिषेधाच्चिण्वद्भावानुपपत्तिः,अन्तरङ्गत्वाद्वधिभावप्रसङ्गात् । यङ्लुङ्निवृत्त्यर्थं चैकाज्ग्रहणं कर्तव्यम् । तस्मिन् हि क्रियमाणे-'यत्रैकाज्ग्रहणं किंचित्पञ्चैतानि न यङ्लुकी'ति वचनाद्बेभिदितेत्यादावपीट्सिध्यति । उपदेशग्रहणमपि 'श्र्युकः किती'त्यत्रानुवर्त्यम् । अन्यथा 'स्तीर्त्वे'त्यादिसिद्धयेऽनन्तप्रकारपरिहाराश्रयणे प्रतिपत्तिगौरवानुषङ्गः । इदमेव श्विग्रहणमुपदेशाधिकारस्य तत्र ज्ञापकम् । अन्ये त्विह श्विग्रहणं 'सर्वविधिभ्य इड्विधिर्बलवा'नित्यस्य ज्ञापकमाहुः । **[श्वीदितो निष्ठायाम्] ॥**

यस्य वि । 'विभाषा गमहनविदविशा'मिति क्वसौ विकल्पविधानाद्वेत्तेर्निष्ठायां प्रतिषेधः प्राप्नोतीति मत्वाह—**यस्य विभाषाऽविदेरिति ।** वेत्तिरत्र विवक्षितः ।

उ.] **न्तरेणेत्यादि ।** नन्वेकाच इति सूत्रे उपदेशग्रहणस्योत्तरत्र फलाऽभाव उक्तः, इह च तदाश्रयणमिति विरोधं परिहरति—**एकाज्ग्रहणेति । ततश्च जागरित इति।** एवञ्च 'स्तीर्ण'मिति यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इत्याश्रयणेऽपि सिद्धम् । तच्चावश्याश्रयणीयमित्युत्तरसूत्रे भाष्य एव स्फुटम् । **वध्युपदेशे त्विति ।** उपदेशमात्रावच्छेदेन य एकाजित्यर्थेनेत्यर्थः । हन्तेर्विनाशोन्मुखत्वेन तत्र धातोरित्यस्याऽप्रवृत्त्या तत्स्थानिको वधिरप्यान्तरतम्यादुपदेशेऽनुदात्त एवोच्चारितः स्थान्यनुरूप इति भावः । **तथा** चेत्यादि चिन्त्यमित्युक्तमेव। **इति वचनादिति । परे तु**—इण्निषेधविषये यङ्लुगन्तानामनभिधानमेव । अत एव पूर्वसूत्रे भाष्ये 'इहार्थमेव तर्हि वध्यर्थमेकाज्ग्रहण'मित्येवोक्तं, नतु यङ्लुगर्थमित्यपि । एषा परिभाषा च न स्पृष्टा । यत्तु अजर्घा बेभिदीतीत्यादौ शप्श्यनोरकरणात् 'श्तिपा शपेति' परिभाषाऽपि भाष्यसंमतेति, तन्न, 'चर्करीतञ्चे'त्यदादौ विशिष्य पाठेन तेषां तत्तद्गणप्रयुक्तकार्योऽप्रवृत्तेः । तस्मादियं परिभाषा भाष्याऽसंमतैव। वधेराद्युदात्तनिपातनादेव सिद्धे एकाज्ग्रहणमत्र प्रत्याख्येयमेव । यङन्तवारणन्तु 'उपदेशेऽनुदात्ताद्विहितस्ये'त्यर्थेनैवेति प्राहुः ।

मा भूत्—विदितः विदितवानिति ॥ तत्तर्हि वक्तव्यम्? ॥ न वक्तव्यम् । यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः । शविकरणस्य विभाषा, लुग्विकरणश्चायम्॥

आदितश्च ॥७।२।१६॥ विभाषा भावादिकर्मणोः ॥७।२।१७॥

किमर्थो योगविभागो न 'आदितो विभाषा भावादिकर्मणो'रित्येवोच्येत ॥ केनेदानीं कर्तरि प्रतिषेधो भविष्यति ? ॥ 'यस्य विभाषे'त्यनेन ॥ एवं तर्हि सिद्धे सति यद्योगविभागं करोति तज्ज्ञापयत्याचार्यः—"यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध" इति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ 'यस्य विभाषाऽविदे'रित्युक्तं तन्न वक्तव्यं भवति ॥

प्र.] 'विद्लृलाभे' इत्यस्य तु प्रतिषेधो भवत्येव–'विन्न' इति। विद्यतिविनत्त्योस्त्वनुदात्तत्वादिट्प्रतिषेधः । **यदुपाधेरिति । उपाधिः**–अभिधेयादिर्भेदकः । **शविकारणस्य विभाषेति ।** विशिना तौदादिकेन साहचर्यात्तौदादिकस्यैव लाभार्थस्य विभाषेति, ज्ञानार्थस्य सत्यपि विदिरूपत्वेऽर्थस्य भेदकत्वेन रूपवदाश्रयणात्प्रतिषेधाऽभावः । यद्यपि हन्तिना साहचर्यं विदेरस्ति तथापि शब्दपरविप्रतिषेधाद्विशिर्व्यवस्थाहेतुर्न हन्तिः । **[यस्य विभाषा]** ॥

आदि[तश्च] । एवं तर्हीति । रूपाऽभेदेपि यद्युपाधीनां भेदकत्वं न स्याद्योगविभागोऽनर्थकः स्यात् । भेदकत्वे तु तेषां भावादिकर्मणोर्विकल्पविधानात्कर्तरि निष्ठायां प्रतिषेधो न स्यात्,भावादिकर्मणोरपि विकल्पप्रतिषेधयोर्विरोधात्प्रतिषेधो न स्यादिति कर्तृकर्मनिष्ठार्थो योगविभागः । यदि तर्ह्युपाधिर्भेदकस्तत 'उदितो वे'ति

उ.] **आहुरिति ।** अत्राऽरुचिबीजन्तु उपदेशशब्दानुवृत्तिज्ञापनमात्रेणैव चारितार्थ्ये जाते विशिष्टवचनज्ञापकता न युक्ता, भाष्यविरोधश्चेति । **[श्वीदितो निष्ठायाम्]** ॥

यस्य विभाषा । विन्न इति । अभोगप्रत्यययोरिदं, तयोस्तु वित्त इति । **विद्यतिविनत्त्योस्त्विति ।** परे तु तुदादेरपि अनुदात्तत्वादेव निषेधः । विन्दिविद्यतीति हि अनुदात्तगणे भाष्ये उक्तं । तत्र इका निर्देशे नुम **इव** श्नमोऽप्यप्राप्तिरिति अदादिव्यावृत्तयेऽनुस्वारोच्चारणं । तत्र भाष्यप्रामाण्याद्विकरण इति चेत्, नुमोऽपि संभव इति विनिगमनाविरहादुभयोरपि ग्रहणं । 'विन्दतिविन्दिविद्यती'ति पाठे तु स्पष्टमेव तद्ग्रहणमिति चिन्त्योऽयं कैयट इत्याहुः । **अभिधेयादिर्भेदक इति । अभिधेयम्**–अर्थः । विशेषणमात्रमत्रोपाधिशब्देन, नत्वर्थविशेष उपाधिरिति लक्षित इत्यर्थः । **शब्दपरविप्रतिषेधादिति ।** लुग्विकरणपरिभाषाऽनुग्रहाय परसाहचर्यस्याऽत्राश्रयणमिति तत्त्वम् । **[यस्य विभाषा]** ॥

आदितश्च । भाष्ये–**कर्तरीति ।** उपलक्षणमेतत्, कर्मणीत्यपि बोध्यम् । ननु यत्रार्थे विकल्प उक्तस्तत्रैव प्रतिषेधस्तर्हि कुतो नेत्यत्राह—**भावादिकर्मणो-**

क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमस्सक्ताऽविस्पष्टस्वराऽनायासभृशेषु ॥७।२।१८॥

॥*॥ क्षुब्धं मन्थाऽभिधाने ॥*॥ **क्षुब्धं मन्थाभिधाने इति वक्तव्यम् । क्षुभितं मन्थेनेत्येवान्यत्र । क्षुब्ध** ॥ स्वान्त- ॥*॥ स्वान्तं मनोभिधाने ॥*॥ **स्वान्तं मनोभिधाने इति वक्तव्यम् । स्वनितं मनसेत्येवान्यत्र । स्वान्त** ॥ ध्वान्त– ॥*॥ ध्वान्तं तमोऽभिधाने ॥*॥ **ध्वान्तं तमोभिधान इति वक्तव्यम् । ध्वनितं तमसेत्येवान्यत्र । ध्वान्त** ॥ [लग्नं– ॥*॥ लग्नं सक्ताभिधाने ॥*॥ **लग्नं सक्ताभिधाने इति वक्तव्यम् ॥ लगितं सक्तेनेत्येवान्यत्र । लग्न** ॥ म्लिष्ट– ॥*॥ म्लिष्टं विस्पष्टाऽभिधाने ॥*॥ **म्लिष्टं विस्पष्टाऽभिधान इति वक्तव्यम् । म्लेच्छितं विस्पष्टेनेत्येवान्यत्र । म्लिष्ट** ॥ विरिब्ध—॥*॥ विरिब्धं स्वराभिधाने ॥*॥ **विरिब्धं स्वराभिधाने इति वक्तव्यम् । विरेभितं स्वरेणेत्येवान्यत्र । विरिब्ध** ॥–फाण्ट—॥*॥ फाण्टमनायासाभिधाने ॥*॥ **फाण्टमनायासाभिधानेइति वक्तव्यम् । फाणितमेवान्यत्र । फाण्ट** ॥ बाढ—॥*॥ बाढं भृशाभिधाने ॥*॥ **बाढं भृशाभिधाने इति वक्तव्यम्** ॥*॥ **बाहितमेवान्यत्र**] ॥ [क्षुब्धस्वान्त] ॥

प्र.] क्त्वाप्रत्यये भाववाचिनि विकल्पविधानाद्भाववाचिन्यामेव निष्ठायां प्रतिषेधः स्यान्न कर्तृकर्मवाचिन्याम् । नैष दोषः । 'तेन निर्वृत्तं', 'निर्वृत्तेऽक्षद्यूतादिभ्य' इति लिङ्गात्प्रत्ययार्थो भेदकत्वेन नाश्रीयते । [**आदितश्च**] ॥

क्षुब्ध । क्षुब्धमिति । यदि धात्वर्थोपाधित्वेन मन्थादय आश्रीयेन्'मन्थादिसाधने धात्वर्थे क्षुब्धादयो निपात्यन्ते' इति तदा 'क्षुभितं मन्थेने'त्यत्रापि भावे क्तस्येट्प्रतिषेधः स्यादिति समुदायानामभिधेयभावेन मन्थादय इहोपात्ता इति प्रदर्श्यते । द्रवद्रव्यसंपृक्ताः सक्तवो–**मन्थः** । 'क्षुब्धां गिरिनदीमिवे'त्यादयस्तु प्रयोगा असाधव इत्याहुः । **अन्ये** तूपमानमाश्रित्य समर्थयन्ते । **स्वान्तशब्देन बाह्येषु** विषयेष्वविक्षिप्तमनाकुलं मन उच्यते । [**क्षुब्धस्वान्तध्वान्त**] ॥

उ.] **रपीति** । तथाच सूत्रवैयर्थ्यं स्यादिति भावः । **प्रत्ययार्थो भेदकत्वेनेति** । शब्देनाश्रीयमाण, उपाधिरेव भेदक इत्यनेन ज्ञाप्यते । साहचर्यलभ्योऽपि शब्दोपात्त एव । क्तो भाववाचित्वं तु न शब्देनाश्रितमिति भावः । [**आदितश्च**] ॥

क्षुब्धस्वान्त । ननु 'मन्थादयोऽर्थाः सूत्र एव क्रमेणोपात्ता' इति 'मन्थाभिधाने' इत्यादि व्यर्थमत आह–**यदीति** । **द्रवद्रव्येति** । तथा च 'दधिमन्थान्मधुमन्थांश्चे'ति प्रयुज्यते । मन्थादिषु क्षोभणादिक्रियायोगो यथाकथञ्चिद्द्रष्टव्यः । **उपमानमिति** । सादृश्यञ्च यथासंभवं द्रष्टव्यं । सूत्रे **मनःशब्देन** विशिष्टं मन उच्यते, तत्रैव स्वान्तप्रयोगादित्याह—**बाह्येष्विति** । [क्षुब्धस्वान्तध्वान्त] ॥

धृषिशसी वैयात्ये ॥७।२।१९॥

किमिदं वैयात्य इति ? ॥ ॥*॥ वियातभावो वैयात्यम् ॥*॥

दृढः स्थूलबलयोः ॥७।२।२०॥

दृढ [इति] निपातनं किमर्थं, न दृहेर्नैङ्कवतीत्येवोच्येत ॥*॥ दृढनिपातनं नकारहकारलोपार्थं 'परस्य च ढत्वार्थम्' ॥*॥ **दृढनिपातनं क्रियते, [किमर्थं ? ॥] 'नकारहकारलोपार्थम्' । नकारहकारलोपो यथा स्यात् । [परस्य च ढत्वार्थम् '] । परस्य च ढत्वं यथा स्यात् ।** ॥*॥ अनिङ्वचने हि रभावाऽप्रसिद्धिरलघुत्वात् ॥*॥ **अनिङ्वचने हि रभावस्याऽप्रसिद्धिः स्यात् । द्रढीयान् ॥ किं कारणम् ? ॥ 'अलघुत्वात्'** ॥*॥ नलोपवचने च ॥*॥ **नलोपश्च वक्तव्यः । इह च परिद्रढय्य गतः—'ल्यपि लघुपूर्वस्ये'त्ययादेशो न स्यात् । इह च पारिदृढी कन्येति—गुरूपोत्तमलक्षणः ष्यङ्प्रसज्येत ॥**

प्र.] **धृषिशसी । वियातभाव इति ।** विरूपं यातं गमनं चेष्टितं यस्य स वियातोऽविनीतः ॥ [**धृषिशसी वैयात्ये**] ॥

दृढः स्थूल । न दृहेरिति । 'दृह दृहि बृह बृहि वृद्धा'विति धातुषु पठ्यते । तत्र 'दृहः स्थूलबलयो'रिति इट एव प्रतिषेधो विधेय इति मत्वा प्रश्नः । **दृढनिपातनमिति ।** 'दादेर्धातोर्घ' इति घत्वस्य प्रतिषेधो वक्तव्यः स्यात् । **अनिङ्वचने हीति ।** यदीटो घत्वस्य च प्रतिषेधो विधीयेत ततो ढत्वष्टुत्वढलोपेषु यद्यपि 'दृढ' इति रूपं सिध्यति तथापि 'पूर्वत्रासिद्ध'मिति ढलोपस्याऽसिद्धत्वात्संयोगे गुर्विति गुरुसंज्ञायां सत्यां तन्निबन्धनकार्यप्रसङ्गो,लघुसंज्ञाहेतुकार्याऽप्रसङ्गश्च । **द्रढीयानिति ।** रविधौ पृथुमृद्वित्यादिपरिगणनमनपेक्ष्योच्यते। परिगणने हि विशेषणानां प्रत्याख्यानाद्रभावः सिध्यति । **नलोपवचनं चेति ।** दृंहेरिदित्वान्नलोपो न प्राप्नोति । दृहेस्तु स्थूलबलयोरपि 'दृहित'मितीष्यते । 'दृहि बृहि वृद्धा'विति द्वावेव धातू पठ्येते इति वार्तिककाराभिप्रायं केचिदाहुः । तथा च 'बृंहेरच्यनिटी'ति नलोपमुक्तवान् । भाष्यकारस्त्वेतद्वचनप्रत्याख्यानाद्धातुचतुष्टयमिच्छेष । **पारिदृढीति ।** 'इतो मनुष्यजाते' रिति ङीष् ॥ [**दृढः स्थूलबलयोः**] ।

उ.] **दृढः स्थू ।** प्रकृतकार्यात्कार्यान्तरसिद्ध्यर्थं हि निपातनं, तन्नेह पश्याम इत्याशयेनाह—**इहेति** । 'दादेर्धातो'रित्यस्य—'अन्यथे'त्यादिः । भाष्येऽनिङ्वचन इत्युपलक्षणमित्याह—**यदीट इति** । 'लघुसंज्ञाहेत्वि'ति बहुव्रीहिः । **कार्याऽप्रसङ्गश्चेति** । घत्वप्रतिषेधारंभगौरवञ्चेत्यपि बोध्यम् । **दृहेस्त्विति** । दृहेर्निपातनाश्रयणादित्यर्थः । केचिन्मतं खण्डयति—**भाष्यकारस्त्विति** । अत्र नलोपग्रहणाऽप्रत्याख्यानात्तस्य दृहेर्दृहितमित्येवेष्टमिति गम्यते । **एतद्वचनेति । 'बृंहेरच्यनिटी'**त्येतदित्यर्थः । **इतो मनुष्येति ।** 'परिदृढस्याऽपत्यमित्यत इञ् । [**दृढः**] ॥

प्रभौ परिवृढः ॥७।२।२१॥

'परिवृढ' इति किमर्थं निपात्यते, न परिपूर्वाद्बृहेर्नॆङ्ववतील्येवोच्यॆत । ॥*॥ परिवृढनिपातनं च ॥*॥ [परिवृढ इति निपातनं च] ॥ किम् ? ॥ "नकारहकारलोपार्थं परस्य च ढत्वार्थम्, अनिङ्वचने हि रभावाऽप्रसिद्धिर-लघुत्वात्, नलोपवचनं चे"त्येव ॥ परिव्रढीयानिति 'र ऋतो हलादेर्लघो'रिति रभावो न स्यात् । इह च 'परिव्रढय्य गत' इति, 'ल्यपि लघुपूर्वस्ये'त्यया-देशो न स्यात् । इह च 'पारिवृढी कन्ये'ति गुरूपोत्तमलक्षणः ष्यङ्प्रसज्येत ॥

घुषिरविशब्दने ॥ ७।२।२३ ॥

किमर्थमविशब्दन इत्युच्यते, न विशब्दने चुरादिणिचा भवितव्यम् ॥ एवं तर्हि सिद्धे सति यदयमविशब्दन इत्याह तज्ज्ञापयत्याचार्यो-'विशब्दने घुषेर्विभाषा णिज्भवती'ति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ "महीपाल-वचः श्रुत्वा जुघुषुः पुष्यमाणवाः"-एष प्रयोग उपपन्नो भवति ॥

प्र.] प्रभौ परि। परिव्रढय्येति। कथं पुनरत्र ल्यबादेशो यावता परिवृढमाचष्ट-इति णिचि कृते क्त्वाप्रत्यये च क्त्वान्तस्य कृदन्तत्वात्तत्रैव परेरन्तर्भावात्पुनःसमासा-ऽभावः । नैष दोषः । सङ्ग्रामयतेरेव सोपसर्गात्प्रत्ययोत्पत्तिर्नान्यस्मादिति नियमा-त्परिशब्दं पृथक्कृत्वा वृढशब्दादेव णिच् क्रियते ततो वृढिशब्दस्य धातुत्वात् क्त्वाप्रत्यये कृते परेः क्त्वान्तेन कृदन्तेन समास इति सिद्धो ल्यबादेशः। णाविष्ठवद्भावाद्रभावः ॥

घुषिरवि । किमर्थमिति । घुषिरविशब्दार्थ इति भूवादौ पठ्यते स विशब्दने नैव वर्तते । यस्तु 'घुषिर्विशब्दने' इति चुरादौ पठ्यते तस्माण्णिचा भवितव्यम् । केवलश्चेह घुषिरुपात्त इति नार्थो विशब्दनप्रतिषेधेन । **विशब्दनं**-स्वाभिप्रायस्य शब्देन प्रकाशनमुच्यते । **एवं तर्हीति** । अविशब्दन एवेडभावे सिद्धे इत्यर्थः । **किमेतस्येति** । किं निष्ठायामेव 'घुषितं' 'घोषित'मिति रूपद्वयसिद्धिः प्रयोजनम-थाऽन्यदपीति प्रश्नः। **जुघुषुरिति**। घोषयांचक्रुरित्यपि भवति । अन्ये त्वनित्यण्यन्ता-श्चुरादय इति सामान्येन ज्ञाप्यत इत्याहुः। के चिच्चिति स्मृत्यामिति इदित्त्वं चुरादि-णिचोऽनित्यत्वस्य ज्ञापकमाहुः। इदित्त्वेन नुम्विधाने प्रयोजनं 'चिन्तित' इत्यादौ नलो-पाऽभावः । यदि च चुरादिणिज्नित्यं स्यात्तदा 'चिन्त स्मृत्या'मित्येव पठ्येत, णिचि सति नलोपाऽप्रसङ्गात् ॥ [**घुषिरविशब्दने**] ।

उ.] प्रभौ । परेरन्तर्भावादिति। परिवृढशब्दाण्णिचि तदन्तसमुदायस्य धातु-त्वात्तत एव क्त्वेति क्त्वान्तेन समासाऽभाव इत्यर्थः । [**प्रभौ परिवृढः**] ॥

घुषिर । केवलश्चेति । ण्यन्तनिर्देशे तु 'घोषि'रिति स्यादिति भावः । **नार्थ इति ।** अविशब्दन एव घुषेर्वृत्तेरित्यर्थः । **नलोपाऽप्रसङ्गादिति ।** न च ण्यन्तात्क्विपि नलोपाऽभावाय तत्, स्थानिवत्त्वं तु क्वौलुप्ते क्वौ विधौ च निषिद्धमिति

णेरध्ययने वृत्तम् ॥ ७।२।२६ ॥

किं पुनरिदमध्ययनाऽभिधायिकायां निष्ठायां निपातनं क्रियते आहोस्विदध्ययने चेद्वृत्तिर्वर्त्तत इति ? ॥ किं चातः ? ॥ यद्यध्ययनाभिधायिकायां निष्ठायां निपातनं क्रियते, सिद्धं 'वृत्तो गुणः' 'वृत्तं पारायणम्'। 'वृत्तं गुणस्य' 'वृत्तं पारायणस्ये'ति न सिध्यति ॥ अथ विज्ञायते—'अध्ययने चेद्वृत्तिर्वर्त्तत'इति न दोषो भवति ॥ यथा न दोषस्तथास्तु ॥ 'अध्ययने चेद्वृत्तिर्वर्त्तत'इत्यपि वै विज्ञायमाने न सिध्यति ॥ किं कारणम् ? ॥ वृत्तिरयमकर्मकः ॥ अकर्मकाश्चापि ण्यन्ताः सकर्मका भवन्ति, अकर्मकश्चात्र वृतिः ॥

कथं पुनर्ज्ञायतेऽकर्मकोऽत्र वृति'रिति ? ॥ 'अकर्मकाणां भावे क्तो

प्र.] **णेरध्ययने । किं पुनरिति ।** किमभिधेयत्वेन क्तान्तस्याध्ययनमाश्रीयते अथ धात्वर्थसाधनत्वेनेति प्रश्नः। **अध्ययने चेदिति ।** अध्ययनविषये धात्वर्थ इत्यर्थः। **वृत्तो गुण इति ।** अध्ययनसामान्यं वृत्तशब्दस्याभिधेयं न तु तद्विशेष इति विशेषवाचिशब्दप्रयोगाऽविरोधः। **गुणः**—पदक्रमसंहितारूपोऽध्ययनविशेषः, **वृत्तो** निष्पादित इत्यर्थः ।

वृत्तं गुणस्येति । भावे निष्ठा । तस्या अध्ययनं नाभिधेयमिति वृत्तशब्दप्रयोगाऽप्रसङ्गः । **न सिध्यतीति ।** ण्यन्तस्येति भावः । ण्यन्तस्य सकर्मकत्वाद्वृत्तं गुणस्येति भावे निष्ठाया अप्रसङ्गात्, 'तयोरेव कृत्यक्तखलर्थाः' इत्यत्र 'भावेऽकर्मकेभ्य' इत्यनुवर्तनात् । **वृतिरयमिति ।** केवलस्य सकर्मकत्वाशङ्कां निराकृत्य ण्यन्तस्य सकर्मकत्वं प्रतिपादयति । प्रयोज्यमन्तरेण णिचोऽभावात्तेनाऽस्य सकर्मकत्वम् । तत्रैतत्स्याद्भवतु सकर्मकत्वं,कर्मण्येवात्र निष्ठा भवत्वित्यत आह—**अकर्मकश्चात्रेति ।** 'वृत्तं गुणस्ये'त्यादावित्यर्थः। **अकर्मकाणामिति ।** भावे क्तविधानादकर्मकत्वं प्रतीयत इत्यर्थः। कर्मणि क्ते 'वृत्तो गुण' इति सामानाधिकरण्येन भाव्यं, भावे तु-

उ.]वाच्यम्, 'असिद्धवदत्रे'ति णिलोपस्याऽसिद्धत्वात्। अत्रान्येत्वित्यादिमतद्वयेऽप्यरुचिबीजं तु—गणेर्नित्यण्यन्तत्वपर'णेरणा'विति सूत्रस्थभाष्यविरोधः। 'घुषेर्विभाषे'ति प्रकृतसूत्रस्थभाष्यविरोधश्च । इरित्त्वेनैव इदित्त्वेनेव विकल्पस्य सिद्धत्वादेतज्ज्ञापकोपन्यासस्याऽयुक्तत्वापत्तिश्च। कुड्यादीनामिदित्त्ववदेतदिदित्त्वस्याऽपि सत्त्वञ्च। इरित्त्वमपि धात्वन्तरत्वाऽभावबोधनाय।तस्माच्चिन्ततीत्यादेः साधुत्वं चिन्त्यमेव। [घुषिर]॥

णेरध्ययने । किमभिधयत्वेनेति । अध्ययनशब्दो बाहुलकात्कर्मल्युडन्तो ग्रन्थवाचीति भावः । अतएव वक्ष्यति—**संहितारूपोऽध्ययनविशेष इति ।**

नन्वेवमध्ययने चेद्वृत्तिर्वर्तत इति भाष्यमनुपपन्नमत आह—**अध्ययनविषये इति । भावे निष्ठेति ।** 'वृत्तङ्गुणस्ये'ति 'नपुंसके भावे क्तस्य योगे उपसङ्ख्यान'मिति षष्ठी, शेषलक्षणा वा। **ण्यन्तस्येतीति।** 'णे'रित्युक्त्या ण्यन्तस्येदं निपातनमिति लभ्यत इत्यर्थः । 'वृतिरय'मित्यादेर्वैयर्थ्यं परिहरति—**केवलस्येति ।** अकर्मकाणां

भवती'त्येवमत्र भावे क्तो भवति। तत्र उदितः क्त्वि विभाषा,'यस्य विभाषे'ति इट्प्रतिषेधो भविष्यति ॥ अथ णिग्रहणं किमर्थम् ? ॥

॥*॥ वृत्तनिपातने णिग्रहणमण्यन्तस्याऽवधारणप्रतिषेधार्थम् ॥*॥ वृत्तनिपातने णिग्रहणं क्रियते ॥ [किं प्रयोजनम्? ॥ 'अण्यन्तस्याऽवधारणप्रतिषेधार्थम्'] । अण्यन्तस्याऽवधारणं माभूदिति ॥ कैमर्थक्यान्नियमो भवति ? ॥ विधेयं नास्तीति कृत्वा ॥ इह चास्ति विधेयं ॥ किम् ? ॥ ण्यधिकाद्वृतेरिट्प्रतिषेधो विधेयः । तत्राऽपूर्वो विधिरस्तु नियमोऽस्त्वित्यपूर्व एव विधिर्भविष्यति न नियमः ॥ कुतो नु खल्वेतदधिकार्थे आरम्भे सति ण्यधिकस्य भविष्यति न पुनः सनधिकस्य वा स्याद्यङधिकस्य वेति ? ॥ तस्माण्णिग्रहणं कर्तव्यम् ॥ अथ किमर्थं निपातनं क्रियते ? ॥*॥ निपातनं णिलोपेड्गुणप्रतिषेधार्थम् ॥*॥ निपातनं क्रियते । [किमर्थम् ? ॥ णिलोपेड्गुण-

---

प्र.] क्ते शेषविवक्षायां षष्ठी भवति। तस्मान्नैतण्ण्यन्तस्य वृते रूपमपि तु केवलस्य। तस्य च 'यस्य विभाषे'तीट्प्रतिषेधोऽस्त्येव । एवं चाध्ययनमभिधेयं भवतु, विषयो वेति न कश्चिद्दोषः। अत्राहुः—'वृत्तं गुणस्ये'ति सकर्मकादपि ण्यन्तान्नपुंसके भावे क्त इति भावे क्तोऽस्त्येव । यस्तु 'निष्ठे'ति भूते क्तः स एवाऽकर्मकेभ्यो भावे भवति । 'वृत्तं गुणस्ये'त्यत्र च वर्तमानत्वं प्रतीयते न भूतत्वम् । अत्रोच्यते—'नपुंसके भावे क्त' इत्ययमपि क्तः सकर्मकेभ्यो न भवति, 'तयोरेव कृत्यक्तखलर्थाः' इत्यत्र क्तमात्रस्य ग्रहणात्तत्र च भावे चाकर्मकेभ्य इत्यनुवर्तनात्। अवश्यं चैतद्बोद्धव्यम्,अन्यथा 'नपुंसके भावे उपसङ्ख्यान'मित्यस्मिन् 'शेषविज्ञानात्सिद्ध'मिति प्रत्याख्याते सकर्मकाद्भावे क्ते विधीयमाने कर्मणो द्वितीया प्रसज्येत,—'ग्रामं गतमोदनं भुक्त'मिति ।

अथ णिग्रहणमिति। केवलस्य 'यस्य विभाषे'ति प्रतिषेधस्य सिद्धत्वात् सामर्थ्याण्ण्यन्तस्य निपातनं विज्ञास्यते । **वृत्तनिपातन इति** । असति णिग्रहणे ण्यन्तस्यैवेदं निपातनं न तु सन्नन्तस्य यङन्तस्य वेति निश्चयाऽभावाद्विधिरशक्योऽभ्युपग-

---

उ.] भावे क्तो भवतीत्यादेरकर्मकत्वे हेतुत्वमुपपादयति—**भावे क्तेति**। **एवञ्चेति**। 'वृत्तं गुणस्ये'त्यस्य सिद्धत्वादिति भावः। 'वृत्तं गुणस्ये'त्यत्र निष्ठेति क्तप्रत्ययः किं न स्यादत आह—**वृत्तं गुणस्येत्यत्रेति**। **प्रसज्येत—ग्रामं गतमिति** । अत्र गत्यर्थाकर्मकेति क्ते क्तोऽधिकरणे चेति च क्तेऽयं प्रयोगो दुर्वार एव। अत एव 'भ्रान्तं देश'मित्यादिसिद्धिरिति चिन्त्यमिदमिति केचित्। ननु केवलस्य निपातनाऽभावाय णिग्रहणं स्यादत आह—**केवलस्येति** । **विधिरशक्य इति**। ण्यन्तस्यैव वृतेर्ग्रहणे हि तस्य निष्ठायां णिलोपेट्प्रतिषेधयोर्लक्षणान्तरेणाऽप्राप्त्या तद्विध्यर्थमिदं स्यान्नाऽन्यथेत्यर्थः ।

प्रतिषेधार्थम्'] । णिलोपार्थमिड्गुणप्रतिषेधार्थं च ॥ [णेरध्ययने वृत्तम्] ॥

वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ॥ ७।२।२७ ॥

अथ दान्तशान्तयोः किं निपात्यते ? ॥*॥ दान्तशान्तयोरुपधादीर्घत्वं च ॥*॥ [दान्तशान्तयोरुपधादीर्घत्वञ्च]॥ किं 'च' ? ॥ 'णिलोपेड्प्रतिषेधौ च' ॥ उपधादीर्घत्वमनिपात्यं, वृद्ध्या सिद्धम् ॥ न सिध्यति, 'मितां ह्रस्व' इति ह्रस्वत्वेन भवितव्यम् ॥ एवं तर्ह्यनुनासिकस्य क्विझलोः क्ङितीत्येवात्र दीर्घत्वं भविष्यति ॥ न सिध्यति ॥ किंकारणम् ? ॥ णिचा व्यवहितत्वात् ॥ णिलोपे कृते नास्ति व्यवधानम् ॥ स्थानिवद्भावाद्व्यवधानमेव ॥ प्रतिषिध्यतेऽत्र स्थानिवद्भावो 'दीर्घविधिं प्रति न स्थानिव'दिति ॥

अथ स्पष्टच्छन्नयोः किं निपात्यते ? ॥*॥ स्पष्टच्छन्नयोरुपधाह्रस्वत्वं च ॥*॥ [स्पष्टच्छन्नयोरुपधाह्रस्वत्वं च] ॥ किं 'च' ? ॥ णिलोपेड्प्रतिषेधौ च ॥

रुष्यमत्वरसंघुषास्वनाम् ॥७।२।२८॥

॥*॥ घुषिस्वनोर्वावचनमिड्प्रतिषेधाद्विप्रतिषेधेन ॥*॥ घुषिस्वनोर्वावचनमिड्प्रतिषेधाद्भवति विप्रतिषेधेन । घुषेरिड्प्रतिषेधस्याऽवकाशः—असंपूर्वादविशब्दनम्—घुष्टा रज्जुः घुष्टो माथः । वावचनस्यावकाशः—संपूर्वाद्विशब्दनम्—संघुष्टं वाक्यं संघुषितं वाक्यम् । संपूर्वादविशब्दने उभयं प्राप्नोति—

प्र.] न्तुमिति नियमो विज्ञायेत। णिलोपार्थमिति । 'निष्ठायां सेटी'ति वचनादनिटि निष्ठायां णिलोपो न प्राप्नोति । 'णेरनिटी'त्यनेनापि तक्रकौण्डिन्यन्यायेन सेटि निष्ठायां विधीयमानेन णिलोपेनाऽनिटि निष्ठायां णिलोपस्य बाधनात्, प्रत्ययलक्षणेन प्राप्तस्य गुणस्येटश्चाऽभावो निपात्यते । [णेरध्ययने वृत्तम्] ॥

वा दान्त । **उपधादीर्घत्वमिति** । 'पूर्वत्रासिद्धे न स्थानिव'दिति वक्तव्यम् । तस्मिंश्चोच्यमाने द्विर्वचनादीनि वरेयलोपस्वरवर्जं न वक्तव्यानीति दीर्घविधौ स्थानिवत्त्वनिषेधाऽभावादनुनासिकस्य क्विझलोः क्ङितीति दीर्घत्वाऽप्रसङ्गः । सूत्रारम्भाश्रयेण तु दीर्घसिद्धिं भाष्यकृन्मन्यते ॥ [वा दान्तशान्त] ॥

उ.] **नियम इति** । 'अध्ययन एवेत्येव'मित्यर्थः। भाष्ये–**णिलोपार्थमिति** । वस्तुतो णिलुगेव निपात्यः । एवं हि गुणप्रतिषेधो न निपात्यः । यद्यपि 'वृत्तो गुण' इति प्रयोगोऽन्तर्भावितण्यर्थमादाय सिद्धस्तथापि ण्यन्तस्याऽनिष्टप्रयोगनिवृत्त्यर्थं सूत्रमिति तत्त्वं । **तक्रकौण्डिन्येति** । येन नाप्राप्त्यभावादिदं चिन्त्यं । 'निष्ठायां सेटी'त्यत्र 'सेटी'ति योगविभागेन सेट्येव निष्ठायामिति नियमान्नेति वक्तुं युक्तम्। अतएव तत्र सूत्रे भाष्ये उक्तं–'सेड्ग्रहणमनिटि प्रतिषेधार्थं—संज्ञपितः पशु'रिति । [**णेरध्य**]।

वा दान्त । 'द्विर्वचनादीनि वरेयलोपस्वरवर्जं ने'ति पाठः । **सूत्रारंभाश्रयेणेति** । 'न पदान्ते'ति सूत्रे दीर्घग्रहणारंभेत्यर्थः । **भाष्यकृन्मन्यत इति** । वस्तुत

सघुष्टा रज्जुः संघुषिता रज्जुः । वावचनं भवति विप्रतिषेधेन ॥

स्वन इट्प्रतिषेधस्यावकाशः—अनाङ्पूर्वान्मनोऽभिधानं—स्वान्तं मनः । वावचनस्यावकाशः—आङ्पूर्वादमनोऽभिधानम्—आस्वान्तो देवदत्तः आस्वनितो देवदत्तः । आङ्पूर्वान्मनोभिधान उभयं प्राप्नोति—आस्वान्तं मनः आस्वनितं मनः । वावचनं भवति विप्रतिषेधेन ॥ [रुष्यमत्वरसंघुषास्वनाम्] ॥

हृषेर्लोमसु ॥७।२।२९॥

॥*॥ हृषेर्लोमकेशकर्तृकस्य ॥*॥ हृषेर्लोमकेशकर्तृकस्येति वक्तव्यम् । हृष्टानि लोमानि हृषितानि लोमानि । हृष्टं लोमभिः हृषितं लोमभिः । हृष्टाः केशाः हृषिताः केशाः । हृष्टं केशैः हृषितं केशैः ॥ [॥*॥ विस्मितप्रतिघातयोः ॥*॥] ॥ विस्मितप्रतिघातयोरिति वक्तव्यम् । हृष्टो देवदत्तः । हृषितो देवदत्तः । हृष्टा दन्ताः । हृषिता दन्ताः ॥ [हृषेर्लोमसु] ॥

अपचितश्च ॥७।२।३०॥

'अपचित' इति किं निपात्यते ? ॥ [॥*॥ चायेश्चिभावश्च ॥*॥] चायेश्चिभावो निपात्यते । अपचितः । [॥*॥ क्तिनि नित्यम् ॥*॥] ॥ क्तिनि नित्यमिति वक्तव्यम् । अपचितिः ॥ [अपचितश्च] ॥

आर्धधातुकस्येड्वलादेः ॥७।२।३५॥

'आर्धधातुक'ग्रहणं किमर्थम् ? ॥ वलादिग्रहणमार्धधातुकविशेषणं यथा विज्ञायेत—'वलादेरार्धधातुकस्ये'ति ॥ अथाऽक्रियमाणे आर्धधातुकग्रहणे कस्य वलादिग्रहणं विशेषणं स्यात् ? ॥ अङ्गस्येति वर्ततेऽङ्गविशेषणम् ॥

तत्र को दोषः ? ॥ अङ्गस्य वलादेरादित इड्सज्येत—अडाड्वत् । तद्यथा—अडाटावङ्गस्यादितो भवतस्तद्वत् ॥ क्रियमाणेऽप्यार्धधातुकग्रहणेऽनिष्टं शक्यं

प्र.] हृषे [र्लोमसु] । सूत्रकारो लोमशब्दं सामान्यशब्दं मत्वा केशग्रहणं न कृतवान् । तथा च 'लोमनखं स्पृष्ट्वा शौचं कर्तव्य'मित्युक्ते केशस्पर्शेऽपि शौचं क्रियते । वार्तिककारस्तु मूर्द्धजाः केशाः, अङ्गान्तरजातानि लोमानीति भेदं मत्वा आह—हृषेर्लोमकेशकर्तृकस्येति । [हृषेर्लोमसु] ॥

अपचित । चिभाव इति । एतच्चोपलक्षणमिट्प्रतिषेधस्यापि निपातनात् । क्तिनीति । 'क्तिन्नावादिभ्य' इति क्तिन्प्रत्ययोऽयम् , अन्यथा 'गुरोश्च हल' इत्यकारः स्यात् ॥

उ.]एतद्भाष्याद्वरेयलोपस्वरवर्जमित्यत्र दीर्घग्रहणमप्युपलक्ष्यते इति **परे** । [**वादान्त**] ।

हृषे । भेदं मत्वेति । तथा च प्रयोगोऽपि'—केशश्मश्रुलोमनखान्युदवसन्नानि कुर्वि'ति ।' [वा दान्त]

विज्ञातुं—वलादेरार्धधातुकस्य यदङ्गमिति । अक्रियमाणे चेष्टम्—'अङ्गस्य यो-वलादि'रिति ॥ किं चाङ्गस्य वलादिः ? ॥ निमित्तं,—यस्मिन्नङ्गमित्येतद्भवति ॥ कस्मिन्नङ्गमित्येतद्भवति ? ॥ प्रत्यये ॥ यावता क्रियमाणेऽपि चाऽनिष्टं विज्ञायते, अक्रियमाणे चेष्टं, तत्राऽक्रियमाणे एवेष्टं विज्ञास्यामः ॥ इदं तर्हि प्रयोजनम्—इह मा भूत्—आस्ते शेते ॥ एतदपि नास्ति प्रयोजनं—रुदादिभ्यः सार्वधातुक इत्येतन्नियमार्थं भविष्यति—'रुदादिभ्य एव सार्वधातुक इड्भवति नान्येभ्य' इति ॥ एवमपि वृक्षत्वं वृक्षता—अत्र प्राप्नोति ॥ नैष दोषः ॥ धातोरिति वर्तते ॥ एवमपि लूभ्यां पूभ्याम्—अत्र प्राप्नोति ॥ एवं तर्हि विहितविशेषणं धातुग्रहणं—धातोर्यो विहितः ॥ ननु च धातोरेवाऽयं विहितः ॥ न चायं 'धातो'रित्येवं विहितः ॥ क्व पुनर्धातुग्रहणं प्रकृतम् ? ॥ 'ऋत इद्धातो'रिति ॥ तद्वै षष्ठीनिर्दिष्टं पञ्चमीनिर्दिष्टेन चेह विहितः शक्यते विशेषयितुम् ॥ अथेदानीं षष्ठीनिर्दिष्टेनचापि विहितः शक्यते विशेषयितुम् । शक्यमार्धधातुकग्रहणमकर्तुमिति ॥ * ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमाध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥७।२।१॥

प्र.] आर्धधातु । रुदादिभ्य एवेति । 'सार्वधातुक एवे'ति तु नियमो 'रुदविदे'ति क्त्वासनोः कित्त्वविधानान्न भविष्यति,अनिटः सनो रुदादेर्हलन्ताच्चेति कित्त्वस्य सिद्धत्वात्, क्त्वोप्यनिट औपदेशिककित्त्वसद्भावात् । लूभ्यामिति । क्विबन्ता धातुत्वं न जहति, रूपार्थाऽवैकल्यात् । विहितविशेषणमिति । यद्यपि ऋत इद्धातोरित्यत्र धातुशब्दोऽर्थपदार्थकस्तथापि सदृशशब्दान्तरानुमानादिह धातोरित्येतत्स्वरूपपदार्थकमाश्रीयते—धातोरित्येवं विहितस्येति । पञ्चमीनिर्दिष्टेनेति । पञ्चम्यन्तानुकरणे धातोरित्यस्मिन् 'धातोरित्येवं विहितस्ये'ति लभ्यते नान्यथा । अथेदानीमिति । धातुशब्दोऽत्र धातुशब्दस्यानुकरणं, तेन धातुशब्दस्य यः संबन्धी प्रत्ययस्तस्येड् भवति । यश्च धातुशब्दव्यापारोत्पन्नः स तत्संबन्धी भवति ॥
इति कैयटकृते महाभाष्यप्रदीपे सप्तमस्य द्वितीये प्रथममाह्निकम् ॥ ७।२।१।

उ.] आर्धधातुकस्ये । रूपार्थेति । तत्र रूपाऽवैकल्यं स्पष्टमेव । अर्थो यद्यपि कर्तृरूपोऽधिकस्तथापि धातुत्वप्रयोजकक्रियारूपस्याऽवैकल्यमस्त्येवेति भावः । यद्यपि तस्या उपसर्जनत्वं, तथाप्यत्वसन्तस्येति सूत्रेऽधातोरिति निषेधेन भूवादिसूत्रे उपसर्जनभूताया अपि ग्रहणज्ञापनान्न दोषः । सदृशशब्दान्तरेति । शब्दाधिकारपक्ष आश्रीयत इत्यर्थः । पञ्चम्यन्तानुकरण इति । प्रत्ययविधौ पञ्चम्यन्तस्य धातोरित्यस्याधिकारादिति भावः । *इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते सप्तमस्य द्वितीये पादे प्रथममाह्निकम् ॥ * ७ । २ १ ।

स्नुक्रमोरनात्मनेपदनिमित्ते ॥७।२।३६॥

॥*॥ स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसङ्ख्यानम् ॥*॥ **स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसङ्ख्यानं कर्तव्यम्। प्रस्नविता प्रस्नवितुम् प्रस्नवितव्यम्। प्रक्रमिता प्रक्रमितुम् प्रक्रमितव्यम्॥ तत्तर्हि वक्तव्यम्?॥**

न वक्तव्यम्। अविशेषेण स्नुक्रमोरिडागममुक्त्वा 'आत्मनेपदपरे ने'ति वक्ष्यामि। ॥*॥ आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधः ॥*॥ **आत्मनेपदपरप्रतिषेधे[च] तत्परपरसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः।** तत्परपरे

प्र.] **स्नुक्रमोरना।** स्नुक्रमोरुदात्तत्वादिटि सिद्धे नियमार्थं वचनमनात्मनेपदनिमित्तत्वे एवेड्यथा स्यात्, आत्मनेपदनिमित्तत्वे मा भूत्। किति सनि च प्रस्नुतः प्रसुस्नूषतीति, क्रमेश्च निष्ठायां क्रान्त इति, श्र्युकः किति सनि ग्रहगुहोश्च यस्य विभाषेति प्रतिषेध एव भवति। पुरस्तात्प्रतिषेधस्य ह्येतदेव प्रयोजनम्-इण्मात्रस्य प्रतिषेधो यथा स्यादिति। तेन प्रतिषेधबाधनार्थमेतन्न भवति। अथ वा आर्धधातुकस्येड्वलादेरित्यस्यानुवर्तनादयमर्थो भवति–यत्र पूर्वेण इड्विहितस्तत्रैवानेन भवति। पूर्वसूत्रेण (च) प्रतिषेधविषयपरिहारेण इड्विधानात्तत्रैवायं विधिः प्रवर्तमानो नियमाय संपद्यते। अथ वा 'आत्मनेपदनिमित्तत्वे न भवती'ति प्रसज्यप्रतिषेध आश्रीयत इति किदादौ न दोषः। **प्रस्नवितेति।** य एवात्मनेपदविषयः स्नौतिः स एवात्रापि योग्यताश्रयणेन निमित्तव्यवहारदर्शनादात्मनेपदनिमित्तं भवतीति इण्न प्राप्नोतीति वचनम्। कर्मकर्तृविषयश्चाऽत्र स्नौतिरिति कर्मकर्तर्यात्मनेपददर्शनाद्भवति तद्योग्यः। एवं प्रस्नवितुं प्रस्नवितव्यमिति भावकर्मविषयत्वाद्भावकर्मणोरात्मनेपदोपलम्भादात्मनेपदनिमित्तं स्नौतिः। **प्रक्रमितेति।** आदिकर्मणोऽन्यत्र प्रशब्दो विज्ञेयः। आदिकर्मणि तु 'कर्तरि चात्मनेपदविषयात्कृती'ति प्रतिषेधेन भाव्यम्। **प्रक्रमितुं प्रक्र-**

उ.] **स्नुक्रमो। आत्मनेपदेति।** प्रस्नोषीष्ट प्रक्रंसीष्टेत्यादौ। ननु कित्सनोः 'श्र्युक'-इत्यादि निषेधे प्राप्ते विध्यर्थमेवेदं स्यादत आह–**किति सनि चेति।** 'श्र्युक' इत्यादिबाधनार्थत्वं तु नास्त्येवेत्याह–**पुरस्तादिति।** निषेधाऽविषये पूर्वेण सिद्ध्या निषेधविषये चाऽस्याऽप्राप्तावस्याऽचरितार्थत्वादनेन नियम इतिभावः। **अथवेति।** अन्यथा निषेधबाधकतया विधित्वमेव स्यान्न नियमत्वं। विधिनियमसंभवे विधेर्ज्यायस्त्वादिति भावः। **अनुवर्तनादिति।** तदनुवृत्तिश्च विषयनिर्देशार्था। तत्फलितमाह–**यत्रेत्यादि।** अनुवृत्तावेवं व्याख्याने च गौरवादाह—**अथवेति। प्रसज्यप्रतिषेध इति।** एवञ्च प्रतिषेधार्थमेव सूत्रं न विध्यर्थं नापि नियमार्थमिति किदादौ न दोष इति भावः। एवं हि पूर्वसूत्रात्पूर्वमेव पठेदिति चिन्त्यम्। **योग्यताश्रणेनेति।** न तु कुर्वद्रूपताश्रयणेनैवेत्यर्थः। कुसूलस्थेष्वपि बीजेष्वङ्कुरनिमित्तानीति व्यवहारात्।

ननु कर्तरि तृचो विधानेन भावकर्मविषयत्वाऽभावात्कथमात्मनेपदयोग्यता स्नौतेरत आह–**कर्मकर्तृविषयश्चेति। अत्र**–प्रस्नवितेत्यत्र। **भावेत्यादि।** तुमुन्तव्ययोर्भावादौ

तावत्–प्रसुस्नूषिष्यते। प्रचिक्रंसिष्यते। सीयुटि–**प्रस्नोषीष्ट प्रक्रंसीष्ट।** एकादेशे–**प्रस्नोष्यन्ते। प्रक्रंस्यन्ते। एकादेशे कृते व्यपवर्गाऽभावान्न प्राप्नोति॥ अन्तादिवद्भावेन व्यपवर्गः॥ उभयत आश्रये नान्तादिवत्॥**

प्र.] **मितन्यमिति।** भावकर्मविषयत्वात्प्रारम्भविषयत्वाद्वा आत्मनेपदनिमित्तत्वम्।

प्रसुस्नूषिष्यत इति। आत्मनेपदपरः स्यस्तत्परः सन्निति स्येन व्यवधानात्सन इड्प्रतिषेधो न प्राप्नोति। ननु च व्यवहितेऽपि परशब्दस्य वर्तनात्प्रतिषेधो भविष्यति। नैतदस्ति। 'आत्मनेपदपरे ने'ति न सूत्रन्यासः, किं तर्ह्यर्थप्रदर्शनपरमेतत्। 'स्नुक्रमोर्नात्मनेपदे' इति तु सूत्रन्यासः। तत्र 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति परिभाषोपस्थानाद्व्यवहितस्य प्रतिषेधाऽप्रसङ्गः। ननु च 'सनिग्रहगुहोश्चे'ति प्रतिषेधो भविष्यति। **न ह्ययमिड्विधिः** पूर्वप्रतिषेधविषय इति प्रागेवोक्तम्। **यदप्युक्तम्**–अविशेषेणेति,–तस्याऽयमर्थः–पूर्वसूत्रेण यः स्नुक्रमोरविशेषेणेडुक्तस्तमनूद्यात्मनेपदपरे प्रतिषेधो विधेयः। एवं तर्हि 'प्रचिक्रंसिष्यते' इत्येतदेवात्रोदाहरणं, स्नौतिस्तु साहचर्यादुदाहृतः। **प्रस्नोषीष्टेति।** आत्मनेपदमेवाऽत्र सीयुडाद्यार्धधातुकं, सीयुटस्तद्भक्तत्वात्, न त्वात्मनेपदपरमिति प्रतिषेधाऽप्रसङ्गः। **प्रस्नोष्यन्त इति।** अत्राऽन्तरङ्गत्वान्नित्यत्वाच्च पूर्वमेकादेशेन भाव्यम्। इड्प्रतिषेधस्तु बहिरङ्गोऽनित्यश्च। 'वार्णादाङ्गं बलीय' इत्यनेन त्वेकनिमित्ता प्रवृत्तिर्वार्णस्य प्रतिषिध्यते, न तु भिन्ननिमित्तेति स्या-

उ.] विधानादिति भावः। **आदिकर्मणि त्विति।** वार्तिके कर्तरीति कृतो विशेषणम्, आदिकर्मणि प्रारंभविषयत्वादात्मनेपदविषयत्वं बोध्यम्। नन्वादिकर्मणोऽन्यत्र प्रशब्देऽपि नेदमुदाहरणं युक्तम्। अनात्मनेपदनिमित्तत्व एवेट् नात्मनेपदनिमित्तत्व इत्यर्थे हि आत्मनेपदनिमित्तत्वादिडागमाऽप्राप्तौ कृत्युपसङ्ख्यानं कर्तव्यमिति प्रक्रान्तम्। एवञ्चास्य कथमात्मनेपदनिमित्तत्वं, कृत्याद्यादायात्मनेपदनिमित्तत्वे तु वक्ष्यमाणवार्तिकेन निषेधो दुर्वार इति चेन्न, दृष्टान्तार्थं तत्सत्त्वात्। प्रक्रमितेतिवत् प्रक्रमितुमित्यादीष्यते तन्न सिध्येदिति 'कृती'ति वक्तव्यमित्याशयात्। वस्तुतस्तदपरामर्शेनेदं भाष्यमिति बोध्यम्। **प्रारंभविषयत्वाद्वेति।** तत्र हि 'प्रोपाभ्यां समर्थाभ्या'मित्यात्मनेपदं, कर्तृकृतोऽभावान्निषेधविषयाऽभाव इति बोध्यम्।

अविशेषेणेति। 'स्नुक्रमोरात्मनेपदे परे ने'ति न्यासे तात्पर्यम्। 'तत्परपरे'ति वार्तिकस्यात्मनेपदं परमस्मात् तत्परं यस्य तस्य प्रतिषेधो वक्तव्य इत्यर्थः। तदाह–**आत्मनेपदपर इति। ननु चेति।** 'आत्मनेपदे परे ने'ति न्यासे परशब्दोपादानसामर्थ्येन 'तस्मिन्नि'ति परिभाषानुपस्थानादिति भावः। नन्वस्य कित्सनादिप्रतिषेधविषय आरम्भात्कथमेतद्विषये प्रतिषेधप्राप्तिरत आह—**न ह्ययमिति।** नानेनेड्विधीयते किन्तर्हि निषेध एव, विधिस्तु पूर्वेणैवेति तस्य प्रतिषेधः स्यादेवेति भावः। अत्रार्थे भाष्यं योजयति—**यदपीति।** 'स्नुक्रमोर्वलाद्यार्धधातुकस्य आत्मनेपदे परत इण्ने'ति वाक्यार्थ इति भावः। **एकनिमित्तेति।** यथा 'कारक' इत्यत्र

एवं तर्ह्येकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यपवर्गः ॥ तत्परपरसीयुटोस्तर्हि प्रतिषेधो वक्तव्यः ॥*॥ सिद्धं तु स्नोरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् ॥*॥ **सिद्धमेतत् ॥ कथम् ? ॥ ['स्नोरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात्' ।] । स्नोरात्मनेपदेन समानपदस्थस्य नेड्भवतीति वक्तव्यम् । यदि 'स्नोरात्मनेपदेन समानपदस्थस्येण्न भवती'त्युच्यते—प्रस्नवितेवाचरति 'प्रस्नवित्रीयते'—अत्र न प्राप्नोति ॥**

॥*॥ बहिरङ्गत्वाच्च ॥*॥ **बहिरङ्गलक्षणमत्रात्मनेपदम् ॥**

॥*॥ क्रमेश्च ॥ * ॥ **क्रमेश्चात्मनेपदेन समानपदस्थस्येण्न भवतीति वक्तव्यम् ॥ अथ किमर्थं क्रमेः पृथग्ग्रहणं क्रियते न 'स्नुक्रमिभ्या'मित्येवोच्येत ?॥ 'कर्तरि चात्मनेपदविषयात्कृति ने'ति वक्ष्यति तत्क्रमेरेव यथा स्यात्स्नोर्मा**

प्र.] देवेडागमः । अत एवेड्यपि कर्तव्ये 'वार्णादाङ्ग'मित्यस्याऽनुपस्थानम् । **एकादेशः पूर्वविधाविति** । ननु चार्धधातुकस्येट्प्रतिषेध उच्यते, न चार्धधातुकमेकादेशात्पूर्वं, व्यपवर्गाऽभावात् । अत्राहुः—'पूर्वस्मादपि विधिः पूर्वविधि'रिति समासाश्रयाददोषः। **प्रस्नवित्रीयत इति** । तृजन्तात् क्यङ् । 'रीङृत'इति रीङादेशः । **बहिरङ्गलक्षणमिति** । तृजन्तादाचारलक्षणे क्रियान्तरे क्यङ् । तत आत्मनेपदम् । इडागमस्तु पूर्वमेव तृजन्तावस्थायामुत्पन्नो न शक्यो निवर्तयितुमित्यर्थः। यद्येवं प्रचिक्रंसिष्यतइत्यत्रा(प्या)त्मनेपदस्य बहिरङ्गत्वात्प्रतिषेधो न प्राप्नोति । नैष दोषः । 'समानपदस्थस्ये'ति वचनादिडागमेन पदावस्थापेक्षणीया। तत्र तृचि विभक्तावुत्पन्नायां लब्धेऽपि पदत्वे आत्मनेपदस्याऽसन्निधानादिडागमः प्रवर्तते । 'प्रचिक्रंसिष्यते'इत्यत्र तु पदावस्थायामेवात्मनेपदसंनिधानात्प्रतिषेधप्रवृत्तिः । **आत्मनेपदविषयादिति** ।

उ.] यण्वृद्ध्योः । अत्र तु प्रत्ययस्येट्, तदवयवस्यैकादेश इति भिन्नाश्रयत्वमिति भावः । **निमित्तशब्दः**—षष्ठीनिर्दिष्टपरः । **ननु चार्धधातुकस्येति** । आदेशावस्थायां व्यपवर्गाऽभावादचः पूर्वत्वमार्धधातुकस्य न संभवति । स्थान्यवस्थायामपि न, द्वयोः स्थानित्वादिति चोद्याशयः । **पूर्वस्मादपीति** । व्यवहितेऽपि पूर्वशब्दस्य वृत्तेः, एकादेशात्तत्स्थानिनो वा पूर्वस्माद्धातोः परस्य विधिरस्तीति न दोषः । वस्तुतः षष्ठीसमासेऽपि किञ्चित्स्थानिनः पूर्वत्वमस्त्येवेति न दोष इति भाष्याशयः । स्थानिभूताच्त्वावच्छिन्नात्पूर्वग्रहणे तु न मानं । ध्वनितं चेदं 'कृदतिङ्'सूत्रे भाष्ये ।

स्नोरात्मनेपदेनेति । स्नुघटितसमुदायघटकमात्मनेपदमादाय यावतः पदसंज्ञा तत्स्थस्य स्नोः परस्य वलाद्यार्धधातुकस्य नेडित्यर्थः । **अत्र न प्राप्नोतीति** । इडित्यर्थः। बहिरङ्गलक्षणत्वाच्चेत्यस्य 'अयं न दोष'—इति शेषः । चस्त्वर्थे। **न शक्य इति** । उत्पन्ननिवृत्तेरशक्यत्वादित्यर्थः । **प्रतिषेधप्रवृत्तिरिति** । वार्तिके प्रत्या-

भूत् । व्यतिप्रस्नविता । व्यतिप्रस्नवितारौ । व्यतिप्रस्नवितारः ॥*॥ कर्तरि चात्मनेपदविषयात्कृति प्रतिषेधः ॥*॥ कर्तरि चात्मनेपदविषयात्कृति प्रतिषेधो वक्तव्यः । प्रक्रन्ता । उपक्रन्ता ॥ तत्तर्हीदं बहु वक्तव्यम्—'स्नोरात्मनेपदेन समानपदस्थस्येण्न भवती'ति वक्तव्यम् । 'क्रमेश्चे'ति वक्तव्यम् । 'कर्तरि चात्मनेपदविषयात्कृती'ति वक्तव्यम् । सूत्रं च भिद्यते ॥

यथान्यासमेवाऽस्तु । ननु चोक्तं–"स्नुक्रमोरनात्मनेपदनिमित्ते चेत्कृत्युपसङ्ख्यान"मिति ॥ नैष दोषः । स्नुक्रमी एवात्मनेपदनिमित्तत्वेन विशेषयिष्यामः,—'न चेत्स्नुक्रमी आत्मनेपदस्य निमित्ते' इति ॥ कथं पुनर्धातुर्नामाऽऽत्मनेपदस्य निमित्तं स्यात् ? ॥ धातुरेव निमित्तम् । आह हि भगवान्–'अनुदात्तङित आत्मनेपदम्' 'शेषात्कर्त्तरि परस्मैपद'मिति ॥

यत्र तर्हि धातुर्नाश्रीयते–'भावकर्मणो'रिति ? ॥ अत्रापि धातुरेवाश्रीयते—'भावकर्मवृत्ताद्धातो'रिति ॥ कथ प्रक्रमितव्यम् उपक्रमितव्यम् ? ॥ सत्यात्मनेपदे निमित्तशब्दो वर्तते ॥ कथं–प्रक्रन्ता उपक्रन्ता ॥ तस्मादसत्यपि ॥

कथं प्रक्रमितव्यम् । उपक्रमितव्यम् । तस्मात्सत्येव ॥ कथं प्रक्रन्ता उपक्रन्ता ? ॥ वक्तव्यमेवैतत्—"कर्त्तरि चात्मनेपदविषयात्कृती"ति ॥

प्र.]तद्योग्यादिरर्थः । प्रक्रन्तेति । प्रारम्भविषयत्वात्क्रमेः 'प्रोपाभ्यां समर्थाभ्या'मित्यात्मनेपदविषयत्वम् । स्नुक्रमी एवेति । 'अनात्मनेपदनिमित्ते'इति प्रथमाद्विर्वचनं न सप्तमी । सप्तम्यां हि भावादेरात्मनेपदनिमित्तस्याश्रयणात्प्रस्नवितव्यमित्यादावपि प्रतिषेधः स्यात् । कथं पुनरिति । वृत्त्यादिरर्थ आत्मनेपदस्य निमित्तं, न धातुरितिभावः। धातुरेवेति । वृत्त्याद्यर्थविशिष्टः। भावकर्मवृत्तादिति । भावकर्मणी धातोरेव विषयभावेन विशेषणे इत्यर्थः । सत्यात्मनेपदे इति । न योग्यतामात्राश्रयमिह निमित्त-

---

उ.]सत्तिन्यायेन स्नुक्रमिनिमित्तकात्मनेपदेन समानपदस्थस्येत्यर्थः कार्य इति भावः । बहिरङ्गक्यङादिनिमित्तमत्रात्मनेपदमिति भाष्यार्थः । प्रचिक्रंसिष्यत इत्यत्र 'पूर्ववत्सन' इत्यनेनात्मनेपदं स्नुक्रमिनिमित्तमेवेति भावः । एवञ्च 'प्रचिक्रमिषयते' इत्यत्र णिच आत्मनेपदनिमित्तत्वे इड्भवत्येव । एवं सनन्ताद्भावे कर्मणि वात्मनेपदे 'प्रचिक्रमिषिष्यते' इत्येव । 'पूर्ववत्सन' इत्यस्य तु तत्र न प्रवृत्तिः, 'कर्तरी'त्यनुवृत्तेः। अत एव वक्ष्यमाणप्रत्याख्यानेन न फलभेदः। सप्तम्यन्तस्याऽन्वयाऽयोग्यत्वादाह—प्रथमाद्विवचनमिति । 'स्नुक्रमोर्वलादेरिट् , यदि स्नुक्रमी अनात्मनेपदनिमित्ते भवत' इति सूत्रार्थ इति भावः । वस्तुतो भावप्रधानः सौत्रो निर्देशः, प्रसज्यप्रतिषेधश्च, स्नुक्रमोरात्मनेपदनिमित्तत्वाऽभावे सत्येव प्रत्यासत्त्या ताभ्यां परस्य वलादेरिडित्यर्थः। तत्फलितं भाष्ये उक्तम्–न चेत्स्नुक्रमी इति ।

ननु कर्मणि धातोर्वृत्त्यभावेन 'कर्मवृत्ता'दित्यसङ्गतमत आह—भावकर्मणी

अथ वा 'कृती'ति वर्तते [स्नुक्रमोरनात्मनेपदनिमित्ते] ॥

ग्रहोऽलिटि दीर्घः ॥७।२।३७॥

॥ * ॥ ग्रहेर्दीर्घत्वे इड्ग्रहणम् ॥ * ॥ **ग्रहेर्दीर्घत्वे इड्ग्रहणं कर्तव्यम् । 'इटो दीर्घ' इति वक्तव्यम् ॥ न वक्तव्यम्—प्रकृतमनुवर्तते ॥ क्व प्रकृतम् ? ॥ 'आर्धधातुकस्येड्वलादे'रिति ॥ एवमपि कर्त्तव्यमेव** ॥ * ॥ अकरणे ह्यसंप्रत्ययः षष्ठ्यभावात् ॥*॥ **अक्रियमाणे हीड्ग्रहणेऽसंप्रत्ययः स्यात् ॥ किं**

प्र.] त्वमाश्रीयते किंतु कार्यं कुर्वतः। यद्येवमर्थेऽपि निमित्तत्वेनाश्रीयमाणेदोषाभावात्कस्मात्स्नुक्रमी एवेत्युक्तम्, उच्यते, अर्थे निमित्तत्वेनाश्रीयमाणे 'ऽनुपसर्गाद्वे'त्यात्मनेपदमर्थनिरपेक्षत्वादसङ्गृहीतं स्यादिति धातुरेव निमित्तत्वेनाश्रितः। यदि सति कार्ये निमित्तमाश्रीयते तदा निमित्तग्रहणं न कर्तव्यम्, 'अनात्मनेपद'इति सत्सप्तम्याश्रयणात्। नैतदस्ति। 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति परिभाषायां सत्यां सत्सप्तम्याश्रयणस्याऽशक्यत्वात्। **अथवा कृतीति वर्तत इति**। तच्च कृद्ग्रहणं वाक्यभेदेन क्रमिणैव संबध्यते, न स्नौतिना। 'अनात्मनेपदनिमित्ते' इति च प्रसज्यप्रतिषेधः, तेनाऽयमर्थो—'यदाऽप्यात्मनेपदयोग्यः क्रमिस्तदा ततः परस्य कृत इण्न भवति' ॥

ग्रहोऽलि। इड्ग्रहणमिति। आदेशस्य स्थानिनिर्देशार्थं षष्ठ्यन्तमिड्ग्रहणं कर्तव्यम्। **एवमपीति**। सत्येव प्रथमान्त इड्ग्रहणे षष्ठ्यन्तमन्यत्कर्तव्यमित्यर्थः। **अक्रियमाणे हीति**। प्रथमान्तमिड्ग्रहणमयोग्यत्वान्न संबध्यते, अच्परिभाषोपस्थानाच्चाऽज्मात्रस्य ग्रहेः परस्य दीर्घप्रसङ्गः। **असंप्रत्यय इति**। 'ग्रहेः परस्य इटो दीर्घ'

उ.] इत्यादि। विषयसप्तमी। भावकर्मविषयाद्धातोरित्यर्थः। ते अपि प्रत्ययद्योत्ये इति भावः। पञ्चकस्य प्रातिपदिकार्थत्ववत्सर्वस्य धात्वर्थत्वमिति तत्त्वम्। शत्रादिविषयत्वस्य तु 'सत्त्वप्रधानानि नामानी'त्युक्तेर्वाच्या एव भावादय इति बोध्यम्। एतदर्थमेव 'विषयभावेने'ति कैयटेन व्याख्यातं। तद्विषयत्वं च धातोस्तेषां स्वप्रकृतिकप्रत्ययार्थतया, स्वस्य तत्तद्विशिष्टक्रियावाचकत्वेन वेत्यन्यत्।

यद्येवमिति। आत्मनेपदनिमित्तार्थविषयभिन्नस्नुक्रमिभ्यां परस्य वलादेरिडित्यर्थ आश्रयणीय इति भावः। **सत्सप्तमीति**। आत्मनेपदेऽसतीत्यर्थः। **अशक्यत्वादिति**। 'श्नान्नलोप' इत्यत्र तु लक्ष्यानुरोध'**नैषा परसप्तमी। का तर्हि ?। सत्सप्तमी**'त्युक्तमिति न तद्विरोधः। 'सती'ति पदाध्याहारस्य दुर्ज्ञेयतया स्पष्टप्रतिपत्तये निमित्तग्रहणं कृतमिति तात्पर्यं। **तच्चेति**। अनुवृत्तं चाऽऽवृत्त्या कर्तृपरं, कृत्संज्ञकपरञ्चेति 'प्रक्रमितु'मित्यादौ न दोषः। [**स्नुक्रमोरनात्मने**] ॥

ग्रहोऽलिटि। कर्तव्यमिति। अनुवर्तमानन्तु प्रथमान्तत्वादन्वयाऽयोग्यमिति भावः। ननु इड्ग्रहणाऽभावे किमनिष्टमत आह—**अच्परिभाषेति। अज्मात्रस्येति**। 'ग्राहक' इत्यादावपीत्यर्थः। नन्वेवमसंप्रत्ययोऽनुपपन्नोऽत आह—**ग्रहेः**

कारणम् ? ॥ 'षष्ठ्यभावात्' । षष्ठीनिर्दिष्टस्य आदेशा उच्यन्ते न चात्र षष्ठीं पश्यामः ॥ क्रियमाणे चापि इड्ग्रहणे–॥ ॥ * ॥ चिण्वदिटः प्रतिषेधः ॥ * ॥ **चिण्वदिटः प्रतिषेधो वक्तव्यः । ग्राहिष्यते** ॥*॥ यङ्लोपे च ॥*॥ **यङ्लोपे च प्रतिषेधो वक्तव्यः ।** जरीगृहिता जरीगृहितुम् जरीगृहितव्यम् ॥

यदि पुनरिड् दीर्घ आगमान्तरं विज्ञायेत ? ॥ * ॥ इड्दीर्घ इति चे-द्विप्रतिषिद्धम् ॥*॥ **इड्दीर्घ इति चेद्विप्रतिषिद्धं भवति । यदि इण्न दीर्घः,**

प्र.] इत्ययमिष्टः संप्रत्ययो न स्यात् । **क्रियमाण इति ।** प्राकरणिकमिटमनपेक्ष्येट इत्युच्यमाने सर्वस्येटो विशेषाऽभावाद्दीर्घप्रसङ्गाच्चिण्वदिटो दीर्घः प्रतिषेध्यः । **जरीगृहितेति ।** 'जरीगृह्य'शब्दात् तृच इट् । अल्लोपयलोपयोः कृतयोर्द्विःप्रयोगे द्विर्वचने स एव ग्रहिरिति इटो दीर्घप्रसङ्गः । दीर्घविधौ स्थानिवत्त्वनिषेधादकारेण व्यवधानाऽभावः । **यदि पुनरिति ।** 'इ'डिति वर्तते, 'दीर्घ' इति च निर्दिश्यते । तत्र 'दीर्घ इड्भवती'ति सामर्थ्याद्व्यक्तिपरित्यागेनेकारजातिराश्रीयते । दीर्घग्रहणाच्च दीर्घव्यक्तिसमवेता सा विधीयते । 'टकारो देशविध्यर्थ' इति सामर्थ्यादीडागमविधिः । एवं च षष्ठीनिर्दिष्टमिड्ग्रहणं न कर्तव्यम् । चिण्वदिट् चास्याऽपवाद इति तत्र दोषाऽभावः । न च कस्य चित्स्थानिनो दीर्घत्वं विधीयत इति स्थानिवत्त्वाऽनिषेधात्पूर्वस्मादपि विधौ स्थानिवत्त्वादकारेण व्यवधानाद्यङ्लोपे ईटोऽप्रसङ्गः । अथ त्वागमान्तरेऽपि दीर्घत्वमस्तीत्येवाऽयं दीर्घविधिस्तदा यङ्लोपे दोषो न परिहृतः ।

उ.] परस्येति । नन्वत्र करणेनैतत्प्रकरणस्थेड्ग्रहणं भविष्यतीत्यत आह–**प्राकरणिकमिति ।** प्राकरणिकेड्ग्रहणे हि पूर्वप्रक्रान्तमेव विभक्तिविपरिणामेन संबध्येत इत्यपूर्वकरणात्प्रकरणानादर इति भावः । **विशेषाभावादिति ।** इट्त्वस्य समानत्वादिति भावः । **स एव ग्रहिरिति ।** उत्तरखण्डभूत इत्यर्थः । **स्थानिवत्त्वनिषेधादिति ।** पूर्वस्य विध्यभावाच्चेत्यपि बोध्यम् । पञ्चमीसमासस्तु क्वाचित्क इति तदनाश्रयेणेदं भाष्यमिति तत्त्वम् । नन्विट् दीर्घ इति सामानाधिकरण्यमसङ्गतमत आह—**सामर्थ्यादिति ।** इट्त्वजात्याक्रान्तो दीर्घ इत्यर्थ इति भावः । **अपवाद इति ।** साप्तमिकस्येड्जातीयस्य नित्यत्वाद्बाधक इत्यर्थः । यङ्लोपे दोषाऽभावमत्र पक्षे उपपादयति—**न च कस्यचिदिति । दोषो न परिहृत इति ।** तस्मादेवं दीर्घविधिग्रहणमनुचितमिति भावः । वस्तुतोऽयं दोषः पक्षद्वयेऽप्यीति सूत्रशेषे भाष्यकृद्वक्ष्यतीति आद्यदोषपरिहारफलक एवाऽयं पक्ष इति तत्त्वम् । यङ्लुगन्तात्तृजादौ त्विटो दीर्घ इष्ट एव, स्थाने द्विर्वचनपक्षेऽपि अन्तरङ्गानपीतिन्यायेन लुगुत्तरमेव द्वित्वप्रवृत्तेः । स्थानिवद्भावेन ग्रहित्वाद्भवत्येव दीर्घो यदि यङ्लुगस्तीति तात्पर्यम् । प्रतिषिद्धस्य पुनर्विधानमुपपादयति—**सनि इटीति । उभयस्मिन्न-**

अथ दीर्घो नेट् , इड् दीर्घश्चेति विप्रतिषिद्धम् ॥*॥ प्रतिषिद्धस्य च पुनर्विधाने दीर्घत्वाऽभावः ॥*॥ **प्रतिषिद्धस्य च पुनर्विधाने दीर्घत्वस्याऽभावः । वुवूर्षते विवरिषते विवरीषते ॥ अत्रापीड् दीर्घ इत्यनुवर्तिष्यते ॥**

यत्तर्हि विदेशस्थं प्रतिषिध्य पुनर्विधानं तन्न सिध्यति । 'जॄव्रश्च्योः क्त्वि' 'श्र्युकः किती'त्यनेन प्रतिषिद्धे दीर्घत्वं न प्राप्नोति । जरित्वा जरीत्वा । ईटो विधिरिटः प्रतिषेधः । यथाप्राप्तं इड् दीर्घो भविष्यति ॥

यदि तर्हीटो ग्रहणे ईटो ग्रहणं न भवति,–जरीत्वा–'न क्त्वा से'डिति कित्त्वप्रतिषेधो न प्राप्नोति । इह चाऽग्रहीदिति–'इट ईटी'ति सिज्लोपो न प्राप्नोति । इह चाऽग्रहीत्–'नेटी'ति वृद्धिप्रतिषेधो न प्राप्नोति ॥ मा भूदेवं 'ह्ययन्ताना'मित्येवं भविष्यति ॥ अत्रापि 'नेटी'त्येवानुवर्तते । तच्चावश्यमिड्ग्रहणमनुवर्त्यम्-अधाक्षीदित्येवमर्थम् । तथा–अग्रहीध्वम् अग्रहीढ्वं–'विभा-

---

प्र.] इतरो व्यक्तिपदार्थाश्रयेणाह–**इड्दीर्घ इति चेदिति। विवरीषत इति।** सनीटि प्राप्ते,'वॄतो वे'त्यनेन पक्षे ईटि च प्रसक्ते 'सनि ग्रहगुहोश्चे'त्यनेनोभयस्मिन्नपि प्रतिषिद्धे 'इट्सनि वे'ति पक्षे इड्विधीयते, ततः पुनरीटो विधानाऽभावाद्दीर्घ ईकारः पक्षे न श्रूयेत । इटस्तु पक्षे दीर्घविधौ दोषाऽभावः। **अत्रापीति ।** 'इट्सनिवे'त्यत्र दीर्घ इति वॄत इति चानुवर्त्तत इति सिद्धं त्रैरूप्यम् । **विदेशस्थमिति ।** दीर्घग्रहणाऽनुवृत्तेरत्राऽसंभवः। **जरीत्वेति।** उदात्तत्वादिट् प्राप्तौ 'वॄतो वे'त्यनेन पक्षे ईट् च 'श्र्युकः किती'ति प्रतिषिद्धः । इकारजात्याश्रयणादीटोऽपि प्रतिषेधः प्रवर्तते । ततो 'जॄव्रश्च्योःक्त्वी' त्यनेनेटि विधीयमाने पक्षे दीर्घो न स्यात् । एतत्परिहरति–**ईटो विधिरिटः प्रतिषेध इति ।** 'वॄतो वे'त्यनेन पक्षे ईडागमो विधीयते । 'श्र्युकः किती'त्यनेन तु न । इडित्यधिकाराद्व्यक्तिपक्षाश्रयणाच्च निषेध इटो न त्वीटः । पाठान्तरं तु प्रकृतेऽर्थे दुर्योजत्वादस्माभिर्नोपन्यस्तम्। **सन्मार्गसम्भवे को हि विमार्गं मतिमान् भजेत् ।**

यदि तर्हीति । इड्प्रतिषेध ईटो यथा न भवत्येवं कार्यान्तरस्याऽप्यप्रसङ्गः ।

उ.]**पीति।** पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्याज्जातिपक्षाश्रयणाच्चेति भावः । **सिद्धं त्रैरूप्यमिति ।** वाक्यभेदेन ईटोऽपि विधानादिति भावः । 'विदेशस्थ'मित्यस्य हेतुगर्भविशेषणत्वमुपपादयति—**दीर्घेति । भाष्ये–तन्न सिध्यतीति ।** तद्विषये न सिध्यति दीर्घ इत्यर्थः । नन्विटो निषेधः कथमीटः स्यादत आह—**जातीति । नन्वीट इति ।** एवञ्च जरीत्वा विवरीषत इति सिद्धमिति भावः । **तस्माद्विहितस्येति ।** अनुवादे एव जातेर्ग्रहणं विधौ तु व्यक्तेरेवेति भावः । नन्वार्धधातुकस्य दीर्घविधाने कथमिटस्तत्सिद्धिरत आह—**इडागमे इति ।** विशिष्यानुच्चारणा-

षेट' इति मूर्धन्यो न प्राप्नोति। तस्मान्नैतच्छक्यं वक्तुम्—'इटोग्रहणे ईटो ग्रहणं न भवती'ति ॥ भवति चेत्प्रतिषिद्धस्य च पुनर्विधाने दीर्घाऽभाव [इत्येव]।

तस्मादशक्य इड् दीर्घ आगमान्तरं विज्ञातुम्। न चेद्विज्ञायते इटो ग्रहणं कर्तव्यम् ॥ न कर्तव्यम्। 'आर्धधातुकस्ये'ति वर्तते। ग्रहः परस्यार्धधातुकस्य दीर्घत्वं वक्ष्यामि ॥ इहापि तर्हि प्राप्नोति—ग्रहणम् ग्रहणीयम् ॥ 'वलादे'-रिति वर्तते॥ एवमपि ग्रहीता ग्रहीतुम् अत्र न प्राप्नोति ॥ भूतपूर्वगत्या भवि-ष्यति। एवमपि ग्राहकः—अत्र प्राप्नोति ॥ किं चेड्विघातेन खल्वपि दीर्घत्व-मुच्यमानमिटं बाधेत। तस्मादिटो ग्रहणं कर्तव्यम् ॥ न कर्तव्यम्। प्रकृत-मनुवर्तते ॥ क्व प्रकृतम्? ॥ 'आर्धधातुकस्येड्वलादे'रिति ॥

ननु चोक्तम्—"एवमपि कर्तव्यमेव, अग्रहणे ह्यसंप्रत्ययः षष्ठ्यनिर्देशा"—दिति ॥ नैष दोषः। 'ग्रह' इत्येषा पञ्चमी 'इ'डिति प्रथमायाः षष्ठीं प्रकल्प-यिष्यति—'तस्मादित्युत्तरस्ये'ति ॥ एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं "चिण्वदिटः प्रतिषेध"इति ॥ कथम्? ॥ प्रकृतस्येटं इदं दीर्घत्वं, न च चिण्वदिड्कृतः ॥ यङ्लोपे च कथम्? ॥ यङ्लोपे चोक्तम्—"इटि सर्वत्र" ॥

प्र.] **तस्मान्नैतदिति**। इड्ग्रहणे इकाराकृतिराश्रयणीया न तु व्यक्तिः। **भवति चेदिति**। 'जॄव्रश्च्योः क्त्वी'तीड्विधौ दोष एवेत्यर्थः। नन्वनुवाद इव विधावपि इकाराकृत्याश्र-यणाज्जरित्वा जरीत्वेति रूपद्वयं भविष्यति। नैतदस्ति। विधौ जात्याश्रये 'लविते'-त्यादावपि दीर्घः स्यात्। तस्माद्विहितस्य दीर्घस्येड्ग्रहणेन ग्रहणं न तु विधेयस्य। **ग्रहइति**। इडागमे कृते तदादेरार्धधातुकस्यादेः परस्येटीट एव दीर्घः। **वलादे-रिति**। वलादि यद्दृष्टमित्याश्रीयते। इतरः सांप्रतिकं वलादित्वमाश्रितमिति मत्वाह **एवमपीति**। **भूतपूर्वगत्येति**। सांप्रतिकाऽभावादलिटीतिनिषेधाच्च। **इड्विघा-तेनेति**। येननाऽप्राप्तिन्यायेनेटं बाधित्वाऽकृतेड्कस्यैवार्धधातुकस्य दीर्घत्वमच्परि-भाषोपस्थानाद्यत्र तत्र स्थितस्याऽचः स्यात्। **नचेति**। 'जॄव्रश्च्योः क्त्वी'त्यनेन तु वलादिलक्षणमेवेट् प्रतिप्रसू(य)त इति अप्राकरणिकत्वाभावाद्दीर्घः सिध्यति। **यङ्लोपे चेति**। 'सन्यङन्तस्य स्थाने द्विर्वचन'मित्यत्र पक्षे प्रकृतिप्रत्ययसम्मोहान्नष्टः स ग्रहिः। ननु च 'द्विः प्रयोगो द्विर्वचन'मिति पक्षस्तत्रस्थितस्तत्कथमस्थितपक्षाश्रयेण परि-

---

उ.] न्निर्दिश्यमानपरिभाषाया अविषय इति भावः। भाष्ये—**इड्विघातेनेति**। येननाऽ प्राप्तिन्यायाच्च तत्प्रतिघातेनाऽस्य विधानं बोध्यम्। ननु प्राकरणिकस्यैव दीर्घे 'जॄ-व्रश्च्यो'रित्यस्योत्तरत्र विधानादप्राकरणिकत्वाज्जरित्वेत्यत्रपक्षे दीर्घो न स्यादत आह— **जॄव्रश्च्योरिति**। **प्रतिप्रसू(य)त इति**। 'श्र्युक' इति प्रतिषिद्धः प्रतिप्रसू(य)त इत्यर्थः।

क्व सर्वत्र ? ॥ यद्येवं प्रकृतस्येटो दीर्घत्वमथापि ईडीर्घ आगमान्तरं विज्ञायेत ॥*॥ यल्लोपे चोक्तम् ॥*॥ किमुक्तम् ? ॥ 'तदन्तद्विर्वचना'दिति ॥

स्वरतिसूतिसूयतिधूञूदितो वा ॥ ७।२।४४ ॥

अथ 'वे'ति वर्तमाने पुनर्वावचनं किमर्थम् ? ॥ * ॥ पुनर्वावचनं लिङ्सिचोर्निवृत्त्यर्थम् ॥*॥ पुनर्वावचनं क्रियते ॥ [किमर्थं ?] ॥ लिङ्सिचोर्निवृत्त्यर्थम् ? ॥ [लिङ्सिचोर्निवृत्तिर्यथा स्यात्] ॥

प्र.]हारः। अत्राहुः—'यल्लोपे चोक्त'मिति। अत्रायमभिप्रायो वार्तिककारस्य—द्विः प्रयोग एव द्विर्वचने पूर्वस्मादपि विधावल्लोपस्य स्थानिवत्त्वादकारेण व्यवधानाद्दीर्घाऽभावः। 'न पदान्ते'त्यत्र 'पूर्वत्रासिद्धे न स्थानिव'दिति वक्तव्यम्। तस्मिन्नुच्यमाने 'पदान्तवरेयलोपस्वरवर्ज्जं द्विर्वचनादीनि न वक्तव्यानी'ति साप्तमिके दीर्घविधौ स्थानिवत्त्वं भवत्येव। सूत्रकारमतेऽपि ग्रहेर्विहितस्येत्येवं विहितविशेषणाश्रयणाद्यल्लोपे दीर्घाऽभावसिद्धिः। भाष्यकारेण त्वस्थितमपि पक्षमाश्रित्य तदन्तद्विर्वचनादिति विवृतम्। अन्यत्राऽप्यस्य दोषस्य सम्यक्परिहाराभिधानादनादरात्। [ग्रहोऽलिटि]।

स्वर। **अथेति।** 'इण्नि वे'त्यतः। **लिङ्सिचोर्निवृत्त्यर्थमिति।** ननु

उ.] **साप्तमिके इति।** वस्तुतो वर्ज्यकोटौ दीर्घस्याप्युपलक्षणतायाः कर्मेणिङित्यादिसूत्रस्थभाष्यसंमततयेदं चिन्त्यम्। ननु वार्तिकमतेऽस्त्वयं परिहारः, सूत्रमते तु कथमत आह—**सूत्रकारेति।** इदं भाष्यकृतोऽप्युपलक्षणम्। **अन्यत्रेति।** 'एकाचो द्वे' इत्यत्र। तत्र हि ग्रहेरङ्गादिति भाष्यं। तृचो हि 'जरीगृह्ये'त्यङ्गं न तु ग्रहिः। नचाऽल्लोपयलोपयोरेकदेशविकृतन्यायेन 'जरीगृ'हित्यङ्गं, तस्य च ग्रहिरूपत्वमपि द्विः प्रयोगत्वाद्द्विर्वचनस्येति वाच्यं, विशेषणसामर्थ्याद्धि यथाश्रुतरूपाश्रयणमिति न दोष इति कैयटेन व्याख्यातत्वात्। किञ्च समुदायस्य द्विःप्रयोगेऽपि न ग्रहित्वम्, उत्तरखण्डस्य तु कैयटरीत्या न तत्त्वं। न चात्र पक्षे यङ्लुगन्तात्तृच इटि दीर्घो न स्यात्। ततो यङ्लुक्सत्त्वे दृढतरमानाऽभावात्। अनैमित्तिकलुकः पूर्वमेव प्रवृत्तत्वेन द्विःप्रयोगद्विर्वचनेन च ग्रहेरेवाङ्गत्वेनाऽक्षतेश्च। यङ्लोपे तु जरीगृह्यशब्दात्तृचि विशिष्टस्याङ्गत्वेऽल्लोपयलोपयोरेकदेशविकृतन्यायेन 'जरीगृ'हित्यस्यैवाङ्गत्वं न,तु ग्रहेः। न च द्विः प्रयोगाद्ग्रहिरेव सः। अङ्गसंज्ञाप्रवृत्तिकाले ग्रहिरूपत्वाऽभावात्। यङ्लुगन्ते तु तत्कालेऽपि तथैव। यत्तु हरदत्तेनैकाज्ग्रहणानुवृत्त्या यल्लोपे दोषपरिहार उक्तः, सतु यङ्लुकि अतिव्यापकत्वान्मानाऽभावाच्च हेय एव। यत्र इडाद्यार्धधातुकनिरूपिताङ्गसंज्ञाप्रवृत्तिवेलायां स्वतः, स्थानिवद्भावेन वा ग्रहिरूपत्वं तत्र ग्रहेः परस्येटो दीर्घ इति यथाश्रुतरूपाश्रयणमिति कैयटस्यार्थः। अतएव 'गृहीत'मित्यादिसिद्धिः। अन्यथात्रेडपेक्षया नित्यत्वात्संप्रसारणे यथाश्रुतरूपाऽभावः स्पष्ट एवेति

अथ किमर्थं सूतिसूयत्योः पृथग्ग्रहणं क्रियते ? ॥ सुवतेर्मा भूत् ॥

अथ किमर्थं धूञः सानुबन्धकस्य ग्रहणं क्रियते ? ॥ धुवतेर्मा भूदिति ॥

किं पुनरियं प्राप्ते विभाषा, आहो स्विदप्राप्ते ? ॥ कथं च प्राप्ते कथं चाऽप्राप्ते ? ॥ यदि स्वरतिरुदात्तस्ततः प्राप्ते, अथाऽनुदात्तस्ततोऽप्राप्ते । ॥*॥ स्वरतिरुदात्तः ॥*॥ स्वरतिरुदात्तः पठ्यते ॥ किमर्थं तर्हि वावचनम् ? ॥

प्र.] स्वरतिग्रहणाल्लिङ्सिचोरनुवृत्तिर्न भविष्यति, ऋतश्च संयोगादेरितीड्विकल्पस्य-सिद्धत्वात् । नैतदस्ति। नित्यार्थं स्वरतिग्रहणमित्यज्ञापकं लिङ्सिज्निवृत्तेः।**अथ किमर्थमिति** । 'सू'ग्रहणमेवं क्रियतामिति भावः। **सुवतेरिति** । 'अननुबन्धकग्रहणे न सानुबन्धकस्ये'ति सुवतेरेव ग्रहणं स्यात् । सूङ्ग्रहणेऽपि क्रियमाणे 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहण'मिति सूयतेरेव ग्रहणं स्यात् । अस्याश्च परिभाषायाः सूङ्ग्रहणे कर्तव्ये 'सूतिसूयती'ति भेदेनोपादानमेव ज्ञापकम् । **धूञ इति** । 'धूञ्कम्पने' इति स्वादिषु क्र्यादिषु च पठ्यत इति द्वयोरपि सामान्येन ग्रहणम् । 'धू विधूनने' इत्यस्मात्तु नित्यमिड्भवति । **किं पुनरिति** । स्वरत्युद्देशेनाऽयं विचारोऽन्येषां तूदात्तत्वात्प्राप्तविभाषाया निश्चयाद्दोषाऽभावाच्च । स्वरतेस्तूदात्तानुदात्तप्रतिज्ञाने दोषदर्शनाद्विचारः । 'ऋतां च वृङ्वृञा'विति परिगणनादस्योदात्तत्वं न प्रतिज्ञातम् । तत्र किमुदात्तत्वप्रतिज्ञानेन दोषः परिह्रियते अथानुदात्तत्वप्रतिज्ञाने न्यायेनेति प्रश्नः । **यदि स्वरतिरुदात्त इति** । ननु किति प्रत्यये 'श्र्युकः किती'ति प्रतिषेधात्तत्राऽप्राप्तविभाषेयं स्यात् । नैतदस्ति । अल्पविषयत्वप्रसङ्गात् । स्वरतेः प्राप्तविभाषायां तु महाविषयत्वं भवति । **किमर्थमिति** । यदि पक्ष इण्निवृत्त्यर्थं

उ.] दिक् । वस्तुतस्तदन्तद्विर्वचनादिति भाष्यं तत्रोक्तसकलपरिहारोपलक्षणं बोध्यम् ।

स्वरतिसूति । भाष्ये–**लिङ्सिचोरिति** तत्सूत्रपरम् । तत्सूत्रानुवृत्तेर्निवृत्त्यर्थमित्यर्थः । अन्यथा परस्मैपदे सिचि विकल्पस्य चारितार्थ्येन 'ऋतश्च संयोगादे'रितीड्विकल्पस्य सिद्धत्वादिति कैयटाऽसङ्गतिः । **नित्यार्थमिति** । अत्र लिङ्सिच्सहितवाग्रहणानुवृत्तावपि लिङ्सिचोर्विकल्पे प्राप्ते स्वृग्रहणं संस्वृषीष्टेत्यादौ सामर्थ्यान्नित्यार्थं स्यादित्यर्थः । केचित्तु एवं सति सूत्रस्य वैरूप्यापत्तिस्तस्माल्लिङ्सिचोः परतः क्वचिद्विषये संस्वृषीष्टेत्यादौ पूर्वसूत्रस्य व्यवस्थितविभाषात्वबोधनद्वारा इटो निवृत्त्यर्थं वाग्रहणम् ।एवञ्च लिङ्सिचोरित्यस्य क्वचिद्विषये निवृत्त्यर्थमितिभाष्याक्षरार्थमाहुः।**सुवतेरिति** । 'षू प्रेरणे' इति हि निरनुबन्धकः । 'षूङ् प्राणिगर्भविमोचने' इत्यदादिः । 'षूङ् प्राणिप्रसवे' इति च दिवादिः सानुबन्धकौ । **ज्ञापकमिति** । साहचर्य्यादलुग्विकरणस्यैव भविष्यतीति चिन्त्यमेतत् । 'धू विधूनने' इति कुटादिः । **किमुदात्तत्वप्रतिज्ञानेन दोष इति** । स्वृत्वेत्यादौ विकल्पप्रसङ्गरूप इत्यर्थः । **न्यायेनेति** । येन नाप्राप्तिन्यायेन, पुरस्तात्प्रतिषेधकाण्डारम्भन्यायेन वेत्यर्थः । **तत्राप्राप्तेति** ।

॥*॥ वावचनं निवृत्त्यर्थम् ॥*॥ **वावचनं क्रियते ॥ [किं प्रयोजनं ?] ॥ 'निवृत्त्यर्थम्'** ॥*॥ अनुदात्ते हि किति वाप्रसङ्गः प्रतिषिध्य पुनर्विधानात् ॥*॥ **अनुदात्ते हि सति किति विभाषा प्रसज्येत । स्वृत्वा ॥ किं कारणम् ? ॥ 'प्रतिषिध्य पुनर्विधानात्' । प्रतिषिध्य किलाऽयं पुनर्विधीयते । स यथै-वैकाज्लक्षणं प्रतिषेधं बाधते एवं 'श्र्युकः किती'त्येतमपि बाधेत ॥**

यदि तर्ह्युदात्तः स्वरतिः, पठिष्यति विप्रतिषेधं–"स्वरतेर्वैट्त्वादतः स्ये विप्रतिषेधेने"ति स विप्रतिषेधो नोपपद्यते ॥ किं कारणम् ॥ ? स विधिरयं प्रतिषेधो, विधिप्रतिषेधयोश्चाऽयुक्तो विप्रतिषेधः ॥ सोऽपि विधिर्न मृदूनामिव कार्पासानां कृतः, प्रतिषेधविषय आरभ्यते, स यथैवैकाज्लक्षणं प्रतिषेधं बाधते एवमिममपि बाधिष्यते ॥ अथ वा **येन नाप्राप्ते तस्य बाधनं**

प्र.]तदा 'ऋद्धनोः स्ये' इतीममपीटं पक्षे निवर्तयेदिति प्रश्नः । **निवृत्त्यर्थमिति ।** निवृत्तिः कञ्चिदेव विधिं बाधते न सर्वमिति भावः । **स विधिरिति ।** 'ऋद्धनोः स्ये' इत्येषः । **अयं प्रतिषेध इति ।** प्राप्तविभाषापक्षे यथा वलादिलक्षण इड्प्रतिषि-ध्यते तथा स्यलक्षणोऽपि प्रतिषिध्यते । अनुदात्तप्रतिज्ञाने तु द्वयोरपि विधित्वाद्वि-प्रतिषेधोपपत्तिः । **सोऽपीति ।** वैधर्म्येण दृष्टान्तो, यथा मृदुकार्पासकृतो रज्वादिर्दु-र्बलो नैवं ऋद्धनोःस्य इत्ययं विधिः । **स यथैवेति ।** 'करिष्यती'त्यादौ । **एवमिमम-पीति ।** न च स्वरतेरुदात्तत्वे येन नाप्राप्तिन्यायोऽस्ति येनैकाज्लक्षणमेव प्रतिषेधं बाधेत न स्वरतिलक्षणम् । यद्येव विप्रतिषेधाऽनुपपत्तिः, स्यलक्षणस्य विधेरपवाद-त्वात् । अन्यथापीष्टस्य सिद्धत्वान्मोपपादि विप्रतिषेधः । अथ वा स विधिरयं प्रतिषेध इति विधेर्दुर्बलत्वं यदुक्तं तदनेन निराकृतम् । तत्र द्वयोस्तुल्यबलत्वादुपपद्यते विप्र-तिषेधः । **अथ वेति ।** परिभाषाश्रयणादुत्सर्गापवादभावेऽपनीते द्वयोर्विप्रतिषेधोपत्तौ

उ.]भावतात्पर्यकतालोभेनेति भावः । **महाविषयत्वमिति** । व्याप्तिन्यायानुग्रहाय, साहचर्यानुग्रहाय च प्राप्तविभाषैव युक्तेत्यर्थः । वावचनस्य विकल्पार्थत्वात् प्रश्ना-शयमाह–**यदीति । कंचिदेवेति।** वक्ष्यमाणेन न्यायेनेति भावः । नन्वस्य विकल्प-त्वात्प्रतिषेधत्वोक्तिरसङ्गतेत्यत आह–**प्राप्तविभाषेति । प्रतिषिध्येतेति ।** 'निषे-धाश्च बलीयांस' इति न्यायादिति भावः । **कार्पासकृत** इति भाष्ये षष्ठी तु करणस्य शेषत्वविवक्षया । **न्यायोऽस्तीति।** स्वरतावुदात्तत्वपक्षे एकाज्लक्षणनिषेधाऽप्राप्तेरिति भावः । **स्यलक्षणस्येति ।** एवञ्चोत्सर्गापवादयोरयुक्तो विप्रतिषेध इत्यर्थः । एवञ्च स्वरतेर्वैट्त्वादतःस्यो विप्रतिषेधेनेत्युक्तविप्रतिषेधासङ्गतिरिति भावः । **अन्यथापीति।** इष्टसिद्धिरेव प्रार्थनीया। सा त्वपवादत्वादेव सिद्धेति किं विप्रतिषेधेनेत्यर्थः । एवं हि विप्रतिषेधवार्तिकं विरुध्येतेत्यत आह–**अथवेति । तदनेनेति ।** न त्वपवादत्वमुक्त-मिति भावः । स्यलक्षणावकाशः–करिष्यतीति, एतदवकाशः–'स्वर्ता' 'स्वरिते'ति ।

भवति । न चाऽप्राप्तेवलादिलक्षणे इयं विभाषा आरभ्यते, स्यलक्षणे पुनः प्राप्ते चाऽप्राप्ते च ॥

अथ वा–'मध्येपवादाः पूर्वान्विधीन्बाधन्ते' इत्येवमियं विभाषा वलादिलक्षणमिटं बाधिष्यते, स्यलक्षणं न बाधिष्यते ॥

अथ वा पुनरस्त्वनुदात्तः ॥ ननु चोक्तम्–"अनुदात्ते हि किति वा-प्रसङ्गः प्रतिषिध्य पुनर्विधाना''दिति ॥ नैष दोषः । येन नाप्राप्ते तस्य बाधनं भवति, न चाऽप्राप्ते एकाज्लक्षणे प्रतिषेधे इयं विभाषा आरभ्यते । 'श्र्युकः किती'त्येतस्मिन्पुनः प्राप्ते चाऽप्राप्ते च ॥ अथ वा 'श्र्युकः किती'त्येष योग उदात्तार्थश्च, येभ्यश्चाऽनुदात्तेभ्य इड्प्राप्यते तद्बाधनार्थश्च ॥ अथ वा 'श्र्युकः किती'तीहाऽनुवर्तिष्यते ॥ अथ वाऽऽचार्यप्रवृत्तिर्ज्ञापयति–'नेयं विभाषा उग्लक्षणस्य प्रतिषेधस्य विषये भवती'ति–यदयं 'सनीवन्तर्धभ्रस्जदम्भुश्रि-स्वृयूर्णुभरज्ञपिसना'मिति स्वृग्रहणं करोति ॥ [स्वरतिसूतिसूयति] ॥

इण्निष्ठायाम् ॥७।२।४७॥

इडिति वर्तमाने पुनरिड्ग्रहणं किमर्थम् ? ॥*॥ इड्ग्रहणं नित्यार्थम् ॥*॥ [इडितिर्वर्त्तमाने पुनरिड्ग्रहणं क्रियते॥ किं प्रयोजनं?॥'नित्यार्थम्']। नित्यार्थो-यमारम्भः॥ नैतदस्ति प्रयोजनं सिद्धाऽत्र विभाषा पूर्वेणैव, तत्रारम्भसामर्थ्या-न्नित्यो विधिर्भविष्यति ॥ नात्र पूर्वेण विभाषा प्राप्नोति॥ किं कारणम् ? ॥

प्र.]परत्वेन व्यवस्था। उदात्तत्वे दोषं प्रतिविधायाऽनुदात्तत्वे प्रतिविधत्ते—**अथ वेति**। **न चाऽप्राप्त एकाज्लक्षण इति** । अयमेव पाठो युक्तः । केचित्तु 'वलादिलक्षण' इति पठन्ति । वलादिमात्रविषयत्वाद्वलादिलक्षण इति व्याचक्षते । **श्र्युकः किती'त्ये-तस्मिन्निति** । तत्र 'स्वृत्वे'त्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधो भवतीति वक्तव्यम् । **येभ्यश्चानुदात्तेभ्य इति** । प्रतिषेधकाण्डस्य पुरस्तात्करणस्य सर्वेड्प्रतिषेधार्थत्वात् । **यदयमिति** । यद्युग्लक्षणं प्रतिषेधमयं विकल्पो बाधेत ततः 'सनि ग्रहगुहोश्चे'त्यस्य प्रतिषेधस्याऽभावादनेनैव सनि विकल्पस्य सिद्धत्वात्पुनस्तन्न विदध्यात् ॥

इण्नि । **सिद्धेति** । 'निरः कुष' इत्यनेन । [**इण्निष्ठायाम्**] ।

उ.]**एवञ्चेममपि बाधिष्यत** इत्यत्र 'परत्वा'दिति शेषः। **परिभाषाश्रयणादिति**। येन नाप्राप्त इति, मध्येऽपवादा इति वेत्यर्थः । **वलादिमात्रेति** । अयं तु कित्त्व-लक्षणोऽपीति भावः । वलादिमात्रविषयत्वेन वलादिलक्षणशब्दस्यैकाज्लक्षणे लक्षणापत्त्याऽयं पाठो न युक्तः । **पूर्वविप्रतिषेध इति** । एवञ्च ('पूर्व)विप्रतिषेधेन निषेधो भवती'ति भाष्यं वाक्यशेषाध्याहारेण व्याख्येयमिति भावः । अत्र पक्षे पूर्व-विप्रतिषेधाश्रयणे गौरवात्समाध्यन्तरमेवाह—**अथवेति**। इदमेव मुख्यं समाधानम् ॥

'यस्य विभाषे'ति प्रतिषेधात् । तत्रारम्भसामर्थ्याद्विभाषा लभ्येत । पुनरिड्ग्रहणादिडेव भवति ॥ [इण्निष्ठायाम्] ॥

तीषसहलुभरुषरिषः ॥७।२।४८॥

॥*॥ इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः ॥*॥ इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधो वक्तव्यः । इह मा भूत्—प्रेषिता प्रेषितुम् प्रेषितव्यम् ॥ [तीषसहलुभ] ॥

वसतिक्षुधोरिट् ॥७।२।५२॥

इडिति वर्तमाने पुनरिड्ग्रहणं किमर्थम् ? ॥*॥ पुनरिड्ग्रहणं नित्यार्थम् ॥*॥ इडिति वर्तमाने पुनरिड्ग्रहणं क्रियते ॥ [किं प्रयोजनं ? ॥] 'नित्यार्थम्' । नित्यार्थोऽयमारम्भः ॥ [वसतिक्षुधोरिट्] ॥

गमेरिट् परस्मैपदेषु ॥७।२।५८॥

॥*॥ गमेरिड्परस्मैपदेषु चेत्कृत्युपसङ्ख्यानम् ॥*॥ गमेरिट् परस्मैपदेषु चेत्कृत्युपसङ्ख्यानं कर्तव्यम् । जिगमिषिता जिगमिषितुम् जिगमिषितव्यम् ॥ तत्तर्ह्युपसङ्ख्यानं कर्तव्यम् ? ॥ न कर्तव्यम् । अविशेषेण गमेरिडागममुक्त्वा

प्र.] तीष । 'इषु इच्छाया'मिति केचित्तौदादिकमुदितमधीयते । अन्ये तूदित्त्वस्य प्रयोजनमपश्यन्त 'इष इच्छाया'मिति पठन्ति । ये त्विह 'तीषुसहे'ति पठन्ति तन्मतेनेह विशेषणार्थ उकारः।तत्र वार्तिककारमतेन त्रयोऽपीषयोऽननुबन्धकाः। इह च 'तीषसहे'ति पाठस्तदाह—इषेरिति । 'इष आभीक्ष्ण्ये' इत्यस्य क्रैयादिकस्य तु विकल्पमिच्छति वार्तिककारः । तौदादिकस्य तु उदित्त्वेऽभ्युपगम्यमाने 'तीषसहे'ति पाठेऽननुबन्धकपरिभाषया क्रैयादिकस्यैव ग्रहणं स्यात् । इह मा भूदिति । विकल्पः । तेन इष गतावित्यस्मात्तकारादौ नित्यमिड्भवति । [तीषसहलुभ] ॥

गमेः । सिद्धंत्विति । इह तु जिगमिषितेवाचरति 'जिगमिषित्रीयते' इति

उ.] इण्निष्ठायां । भाष्ये—आरम्भसामर्थ्याद्विभाषा लभ्येतेति । प्रतिषेधबाधनद्वारेति भावः । न चैवं 'निरःकुषो निष्ठाया'मित्येव सूत्रमस्तु, 'यस्य विभाषे'त्यस्य प्राप्त्या निष्ठायां विकल्पाऽप्राप्तेरनिष्ठायामित्यस्य वैयर्थ्यापत्तेः । सामर्थ्येनानुमानिकवचनकल्पने तु न किंचिल्लाघवं, पर्युदासेन कृत्येव विकल्प इति शङ्कावारणाऽर्थं च तदित्याहुः । [इण्निष्ठायाम्] ॥

तीषसह । केचिदिति । वामनादयः । अपश्यन्त इति । न च 'उदितो-वे'ति फलं, क्त्व इड्विकल्पस्यानेनैव सिद्धत्वादिति भावः । तन्मतेनेति । क्र्यादेर्विकल्पाऽसिद्ध्याऽयं पाठो न युक्तः । क्रैयादिकस्यैवेति । न तु तौदादिकस्येत्यर्थः । तस्मात्तौदादिकस्योदित्पाठो न युक्तः । [तीषसह] ॥

गमेरिड । सिद्धन्त्वितीति । सूत्रस्थपरस्मैपदग्रहणं फलोपहितात्मनेपद-

'आत्मनेपदपरे ने'ति वक्ष्यामि ॥*॥ आत्मनेपदपरप्रतिषेधे उक्तम् ॥*॥ किमुक्तम् ? ॥ "आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेध" इति। इहापि-॥*॥ आत्मनेपदपरप्रतिषेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः॥*॥ तत्परपरे तावत्—संजिगंसिष्यते। सीयुटि-संगंसीष्ट। एकादेशे-संगंस्यन्ते। एकादेशे कृते व्यपवर्गाऽभावान्न प्राप्नोति॥*॥ सिद्धं तु गमेरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधात् ॥*॥ सिद्धमेतत् ॥ कथम् ? ॥ 'गमेरात्मनेपदेन समानपदस्थस्य [इट्प्रतिषेधात्'। गमेरात्मनेपदेन समानपदस्थस्य] इण्न भवतीति वक्तव्यम् ॥ [गमेरिड्परस्मैपदेषु] ॥

न वृद्भ्यश्चतुर्भ्यः ॥७।२।५९॥

॥*॥ वृतादिप्रतिषेधे च ॥*॥ किम् ? ॥*॥ कृत्युपसङ्ख्यानं ॥*॥ [कृत्युपसङ्ख्यानं] कर्तव्यम्। विवृत्सिता। विवृत्सितुम्। विवृत्सितव्यम् ॥ तत्तर्ह्युपसङ्ख्यानं कर्तव्यम् ? ॥ न कर्तव्यम् ? ॥ अविशेषेण वृतादिभ्य इट्प्रतिषेधमुक्त्वा 'आत्मनेपदपर इड्भवती'ति वक्ष्यामि॥*॥ आत्मनेपदपरे इड्वचने तत्परपरसीयुडेकादेशेष्विड्वचनम् ॥*॥ आत्मनेपदपर इड्वचने तत्परपरसीयुडेकादेशेष्विड्वक्तव्यः। तत्परपरे तावत्-विवर्तिषिष्यते। सीयुटि-वर्तिषीष्ट। एकादेशे-वर्तिष्यन्ते वर्द्धिष्यन्ते ॥*॥ सिद्धं तु वृतादीनामात्मनेपदेन

प्र.] बहिरङ्गत्वादात्मनेपदस्य प्रतिषेधाऽभावः। केचित्तु योगविभागेनेष्टसिद्धिमाहुः। 'गमेः सकारादाविड्भवती'त्येको योगः। ततः 'परस्मैपदे'ष्विति द्वितीयो योगो नियमार्थः। तुल्यजातीयापेक्षत्वाच्च नियमस्यात्मनेपदविषय एवेण्निवर्त्येत इति कृति, परस्मैपदलुकि चेड्भवत्येव—जिगमिषितुम्। जिगमिषितव्यम्। जिगमिष त्वमिति ॥

न वृद्भ्यः। सिद्धं त्विति। तेन परस्मैपदलुक्यपि प्रतिषेधो भवति-विवृत्स

उ.] निमित्तत्वाऽभावोपलक्षणं। तेन संजिगमिषितेत्यादौ तृजन्ते इट्सिद्धिरिति बोध्यम्। **बहिरङ्गत्वादिति**। वार्तिकेऽन्तरङ्गत्वाद्गमिनिमित्तात्मनेपदस्यैव ग्रहणमिति भावः।

नियमार्थ इति। 'परस्मैपदे एवे'ति नियमार्थ इति भावः। तदाह-**तुल्येति**। **परस्मैपदलुकि चेति**। परस्मैपदे परे इत्यर्थे 'न लुमते'ति निषेधेन तत्परत्वाऽभावान्न स्यादिडिति भावः। यद्यप्यङ्गस्येत्यस्यानुवृत्तस्य आर्द्धधातुकस्येत्यादावङ्गनिमित्तस्येत्यर्थस्य क्लृप्ततया गमेः परस्याङ्गनिमित्तस्य सादेरार्धधातुकस्येत्यर्थाद्विनिरूपिताङ्गस्यात्रोद्देश्यकोटौ प्रवेशाऽभावेन 'न लुमते'त्यस्य न प्राप्तिस्तथापि परस्मैपदस्य प्रत्ययतया तदाक्षिप्ताङ्ग एव तत्प्रवृत्त्या प्रत्यये परतः पूर्वकार्यसत्त्वेन च स्यादेव निषेध इति भावः। भाष्ये—कृतीत्युपलक्षणं बोध्यम्। [**गमेरिट्**] ॥

समानपदस्थस्येड्वचनात् ॥*॥ **सिद्धमेतत् ॥ कथम् ? ॥ 'वृतादीनामात्मनेपदेन समानपदस्थस्ये[ड्वचनात्' । वृतादीनामात्मनेपदेन समानपदस्थस्ये–]ड्भवतीति वक्तव्यम्** ॥*॥ चतुस्तासिक्लृपिग्रहणानर्थक्यं च ॥*॥ **चतुर्ग्रहणं चानर्थकम् । सर्वेभ्यो हि वृतादिभ्यः प्रतिषेध इष्यते ॥ तासिग्रहणं चानर्थकम् ॥ किं कारणम् ?** ॥*॥ निवृत्तत्वात्सकारस्य ॥*॥ **निवृत्तं 'सकारादा'-विति । तास्ग्रहणे चेदानीमक्रियमाणे क्लृपिग्रहणेनापि नार्थः । एषोऽपि हि वृतादिः पञ्चमः ॥**

भवेत्क्लृपिग्रहणं न कर्तव्यं, तास्ग्रहणन्तु कर्तव्यम् । यद्धि तत्सकारादाविति न तच्छक्यं निवर्तयितुं, तृच्यपि हि प्रसज्येत–वर्तिता वर्धिता ॥ तास्ग्रहणे चेदानीं क्रियमाणे क्लृपिग्रहणमपि कर्तव्यमन्येभ्योऽपि वृतादिभ्यस्तासौ मा भूदिति ॥ भवेत्तासिग्रहणं कर्तव्यं, क्लृपिग्रहणं तु नैव कर्तव्यम् ॥ अन्येभ्योपि वृतादिभ्यः तासौ कस्मान्न भवति ? ॥ 'परस्मैपदे'ष्विति वर्तते, क्लृपेरेव च तास्परस्मैपदपरो नान्येभ्यो वृतादिभ्यः ॥ यद्येवं तास्ग्रहणेनापि नार्थः ॥ तृचि कस्मान्न भवति ? ॥ 'परस्मैपदेष्वि'ति वर्तते ॥

प्र.]त्वमिति । अन्यथा 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणप्रतिषेधः स्यात् । विवृत्सित्रीयत इत्यत्र तु पूर्ववदात्मनेपदस्य बहिरङ्गत्वादिड्भावः । **चतुर्ग्रहणं चेति ।** 'कृपू सामर्थ्ये' इत्यस्यानन्तरं वृत्करणं पठ्यते तद्द्युतादीनां वृतादीनां च समाप्त्यर्थं भविष्यति। एकस्यानेकप्रयोजनाऽविरोधात् । **सर्वेभ्य इति ।** संकल्प्स्यतीत्यादौ क्लृपेरपीत्यर्थः । **भवेत्तासिग्रहणमिति ।** क्लृपिग्रहणाऽकरणपरमेतन्न तु तासिग्रहणकरणपरम् । तथा चाऽस्यापि प्रत्याख्यानं करिष्यते । **परस्मैपदेष्विति वर्तत इति ।** वृतादीनामनुदात्तेत्त्वात्स्यसनौ विहाय क्लृपेस्तासिं चार्द्धधातुकं वलादिपरस्मैपदपरं

उ.] **न वृद्भ्यः । सिद्धन्त्विवतीति ।** अत्राऽपि परस्मैपदग्रहणं फलोपहितात्मनेपदनिमित्तत्वाऽभावलक्षकमित्यादि प्राग्वत् । **समाप्त्यर्थमिति ।** एवञ्चेह चतुर्ग्रहणमुत्तरसूत्रं च न कर्तव्यमित्यर्थः। **संकल्प्स्यतीति ।** 'तासि चे'ति चेन सादेरप्यनुकर्षणादिति भावः । एवञ्चतुर्ग्रहणाऽभावे 'तासि चे'ति चोऽपि व्यर्थ इति तात्पर्यम् ।

भाष्ये–**निवृत्तं सकारादाविति।** 'न वृद्भ्य' इति सूत्र एवेत्यर्थः। अतएव वक्ष्यति–**तन्निवृत्तौ वर्तितेत्यादावपि प्राप्नोतीति ।** 'परस्मैपदे'ष्वित्यनुवर्तमाने कथमन्येभ्यस्तासिनिवृत्तिस्तदाह–**वृतादीनामिति ।** 'तासिं चार्धधातुक'मित्यत्र 'विहाये'ति शेषः । वृद्भ्यः स्यसनोर्लुटि च क्लृप इति परस्मैपदं स्यादिविषये विकल्पेन विधीयते इति तत्रैवेट्प्रतिषेध इति परस्मैपदग्रहणाऽनुवृत्तौ चतुर्ग्रहणं, तासि च क्लृप इति सूत्रञ्च न कार्यमिति भावः । न च 'स्यन्त्स्यती'त्यादौ उदित्लक्षणविकल्पबाधनार्थं

उपदेशेऽत्वतः ॥७।२।६२॥

॥*॥ तासावत्वत्प्रतिषेधे घसेः प्रतिषेधप्रसङ्गोऽकारवत्त्वात् ॥*॥ **तासावत्वत्प्रतिषेधे घसेः प्रतिषेधः प्राप्नोति–जघसिथ ॥ किं कारणम् ? ॥ 'अकारवत्त्वात्' । सोऽपि ह्यकारवान् ॥*॥** सिद्धं तु हलादिग्रहणात् ॥*॥ **सिद्धमेतत् ॥ कथम् ? ॥ ['हलादिग्रहणात्'] । हलादिग्रहणं कर्तव्यम् । तच्चावश्यं कर्तव्यम्–अव्यशी प्रयोजयतः ॥ अव्यशी तावन्न प्रयोजयतः ॥ किं कारणम् ?॥ 'तासावनिट्' इत्युच्यते सेटौ चेमौ तासौ ॥ अञ्ज्वशू तर्हि प्रयोजयतः॥ अञ्ज्वशू चापि न प्रयोजयतः॥ किं कारणम् ?॥'तासौनित्याऽनिट'इत्युच्यते, विभाषितेटावेतौ ॥ अदिस्तर्हि प्रयोजयति । आदिथ ॥ क्रियमाणेऽपि**

प्र.]नास्ति। एतच्च यथान्यासाश्रयेणोच्यते। यदा त्वात्मनेपदेन समानपदस्थस्येड्वतीत्युच्यते तदा परस्मैपदेष्विति नानुवर्त्यमिति। 'से' इत्येतदवश्याऽनुवर्त्यं, तस्मिन्ननुवर्तमाने 'तासि चे'त्यपि कर्तव्यम्। 'कृप' इत्येतत्तु न कर्तव्यं, कृपेरन्येभ्यो वृतादिभ्यस्तासेरात्मनेपदपरत्वादिटोऽभावात्। [**न वृद्भ्यश्चतुर्भ्यः**] ॥

उपदेशे । तासाविति । तासाविडभावे सत्यत्वतस्थलि प्रतिषेधो विधीयमान इत्यर्थः । **सिद्धं त्विति ।** उपदेशग्रहणेन द्वयं संबध्यते। उपदेशे योऽत्वान्, हलादिश्चेति । न च घसिराद्युपदेशे हलादिः । **अञ्ज्वशू तर्हीति ।** अशू व्याप्तावित्यस्यानुदात्तेत्त्वात्थलभावादुपन्यासोऽयुक्तः । **क्रियमाणेऽपीति** । यद्यपि स्थान्युपदेशे

उ.]चतुर्ग्रहणं । तत्र हि (सति) तत्सामर्थ्यात्पुनर्विधानकल्पनद्वारा, प्रत्येक निषेधव्यापारबोधनद्वारा वा तस्याऽपि निषेध इति वाच्यम्,–'न वृद्भ्य'इत्यनेन परत्वात्तद्बाधसिद्धेः। 'निषेधाश्च बलीयांस' इति न्यायाच्च । नचैवमपि 'विवृत्सिते'त्यनुरोधेन परस्मैपदस्य फलोपहितात्मनेपदनिमित्तत्वाऽभावोपलक्षणत्वावश्यकत्वेन 'वर्तिते'त्यादावतिव्याप्तिवारणाय तत्र 'सादे'रित्यनुवृत्त्यावश्यकतया 'तासिचे'त्यावश्यकमिति वाच्यम्, इष्टापत्तेः । अत एव पूर्वमेव तासग्रहणं कर्तव्यं, कृपिग्रहणन्तु नैव कर्त्तव्यमिति भाष्ये उक्तम् । 'यद्येवं तासग्रहणेनापी'ति भाष्यन्तु सिद्धान्त्येकदेश्युक्तिरिति बोध्यं । तद्ध्वनयन्नाह—**एतच्चेति । से इत्येतदिति ।** परस्मैपदग्रहणस्योक्तार्थोपलक्षणत्वाऽभावे चेत्येतदपि द्रष्टव्यम् । [**न वृद्भ्यः**] ॥

उपदेशेऽत्वतः । ननु हलादिग्रहणेऽपि घसेः प्रतिषेधः प्राप्नोत्येवेत्यत आह–**उपदेशग्रहणेनेति । नच घसिरिति** । उपदेशत्वावच्छेदेन यो हलादिरित्यर्थः । **आद्युपदेश इति** । आद्ये उपदेशे इत्यर्थः । आदिश्चासावुपदेशश्चेति विग्रहः । 'अद्युपदेश'इति पाठस्तु सुगम एव। **अनुदात्तेत्त्वादिति** । वस्तुतस्तु भाष्यप्रामाण्येनाऽस्यानुदात्तेत्त्वाऽभावमप्याश्रित्य परस्मैपदं थलस्त्येवेति बोध्यम्। भाष्ये–**आदिथेति** । केचित्तु

वै हलादिग्रहणेऽत्र प्राप्नोति–जघसिथ । एषोऽपि [हि] हलादिः ॥*॥ तस्य चाभावात्तासौ ॥*॥ **'तासावनिट' इत्युच्यते न च घसिस्तासावस्ति ॥ ननु च यस्तासौ नास्त्यनिडप्यसौ तासौ भवति॥ नैवं विज्ञायते–'यस्तासावनि'डिति ॥ कथं तर्हि ? ॥ 'यस्तासावस्त्यनिट् चे'ति ॥ किं वक्तव्यमेतत् ? ॥ न हि ॥ कथमनुच्यमानं गंस्यते ?** ॥[॥*॥ सप्तम्यर्थे वतिः ॥*॥] । **सप्तम्यर्थेऽपि वै वतिर्भवति । तद्यथा मथुरायामिव मथुरावत् । पाटलिपुत्र इव पाटलिपुत्रवत् । एवं तासाविव तास्वत्** ॥ [उपदेशेत्वतः] ॥

प्र.] घसिर्हलादिर्न भवति तथापि स्वोपदेशे हलादिरेव। **तस्य चाऽभावादिति।** उपमाने दृष्टानां धर्माणामुपमेये भूतानां भाविनां वा संप्रत्ययः । तत्र 'तास्वत्थलि नेड्वती'त्युच्यमाने यदि घसिस्तासौ स्यात्ततस्थलि प्रतिषेधोऽतिदिश्येत। यतस्तु तासौ नास्ति ततोऽस्य तासावनिट्त्वमशक्यं प्रतिपत्तुमिति थल्यतिदेशो न प्रवर्तते ।

अनिडप्यसाविति । असत्त्वादेवेडभावात् । **सप्तम्यर्थे इति ।** तासाविव तास्वदित्यौपश्लेषिकमधिकरणमाश्रीयते । तासौ परतः पूर्वस्य यथेण्न भवति तथा थल्यपीत्यर्थः । ननु चास्य स्थान्यदिस्तासावस्ति स चाऽनिट् चेति तदादेशस्यापि स्थानिवद्भावात्सत्वाऽनिट्त्वे स्याताम् । नैतदस्ति । स्थानिवद्भावः शास्त्रीयेष्वेव कार्येषु प्रवर्तते । न च तासौ सत्वं शास्त्रीयं कार्यम् । अतएव वयेस्थलि वयिथेति प्रतिषेधाऽभावः । क्रमेरपि च क्रमिथेति भाव्यम् । न हि तासौ नित्यानिट् क्रमिः । आत्मनेपद इडभावात्, परस्मैपदे सेट्त्वात् । [**उपदेशेऽत्वतः**] ॥

उ.] 'इडत्यर्तिव्ययती'नामिति नित्येटैव सिद्धेऽत्र 'हलदे'रित्यस्य प्रयोजनं चिन्त्यमित्याहुः।तत्राऽद्ग्रहणं न कार्यमिति भाष्याशयमन्ये। **तथापि स्वोपदेशेति ।** अस्योपदेशग्रहणस्याऽचस्तास्वदित्यत्राप्यपकर्षणेन तत्र चक्षिङः ख्यादेशेऽजेर्व्यादेशे च 'चख्याथ' 'विवेथे'त्यादिसिद्धये उपदेशत्वसामानाधिकरण्येनैवान्वयावश्यकत्वेनात्राऽपि तथैवाऽन्वय उचितः । स्वोपदेश एव च मुख्य इति स एवाश्रीयते, न तु स्थान्युपदेश इतिं भावः । ननु घसेस्तासावभावेऽपि असत्त्वादेव तस्य तत्रेडभावोऽप्यस्तीत्यत आह–**उपमाने इति ।** यथोशीनरवन्मद्रेषु यवाः संपन्नाः संपत्स्यन्त इति वा प्रतीतिः । सर्वथोपमाने दर्शनमवश्याश्रयणीयमिति भावः । **अशक्यं प्रतिपत्तुमिति ।** स्थानिवत्त्वं तु न, तासौ सत्तायास्तत्सहस्रेणाप्यतिदेष्टुमशक्यत्वादिति भावः । एतदभिप्रायमजानतः प्रश्नो भाष्ये–**ननु च यस्तासाविति । तासौ परतः पूर्वस्येति ।** तास्परधातोः परस्य वलाद्यार्धधातुकस्य अर्थात्तास्रूपस्यैव यथेण्न भवति तथेत्यर्थः । तासौ परतः पूर्वस्य धातोर्यथा इट्–इण्निमित्तत्वं न भवति तथेत्यक्षरार्थः।**शास्त्रीयेष्विति ।** प्रत्यासत्तेः । **न चेति।** लौकिकत्वात् । **वयेरिति।** 'वेञो वयि'रिति लिटि वयादेशः । प्रतिषेधाऽभावाच्च क्रादिनियमान्नित्यमिड्भवति । **नहि तासाविति ।**

ऋतो भारद्वाजस्य ॥७।२।६३॥

किमर्थमिदमुच्यते न 'अचस्तास्वत्थल्यनिटो नित्य'मित्येव सिद्धम् ॥ एवं तर्हि नियमार्थोऽयमारम्भः—'ऋत एव भारद्वाजस्य नान्यतो भारद्वाजस्ये'ति ॥ क मा भूत् ? ॥ ययिथ वविथेति ॥*॥ ऋतो भारद्वाजस्येति नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्य ॥*॥ **ऋतो भारद्वाजस्येति नियमानुपपत्तिः ॥ किं कारणम् ? ॥ 'अप्राप्तत्वात्प्रतिषेधस्य' । गुणे कृते रपरत्वे चाऽनजन्तत्वात्प्रतिषेधो न प्राप्नोति ॥ असति नियमे को दोषः ?** ॥*॥ तत्र पचादिभ्य इड्वचनम् ॥*॥ **तत्र पचादिभ्य इड्वक्तव्यः—पेचिथ शेकिथेति ॥**

यदि पुनरयं भारद्वाजः पुरस्तादपकृष्येत—'अचस्तास्वत्थल्यनिटो नित्यं भारद्वाजस्य' । 'उपदेशेऽत्वतः' । 'भारद्वाजस्य' । तत 'ऋतः' । 'भारद्वाजस्ये'ति निवृत्तम् ?॥ सिध्यत्येवमयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो

प्र.] **ऋतो । गुणे कृत इति ।** 'जहर्थे'त्यादौ । न ह्ययमजन्तो नाप्युपदेशेऽत्वान् । **असति नियम इति ।** 'जहर्थे'त्यादाविट्प्रतिषेधार्थ एव योगोऽस्त्विति भावः । **तत्र पचादिभ्य इति ।** पूर्वयोगाभ्यां पचादिभ्यस्थलि नित्ये प्रतिषेधे प्राप्ते पक्षे इड्विधेयः । 'जहर्थे'त्यादौ च नित्यः प्रतिषेध इष्यते । तत्र 'भारद्वाजस्ये' ति वचनात् स्मृत्यन्तरानुसन्धानाद्विकल्पः प्राप्नोति । नियमफलमन्यथोपपादयितुमाह—**यदि पुनरिति ।** पूर्वयोगे भारद्वाजग्रहणं कृत्वा तदेव द्वितीये योगेऽनुवर्त्यते । **-स्वस्मा-**

उ.] अनिट इत्यत्राऽपि प्रत्यासत्त्या तासावित्यध्याह्रियते इति बोध्यम् । अजन्तस्य धातोः प्रयोगमात्रावच्छेदेन इड्रहितस्याप्रसिद्धेः क्वाऽनिडित्याकाङ्क्षोदयात् । एवञ्चाऽजेरिवाऽस्यापि स्तुक्रमेरिति नियमेन पदभेदेन विभाषितेट्त्वेन नित्यानिट्त्वाभावान्न प्रतिषेध इति भावः । [**उपदेशेऽत्वतः**] ॥

ऋतो भार । भाष्ये—**न अचस्तास्वदिति ।** नच ऋकारान्ते विकल्पेन निषेधार्थमिदं सूत्रमिति वाच्यम् , भारद्वाजातिरिक्तैरपि 'अचस्तास्व'दिति सामान्यसूत्रप्रणयनेन निषेधस्यैवाङ्गीकृतत्वेन स्मृत्यन्तरानुसन्धानद्वारेण विकल्पस्य वक्तुमशक्यत्वादिति भावः । भाष्ये पेचिथेत्युलक्षणं 'पपिथे'त्यादेरपि । तदाह—**पूर्वयोगाभ्यामिति ।** नियमपक्षे हि तास्वत्थल्यनिटो नित्यमित्यनुवर्त्त्य योऽयं तासौ नित्यानिटस्थलीण्निषेधः स भारद्वाजमते ऋकारान्तस्यैव नान्यस्य भारद्वाजमते इत्यर्थात् उभयोरपि नियमाङ्गीकारादिति भावः । इदञ्चाऽचस्तास्वदिति सिद्धे नियम इत्युपक्रमे उक्तेस्तत्र पचादिभ्य इड्वचनमित्युक्तेश्च विज्ञायते । एतेन सजातीयत्वादृकारान्ते तस्यैव प्राप्तेश्चाऽचस्तास्वदित्यस्यैव नियम इत्यपास्तं । स्वयं दोषान्तरमप्याह—**जहर्थेत्यादौ चेति ।** 'अचस्तास्व'दित्यस्याऽप्राप्त्या पूर्वोक्तयुक्त्या विकल्पाऽसंभवस्य वक्तुमशक्यत्वादिति भावः । अत्रत्यं भारद्वाजग्रहणं कथं व्यवहितपूर्वयोगेऽपकर्षेण संबध्येते-

भवति ॥ एवं तर्हि,—॥*॥ योगविभागात्सिद्धम् ॥*॥ **योगविभागः करिष्यते। 'अचस्तास्वत्थल्यनिटो नित्यमुपदेशे' । ततः–'अत्वतः' । अत्वतश्चोपदेश इति** ॥ [ऋतो भारद्वाजस्य] ॥

बभूथाततन्थजगृम्भववर्थेति निगमे ॥७।२।६४॥

वृग्रहणं किमर्थं न कृसृभृवृस्तुद्रुस्रुश्रुवो लिटी'त्येव सिद्धम् ॥ एवं तर्हि ॥*॥नियमार्थोयमारम्भः॥*॥ **निगमएव यथा स्यात्॥क मा भूत् ?॥ववरिथ॥**

वस्वेकाजाद्धसाम् ॥७।२।६७॥

किमर्थमिदमुच्यते ? ॥*॥ वस्वेकाजाद्धसांवचनं नियमार्थम् ॥*॥ **निय-**

प्र.]न्मतादिति । भारद्वाजस्य मतं पेचिथ पपिथेति इड्वत्येव । अन्येषां तु मतम्, पपक्थ पपाथेतीडभावः । न्यासविपर्यये तु मतविपर्ययः प्रदर्शितः स्यात् । ननु च नित्येषु शब्देषु विकल्पिते विधौ विकल्पमात्रं प्रदर्शयितव्यम् । तत्र कस्य किं मतं यत्प्रच्यावितं स्यात् ?। उच्यते–विकल्पप्रतिपादनाय वाग्रहणे एव कर्तव्ये पूजार्थमाचार्या उपादीयन्ते । सा चैवं पूजा भवति–यदि येनाचार्येण यः शब्दः स्मृतः स तेनैव स्मृतत्वेनोपदिश्यते। एवं हि तस्य स्मर्तृत्वेन प्रमाणत्वेन स्तुतिः कृता भवति। एवं चाङ्गार्ग्यगालवयोरित्यादावनेकाचार्योपादानमर्थवद्भवति । विकल्पस्यैकाचार्योपादानेनापि सिद्धत्वात् । **योगविभाग इति** ।ततश्च हरत्यादीनां गुणरपरत्वयोःकृतयोरनजन्तत्वेऽप्युपदेशेऽजन्तत्वात्सिद्धे प्रतिषेधे अस्य नियमार्थत्वोपपत्तिः । आदेशोपदेशोऽप्याश्रीयते न तु स्थान्युपदेश एवेति अजत्यादेशस्य 'वीशब्दस्य, चक्षिङादेशस्य च ख्यो विकल्पस्थलि भवति—विवेथ विवयिथ। आचख्याथ आचख्यिथ ॥

बभू । वृग्रहणमिति । एकदेशाक्षेपद्वारेण ववर्थशब्दसमुदाय एवाक्षिप्यते ॥

वस्वे । किमर्थमिति । यदि क्रादिनियमः प्रकृत्याश्रयस्य प्रत्ययाश्रयस्य च

उ.]त्यत आह—**पूर्वयोग इति**। 'अचस्तास्व'दित्यत्र। **मतविपर्यय इति**। भारद्वाजस्येडभावोऽन्यस्येडित्याकारः । **ननु चेति** । विकल्पप्रतिपादनमात्रफलत्वादाचार्यग्रहणस्येति भावः । **ततश्चेति** । योगविभागद्वारा चोपदेशग्रहणापकर्षः कार्य इति बोध्यते । **न तु स्थान्युपदेश एवेति** । यस्य यो मुख्य उपदेशस्तस्य स एवाश्रीयते तदभावे तु गौणोऽपीत्यर्थः । यद्यपि स्थान्युपदेशग्रहणेऽप्युपदेशेऽत्वत्त्वमस्ति तथापि तदुपदेशे तासौ नित्यानिट्त्वाऽभावः ।प्रत्यासत्त्या यदुपदेशेऽत्वान् तदुपदेशविशिष्टस्यैव तासौ नित्यानिट्त्वग्रहणमुचितमिति भावः । तुष्टोथेत्यादौ तु पुरस्तात्प्रतिषेधकाण्डारंभसामर्थ्यादस्यापि क्रादिनियमेन निषेध इति नेड्वशीत्यत्र भाष्य उक्तम् ॥

बभूथात । भाष्ये–**वृग्रहणं किमर्थमिति** । भूविषये तु न शङ्कितम् । उकारान्तानां सेट्त्वात् । यथा चैतत्तथा 'एकाच उपदेशे' इत्यत्र निरूपितम् । अस्य तु कृसृभ्रितिनिषेधाल्लिट्यनिट्त्वमिति बोध्यम् । [**बभूथाततन्थ**] ॥

मार्थोऽयमारम्भः—'वसावेकाजाद्घसामेव' ॥ क मा भूत् ? ॥ बिभिद्वान् ॥ किमुच्यते—'नियमार्थमिति, न पुनर्विध्यर्थमपि स्यात् । प्रतिषेधोऽपि ह्यत्र प्राप्नोति—'नेड्वशि कृती'ति, कृञ्चैवाऽयं वशादिश्च ॥ एवं तर्हि—'कृसृभृवृस्तुद्रुस्रुश्रुवो लिटी'त्येतस्मान्नियमादत्रेड्भविष्यति ॥ नात्र तेन परिप्रापणं प्राप्नोति ॥ किं कारणम् ? ॥ प्रकृतिलक्षणस्य प्रतिषेधस्य स प्रत्यारम्भः, प्रत्ययलक्षणश्चाऽयं प्रतिषेधः ॥ "उभयोः स प्रत्यारम्भः ।" ॥ कथं ज्ञायते ? ॥ "वृङ्वृञोर्ग्रहणात्" ॥ कथं कृत्वा ज्ञापकम् ? ॥ इमौ वृङ्वृञावुदात्तौ, तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति । पश्यति त्वाचार्यः—'उभयोः स प्रत्यारम्भ' इति, ततो वृङ्वृञोर्ग्रहणं करोति । न खल्वपि कश्चिदुभयवान्प्रतिषेधः प्रकृतिलक्षणः प्रत्ययलक्षणश्च । तुल्यजातीयेऽसति यथैव प्रकृतिलक्षणस्य नियामको भवत्येवं प्रत्ययलक्षणस्यापि नियामको भविष्यति ॥

अथ यावता वसावेकाजाद्घसिभ्य इटा भवितव्यं को न्वत्र विशेषो नियमार्थे वा सति विध्यर्थे वा ? ॥ न खलु कश्चिद्विशेषः, आहोपुरुषिकामात्रं तु,—भवानाह 'विध्यर्थमिति, वयं तु ब्रूमो—'नियमार्थ'मिति ॥

अथैकाज्ग्रहणं किमर्थम् ? ॥ इह मा भूत्—बिभिद्वान् चिच्छिद्वानिति॥

प्र.] प्रतिषेधस्य निवर्तकस्तत इदं नियमार्थम् । अथ प्रकृत्याश्रयस्यैव, ततो 'नेड्वशि कृती'ति प्रतिषेधे प्राप्ते विध्यर्थमित्युभयसंभवात्प्रश्नः । **न खलु कश्चिदिति** । उभयथैकाजाद्घसिभ्य इटा वसौ भाव्यं नान्येभ्यो बिभिद्वानित्यादावित्यर्थः । **आहोपुरुषिकामात्रमिति** । अहोऽहं पुरुष इति यस्याभिमानः सोऽहोपुरुष उच्यते । यथा 'यर्वाणस्तर्वाणो नामर्षयो बभूवु'रित्युक्तम् । तस्य भावः । मनोज्ञादित्वाद्वुञ् । क्वस्वभिप्रायेणैतदुच्यते— **न खलु कश्चिद्विशेष इति** । अन्यत्र विशेषोऽस्त्येव । यदि क्रादिनियमः प्रकृत्याश्रयस्य प्रतिषेधस्य स्यात्ततो 'युयुविवे'त्यादौ 'श्र्युकः किती'ति प्रतिषेधः स्यात्, श्रुग्रहणं च क्रादिसूत्रेऽनर्थकं स्यादिति प्रत्ययाश्रयोऽपि प्रतिषेधः क्रादिनियमेन निवर्त्यतइतिसूत्रमिदं नियमार्थमेव। **अथैका-**

उ.] **वस्वेकाजात्** । विधिनियमयोर्विशेषाऽभावं दर्शयति—**उभयथेति** । कथं तदभिमानवांस्तच्छब्दवाच्यो भवतीत्यत्राह—**यथा यर्वाण इति** । यथा तत्प्रयुञ्जानाः साहचर्यात्ताभ्यां शब्दाभ्यामभिधीयन्ते तथाऽहोऽहं पुरुष इत्यभिमानवान् तेन शब्देनाभिधीयत इत्यर्थः । **तस्य भाव इति** । स चाभिमान एव । क्रसृभृत्यस्य उभयप्रत्यारंभत्वं नैतस्य निमार्थत्वार्थत्वायैव किन्त्वन्यार्थमपीत्याह—**अन्यत्र विशेषोऽस्त्येवेति** । **नियमार्थमेवेति** । अत एव भाष्ये उक्तं—**वयन्तु ब्रूमो नियमार्थमिति** ।

क्रियमाणेऽपि वै एकाज्ग्रहणेऽत्र प्राप्नोति, एषोऽपि ह्येकाच् ॥ एवं तर्हि कृते द्विर्वचने य एकाच् ॥ किं वक्तव्यमेतत् ? ॥ न हि ॥ कथमनुच्यमानं गंस्यते ? ॥ एकाज्ग्रहणसामर्थ्यात् । न हि कश्चिदकृते द्विर्वचनेऽनेकाजस्ति यदर्थमेकाज्ग्रहणं क्रियते ॥ ननु चायमस्ति जागर्तिः—जागृवांसोऽनुग्मन् ॥ यत्तर्ह्याकारग्रहणं करोति । न हि कश्चिदकृते द्विर्वचने आकारान्तोऽनेकाजस्ति ॥ ननु चायमस्ति;—दरिद्रातिः ॥ न दरिद्रातेरिटा भवितव्यम् ॥ किं कार-

प्र.] **ज्ग्रहणमिति** । क्रियमाणमप्येकाज्ग्रहणमनिष्टनिवृत्तये नाऽलमिति मत्वा प्रश्नः। **बिभिद्वानिति** । कृतद्विर्वचनानामनेकाचां निवृत्त्यर्थमित्यभिप्रायः । **एकाज्ग्रहणसामर्थ्यादिति** । यद्यपि नित्यत्वाद्विर्वचने कृतेऽनेकाच्त्वादिण्न भवतीति परिहारोऽस्ति तथापि परिहारान्तरसद्भावान्नोक्तः । तथा हि—द्विर्वचनस्यावकाशः,—पपाचेति । इटोऽवकाशो यत्र कृते द्विर्वचने एकाच्त्वं,—पेचिवान् आदिवानिति । 'बिभिद्वा'नित्यादौ तु नित्यत्वाद्विर्वचनं पूर्वम् । **जागर्तिरिति** । 'उषविदजागृभ्योऽन्यतरस्या'मिति विकल्पितत्वादामो जागर्तेः परः क्वसुः । चिरिजिरिचकास्यादिभ्यस्तु 'कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थ'मिति आमा भाव्यमिति क्वसोः परस्याऽसंभवः । **जागृवांस इति** । 'द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्य'मिति द्विर्वचनाऽभावः। **न दरिद्रातेरिति**। दरिद्रातेरनित्य आमित्यात औ णल इति ओकारे विधा-

उ.] न्यायसिद्धत्वादित्यर्थः। पपिवानित्यादावाल्लोपसिद्धिस्तु सन्निपातपरिभाषाया अनित्यत्वादिति बोध्यम् । **अनिष्टनिवृत्तये नालमिति** । भिद्वसित्यस्यामवस्थायामेकाच्त्वान्नियमव्यावर्त्यविषयाऽभावादनर्थकं तदित्यर्थः । इड्द्विर्वचनयोरन्यतरस्य निरवकाशत्वे तदेव स्यान्न तु नित्यमत उभयोरवकाशत्वं दर्शयति-**तथाहीति** । विषयभेदात्फलभेदाचापवादत्वं नेत्याशयः। **नित्यत्वाद्विर्वचनमिति** । इट् तु कृते द्विर्वचनेऽनेकाच्त्वादप्राप्तेरनित्यः । शब्दान्तरात्प्राप्नुवत इव शब्दान्तरेऽपि प्राप्नुवतोऽप्यनित्यत्वान्नायं नियतः परिहार इति परिहारान्तराश्रयणमिति तत्त्वम् । **चिरीत्यादि** । मन्त्रे तेषां क्वस्वन्तानां प्रयोग एव नास्तीति भावः । 'जागृवांस' इत्यत्र लिटि धातोरितिद्विर्वचनं स्यादत आह—**द्विर्वचनप्रकरण इति**। ननु दरिद्रातेः क्वसौ 'कास्यनेकाज्ग्रहण'मित्यामा भाव्यमिति कथमिडुपक्षिप्तोऽत आह—**दरिद्रातेरिति । अकारलोपे इति** । न च परत्वादौत्वे सन्निपातपरिभाषया लोपो दुर्लभः । आर्धधातुके विवक्षिते तद्विधानेन लोपस्यान्तरङ्गत्वात् । नन्वेवमादन्तत्वाभावादौत्वस्याऽप्राप्तिः । औविधानसामर्थ्यादेव भूतपूर्वगत्या आकारान्तत्वमाश्रित्य णल आदेशप्रवृत्तेः । **अनित्यत्वमिति** । अत एव 'कास्प्रत्यया'दिति सूत्रे दरिद्राञ्चकारेति भाष्यप्रयोगः सङ्गच्छते इति बोध्यम् । भाष्ये-**सिद्धोऽसाविति** । एवञ्चादन्तत्वाभावान्नास्य तत्र प्रवृत्तिरिति भावः । एकस्य सिद्धशब्दस्य पौनरुक्त्यपरिहारायाह—

णम् ? ॥ उक्तमेतत्—"दरिद्रातेरार्धधातुके लोपः, सिद्धश्च प्रत्ययविधा'विति। यश्चेदानीं प्रत्ययविधौ सिद्धः सिद्धोऽसाविड्विधौ । एवमपि भूतपूर्वगतिर्वि- ज्ञायेत—'आकारान्तो यो भूतपूर्व'इति ॥ एकाज्ग्रहणमेव तर्हि ज्ञापकम् ॥ ननु चोक्तं—'जागर्त्यर्थमेतत्स्यात् ॥ नैकमुदाहरणमेकाज्ग्रहणं प्रयोजयति । यद्येतावत्प्रयोजनं स्या'ज्जागर्तेर्नेत्येव' ब्रूयात् ॥

अथ घसिग्रहणं किमर्थं, न 'एका'जित्येव सिद्धम् ॥*॥ घसिग्रहणमन-

प्र.] तव्ये औकारविधानेन ज्ञापितम्।ओकारस्य प्रश्लिष्टावर्णत्वादुच्चारणे लाघवं भवति, औकारस्य तु विश्लिष्टावर्णत्वादोकाराद्विवृततरत्वाच्च गौरवमित्योकार एव विधेयः । तत्र वृद्धिरेचीति वृद्धौ कृतायां ययावित्यादि सिध्यति । ददरिद्राविति त्वाकारलोपे न सिध्यति । तदर्थमौकारविधानमनित्यत्वमस्मादामो ज्ञापयति । **सिद्धोऽसाविड्विधाविति ।** क्वचित्तु'सिद्धसिद्ध' इति पाठः । सिद्धश्चासौ सिद्ध इति विशेषणसमासः । अत्यन्तसिद्ध इत्यर्थः । एकेन सिद्धशब्देन सामान्यसिद्धिः प्रतिपाद्यते, द्वितीयेन तु विशेषसिद्धिः । **एवमपीति ।** सांप्रतिकस्याऽकृतद्विर्वचनस्याऽनेकाच आकारान्त- स्याऽभावाद्दरिद्राग्रहणे कर्तव्ये लाघवार्थमाद्ग्रहणं स्यादिति 'नैकमुदाहरणमाद्ग्रहणं प्रयोजयती'ति नोक्तम् । **नैकमुदाहरणमिति ।** ऊर्णोतेर्णुवद्भावादेकाच्त्वादेकाज्ग्रह- णेनाऽनिवृत्तिः । **जागर्तेर्नेति ।** सूत्रमिदं नियमार्थम् । तत्र यद्यस्य जागर्तिरेव नि- वर्त्यः स्यात्तस्यैव साक्षात्प्रतिषेधं कुर्यात् । लघीयसी हि साक्षात्प्रतिपत्तिः । न च दरिद्रातिर्द्वितीयो निवर्त्यः,अस्यां ह्यवस्थायामाद्ग्रहणस्याऽकृतद्विर्वचनानेकाजाकारा- न्तार्थत्वाद्भूतपूर्वकारान्ताश्रयणात्स्यादेव तत इडागमः । यदात्वेकाज्ग्रहणेन कृतद्विर्व- चना एकाचो गृह्यन्ते तदाऽऽद्ग्रहणं कृतद्विर्वचनानेकाजाकारान्तार्थं—'पपिवा'- निति । सांप्रतिकाकारान्तसद्भावे भूतपूर्वगतिरयुक्ताऽऽश्रयितुम् ।

अथ घसिग्रहणमिति । 'द्विर्वचने चे'ति स्थानिद्भावः पूर्वविप्रतिषेधाश्रयेण प्रत्याख्यायते—'द्विर्वचनं यणयवायावादेशाऽल्लोपोपधालोपणिल्लोपकिकिनोरुत्वेभ्य'

उ.] **अत्यन्तसिद्ध इति।** कथमेतदर्थलाभस्तत्राह—**एकेनेति।**एवं सिद्धिद्वयप्रतिपादने- ऽत्यन्तसिद्धिरुक्ता भवतीत्यर्थः । **आकारान्तस्याभावादिति ।** एकाच्पदस्य कृतद्वि- र्वचनैकाच्परत्वे लक्षणायां तात्पर्यग्राहकत्वापेक्षया भूतपूर्वाश्रयणं लघीयइति भावः ।

ननूर्णोतेः सत्त्वान्नैकमित्ययुक्तमत आह—**ऊर्णोतेरिति । प्रतिषेधमिति ।** 'वसो- रजागु'रिति न्यासः कार्य इति भावः। ननु तदपेक्षया एकाज्ग्रहणं नियमपरं लघ्वत आह—**लघीयसी हीति । अवस्थायामिति ।** एकाच्ग्रहणेन कृतद्विर्वचनैकाचाम- ग्रहणे इत्यर्थः । **अकृते इति ।** आद्ग्रहणस्य तज्ज्ञापकापेक्षया भूतपूर्वानेकाजाका- रान्तार्थत्वं युक्तमिति भावः । **सांप्रतिकेति ।** तत्र हि इडागमं विना आकारलोपो दुर्लभ इति भावः । एवञ्च दरिद्रातेर्ददरिद्रावित्येव । **प्रत्याख्यायते इति।** स्थानिवत्त्वं

च्कत्वात् ॥*॥ घसिग्रहणं क्रियते, लोपे कृतेऽनच्कत्वादिण्न प्राप्नोति॥ इद-मिह संप्रधार्यमिट् क्रियतां लोप इति, किमत्र कर्तव्यम् ?॥ परत्वादिडागमः॥ नित्यो लोपः। कृतेऽपीटि प्राप्नोत्यकृते ऽपि॥ इडपि नित्यः। कृतेऽपि लोपे प्राप्नोत्यकृतेऽपि॥ अनित्य इट्। न हि कृते लोपे प्राप्नोति॥ किं कारणम् ?॥ अनच्कत्वात्'॥ एवं तर्हि द्विर्वचने कृतेऽभ्यासे योऽकारस्तदाश्रय इड्भवि-ष्यति॥ न सिध्यति॥ किं कारणम् ?॥ द्वित्वाल्लोपस्य परत्वात्। द्विर्वचनं क्रियतां लोप इति किमत्र कर्तव्यम् ?॥ परत्वाल्लोपः। लोपे कृतेऽनच्कत्वा-द्विर्वचनं न प्राप्नोति। घसिग्रहणे पुनः क्रियमाणे न दोषो भवति॥ कथम् ?॥ वचनादिड्भविष्यति॥ इटि कृते द्विर्वचनं क्रियतां लोप इति यद्यपि परत्वाल्लोपः, स्थानिवद्भावाद्द्विर्वचनं भविष्यति॥ [वस्वेकाजाद्घसाम्]॥

विभाषा गमहनविदविशाम् ॥७।२।६८॥

॥*॥ दृशेश्च ॥*॥ दृशेश्चेति वक्तव्यम्। ददृश्वान्। ददृशिवान्॥

प्र.]इति। तत्र घस्-घस् इति स्थिते 'घसिभसोर्हलि चे'ति परमप्युपधालोपं पूर्वविप्रति-षेधेन बाधित्वा द्विर्वचनं भवति। तत्र कृते पुनः प्रसङ्गविज्ञानादुपधालोपः, ततः कृत-द्विर्वचन एकाजेव भवतीति सिद्ध इडागम इति मत्वा प्रश्नः। इतरस्तु-स्थानिवद्भावा-रम्भात्पूर्वविप्रतिषेधो नाश्रितस्ततः परत्वान्नित्यत्वाद्वोपधालोपे कृत एकाच्त्वाभावान्न द्विर्वचनं स्यान्नापीडागम इति मत्वाह—**घसिग्रहणमनच्कत्वादिति**। **नित्यो लोप इति**। हल्यचि च विधानात्। इट् तु लोपे कृतेऽनच्कत्वान्न प्राप्नोतीत्यनित्यः। पूर्व-विप्रतिषेधवाद्याह—**इडपि नित्य इति**। कृते द्विर्वचने उपधालोपे चाऽभ्यासाका-राश्रयेणैकाच्त्वात्। स्थानिवद्भाववाद्याह—**अनित्य इडिति**। पूर्वविप्रतिषेधवाद्याह— **एवं तर्हीति**। 'पूर्वस्मादपि विधौ स्थानिव'दिति सर्वत्र नाश्रीयत इति स्थानिवद्भा-वादनेकाच्त्वमिति न चोदनीयम्। स्थानिवद्भाववाद्याह—**न सिध्यतीति**। **पर-त्वादिति**। नित्यत्वादित्यपि बोद्धव्यम्। **वचनादिति**। 'अपवादत्वा'दिति न बोद्धव्यम्, सत्यपि संभवे बाधनं भवतीति लोपद्विर्वचनयोरिटा बाधप्रसङ्गात्। किं तु क्रमः प्रदर्श्यते—घसिग्रहणे क्रियमाणे कृताकृतप्रसङ्गित्वादिडागमो नित्यः, कृत-योरपि लोपद्विर्वचनयोः प्रवर्तनात्सावकाशश्च। लोपोऽपि नित्यः। तत्र परत्वादि-डागमः, ततो लोपः, ततो द्विर्वचनमिति सिद्धं—'जक्षिवा'निति॥ **[वस्वेकाजा]**॥

विभाषा गमहनविद। दृशेरिति वर्तत इति। 'विभाषा सृजिदृशो'-

उ.]तु न, द्वित्वनिमित्ताज्निमित्तादेशाभावादिति भावः। **स्थानिवद्भावादिति**। 'अचः परस्मि'न्नित्यनेन सावकाशयोरेव नित्यत्वेन व्यवस्थेत्यत इटः सावकाशत्वं दर्शयति— **कृतयोरपीति**। इदं चिन्त्यं, तत्प्राप्तिकालेऽवश्यं तयोः प्राप्तेः। तस्माद्धलि लोपं बाधित्वाऽपवादत्वादिटि पश्चादचि लोपः। तत आतिदेशिकं द्विर्वचनम् औपदेशिकस्य

तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । दृशेरिति वर्तते ॥ [विभाषा गमहन]

ऋद्धनोः स्ये ॥ ७।२।७० ॥

॥*॥ स्वरतेर्वेट्त्वादृतः स्ये (इति) विप्रतिषेधेन ॥*॥ **स्वरतिलक्षणाद्वाव-चनादृतः स्य इत्येतद्भवति विप्रतिषेधेन । स्वरतिलक्षणस्य वावचनस्यावकाशः स्वर्ता स्वरिता । ऋतः स्य इत्यस्यावकाशः–करिष्यते हरिष्यते । इहोभयं प्राप्नोति–स्वरिष्यति । अस्वरिष्यत् । 'ऋतः स्ये' इत्येतद्भवति विप्रतिषेधेन ॥**

यमरमनमातां सक्च ॥७।२।७३॥

किमुदाहरणम् ? ॥ अयंसीत् अनंसीत् अयासीत् अवासीत् ॥ **नैतदस्ति, नास्त्यत्र विशेषः सति वा इट्यसति वा ॥ इदं तर्हि–अयंसिष्टाम् अयंसिषुः । व्यरंसिष्टां व्यरंसिषुः । अनंसिष्टाम् अनंसिषुः । अयासिष्टाम्अयासिषुः । अवा-सिष्टाम् अवासिषुः ॥ इदं चाप्युदाहरणम्–अयंसीत् व्यरंसीत् अनंसीत् अया-सीत् अवासीत् ॥ ननु चोक्तं–'नास्त्यत्र विशेषः सति वेट्यसति वे'ति ॥ अयमस्ति विशेषः–यद्यत्रेण्न स्याद्वृद्धिः प्रसज्येत । इटि पुनः सति 'नेटी'ति प्रतिषेधः सिद्धो भवति ॥ मा भूदेवं 'ह्म्यन्ताना'मित्येवं भविष्यति ॥ अत्रा-पि 'नेटी'त्यनुवर्तते । तच्चाऽवश्यमिड्ग्रहणमनुवर्त्यम्–'अधाक्षी'दित्येवमर्थम् ।**

आकारान्तेश्चापि पदपूर्व एकवचन उदाहरणं–मा हि यासीत् । यद्यत्रेण्न स्यादनुदात्तस्य ईटः श्रवणं प्रसज्येत । इटि पुनः सत्युक्तमेतत्—"अर्थवत्तु सिचश्चित्करणसामर्थ्याद्धीट उदात्तत्व"मिति । तत्रैकादेश उदात्तेनोदात्त इत्यु-दात्तत्वं सिद्धं भवति ॥ [यमरमनमातां सक्च] ॥

प्र.]रित्यतः । 'इडत्यर्तिव्ययतीना'मिति योगं प्रयोजनाऽभावादुल्लङ्घ्य 'वस्वेकाजाद्धसा'मित्यत्र विभाषाग्रहणसंबद्धं दृशिग्रहणमनुवर्तते । [**विभाषागम**] ॥

यमरमनमातां सक्च । किमुदाहरणमिति । वृत्तिकारैरेकवचनान्तान्युदाहरणा-न्युपन्यस्तानि । तत्र विशेषं सगिटोरबुध्वा पृच्छति । इतरस्तु वृद्ध्यभावं स्वरे च विशेषं मत्वैकवचनमेवोदाहरति—**अयंसीदिति । अयंसिष्टामिति ।** न केवल-मत्र वृद्ध्यभावो विशेषो यावत्सगिटोःश्रवणमपि । **मा हि यासीदिति ।** अयासीदित्यत्रा-

---

उ.]बाधेऽपीति भाष्यार्थमन्ये । **ततो द्विर्वचनमिति ।** 'द्विर्वचनेची'ति रूपस्थानिवत्त्वात् ॥

विभाषा ग । अनुवर्तते इति । एकदेशे स्वरितत्वप्रतिज्ञानान्मध्ये फला-ऽभावाच्च मण्डूकप्लुत्या दृशिग्रहणमात्रमनुवर्तत इति भावः । 'विभाषाग्रहणसंबद्ध'-मित्यनेन मध्ये प्रयोजनाऽभावो दर्शितः । केवलस्याऽनुवृत्तौ हि नित्यविधानार्थं तत्रापि संबन्धः स्यात् । थलि विकल्पस्तु पूर्वसूत्रेणैव सिद्ध इति भावः ॥

यमरमनम । तत्र विशेषमिति । सिजीड्भ्यां रूपस्य सिद्धत्वादिति भावः ।

ईशः से ॥७।२।७७॥ ईडजनोर्ध्वे च ॥७।२।७८॥

किमर्थो योगविभागो न—'ईशीड्जनां स्ध्वे' इत्येवोच्येत ॥ ईशो ध्वे मा भूदिति ॥ इष्यत एवं ईशिध्वे इति ॥ ईड्जनोस्तर्हि से मा भूदिति । इष्यते एव—ईडिषे जनिषे इति ॥ ईशस्तर्हि स्वे मा भूदिति ॥ इष्यते एव

प्र.]ट्स्वरो भवतीति तन्निवृत्त्यर्थो माङ्प्रयोगः । 'हि'शब्दप्रयोगो 'हि च'ेति निघातप्रतिषेधार्थः । इत्यसत्याद्युदात्तं पदं स्यात् । सति तु तस्य सिज्भक्तत्वादुदात्तत्वादेकादेश उदात्तेनोदात्त इत्यन्तोदात्तं पदं भवति । तत्रा'दिः सिचोऽन्यतरस्या'मिति पक्ष आद्युदात्तं पदं, पक्षेऽन्तोदात्तम् । एतच्चा'ऽनिटः पित उपसङ्ख्यान'मित्युपसङ्ख्यानमनपेक्ष्य प्रयोजनमुक्तम् । तेन यथा 'मा हि कार्ष'मित्यत्र पर्यायेणाद्यन्तयोरुदात्तत्वं भवत्येवं 'मा हि यासी'दित्यत्राऽसत्यपीटि भविष्यतीतीटो भावाऽभावयोः स्वरे भेदाऽभावः । [**यमरमनमातां सक्च**] ॥

ईशः से ॥ इष्यत ईशिध्वे इति । एतदर्थमेव चकारेणेशिरनुकृष्यते । **इड्जनोस्तर्हीति** । कथं पुनरीड्जनोर्ध्वे चेति सूत्रपाठे योगविभागेनेड्जनोः सेशब्दे इट् शक्यते निवर्तयितुम् ?। उच्यते । चकारेणेशेरनुकर्षणात्सकारादौ सेशब्द इति इटि सिद्धे 'ईशः से' इति नियमार्थं विज्ञायते-'ईशेरेव सेशब्द इण्न त्वीड्जनो'रिति । **स इति**—'थासः से' इत्यस्यानुकरणं—'सुपां सुलु'गिति सप्तमीलुका निर्दिष्टम् । **इष्यत इति** । न चाऽनिष्टार्थो योगविभागः । **जनिष इति** । व्यत्ययेन शप् । तस्य 'बहुलं छन्दसी'ति लुक् । छान्दसत्वादुपधालोपाऽभावः। 'जायसे' इत्यत्र तु नित्यत्वाद्विकरणे कृते तेन व्यवधानादिडभावः । **ईशेस्तर्हि स्वे मा भूदिति** । चकारेणेशेरनुकर्षणात् सकारादौ ध्वशब्दे चेटि सिद्धे इशः स इति नियमः क्रियते-'ईशः सेशब्द एव सकारादाविण्नाऽन्यस्मिन् सकारादा' विति। यद्यप्येकदेशविकृतमनन्यवदिति स्वशब्दः सेशब्द एव भवति तथाप्यन्यस्य सकारादेर्व्या-

---

उ.] **वृद्ध्यभावमिति**। 'अयंसी'दित्यत्र हलन्तलक्षणाया 'नेटी'ति प्रतिषेधेन । स्वरविशेषस्तूत्तरत्र स्फुटीभविष्यतीति आदन्तोदाहरणे पदपूर्वत्वस्य फलं दर्शयति-**अयासीदित्यत्रेति । तत्रादिरिति** । अन्तोदात्ते प्राप्ते इदमारभ्यते । **अनिटः पित इति** । अनिटः सिचः परस्य पित उदात्तत्वं भवतीति तदर्थः । एवञ्च यथास्थितसूत्रमतेऽयं दोष इति भावः । [**यमरमनमातां सक् च**] ॥

ईशः । अत्र'इड्जनोः स्ध्वे च'ेति पाठे भाष्यम् । तत्र सादेः सार्वधातुकस्य सूत्र एवोपादानाच्चकारेणेशिरेवानुकृष्यत इत्याह-**एतदर्थमित्यादि** । अत एवाह—**कथं पुनरिति** । अत्र पाठे विपरीतं प्राप्नोत्येवेति भावः । **चकारेणेशेरनुकर्षणादिति** । एकयोगेनेति वक्तुमुचितं । ननु 'से'इत्यस्यानुकरणे सयीति युक्तमत आह-**सुपां सुलुगिति** । जनेर्दैवादिकत्वादाह-**व्यत्ययेनेत्यादि** । **लुगिति** । अत एव

ईशिष्वेति ॥ से तर्हि यः स्वशब्दस्तत्र यथा स्यात्, क्रियासमभिहारे यः स्वशब्दस्तत्र मा भूदिति ॥ अत्रापीष्यते—'स भवानीशिष्वेशिष्वेत्येवायमीष्ट' इति । आतश्चेष्यते—एवं ह्याह—"सिद्धं तु लोण्मध्यमपुरुषैकवचनस्य क्रियासमभिहारे द्विर्वचना"दिति ॥ [ईड्जनोर्ध्वे] ॥

अतोयेयः ॥७।२।८० ॥

किं सार्वधातुकग्रहणमनुवर्तत उताहो न ? ॥ किं चार्थोऽनुवृत्त्या ? ॥ बाढमर्थः ॥ यद्यकारात्परो याशब्द-आर्धधातुकमस्ति ॥ ननु चायमस्ति

प्र.]वर्त्यस्याऽभावादन्यत्वमाश्रीत्य स्वशब्दो व्यावर्त्यते। **से तर्हीति**। ईड्जनोर्ध्वे चे'-त्यनेन सर्वसकारादेरिटि विहिते ईशः स इत्यनेन नियमः क्रियते—'सेशब्द एव सकारादा'विति। तेनेशिष इत्यत्र भवति। ईशिष्वेत्यत्रापि, स्थानिवद्भावात्। यस्तु लोट एव स्थाने स्वशब्दो नासौ सेशब्द इति व्यावर्त्यते। **अत्रापीति**। लोड्धर्माणौ हिस्वौ लोटो भवत इत्युक्तम्। तेन यथाऽन्यलोडादेशस्य स्वशब्दस्य सेग्रहणेन ग्रहणादिड्भवत्येवं क्रियासमभिहारे समुच्चये च लोडादेशस्य स्वस्य। अत्रैवार्थे वार्तिककारवचनं साक्षित्वेनाह—**आतश्चेष्यत इति**। तदेवं दोषवान् गुरुश्च योगविभाग इत्येक एव योगः कर्तव्यः—'ईडीशिजनां सेध्वयो'रिति। [**ईड्जनोर्ध्वे च**] ॥

अतो। केषां चित्—'अतो या इय'इति सकारान्तानुकरणत्वात्पाठः। अन्येषां तु सौत्रत्वान्निर्देशस्य यलोपस्यासिद्धत्वानाश्रयणादतो येय इति। **किं चार्थ इति**—आचार्यदेशीय आह। प्रयोजनाधीना ह्यधिकारानुवृत्तिरिति मन्यते। आचार्य आह-**बाढमर्थ**

उ.]च जादेशो न। नन्वेवं 'से'शब्दे ङिति परतो 'जनसनखना'मिति लोपः स्यादत आह—**छान्दसत्वादिति**। **अन्यत्वमाश्रियेति**। नियमविधानसामर्थ्याद्रूपभेदमात्रेणाऽन्यत्वमाश्रीयत इत्यर्थः। नन्वस्य सेशब्दविकारत्वाभावात्कथमिष्यतेऽत आह—**लोड्धर्माणाविति**। योगविभागेन तत्राऽयमर्थः साधितः। **आतश्चेति**। लोण्मध्यमपुरुषस्येत्युक्त्या लोड्धर्मत्वन्तयोरुक्तमिति भावः। [**ईशः से**] ॥

अतो येयः। **सकारान्तेति**। अनुकार्येणाऽर्थवत्त्वात्षष्ठ्या जातायाः सुपां सुलुगिति लुकि रुत्वयत्वयलोपेषु तस्याऽसिद्धत्वाद्गुणाऽभावे 'अतो या' इति रूपम्। **अन्येषान्त्विति**। अत्र पाठे आकारान्तानुकरणं, ततः षष्ठ्यामात इति योगविभागादालोपे ततो रुत्वादिषु सौत्रत्वाद्गुणः ॥ 'या' इत्याकारान्तानुकरणेऽविभक्तिको निर्देश इति परे। एतदेवाभिप्रेत्य'याशब्द आर्धधातुक'मिति निर्विसर्गपाठो भाष्ये। क्वचित्तु सविसर्गः पाठः। नाऽयं प्रश्नः सिद्धान्तिनः, तेनानुवृत्तेरङ्गीकारादत आह—**आचार्यदेशीय इति**। 'बाढमर्थ' इति वदतो 'यदि'गर्भं वाक्यमयुक्तमत आह—**चोदक-इति**। ननु पर इयादेश इति कथं लोपस्य बाधकत्वमत आह—**कृताकृतेति**।

चिकीर्ष्यात् जिहीर्ष्यात् ॥ लोपोऽत्र बाधको भविष्यति ॥ किं तर्ह्यस्मिन्योग उदाहरणम् ? ॥ पचेत् यजेत् ॥ अत्राप्यतो दीर्घो यञीति दीर्घत्वं प्राप्नोति । स यथैवेयादेशो दीर्घत्वं बाधते एवं लोपमपि बाधेत । तस्मात्सार्वधातुकग्रहणमनुवर्त्यम् ॥ [अतो येयः] ॥

आने मुक् ॥ ७।२।८२ ॥

॥*॥ मुकि स्वरे दोषः ॥*॥ मुकि सति स्वरे दोषो भवति—पचमानः यजमानः । मुका व्यवहितत्वादनुदात्तत्वं न प्राप्नोति ॥ ननु चायं मुगदुप-

प्र.] इति। चोदक आह—यद्यकारादिति। किं तु नास्तीति भावः। चिकीर्ष्यादिति । 'लिङाशिषी'त्यार्धधातुकसंज्ञा । लोपोत्रेति । कृताऽकृतप्रसङ्गित्वान्नित्यो लोपः, इयादेशस्तु लोपे कृतेऽनकारान्तत्वान्न प्राप्नोतीत्यनित्यः । इतरस्त्वियादेशस्य सावकाशत्वे लोपस्य नित्यत्वं वक्तुं शक्यं नान्यथेति मत्वाह—किं तर्ह्यस्मिन्निति । स यथैवेति । न च येननाप्राप्तिन्यायेन दीर्घस्यैव बाधक इति शक्यं वक्तुम्। यस्मात्स दीर्घः सार्वधातुके विधीयत इति सिद्धान्तः। तथा च 'ज्ञाजनोर्जा' इत्यत्र वक्ष्यते—'जानातीत्यत्राऽप्यतो दीर्घो यञीत्येव दीर्घो भविष्यती'ति । यदि तिङि दीर्घो विधीयेत कथं जानातीत्यत्र स्यात्। यत्तु वक्ष्यते—'तिङीत्येवं त'दिति नासौ सिद्धान्तः। मध्येऽपवादा इत्यनाश्रित्यैतदुक्तं, तस्मिन्नाश्रीयमाणे लोपमेवेयादेशो बाधेत न दीर्घम् । दीर्घस्तु परत्वात्स्यादिति सर्वथा सार्वधातुकानुवृत्तिः सप्रयोजना । [अतो येयः] ।

आने । मुकीति । पूर्वान्तकरणे दोष इत्यर्थः । 'अदुपदेशा'दिति स्वरो न सिध्यति । 'अग्निचित्वा'नित्यादौ 'ह्रस्वनुड्भ्यां मतु' बित्याद्युदात्तत्वं प्राप्नोतीति 'स्वरविधौ व्यञ्जनमविद्यमानव'दिति दूषयित्वा 'हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानव'दिति परिभाषा भाष्यकारेण व्यवस्थापितेति व्यवधातैव मुमागमः । ननु चायमिति । अकार उपदेश इत्याश्रीयते न त्वाकारान्त उपदेश इति । मुक्चाऽकारमात्रभक्त इति

उ.] ननु प्रत्युदाहरणप्रश्ने प्रकृते उदाहरणप्रश्नो न युक्तोऽत आह—इतरस्त्विति। नचेति।'तिङी'त्येवं तद्विधानात्सर्वत्र प्राप्त इति मन्यते। उत्तरयति—यस्मात्स इति। अनाश्रयणे हेतुः। सार्वधातुकानुवृत्तेरावश्यकतेत्याह—सर्वथेति। तदभावे 'पचे'दित्यत्रेष्टस्येयोऽनापत्तिः । 'चिकीर्ष्या'दित्यत्राऽनिष्टस्य तस्यापत्तिः । तदनुवृत्तौ तु दीर्घस्य बाधः । अत्र विषयभेदेऽप्यानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति दीर्घादेर्बाधः । बाधकत्वसामान्याच्चाऽपवादत्वव्यवहार इति सर्वेष्टसिद्धिः । [अतो येयः] ॥

आने मुक् ।ननु स्वरविधौ व्यञ्जनस्याऽविद्यमानत्वान्न दोषोऽत आह—ह्रस्वनुड्भ्यामिति । दूषयित्वेति । स्वरानुद्देश्यकस्वरविधिविषये इत्यर्थः । पचमानादौ चित्स्वरं बाधित्वा परत्वात्तास्यनुदात्तेदित्यनुदात्तत्वमिष्यते । अकार उपदेश इति। विशेषणत्वेऽपि उपदेशशब्दस्य सौत्रत्वात्परनिपात इत्यभिमानः । मुक्चाऽकारेति ।

देशभक्तोऽदुपदेशग्रहणेन ग्राहिष्यते॥ न सिद्ध्यति–अङ्गस्य मुगुच्यते, विकरणान्तं चाऽङ्गम् । सोऽयं सङ्घातभक्तोऽशक्योऽदुपदेशग्रहणेन ग्रहीतुम् ॥ एवं तर्ह्यभक्तः करिष्यते । ॥*॥ अभक्ते च ॥*॥ किं ? ॥ स्वरे दोषो भवति पचमानो यजमानः । मुका व्यवहितत्वादनुदात्तत्वं न प्राप्नोति ॥ एवं तर्हि परादिः करिष्यते ॥ ॥*॥ परादौ दीर्घप्रसङ्गः ॥*॥ यदि परादिः क्रियते, 'अतो दीर्घो यञी'ति दीर्घत्वं प्राप्नोति ॥ नैष दोषः । 'तिङी'त्येवं तत् । सिध्यति ॥ सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवाऽस्तु ॥ ननु चोक्तं "मुकि स्वरे दोष" इति ॥ परिहृतमेतत्–'अदुपदेशभक्तोऽदुपदेशग्रहणेन ग्राहिष्यते"॥ ननु चोक्तम् "अङ्गस्य मुगुच्यते विकरणान्तं चाङ्गं सोऽयं सङ्घातभक्तोऽशक्योऽदुपदेशग्रहणेन ग्रहीतु" मिति । अथाऽयमङ्गक्तः स्याद्गृह्येताऽदुपदेशग्रहणेन ?॥ बाढं गृह्येत ॥ अङ्गक्तस्तर्हि भविष्यति ॥ तत्कथम् ?॥ अतो येयं इत्यत्र अकारग्रहणं पञ्चमीनिर्दिष्टं, अङ्गस्येति च षष्ठीनिर्दिष्टं, तत्राऽशक्यं

प्र.] व्यवधानाऽभावः । **अङ्गस्येति**। अङ्गाधिकारादङ्गस्य मुग्विधीयमानोऽङ्गमेव न व्यवदधाति, अवयवान्तरन्तु व्यवदधात्येव । **एवं तर्हीति** । ककारमनुबन्धमकृत्वा विकरणवदकारान्तादङ्गात्पर आने परतो मध्ये मः करिष्यते । **मुकेति** । यथान्यासाश्रयेणोक्तम् । 'अभक्तत्वात्तु मकारेणे'ति युक्तं वक्तुम् । **एवं तर्हीति** । 'आनस्य मु'ङिति सूत्रन्यासेन । **तिङीत्येवं तदिति** । मुटि क्रियमाणे सार्वधातुकमननुवर्त्य तिङीत्यनुवर्त्यमेवेति भावः । **पञ्चमीनिर्दिष्टमिति** । पूर्वसूत्र एवाऽत इत्यनेनाङ्गं न विशे-

---

उ.] अङ्गावयवस्याऽतो मुगित्यर्थ इति भावः। यद्यपि वर्णग्रहणे 'यदागमा' इति नास्ति, अत एव प्रकृते सवर्णदीर्घो न । तथापि अकारान्तोपदेश इत्यर्थस्य स्वरविधौ सिद्धान्तितत्वेन तत्र वर्णग्रहणाऽभावान्न दोष इति भावः । 'अकार उपदेश इत्याश्रीयते नलकारान्त उपदेश' इति कैयटोक्तं चिन्त्यमेव । तथाश्रयणेऽपि व्यपदेशिवद्भावेनाऽकारस्यैव तदन्तोपदेशत्वमादाय दोषाऽभावात् । किंच तदनाश्रयणे 'हतो' 'हथ' इत्यादावप्यनुदात्तत्वापत्तेः । एवञ्च विशेष्यत्वादुपदेशशब्दस्य परनिपातोऽपि युक्त एव । अनित्यत्वेन क्वचिदेव वर्णग्रहणे प्रवृत्तिर्न सर्वत्रेति तत्त्वम् । **अङ्गाधिकारादिति** । सामानाधिकरण्यानुरोधेन तस्य विशेष्यतैवेति तदन्तविधिरिति भावः । **अङ्गमेव न व्यवदधातीति** । कुतश्चित्पूर्वस्याङ्गस्य कार्ये वाऽङ्गात्परस्य कार्ये वेति भावः। **अवयवन्त्विति** । ततः परस्य कार्ये कर्तव्ये इत्यर्थः । 'अवयवान्तर'मिति पाठस्तु चिन्त्यार्थः । कस्यचिदवयवस्य प्रसङ्गे हि तथा वक्तुं युक्तं, नचाऽत्र तथा, अङ्गस्यावयविन एव पूर्वं प्रसङ्गात् । **अकारान्तादिति** । 'अत' इति पञ्चम्यन्तानुवृत्तेस्तदनुरोधेनाऽङ्गस्येत्यपि पञ्चम्या विपरिणम्यत इति भावः । अभक्तत्वपक्षे मुको-

विविभक्तित्वादत इति पञ्चम्या अङ्गं विशेषयितुं, तत्प्रकृतमिहाऽनुवर्तिष्यते ॥ एवमपि षष्ठ्यभावान्न प्राप्नोति ॥ 'आने' इत्येषा सप्तम्यत इति पञ्चम्याः षष्ठीं प्रकल्पयिष्यति–'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति ॥ [आने मुक्] ॥

अष्टन आ विभक्तौ ॥ ७।२।८२ ॥

॥*॥ अष्टन्जनादिपथिमथ्यात्वेष्वान्तरतम्यादनुनासिकप्रसङ्गः ॥ * ॥ **अष्ट-**

प्र.]षितमिति तदन्तविध्यभाव इत्युक्तं भवति। ततोऽङ्गस्य योऽकारस्तस्मात्परस्य यास इय् इत्यङ्गं यथा पूर्वसूत्रे विशेषणं तथेहापीत्यङ्गाऽवयवस्याऽकारस्याने मुग् भवति। **तत्प्र-कृतमिति** । विशेष्यं सत्प्रधानमेवेत्यर्थः। **आन इत्येषेति** । अकृतार्था सप्तमी पूर्वत्र कृतार्थायाः पञ्चम्याः षष्ठीं प्रकल्पयति न तु पञ्चमी सप्तम्याः । यद्येवमङ्गस्यात इति समानविभक्तित्वात्तदन्तविधिप्रसङ्गः । नैष दोषः । विशेषणविशेष्यभावे कामचारा-दङ्गेनाऽतो विशेषणात्। ततो मुगकारमात्रभक्तत्वान्न व्यवधायकः। यद्यपि मुकि कृतेऽ-ध्यर्धमात्रोकारस्तथाप्युपदेशग्रहणादुपदेशे मात्रिकत्वाश्रयः स्वरः प्रवर्तते । तथा च 'पचाव'इत्यादौ दीर्घेऽपि कृते भवति । 'पचमान' इत्यादौ त्वातो ङित इतीयादेशा-ऽभावोऽत इति तपरकरणात् । **[आने मुक्]** ॥

अष्टनः । सौत्रत्वान्निर्देशस्याऽल्लोपोन इत्यकारलोपो न कृतः । समानविचार-त्वात्प्रकरणान्तरविहितमपि अनुनासिकस्थानिकमाकारमिहैवोपन्यस्यति–**अष्टन्निति** । यत्र तपरत्वमस्ति तत्र तपरस्तत्कालस्येति वचनाद्गुणान्तरयुक्तस्य तत्कालस्य ग्रह-णात्स्थानेऽन्तरतम इति वचनाच्चाऽनुनासिकस्यस्थानेऽनुनासिक एवाकारः प्राप्नोति । यत्रापि तपरत्वाऽभावस्तत्राऽप्याकृतिनिर्देशाद्दीर्घोच्चारणसामर्थ्याच्च ह्रस्वप्लुताऽग्रहणा-

---

उ.] ऽभावादाह—**यथान्यासेति** । 'मु'गिति मकारोपलक्षणमिति भावः। **तिङीत्य-नुवर्त्यमिति** । 'भूसुवोस्तिङी'त्यतः । इदं न युक्तमित्युक्तम् । **पूर्वसूत्र एवेति** । एवञ्चार्थाधिकारानुरोधादिहाप्यङ्गेनाऽकारो विशेष्यत इति भावः । **'तत्प्रकृत'**मित्यस्य यद्धर्मकं प्रकृतं तद्धर्मकमेवेहानुवर्तयिष्यत इत्यर्थ इत्याह–**विशेष्यं सदिति** । ननु विपरीतं किं न स्यादत आह–**अकृतार्थेति** । **उपदेशग्रहणादिति** । वस्तुतस्तपर-सूत्रस्य विध्यर्थत्वपक्षे 'तपरस्तत्कालस्य सवर्णस्य ग्राहक' इत्यर्थो नत्वन्यनिवर्तकमेत-दिति कोऽत्र दोषः। नियमपक्षेऽतत्कालसवर्णमेव व्यावर्तयेन्न तु 'यदागमा' इत्येतल्लब्ध-मिति चिन्त्यमिदम् । नचैवं 'पचमान' इत्यत्रा'ऽऽतो ङित' इति दुर्वारम् । अनि-त्यत्वेन क्वचिद्वर्णग्रहणे 'यदागमा' इत्यस्याऽप्रवृत्तेरदोषात् । **तपरकरणादिति** । उपदेशग्रहणस्याऽत्राऽभावादिति भावः । **[आने मुक्]** ॥

अष्टन आ । ननु पथ्यादीनामप्रकृतत्वादुपन्यासोऽसङ्गतोऽत आह–**समानेति**। **यत्रेति** । जनादिविषये 'विड्वनो'रित्यत 'आ'दित्यनुवृत्तेः । पथ्यादिसूत्रे 'आ'दित्यु-च्चारणाच्चेति भावः । **गुणान्तरेति** । तपरसूत्रेऽणिति नानुवर्तते, विध्यर्थञ्च सूत्रमिति भावः । **यत्रापीति** । यथा प्रकृतसूत्रे । नन्वाकृतिनिर्देशे ह्रस्वप्लुतयो-

न्जनादिपथिमथ्यात्वेष्वान्तरतम्यादनुनासिकः प्राप्नोति । अष्टाभिः अष्टाभ्यः । जातः जातवान् । **पन्थाः मन्थाः** ॥*॥ सिद्धमनण्वात् ॥*॥ **सिद्धमेतत् ॥ कथम् ?॥ 'अनण्वात्' ॥ कथमनण्त्वम् ? ॥ 'अण्सवर्णान्गृह्णाती'त्युच्यते न** चाऽऽकारोऽण् । ॥*॥ उच्चारणसामर्थ्याद्वा ॥*॥ **अथ वा शुद्ध उच्चारणसामर्थ्याद्भविष्यति ॥ नैतौ स्तः परिहारौ । यत्तावदुच्यते—'अनण्वा'दिति । न ब्रूमोऽण्सवर्णान्गृह्णातीति ॥ कथं तर्हि ? ॥ 'तपरस्तत्कालस्ये'ति । यदप्युच्यते ''उच्चारणसामर्थ्याद्वे'ति । अस्त्यन्यदुच्चारणे प्रयोजनम् ॥ किम् ? ॥ उत्तरार्थं 'रायो हली'ति ॥ एवं तर्हि नेमौ पृथक् परिहारौ ।** [*॥ एकपरिहारः ॥*]॥

प्र.] त्सर्वदीर्घव्यक्तिप्रसङ्गेऽन्तरतमपरिभाषोपस्थानादनुनासिकस्य प्रसङ्गः। **सिद्धमनण्वादिति।** 'अणुदित्सवर्णस्ये'त्यत्राऽण्ग्रहणेन प्रत्याहारसन्निविष्टा अकारादयो गृह्यन्ते, न त्वाकारादयोऽसन्निविष्टत्वात्। न च प्रत्याहारेऽकारादिभिराकारादयो गृह्यन्ते, नाप्यणुदित्सूत्रे, अङ्गेषु स्वात्मनि च ग्रहणकशास्त्रस्यानभिनिर्वर्तनात्। स्वात्मनि क्रियाविरोधाच्च, ग्रहणकशास्त्राऽन्तराऽभावाच्च। **कथमनण्त्वमिति।** अकारेण गृह्यमाण आकारोऽण् भवतीति मत्वा प्रश्नः । पूर्वोक्तेनाऽभिप्रायेणाह—**अण्सवर्णानिति।** अनण्वादेव 'भाव्यमानोऽण्सवर्णान्न गृह्णाती'ति परिहारो नोक्तः । ग्राह्याऽसद्भावाच्चान्तरतमपरिभाषा नोपतिष्ठते । **उच्चारणसामर्थ्याद्वेति।** यद्यनुनासिकोऽभविष्यत्स एवोदच्चारयिष्यतेति निरनुनासिक एवोच्चारणसामर्थ्यात्प्रवर्तते। तत्र पूर्वः परिहारोऽष्टन्शब्दाऽऽकाराभिप्रायेणोक्तः । उत्तरस्तु जनाद्याकाराभिप्रायेण । चोदकस्तु विषयविभागमबुध्वाह—**नैतौ स्त इति । कथं तर्हीति ।** अणिति च तत्र नानुवर्तते । **उत्तरार्थमिति ।** इहाऽनुनासिक उच्चार्यमाणेऽनुनासिक उत्तरत्र कर्तव्य इति लाघवायाऽननुनासिकोच्चारणं स्यादित्यर्थः । इतरः स्वाभिप्रायमाह—**एवं तर्हीति ।**

उ.] योरपि ग्रहणं स्यादत आह–**दीर्घेति** । अन्यथा ह्रस्वमेवोच्चारयेदिति भावः । दीर्घोच्चारणं दीर्घव्यक्तिसमवेतजातिग्रहणायेति तत्त्वम् । व्यक्तिपक्षाश्रयणेन समाधत्ते भाष्ये–**सिद्धमेतदिति** । अयं भावः -'अष्टन' इत्यादिसूत्रेष्वादिति व्यक्तिर्गृह्यते, व्यक्तिपक्षे च ग्रहणकशास्त्रारम्भात्तेनैव सानुनासिकग्रहणं वाच्यं, तच्चाऽनण्त्वान्न प्रवर्तत इति । तत्राऽनण्त्वं व्युत्पादयति—**अणुदिदिति ।** इदञ्च प्रकृतसूत्राऽभिप्रायेण । **न च प्रत्याहारे इति ।** चतुर्दशसूत्र्यामित्यर्थः ।

स्वात्मनीति । अत्राऽनभिनिर्वृत्तिमूलक एव स्वात्मनि क्रियाविरोधो द्रष्टव्यः । चस्तु वाक्यालङ्कारे । **ग्राह्यासद्भावाच्चेति ।** यदि सानुनासिकस्याऽप्यत्र ग्रहणमभविष्यत्तदा तस्यैव प्रवृत्त्यर्थमन्तरतमपरिभाषाम्प्रावर्त्स्यत्, तदभावात्तु न प्रवर्तत इत्यर्थः । **स एवेति ।** 'ॐ' इत्यादाविव प्रतिपत्तिलाघवायाऽनुनासिक एवोच्चारणीये शुद्धोच्चारणसामर्थ्येनान्तरतम्यं बाध्यत इति भावः। ननु वाशब्दस्य विकल्पार्थत्वेन

एकः परिहारोऽयं–'सिद्धमनण्त्वादुच्चारणसामर्थ्याद्वे'ति ॥ इह तावदष्टाभिः अष्टाभ्य इति—अनण्त्वात्सिद्धम् । जातः जातवान् । पन्थाः मन्थाः,– उच्चारणसामर्थ्यात्सिद्धम् ॥ यद्येवं पृथक्परिहारयोरपि न दोषो यो यत्र परिहारः स तत्र भविष्यति ॥ [अष्टन आ विभक्तौ] ॥

युष्मदस्मदोरनादेशे ॥७।२।८६ ॥

'अनादेशग्रहणं शक्यमकर्तुम्' ॥ कथम् ? ॥ हलीत्यनुवर्तते । न चादेशो हलादिरस्ति ॥ तदेतदनादेशग्रहणं तिष्ठतु तावत्सांन्यासिकम् ॥ [युष्मद] ।

प्र.]अष्टन आत्वे न द्वौ परिहारौ, नापि जनाद्यात्वे, किं तु विषयविभागेन। **एक इति ।** यद्यपि द्वावेतौ परिहारौ, 'वा'शब्दस्य समुच्चयार्थत्वात्तथापि समुदायापेक्षया संभवापेक्षया चैवमुक्तम् । अथ वैकोऽसहायः। क्व चित्कश्चिदन्यनिरपेक्षः परिहार इत्यर्थः । स एवाह—**यद्येवमिति ।** यदि भवान् संमन्यते परिहारसमुदाये यथासंभवमवयवौ परिहारत्वेन, तदा समुदायकल्पनया नाऽर्थः, पृथगेवैतौ परिहारौ यथाविषयमवतिष्ठेते । [**अष्टन आ**] ॥

युष्म । हलीति वर्तत इति । 'रायो हली'त्यतः । **न चादेशो हलादिरिति ।** 'भ्यसोऽभ्य'मित्यभ्यमादेशो न तु भ्यमिति भावः। **तदेतदिति ।** उत्तरत्रोपयुज्यते । 'योऽची'ति यत्वमादेशेऽजादौ मा भूत् त्वमहमित्यादौ । शेषे लोप इति शेषव्यव-

उ.]प्रसिद्धत्वात्प्रतिज्ञातेऽर्थे पर्यायेण परिहारद्वयमिति भाति, तत्तु न, विरोधात्। विषयभेदे तु पृथक्परिहारत्वमेवेति 'नेमौ पृथ'गित्ययुक्तमत आह–**अष्टन आत्वे इति ।** एकैकत्र विषये पृथक्परिहारौ नेति भाष्यार्थः । एवञ्च 'वा'शब्दः समुच्चयार्थ इति भावः । नन्वेवं तर्ह्येकः परिहारोऽयमित्यसङ्गतमित्याह–**यद्यपीति । तथापीति ।** समुदाय एकः, स च यथासंभवं प्रतिज्ञातेऽर्थे प्रवर्तत इति भावः । **स एवेति ।** परिहारग्रन्थशेषत्वादिति भावः । एकग्रन्थत्वे योजनाप्रकारमाह–**यदि भवानिति ।** पूर्वसमुदायरूपत्वमुक्त्वा तत्र समुदायस्यावयवद्वारेण यथासंभवं प्रतिज्ञाते प्रवृत्तिरित्यर्थे परस्य संमतिं दृष्ट्वा पृथक् परिहारत्वेऽपि तथैव न दोष इति प्रतिपाद्यत इत्यर्थः॥

युष्मद । अभ्यमादेश इति । पक्षभेदेन लक्ष्यभेदस्याऽनिष्टतया 'अभ्य'मित्येव तत्र पदच्छेदः कार्य इत्यर्थः। 'भ्यसोऽभ्य'मिति सूत्रस्थं 'यथेच्छसि तथास्त्वि'ति भाष्यन्तु केवलयुष्मच्छब्दे रूपाऽविशेषमात्रपरं न तु तन्त्राश्रयणेनोभयादेशप्रतिपादनपरं, 'यथेच्छसी'त्युक्त्योभयत्र तात्पर्याऽलाभात् । तत्र 'भ्यम् भ्यस' इत्यकरणेनाऽभ्यमिति च्छेद एव युक्तः। यत्र भ्यमभ्यमोः फले विशेषस्तस्यानभिधानमेव बोध्यम् । **उत्तरत्र**—योऽचीत्यत्र । **शेषे लोप इति ।** आदेशविभक्तिर्हि तत्र शेषो यथा प्रकल्प्येतेति भावः । [**युष्मदस्मद्भ्यां ङसोऽश्**] ॥

योऽचि ॥ ७।२।८९ ॥

अज्ग्रहणं शक्यमकर्तुम् ॥ कथम् ? ॥ अविशेषेण यत्वमुत्सर्गस्तस्य हलादावात्वमपवादः । [योऽचि] ॥

शेषे लोपः ॥७।२।९० ॥

शेषग्रहणं शक्यमकर्तुम् ॥ कथम् ? ॥ अविशेषेण लोप उत्सर्गस्तस्याऽजादौ यत्वमपवादो हलादावात्वमपवादः ॥ [शेषे लोपः] ॥

मपर्यन्तस्य ॥७।२।९१ ॥

परिग्रहणं शक्यमकर्तुं, 'मान्तस्ये'त्येव सिद्धम् ॥ न सिध्यति ॥ किं कारणम् ? ॥ अन्तशब्दस्योभयार्थत्वात् ॥ कथम् ? ॥ अयमन्तशब्दोऽस्त्येव सह तेन वर्तते । तद्यथा—'मर्यादान्तं देवदत्तस्य क्षेत्रं' । सह मर्यादयेति

प्र.] स्थार्थं च । [युष्मदस्मदारनादेशे] ॥

योऽचि । यत्वमुत्सर्ग इति । अनादिष्टायां विभक्तौ विधीयमानं यत्वमुत्सर्गो, हलादौ त्वात्वमपवादः। आदेशे तु लोप इत्यसङ्करेणात्वयत्वलोपाः सिध्यन्ति । अज्ग्रहणे क्रियमाणेऽप्यनादेशग्रहणं यत्वलोपयोर्विषयविभागार्थं कर्तव्यमित्यनादेशग्रहणाश्रयेणाऽज्ग्रहणमुत्तरत्र च शेषग्रहणं प्रत्याख्यातम् । [**योऽचि**] ॥

शेषे । अविशेषेणेति । 'विभक्ता'वित्यधिकाराद्विभक्तिमात्रे लोपो विधीयमान उत्सर्गो भवति । तस्याऽनादेशे विभक्तौ यत्वमपवादो, यत्वस्यापि हलादावात्वमिति शेषग्रहणं पूर्वत्र चाऽज्ग्रहणमन्तरेण विषयविभागेन कार्यत्रयसिद्धिः । **तस्याजादाविति** । हलादावात्वविधानात्सामर्थ्यलभ्यमेतत् । [**शेषे लोपः**] ॥

मप । अयमन्तशब्द इति । अन्यपदार्थविषयस्याऽन्तशब्दस्येदं व्याख्यानम् । क्वचिदन्तर्भूताऽन्तार्थोऽन्यपदार्थो बहुव्रीहेरभिधेयः, क्वचिदनन्तर्भूताऽन्तार्थ इत्यर्थः। **मर्यादान्तमिति।** मर्यादायाः क्षेत्रावयवत्वात्क्षेत्रेऽन्यपदार्थेऽनुप्रवेशः। **नद्यन्तमिति ।**

उ.] **योऽचि** । अनादेशग्रहणं तु सर्वथावश्यकमित्यज्ग्रहणमाश्रित्य तन्न प्रत्याख्यातमित्याह—**अज्ग्रहण इति** । [योऽचि] ॥

शेषे । भाष्ये 'तस्याऽजादौ यत्व'मित्युक्तेरचीत्यस्य कर्तव्यत्वमाभाति, तदपनयायाह—**तस्याऽनादेशे इति** । **हलादाविति च** । शेषस्य लोप इत्येतदर्थमपि न, सन्निपातपरिभषया टाबभावसिध्या फलाऽभावादिति तात्पर्यम् । एतत्सूत्रत्रयोक्त एव सिद्धान्तो, भाष्यकृदुक्तत्वात्। 'भ्यसोऽभ्यम्' 'शेषे लोपः' 'त्यदादीना'मिति सूत्रेषु तु एकदेश्युक्तिर्वार्तिककारोक्तिव्याख्यामात्रमित्याहुः । [**शेषे लोपः**] ॥

मपर्यन्तस्य । नन्वाङिव नाऽन्तशब्दोऽभिविधिमर्यादयोस्तस्यावयववाचित्वादतो भाष्याशयमाह—**अन्यपदार्थेति । मर्यादाया इति** । 'अवयवावयविनोः समवायः संबन्ध' इति उपलक्षणस्याप्यवयवस्य कार्ययोग इत्यर्थः । सामीप्यादिनोपलक्षणस्य

गम्यते । अस्ति प्राक्तस्माद्वर्तते । तद्यथा–'नद्यन्तं देवदत्तस्य क्षेत्र'मिति । प्राङ्नद्या इति गम्यते ॥ तद्यः सह तेन वर्तते तस्येदं ग्रहणं यथा विज्ञायेत ॥ नैतदस्ति प्रयोजनम् । सर्वत्रैवाऽन्तशब्दः सह तेन वर्तते ॥ अथ कथं 'नद्यन्तं देवदत्तस्य क्षेत्र'मिति ॥ नद्याः क्षेत्रत्वे संभवो नास्तीति कृत्वा प्राङ्नद्या इति गम्यते ॥[*॥ अवधिद्योतनार्थं तु परिग्रहणम् ॥*]॥**अवधिद्योतनार्थं तर्हि-परिग्रहणं कर्तव्यं । मान्तस्येत्युच्यमाने यत्रैव मान्ते युष्मदस्मदी तत्रैवादेशाः**

प्र.]नद्याः क्षेत्रानवयवत्वादन्यपदार्थेऽनुप्रवेशाऽभावः। पर्यन्तशब्दस्त्वन्यपदार्थविषयः–सह तेन वर्तत इति,–परिग्रहणं कृतं। तेन युष्म् अस्म् इत्येतयोरादेशा भवन्ति, न युष् अस् इत्येतयोः । **सर्वत्रेति**। अन्तशब्दोऽवयववाचीत्यवयवेन विग्रहः, समुदायः समासार्थ इत्यवश्यावश्यमन्यपदार्थेऽन्तर्भावः । 'नद्यन्तं क्षेत्र'मित्यत्र त्वन्तशब्दः सामीप्यवाचीत्यन्यपदार्थे नद्या अनन्तर्भावः । यत्तूच्यते–सर्वत्रैवाऽन्तशब्दः सह तेनेति वर्तत इति, तत्संभवापेक्षम् । यस्यावयवत्वं सामीप्यं च संभवति तस्याव-यवत्वमेवाश्रीयते, अन्तशब्दस्यावयववाचित्वेन प्रसिद्धतरत्वात्। यस्य त्ववयवत्वासंभ-वस्तस्य सामीप्यमेवाऽन्तशब्देन प्रतिपाद्यते, यथा–'नद्यन्तं क्षेत्र'मिति । अन्ये त्वाहुः–सर्वत्रैवान्तशब्दोऽवयववाची, कस्य चिन्मुख्यमवयवत्वं, कस्य चित्सामीप्या-दुपचरितमित्यभिप्रायेणेदं भाष्यम् । ततश्चाऽन्तशब्दस्यावयववाचित्वान्मपर्यन्तस्या-देशलाभान्नाऽर्थः परिग्रहणेन । **अवधिद्योतनार्थमिति** । यदि युष्मदस्मदी मान्ते

उ.]तु कार्ययोगाऽभावस्तदाह–**नद्या इति**। 'तद्य' इत्यादि भाष्यं व्याचष्टे–**पर्यन्तश-ब्दस्त्विति** । शब्दशक्तिस्वभावादिति भावः। **अन्यपदार्थविषय इति**। बहुव्रीहिभूत इत्यर्थः । एवञ्च 'परि'शब्दाऽभावेऽर्थसन्देहः स्यात् । पर्यन्तशब्दस्तु सह तेनेत्यर्थ एवेत्यसन्दिग्ध इति तात्पर्यम्। तत्फलन्दर्शयति–**तेनेति**। **सर्वत्रैवेति**। नियममुपपा-दयति–**अन्तशब्द इति** । तर्हि 'नद्यन्त'मित्यत्राऽपि नद्याः कार्ययोगः स्यादत आह—**नद्यन्तमिति** । तर्हि नियमोक्तिरयुक्तेत्यत आह—**यस्त्विति** । अन्तशब्दः समीप-वाचीत्यन्यपदार्थे नद्या अनन्तर्भावः । यदुच्यते–सर्वत्रान्तशब्दः सह तेन वर्तत इति तत्संभवापेक्षम् । **यस्यावयवत्वमिति** । यथा मर्यादान्तमित्यादौ मर्यादायाः । **तस्यावयवत्वमिति**। अवयवत्वमेवेत्यर्थः। **यस्य त्विति** । यथा 'नद्यन्त'मित्यादौ-नद्यादेः । **अन्ये त्वाहुरिति** । एकं ह्येकशक्तिकल्पनाल्लाघवं भवति । 'अतो ऽन्त-स्ये'ति सूत्रे 'सामीप्ये वर्तत' इत्यस्य सामीप्योपचरितावयवे इत्यर्थः। 'अवयवे वर्तते' इत्यस्य मुख्यावयवे वर्तत इत्यर्थ इतिभावः । **अवधिद्योतनार्थमित्यस्याऽयमर्थः**–परिशब्दसमभिव्याहृतोऽन्तशब्दोऽवधिबोधक इति तस्याऽवधिवाचकत्वद्योतकत्वार्थ-मित्यर्थः। एवञ्च तस्य मावधेरित्यर्थः। एवमपि सामानाधिकरण्येनान्वये इष्टाऽसिद्धि-रत आह—**यदि युष्मदिति** । परिग्रहणसामर्थ्याद्वैयधिकरण्यान्वय इति भावः ।

स्युः ॥ क्व च मान्ते युष्मदस्मदी ? ॥ युष्मानाचष्टे अस्मानाचष्टे इति [णिचि–युष्मयति अस्मयति ।] युष्मयतेरस्मयतेश्चाऽप्रत्यये॥ [मपर्यन्तस्य] ॥

प्र.]अथाप्यमान्ते सर्वथा आदेशा यथा स्युरेवमर्थं 'परि'ग्रहणम् । **यत्रैवेति** । सामानाधिकरण्येन विशेषणविशेष्यभावः स्यात्, अथापि वैयधिकरण्यमाश्रीयते–'युष्मदस्मदोरवयवस्य मान्तस्ये'ति, तथापि–यत्र मान्ते युष्मदस्मदी तत्र भेदाऽभावादादेशा न स्युः।न च व्यपदेशिवद्भावोऽस्ति, 'अप्रातिपदिकेने'ति निषेधात्। परिग्रहणे तु तदुपादानसामर्थ्याद्युष्मदस्मदवयवेऽपि युष्मदस्मच्छब्दौ वर्तेते इति सर्वत्रैवादेशसिद्धिः । वैयधिकरण्येन वा संबन्धे परिग्रहणोपादानसामर्थ्यादप्रातिपदिकेनेति प्रतिषेधाप्रवृत्त्या मान्तयोरपि युष्मदस्मदोरादेशसिद्धिः । **युष्मयतेरिति** । 'प्रत्ययोत्तरपदयोश्चे'त्यत्रैकवचनाधिकारात्त्वमौ न भवतः । इष्टवद्भावाट्टिलोपः। 'क्वौ लुप्तं न स्थानिव'दिति मान्ते युष्मदस्मदी। ततः कृदन्तत्वात्स्वादयः । एकदेशविकृतस्याऽनन्यत्वाद्युष्मदस्मदाश्रयकार्यप्रवृत्तिः।तत्र सौ त्वमहमिति भवति। द्विवचने'प्रथमायाश्च द्विवचने भाषाया'मिति मकारस्यात्वे प्राप्ते परत्वाद्युवावयोःकृतयोः पुनःप्रसङ्गविज्ञानादात्वे कृते–युवामावामिति भवति । तृतीयाद्विवचने–युवाभ्यामावाभ्यामिति । भिसि–युषाभिरसाभिरिति। ङेप्रत्यये–तुभ्यं मह्यम् । भ्यसि युषभ्यमसभ्यमिति । शेषे लोप इति लोपः । पञ्चमीभ्यसि युषदसदिति । मपर्यन्तापेक्षे तु शेषे आश्रीयमाणे मात्परस्यान्यस्याभावाल्लोपाभावाद्युष्मदस्मदिति भवति ।इह त्वामाचष्टे मामाचष्टे इति णिचि 'प्रत्ययोत्तरपदयो'-

---

उ.]**अथापि वैयधिकरण्यमिति** । इदं प्रौढ्या, संभवति सामानाधिकरण्ये वैयधिकरण्यस्याऽन्याय्यत्वात् । **निषेधादिति** । इदमपि प्रौढ्या, निषेधस्य प्रत्ययविधिविषयत्वात् । तस्मात्सामानाधिकरण्येनाऽन्वयः स्यादित्येव भाष्यतात्पर्यम् । अवधिबोधकपर्यन्तशब्दोपादाने तु वैयधिकरण्येनैव संबन्धः । एवञ्च युष्मदस्मदोर्मावधेरादेश इत्यर्थ इति भावः । **एकवचनाधिकारादिति** । एकार्थवाचिनोरेव तावादेशौ न त्वनेकार्थवाचिनोरिति भावः । ननु लोपस्य स्थानिवद्भावान्मान्तत्वमनयोरसिद्धमत आह—**क्वौ लुप्तमिति । युवावयोः कृतयोरिति** । आख्यानकर्तृद्वित्वे वर्तमानयोरपि युष्मदस्मदोर्द्व्यर्थवृत्तिताऽस्त्येवेति भावः ।**युषमभ्यमसभ्यमिति** । भ्यम् तु 'युष्मदस्मदोरनादेशे' इति सूत्रस्थभाष्यप्रामाण्यान्नास्त्येव, मुख्ययुष्मदादिविषय एव वा । 'यथेच्छसी'त्यनेन भाष्येण तयोः फलभेदाऽभावबोधनादिति भावः । वस्तुतो 'यथेच्छसी'ति भाष्यप्रामाण्येनाऽस्य चतुर्थीबहुवचने प्रयोगाऽभाव एवेति तत्त्वम् । **युष्मदस्मदिति** । एवं चतुर्थीबहुवचनेऽपि युष्मभ्यमस्मभ्यमिति । वस्तुतः 'शेषे लोप' इति सूत्रस्थ'शेष'ग्रहणप्रत्याख्यानपरभाष्यप्रामाण्याच्छेषस्य लोप इति नास्त्येवेति पञ्चमीबहुवचनेऽस्य प्रयोगाऽभाव एवाऽनभिधानादिति तत्त्वम् । षष्ठीबहुवचने युषाकमसाकं, 'प्रत्ययोत्तरपदयोश्चे'ति सूत्रेऽतित्वाकमतिमाक'मिति

प्रत्ययोत्तरपदयोश्च ॥ ७।२।९८ ॥

किमर्थमिदमुच्यते न त्वमावेकवचन इत्येव सिद्धम् ? ॥ न सिध्यति ॥ किं कारणम् ? ॥ एकवचनाऽभावात् । एकवचन इत्युच्यते न चात्रैकवचनं पश्यामः ॥ प्रत्ययलक्षणेन ॥ 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणस्य प्रतिषेधः ॥ एवं तर्हि इदमिह संप्रधार्यं–लुक्क्रियतामादेशाविति, किमत्र कर्तव्यम् ?॥ परत्वादादेशौ ॥ नित्यो लुक् । कृतयोरप्यादेशयोः प्राप्नोत्यकृतयोरपि ॥—अन्तरङ्गावादेशौ ॥ एवं तर्हि सिद्धे सति यत्प्रत्ययोत्तरपदयोस्त्वमौ शास्ति तज्ज्ञा-

---

प्र.]रिति त्वमयोः कृतयोः 'प्रकृत्यैका'जिति प्रकृतिभावादसति टिलोपे 'अत उपधाया' इति वृद्ध्या भाव्यम् । अथ लङ्गवृत्त इत्याश्रीयते तदा वृद्ध्यभावः। तत्र त्वद्-सु मद्-सु इति स्थिते मपर्यन्ताऽभावात्त्वाऽहौ सावित्यस्याऽप्रवर्तनाद्वृद्धिपक्षे 'त्वादम्' 'माद'मिति भवति । तदभावे 'त्वदं' 'मद'मिति। केचित्तु मान्तयोर्युष्मदस्मदोरादेशान्नेच्छन्ति । मपर्यन्तग्रहणं हि यत्र परिशिष्टसद्भावस्तत्रादेशार्थमिति परिशिष्टाऽभावेन भाव्यमादेशैरिति ते ब्रुवन्ति । [**मपर्यन्तस्य**] ॥

प्रत्ययोत्तरपदयोश्च । **अन्तरङ्गाविति** । नित्यादप्यन्तरङ्गो बलीयान् । तथा

उ.]भाष्योदाहरणेन गौणेऽप्याक्रमप्रवृत्तेः । **इह त्वामाचष्टे इत्यादि** । वस्तुतस्तु 'सावेकाच' इति सूत्रस्थभाष्यप्रामाण्येनैकवचनान्तप्रकृतिकण्यन्तप्रकृतिकक्विबन्तानामनभिधानस्य तत्रैव सूत्रेऽस्माभिरुक्तत्वेनेदं चिन्त्यम् । **केचित्त्विति** । परिग्रहणाऽभावे–'तत्रैवादेशा' इत्यस्य तत्रैवाऽनिष्टे आदेशा इत्यर्थः। तत्सत्त्वे तु तत्र नैवादेशा इति एतन्मते भाष्याऽक्षरार्थः । अत एवावधिद्योतनार्थमित्युपक्रमे उक्तम् । अग्रेऽपि देशस्य कालस्य वा सत्त्वे हि तयोरवधित्वव्यवहारो लोकप्रसिद्धः । किञ्च पूर्वव्याख्यायां परिग्रहणसामर्थ्यान्मणिमन्त्रादिन्यायेन वैयधिकरण्यान्वयो न तु वाच्यवृत्त्या, मम तु परिग्रहणसत्त्वेऽसंभवान्न सामानाधिकरण्येनान्वयः किन्तु वैयधिकरण्येनेति। एवमेव व्याख्यानं भाष्यसंमतम् । अत एवाग्रे भगवता रूपाणि न दर्शितानि । न चावध्यर्थत्वे मपर्यन्तेति बहुव्रीहेरतद्गुणत्वापत्तिः, अवयवस्य तत्त्वे तद्गुणताऽङ्गीकारात् । अत एव 'द्विपर्यन्ताना'मित्यादौ न दोष इति तेषामाशयः । 'अङ्गुष्ठपर्यन्तं कुष्ठ'मित्याद्यसाध्वेव, 'अङ्गुष्ठान्त'मित्येव तूचितम् । [**मपर्यन्तस्य**] ॥

प्रत्ययोत्तरपदयोश्च । भाष्ये—**एकवचन इत्येव सिद्धमिति** । यद्यपि इदमर्थग्रहणमित्युत्तरत्राऽत्रैव भाष्ये स्फुटं तथापि विभक्तावित्यधिकारात्सिद्धमित्याशयः । **एकवचनाभावादिति** । एकवचनग्रहणं प्रत्ययोपलक्षणम् , एकार्थयोर्युष्मदस्मदोर्विभक्तेरेकवचनस्यैव संभवेन भाष्ये 'एकवचन' मित्युक्तं । विभक्तावित्यधिकारफलं तु त्वं डित्थः पुत्रो यस्य स युष्मड्डित्थपुत्र इति त्रिपदबहु-

पयत्याचार्यो'ऽन्तरङ्गानपि विधीन्बाधित्वा बहिरङ्गो लुग्भवती'ति ॥ किमेतस्य ज्ञापने प्रयोजनं ? ॥ गोमान् प्रियो यस्य गोमत्प्रियः यवमत्प्रियः। गोमानिवाचरति गोमत्यते यवमत्यते। अन्तरङ्गानपि नुमादीन्बहिरङ्गो लुग्बाधत इति ॥ नैतदस्ति ज्ञापकम् , अस्त्यन्यदेतस्य वचने प्रयोजनम् ॥ किम् ? ॥ येऽन्ये एकवचनादेशाः प्राप्नुवन्ति तद्बाधनार्थमेतत्स्यात् । तद्यथा–तव पुत्रः त्वत्पुत्रः, मम पुत्रो मत्पुत्रः। तुभ्यं हितं त्वद्धितं, मह्यं हितं मद्धितमिति ॥ यत्तर्हि मपर्यन्तग्रहणमनुवर्तयति ॥ यद्यत्राऽन्ये एकवचनादेशाः

प्र.]चोक्तम्—'परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषां मिथःप्रसङ्गे परबलीयस्त्व'मिति। **गोमत्प्रिय इति**। अत्रान्तरङ्गा एकपदाश्रयत्वात्सुलोपादयः स्युः। पदद्वयाश्रयत्वाद्बहिरङ्गो लुगिति गोमान्प्रिय इति स्यात्। अस्मिंस्तु ज्ञापके सत्यन्तरङ्गाण्यपि कार्याणि बाधित्वा लुग्भवति। ततो 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणप्रतिषेधान्नुम्दीर्घाऽभावे 'गोमत्प्रिय' इति सिद्ध्यति। 'सुपो धातुप्रातिपदिकयो'रित्यस्यैव बाधकत्वमनेन ज्ञाप्यते, तस्यैवेह संभवात्। के चित्तु सामान्यापेक्षया ज्ञापकत्वाश्रयाल्लुङ्मात्रस्य बलत्वाश्रयेण व्यवहारदर्शनाल्लुङ्मात्रं बाधकं ज्ञाप्यत इत्याहुः।

येऽन्य इति। एकवचनाधिकारादेकवचननिमित्तानामादेशान्तराणां त्वमौ बाधकौ स्यातां न तु ज्ञापकावित्यर्थः। **यत्तर्हीति**। के चिद्व्याचक्षते–यद्यादेशान्तराणां त्वमौ बाधकौ स्यातां तदा मपर्यन्तग्रहणानुवृत्तिमन्तरेणोत्सर्गसमानदेशत्वादपवादानां मपर्यन्तस्य त्वमौ सिद्धाविति किं तदनुवृत्त्या। अनुवृत्त्या तु ज्ञाप्यते–प्रागेव लुकि कृते विभक्त्यभावादसत्स्वादेशान्तरेषु त्वमौ विधीयेते इति। एतच्चायुक्तम्। नायं नियोग 'उत्सर्गसमानदेशोपवाद'इति, श्नम्बहुजकचां भिन्नदेशानामप्यपवादत्वदर्शनात्। तत-

---

उ.]व्रीहावादेशाऽभाव इति दिक्। **अन्तरङ्ग इतीति** प्रतीकपाठः। ननु नित्यान्तरङ्गयोर्बाध्यबाधकत्वे विनिगमनाविरहोऽत आह—**नित्यादपीति**। विरुद्धयोर्द्वयोः शास्त्रयोः**सन्निपाते** एकलक्ष्ये प्रवृत्तौ यत्पराद्यन्यतमं तद्भवति, **तेषां** परनित्यादीनां मध्ये **मिथः** परनित्याद्योर्युगपत्प्रसङ्गे उपात्तक्रमेण यत्परं तद्बलवदिति तदर्थः। 'विरोधिसन्निपात' इत्यनेन भिन्नविषयागमादेशयोर्नापवादत्वमिति सूचितमिति केचित्तन्न, नुम्नुटोर्बाध्यबाधकत्वाऽनापत्तेः। **व्यवहारदर्शनादिति**। 'एङ्ह्स्वात्संबुद्धेरित्यादौ भाष्यकृत' इत्यादिः। अतएव 'सनीस्रंस' इत्यादौ नलोपाऽभावः। 'पञ्चखट्व' इत्यादौ चैकादेशात्प्रागेव टापो लुक्। अन्यथा कृतैकादेशस्य लुक्यकारश्रवणं न स्यात्। न च प्रत्ययग्रहणस्य प्रातिपदिकप्रकृतिकाचारक्विपि चारितार्थ्यात् कथं सम्पूर्णसूत्रस्य ज्ञापकत्वमुच्यते। एतद्भाष्यप्रामाण्येन नुड्विधायकभाष्यप्रामाण्येन चैताभ्यामाचारक्विपोऽभावात्। एतद्भाष्यप्रामाण्यादेव चैकार्थयोः प्रातिपादिकप्रकृतिकणिच्चोऽप्यनभिधानं बोध्यम्। इतोऽपि त्वादं मादमित्यादिरूपकल्पना प्रत्युक्ता। **एकवचनाधिकारादेकवचननिमित्तानामिति**। एकवचनरूपविभक्तिनिमित्तानामित्यर्थः

स्युर्मपर्यन्तानुवृत्तिरनर्थिका स्यात् ॥*॥ त्रिचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणं शब्दविशेषणम् ॥ * ॥ **त्रिचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणं शब्दविशेषणं द्रष्टव्यम् ।**

त्रिचतुरोः स्त्रियां तिसृचतसृ । **यद्यपि समासः पुंसि नपुंसके वा वर्तते त्रिचतुरौ च स्त्रियां वर्तेते, भवत्येव तिसृचतसृभावः, प्रियास्तिस्रो ब्राह्मण्यो-**

प्र.] श्चाऽसत्यां मपर्यन्तानुवृत्तावादेशान्तराणामपि बाधकौ त्वमौ सर्वादेशौ स्यातामनेकाल्त्वादिति सप्रयोजना मपर्यन्तानुवृत्तिः । तस्मादन्यथा व्याख्यायते—तवममादय आदेशाः स्थानिप्रकृत्यर्थमिहाऽनुवर्तन्ते । तत्र तवादीनां प्रसङ्गे सिद्धयोस्त्वमयोर्मपर्यन्तानुवृत्तिस्त्वया कृतं त्वत्कृतमित्याद्यर्था भवन्ती लुको बाधकत्वं ज्ञापयति । ततश्च तवाद्यनुवृत्तिसहिता मपर्यन्तानुवृत्तिर्ज्ञापनाय भवति । केवला हि मपयन्तानुवृत्तिर्लाघवाय स्यात् । गरीयसी हि तवाद्यनुवृत्त्या स्थानिप्रतीतिः, ततो ज्ञापनाय न प्रभवेत्।तस्मात्तवाद्यनुवृत्तिसहिता मपर्यन्तानुवृत्तिर्यथोक्तार्थज्ञापनायाऽलम्। **त्रिचतुरिति।** स्त्रियां द्विवचन एकवचन इति येऽर्था निर्दिष्टास्ते श्रूयमाणानामेव शब्दानां विशेषणं न त्वङ्गस्येत्यर्थः। प्राप्तविशेषणसंबन्धैस्त्रिचतुर्युष्मदस्मद्भिरङ्गं विशेष्यते । तत्र 'पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य(च)ग्रहणं भवती'ति केवलानां तदन्तस्य चादेशप्रवृत्तिः। द्विवचनैकवचने च पारिभाषिके न गृह्येते, किं तर्हि द्वयोर्वचनमभिधानं द्विवचनमेकस्य वचनमेकवचनमित्यर्थनिर्देशः । **प्रियतिसेति** ।. 'अन्तरङ्गानपि विधीन्बहिरङ्गो

उ.]इदं व्यर्थं । **श्मबहुजकचामिति** । वस्तुतस्तेषु मित्त्वपुरस्ताद्ग्रहणप्राकटेर्ग्रहणैस्तस्य बाधेऽप्यन्यत्र तत्त्यागे किं मानमिति चिन्त्यम् । यद्यपि असंभवे एव बाधकत्वमिति वार्तिकमते 'उत्सर्गसमानदेशा अपवादा' इति न्यायो, भाष्यमते तु सत्यपि संभवे बाधस्वीकारस्तथापि भाष्यमते वाचनिक्येवैषा । ज्ञापकोपन्यासस्तु वार्त्तिकरीत्येति बोध्यम् । ज्ञापिते त्वस्मिन्नेतद्विषये तवादीनामप्राप्त्या तदपवादत्वाऽभावेन मपर्यन्तस्यैवादेशार्थं तदनुवृत्तिश्चरितार्था। अनेन च न्यायेनाऽन्तरङ्गनिमित्तविनाशकलुकस्तत्प्रयोजकसमासादीनाञ्च प्राबल्यं बोध्यत इति दिक् ।भाष्ये-**यद्यत्राऽन्ये** इत्यादि। **स्युरित्यस्य**-प्राप्नुयुरित्यर्थः।'तद्बाधनार्थं चेदं स्यात्तदे'ति शेषः।**तस्मादन्यथेत्यादि** । इदं चिन्त्यमेव अतिगुरुत्वात् , ज्ञापितेऽपि तवाद्यनुवृत्तेः सार्थक्यस्योपपादयितुमशक्यत्वाच्च। **श्रूयमाणानामेवेति**। भाष्ये शब्दशब्देन श्रूयमाणशब्दो लक्ष्यते इति भावः । **प्राप्तेति** । 'गुणः कृतात्मसंकार' इति न्यायादिति भावः । नन्वेकवचन इत्येव सिद्धमित्युपक्रमस्थभाष्यादेकवचनादिशब्दानां प्रत्ययपरत्वप्रतीतेर्युष्मदादिष्वर्थग्रहणमप्रसिद्धमत आह—**द्विवचनैकेत्यादि** । उपक्रमस्थभाष्यन्तूपलक्षणपरतया व्याख्यातमेव । **ननु** 'प्रियतिसे'त्यादावन्तर्वर्त्तिनीं विभक्तिमाश्रित्य तिसृभाव इति तन्निरूपितमङ्गं स्त्रियामेवेति अङ्गविशेषणत्वेऽपि क्षत्यभावोऽत आह—**अन्तरङ्गानपीति** । नन्वङ्गस्य सर्वस्य तिस्रादेशः प्राप्नोती-

ऽस्य ब्राह्मणस्य,–प्रियतिसा प्रियतिस्रौ प्रियतिस्रः । प्रियचतसा प्रियचतस्रौ प्रियचतस्रः ॥ प्रियास्तिस्रो ब्राह्मण्योऽस्य ब्राह्मणकुलस्य–प्रियतिसृ प्रियतिसृणी प्रियतिसृणि । प्रियचतसृ प्रियचतसृणी प्रियचतसृणि ॥ यदा हि समासः स्त्रियां वर्तते त्रिचतुरौ च पुंसि नपुंसके वा तदा मा भूतामिति, प्रियास्त्रयो ब्राह्मणा अस्या ब्राह्मण्याः प्रियत्रि ब्राह्मणी प्रियत्री प्रियत्रयः । प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः । प्रियाणि त्रीणि ब्राह्मणकुलानि अस्या ब्राह्मण्याः–प्रियत्रिः प्रियत्री प्रियत्रयः । प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः॥

युवावौ द्विवचने । यद्यपि च समास एकार्थो वा भवति बह्वर्थो वा भवति, द्व्यर्थे च युष्मदस्मदी, भवत एव युवावौ ॥ किमविशेषेण ? ॥ 'ने'त्याह । 'यूयवयौ जसि' 'त्वाहौ सौ' 'तुभ्यमह्यौ ङयि' 'तवममौ ङसि' इत्येतान्विधीन्वर्जयित्वा । अतिक्रान्तो युवामतित्वम्, अत्यहम् । अतिक्रान्तौ युवाम्अतियुवाम्अत्यावाम् । अतिक्रान्ता युवाम्अतियूयम् अतिवयम् । अतिक्रान्तं युवाम् अतियुवाम्अत्यावाम् । अतिक्रान्तौ युवाम्अतियुवाम्अत्यावाम् । अतिक्रान्तान्युवाम् अतियुवान् अत्यावान् । अतियुवयाऽत्यावया । अतियुवाभ्याम्–अत्यावाभ्याम् । अतियुवाभिः, अत्यावाभिः । अतितुभ्यम्अतिमह्यम् । अतियुवाभ्याम् अत्यावाभ्याम् । अतियुवभ्यम् अत्यावभ्यम् । अतियुवत् अत्यावत् । अतियुवाभ्याम् अत्यावाभ्याम् । अतियुवत् अत्यावत् । अतितव अतिमम । अतियुवयोः अत्यावयोः । अतियुवाकम्—अत्यावाकम् । अतियुवयि अत्यावयि । अतियुवयोः, अत्यावयोः । अतियुवासु अत्यावासु ।

प्र.] लुग्बाधते' इत्यकृत एव तिस्रभावे लुकि कृते समासाद्या विभक्तिस्तस्यां तिस्रभावः। स च 'निर्दिश्यमानस्यादेशा भवन्ती'ति त्रिशब्दस्यैव भवति । **प्रियतिस्राविति** । 'अचि र ऋत' इति रादेशः । **प्रियतिसृ इति** । **कथं** पुनरत्र तिस्रभावो यावता नित्यत्वात्स्वमोर्नपुंसकादिति लुकि कृते 'न लुमताङ्गस्ये'ति प्रत्ययलक्षणप्रतिषेधेन भाव्यम् ?। उच्यते । 'इकोऽचि विभक्ता'वित्यत्राऽज्ग्रहणं ज्ञापकं क्वचिल्लुमता लुप्तेऽपि प्रत्ययलक्षणस्य । तथा च 'हे त्रपो' इति संबुद्धिगुणो भवति । क्वचि'त्प्रियत्री'ति पाठः, स प्रत्ययलक्षणप्रतिषेधाश्रयः । **इतीति** । एते विधयः परत्वाद्युवावयो-

---

उ.] त्यत आह–**स चेति**। **रादेश इति**। 'गुणं बाधित्वे'ति शेषः। **नित्यत्वादिति** । 'अन्तरङ्गानपी'ति न्यायाच्चेत्यपि बोध्यम् । भाष्ये–**प्रियतिसृणीति** । अत्र परत्वात्तिस्रादेशे पुनःप्रसङ्गविज्ञानान्नुम्न । नतिस्रिति निषेधेनागमविषये रादेशो नेति सामान्यतो ज्ञाप्यते भाष्योदाहरणादिति बोध्यम् । एतद्वर्जनं च न वचनेन किन्तु युक्त्यैवेत्याह—**एते विधय इति** । त्वाहादीनामवकाशो बह्वर्थे युष्मदस्मदी, युवा-

त्वमावेकवचने—यद्यपि समासो व्यर्थो भवति बह्वर्थो वा, एकार्थे च युष्मदस्मदी, भवत एव त्वमौ॥किमविशेषेण?॥'ने'त्याह। तानेव विधीन्वर्जयित्वा। अतिक्रान्तस्त्वाम्अतित्वम्अत्यहम्। अतिक्रान्तौ त्वामतित्वाम् अतिमाम्।अतिक्रान्तास्त्वाम् अतियूयम्अतिवयम्। अतिक्रान्तं त्वाम् अतित्वाम्अतिमाम्। अतिक्रान्तौ त्वाम् अतित्वाम्अतिमाम्। अतिक्रान्तान् त्वाम्—अतित्वान् अतिमान्। अतित्वयाऽतिमया। अतित्वाभ्याम् अतिमाभ्याम्। अतित्वाभिः, अतिमाभिः। अतितुभ्यम्, अतिमह्यम्। अतित्वाभ्याम् अतिमाभ्याम्। अतित्वभ्यम् अतिमभ्यम्। अतित्वत्। अतिमत्। अतित्वाभ्याम् अतिमाभ्याम्। अतित्वत् अतिमत्। अतितव अतिमम। अतित्वयोः अतिमयोः। अतित्वाकम् अतिमाकम्। अतित्वयि अतिमयि। अतित्वयोः अतिमयोः। अतित्वासु अतिमासु॥ यद्येवं यूयवयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसीत्येतेभ्यो विधिभ्यः परत्वात्त्वमावेकवचन इति प्राप्नोति, सावकाशा ह्येते विधय इदानीं भवन्ति॥ कोऽवकाशः?॥ अनेकार्थे युष्मदस्मदी॥ त्वमावेकवचन इत्यस्यावकाशः-अन्यानि वचनानि। एकार्थयोर्युष्मदस्मदोरेतेषु वचनेषूभयं प्राप्नोति। परत्वात्त्वमावेकवचन इति प्राप्नोति॥ नैष दोषः। 'शेष' इति वर्तते॥ कश्च शेषः?॥ जसादिभिरव्याप्तं यदेकवचनं, तस्मिन् शेषे। अशेषत्वान्न भविष्यति॥ अथ वा 'त्वमावेकवचन' इत्यत्र यूय-

---

प्र.]बाधकाः। **शेष इति वर्तत इति**। अन्यथा अतिक्रान्तो युष्मानतित्वमत्यहम्। अतिक्रान्ताय युष्मानतितुभ्यमतिमह्यम्। अतिक्रान्तस्य युष्मानतितवअतिममेत्यनेकार्थत्वे युष्मदस्मदोः समासे सावकाशास्त्वाहादयोऽसमासे समासेऽपि युष्मदस्मदोरेकार्थत्वे परत्वात्त्वमाभ्यां बाधनान्न प्राप्नुवन्ति—त्वमहं तुभ्यं मह्यं तव ममेति। शेषग्रहणानुवृत्तौ तु यत्र यूयादयो न भवितारस्तत्र त्वमौ भवतो नतु यूयादिविषये। तच्च शेषग्रहणंलोपग्रहणसंबन्धानुवृत्त्या यूयादिभिर्न संबध्यते। त्वमावेकवचन इत्यत्र तु लोपग्रहणं निवृत्तं, शेषग्रहणमनुवर्तत इति न कश्चिद्दोषः। **अथ वेति**। वाक्यभेदेन त्वमयोर्विषये यूयादयो विधीयन्ते। [**प्रत्ययोत्तरपदयोश्च**]।

उ.]वयोरवकाशो युवामावामिति। अतियुवाकमतित्वाकमित्यादावत एव भाष्यप्रयोगात्सुट इव नुटोऽप्याकमा निवृत्तिर्यथा भवति तथोक्तमाकम्सूत्रे। ननु शेषपदानुवृत्तौ 'यूयवयौ जसी'त्यादावपि तत्संबन्धः स्यादत आह—**तच्चेति**। भाष्ये—**जसादिभिरव्याप्तं यदेकवचनमिति**। जसादिनिमित्तादेशैरव्याप्तो य एकार्थो युष्मदादिरित्यर्थः। यद्वा एकार्थयुष्मदादिप्रकृतिकविभक्तिरित्यर्थः। शेषग्रहणस्य मध्ये विच्छिन्नत्वादाह—भाष्ये—**अथवेति**। नन्वेकवाक्यतायां जसादिविषये एवोभयं स्यादत आह—**वाक्यभेदेनेति**। पुनर्विधानाच्च तद्विषये त्वमयोर्बाधः। वस्तुतः पूर्व-

वयौ जसि त्वाहौ सौ तुभ्यमह्यौ ङयि तवममौ ङसीत्येतदनुवर्तिष्यते ॥

त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ७।२।९९ ॥

॥*॥ तिसृभावे संज्ञायां कन्युपसङ्ख्यानम् ॥ * ॥ **तिसृभावे संज्ञायां कन्युपसङ्ख्यानं कर्तव्यम् । तिसृका नाम ग्रामः** ॥*॥ चतसर्याद्युदात्तनिपातनं च ॥*॥ **चतसर्याद्युदात्तनिपातनं कर्तव्यम् ॥ त्रिचतुरोः स्त्रियां तिसृ चतसृ ॥ किं प्रयोजनम् ? ॥ चतस्रः पश्य । शसि स्वरो मा भूदिति ॥ किं चान्यत् ?** ॥*॥ उपदेशिवद्वचनं च ॥*॥ **उपदेशिवद्भावश्च वक्तव्यः ॥ किं प्रयोजनम् ?** ॥*॥ स्वरसिद्ध्यर्थम् ॥*॥ **उपदेशावस्थायामेवाद्युदात्तनिपातने कृते विभक्तिस्वरेण बाधनं यथा स्यात्—चतसृणामिति ॥ स तर्ह्युपदेशिवद्भावो वक्तव्यः ?॥ न वक्तव्यः** ॥*॥ उक्तं वा ॥*॥ **किमुक्तम् ?**॥*॥ 'विभ-

प्र.] **त्रिच । तिसृकेति** । तिस्र एव तिसृका । स्वार्थे कन्प्रत्ययः, ह्रस्वत्वे कुत्सितत्वे वा विवक्षिते, 'संज्ञायां क'निति (कन्) वा। तत्र विभक्तेर्लुकि कृते विभक्तौ विधीयमानस्तिसृभावो न प्राप्नोतीति वचनम् । तत्र केचिद्बहुवचनान्तः तिसृकाशब्दः संज्ञेत्याहुः। अपरे त्वेकवचनान्त इति । ग्रामस्य ह्येकस्य 'तिसृके'ति संज्ञेति नास्ति बहुवचनप्रसङ्गः । **चतस्र इति** । 'चतुरः शसी'त्यनेन स्थानिवद्भावादन्तोदात्तत्वं प्राप्नोति । तत 'उदात्तयणो हल्पूर्वा'दिति शस उदात्तत्वप्रसङ्गः । **चतसृणामिति** । उपदेशावस्थायामाद्युदात्ते चतस्रादेशे कृते 'षट्त्रिचतुर्भ्यो हलादि' रिति सतिशिष्टस्वरः प्रवर्तते । यद्येवं 'चतस्रः पश्ये'त्यत्रापि 'चतुरः शसी'ति सतिशिष्टत्वात्प्राप्नोति । नैष दोषः । आन्तरतम्यादाद्युदात्तत्वे सिद्धे पुनराद्युदात्तत्वं निपात्यमानं 'चतुरः शसी'त्यनेन विधीयमानं स्थानिवद्भावात्प्राप्तमन्तोदात्तत्वं बाधते। तत्र बाधितत्वात्पुनःप्रसङ्गाऽभावात्कुतः सतिशिष्टत्वम् । **उक्तमिति** । 'चतुरः शसी'त्यत्र । हलादिग्रहणं 'चतस्रः पश्ये'त्येतद्व्यावृत्त्यर्थमेव क्रियते । यदि च निपातनस्वरेण विभक्तिस्वरो बाध्येत तदा हलादिग्रहणमन्तरेणापि विभक्तिस्वरो न भविष्यतीति किं हलादिग्रहणेन ?। तत्क्रियमाणं 'निपातनस्वरस्य विभक्तिस्वरो बाधक' इति ज्ञापयति।

उ.] विप्रतिषेधः कल्प्य इति एतद्भाष्यतात्पर्यम् । [**प्रत्ययोत्तरपदयोश्च**] ॥

त्रिचतुरोः । विभक्तेर्लुकीति । 'अन्तरङ्गानपी'ति न्यायादिति भावः । **शस उदात्तत्वेति** । आद्युदात्तं च पदमिष्यते । **आन्तरतम्यादिति** । चतेरुरनन्तत्वेन चतुःशब्दस्याद्युदात्तत्वादिति भावः । **पुनःप्रसङ्गाऽभावादिति** । आद्युदात्तनिपातनसामर्थ्यात्स्वाश्रये प्राप्तान्तोदात्तत्वबाधः । विभक्तिस्वरस्तु बाधक एवेत्याद्युदात्तनिपातनोपदेशिवद्भाववचनाभ्यां कल्प्यते इति तत्त्वं। क्वोक्तं तदाह—**चतुरःशसीत्यत्रेति** । 'षट्त्री'ति सूत्रस्थहलादिग्रहणसामर्थ्यमुपपादयति—**हलादिग्रहणमिति** । 'निपातनमेव न कर्तव्य'मिति पाठः । इयमेव व्याख्या 'आद्युदात्तनिपातने ही'ति

क्तिस्वरभावश्च हलादिग्रहणात्। आद्युदात्तनिपातने हि हलादिग्रहणानर्थक्यम्'॥*॥ इति। [त्रिचतुरोः स्त्रियाम्]॥

अचि र ऋतः ॥ ७।२।१०० ॥

॥*॥ अचि रादेशे जस्युपसङ्ख्यानं गुणपरत्वात् ॥*॥ **अचि रादेशे जस्युपसङ्ख्यानं कर्तव्यम्। तिस्रस्तिष्ठन्ति चतस्रस्तिष्ठन्ति ॥ किं पुनः कारणं न सिध्यति ? ॥ 'गुणपरत्वात्'। परत्वाद्गुणः प्राप्नोति ॥ तत्तर्हि वक्तव्यम् ? ॥** ॥*॥ न वाऽनवकाशत्वाद्रस्य ॥*॥ **न वा वक्तव्यम् ॥ किं कारणम् ? ॥ 'अनवकाशत्वाद्रस्य'। अनवकाशो रादेशो गुणं बाधिष्यते ॥ सावकाशो रादेशः ॥ कोऽवकाशः?॥ तिस्रः पश्य चतस्रः पश्य ॥ नैषोऽस्त्यवकाशः, अत्रापि पूर्वसवर्णदीर्घः प्राप्नोति। स यथैव पूर्वसवर्णं बाधते एवं गुणमपि बाधिष्यते ॥ गुणोऽप्य-**

प्र.] अथ वा हलादिग्रहणेनाद्युदात्तनिपातनमेव म कर्तव्यमिति प्रतिपाद्यते।यदि 'चतस्रः पश्ये'त्यत्र 'चतुरः शसी'त्यनेनाऽन्तोदात्तत्वं स्यात्तत 'उदात्तयणो हल्पूर्वा'दिति स्यादेव विभक्तेराद्युदात्तत्वमिति तद्व्यावृत्तये हलादिग्रहणमनर्थकं स्यात्। तस्माद्धलादिग्रहणाच्चतस्रः पश्येत्यत्र 'चतुरः शसी'त्यस्याऽप्रवृत्तिरध्यवसीयते। ततश्चाद्युदात्तस्य चतुःशब्दस्याद्युदात्त एवान्तर्याच्चतस्रादेशो भवति। चतुःशब्दो 'त्रः संख्याया' इति वा 'चतेरुर'न्निति नित्त्वाद्वाऽऽद्युदात्तः। 'चतसृणा'मित्यत्र तु 'षट्त्रिचतुर्भ्य' इति विभक्तेरुदात्तत्वं भवति। [**त्रिचतुरोः स्त्रियां तिसृचतसृ**]॥

अचि र ऋतः। अचि रादेश इति। 'मध्येऽपवादा' इति पूर्वसवर्णदीर्घस्य, 'ऋत उ'दित्युत्त्वस्य च बाधः प्राप्नोति, न तु 'जसि च' 'ऋतो ङिसर्वनामस्थानयो'रिति गुणस्येति भावः। **न वेति।** 'मध्येऽपवादा' इति परिभाषाऽनाश्रयेणोच्यते। विध्यन्तरपूर्वकत्वादस्य सर्वापवादत्वमित्यर्थः। **गुणोऽप्यनकाश इति।** सोऽपि विध्यन्तरपूर्वकः। कर्तारावित्यत्र पूर्वसवर्णदीर्घः प्राप्नोति। कर्तार इत्यत्र जसि चेति गुणः

उ.] भाष्यस्वरससिद्धेति बोध्यम्। **हलादिग्रहणादिति।** वस्तुतः परत्वाद्रादेशे तस्य स्थानिवत्त्वात्तकारस्य न 'चतुरः शसी'त्यनेनोदात्तत्वं, स्वविधौ स्थानिवत्त्वाऽभावाच्च न ऋकारस्येति व्यर्थमेवाद्युदात्तनिपातनमिति पूर्वमुक्तम्। **विभक्तेरुदात्तत्वमिति।** स्थानिवद्भावेन सतिशिष्टत्वादिति भावः। [**त्रिचतुरोः स्त्रियान्तिसृचतसृ**]॥

अचि र। ननु विध्यन्तरानाक्रान्तविषयाऽभावात्सर्वापवादोऽयमिति किं वचनेनेत्यत आह—**मध्ये इति।** वार्तिके 'जसी'त्युपलक्षणं, प्रियतिस्रावित्याद्यर्थमप्युपसङ्ख्यानावश्यकत्वात्। ततश्च पूर्वबाधेन सावकाशं रादेशं सर्वनामस्थानगुणो जसि गुणश्च परत्वाद्बाधेते इत्युपसङ्ख्यानं कर्तव्यमित्यर्थः। **सर्वापवादत्वमिति।** बाध्यसामान्यचिन्ताश्रयणादिति भावः। इदमेवाऽऽचार्योक्तं समाधानं। ध्वनितं चेदं 'तृज्वत्क्रोष्टु'रित्यत्र भाष्ये। चोदक आह—**गुणोऽपीति।** तदाशयमाह—**सोऽपि।** सर्व-

नवकाशः ॥ सावकाशो गुणः ॥ कोऽवकाशः ? ॥ हे कर्तः ॥ नैष सर्वनामस्थाने गुणः ॥ कस्तर्हि ? ॥ संबुद्धिगुणः ॥ अथ तर्हि–हे मातः !॥ एषोऽपि संबुद्धिगुण एव ॥ नाऽत्र संबुद्धिगुणः प्राप्नोति ॥ किं कारणम् ? ॥ 'अम्बार्थनद्योर्ह्रस्व' इति ह्रस्वत्वेन भवितव्यम् ॥ भवेद्दीर्घाणां ह्रस्ववचनसामर्थ्यान्न स्यात्, ह्रस्वानां तु खलु ह्रस्वत्वं क्रियतां संबुद्धिगुण इति परत्वात्संबुद्धिगुणेन भवितव्यम् ॥ अथापि कथं चित्सावकाशो गुणः स्या-

---

प्र.]सिद्धः। 'कर्तार'मित्यत्रापि 'अमि पूर्व' इति प्राप्नोति।तत्र द्वयोर्विध्यन्तरापवादयोरपवादविप्रतिषेधात्परत्वाद्गुणप्रसङ्गः । इतरोऽन्यविधिपूर्वकत्वाऽभावं गुणस्य दर्शयति—**सावकाश इति। हे कर्तरिति।** संबुद्धौ 'ह्रस्वस्य गुण' इति गुणं परत्वाद्दृतो ङीति गुणो बाधत इति मन्यते। तत्र कर्तारावित्यादौ यद्यपि परत्वात्पूर्वसवर्णादिकं बाधित्वा गुणो भवति तथापि विध्यन्तरपूर्वकेण रादेशेन बलीयसा न स्पर्द्धत इति भावः। **नैष इति।** एतदर्थो गुणस्य नारम्भो, लक्षणान्तरेण सिद्धत्वादित्यर्थः। हे **मातरिति।** संबुद्धिनिमित्तो गुणोऽत्र नास्ति, 'अम्बार्थनद्योर्ह्रस्व' इति ह्रस्वेन बाधनात्। **एषोऽपीति।** गुणो ह्रस्वत्वं परत्वाद्बाधत इति भावः।

अम्बार्थेति। अस्मिंश्च सति 'ऋतो ङी'ति गुणः प्रवर्तते। **भवेद्दीर्घाणामिति।** ननु दीर्घाणां ह्रस्वविधानं 'ह्रस्वस्य गुण' इति गुणविधानार्थमेव स्यात्। ह्रस्वानां तु ह्रस्वविधानं गुणबाधनार्थं स्यात्। नैतदस्ति। एवं तर्हि दीर्घाणामेव गुणं विदध्यात्—'नदीह्रस्वयोर्गुण' इति। प्रक्रियागौरवमेवं परिहृतं भवति। **परत्वात्संबुद्धिगुणेनेति।** गुणस्यावकाशः–अग्ने वायो। ह्रस्वस्याऽवकाशः—अम्ब अक्क। हे मातरिति परत्वाद्गुणः। एवं च सर्वनामस्थानगुणः पूर्वसवर्णापवाद एवेति अपवादविप्रतिषेधात्त्रिस्त्रस्तिष्ठन्तीति परत्वाद्गुणप्रसङ्गः। स च न 'जसि चे'त्यनेन, किं तर्हि 'ऋतो ङी'त्यनेन, 'जसि चे'त्यस्मात्परत्वात्। **अथापीति।** 'ह्रस्वस्य गुण' इति यदि

उ.] नामस्थानगुणोऽपि। **द्वयोः**–रादेशसर्वनामस्थानगुणयोः। **इतर इति।** सिद्धान्त्येकदेशीत्यर्थः। ननु हे कर्त्तरित्यत्र संबुद्धिगुण एव प्राप्नोति न सर्वनामस्थानगुणोऽत आह—**संबुद्धाविति। विध्यन्तरपूर्वकेणेति।** उदाहरणमात्रे विध्यन्तरपूर्वकेणेत्यर्थः। गुणस्तु हे कर्तरित्यत्र न विध्यन्तरपूर्वक इति भावः। **एतदर्थ इति।** यदर्थो यस्यारम्भः स एव तस्यावकाशो युक्त इति भावः। **संबुद्धिनिमित्त इति।** एवञ्च सर्वनामस्थानगुण एवाऽत्र प्राप्नोतीत्ययं तस्यावकाश इति भावः।

ननु हे मातरित्यत्र ह्रस्वप्राप्तेः कथं संबुद्धिगुणोऽत आह—**गुणो ह्रस्वत्वमिति। अस्मिंश्च सतीति।** ह्रस्वश्च येन नाप्राप्तिन्यायेन संबुद्धिगुणस्यैव बाधको नाऽस्येति भावः। **गुणबाधनार्थमिति**। प्रयोजनान्तराऽभावादिति भावः। **एवं तर्हीति।** यदि ह्रस्वे कृते दीर्घान्ते गुणः स्यात्तर्हि नद्या एव गुणं विदध्यादिति दीर्घाणां-

देवमपि न दोषः, 'पुरस्तादपवादा अनन्तरान्विधीन्बाधन्त' इत्येवमयं रादेशो जसि गुणं बाधते सर्वनामस्थानगुणं न बाधिष्यते । तस्मात्सुष्ठूच्यते- "अचि रादेशे जस्युपसङ्ख्यानं गुणपरत्वा"दिति ॥[अचि र ऋतः] ॥

जराया जरसन्यतरस्याम् ॥ ७।२।१०१ ॥

[॥*॥ नुमोऽनङ्जरसौ ॥*॥] नुमोऽनङ्जरसौ भवतो विप्रतिषेधेन । नुमोऽवकाशः-त्रपुणी जतुनी तुम्बुरुणी । अनङोऽवकाशः-प्रियसक्था ब्राह्म-

---

प्र.]योगविभागः क्रियते। ('ह्रस्वस्य') अम्बार्थस्य ह्रस्वान्तस्य ह्रस्वो भवति। ततो 'गुण' इति। ततश्च 'हे मात'रित्यत्र ह्रस्वे कृते सर्वनामस्थानगुणः क्रियते । एतच्चाभ्युपगम्योच्यते, न तु योगविभागस्य किं चिदस्ति प्रयोजनम् । **सर्वनामस्थानगुणमिति ।** यद्यप्यबाधिते सर्वनामस्थानगुणे जसि गुणः फलतो न बाधितस्तथापि लक्षणव्यवस्थानुसारेणैतदुच्यते। न ह्ययं रादेशोऽनवकाशो यत 'ऋतो ङिसर्वनामस्थानयो'रित्येतं गुणं बाधेत। 'जसि चे'ति गुणबाधनेन 'ऋत उ'दित्युत्वबाधनेन शसि पूर्वसवर्णबाधनेन च सावकाशत्वात् । **तस्मादिति।** जसिग्रहणं ङिसर्वनामस्थानोपलक्षणमित्याहुः। तथा च प्रियतिस्राविति रादेशो भाष्य उदाहृतः । तेन 'प्रियतिस्रि निधेहि'इत्यत्रापि रादेशो भवति । के चित्त्वाहुः-'चतसर्याद्युदात्तनिपातन'मित्यत्र वार्तिके रादेशस्य ङावकरणाज्जसोऽन्यत्र गुणविषये रादेशं वार्तिककारो नेच्छतीति नोपलक्षणं जस्ग्रहणम् ॥

जरायाः । प्रियसक्थेति । नपुंसकेनाऽङ्गस्य विशेषणान्नुमोऽत्राऽप्राप्तिः । अन-

---

उ.] ह्रस्वविधानं गुणबाधनार्थमेवेति भावः। ननु 'जसि चे'ति गुणः प्राप्नोतीति 'ऋतो ङी'त्यस्यानवकाशत्वविचारो निष्फलोऽत आह—**स च नेति ।** परस्परं गुणाभ्यां स्थानिरूपनिमित्तविघाताद्विरोधोऽस्तीति भावः। **योगविभाग इति ।** तत्र ह्रस्वस्येत्येको योगः । तत्राम्बार्थग्रहणं ह्रस्व इति चानुवर्तते । तदयमर्थः—'अम्बार्थानां ह्रस्वस्य ह्रस्वो भवती'ति । एतच्च परत्वात्प्राप्तस्य ह्रस्वीयसंबुद्धिगुणस्य संबुद्धौ बाधनार्थमेवेति भावः । एवंच सर्वनामस्थानगुणो विध्यन्तराऽबाधेन प्रवृत्त्या सावकाश इति तात्पर्यम् । **नन्विति ।** योगविभागेऽप्युपसङ्ख्यानस्य वक्ष्यमाणरीत्याऽवश्यकर्तव्यत्वादिति भावः। **फलतो न बाधित इति ।** सर्वथा गुणस्य प्राप्तत्वात् । वस्तुतोऽथापि कथं चिदिति भाष्यस्यायमर्थः,-येन नाप्राप्तिन्यायेन सर्वनामस्थानगुणः पूर्वसवर्णदीर्घमेव बाधते न रादेशमित्यर्थः । एवञ्च बाध्यविशेषचिन्ताश्रयणेऽत्रापि तथैव दोषस्तस्माज्जस्युपसङ्ख्यानं कर्तव्यमिति चोद्यान्तमेवेदमेकदेश्युक्तिरूपं भाष्यं। समाधितत्वं तु लक्ष्यानुरोधात् 'ऋतो ङी'त्यत्र बाध्यविशेषचिन्ताश्रयणम्, अत्र तु बाध्यसामान्यचिन्ताश्रयणमिति **न वानवकाशत्वादस्ये**त्यनेनोक्तमेवेति सुधियो विभावयन्तु । **केचित्त्वाहुरिति ।** अत्रारुचिबीजं तु तत्र शब्दपरत्वाद्रादेशाऽप्राप्तिरिति ॥

जराया जरसन्यतरस्याम्। ननु प्रियसक्थेत्यत्राऽपि सक्थिशब्दस्य नपुंसकत्वा-

णेन । इहोभयं प्राप्नोति—दध्ना सक्थ्ना । जरसोऽवकाशः—जरसा जरसे । नुमोऽवकाशः—कुण्डानि वनानि ॥ इहोभयं प्राप्नोति—अतिजरांसि ब्राह्मण-कुलानि ॥ अनङ्जरसौ नुमो भवतो विप्रतिषेधेन ॥

अथेह लुक्कस्मान्न भवति—अतिजरसं पश्येति ? ॥ किं पुनः कारणं द्वितीयैकवचनमेवोदाह्रियते न पुनः प्रथमैकवचनमपि—अतिजरसं तिष्ठतीति ? ॥ अस्त्यत्र विशेषो.—नाऽत्राऽकृतेऽम्भावे जरस्भावः प्राप्नोति ॥ किं कारणम् ? ॥ 'अची'त्युच्यते । यदा च जरस्भावः कृतस्तदा लुङ् भविष्यति-'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्ये'ति ॥ यद्येवमतिजरसमति-

प्र.]ङ्विधौ त्वस्थ्यादीनां विशेषणं नपुंसकमित्यनङ् भवति । अतिजरांसीति । अति-जर अस् इति स्थिते यदि पूर्वं नुमागमः स्यात्, स च पूर्वाङ्गभक्तोऽङ्गमेव न व्यवदध्यात्, अवयवस्य तु जराशब्दस्य व्यवधायक इति निर्दिश्यमानस्यादेशो विधीयमानो न प्राप्नोति। अथाऽपि स्यात्तथापि सकारात्परस्य नुमः श्रवणं स्यात्। तस्मात्परत्वात्पूर्वं जरस्भाव एष्टव्यः । तत्र कृते झलन्तलक्षणो नुमागमः । अतिजरसं पश्येति । 'अतिजर-अम्' इति स्थिते एकदेशविकृतस्याऽनन्यत्वाज्जरशब्दस्य जरसि कृते 'स्वमोर्नपुंसका'दिति स्वमोर्लुक् प्राप्नोति । ननु चाऽतिजरशब्दस्याऽदन्तत्वादतोमित्यम्भावेन लुग्बाधितः कथं प्राप्नोति?।नैतदस्ति। नात्राऽम्भावः प्रवृत्तः, परत्वान्नित्यत्वाद्वा जरसादेशेन बाधितत्वात् । जरसादेशे कृतेऽनकारान्तत्वादम्भावाऽप्रसङ्गाल्लुक्प्राप्तिश्चोद्यते । न पुनरिति । सोरपि हि लुङ्नेष्यते । यदा च जरस्भाव इति । या पूर्वं लुक्प्राप्तिः साऽपवादेन बाध्यते । कृते तु जरस्भावे सन्निपातपरिभाषया अजादिसन्निपातेन जरस्भावो निष्पन्नो नोत्सहतेऽजाद्यानन्तर्यं विहन्तुम् । यद्येवमिति । सोर्भिसश्चाऽकारान्तसन्निपातेनाऽजादिरादेशोऽकारान्तविघा-

उ.]नुमः प्राप्त्या कथमनङोऽवकाशोऽत आह—नपुंसकेनेति । नुम्जरसोर्विप्रतिषेधस्य फलं दर्शयति—अतिजर अमिति स्थित इति । 'टाङसीतिसूत्रोक्तरीत्या जरसादेशापेक्षया पूर्वविप्रतिषेधेन विभक्त्यादेशशिभावे कृते' इति शेषः । अन्यथा सर्वनामस्थानपरत्वाऽभावेन नुमोऽप्राप्तिरेव स्यात् । स चाऽङ्गभक्त इति पाठ उचितः । अथापि स्यादित्यभ्युपगमवादः । स्वमोर्लुगिति । न चाऽस्यामवस्थायामम: प्रसङ्गः, अनदन्तत्वात् । ननु पूर्वममा बाधितस्य लुकः कथं पुनः प्रवृत्तिरिति शङ्कते—ननु चेति । परत्वान्नित्यत्वाद्वेति । चिन्त्यमेतत् । 'अन्तरङ्गानपी'ति न्यायेन लुको बलवत्त्वात्तद्बाधेनाऽमादेशाप्रवृत्तिं विना जरसोऽप्रवृत्तेः।पुनर्लुगापादानं तु भिन्ननिमित्तकत्वान्न दोषायेति बोध्यम् । साऽपवादेनेति । अम्भावेनेत्यर्थः । सन्निपातपरिभाषयेति । 'बाध्यते' इत्यनुषङ्गः । तदुपपादयति—अजादीति । अनिमित्तं

जरसैरित्यत्र न प्राप्नोति, अतिजरमतिजरैरिति भवितव्यम् ॥ गोनर्दीय आह— "इष्टमेवैतत्सङ्गृहीतं भवति। अतिजरमतिजरैरिति भवितव्यं सत्यामेतस्यां परिभाषायां—सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्ये"ति ॥[जरायाजरस्]॥

त्यदादीनामः ॥ ७।२।१०२ ॥

॥*॥ त्यदादीनां द्विपर्यन्तानामकारवचनम् ॥*॥ **त्यदादीनां द्विपर्यन्तानामत्वं वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ युष्मदस्मदन्तानां भवदन्तानां वा मा भूदिति ॥ तर्त्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् ॥**

प्र.]तिनं जरसादेशं प्रत्यनिमित्तं स्यात्। **इष्टमिति**। सन्निपातपरिभाषावशात्। 'अतिजरसं पश्ये'त्यत्र तु नाऽकारान्तसन्निपातकृतमजादित्वं भवतीति भवत्येव जरसादेशः । स त्वजादिसन्निपातनिमित्तत्वादजादेर्लुकं प्रत्यनिमित्तमिति लुगभावः। **[जरायाजरस्]॥**

त्यदादीनामः । युष्मदस्मदन्तानामिति । 'युष्मद्भवत्वस्म'दिति येषां गणपाठस्तदपेक्ष्यैतदुक्तम् । यद्यप्यस्मच्छब्द एवान्तस्तथाप्यत्यन्तसाहचर्याच्छास्त्रे युष्मदस्मदोर्युष्मच्छब्दो निर्दिष्टः । **भवदन्तानां वेति ।** 'युष्मदस्मद्भव'त्विति

उ.]**स्यादिति ।** 'इत्यत्र न प्राप्नोती'ति भाष्यस्य 'जरसादेश' इति शेषः। नन्वनयैव परिभाषया द्वितीयान्तत्वेऽपि जरस्भावो न स्यादत आह—**अतिजरसं पश्येति । नाकारान्तसन्निपातकृतमिति ।** किन्तु तदभावेऽप्यजादित्वमस्तीति भावः । एवंच सन्निपातलक्षणविधिं विनाऽपि यस्य प्रवृत्तियोग्यता तत्र नायं न्याय इति तात्पर्यम् । केचित्तु लुकं बाधित्वा अमि कृते सन्निपातलक्षणविधिनिमित्त एव जरसादेश इति न भवत्येव इति द्वितीयैकवचनेऽपि जरस् । पूर्वं तु सर्वतो बलवल्लुक्प्राप्त्या न जरस् । कैयटोक्तार्थे तु न मानम्, अतएव साधारण्येनैव—'अतिजरमिति भवितव्य'मिति भगवतोक्तम् । अतएव टाङसीति सूत्रेऽतिजरेणेत्येव रूपं सन्निपातपरिभाषया कैयटेनोक्तमित्याहुः । एवञ्च तत्र लुक्प्राप्तिचोद्यमप्यर्थात्परिहृतमेवेति भगवता साक्षान्नोक्तः परिहारः । **परेतु** 'अतिजरसं पश्येत्यत्र लुक् कस्मान्न भवती'ति पूर्वपक्षे, परेणा'तिजरसं तिष्ठतीति कुतो नोदाह्रियते' इति प्रश्ने पूर्वपक्षिणा क्रियमाणविशेषोपपादने—'नात्राऽकृतेऽम्भावे जरस्प्राप्नोति, कृते च जरसि न लुकः प्राप्तिः, सन्निपातपरिभाषये' त्युक्तिरनुचिता । तथा सति स्वपूर्वपक्षस्याप्यपगमेनाऽस्त्यत्र विशेष इति प्रतिज्ञाहानेः । तस्मादेवं पाठउचितः—'अस्त्यत्र विशेषो नाकृतेऽम्भावे जरस्प्राप्नोति । किं कारणम्, अचीत्युच्यते । यदा चाम्भावः कृतस्तदा जरस् न प्राप्नोति । सन्निपाते'त्यादि । दृश्यते चातिचिरन्तनपुस्तकेषु तथा पाठः। एवञ्च प्रथमैकवचने इदं रूपमेव दुर्लभमिति भावः । एवं तर्हि द्वितीयैकवचनेऽपि- जरस् न प्राप्नोतीति शङ्कते—**यद्येवमतिजरसमित्यादि ।** उक्त आशयः । सिद्धान्ती इष्टापत्त्या परिहरति—**इष्टमेवैतदित्यादिना ।** एवंच द्वितीयैकवचने लुगापत्तिः समा-

॥*॥ त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः ।
शेषे लोपस्य लोपेन ज्ञायते प्राक्ततोऽदिति ॥*॥

यदयं त्यदादीनामत्वेन सिद्धे युष्मदस्मदोः शेषे लोपं शास्ति तज्ज्ञापयत्याचार्यः–'प्राक्ततोऽत्वं भवतीति, न सर्वेषा'मिति ।

॥*॥ अपि वोपसमस्तार्थमत्वाऽभावात्कृतं भवेत् ॥*॥

नैतदस्ति ज्ञापकम्, उपसमस्तार्थमेतत्स्यात्–अतियूयम् अतिवयम् ।

प्र.] पाठापेक्षमेतत्। किंशब्दस्य तु कादेशेन भवितव्यमिति त्यदादीनामन्तेऽपि किमः पाठे 'किमन्ताना'मिति नोक्तम् । के चित्तु द्विशब्दात्पूर्वं किंशब्दमधीयते । तेन 'किंसर्वनामबहुभ्योऽद्व्यादिभ्य' इति किमो भेदेन ग्रहणं न कर्तव्यं भवति। तत्र भवच्छब्दस्याऽत्वापत्तिर्दोषः। युष्मदस्मदोस्त्वात्वयत्वलोपैरत्वं बाध्यत इति दोषाऽभावः। **शेषे लोपस्य लोपेनेति** । यः शेषे लोपः प्रसिद्धस्तत्संबन्धिना लोपशास्त्रेणेत्यर्थः । क्व चित्तु 'शेषे रूपस्य लोपेने'ति पाठः । तत्राऽयमर्थः–शेषे विषये रूपस्य लोपो विधीयते येन तेन । **ततोऽदिति** । वृत्तपूरणार्थस्तपरनिर्देशः । सूत्रे त्वतपर एवाऽकारो निर्दिष्टः । **अपि चेति**–ज्ञापकत्वं विघटयति । उपसर्जनानां त्यदाद्यत्वाऽभावादुपसर्जनयुष्मदस्मदर्थो लोपः स्यात् । **अतियूयमिति** । त्वामतिक्रान्ता इति

उ.] हिता । किं च 'द्वितीयैकवचने लुकुतो ने'ति प्रश्ने, परेण 'प्रथमैकवचनमपि कुतो नोदाह्रियते' इति शङ्किते पूर्वपक्षिणा–तत्र विशेषे उपपादिते 'यद्येव'मिति ग्रन्थः परस्य पूर्वपक्षिणं प्रतीति स्वरसतः प्रतीयते । अतस्तदुदाहृतद्वितीयैकवचनविषयतैवोचितेति मदुक्तपाठ एवोचित इत्याहुः ॥ [जराया जरस्] ॥

त्यदादीनामः । नन्वत्र पाठेऽस्मदन्तानामित्येव वक्तुं युक्तमत आह—**यद्यपीति** । केचित्तु 'भवतुयुष्मदस्म'दिति पाठाश्रयेणेदं भाष्यमित्याहुः। **अत्यन्तेति** । युष्मदस्मद्भ्यामित्यादौ । नन्वन्ते किमः पाठात्किमन्तानामिति वक्तुमुचितमत आह–**किंशब्दस्य त्विति** । नन्वेवमपि भवदन्तानामित्ययुक्तम् , अग्रे कस्याप्यभावे एवाऽन्तशब्दप्रयोगात् । अत्र च किंशब्दोऽग्रेऽस्ति, 'भवत्पर्यन्ता'नामिति वक्तुं युक्तम् । अत एव वार्तिके परिशब्दोच्चारणमत आह—**केचित्त्विति** । तन्मतानुसारेण तथोक्तमिति भावः । वार्तिकानारम्भे दोषं दर्शयति–**तत्रेति** । ननु 'लोपस्य लोपेने'त्ययुक्तं, लोपस्य लोपान्तराऽभावादत आह—**यः शेष इति** । लोपशब्देन तद्विधायि शास्त्रं लक्ष्यत इत्यर्थः । **वृत्तपूरणार्थ इति** । चिन्त्यमेतत् । 'ततोऽइती'ति पाठेऽपि वृत्तपूरणात् । 'मुखसुखार्थ' इति वक्तुमुचितम् । **सूत्रे त्वतपर एवेति** । ननु वार्तिकदर्शनेन सूत्रे तपरपाठ इति भ्रमितव्यमित्यर्थः । भाव्यमानस्य सवर्णाऽग्राहकत्वेन तपरत्वे फलाऽभावादिति तात्पर्यम् । **अपि** चेति दर्शनादुक्तेऽर्थे हेत्वन्तरत्वभ्रमं वारयति–**विघटयतीति** । 'अपिचे'ति पादपूरणार्थमिति भावः । **उप-**

उपसमस्तानां हि त्यदादीनामत्वं नेष्यते,—अतितत् अतितदौ अतितदः ॥

॥*॥ टिलोपष्टाबभावाऽर्थः कर्तव्य इति तत्स्मृतम् ॥*॥

यस्तु शेषे लोपष्टिलोपः स वक्तव्यः ॥ किं प्रयोजनम् ? ॥ 'टाप्प्रतिषेधार्थम्' । टाम्मा भूदिति ॥ स तर्हि टिलोपो वक्तव्यः ? ॥ न वक्तव्यः ।

॥*॥ अथ वा शेषसप्तम्या शेषे लोपो विधीयते ॥*॥

इह युष्मदस्मदोर्लोप इतीयताऽन्त्यस्य लोपः सिद्धः, सोऽयमेवं सिद्धे सति यच्छेषग्रहणं करोति तस्यैतत्प्रयोजनम्–'अवशिष्टस्य लोपो यथा स्या'दिति ।

प्र.]प्रादिसमासः । **टिलोप इति ।** अत्वे सति टाप्प्रसङ्गात्तदभावार्थः शेष लोपष्टिलोपः सति प्रयोजने न ज्ञापकम् । 'अलिङ्गे युष्मदस्मदी' इत्यनभ्युपगम्यैतदुच्यते । एकपदवाच्यस्याप्यर्थस्य शब्दान्तराभिव्यङ्ग्यत्वं दृश्यते 'अश्वस्त्वं ग्राम'मिति,–लिङ्गवत्त्वं कैश्चित्तयोरभ्युपगतम् । अत एव 'नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा' इति विप्रतिषेधः पठितः।, 'न षट्स्वस्रादिभ्य' इति च स्त्रीप्रत्ययनिषेधः षड्भ्यः कृतः । **स तर्हीति ।** नन्वत्वेन सिद्धत्वाद्वचनाट्टिलोपो भविष्यति । नैतदस्ति । सर्वादेशः स्यात् । उपसर्जनस्य चाऽत्वाऽसिद्धिरुक्ता । **अथ वेति ।** उक्तमेतल्लोपमुत्सर्गं विधायानादेशे हलादावात्वमजादौ तु यत्वमपवादो विधास्यत इति शेषग्रहणं विभक्तिविशेषणाऽर्थमनर्थकं तत्,–क्रियते लोपस्य विषयार्थं, मपर्यन्ताद्योऽन्यः स शेषः स च टिरेव। तस्य लोपस्य स्थानी विषयसप्तम्या निर्दिष्टः। नन्वेवं तव ममेत्यादावादेशेषु(कृतेषु)मपर्यन्ताभावात्तदपेक्षया अच्छब्दस्य शेषव्यपदेशाभावाल्लोपाऽभावप्रसङ्गः। नैष दोषः।प्रागादेशविधानादच्छब्दःशेषत्वेन परिच्छिन्नइतिपरिच्छेदायोपादानादतन्त्र-

---

उ.]**सर्जनानामिति ।** तेषां पाठादेव पर्युदासादितिभावः । भाष्ये प्रयोजनान्तरमाह–**टिलोप इति ।** मपर्यन्ताच्छेषविज्ञानं । शेष इति च स्थानिनोऽधिकरणत्वविवक्षया सप्तमीति भावः । नन्वहं ब्राह्मण इत्यादौ पदान्तरसमभिव्याहारादेव लिङ्गप्रतीत्युपपत्तौ किमर्थं तेषां लिङ्गवत्त्वाभ्युपगमः?।पदान्तरसमभिव्याहारं विना प्रतीतेरयुक्तश्चेत्यत आह–**एकपदेति । अश्वस्त्वमिति ।** त्वं ग्रामं गतवानित्यर्थः । श्वयतेर्लुङि मध्यमपुरुषैकवचनं।यद्यप्यश्व इत्येतदेव क्रियावाचि तथापि तस्य जातिविशेषरूढत्वात्पदान्तरसमभिव्याहारादेव तत्त्वव्यक्तिः । एवं सत्त्वभूतस्याऽर्थस्य लिङ्गवत्त्वाऽव्यभिचारादेतावेव लिङ्गाभिधायिनौ। किन्तु शब्दान्तरप्रयोग एव तदभिव्यक्तिर्नान्यथा, रूपस्य साधारणत्वादिति भावः। **न षडिति**–दृष्टान्तार्थं। भाष्ये–**स तर्हि वक्तव्य इति ।** टिग्रहणं कर्तव्यमित्यर्थः । तत्र तद्विनाऽपि सामर्थ्यात्तल्लोपो भविष्यतीति शङ्कते–**नन्विति।** 'न वक्तव्य' इत्यत्र भाष्ये हेतुः–**अथवेति।** 'यत' इत्यर्थः । निपातानामनेकार्थत्वात् । वार्तिकस्थ'शेषसप्तम्ये'त्यस्य शेषार्थपर्यवसायिन्या सप्तम्येत्यर्थः । तदाह—**विषयसप्तम्येति । आदेशेषु कृतेष्विति ।** परत्वादिति भावः। **प्रागादेशेति।** सांप्रतिकाऽभावे भूतपूर्वगतिराश्रीयत इत्यर्थः। यद्यपि युष्मभ्य-

॥*॥ लुप्तशिष्टे हि तस्याहुः कार्यसिद्धिं मनीषिणः ॥

एवं तह्याचार्यप्रवृत्तिर्ज्ञापयति–'न सर्वेषां त्यदादीनामत्त्वं भवती'ति यदयं–'किमः कः' इति कादेशं शास्ति । इतरथा हि 'किमोऽद्भवती'त्येव ब्रूयात् ॥ सिद्धे विधिरारभ्यमाणो ज्ञापकार्थो भवति, न च किमोऽत्वेन सिध्यति । अत्वे हि सत्यन्त्यस्य प्रसज्येत ॥ सिद्धमन्त्यस्य पूर्वेणैव, तत्रारम्भसामर्थ्यादिकारस्य भविष्यति ॥ कुतो नु खल्वेतत्–अनन्त्यार्थं आरम्भे

प्र.] त्वंमपर्यन्तस्य । **लुप्तशिष्टे हीति** । लुप्ते यःशिष्टस्तस्मिन्कार्यस्य टाबभावस्य सिद्धिः। तवममादिषु चादेशेष्वकार उच्चारणार्थो, हलन्ता एव त्वादेशा इति न क चिट्टाप्प्रसङ्गः । **यदयमिति** । 'किंसर्वनामबहुभ्य' इति किम्शब्दस्य भेदेनोपादानाद्धिशब्दात्परः किम्शब्दो गणे पठ्यत इति निर्णयः । यदि च द्विशब्दात्परेषामत्वं स्यात्किमः कं न विदध्यात्, 'किम' इत्येव ब्रूयात् । पूर्वसूत्रादकारस्यानुवृत्त्या पूर्वेणान्तस्याऽत्वे कृते इकारस्य तु 'किम' इत्यनेन, द्वयोरकारयोः पररूपेण क इत्यादेः सिद्ध-

---

उ.] मित्यत्राऽभ्यम्पक्षे सांप्रतिकसंभवस्तथापि नैकमुदाहरणं योगारम्भं प्रयोजयतीति भावः । **लुप्तशिष्टे हीति** भाष्येण–पूर्वोक्तार्थस्यैव समर्थनं, तदाह–**लुप्ते य इति** । '**मनीषिण** आचार्यस्य **तस्य** शेषग्रहणस्य फलमाहु'रित्यन्वयः । **कार्य**शब्देन प्रकृतत्वाट्टाबभाव एवोच्यत इत्याह—**टाबभावस्येति** । नन्वेवं तवाद्यादेशे परत्वादाङ्गत्वाच्च पररूपात्पूर्वं टिलोपे टाबापत्तिरस्त्येवेत्यत आह–**तवममादिषु चेति** । 'त्वाहौ सा'विति गुरुनिर्देशस्तु 'श्वेतवहोक्थश'सितिवन्नार्थसाधक इति भावः । नचैवं ण्यन्तात्क्विपि 'युष्म्' इति प्रातिपादिकस्य तवाद्यादेशे शेषे लोपस्याऽन्त्यलोपत्वे वकारादिलोपे त्वं तवेत्यादिमपर्यन्तसूत्रकैयटोक्तरूपाऽसिद्धिः, तं तेत्याद्यापत्तिश्चेति वाच्यं, मपर्यन्तस्तत्र शेषे कैयटोक्ते केचिन्मते दोषाऽभावात् । अत्रत्यकैयटात्तदेव ग्रन्थकृदभिमतमिति लक्ष्यते । वस्तुतः सन्निपातपरिभाषया टाब्वारयितुं शक्यः । न च 'न यासयो'रिति लिङ्गाट्टाब्विषये न सेति वाच्यं, त्यदाद्यत्वविषयेऽनित्यत्वमात्रकल्पनेऽपि टाब्विषये सर्वथाऽप्रवृत्तिकल्पने मानाऽभावात् । अतएव 'बुद्धा'वित्यादौ टाब्व्यावृत्तिः सन्निपातपरिभाषया भाष्ये 'कृन्मेजन्त'सूत्रे उक्ता । इदमेव 'आहु'रित्यत्र भाष्येऽरुचिबीजमित्याहुः । ननु केषाञ्चिन्मते द्वेः पूर्वं किमः पाठात्कथं ज्ञापकत्वमत आह—**किंसर्वनामेति** । अन्यथा'ऽद्यादिभ्य इति पर्युदासाऽभावात्किंशब्दो न सूत्रे पठनीयः स्यादिति भावः । **किम इत्येवेति** । भाष्ये तु 'किमोऽ'दित्यधिकारसिद्धोऽर्थो दर्शितः । **किम इत्यनेनेति** । 'अत्वे कृते' इत्यनुषङ्गः। **प्रयोजनाभावादिति** । यद्यप्यदमुयङ्ङित्यादिप्रयोजनानि सन्त्येव, तथापि तदनाश्रित्येयमेकदेश्युक्तिः। प्रकारान्तरेणाऽस्य ज्ञापकस्य खण्डनाच्च सिद्धान्तिनस्तदनादरः। भाष्ये–**यत्तर्हि किम इति** । पूर्वं–'किम' इत्येव सूत्रं कार्यं, विशिष्टादेशविधानं ज्ञापकमित्युक्तम् । इदानीं तु–'किम' इत्यंशोऽपि ज्ञापकमित्युच्यते इति

सतीकारस्य भविष्यति न पुनः ककारस्य स्यात् ? ॥ यत्तर्हि किमो ग्रहणं करोति । इतरथा हि 'कादद्भवती'त्येव ब्रूयात् ॥ एवमपि ककारमात्रात्परस्य प्राप्नोति ॥ 'त्यदादीना'मिति वर्तते, न चाऽन्यत्किमस्त्यदादिषु ककारवदस्ति॥ एवमप्यनैकान्तिकं ज्ञापकम् । एतावत्तु ज्ञाप्यते—'न सर्वेषां त्यदादीनामत्त्वं भवती'ति ; तत्र कुत एतद्–'द्विपर्यन्तानां भविष्यति न पुनर्युष्मदस्मद-दन्तानां वा स्याद्भवदन्तानां वा' !॥ किञ्चाऽवश्यं खल्वप्युत्तरार्थं किमो ग्रहणं कर्तव्यं–'कु तिहोः' 'क्वाती'ति ॥ कादेशः खल्वप्यवश्यं साकच्कार्थो वक्तव्यः—कः कौ के इत्येवमर्थम् । तस्माद्द्विपर्यन्तानामत्त्वं वक्तव्यम् ॥

॥*॥ त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः ।
शेषे लोपस्य लोपेन ज्ञायते प्राक्ततोऽदिति ॥ १ ॥
अपि वोपसमस्तार्थमत्वाऽभावात्कृतं भवेत् ।
टिलोपष्टाबभावार्थः कर्तव्य इति तत्स्मृतम् ॥ २ ॥
अथ वा शेषसप्तम्या शेषे लोपो विधीयते ॥
लुप्तशिष्टे हि तस्याहुः कार्यसिद्धिं मनीषिणः ॥ ३ ॥*॥

प्र.] त्वात् । **न पुनःककारस्येति**। 'अनन्त्यविकारेऽन्त्यसदेशस्ये'ति (तु) परिभाषा प्रयोजनाऽभावात्प्रत्याख्याता । **कादद्भवतीति**। ककारेऽकार उच्चारणार्थः। 'का'-दित्येतावत्सूत्रं क्रियते । अकारस्तु पूर्वसूत्रादनुवर्तते । स चादेः परस्येति इका-रस्य भवति । मकारस्य तु पूर्वेण । **ककारमात्रादिति** । 'कृकवाकु'रित्यादावपि । **न चान्यदिति** । यद्यपि सर्वाणि त्यदादीन्यकचा ककारवन्ति, तथापि तेषां कात्परोऽ-कार एवेति नास्ति विशेषः। 'द्वकि'शब्दस्य तु त्यदाद्यत्वं भवत्येव । **एवमपीति** । विशेषस्य निश्चेतुमशक्यत्वात्प्रमाणाऽभावात् । **साकच्कार्थ इति** । सर्वस्य साक-च्कस्य कादेशो यथा स्यादित्येवमर्थं 'किमः क' इति कर्तव्यम् । तेनाऽज्ञाताऽर्थविव-क्षायां 'क' इत्येव भवति, न तु 'कक' इति भवति । ननु निर्दिश्यमानस्यादेशा भवन्तीति साकच्कस्य कादेशो न प्राप्नोति । न च शक्यं वक्तुं 'किमः क इति वचनसामर्थ्याद्भवती'ति, 'किम' इति स्थानिनिर्देशस्योत्तरार्थत्वात् । एवं तर्हि तन्त्रा-श्रयणात्साकच्कस्यापि भवतीत्यदोषः । [**त्यदादीनामः**] ॥

उ.] विशेषः। ननु किम्शब्दे कशब्दोऽप्रसिद्धोऽत आह–**ककारेऽकार इति**। **क इत्ये-वेति** । प्रकरणादिवशाच्चाऽर्थविशेषावगतिरिति भावः। **तन्त्राश्रयणादिति** ।केचित्तु 'इम' इत्येव सूत्रं कार्यं, 'त्यदादीना'मित्यनुवर्तनाच्च नाऽतिप्रसङ्गः । सामर्थ्याच्च 'द्विपर्यन्ताना'मित्यस्याऽत्र त्यागः। 'नानर्थके' इति निषेधान्नाऽलोन्त्यविधिः।अकार-प्रश्लेषेणाऽनेकाल्त्वाद्वा सर्वादेशः । 'इमौ'इत्यादौ तु न,'अङ्गकार्ये' इति निषेधात्। 'कुति होः' 'क्वाती'त्यत्रापि 'उतिहोः' 'अती'त्येव पाठ्यम् । अङ्गवृत्तपरिभाषया

क्काऽति ॥ ७।२।१०५ ॥

किमर्थं क्कादेश उच्यते न 'कुतिहोस्त्वि'त्येवोच्येत॥का रूपसिद्धिः क्व?॥ यणादेशेन सिद्धम् ॥ न सिध्यति–ओर्गुणः प्रसज्येत ॥ [क्काति] ॥

तदोः सः सावनन्त्ययोः ॥ ७।२।१०६ ॥

किमर्थमनन्त्ययोरित्युच्यते ?॥ अन्त्ययोर्मा भूदिति ॥ नैतदस्ति प्रयोजनम् , अत्वमन्त्ययोर्बाधकं भविष्यति ॥ अनवकाशा विधयो बाधका भवन्ति, सावकाशं चाऽत्वम् ॥ कोऽवकाशः ? ॥ द्विशब्दः ॥

सत्वमपि सावकाशम् ॥ कोऽवकाशः ? ॥ अनन्त्यैः ।

प्र.] क्काति । **किमर्थमिति** । कुभावे कृते 'अङ्गवृत्त' इति वचनादोर्गुणो न भवति । यणादेशस्त्वनाङ्गत्वाद्भविष्यतीति भावः । **न सिध्यतीति** । निष्ठितस्य दुर्ज्ञानत्वात् ॥

तदोः । **किमर्थमिति** । विशेषणविशेष्यभावे कामचारात्त्यदादीनां च द्विपर्यन्तानां मध्ये तकारान्तस्य कस्य चिदसंभवात्त्यदादिभिर्विशेषितयोस्तदोः सत्वं विधीयमानमनन्त्ययोः सावकाशमन्त्ययोरत्वेन बाधिष्यत इति प्रश्नः । **अन्त्ययोरिति** । परत्वात्प्राप्नोति। तकारस्यान्त्यस्याऽसंभवेऽपि सूत्रे द्वयोरुपादानादन्त्ययोरित्युक्तम् । **नैतदस्तीति**–पूर्वविप्रतिषेधमाश्रित्य चोदयति । **द्विशब्द इति** । उदाहरणमात्रमेतत् । अन्यत्र सोः सर्व एव त्यदादयोऽवकाशाः । **सत्वमपीति** । उभयोः सावकाशयोः परत्वात्सत्वप्रसङ्गः । **कथं पुनरिति**–आचार्यदेशीयः शिष्यबुद्धिपरिज्ञानाय पृच्छति । समुदायावयवसन्निधौ (तु) उभयोरनुग्रहायावयवेन समुदायो विशेष्यते । एवं हि समुदायस्यापि कार्येण संबन्धः प्रतिपादितो भवति । 'अलोन्त्यस्ये'ति वचनादवयवस्यापि । **भवेदिति** । व्याप्तिन्यायाश्रयणात्तकारान्ताऽसंभवाच्च त्यदादिभिस्तदौ विशे-

---

उ.] 'क्के'त्यत्र गुणो न । एवं सिद्धे 'किमः क' इति सूत्रकरणान्निर्दिश्यमानपरिभाषाबाध इति, तन्न, 'उति हो'रित्याद्युकारस्यान्त्यादेशत्वापत्तेः । तदर्थं 'नानर्थके' इति वचनारंभे तु विपरीतं गौरवम् । अङ्गवृत्तपरिभाषाया लक्ष्यसिध्यर्थत्वाऽभावाच्च । तस्मात्कैयटोक्तमेव सम्यक् । अनित्यत्वेन वा तत्परिभाषाऽप्रवृत्तिर्बोध्या ॥

क्काति । ननु वार्णादाङ्गपरिभाषया यणं बाधित्वौर्गुणः स्यादत आह–**कुभावेति**।

तदोः सः सौ । नन्वन्त्यव्यावृत्त्यर्थमनन्त्ययोरिति स्यादत आह—**विशेषणेति** । हेत्वन्तरमाह—**त्यदादीनाञ्चेति** । **बाधिष्यत इति** । पूर्वविप्रतिषेधाश्रयेणेति भावः । **परत्वात्सत्वप्रसङ्ग इति** । पूर्वविप्रतिषेधाश्रयणन्तु गुर्विति भावः ।

ननु 'तदो'रित्येतदङ्गविशेषणमिति पूर्वपक्षिसिद्धान्तिनोर्द्वयोरप्यसंमतमिति कस्येदं वाक्यमत आह–**आचार्यदेशीय इति**। 'तदो'रित्यस्याङ्गविशेषणत्वमेव युक्तमिति तदाशयमाह—**समुदायावयवेति** । चोदकीय–'भवेद्' इत्यादेराशयमाह—**व्याप्तिन्यायेति** । **अथवे**त्यादि पक्षद्वयेऽपि **कथं नपुरि**त्यादिग्रन्थः सिद्धान्तिन

कथं पुनः सत्यन्त्येऽनन्त्यस्य सत्वं स्यात् ?॥ भवेद्यस्तकारदकाराभ्यामङ्गं विशेषयेत्तस्याऽनन्त्ययोर्न स्याद्वयं तु खल्वङ्गेन तकारदकारौ विशेषयिष्यामः ॥ एवमप्युभयोः सावकाशयोः परत्वात्सत्वं प्राप्नोति ॥ किं च स्याद्यद्यन्तयोः सत्वं स्यात् ?॥ इह 'हे स' इति ; 'एङ्ह्रस्वा'दिति संबुद्धिलोपो न स्यात् । इह च 'या' 'सा' ; 'अत' इति डान्न स्यात् । तस्मादनन्त्ययोरिति वक्तव्यम्॥ न वक्तव्यम् ॥ एवं वक्ष्यामि-'तदोः सः सौ' । ततो'ऽदसः' । अदसश्च दकारस्य सो भवतीति ॥ इदमिदानीं किमर्थम् ? ॥ नियमार्थम्-'अदस एव दकारस्य नान्यस्य दकारस्ये'ति ॥ यदि नियमः क्रियते-द्वीयतेरप्रत्यये 'द्व' इति प्राप्नोति 'स्व' इति चेष्यते ॥*॥ यथालक्षणमप्रयुक्ते ॥*॥ [तदोः स सौ] ।

प्र.]ष्येते । एवमपीति-सिद्धान्तवादी । 'अथ वा सत्वमपी'ति चोदकस्य ग्रन्थः। स च पूर्वविप्रतिषेधं मन्यते । कथं पुनरिति—चोदकमाचार्यो बुद्धिपरीक्षार्थं पर्यनुयुङ्क्ते । भवेदिति-चोदकः । एवमपीत्याचार्यः । 'अथ वा कथं पुन'रित्यस्यायमर्थः- अनन्त्यस्यैव कथं सत्वं लभ्यते यावता अन्त्यस्यापि परत्वात्प्राप्नोति ?। चोदकस्त्वगृहीताभिप्राय आह-भवेदिति । आचार्यः स्वाभिप्रायमाह-एवमपीति । किं च स्यादिति । अन्त्यस्यापि दस्य सत्वे हल्ङ्यादिलोपेन सिध्यतीति मत्वा प्रश्नः । लोपो न स्यादिति । सत्वे सति ह्रस्वान्तत्वाऽभावात् । ननु त्यदाद्यत्वेऽपि कृते सन्निपातपरिभाषया संबुद्धिलोपाऽप्रसङ्गः । अनित्यत्वादस्याः परिभाषाया नाऽयं दोषः । इह चेति । 'न यासयो'रिति लिङ्ग आश्रीयमाणेऽनेकोऽर्थः कल्पनीयः स्यात् । ततोऽदस इति । तत्र 'तदोः सः सा'विति वर्तते । तकारोऽसंभवात्त्यज्यते । द्वीयतेरिति । द्वाविच्छतीति द्वीयति । ततः क्विप् । अकारयकाराऽपृक्तलोपाः । ततः सावीकारस्य त्यदाद्यत्वे सति 'स' इति भवति । तदभावे तु 'द्व' इति प्राप्नोति । यथालक्षणमिति । उपसर्जनत्वान्नावश्यं त्यदादिकार्येण भाव्यमिति द्वीरित्येव भवति । अथ वा प्रयुक्तानामन्वाख्यानारम्भाद्विशब्दस्य च क्यजन्तस्य क्विपि प्रयोगाभावान्न केनचिल्लक्षणेन प्रवर्तितव्यम् । [तदोः ससौ]॥

उ.]एवेति विशेषः । तृतीये वक्ष्यमाणमाशयं हृदि निधाय सिद्धान्ती पर्यनुयुङ्क्ते इति द्वितीयाद्विशेषः । अनन्त्यस्यापि । अपिना-अन्त्यस्यापि । सन्निपातेति । प्रत्ययलक्षणेन तु न सन्निपातः, तस्याऽशास्त्रीयत्वादिति भावः । अनेकोऽर्थ इति । अत्र विषये सत्वं बाधित्वाऽत्वं सन्निपातपरिभाषाऽनित्यत्वं चेत्यर्थः । उपसर्जनत्वादिति । 'स्व इतिचेष्यत' इत्युक्तिः पूर्वपक्ष्येकदेशिन इति न तद्बलेनोपसर्जनत्वेऽप्यत्वादिप्रवृत्तिरिति भ्रमः कार्यः । सर्वादिसूत्र-त्यदादीनाम इति सूत्रस्थभाष्यविरोधादिति भावः । अथवेति । अप्रयुक्ते प्रवृत्त्यभावो हि लक्षणस्वभाव इति भावः । [तदोः सः] ।

अदस औ सुलोपश्च ॥७।२।१०७ ॥

अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते ? ॥*॥ **अदस एव सोर्भवेदौत्वं, किमर्थं सुलोपो विधीयते ?**॥*॥ ह्रस्वाल्लुप्येत संबुद्धिः॥*॥ **इह 'हे असा'विति 'एङ्ह्रस्वात्संबुद्धे'रिति लोपः प्रसज्येत** ॥ * ॥ न हलः ॥ * ॥ **हलो लोपः संबुद्धिलोपः ॥ तद्धल्ग्रहणं कर्तव्यम् ॥ न कर्तव्यम् ?** ॥ * ॥ प्रकृतं हि तत् ॥ * ॥ **प्रकृतं हल्ग्रहणम् ॥ क्व प्रकृतम् ? ॥ 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं ह'लिति ॥ तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः ॥ 'ह्रस्वा'दित्येषा पञ्चमी 'ह'लिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति—'तस्मा-दित्युत्तरस्ये'ति** ॥*॥ आप एत्वं भवेत्तस्मिन् ॥*॥ **इह हे असौ ब्राह्मणि ! । 'आङि चापः—संबुद्धौ चे'त्येत्वं प्रसज्येत** ॥*॥ न झलीत्यनुवर्त्तनात् ॥*॥ **[नैष दोषः] । झलीति तत्रानुवर्त्तते ॥ क्व प्रकृतम् ?॥'सुपि च बहुवचने झल्ये'-दिति ।** ॥*॥ प्रत्ययस्थाच्च कादित्त्वम् ॥*॥ **इह च असकौ ब्राह्मणीति प्रत्य-यस्थात्कात्पूर्वस्येतीत्त्वं प्रसज्येत ॥ नैष दोषः । प्रश्लिष्टनिर्देशोऽयम्— 'आ–आप्–आ'विति ॥ इहापि तर्हि न प्राप्नोति—कारिके हारिके इति ॥**

प्र.] अदसः । अदस इति । अदसः परस्य सोरेवौत्वं विधीयताम् । तत्र त्यदा-द्यत्वे 'वृद्धिरेची'ति वृद्धौ चासाविति सिध्यति। **ह्रस्वादिति।** यदि त्यदाद्यत्वं क्रियते तदा ह्रस्वान्तत्वात्संबुद्धिलोपप्रसङ्गः । तस्मादौत्वसुलोपौ विधीयेते। **न हल इति ।** नाऽयं दोषो यस्मादसौ हलो लोपो विधीयते । तेनोकारस्य न भविष्यति । **हे असाविति ।** अत्वे टापि च सति वार्णादाङ्गं बलीय इति 'वृद्धिरेची'ति वृद्धिमेकादेशं बाधित्वा 'आङि चाप' इत्येत्वं प्राप्नोति । **प्रश्लिष्टनिर्देशोयमिति ।** आकाररूपो यः श्रूयते आप् , तत्रेत्वं भवति । इह तु वृद्धौ कृतायामौकाररूपम् । **कारिकेति ।** 'औङआप' इति शीभावे आद्गुणे च कृते एकारः श्रूयत इति इत्वञ्च प्राप्नोति । संबुद्धौ वा 'कारिके' इति रूपम् । ननु चाऽत्राऽन्तरङ्गत्वात्प्राक् सुबुत्पत्तेरित्वं भवि-ष्यति, 'असका'वित्यत्र तु प्राक् सुबुत्पत्तेष्टाब्नास्ति । एवं तर्हि टापि कृत एकादे-शात् पूर्वं वार्णादाङ्गं बलीय इति इत्वं प्राप्नोतीत्याकाररूप एवाबिति किं प्रश्लिष्टनिर्दे-शेन ?। तस्मात्सामर्थ्याद्यथा'वार्णादाङ्ग'मिति बाधित्वा एकादेशो भवत्येवं 'कारिके'

उ.] अदस औ । सोरेवेति । 'अदस औ' इत्येव सूत्रं कार्यं, पूर्वतोऽनुवृत्तस्य सावित्यस्याऽदस इति पञ्चम्या षष्ठी कल्प्येति भावः । **आङि चाप इत्येत्वमिति ।** तत्रानुवर्त्तमाने 'संबुद्धौ चे'त्येवमित्यर्थः । **इति रूपमिति ।** एवञ्च प्रश्लेषो वक्तुम-शक्य इति भावः। **नन्विति।** एवञ्च 'कारिके' इत्यादावित्वाऽप्राप्तिदोषो न प्रश्लेषेऽ-पीति भावः । **तस्मात्सामर्थ्यादिति ।** प्रश्लिष्टनिर्देशसामर्थ्यादित्यर्थः । 'अन्तर-ङ्गत्वात्पूर्व'मिति पाठः । अन्तरङ्गादपीत्वात्पूर्वमित्यर्थः । तस्माद्दोषवान् प्रश्लेष इति

॥*॥ शीभावश्च प्रसज्यते ॥ * ॥ **इह च शीभावः प्राप्नोति—असौ ब्राह्मणी ॥ 'आप उत्तरस्यौङः शी भवती'ति शीभावः प्राप्नोति । तस्मात्सोर्लोपो वक्तव्यः** ॥*॥ सावौत्वप्रतिषेधः साकच्काद्वा सादुत्वं च ॥*॥ **सावौत्वप्रतिषेधः साकच्काद्वा वक्तव्यः। साच्च परस्य उत्वं वक्तव्यम् । असकौ असुकः।**
॥*॥ उत्तरपदभूतानामादेश उपदेशिवद्वचनम्[अनादिष्टार्थम्]॥*॥ **उत्तरपदभूतानां त्यदादीनामादेश उपदेशिवद्भावो वक्तव्यः । परमाहं परमायं परमानेन॥ किं प्रयोजनम् ? ॥ 'अनादिष्टार्थम्' । अकृते एकादेशे आदेशा यथा स्युरिति । किं पुनः कारणम्—एकादेशस्तावद्भवति न पुनरादेशाः?, न परत्वादादेशैर्भवितव्यम् ?** ॥*॥ बहिरङ्गलक्षणत्वात् ॥*॥ **बहिरङ्गा आदेशाः, अन्तरङ्ग एकादेशः—**'असिद्धं बहिरङ्गमन्तरङ्गे' **॥ स तर्ह्युपदेशिवद्भावो वक्तव्यः ? ॥ न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति—'पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश' इति,—यदयं 'नेन्द्रस्य परस्ये'ति प्रतिषेधं शास्ति ॥ कथं कृत्वा ज्ञापकम् ?॥ इन्द्रे द्वावचौ, तत्रैको 'यस्ये'ति लोपेनापह्रियतेऽपर एकादेशेन, अनच्क इन्द्रः संवृत्तस्तत्र को वृद्धेः प्रसङ्गः ? । पश्यति त्वाचार्यः—'पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति नैकादेश' इति,—ततो 'नेन्द्रस्य परस्ये'ति प्रतिषेधं शास्ति॥**

॥*॥ अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते ? ॥
हस्वाल्लुप्येत संबुद्धिर्न हलः प्रकृतं हि तत् ॥
आप एत्वं भवेत्तस्मिन्न झलीत्यनुवर्तनात् ।
प्रत्ययस्थाच्च कादित्त्वं शीभावश्च प्रसज्यते ॥*॥

प्र.]इत्यत्रापि अन्तरङ्गत्वात्पूर्वं विभक्तितन्निमित्तकार्यप्रसङ्गः। **शीभावश्चेति**। 'औङ' इति वचनादौकारस्य यदा ङिदादेशानुमानं वर्णमात्रनिर्देशो वा, ङकारस्तूच्चारणार्थस्तदा शीभावप्रसङ्गः । यदा तु पूर्वसूत्रेण निर्देशस्तदा प्रथमाद्वितीयाद्विवचनयोरेव शीभावेन भाव्यमिति दोषाऽभावः । इत्वमपि प्रश्लेषनिर्देशेन शक्यं परिहर्तुम् । नच 'कारिके' इत्यत्र दोषः, समानकालप्राप्तिकमेव ह्येकादेशमित्वं प्रतीक्षते न तु भिन्नकालप्राप्तिकम् ।**साकच्कादिति** । साकच्कायः सुर्विहितः तस्मिन्नित्यर्थः। प्रतिषेधसन्नियोगेन सात्परस्याऽकारस्योत्वं भवति । **बहिरङ्गा आदेशा इति** । समासाद्या विभक्तिरुत्पद्यते तदपेक्षत्वात् । ततोऽन्तरङ्गत्वादेकादेशे कृते तस्यादिवद्भावादादेशेषु क्रियमाणेषु परमहं परमयमित्यादिरनिष्टप्रसङ्गः । [**अदस औ सुलोपश्च**] ॥

उ.]भावः । किञ्चैवं प्राप्तजीविक इत्यसिद्ध्याऽपि तत्र प्रश्लेषो वक्तुमशक्यः । भाष्ये—**'इह च शीभाव'** इति। चस्त्वर्थे।**तदा शीभावेति** । औत्वं तु पुंसि चरितार्थम् । 'इत्वमपी'त्यादिग्रन्थस्तु चिन्त्य, उक्तयुक्तेः । [**अदस औ**] ॥

मृजेर्वृद्धिः ॥ ७।२।११४ ॥

॥ * ॥ मृजेर्वृद्धिविधौ क्ङिप्रतिषेधः ॥ * ॥ **मृजेर्वृद्धिविधौ क्ङयन्तस्य प्रतिषेधो वक्तव्यः । कंशपरिमृड्भ्यां कंशपरिमृड्भिः ।** ॥*॥ धातोः स्वरूपग्रहणे वा तत्प्रत्ययविज्ञानात्सिद्धम् ॥*॥ **अथ वा धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धम् । 'धातुप्रत्यये कार्यं भवती'त्येषा परिभाषा कर्तव्या ॥**

कान्येतस्याः परिभाषायाः प्रयोजनानि ? ॥*॥ प्रयोजनं सृजिदृशिमस्जिनशिहन्तिगिरत्यर्थम् ॥*॥ सृजि–**रज्जुसृड्भ्याम् रज्जुसृड्भिः । सृजि** ॥ दृशि-**देवदृग्भ्याम् देवदृग्भिः । दृशि** ॥ मस्जि—**उदकमग्भ्याम् । उदकमग्भिः । मस्जि** ॥ नशि–**प्रणड्भ्यां प्रणड्भिः । नशि** ॥ हन्ति–**वार्त्रघ्नः । भ्रौणघ्नः । हन्ति** ॥ गिरति—**देवगिरौ देवगिरः । [गिरति]** ॥ **यदि स्वरूपग्रहण इत्युच्यते–प्रसृग्भ्यां प्रसृग्भिः । 'अनुदात्तस्य चर्दुपधस्यान्यतरस्या'मित्यम् प्राप्नोति । एवं तर्हीयं परिभाषा कर्तव्या–'धातोः कार्यमुच्यमानं तत्प्रत्यये भवती'ति ॥ सा तर्ह्येषा परिभाषा कर्तव्या ? ॥ न कर्तव्या ।** आचार्यप्रवृत्ति-**र्ज्ञापयति—भवत्येषा परिभाषा यदयं भ्रौणहत्ये तत्वं शास्ति** ॥ [मृजेर्वृद्धिः] ॥

अचो ञ्णिति ॥ ७।२।११५ ॥

अज्ग्रहणं किमर्थम् ? ॥*॥ वृद्धावज्ग्रहणं गोऽर्थम् ॥*॥ **वृद्धावज्ग्रहणं**

प्र.] **मृजेः । कंसपरिमृड्भ्यामिति ।** विभक्तिमाश्रित्य वृद्धिः प्राप्नोति । 'क्ङिति चे'ति प्रतिषेधः क्ङिन्निमित्ताया एव वृद्धेरित्यत्र न प्रवर्तते । **रज्जुसृड्भ्यामिति ।** प्रत्ययो झलादिरकिद्भवतीत्यमागमप्रसङ्गः । **प्रणड्भ्यामिति ।** 'नशेर्वे'ति कुत्वमप्यत्र न भवतीति केचिदाहुस्तदयुक्तम् , पदत्वनिबन्धनत्वादस्य प्रत्ययानपेक्षणात् । 'मस्जिनशोर्झली'ति नुमागमस्तु प्रत्ययाऽपेक्षत्वादधातुप्रत्यये न भवति । **वार्त्रघ्न इति ।** 'हनस्तोऽचिण्णलो'रिति तत्वं न भवति । 'कुमति चे'ति णत्वं 'कुव्यवाये हादेशेषु प्रतिषेध' इति न भवति । **देवगिराविति ।** 'अचि विभाषे'ति लत्वं न भवति । **अम्प्राप्नोतीति ।** तद्विधौ धातोः स्वरूपेणानुपादानात् । [**मृजेर्वृद्धिः**] ।

अचो ञ्णिति । अज्ग्रहणमिति । अन्तरेणाऽज्ग्रहणमिक्परिभाषोपस्थानादि-

---

उ.] **मृजेर्वृद्धिः ।** नन्वत्र प्रत्ययलक्षणेन कित्परत्वान्निषेधः स्यादत आह—**विभक्तिमाश्रित्येति । प्रत्ययानपेक्षणादिति ।** इयं च परिभाषा धर्मिग्राहकमानेन सप्तम्यन्तपदेन यत्र प्रत्ययस्य निमित्तत्वं तत्राऽनियमप्रसक्तौ नियमार्थैवेति भावः। अतएवाऽप्रशानिति निषेधः सार्थक इति दिक् । अतएव भाष्ये क्वचित्कुत्वसहितः पाठो दृश्यते । **प्रत्ययापेक्षत्वादिति ।** आङ्गत्वादिति भावः । [**मृजेर्वृद्धिः**] ॥

अचो । ननु स्थानेनिर्देशार्थमकारादिसङ्ग्रहार्थं चाऽज्ग्रहणं स्यादत आह—

क्रियते [किं प्रयोजनं ? ॥ 'गोऽर्थम्' ।] गोतो वृद्धिर्यथा स्यात्—'गौ'रिति ॥

नैतदस्ति प्रयोजनं, णित्करणसामर्थ्यादेवात्र वृद्धिर्भविष्यति ॥

[अस्त्यन्यण्णित्करणस्य प्रयोजनम् ॥ किम् ? ॥ गावौ गाव इत्यत्राऽत उपधाया इति वृद्धिर्यथा स्यात् ॥] ॥

अथ योगविभागः किमर्थो न 'ञ्णित्यत उपधाया' इत्येवोच्येत ॥ का रूपसिद्धिः—चायको लावकः कारकः हारकः ?॥ गुणे कृतेऽयवो रपरत्वे चाऽत उपधाया इत्येव सिद्धम् ॥ [न सिध्यति] । ॥*॥ योगविभागः सखिव्यञ्जनाद्यर्थः॥*॥योगविभागः क्रियते ॥ [किमर्थः ?॥ 'सखिव्यञ्जनार्थः' ।] सख्यर्थो व्यञ्जनाद्यर्थश्च । सख्यर्थस्तावत्—सखायौ सखायः । व्यञ्जनाद्यर्थः—जैत्रं यौत्रं च्यौत्रम् ॥

योगविभागे चेदानीं सखिव्यञ्जनाद्यर्थे क्रियमाणेऽज्ग्रहणमपि कर्तव्यं भवति ॥ किं प्रयोजनम् ? ॥ 'गोर्थम्'॥ ननु चोक्तं 'णित्करणसामर्थ्यादेवात्र वृद्धिर्भविष्यति' ॥ अस्त्यन्यण्णित्करणे प्रयोजनम् ॥ किं ? ॥ गावौ गावः । अवादेशे कृतेऽत उपधाया इति वृद्धिर्यथा स्यात् ॥ यत्तु सौ णित्करणं तदनवकाशं, तस्याऽनवकाशत्वादेव वृद्धिर्भविष्यति ॥ यथैव खल्वपि णित्क-

---

प्र.] गन्तस्य वृद्धिः सिध्यति । अकारस्य तु चिकीर्षक इत्यादावतो लोप इति लोपेन भाव्यम् । आकारस्य तु विशेषो नास्ति । सन्ध्यक्षराणामात्वेन भाव्यमिति प्रश्नः । **गोऽर्थमिति** । असत्यज्ग्रहणे इक्परिभाषोपस्थानाद्गौरित्यत्र वृद्धिर्न स्यात् ।

अथ योगविभाग इति। यद्यपि 'गौ'रित्युक्तेनोदाहरणेन योगविभागस्य प्रयोजनं ज्ञाप्यते तथाप्यनेकप्रयोजनोपन्यासाय प्रश्नप्रतिवचने । **सखायाविति** । 'सखि-औ' इति स्थिते वृद्धेरप्रसङ्गः, णित्त्वं तु 'सखाय' इत्यत्र जसि गुणेऽयादेशे च कृतेऽत उपधाया वृद्ध्यर्थं स्यात् । 'सखाय' इत्येतत्तु प्रसङ्गेनोदाहृतम् । णित्वावकाशदर्शनार्थं वा । **व्यञ्जनाद्यर्थ इति** । व्यञ्जनादिर्यः प्रत्ययस्तत्र वृद्ध्यर्थः । **जैत्रमिति** । जियुभ्यामौणादिकष्ट्रण् । **च्यौत्रमिति** । जनिदाच्युसिति त्रण् । **तत्वमिति** । 'हनस्तोऽचिण्णलो'रिति हन्तेरुच्यमानं गोरपि स्यात् । नैष दोषः प्रापदित्यज्ग्रहणं क्रियते ॥

उ.] **अन्तरेणेति**। **लोपेनेति** । 'ण्यल्लोपा'विति वचनादिति भावः। भाष्ये—**गोर्थमिति**। प्रापयतीति 'टे'रिति सूत्रस्थभाष्यप्रामाण्यादत्रत्यं भाष्यं दोषोपलक्षणं बोध्यमित्याहुः । **असतीति** । अज्ग्रहणे तु निर्दिष्टस्थानिकत्वादिक्परिभाषाद्युपस्थितिरिति न दोषः । ननु णित्त्वसामर्थ्यादनुपधाया अपि वृद्धिः स्यादत आह—**णित्वं त्विति** । **हनस्त इति** । अङ्गवैकल्येऽपि शास्त्रप्रवृत्तौ तत्वमपि स्यादिति तदभावायाऽज्ग्रहणं । ननु 'हनस्त' इत्यत्रा'ऽचिण्णलो'रिति पर्युदासेन, 'धातोः स्वरूपग्रहणे' इति परिभाषया च धातुविहितप्रत्यये एव तत्वमिति अङ्गद्वयविकलं तत्वं, वृद्धि-

रणसामर्थ्यादनिकोऽपि वृद्धिः प्रार्थ्यते एवं तत्वमपि प्राप्नोति । तत्वमपि हि 'ञ्णिती'त्युच्यते । तस्मादज्ग्रहणं कर्तव्यम् ॥ [अचो ञ्णिति] ॥

तद्धितेष्वचामादेः ॥ ७।२।११७ ॥

अज्ग्रहणं कर्तव्यम् ॥ ननु च क्रियत एव ॥ द्वितीयं कर्तव्यं,–यथाऽचामादिग्रहणमज्विशेषणं विज्ञायेत–'अचामादेरच'इति ॥अथाऽक्रियमाणेऽज्ग्रहणे कस्याऽचामादिग्रहणं विशेषणं स्यात् ?॥ 'इग्विशेषण'मित्याह,—'अचामादेरिक' इति ॥ तत्र को दोषः ? ॥ इहैव स्यात्–ऐतिकायनः औपगवः । इह न स्यात्—गार्ग्यो वात्स्य इति ॥ तत्तर्ह्यज्ग्रहणं कर्तव्यम् ? ॥ न कर्तव्यम् । प्रकृतमनुवर्तते ॥ क्व प्रकृतम् ? ॥ 'अचो ञ्णिती'ति ॥ यदि तदनुवर्तते'ऽत उपधाया अचश्चे'ति अज्मात्रस्य उपधाया वृद्धिः प्रसज्येत–भेदकःछेदकइति ॥ अकारेण तपरेणाऽचं विशेषयिष्यामः–'अचोऽत'इति ॥ इहेदानीमच इत्यनुवर्तते 'अत'इति निवृत्तम् । अथवा–॥*॥ मण्डूकगतयोऽधिकाराः ॥*॥ तद्यथा

प्र.] **तद्धितेष्व । अज्ग्रहणं कर्तव्यमिति ।** 'अचा'मित्यनेन निर्द्धारणषष्ठ्यन्तेन सामानाधिकरण्येनादेर्विशेषयितुमशक्यत्वादिक्परिभाषोपस्थानादिक एवाऽचो वृद्धिप्रसङ्गः। **अथाक्रियमाण इति ।** निर्धारणं तुल्यजातीयस्य भवति, यथा 'कृष्णा गवां संपन्नक्षीरतमे'त्युक्ते गौरेव प्रतीयते, तथा चाऽचामादिरजेव प्रत्येष्यत इति भावः। **इग्विशेषणमिति ।** तुल्यजातीयनिर्द्धारणेऽपि 'इक' इत्यस्योपस्थानं न निवार्यते । अज्ग्रहणे तु क्रियमाणे निर्दिष्टस्थानिकत्वादिक्परिभाषाऽनुपस्थानं, यथा'ऽचो ञ्णिती'त्यत्र।

अज्मात्रस्येति । नन्वद्ग्रहणसामर्थ्यादज्मात्रस्य न भविष्यति । तत्सामर्थ्यात्तर्हि निवृत्तिरेवाऽज्ग्रहणस्य स्यान्नियमार्थं वाऽद्ग्रहणं स्यात्,–'अकारस्यैव ह्रस्वस्य नान्यस्ये'ति। दीर्घस्य त्वीहक इत्यादावुपधायाः स्यादेव। **अकारेणेति।** विशेषणस्याऽजन्तर-

उ.] स्त्वेकाङ्गविकलेति णित्वसामर्थ्याद्वृद्धिरेव भविष्यति न तत्वमिति चेन्न, 'यत्तु सोर्णित्करण'मित्यादिग्रन्थस्य पूर्वपक्ष्येकदेशि-सिद्धान्त्येकदेशिनोरुक्तिप्रत्युक्तिपरत्वेनाऽदोषात् । सोर्णित्वस्य विशेषविधाने हि मानं न पश्यामः । ध्वनितं चेदं सर्वं 'यद्यपि गौरित्युक्तेनोदाहरणेने'त्यादिकैयटग्रन्थेनेति दिक् । **[अचो ञ्णिति]** ॥

तद्धितेष्व । अचां मध्ये आदेरिको वृद्धिरित्यर्थः स्यादित्याह—**अचामिति ।** बहुवचनान्निर्धारणषष्ठीत्वनिर्णयः । **सामानाधिकरण्येनेति ।** अज्रूपस्यादेरितीत्यर्थः। **इक इति ।** निर्धारणस्य तुल्यजातीयत्वादेवाऽच इत्यस्य लाभेऽपि तदुपस्थानं न वार्यते । 'इक' इत्यनेनाऽचो विशेषणसंभवादिति भावः । नन्वेवमज्ग्रहणेऽपि इक्परिभाषोपस्थानं स्यादत आह—**अज्ग्रहणे त्विति । विशेषणस्येति ।** ननु नियमार्थत्वं, 'विधिनियमसंभव' इति न्यायादित्यर्थः। नन्वर्थस्यानेकत्वाद्वाक्यभेद एव

मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः ॥ अथ वैकयोगः करिष्यते 'अचो ञ्णित्यत उपधायाः' [इति]। ततः—'तद्धितेष्वचामादे'रिति। नचैकयोगेऽनुवृत्तिर्भवति ॥*॥ तद्धितेष्वचामादिवृद्धावन्त्योपधलक्षणप्रतिषेधः ॥*॥ **तद्धितेष्वचामादिवृद्धावन्त्योपधलक्षणाया वृद्धेः प्रतिषेधो वक्तव्यः। क्रौष्ट्रः। जागत इति ॥ ननु चाऽचामादिवृद्धिरन्त्योपधालक्षणां वृद्धिं बाधिष्यते ॥ कथमन्यस्योच्यमानाऽन्यस्य बाधिका स्यात्? ॥ असति खल्वपि संभवे बाधनं भवति, अस्ति च संभवो यदुभयं स्यात्**॥*॥लोकविज्ञानात्सिद्धम्॥*॥ **सत्यपि संभवे बाधनं भवति। तद्यथा—'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याये'ति सत्यपि संभवे दधिदानस्य तक्रदानं निवर्तकं भवति, एवमिहापि सत्यपि संभवेऽचामादिवृद्धिरन्त्योपधलक्षणां वृद्धिं बाधिष्यते ॥ विषम उपन्यासः। नाप्राप्ते दधिदाने तक्रदानमारभ्यते तत्प्राप्ते आरभ्यमाणं बाधकं भविष्यति, इह पुनरप्राप्तायामन्त्योपधालक्षणायां वृद्धावचामादिवृद्धिराभ्यते—सुश्रुत्सौश्रुत इति** ॥*॥ पुष्करसद्ग्रहणाद्वा ॥*॥ **अथ वा यदयमनुशति-**

प्र.] निवृत्तिः प्रयोजनम्। **अथ वैकयोग इति**। एको भवतिरध्याह्रियते, तेन तुल्यकालत्वाद्विधानस्य स्वकार्ये व्यापारादन्यत्रोपस्थानाऽभावः। **क्रौष्ट्र इति**। क्रोष्टृशब्दात्तृजन्तात्तस्येदमित्यण्। **जागत इति**। जगच्छब्दादण्। **ननु चाचामादिवृद्धिरिति**। अङ्गं कार्यि मन्यते, तत्र तक्रकौण्डिन्यन्यायावतारः। इतरस्तु स्थानिभेदं मत्वाह—**कथमन्यस्येति**। 'आमलकीज' इत्यदावन्यस्याऽपि स्वरो विधीयमानोऽन्यस्वरं बाधत एवेत्याशङ्क्याह—**असति खल्वपीति**। **लोकविज्ञानादिति**। अङ्गं कार्यि, तदेवावयवद्वारेण संस्क्रियते। ततश्चैकस्य कार्यद्वयं न प्रवर्तते। कौण्डिन्य इव दधि तक्रं च। **नाप्राप्त इति**। सामान्यविशेषभावो बाधहेतुः स चेह नास्ति। **पुष्करसद्ग्रहणाद्वेति**। वाशब्दस्तर्ह्यर्थे। पूर्वस्य हेतोरनवस्थितत्वात्। ननु च ठगर्थः-

उ.]युक्तोऽत आह—**एको भवतिरिति**। प्रतिपत्तिवाक्यमेकं, प्रक्रियावाक्यं तु भिद्यत एवेत्यर्थः। एकवाक्यत्वे कथमनुवृत्त्यभावोऽत आह—**तेनेति**। यद्वाऽत इत्येतत्स्वकार्ये व्याप्रियते, तदैवाऽन्यशेषत्वमयुक्तमित्यर्थः। **क्रौष्ट्र इतीति**। 'क्रोष्टृ' इति तृजन्तमेव ऋषिनाम। 'वा नामधेयस्ये'ति पक्षे वृद्धत्वात्क्रोष्ट्रीया इत्यपीति बोध्यम्। आदिवृद्धेरवकाशमजानञ्शङ्कते—भाष्ये-**ननु चाचामिति**। ननु कार्यिभेदात्कथं बाध्यबाधकभावोऽत आह—**अङ्गमिति**। कार्यिभेदेऽपि नुम्नुटोरिव बाधकत्वसंभवाच्चिन्त्यमिदम्। **स्थानिभेदमिति**। अङ्गावयवानां कार्यित्वादिति भावः। **अन्यस्यापि स्वर इति**। 'अन्त्यात्पूर्वं बह्वच' इति 'दीर्घकाशतुषभ्राष्ट्रवटं जे' इति पूर्वपदाद्युदात्तत्वं बाधत इत्यर्थः।शेषनिघातशास्त्रबलात्तत्राऽसंभवोऽस्तीत्युत्तराशयः। दृष्टान्ते एकस्योद्देश्यत्वं, दार्ष्टान्तिके तु भिन्नस्येति वैषम्यं परिहरति—**अङ्गं कार्यीति। पूर्वस्य हेतोरिति।**

कादिषु पुष्करसच्छब्दं पठति तज्ज्ञापयत्याचार्यो'ऽचामादिवृद्धावन्त्योपधालक्षणा वृद्धिर्न भवती'ति॥*॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभष्ये सप्तमाध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः॥*॥७।२।२।

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् ॥ ७।३।१ ॥

॥*॥ देविकादिषु तदादिग्रहणम् ॥*॥ **देविकादिषु तदादिग्रणं कर्तव्यम्। [देवकाद्यादीनामिति वक्तव्यम् ।] इहापि यथा स्यात्—दाविकाकूलाः**

प्र.] पुष्करसदः पाठः स्यात्,—पुष्करसदाचरति पौष्करसादिक इति । ञ्णित्यत उपधाया इति वृद्धेर्विधानाद्वक्ष्यप्रसङ्गात्। एवं तर्हि ठगतोऽनभिधानान्न भवति । यद्वा प्रतिपदविहित इत्येव पुष्करसद उभयपदवृद्धिर्नाऽन्यत्र । केचिदाहुः—लोकविज्ञानात्सिद्धमिति वार्तिककारस्य विप्रतिषेधो विवक्षितः यथा झलचोर्नुम्विधानुगित्प्रतिषेधात्सिद्धमिति । अन्त्योपधालक्षणाया वृद्धेरवकाशः—'गौः' 'पाचक'-इति । अस्यावकाशः—'सौश्रुत' इति । 'क्रौष्ट्रे' 'जागत' इत्यत्रोभयप्रसङ्गे परत्वादादिवृद्धिर्भवति । सकृद्गतेपरिभाषाश्रीयते न तु पुनःप्रसङ्गविज्ञानम् । एवं च 'पुष्करसद्ग्रहणाद्वे'ति विकल्पार्थ एव वाशब्दः। बाधकत्वसामान्याभिप्रायेण च शास्त्रविज्ञानमेव लोकविज्ञानमुक्तम् । अथ यत्रादिवृद्धिः प्रतिषिध्यते तत्राऽन्त्योपधलक्षणा कस्मान्न भवति–'व्यसोर्भावो वैयसव'मिति । 'इगन्ताच्चे'त्यण् । व्यापदि भवं वैयापदमिति ?। अत्राप्यैचौ परत्वाद्बाधकाविति सर्वेष्टसिद्धिः ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमस्य द्वितीये द्वितीयमाह्निकम् ॥ पादश्च द्वितीयः ॥७।२।२॥

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् । **देविकादिष्विति** । विशेषण-

उ.] 'लोकविज्ञाना'दित्यस्य। परन्तु नेदं वार्तिकं, किन्तु कस्यचिदेकदेशिनोऽवकाशमपश्यत उक्तिः। 'पुष्करसद्ग्रहणाद्वे'ति वार्तिकं, 'प्रतिषेधो वक्तव्य' इति वचनापेक्षो विकल्पार्थो वाशब्दः। अतएव भाष्येऽथवेत्येव व्याचष्टे इत्याहुः । **यद्वा प्रतिपदेति** । बाह्वादिषु पुष्करसच्छब्दः पठ्यते, तस्यैवानुशातिकादिषु ग्रहणं न्याय्यं, झटिति प्रतीतेरिति भावः। इदं च ज्ञापकमचामादिवृद्धिविषयेऽन्त्योपधालक्षणा वृद्धिर्नेति । तेन वैयसवमित्यादौ न दोष इति बोध्यम्। **यथा झलचोरिति** । 'श्रेयांसी'त्यादौ झल्लक्षणे नुमि कृते उगिल्लक्षणस्य प्राप्तस्य प्रतिषेधो वक्तव्य इति चोदिते विप्रतिषेधात्सिद्धमिति तत्रोक्तं, तथेहापीत्यर्थः । नन्वेवं 'लोकविज्ञानात्सिद्ध'मित्यसमञ्जसमत आह—**बाधकत्वसामान्येति** । यथा तक्रदानं बाधकम्, एवं परशास्त्रमपीति सादृश्यादेवमुक्तमित्यर्थः। इदं न युक्तम्, एकस्य द्विकार्ययोगाऽभावादसंभवाऽभावाच्च । तावेव हि विप्रतिषेधसूत्रप्रवृत्तौ बीजमिति 'इको गुणे'ति सूत्रे भाष्ये स्पष्टम् । अङ्गं कार्यीति तु चिन्त्यमेव । 'अत उपधाया' 'अचामादे'रित्युभयत्राप्यङ्गस्येत्यस्यावयवषष्ठीत्वात् । **कस्मान्नेति** । बाधकाऽभावे बाध्यप्रवृत्तेरुचितत्वादिति भावः । **अत्रापीति** ।

शालयः शांशपास्थला देवाः ॥ किं पुनः कारणं न सिध्यति ॥*॥ अन्यत्र तद्ग्रहणात्तदन्तग्रहणाद्वा ॥*॥ **अन्यत्र हि तस्य वा ग्रहणं भवति तदन्तस्य वा, न चेदं तत्, नापि तदन्तम्** ॥*॥ आद्यज्विशेषणत्वात्सिद्धम् ॥*॥**आद्यज्विशेषणं देविकादयः। नैवं विज्ञायते–'देविकादीनामङ्गानामचामादेराकारो भवती'ति ॥ कथं तर्हि ? ॥ 'ञ्णित्यङ्गस्याऽचामादेरचं आकारो भवति स चेद्देविकादीनामाद्यज्भवती'ति ॥**

॥*॥ आन्तरतम्यनिवर्तकत्वाद्वा ॥*॥ **अथ वा नाऽनेनाऽनन्तरतमा वृद्धिर्निर्वर्त्यते ॥ किं तर्हि ? ॥ अन्तरतमाऽनेन निवर्त्यते । अतः सिद्धाऽत्र वृद्धि-**

प्र.] विशेष्यभावे कामचाराद्यदाऽङ्गेन देविकादीनि विशेष्यन्ते तदा तेषामङ्गमन्ते न संभवतीति तदन्तविध्यभावादङ्गानि देविकादीन्याश्रीयन्ते। यदा तु देविकादिभिरङ्गं विशेष्यते तदा तदन्तविधिना देविकाद्यन्तमङ्गं गृह्यते न तु कथं चित्तदादिविधिसंभव इति तदादिग्रहणं कर्तव्यम्। तत्र केवलानां देविकादीनां तदादीनां चाऽऽकारो भवतीति वक्तव्यम्। अन्यथा केवलानां न स्यात्–दाविकमुदकं, शांशपश्चमस इति । न च व्यपदेशिवद्भावोऽस्ति,'अप्रातिपदिकेने'ति प्रतिषेधात् । यदि तु प्रत्ययविधिविषय एवाऽयं निषेधस्तदा केवलानां व्यपदेशिवद्भावात्सिध्यति । **आद्यज्विशेषणमिति** । अङ्गस्य देविकादिभिः संबन्धाऽभावः । **अन्तरतमनिवर्तकत्वाद्वेति** । ञ्णिति कितीति वर्तते । तत्र 'स्थानेऽन्तरतम' इति वचनादैकारो वृद्धिसंज्ञः प्राप्त आदिति वचनेन निवर्त्यते, न त्वपूर्व आकारो विधीयते । अनेन हि 'स्थानेऽन्तरतम' इति नियमं बाधित्वा नियमान्तरं क्रियते–'देविकादीनामाकारो वृद्धि-

---

उ.] न केवलमादिवृद्धेः प्रतिषेध एव 'न य्वाभ्या'मित्यनेन, किन्तर्ह्यैचोर्विधानमपि। तौ च परत्वाद्बाधकौ । वास्तवसमाधिस्तूक्त एवेति इष्टसिद्धिः॥ इति श्री**नागोजीभट्ट**कृते भाष्यप्रदीपोद्द्योते सप्तमस्य **द्वितीये द्वितीयमाह्निकम्** ॥ पादश्च समाप्तः ॥

देविकाशिंशपादित्य । अङ्गानीति । अङ्गरूपाणीत्यर्थः। **यदि तु प्रत्ययेति** । 'पूर्वादिनिः' 'सपूर्वाच्चे'ति ज्ञापकस्य तुल्यजातीयविषयत्वादिति भावः । तदा तदादिग्रहणमेव कर्तव्यं । ननु पूर्वोक्तपक्षद्वयातिरिक्तः कोऽयं प्रकारोऽत आह—**अङ्गस्येति** । विशेष्यत्वेन विशेषणत्वेन च संबन्धाऽभाव इत्यर्थः ।

संबन्धप्रकारो भाष्ये—**ञ्णित्यङ्गस्येति** । भाष्ये—'**आन्तरतम्यनिवर्तकत्वाद्वे**'ति प्रचुरः पाठः । तत्र स्वार्थे ष्यञित्याहुः । **नत्वपूर्व इति** । अपूर्वविध्यपेक्षया परिभाषात्वस्य लघुत्वादिति भावः । तदेव विशदयति—**अनेन हीति** । यत्र देविकादीनामचामादेर्वृद्धिप्रसङ्गस्तत्राऽऽकार एवेत्यर्थ इति भावः । **ननु** यद्यत्रैव पठ्यते तदा अङ्गस्य विशेषणत्वे दाविकाकूलेऽव्याप्तिः । विशेष्यत्वे सौदेविकेऽतिव्याप्तिः । आद्य-

स्तद्धितेष्वचामादेरित्येव। तत्राऽनेनाऽन्तरतमा वृद्धिर्निवर्त्यते ॥

परिहारान्तरमेवेदं मत्वा पठितं, कथं चेदं परिहारान्तरं स्यात् ? ॥

यदि नाद्यज्विशेषणं देविकादयः ॥

अवश्यं चैतदेवं विज्ञेयमाद्यज्विशेषणं देविकादय इति, यदि नाद्यज्विशेषणं देविकादयः स्युरिहापि प्राप्नोति–सुदेविकायां भवः सौदेविक इति ॥ अथात्राऽप्याद्यज्विशेषणत्वादित्येव सिद्धं, परिहारान्तरं न भवति ॥ न ब्रूमो यत्र क्रियमाणे दोषस्तत्र कर्तव्यमिति ॥ किं तर्हि ? ॥ यत्र क्रियमाणे न दोषस्तत्र कर्तव्यम् ॥ क्व च क्रियमाणे न दोषः ? ॥ संज्ञाविधौ ॥ 'वृद्धिरादैज्देविकादीनामाकार' इति ॥ सिध्यति, सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु ॥ ननु चोक्तं–'देविकादिषु तदादिग्रहणमन्यत्र तद्ग्रहणात्तदन्तग्रहणाद्वे'ति। परिहृतमेतत्–"आद्यज्विशेषणत्वात्सिद्ध"मिति ॥ ॥* न्यग्रोधे च केवलग्रहणात् ॥*॥ न्यग्रोधे च केवलग्रहणान्मन्यामहे–'आद्यज्विशेषणं देविकादय'इति । तस्यै हि

प्र.]नान्या' । परिहारान्तरमिति । परिभाषेयम्।देविकादीनां वृद्धिर्विधीयमानाऽऽकार एव भवतीति केवलानां तदादीनां च वृद्धिर्देविकादीनां भवतीति तत्रैव परिभाषाप्रवृत्तिः । सुदेविकायां तु या वृद्धिर्न सा देविकादिशब्दस्य, किं तु तदन्तस्येति परिभाषानुपस्थानादौकार एव भवति । यथोद्देशं च परिभाषाश्रीयते न कार्यकाला, अन्यथाऽङ्गप्रकरणे देविकादीनामादित्यस्योपस्थानादव्याप्त्यतिव्याप्त्योः पूर्ववदन्यतरप्रसङ्गः स्यात् । इह तु प्रदेशे सूत्रे क्रियमाणे विधिरेवाऽऽकारस्य भवति, अर्थात्त्वैकारस्य निवृत्तिरिति नाऽयं परिहार उपपद्यते–'अन्तरतमनिवर्तकत्वाद्वे'ति । सूत्रं तर्हीति । अष्टाध्यायीलक्षणं सूत्रं संनिवेशान्तराश्रयणे भिद्यते । अथ वाऽस्यैव सूत्रस्य स्थानभेदाद्भेदो भवति। आद्यज्विशेषणत्वादिति। द्वितीयः परिहारो दूषितः । पूर्वस्तु स्थित एव । अत्रैवार्थे लिङ्गदर्शनं–न्यग्रोधे चेति । केवलग्रहणमिह प्रकरणे गृह्यमाणमादैज्विशेषणमिति ज्ञापयति, अन्यथा तदनर्थकं स्यात् । न च तदन्त-

---

उ.]ज्विशेषणत्वे कथं परिहारान्तरत्वमत आह—परिभाषेयमिति । परिभाषाप्रकरण इदं पाठ्यम् । तत्र चाऽङ्गाऽसन्निधानान्न दोष इति भावः । तदाह—देविकादीनामिति । अर्थात्त्विति । एवञ्च निवृत्तेर्वाक्यार्थत्वाऽभावात्परिहारान्तरत्वोक्तिरसङ्गतेति भावः । 'यदि नाद्यज्विशेषण'मिति भाष्यस्यायमर्थः–नाद्यज्विशेषणं देविकादयः । इह च पाठ इत्यसङ्गतं, यत इह पाठे न परिभाषात्वं, विधिसाहचर्येण विधित्वस्यैव युक्तत्वात् । तत्र चाद्यज्विशेषणमेव युक्तमित्याह—अवश्यं चैतदिति । यदि नाद्यजिति । 'इह पाठे' इति शेषः । ननु प्रकरणान्तरपाठेऽपि देविकेत्यादिसूत्रस्य न कश्चिद्भेदोत आह—अष्टाध्यायीति । अत्रैवार्थे–आद्यज्विशेषणत्वरूपेऽर्थे। यथास्थितपाठेऽप्यत्र वृद्धिरित्यनुवर्त्य वृद्धिशब्देन आकारविधा-

केवलग्रहणस्यैतत्प्रयोजनम् इह मा-भूत् न्याग्रोधमूलाः शालय इति। यदि चाद्यज्विशेषणं देविकादयस्ततः केवलग्रहणमर्थवद्भवति ॥ तदेतत्कथं कृत्वा ज्ञापकं भवति ? ॥ यदि न्यग्रोधशब्दोऽव्युत्पन्नं प्रातिपदिकं भवति। अथ हि न्यग्रोहतीति न्यग्रोधः, ततो नियमार्थं पदान्त इति कृत्वा न ज्ञापकं भवति ॥

॥*॥ वहीनरस्येद्वचनम् ॥*॥ **वहीनरस्येत्वं वक्तव्यम्। वहीनरस्याऽपत्यं वैहीनरिः ॥**

कुणरवाडवस्त्वाह-नैष वहीनरः ॥ कस्तर्हि ? ॥ विहीनर[1] एषः। विहीनो नरः कामभोगाभ्यां विहीनरः। विहीनरस्याऽपत्यं-वैहीनरिः ॥

प्र.]विधिनिरासाऽर्थम्, अङ्गेन न्यग्रोधस्य विशेषणात्तदन्तविधेरप्रसङ्गात्। **तदेतदिति।** अव्युत्पत्तिपक्षे 'न्यग्रोधस्य च केवलस्ये'ति वृद्धिनिषेधस्यैचश्च विधायकमिति केवल-ग्रहणं ज्ञापकार्थं भवति। व्युत्पत्तिपक्षे तु 'न य्वा भ्या'मिति सिद्धे केवलस्यैव-न्यग्रोधशब्दस्य यथा स्यात्, न्याग्रोधमूलाः शालय इत्यादौ मा भू'दिति नियमार्थं केवलग्रहणं न ज्ञापकं भवति। न हि 'न्यग्रोधस्ये'त्येतावताऽभिमतनियमसिद्धिः। नन्वङ्गस्यैव न्यग्रोधस्य नाङ्गादेरित्येवमिष्टो नियमः सिध्यत्येव। नैतदस्ति। अनिष्टोऽपि नियमः स्यात्-'न्यग्रोधस्यैव निशब्दात्परस्य वृद्धिप्रतिषेध' इति। तथा च 'नैयायिको' 'नैयासिक' इत्यादौ न स्यात्। तस्मात्केवलग्रहणमभिमतनियम-साधनाय। 'श्वादे'रित्ययं तु निषेध उक्तार्थज्ञापको भवति। **वहीनरस्येति।** वहो-ऽस्यास्तीति वही, स चासौ नरश्चेति कर्मधारयसमासः। अन्येषामपि दृश्यत इति दीर्घः। तस्याऽपत्यमत इञ्। तत्रादिवृद्धेरपवाद इकारो विधीयते। इकारस्य वृद्धि-र्भवत्येव। न च तस्यां प्राप्तायामित्वं विधीयते यतः सापि बाध्येत। **विहीनो नर इति।** पृषोदरादित्वान्नलोपः। [**देविकाशिंशपा**] ॥

उ.]नात् 'दाविकीभार्य' इत्यादौ पुंवत्त्वनिषेधो भवत्येवेति ध्येयम्। **अङ्गेन न्यग्रोध-स्येति।** एवञ्च न्यग्रोधरूपाङ्गस्य विधीयमानस्तदादेनैव प्राप्नोति, नापि तदन्त इति केवलग्रहणमनर्थकमस्यार्थस्य ज्ञापक। दृष्टानुरोधाच्च तदन्तविधिर्न ज्ञापक-मिति भावः। **विधायकमिति।** अपदान्तत्वान्न य्वाभ्यामित्यस्याऽप्राप्तेरिति भावः।

विनाऽपि केवलग्रहणमिष्टनियममाशङ्कते-**नन्वङ्गस्येत्यादिना।** व्युत्पत्तिपक्षेऽपि लिङ्गं दर्शयति-**श्वादेरिति।** द्वारादिषु श्वन्शब्दपाठाद्द्वारादीनां चेत्यनेन प्राप्तस्य निषेधोऽयं। 'श्वाभस्त्रि'रित्याद्युदाहरणम्। ननु वृद्धिबाधेनेत्त्वे कथं पुनर्वृद्धिः स्यादत आह—**न च तस्यामिति।** इकारस्थानिकवृद्धावित्यर्थः। भ्रष्टावसरन्यायस्तु

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥ ७।३।३ ॥

॥*॥ य्वाभ्यां परस्याऽवृद्धित्वम् ॥*॥ **य्वाभ्यां परस्याऽवृद्धित्वं सिद्धम् ॥** कुतः ? ॥*॥ अपवादौ वृद्धेर्हि तौ ॥*॥ **अपवादौ हि वृद्धेस्तावैचावुच्येते ।** ॥*॥ नित्यावैचो तयोर्वृद्धिः॥*॥ **अथ वा नित्यावैचो, कृतायामपि वृद्धौ प्राप्नुतोऽकृतायामपि ॥ नित्यत्वादैचोः कृतयोर्यद्यपि वृद्धिस्तयोरेव ॥**

॥*॥ किमर्थं नेति शिष्यते ? ॥*॥ **अथ किमर्थं प्रतिषेध उच्यते ? ॥**

॥*॥ ऐचोर्विषयार्थं प्रतिषेधसन्नियुक्तवचनम् ॥*॥ **ऐचोर्विषयार्थं प्रति-**

प्र.] **न य्वाभ्याम् ।** 'य्वाभ्यां पदान्ताभ्यां पूर्वावै'जित्येव सूत्रं कार्यं नार्थो वृद्धि-निषेधेन । **अपवादाविति ।** एकस्मिन्नङ्गविशेषे विधीयमानावैचौ सामान्यविहिताया वृद्धेर्बाधकौ, सत्यपि संभवे सामान्यविशेषविषयत्वेन बाध्यबाधकभावदर्शनात् । इदानीं विषयभेदादसत्यप्यैज्वृद्ध्योर्बाध्यबाधकत्वे प्रतिविधातुमाह–**यद्यपीति ।** अभ्यु-पगमवादेनोच्यते । न हि वृद्धौ सत्यां सर्वेष्टसिद्धिः । 'वैयाकरणभार्य' इत्यत्र 'वृद्धिनिमित्तस्ये'ति पुंवद्भावप्रतिषेधप्रसङ्गात् । तस्माच्छब्दान्तरप्राप्त्या वृद्धिमनित्यां बाधित्वा नित्यावैचौ भविष्यतः । बाधितत्वाच्च पुनर्वृद्धिर्न भविष्यतीत्यभ्युपेयम् । **ऐचोर्विषयार्थमिति ।** याभ्यां य्वाभ्यां परस्य वृद्धिः प्राप्ता निषिध्यते ताभ्यां पूर्वा-

---

उ.] **न य्वाभ्यां ।** ननु य्वाभ्यां परस्य वृद्धिस्ताभ्यां पूर्वावैचाविति विषय-भेदात्कथं बाध्यबाधकभावोऽत आह—**एकस्मिन्नङ्गेति ।** नन्वपवादत्वमुक्त्वा कथं नित्यत्वाश्रयबाधकत्वेन पक्षान्तरकथनमत आह–**इदानीमिति ।** विषयभेदान्ना-पवादत्वम् । अङ्गं तु न कार्यि, तस्य कार्यिविशेषणविशेषणत्वादिति भावः । इदमप्य-संभवे एव बाधकत्वमिति वार्तिकमते । **अभ्युपगमेति ।** इदं च **यद्यपी**त्यादि-सन्दिग्धवचनेन भाष्यकृताऽपि ध्वनितं । **तस्मादिति ।** ऐज्विधानसामर्थ्याच्च न तयोर्वृद्धिः । अन्यथा प्रयत्नलाघवाय एङावेव पूर्वौ विदध्यादिति भावः । केचित्तु 'आदैज्मात्रस्य वृद्धिसंज्ञे'ति पक्षे तावद्भार्य्ये इव वैयाकरणभार्य्ये पुंवत्त्वनि-षेधापादनेन निषेधप्रवृत्तिरेवेष्टा । अत्र सूत्रे पूर्वसूत्रे आदंशे इव ऐजंशेऽपि वृद्धिपदसंबन्धेन तद्भावितानामेव वृद्धिसंज्ञेति- पक्षेऽपि निषेधप्रवृत्तिर्भवत्येव । किञ्चैवं सति 'वृद्धिनिमित्तस्ये'ति सूत्रे शब्दव्यापाराश्रयणस्यावश्यकत्वेन ताव-द्भार्ये दोषवारणाय व्यधिकरणबहुव्रीहिपर्यन्तं भाष्यकृतो धावनमफलं स्यादित्याहुः ।

बाधितत्वाच्चेति । इदं चिन्त्यं, भ्रष्टावसरन्यायस्य भाष्ये क्वाप्यनाश्रय-णात्, उक्तरीत्योपपत्तेश्च, अत्रापवादत्वमेव युक्तं । 'विषयैक्य एवापवादत्व'मिति तु न युक्तम्, अचि रादेशस्य नुडपवादत्वशङ्कापरभाष्यविरोधात् । न तिस्त्रिति ज्ञाप-केन नुड्विषये रादेशाभावकल्पनेन समाहितमित्यन्यत् । 'नित्यावैचा'वित्युक्तिस्त्वेक-देशिन इति बोध्यम् । 'असम्भवे एवापवादत्व'मिति वार्तिकमतेन वा तदुक्तं। भाष्ये–

षेधसन्नियोगेनैचावुच्येते ॥ * ॥ यत्र य्वाभ्यां पराऽवृद्धिस्तत्राध्यश्वर्यथा न तौ ॥*॥ **यत्र य्वाभ्यां परस्याऽवृद्धिस्त्वमुच्यते तत्रैचौ यथा स्यातामिह मा भूताम्—आध्यश्विः दैाध्यश्विः माध्वश्विरिति ॥ नैतदस्ति प्रयोजनम् ।** ॥ * ॥ अचामादेर्य्वाभ्यां हि तौ ॥ * ॥ **अचामादिनाऽत्र य्वौ विशेषयिष्यामः–'अचामादेर्यौ य्वा'विति** ॥ * ॥ कथं द्व्याशीति के न तौ ॥*॥ 'द्व्याशीतिक'इत्यत्र **कस्मान्न तौ भवतः ?** ॥*॥ यत्र वृद्धिरचामादेस्तत्रैचावत्र घोर्हि सा ॥*॥ **यत्राऽचामादेरित्येवं वृद्धिस्तत्रैचावुच्येते । अत्र घोरित्येवं वृद्धिः ॥ किमिदं घोरिति ? ॥ उत्तरपदस्येति ॥ उत्तरपदा-**

प्र.] वैचौ यथा स्यातामन्याभ्यां मा भूतामित्येवमर्थं प्रतिषेधविधानम् । **आध्यश्वेर्यथानताविति ।** 'स्याता'मिति वाक्यशेषः । अध्यारूढोऽश्वमिति प्रादिसमासः । अत इञ् । असत्यपि निषेधविधाने दोषं परिहर्तुमाह—**अचामादेरिति ।** 'अचामादेरचः स्थाने यौ य्वौ ताभ्यां पूर्वौ भवत' इत्याश्रीयमाणे आध्यश्विरित्यादावैचोरप्रसङ्गः । **द्व्याशीतिक इति ।** द्वे अशीती भूत इति तद्धितार्थे समासः । ततष्ठञ् । 'अध्यर्धपूर्वद्विगो'रित्यत्राऽऽर्हादित्यधिकाराल्लुङ्न भवति। अत्राऽचामादेरचो यकारस्य विधानात्ततः पूर्व ऐकारः प्राप्नोति । **ताविति** द्विवचनं द्व्याशीतिकस्योपलक्षणत्वादुपात्तम् । यद्यपि य्वोरचामादिना विशेषणाऽभावेऽप्यत्र दोषस्तथापि विशेषणे सर्वं न सिध्यतीति प्रतिपादनायेदमुच्यते । एतत्परिहरति—**यत्रेति ।** 'अचामादे'रिति या वृद्धिः प्राप्नोति तदपवादावैचौ विधीयेते । अत्र 'तु सङ्ख्यायाः संवत्सरसङ्ख्यस्ये'ति वृद्धिर्विधीयते । अचामादेरिति वर्तते । तन्त्रेण च (ते)द्वे अचामादेरित्येतदाश्रीयते । तत्रैकं स्वरूपपरम् । तेनाऽचामादेरित्येवं या वृद्धिस्तस्यां प्राप्तायां तदपवादावचामादेरचः स्थाने य्वाभ्यां पूर्वावैचौ भवत इत्यर्थः संपद्यते । **उत्तरपदाधिकारे-**

उ.] अथ किमर्थमिति । एवं सति किमर्थं प्रतिषेध इत्यर्थः। **विषयार्थमिति ।** ऐचोर्विशिष्टविषयनिर्देशार्थमित्यर्थः । एतदुत्तरं नैतदस्ति प्रयोजनमित्यादिभाष्यमेकदेश्युक्तिरित्युत्तरसूत्रे कैयटे स्फुटम् । **एचः स्थाने इति ।** अनुवादे परिभाषाणामनुपस्थितिरिति त्विको गुणेत्यादौ 'विधीयेते' इत्यध्याहारलब्धमिति भावः। **द्व्याशीतिकस्योपलक्षणत्वादिति ।** 'स्वाङ्गक' इत्यादौ स्वङ्गशब्दादवृद्धादपीति वुञि 'सुसर्वार्धजनपदस्ये'त्युत्तरपदवृद्धौ दोष इति भावः। 'माध्वश्वेरुपलक्षणत्वा'दिति पाठे तद्वदिसम्प्युपलक्षणमिति कथं चिद्व्याख्येयम् । **अत्र**—द्व्याशीतिके । **विशेषणे सर्वमिति ।** नतु पक्षान्तरे इष्टं सिध्यतीति भावेनेत्यर्थः । कथं पुनरयमर्थः सूत्राक्षरैर्लभ्यतेऽत आह—**तन्त्रेण च ते इति ।** निषेधसत्त्वे तु येन नाप्राप्तिन्यायेन तद्धितेष्वचामादेरित्यस्यैव निषेध इति तत्सन्नियोगशिष्ट ऐजागमोऽपि तत्रैवेति द्व्याशीतिके न

धिकारेऽप्यवश्यमैजागमोऽनुवर्त्यः पूर्वेष्वलिन्दे भवः पूर्वैत्रैयलिन्द इत्येव-मर्थम् ॥ नैष दोषः-उत्तरपदेनाऽत्राऽचामादिं विशेषयिष्यामोऽचामादिना य्वौ-'उत्तरपदस्याचामादेर्यौ य्वो'विति?॥*॥अथ कस्मात्पदान्ताभ्याम् ॥*॥ **अथ किमर्थं 'पदान्ताभ्या'मित्युच्यते ?** ॥*॥ यथेणो न भवेद्यणः ॥*॥ **इणो यणादेशे मा भूत्—यतश्छात्रा याता इति ॥**

इह वैयाकरणः शौवश्व इति शाकलं प्राप्नोति, य्वोश्च स्थानिवद्भावादा-यावौ प्राप्नतः ? ॥*॥ शाकलायावादेशेषु चोक्तम् ॥*॥ **[शाकलायावादेशे-षु चोक्तम्]॥ किमुक्तम् ?॥ शाकले तावदुक्तम्**–''सिञ्नित्यसमासयोः शाकलप्रति-षेध'' **इति ॥ आयावोः किमुक्तम् ? ॥** ''अचः पूर्वविज्ञानादैचोः सिद्धमिति ॥

॥*॥ य्वाभ्यां परस्याऽवृद्धित्वमपवादौ वृद्धेर्हि तौ ।
नित्यावैचौ तयोर्वृद्धिः किमर्थं नेति शिष्यते ॥
यत्र य्वाभ्यां पराऽवृद्धिस्तत्राप्यश्चेर्यथा न तौ ।
अचामादेर्य्वाभ्यां हि तौ कथं द्व्याशीतिकेन तौ ॥

प्र.] **ऽपीति**।तथा च द्व्याशीतिके दोषः। **पूर्वैत्रैयलिन्द इति**। 'प्राचां ग्रामनगराणा'-मित्युत्तरपदवृद्धिः प्राप्ता प्रतिषिध्यते। **नैष दोष इति**। द्व्याशीतिक इत्यत्र।तदेवं 'ने'ति प्रत्याख्यातम् । **याता इति** । अचामादेरचः स्थाने भवत्ययं यकार इति ऐच् प्रा-प्नोति । ननु चाऽन्तरङ्गत्वात् पूर्वमेव यणा भाव्यम् । इहापि 'व्याकरणं' 'स्वश्व' इति पूर्वमेव यण् भवति । ततो यथा भूतपूर्वगत्याऽत्राऽचामादेर्यणौ भवतस्तथा यणादेशो भवतीत्यदोषः । **अचः पूर्वविज्ञानादिति** । योऽनादिष्टादचः पूर्वस्तस्य विधौ स्थानिवद्भाव इत्यर्थः । **[न य्वाभ्यां पदान्ताभ्यां]** ॥

उ.]दोषः। आवृत्तिश्चानाश्रयणीयेति बोध्यम् । पूर्वैत्रैयलिन्दार्थमुत्तरपदाधिकारे ऐजा-द्यनुवृत्तौ द्व्याशीतिके दोषस्तं परिहरति भाष्ये–**नैष दोष इति** । तदाह–**द्व्याशीतिक इति**। निषेधसत्त्वेऽपि 'प्राचां ग्रामनगराणा'मित्यत्रैतदनुवर्त्य वाक्यभेदेन व्याख्याना-त्पूर्वैत्रैयलिन्दे न दोषः। 'सङ्ख्यायाः संवत्सरे'त्यादौ तु नानुवृत्तिः, मानाभावादिष्टानु-रोधाच्च । केचित्तु उत्तरपदसंबन्धिय्वाभ्यां परस्य न वृद्धिरित्यर्थाद्नुवृत्तावपि न दोष इत्याहुः। अत्र 'ने'त्यस्य प्रत्याख्यानमेकदेशिनः, अतिगुरुयत्नसाध्यत्वादिति बोध्यम् । **ननुचेति** । एवञ्च ञ्णिदादिनिरूपिताङ्गस्याचामादेरचः स्थाने य्वौ न भवत इति भावः । **अचामादेरिति** । ञ्णिदादिनिरूपिताङ्गसंबन्ध्यचामादेरित्यर्थः । **तथा यणादेश इति** । तथा याता इत्यादावपि तन्निरूपिताऽङ्गसंबन्ध्यचामादेरचः स्थाने यणादेशो भवतीत्यर्थः । अत्र 'भूतपूर्वगत्ये'ति चिन्त्यम् । यदि प्रत्ययोत्पत्त्यन-न्तरं यणादेशः स्यात्तदा तत्स्थानिकः स्यादित्येवं काल्पनिकं तदिति वक्तुमुचितं । भाष्ये–**शाकलं प्राप्नोतीति** । ततश्च नित्यं यण् दुर्लभ इति भावः ।

यत्र वृद्धिरचामादेस्तत्रैचावत्र य्वोर्हि सा ।
अथ कस्मात्पदान्ताभ्यां यथेणो न भवेद्यणः ॥*॥

द्वारादीनां च ॥ ७।३।४ ॥

अथ परस्याऽवृद्धिरित्यनुवर्तते उताहो न ? ॥ किं चातः ?॥ यद्यनुवर्तते शौवं मांसं, टिलोपे कृते ऐजागमो न प्राप्नोति॥ अथ निवृत्तं, स्वाध्यायशब्दो द्वारादिषु पठ्यते तत्र यावन्तो यणः सर्वेभ्यः पूर्व ऐजागमः प्राप्नोति ॥

यथेच्छसि तथास्तु॥अस्तु तावदनुवर्तते, कथं शौवं मांसम् ?॥आनुपूर्व्या सिद्धमेतत् । नात्राऽकृते ऐजागमे टिलोपः प्राप्नोति ॥ किं कारणम् ? ॥ 'प्रकृत्यैका'जिति प्रकृतिभावेन भवितव्यम् । तदेतदानुपूर्व्या सिद्धं भवति ॥

अथ वा पुनरस्तु निवृत्तम् ॥ ननु चोक्तं-"स्वाध्यायशब्दो द्वारादिषु

प्र.] द्वारा। पूर्वसूत्रे वृद्धिनिषेधः प्रतिपत्तिलाघवाय कृतः, न ह्येकेनाऽचामादेरित्यनेनोभयं विशेषयितुं शक्यम् । नाऽप्यप्रतिषिध्यमाना वृद्धिरचामादेरित्यनेन शक्या विशेषयितुमिति यथान्यासं प्रतिषेधमाश्रित्य विचार्यते-**परस्येति । यदीति** । यत्रैव वृद्धिप्रतिषेधस्तत्रैवैज्भ्यां भाव्यं नान्यत्र । **शौवमिति** । शुनो विकार इति 'प्राणिरजतादिभ्योऽ'ञित्यञ् । श्वन्शब्दस्य तु पाठस्तदाद्यर्थः स्याच्छौवहानमिति ।

यावन्तो यण इति । अपदान्तार्थत्वादस्य सर्वेभ्यो यण्भ्यः पूर्वावैचौ प्राप्नुतः । प्रतिषेधे तु विधीयमाने याभ्यां य्वाभ्यां परस्य वृद्धिप्रतिषेधस्ताभ्यां पूर्वावैचाविति नास्ति सर्वप्रसङ्गः । 'प्रकृत्यैका'जिति इष्टेमेयःसु प्रकृतिभावः । तथा च ज्ञा देवताऽस्य 'ज्ञ' इत्यत्र न भवति । इह त्वविशेषेण प्रकृतिभावमाश्रित्यैतदुक्तं परिहारदिक्प्रदर्शनार्थम् । अत्र हि परत्वाट्टिलोपं बाधित्वा वृद्धिः प्राप्ता प्रतिषिध्यत इति

उ.] द्वारादीनां च । ननु पूर्वसूत्रे निषेधस्य प्रत्याख्यानात्तदनुवृत्त्यादिविचारोऽयुक्त इत्यत आह—**पूर्वसूत्रे इति ।** तन्त्राद्याश्रणे च न मानमिति भावः । तन्त्राद्याश्रयणेऽपि न निर्वाह इत्याह-**नापीति ।** 'अचामादे'रित्येवं यत्र वृद्धिः प्राप्ता तत्र तदपवादावैचावित्यन्वयस्तु न लभ्यत इति भावः । **ननु शुन** इयमित्यणि प्रकृतिभावाट्टिलोपो दुर्लभोऽत आह-**अजिति ।** नन्वेवं श्वन्शब्दपाठो व्यर्थोऽत आह-**तदाद्यर्थ इति । परत्वादिति** । टिलोपस्य शब्दान्तरप्राप्त्याऽनित्यत्वमित्याशयः । परेतु दुष्टपक्षेण समाधानं कुर्वता भाष्यकृताऽनुवृत्तिपक्षस्याऽसङ्गततैवोक्ता । कैयटोक्तन्तु न युक्तं, कृताऽकृतप्रसङ्गित्वेन टिलोपस्य नित्यत्वात् । किञ्च ज्ञो देवतास्येत्यत्रापि परत्वाद्वृद्धौ सकृद्गतिन्यायेन लोपाऽप्राप्त्या'ज्ञ' इत्यस्याऽसिद्धिः । किं च स्त्रीपुंसाभ्यामित्यत्राञ्प्रत्ययो नुगागमश्च कार्य इत्याशङ्क्य-'टिलोपः स्यात्, न च नुग्विधानसामर्थ्यं, स्त्रैणे 'यं विधिं प्रती'ति न्यायेन तद्विधानसामर्थ्यात्तदभावेऽपि पौंस्ने दोष' इत्युक्तं तदसङ्गतिः । त्वद्रीत्या स्त्रैणे नुक्येव टिलोपप्राप्तिः,अन्यथा वृद्ध्या

पठ्यते तत्र यावन्तो यणः सर्वेभ्यः पूर्वं ऐजागमः प्राप्नोती''ति ॥ कः पुनर्हति स्वाध्यायशब्दं द्वारादिषु पठितुम्, एवं किल पठ्येत–स्वमध्ययनं स्वाध्याय इति । तच्च न ॥ सुष्ठु वाऽध्ययनं स्वाध्यायः । [शोभनं वा अध्ययनं स्वाध्यायः ॥ अथापि स्वमध्ययनं स्वाध्यायः] एवमपि न दोषः । अचामादेरिति वर्त्तते ॥

श्वादेरिञि ॥ ७।३।८ ॥

अयं श्वन्छब्दो द्वारादिषु पठ्यते, तत्र कः प्रसङ्गो यत्तदादेः स्यात्, नैवं प्राप्नोति नाऽर्थः प्रतिषेधेन ॥ [इह तस्य वा ग्रहणं भवति तदन्तस्य वा, न चेदं तत्, नापि तदन्तम्] ॥ तदादिविधिना प्राप्नोति ॥ न वै तदादिविधिरस्ति ॥ अत उत्तरं पठति—॥*॥ प्रतिषेधे श्वादिग्रहणं ज्ञापकमन्यत्र श्वन्ग्रहणे तदादिग्रहणस्य, शौवहानाद्यर्थम् ॥*॥ **प्रतिषेधे श्वादिग्रहणं क्रियते**

प्र.]भवत्यैजागम इत्ययमत्र परिहारः । **सुष्ठु वा अध्ययनमिति** । 'अन्येषामपि दृश्यते' इति दीर्घः । आङ् वा मध्ये प्रक्षेप्तव्यः । **अचामादेरिति वर्तत इति** । तत्रैवं संबन्धो'ऽचामादेरनन्तरौ यौ य्वौ ताभ्यां पूर्वावैचौ भवत' इति, तेन स्वाध्यायशब्दे वकारात्पूर्वमैज्भवति न तु यकाराभ्यामित्यर्थः । यद्यपि स्वोऽध्यायः स्वाध्याय इत्यस्यामपि व्युत्पत्तौ स्वाऽध्यायशब्दो न पठितव्यः, स्वशब्दस्येह पाठात्, तदादिविधेश्चेष्टत्वात्, तथाऽपि पाठेऽपि दोषो नास्तीति प्रदर्शनाय भाष्यकारेण पाठमभ्युपगम्य परिहारोऽभिहितः । [**द्वारादीनां च**] ॥

श्वादेः । **तदादिविधिनेति** । आद्यज्विशेषणत्वाद्द्वारादीनां तदादिविधिरस्ति ।

उ.]बाधात्तदसङ्गतिःस्पष्टैव। किञ्च'कसोमाट्ट्य'णित्येव सकृद्गतिन्यायेन सिद्धे'कस्ये'दितीत्त्वविधानेन वृद्धेर्लोपस्य बलवत्त्वबोधनेन परत्वादित्यस्याऽसङ्गतेश्च । 'णौचङी'ति सूत्रे 'नालोपी'ति सूत्रस्थप्रत्याहारग्रहणेन 'वृद्धेर्लोपो बलीया'निति सामान्यत एव ज्ञापकस्य वक्ष्यमाणत्वाच्च । एवञ्च 'श्रायं हवि'रित्यादि लोके चिन्त्यमेव, वृद्ध्यपवादत्वादैचोर्न वृद्धिनिषेधोपयोगोऽत्रेति बोध्यम् । भाष्ये–**तच्च नेति** । स्वशब्दस्य द्वारादिषु पाठादिति भावः । **सुष्ठु अध्ययनमिति** । तत्र च 'न य्वाभ्या'मिति सिद्धमिति तात्पर्यं । नन्वेवं 'स्वध्याय' इति स्यादत आह—**अन्येषामपीति** । कथं पुनस्तदनुवृत्तौ दोषपरिहारोऽत आह—**तत्रैवमिति** । अनन्तरशब्दोऽव्यवहितसमीपवाची । **तदादिविधेश्चेति** । अतएव स्वग्रामे भवः सौवग्रामिक इति सिध्यति । **पाठमभ्युपगम्येति** । वस्तुतस्तु स्वग्रामस्वाध्याययोः पाठः'स्वशब्दादेश्चेदेतयोरेवे'-ति नियमार्थः । तेन 'स्वार्थिकाः' 'स्वाभाविकं' स्वाराज्य'मित्यादि सिद्धमिति भाष्याशयः । [**द्वारादीनाञ्च**] ॥

श्वादेः। **आद्यजिति**। 'अङ्गस्याऽचामादेःपूर्वस्य नैचौ स चेदाद्योऽच् द्वारादीना-

ज्ञापकार्थम् ॥ किं ज्ञाप्यम् ? ॥ एतज्ज्ञापयत्याचार्यः—'अन्यत्र च श्वन्ग्रहणे तदादिविधिर्भवती'ति॥किमेतस्य ज्ञापने प्रयोजनं?॥'शौवहानाद्यर्थम्'। शौवहानं नाम नगरं शौवादंष्ट्रो मणिरिति ॥*॥ इकारादिग्रहणं च श्वागणिकाद्यर्थम् ॥*॥ इकारादिग्रहणं च कर्तव्यम् ॥ किं प्रयोजनम् ? ॥ 'श्वागणिकाद्यर्थम्' । श्वगणेन चरति श्वागणिकः ॥*॥ तदन्तस्य चाऽन्यत्र प्रतिषेधः ॥*॥ तदन्तस्य चाऽन्यत्र प्रतिषेधो वक्तव्यः । श्वाभस्त्रेः स्वं श्वाभस्त्रम् ॥

उत्तरपदस्य ७।३।१०॥

किमर्थमिदमुच्यते ?॥ 'अवयवादृतो'रिति वक्ष्यति तदुत्तरपदस्य यथा स्यादचामादेर्मा भूत् ॥ नैतदस्ति प्रयोजनम् । 'अवयवा'दिति पञ्चमी तत्राऽन्तरेणाप्युत्तरपदग्रहणमुत्तरपदस्यैव भविष्यति ॥ उत्तरार्थं तर्हि,—'सुसर्वा-

---

प्र.] इतरस्त्वगृहीताभिप्राय आह—**नैव तदादिविधिरस्तीति**। **श्वग्रहण इति**। श्वग्रहणस्योपलक्षणार्थत्वादेतत्प्रकरणनिर्दिष्टैर्देविकादिभिर्द्वारादिभिश्चादेरचो विशेषणात्तदादिविधिर्भवतीति ज्ञाप्यते । **शौवहानमिति** । जिहतेऽस्मिन्निति ल्युट् । शुनां हानमिति षष्ठीसमासः । श्वहानमस्मिन्नस्तीति 'तदस्मिन्नस्तीति देशे तन्नाम्नी'त्यण् । वृद्धिनिषेधः, ऐजागमश्च द्वारादित्वात् । **शौवादंष्ट्र इति** । शुनो दंष्ट्रा श्वादंष्ट्रा । 'शुनो दन्तदंष्ट्रेति' दीर्घः। तत्र भव इत्यण् । 'संज्ञापूर्वको विधिरनित्य' इति वृद्धाच्छो न भवति । **इकारादिग्रहणमिति** । 'श्वादेरिती'ति सूत्रं कर्तव्यम् । तत्र 'यस्मिन्विधिस्तदादावल्ग्रहणे' इति तदादिविधिर्भवति । **श्वागणिक इति** । 'श्वगणाट्ठञ्चे'ति ठञ् । **तदन्तस्येति** । इञन्तस्य । **श्वाभस्त्रमिति** । 'इञश्चे'त्यण् । बाह्यतद्धितनिमित्तो वृद्धिप्रतिषेध ऐजागमश्च बहिरङ्गत्वादशक्य इञाश्रयेण निषेधेन निवारयितुमिति वचनारम्भः । [श्वादेरिञि] ॥

उत्तर[पदस्य] ।**किमर्थमिति**। 'तस्मा'दित्युत्तरस्येति वचनादुत्तरपदस्यैव वृद्धिर्भविष्यतीति प्रश्नः । आचार्यस्तु शिष्यबुद्धिपरीक्षार्थमाह—**अवयवादृतोरिति** ।

उ.]नामवयव' इत्यर्थ इति भावः। द्वारादीनां यकारवकारविशेषणत्वादपि सिध्यतीति बोध्यम् । **संज्ञापूर्वक इति** । प्रत्ययसंज्ञाविशिष्टस्यैव छस्य विधानादिति भावः । यत्तु 'स्वं रूप'मिति संज्ञापूर्वकत्वमिति, तन्न, अतिप्रसङ्गात् । 'ओरो'दिति वक्तव्ये 'ओर्गुण'इत्यस्य ज्ञापकत्वोच्छेदापत्तेश्च, ज्ञापितेऽपि चारितार्थ्याऽभावादित्याहुः । अन्ये तु 'शुनो दन्ते'ति भाष्ये न क्वापि दृश्यते । 'अन्येषामपि दृश्यते' इत्यस्याभियुक्तोक्तः प्रपञ्चः स, ततश्च श्वदंष्ट्राशब्दादेव प्रत्यये तदनन्तरं तेन दीर्घः । संज्ञापूर्वकस्याऽनित्यत्वं च न क्वापि भाष्ये आश्रितमित्याहुः । **बहिरङ्गत्वादिति** । प्रत्यासत्तिन्यायानाश्रयणबोधकं वचनमिति बोध्यम् । [श्वादेरिञि] ॥

उत्तरपदस्य । **तस्मादितीति**। 'अवयवादृतो'रित्यादौ। भाष्ये—**परिमाणा-**

र्धाज्जनपदस्ये'ति ॥ 'सुसर्वार्द्धा'दिति पञ्चमी ॥ 'दिशोऽमद्राणाम्' [इति] ॥ 'दिश' इति पञ्चमी ॥ 'प्राचां ग्रामनगराणाम्' [इति]॥ 'दिश'इत्येव॥ 'सङ्ख्यायाः संवत्सरसङ्ख्यस्य च' [इति] ॥ 'सङ्ख्याया' इति पञ्चमी । 'वर्षस्याभविष्यति' [इति] ॥ 'सङ्ख्याया' इत्येव ॥ 'परिमाणान्तस्याऽसंज्ञाशाणयो'-रिति ॥ 'सङ्ख्याया' इत्येव ॥

इदं तर्हि प्रयोजनं—'जे प्रोष्ठपदानाम्' । उत्तरपदस्य यथा स्यात्पूर्वपदस्य मा भूत्—प्रोष्ठपदासु जातः प्रोष्ठपादो ब्राह्मणः ।

॥ *॥ तद्धितेष्वचामादिवृद्धेरुत्तरपदवृद्धिर्विप्रतिषेधेन द्व्याशीतिकाद्यर्थम् ॥*॥ तद्धितेष्वचामादेरुत्तरपदवृद्धिर्भवति विप्रतिषेधेन ॥ किं प्रयोजनम्?॥ 'द्व्याशीतिकाद्यर्थम्' । अचामादिवृद्धेरवकाशः—ऐतिकायनः औपगवः । उत्तरपदवृद्धेरवकाशः—द्विषाष्टिकम् त्रिषाष्टिकम् । इहोभयं प्राप्नोति—द्व्याशीतिकः त्र्याशीतिकः । उत्तरपदवृद्धिर्भवति विप्रतिषेधेन ॥ कः पुनरत्र विशेषोऽचामादिवृद्धौ सत्यामुत्तरपदवृद्धौ वा ? ॥ अयमस्ति विशेषः—यद्यत्राऽचामादिवृद्धिः स्यादैजागमः प्रसज्येत ॥ [उत्तरपदस्य] ॥

प्र.]जे प्रोष्ठपदानामिति । पञ्चमीनिर्देशाऽभावादुत्तरपदस्य न स्यात् । वचनं त्वनाद्यजर्थं विज्ञायमानं पूर्वपदस्यापि वृद्धिं विदध्यात्, नियमार्थं वा स्यात्—'जातार्थ एव प्रोष्ठपदानां वृद्धिः','प्रोष्ठपदानामेव वा जातार्थे' इति । प्रोष्ठपाद इति । प्रोष्ठपदाभियुक्तः काल इत्यणो 'लुबविशेष' इति लुपि कृते सन्धिवेलादिसूत्रेण जातार्थेऽण् । अत्राङ्गस्याचामादेर्वृद्धिर्मा भूदित्येवमर्थमुत्तरपदाधिकारः । 'उत्तरपदवृद्धौ सर्वं चे'-त्यत्रोत्तरपदाधिकारविहितवृद्धिपरिग्रहार्थश्च । द्विषाष्टिकमिति । नन्वत्राप्यचामादेर्वृद्धिः प्राप्नोतीति कथमयमवकाशः ? अथात्र येन नाप्राप्तिन्यायेनादिवृद्धिर्बाध्यते तदा द्व्याशीतिके विप्रतिषेधानुपपत्तिः, उत्सर्गापवादयोरतुल्यबलत्वादिति वार्तिककारस्य विप्रतिषेधोपन्यासो न युक्त इति चिन्त्यमेतत् । यद्यत्रेति । सा च प्रतिषिध्येत ततस्तत्प्रतिषेधसन्नियुक्त ऐजागमः स्यादित्यर्थः । उत्तरपदवृद्धेस्तु यथाऽत्र प्रतिषेधो न भवति तथा 'न य्वाभ्या'मित्यत्र प्रतिपादितम् । [उत्तरपदस्य] ॥

उ.]न्तस्येत्यत्र सङ्ख्याया इत्येवेति।नन्वत्र'सङ्ख्याया' इत्यस्य संबन्धे'ऽसमासे निष्कादिभ्य' इति सूत्रस्थ'परमनैष्किक'मिति भाष्योदाहरणविरोध इति चेन्न ; अनुवृत्तस्य वाक्यभेदेन संबन्धात् । तेन 'परिमाणान्तस्ये'त्यस्याऽन्यत्र क्वाचित्कत्वे तेन परमनैष्किकसिद्धिरनतिप्रसङ्गश्चेत्यदोषात् । 'सङ्ख्याया' इत्येतद्वाक्यसाहचर्य्याच्चाऽस्यापि उत्तरपदे एव प्रवृत्तिरित्याशयात् । ननु पूर्वपदस्य सामान्यसूत्रेण सिद्धत्वाद्वचनं व्यर्थं स्यादत आह—वचनं त्विति । स्वयं फलान्तरमप्याह—उत्तरपदवृद्धाविति । चिन्त्यमेतदिति । 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य चे'त्यादौ

प्राचां ग्रामनगराणाम् ॥ ७।३।१४ ॥

नगरग्रहणं किमर्थं न 'प्राचां ग्रामाणा'मित्येव सिद्धम् ?॥ न सिध्यति । अन्यो हि[1] ग्रामोऽन्यन्नगरम् ॥ कथं ज्ञायते ? ॥ एवं हि कश्चित्कं चित्पृच्छति–'कुतो भवानागच्छति ग्रामात्' ? ॥ स आह–'न ग्रामान्नगरा'दिति ॥

ननु च भो!॥*॥य एव ग्रामस्तन्नगरं॥*॥ कथं ज्ञायते ?॥ लोकतः[2]। ये हि ग्रामे विधयो नेष्यन्ते साधीयस्ते नगरे न क्रियन्ते। तद्यथा–'अभक्ष्यो ग्राम्यकुक्कुटः' 'अभक्ष्यो ग्राम्यसूकर' इत्युक्ते सुतरां नागरोऽपि न भक्ष्यते । तथा 'ग्रामे नाध्येय'मिति साधीयो नगरेऽपि नाधीयते । तस्माद्य एव ग्रामस्तन्नगरम् ॥

कथं यदुक्तम्–"एवं हि कश्चित्कं चित्पृच्छति–कुतो भवानागच्छति ग्रामात्?। स आह–न ग्रामान्नगरा'दिति ? ॥ संस्त्यायविशेषमसावाचष्टे । संस्त्यायविशेषा ह्येते ग्रामो घोषो नगरं संवाह इति ॥ एवं तर्हि सिद्धे सति यद्ग्रामग्रहणे नगरग्रहणं करोति तज्ज्ञापयत्याचार्यो'ऽन्यत्र ग्रामग्रहणे नगरग्रहणं न भव-

---

प्र.] **प्राचां ग्रामनगराणाम्** । **नगरग्रहणमिति** । यद्यपि समुदायवचनोऽपि ग्रामशब्दोऽस्ति 'भूतग्राम' 'इन्द्रियग्राम' इति, तथापि जननिकायनिवासार्थत्वेनातिप्रसिद्धः–अभक्ष्यो ग्राम्यकुक्कुटः, ग्रामे नाध्येयमिति, तदर्थस्यैव ग्रहणमिति मत्वा प्रश्नः । **अन्यो हि ग्राम इति** । विशेषेण विशेषाऽन्तरस्याऽसंग्रहणान्नगरग्रहणम् । **साधीयस्तइति** । नगरस्याऽशुचितरत्वात् । **संस्त्यायविशेषमिति** । सामान्यशब्दस्याऽपि प्रकरणवशाद्विशेषाऽवस्थानं दृश्यते। संस्त्यायाच्चागमने निर्ज्ञाते विशेषपरिज्ञानाय 'कुत आगच्छती'ति प्रष्टव्ये ग्रामशब्दोच्चारणाद्विशेषवाची ग्रामशब्दोऽनेन प्रयुक्त इति प्रतीयते । **संस्त्यायो**–निवासः । ब्राह्मणकर्षकपुरुषप्रधानो देशो–**ग्रामः** । गोमहिष्यादियुक्तो–**घोषः** । प्राकारपरिखाऽन्वितं श्रेणीधर्मयुक्तसंस्थानं–**नगरं** । प्राकारपरिखाऽयुक्तस्तु श्रेणिधर्मान्वितो देशः–**संवाहः**।न च नगरशब्दसन्निधाने गोबलीवर्दन्यायेन विशिष्टग्रामग्रहणाय संवाहादेर्निवृत्तये नगरग्रहणं, संवाहादिनिवृत्तेरनिष्ट-

---

उ.] 'पूर्वपदस्य चे'त्युक्तेरन्यत्रोत्तरपदवृद्धिविषये पूर्वपदे वृद्ध्यभावबोधनादयमवकाशः । द्व्याशीतिके उत्तरसंबन्ध्यच एवोभयप्राप्तेर्विप्रतिषेधोपपत्तिः । फलविशेषपर्यवसायिनोर्द्वयोः संभवस्याऽभावाद्विप्रतिषेधमूलमसंभवोऽत्राप्यस्तीत्यन्ये ।

प्रतिपादितमिति । अनन्तरत्वादचामादिवृद्धेरेव स निषेध इति तत्सन्नियोगशिष्ट ऐजागमः स्यादिति भावः । [**उत्तरपदस्य**] ॥

प्राचां ग्राम । ननु ग्रामः समूहो, नगरं देशविशेष इत्यर्थभेदात्तदावश्यकमत आह––**यद्यपीति** । **निकायः**–समूहः । भाष्ये–**आगत इति** । **ग्रामादिति** । 'कुतो भवान्ग्रामादागत इति पृच्छती'त्यन्वयः । 'कुतो भवानागच्छति ग्रामा'दिति क्वचित्पाठः । **सामान्यशब्दस्यापीति** । एवञ्च ग्रामशब्दो जननिवाससामान्ये

ती'ति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ विशिष्टलिङ्गो नदीदेशोऽग्रामा' इत्यत्र नगरप्रतिषेधश्चोदितः स न वक्तव्यो भवति॥ यद्येतज्ज्ञाप्यते—'उदीच्य-ग्रामाच्च बह्वचोऽन्तोदात्ता'दित्यत्र नगरग्रहणं कर्तव्यम्। बाहीकग्रामेभ्यश्च नगरग्रहणं कर्तव्यम्। 'दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु'। नगरग्रहणं कर्तव्यम्। इदं चतुर्थं ज्ञापकार्थम्। तत्राऽतिनिर्बन्धो न लाभः। तस्माद्य-स्मिन्नेव ग्रामग्रहणे नगरग्रहणं नेष्यते तस्य प्रतिषेधो वक्तव्यः ॥

सङ्ख्यायाः संवत्सरसङ्ख्यस्य च ॥ ७।३।१५ ॥

॥*॥ संवत्सरग्रहणमनर्थकं परिमाणान्तस्येति कृतत्वात् ॥*॥ **संवत्सर-ग्रहणमनर्थकम् ॥ किं कारणम् ? ॥ 'परिमाणान्तस्येति कृतत्वात्'। परिमा-णान्तस्याऽसंज्ञाशाणयो'रित्येव सिद्धम्** ॥*॥ ज्ञापकं तु कालपरिमाणानां वृद्धि-प्रतिषेधस्य ॥*॥ **[एवं तर्हि ज्ञापयत्याचार्यः—'कालपरिमाणानां] वृद्धिर्न भवती'ति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ द्वैरात्रिकः त्रैरात्रिकः—अत्र वृद्धिर्न भवति ॥ नैतदस्ति प्रयोजनं, नास्त्यत्र विशेषः सत्यां वोत्तरपदवृद्धा-वसत्यां वा ॥ इदं तर्हि—द्वैसमिकः त्रैसमिकः ॥ इदं चापि प्रयोजनं—द्वैरा-त्रिकः त्रैरात्रिकः ॥ ननु चोक्तं'नास्त्यत्र विशेषः सत्यां वोत्तरपदवृद्धावसत्यां वे'ति ?॥ अयमस्ति विशेषः—यद्यत्रोत्तरपदवृद्धिः स्यादचामादेर्वृद्धिर्न स्यात् ॥**

प्र.] त्वात्। **उदीच्यग्रामाच्चेति**। 'मानगर'मित्यादावत्रर्थम्। **वाहीकग्रामेभ्यश्चेति**। 'शाकलिक' इत्याद्यर्थम्। **दिक्शब्दा इति**। 'पूर्वपाटलिपुत्र'मित्यादौ पूर्वपदान्तोदा-त्तार्थम्। **अतिनिर्बन्ध इति**। अतिगौरवम्। **न लाभ इति**। लाघवम्। **[प्राचां]**

सङ्ख्यायाः। संवत्सरग्रहणमिति। कालः क्रियापरिच्छेदहेतुत्वात्परिमाणं, तद्विशेषवाची संवत्सरशब्द इति भावः। **द्वैरात्रिक इति**। द्वे रात्री अधीष्ट इति तद्धितार्थे समासे 'रात्र्यहःसंवत्सराच्चे'ति वा खविधानात्पक्षे ठञ्। **द्वैसमिक इति**। अधीष्टादिषु 'समायाः खः' 'द्विगोर्वे'ति पक्षे ठञ्। **अचामादेर्वृद्धिर्न स्यादिति**। 'सत्यपि संभवे बाधनं भवती'ति न्यायात्। **अपर आहेति**। पूर्वं विशेषविषयं

उ.] तद्विशेषे चेति भावः। अतएव भाष्ये 'य एव ग्रामस्तन्नगरमिति संस्त्यायविशेषा ह्येते ग्रामो घोषो नगरं संवाह' इति चोक्तं। **श्रेणी**—सङ्घविशेषः। **तद्धर्मः**—संभूयोपादा-नाऽशनं। **प्राकारेति**। प्राकारपरिखाभ्यामयुक्त इत्यर्थः। **शाकलिक इति**। शाकलं नाम बाहीकेषु नगरम्। लभपदार्थमाह—**लाघवमिति**। एवञ्चाऽत्र नगरग्रहणं प्रत्या-ख्यातम् ॥ **[प्राचां ग्रामनगराणाम्]** ॥

सङ्ख्यायाः। काल इति। 'परिमाणान्तस्ये'त्यत्र परिच्छेदकमात्रं परिमाण-शब्देन गृह्यते, नतु सर्वतो मानमेव, शाणप्रतिषेधादिति भावः। **सत्यपि संभवे**

अपर आह ॥*॥ ज्ञापकं तु कालपरिमाणानां परिमाणाऽग्रहणस्य ॥*॥ एवं तर्हि ज्ञापयत्याचार्यः–'कालपरिमाणानां परिमाणग्रहणेन ग्रहणं न भवती'ति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ 'अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि'–द्विवर्षा त्रिवर्षा । परिमाणपदासेन पर्युदासो न भवति ॥

प्रवाहणस्य ढे ॥ ७।३।२८ ॥

परस्य वृद्धिर्नेत्यनुवर्तते उताहो न ? ॥ किं चातः ? ॥ यद्यनुवर्तते प्रवाहणेयी भार्याऽस्येति प्रवाहणेयीभार्यः,'वृद्धिनिमित्तस्ये'ति पुंवद्भावप्रतिषेधो न प्राप्नोति । अथ निवृत्तं, न दोषो भवति ॥ यथा न दोषस्तथास्तु ॥ अथवा पुनरस्त्वनुवर्तते। ननु चोक्तं–"प्रवाहणेयी भार्यास्य प्रवाहणेयीभार्यः–वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो न प्राप्नोती"ति[1] ॥ नैष दोषः, मा भूदेवं [2]जातेश्चेत्येवं भविष्यति ॥ [प्रवाहणस्य ढे] ॥

यथातथयथापु[3]रयोः पर्यायेण ॥ ७।३।३१ ॥

॥*॥ अयं योगः शक्योऽवक्तुम्॥*॥कथम्–अयाथातथ्यम् आयथातथ्यम्

प्र.] ज्ञापनमाश्रितम् । इदानीं तु सामान्यविषयमिति भेदः । द्विवर्षेति । द्वे वर्षे भृता। तमधीष्ट इति ठञ् । तस्य 'वर्षाल्लुक्चे'ति पक्षे लुक् । 'द्विगो'रिति ङीप्प्राप्तौ-'ऽपरिमाणे'ति प्रतिषिद्धः । [सङ्ख्यायाः संवत्सरसङ्ख्यस्य च] ॥

प्रवा। 'पूर्वस्य तु वे'ति वर्त्तते । तत्र यदा पूर्वपदस्य वृद्धिर्नास्ति तदोत्तरपदस्य वृद्धिभावाऽभावयोः श्रुतौ विशेषाऽभावाद्विशेषान्तरजिज्ञासया प्रश्नः–**परस्येति** । **प्रवाहणेयीति** । 'शुभ्रादिभ्यश्चे'ति ढक् । ननु वृद्धेर्निमित्तं यस्मिन् णकारादिः स वृद्धिनिमित्त इत्याश्रितम् । ततोऽसत्यामपि वृद्धौ वृद्धिनिमित्तव्यपदेशसद्भावात् पुंवद्भावप्रतिषेधो भविष्यति । नैतदस्ति । ञ्णकानां वृद्धिमुत्पादयतामेव वृद्धिं प्रति निमित्तत्वं नाऽन्यदा । यथा 'स्नुक्रमोरनात्मनेपदनिमित्ते' इत्यत्र सत्येवात्मनेपदे स्नुक्रमोरनात्मनेपदनिमित्तत्वादिडभावो, नाऽसति । **जातेरिति** । 'गोत्रं च चरणैः सहे'ति जातिवाचित्वात् । अनुवृत्तेरेवं प्रयोजनाऽभावः । [**प्रवाहणस्य ढे**]

उ.]इति। 'हृद्भगसिन्ध्वन्ते' इति पूर्वोक्तज्ञापकादित्यपि बोध्यम्। **इति भेद इति** । असङ्ख्यापूर्वपदे परिमाणान्तस्येत्यस्याऽप्रवृत्तेः । संज्ञाविषये त्वनभिधानं बोध्यम् । अन्यथा तद्विषये संवत्सरग्रहणस्य चारितार्थ्येन ज्ञापकं भज्येत।[सङ्ख्यायाः संवत्सर]॥

प्रवाहणस्य । भाष्ये–**परस्य वृद्धिर्नेति** । उत्तरपदाधिकारात्प्राप्तिः । **वृद्धिमुत्पादयतामिति** । फलोपहित एव निमित्तशब्दो मुख्य इति भावः । **जातीति** । अनन्तराऽपत्येऽपि गोत्रत्वारोपेण प्रत्ययात्प्रवाहणेऽपि सर्वथा जातिरेवेति बोध्यम् । **प्रयोजनाभाव इति** । हरदत्तस्तु तत्संबन्धाज्जातेश्चेत्यनित्यं, तेनौपसङ्ख्यानिकस्य न निषेध इत्याह । [सङ्ख्यायाः संवत्सरसङ्ख्यस्य च] ॥

अयाथापुर्यम् आयथापुर्यम् ?॥ यदा तावत्पूर्वपदस्य वृद्धिस्तदैवं विग्रहः करिष्यते–न यथातथा अयथातथा, अयथातथा भावः आयथातथ्यम् । यदोत्तरपदस्य वृद्धिस्तदैवं विग्रहः करिष्यते–यथातथाभावो याथातथ्यम् । न याथातथ्यम्–अयाथातथ्यम् ॥ [यथातथयथापुरयोः पर्यायेण]

हनस्तोऽचिण्णलोः ॥ ७।३।३२ ॥

॥* हन्तेस्तकारे तद्धिते प्रतिषेधः ॥ * ॥ **हन्तेस्तकारे तद्धिते प्रतिषेधो वक्तव्यः । वार्त्रघ्नं भ्रौणघ्नम्** ॥*॥ उक्तं वा॥*॥ **किमुक्तम् ?** ॥ धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धमिति ॥ [हनस्तोऽचिण्णलोः]

आतो युक् चिण्कृतोः ॥ ७।३।३३ ॥

कृद्ग्रहणं किमर्थम् ?॥ इह मा भूत्–ददौ दधौ ॥ नैतदस्ति प्रयोजनम्, अचिण्णलोरिति वर्तते ॥ यद्यचिण्णलोरिति वर्तते,–अदायि अधायीत्यत्र न प्राप्नोति ॥ वचनाच्चिणि भविष्यति–अचिण्णलोरिति वर्तते ॥ एवमपि चौडिः

प्र.] यथा । न यथातथेति । 'यथातथे'त्ययं निपातोऽविपरीतार्थवृत्तिरिति केचिदाहुः । **अन्ये** तु यथातथाशब्दयोः सुप्सुपेति समास एतदर्थ इत्याहुः । ततो नञिति समासे कृते ब्राह्मणादिषु दर्शनात् ष्यञ् । **स्वरे**ऽपि नास्ति विशेषः। 'आयथातथ्य'मित्यस्य ञित्वादाद्युदात्तत्वात्।अयाथातथ्यमित्यस्याप्यव्ययपूर्वपदप्रकृतिस्वरत्वात्। प्रत्ययान्तरार्थं त्वेतन्न भवति, अनभिधानादेताभ्यां प्रत्ययाऽन्तराभावात् । **[यथात]**

आतो । ददाविति । उत्तमस्य णलो णित्त्वाऽभावपक्षे सावकाशमौत्वं णित्त्वे परत्वाद्युग्बाधेत । **अदायीति ।** सूत्रे चिणो निमित्तत्वेनोपादानादचिण्णलोरित्यनुवर्तनाच्च विधिनिषेधयोः पर्यायः स्यात् । **वचनादिति ।** 'आतो युक् चिणि चे'ति

उ.] यथातथाय । एतौ पदार्थानतिवृत्तावव्ययीभावौ, तथा भावमनतिक्रान्तं यथातथं–सत्यं । पुरा यथाभूतं यद्वस्तु तदद्यापि तथाभावमनतिक्रान्तं–यथा**पुरम् ।** अतएव सूत्रे ह्रस्वनिर्देश इति केचित् । एतच्च 'यथातथाभाव' इति भाष्येण विरुध्यते । तस्मात्सूत्रेऽपि दीर्घपाठ एवोचित इति **परे । अयं निपात इति ।** विशिष्टो निपात इत्यर्थः । **अविपरीतार्थः**–सत्यरूपोऽर्थः । **एतदर्थ इति ।** सत्यरूपार्थ इत्यर्थः । **[यथातथायथापुरयोः पर्यायेण]** ॥

आतो युक् । ननु निरवकाशत्वाण्णल औत्वं बाधकं स्यादत आह—**उत्तमस्येति ।** इदमुपलक्षणं—भूतपूर्वगत्यौत्वस्य, दरिद्रातेरालोपे प्रवृत्त्या चारितार्थ्यात् । विषयभेदेनाऽपवादत्वाऽभाव इति तु नेत्युक्तम् । **पर्यायः स्यादिति ।** एवञ्च 'न प्राप्नोती'ति भाष्यस्य पक्षे न प्राप्नोतीत्यर्थ इति भावः । **असन्दिग्धो विधिरेवेति ।** तदुक्तं भाष्ये–'वचनाच्चिणि भविष्यत्यचिण्णलोरिति वर्तते' इति । इदं प्रत्यक्षं

वालाकिरित्यत्र प्राप्नोति ॥ लोपोऽत्र बाधको भविष्यति ॥ इदमिह सम्प्रधार्यं–लोपः क्रियतां युगिति,–किमत्र कर्तव्यं ?॥ परत्वाद्युक् ॥एवं तर्ह्यचामादेरिति वर्तते। यत्राचामादिराकारस्तत्र युगिति ॥ एवमपि ज्ञा देवता अस्य स्थालीपाकस्य ज्ञः स्थालीपाकः–अत्र प्राप्नोति । तस्मात्कृद्ग्रहणं कर्तव्यम्॥

नोदात्तोपदेशस्य मान्तस्याऽनाचमेः ॥ ७।३।३४ ॥

अत्यल्पमिदमुच्यते–अनाचमेरिति ॥ [॥*॥अनाचमिकमिवमीनाम् ॥*॥] अनाचमिकमिवमीनामिति वक्तव्यम् । आचामः कामः वामः ॥ [नोदात्तोप]

शाच्छासाह्वाव्यावेपां युक् ॥ ७।३।३७ ॥

॥*॥ णिप्रकरणे धूञ्प्रीञोर्नुग्वचनम् ॥*॥ णिप्रकरणे धूञ्प्रीञोर्नुग्वक्तव्यः । धूनयति प्रीणयति ॥*॥ पातेर्लुग्वचनम् ॥*॥ पालयति ॥

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ॥ ७।३।४४ ॥

'स्थ'ग्रहणं किमर्थम् ?॥ इदं विचारयिष्यते–''इत्वे कग्रहणं सङ्घातग्रहणं

प्र.]चिणः साक्षादुपादानान्निषेधो न भविष्यति। चिणि विधिः प्रत्यक्षशिष्टत्वादसन्दिग्धः, निषेधस्तु णलर्थ एवानुवर्तते अथ चिणर्थोऽपीति सन्दिग्ध इत्यसन्दिग्धो विधिरेव प्रवर्तते । अचामादेरिति वर्तत इति । नन्वेवं दरिद्रायके युङ् प्राप्नोति । एवं तर्हि दोषान्तरोपन्यासादयं दोषो नोक्तः।तदाह—एवमपीति । आदिवद्भावादत्र प्रसङ्गो यथा 'दाय' इत्यादौ । [आतो युक्] ॥

नोदा। काम इति। 'आयादय आर्धधातुके वे'ति यदा णिङ्नास्ति तदा घञि वृद्धिनिषेधस्य पर्युदासः। 'विश्रामशब्दस्त्वसाधुरेवोद्यमोपरमौ, 'संज्ञापूर्वको विधिरनित्य' इति वृद्ध्यभावात्। [नोदात्तोप] ॥

शाच्छा । पातेर्लुगिति । यद्यपि 'पाल रक्षणे' इत्यस्य पालयतीति सिध्यति तथापि पातेःपुङ्निवृत्तये लुगागमविधानम् । लुग्विकरणत्वात्तस्य युकोऽप्रसङ्गः।

प्रत्ययस्था । स्थग्रहणमिति । कादिति वर्णग्रहणं, न च वर्णमात्रं ककारः

उ.] तदानुमानिकमित्यर्थः । आदिवद्भावादिति । 'आद्यन्तवदेकस्मि'न्नित्यनेनाऽचामादित्वमिति भावः। [आतो युक् चिण्कृतोः] ॥

नोदात्तो । ननु कर्मणिङि वृद्धौ णिलोपे कामः सिद्धोऽत आह—आयादय इति । उद्यमोपरमेति । तयोरनुदात्तोपदेशत्वादिति भावः । वृद्ध्यभावादिति । घञर्थे के साधु इत्यन्ये । [नोदात्तो] ।

शाच्छा । युग्निवृत्तये इति । 'अर्तिह्री'ति प्राप्तपुग्निवृत्तये इत्यर्थः । नन्वनेन पुङ्निवृत्तय इति वक्तुं युक्तमत आह—लुग्विकरणत्वादिति ।

वा स्याद्वर्णग्रहणं वे''ति। तद्यदा सङ्घातग्रहणं तदा स्थग्रहणं कर्तव्यम् । इहापि यथा स्यात्–कारिका हारिका । यदा हि वर्णग्रहणं तदा केवलः ककारः प्रत्ययो नास्तीति कृत्वा वचनाद्भविष्यति ॥

अथाऽसुप इति, कथमिदं विज्ञायते–'असुब्वतोऽङ्गस्ये'ति, आहो स्विन्न चेत्सुपः पर आ'बिति ॥ किं चातः ?॥ यदि विज्ञायते–असुब्वतोऽङ्गस्येति,–बहुचर्मिका–अत्र न प्राप्नोति । अथ विज्ञायते–'न चेत्सुपः पर आ'बिति, न दोषो भवति ॥ यथा न दोषस्तथाऽस्तु ॥

इदं विचार्यते–इत्वे कग्रहणं सङ्घातग्रहणं वा स्याद्वर्णग्रहणं वेति ? ॥

प्र.]प्रत्ययोऽस्तीति सामर्थ्यात्प्रत्ययावयवे प्रत्ययशब्दो वर्तिष्यत इति प्रश्नः । इतरः पक्षान्तरे प्रयोजनमाख्यातुमाह–**इदमिति** । वक्ष्यमाणस्य बुद्ध्या प्रत्यक्षीकृत्य परामर्शः। **इहापीति** । अन्यथा 'दत्तिके'त्यादावेव स्यात्।अज्ञाताद्यर्थविवक्षायामत्र कप्रत्ययः । स्थग्रहणे तु क्रियमाणे सर्वत्र भवति, प्रत्ययस्यापि व्यपदेशिवद्भावेन प्रत्ययस्थत्वात् ।**असुब्वत इति** । न सुब्वदसुब्वदिति नञ्समासः । 'असुप' इत्यस्य बहुव्रीहित्वप्रदर्शनाय भाष्यकारेण लाघवं नाश्रितं। तदाश्रयणेहि बहुव्रीहिरेव न्याय्यो न तु मतुबन्तः समासः । तत्रायं प्रश्नः–किमसुप इति बहुव्रीहिराश्रीयते,–न विद्यते सुब्यस्मिंस्तदसुबिति, अथ तत्पुरुषः प्रसज्यप्रतिषेधश्च,–न चेत् सुपः पर आबिति ?। प्रत्ययग्रहणेन तदन्तविधेः सुबन्तादिति बोद्धव्यम् । **बहुचर्मिकेति** । बहूनि चर्माणि अस्यामिति बहुव्रीहिः । प्रत्ययलक्षणेन सुब्वदेतदङ्गमिति इत्वं न प्राप्नोति । 'न लुमताङ्गस्ये'ति निषेधोऽत्र नास्ति, लुमता लुप्ते यदङ्गं तस्य कार्ये स प्रतिषेधः, इदं तु टाप्यङ्गम् । **न दोषो भवतीति** । चर्मशब्दः सुबन्तो, न च तस्मात्पर आप्, व्यवधानात् । बहवः परिव्राजका अस्यां सा बहुपरिव्राजकेति अत्र तु प्रत्ययलक्षणेन सुबन्तात्परिव्राजकशब्दात्पर आबिति प्रतिषेधः प्रवर्तते । पर्युदासाश्रयणे समासादसुबन्तात्पर आबिति स्यादेवाऽत्रेत्वम् । तथाऽसुप इत्यनर्थकं स्यादिति प्रसज्यप्रतिषेध आश्रीयते । **इत्व इति** । यद्यकारान्तस्य शब्दस्य

उ.] **प्रत्ययस्थात्** । ननु वक्ष्यमाणस्याऽप्रत्यक्षत्वात्कथमिदमा परामर्शोऽत आह–**वक्ष्यमाणस्येति** । ननु स्थग्रहणे दत्तकेत्यादौ प्रत्ययस्य कशब्दस्य प्रत्ययस्थत्वाऽयोगोऽत आह–**प्रत्ययस्यापीति** । **प्रसज्येति** । एवञ्च सौत्रत्वादसमर्थसमास इति भावः । ननु सुब्लोपात्कथमेतत्सुब्वदङ्गमत आह—**प्रत्ययलक्षणेनेति** । **टाप्यङ्गमिति** । आपि परे यदङ्गमविद्यमानसुप्कं तदवयवाऽकारस्य प्रत्ययस्थकात्पूर्वस्येत्त्वमिति सूत्रार्थादिति भावः। **चर्मशब्दः सुबन्त इति**। 'गोस्त्रियो'रिति सूत्रस्थभाष्यप्रामाण्येनबहु जस् चर्मन् जस् इत्यवस्थायां उत्तङ्गजसुत्तरं कपि समासान्ते पूर्वसुपोस्तद्धितान्तत्वात्प्रातिपदिकत्वेन लुक्यपि प्रत्ययलक्षणेन सुबन्तत्वात्कपः पूर्वभागस्य

कश्चात्र विशेषः ॥*॥ इत्वे कग्रहणं सङ्घातग्रहणं चेदेतिकास्वप्राप्तिः ॥*॥ **इत्वे कग्रहणं सङ्घातग्रहणं चेदेतिकास्वप्राप्तिः । एतिकाश्चरन्ति ॥ वचनाद्भविष्यति ॥ अस्ति वचने प्रयोजनम् ॥ किम् ? ॥ कारिका हारिकेति** [3] **॥ अस्तु तर्हि वर्णग्रहणम्** ॥*॥ वर्णग्रहणं चेद्व्यवहितत्वादप्रसिद्धिः ॥*॥ **वर्णग्रहणं चेद्व्यवहितत्वान्न प्राप्नोति । कारिका हारिका । अकारेण व्यवहितत्वान्न प्राप्नो-**

प्र.]कादिति निर्देशःततः सङ्घातग्रहणम् ।अथाऽऽगन्तुनाऽकारेण उच्चारणार्थेन निर्देशः, ततो वर्णग्रहणम् । ननु वर्णग्रहणे स्थग्रहणस्यानर्थक्यात् स्थग्रहणात्सङ्घातग्रहणेन भाव्यम् । नैतदस्ति । कोऽत्र निर्दोषः पक्ष इति विचार्यते । यदि च सङ्घातग्रहणपक्षो दोषवान्, तन्मा कारि स्थग्रहणमुपचयो भविष्यति । **एतिका इति** । एतदोऽकचि जसि त्यदाद्यत्वे टापीत्वे च रूपम् । अकचोऽकार उच्चारणार्थो न श्रवणार्थः । तेन धकिद्भिरकुदित्यादि सिध्यति । **वचनादिति** । यथैव कारिकेत्यादावेकादेशे कृतेऽनच्के ककारे संपन्ने भूतपूर्वगत्या भवति,एवमकज्विधिसूत्रे कशब्दः सङ्घात उच्चारित इति तदाश्रया इत्वप्रवृत्तिः । **अस्तीति** । एकादेशस्य पूर्वविधौ स्थानिवद्भावात् । अथवा **वचना**दित्यस्यायमर्थः—न यासयोरिति वचनाज्ज्ञापकाद्भविष्यति । इतरस्त्वगृहीताभिप्राय आह—**अस्तीति** । ततश्चाभिप्रायमप्रकाश्य पक्षान्तरमाश्रयति—**अस्तु तर्हीति । व्यवहितत्वादिति** । ननु चापीत्यनेन ककारो न विशेष्यते, किं तर्ह्यकारः—'आपि च परतोऽकारस्य कात्पूर्वस्ये'ति व्यवहितस्याऽपि पूर्वत्वादित्वं

उ.] समाससंज्ञा । यद्वा कप्समाससंज्ञयोर्युगपत्प्रवृत्तिः । कपः समासावयवत्वं तु वाचनिकमेव । समासान्तविषये च सुबन्तात्तद्धितोत्पत्तिरित्यस्य त्यागः, प्रत्ययस्य निरर्थकत्वात्परिपूर्णं पदमित्यादिन्यायविषयाऽभावादिति भावः । एतेन 'कबन्तस्य प्रातिपदिकत्वेन ततः सुपि ततः समास' इत्यपास्तं, तावताऽप्यनेकसुबन्ताभावेन समासस्य दुरुपपादत्वात् । अत्रेत्त्वासिद्धेश्चेति दिक् । 'असुप' इत्यस्य प्रत्युदाहरणं दर्शयति—**बहव इति । उपचय इति** । तदकारणाल्लाघवमित्यर्थः । न च वर्णग्रहणे स्थग्रहणाऽभावे कान्तात्प्रत्ययादित्यर्थः स्यादिति वाच्यं, 'क्षिपकादीना'मिति निषेधवैयर्थ्यापत्तेः । एवञ्च पूर्वग्रहणमपि मास्तु, 'प्रत्यये की' त्येव युक्तं, कादावित्यर्थस्तु 'न यासयो'रिति निषेधसामर्थ्यान्नेति भावः । **उच्चारणार्थ इति**। एवञ्च प्रत्ययस्थकशब्दस्याऽभाव इति भावः । ननु वचनस्य कारिकादिरवकाशः स्यादत आह—**यथैवेति**। **एकादेश इति**। अन्तरङ्गत्वात्। वार्णादाङ्गमिति तु विभिन्नस्थानिकत्वान्नेति भावः । **स्थानिवद्भावादिति** । नचैवमकारस्य नाप्परत्वं, ककाराऽकाराभ्यां व्यवधानादिति वाच्यम् , सामर्थ्येनाऽदोषात् । अतएव 'न यासयो'रित्यादि चरितार्थम् । अतएवैतिकाशब्दे त्रिभिर्व्यवायेऽपि न दोषः। भाष्ये—**अकारेणेति** । ककारेण व्यवधानन्तु वचनात्सोढव्यमेवेति भावः । **व्यवहितस्यापीति** । पूर्वग्रहणमुभयान्वयी-

ति ॥ एकादेशे कृते नास्ति व्यवधानम् ॥ 'एकादेशः पूर्वविधौ स्थानिवद्भव-त्ती'ति स्थानिवद्भावाद्व्यवधानमेव॥एवं तर्ह्याहाऽयं–'प्रत्ययस्थात्कात्पूर्वस्ये'ति, न क्व चिद्व्यवधानं, तत्र वचनाद्भविष्यति ॥*॥ वचनप्रामाण्यादिति चेद्रथकव्यादिष्वतिप्रसङ्गः ॥*॥ वचनप्रामाण्यादिति चेद्रथकव्यादिषु दोषो भवति । रथकव्या गर्गकाम्या॥ नैष दोषः । येन नाऽव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । केन च नाऽव्यवधानम् ? ॥ वर्णेनैकेन ॥ सङ्घातेन पुनर्व्यवधानं भवति, न भवति च ।

अथ वा पुनरस्तु सङ्घातग्रहणम्॥ ननु चोक्त''मित्वे कग्रहणं सङ्घातग्रहणं चेदेतिकास्वप्राप्ति''रिति ॥ परिहृतमेतत्–'वचनाद्भविष्यती'ति ॥ ननु चोक्तम'स्ति वचने प्रयोजनम् । किम् । कारिका हारिके'ति ॥ अत्राप्येकादेशे कृते व्यपवर्गाऽभावान्न प्राप्नोति ॥ अन्तादिवद्भावेन व्यपवर्गः ॥ उभयत आश्रये नान्तादिवत् ॥ एवं तर्हि–'एकादेशः पूर्वविधौ स्थानिवद्भवती'-

---

प्र.] प्रवर्तिष्यते। नैतदस्ति। रथकव्यादावप्येवं प्रसङ्गात् । किं च 'कात्पूर्वस्ये'ति पूर्वग्रहणं कृतं न त्वापि पूर्वस्येति । ततश्च निर्दिष्टपरिभाषोपस्थानाद्व्यवधाने न प्राप्नोति । तत्र वचनादिति । आनन्तर्यमसम्भवान्नाश्रीयते । रथकव्येति । रथानां समूह इति 'इनित्रकट्यचश्चे'ति कट्यच् । गर्गकाम्येति । गर्गमिच्छत्यात्मन इति काम्यच्प्रत्ययान्तादप्रत्ययादित्यकारप्रत्ययः । येन नाव्यवधानमिति । नानन्तर्यं परित्यज्यते किंतु यावत्संभवति तावदाश्रीयते। यद्येवमेतिकाइत्यत्र द्वाभ्यामकाराभ्यां व्यवधानादित्वं न प्राप्नोति । एकस्तसंबन्ध्यकारो द्वितीयस्त्यदादीनाम इत्यकारः । नैष दोषः । द्वयोकारयोरेकादेशे कृते टापा सहैकादेशस्य स्थानिवद्भावादेकेनैवाऽकारेण व्यवधानं, न पुनः स्थानिवत्त्वप्रतिपत्तिः–यतो द्वावकारौ व्यवधायकौ स्याताम्, सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात् । व्यपवर्गाऽभावादिति । 'वार्णादाङ्गं बलीय' इत्येतदनाश्रित्योक्तम् । उभयत इति । 'आपि यः कशब्द' इत्येवमुभयमाश्रीयते । अथ त्वापि परतोऽकारस्य कात्पूर्वस्येत्याश्रयिष्यते तथाप्युभयमेवाश्रितं तुल्यकालं

उ.]त्यभिमानः। कात्पूर्वस्येतीति। तत्र पूर्वग्रहणं तु 'कटुके'त्यादौ परस्य कार्यित्वनिवृत्त्यर्थमावश्यकम् । तत्संबन्धीति । तकारस्य संबन्धीत्यर्थः । एकादेशे कृते इति । 'अतो गुणे' इत्यनेन टापा सहैकादेशस्य स्थानिवद्भावं विना पूर्वैकादेशस्य स्थानिवत्त्वं वक्तुमशक्यं, तस्य टाबेकादेशेनापहारेणाऽदर्शनादिति भावः। न पुनरिति। अकारयोरेकादेशस्येति भावः । सकृत्प्रवृत्त्येति । 'न यासयो'रिति निषेधोऽप्यत एव चरितार्थः । अनाश्रित्येति । भिन्नस्थानिकत्वादिति भावः । ननु युगपदुभयाश्रयणे एव स निषेध इति तत्प्रत्याख्यानपरा'न्नैकः प्रेष्योऽविरोधार्थी युगपदुभयोः

ति स्थानिवद्भावाद्यपवर्गः ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—'भवत्येवंजातीयकानामपीत्त्व'मिति यदयं 'न यासयो'रिति प्रतिषेधं शास्ति ॥

॥*॥ मामकनरकयोरुपसङ्ख्यानमप्रत्ययस्थत्वात् ॥*॥

मामकनरकयोरुपसङ्ख्यानं कर्तव्यम् । मामिका नरिका ॥ किं पुनः कारणं न सिध्यति ? ॥ 'अप्रत्ययस्थत्वात्' ॥*॥ त्यक्त्यपोश्च प्रतिषिद्धत्वात् ॥*॥ त्यक्त्यपोश्चोपसङ्ख्यानं कर्तव्यम् । दाक्षिणात्यिका इहत्यिका ॥

किं पुनः कारणं न सिध्यति ? ॥ 'प्रतिषिद्धत्वात्' । 'उदीचामातः स्थाने यकपूर्वाया' इति प्रतिषिद्धत्वात् ॥ [प्रत्ययस्थात्कात्] ॥

न यासयोः ॥ ७।३।४५ ॥

॥*॥ न यत्तदोः ॥*॥ न यत्तदोरिति वक्तव्यम् ॥ इहापि यथा स्यात्—यकामधीमहे, तकां पचामह इति ॥*॥ प्रतिषेधे त्यकन उपसङ्ख्यानं ॥*॥ प्रतिषेधे त्यकनउपसङ्ख्यानं कर्तव्यम् । उपत्यका अधित्यका ॥ तत्तर्हि उपसङ्ख्यानं कर्तव्यम्? ॥ न कर्तव्यम् । आचार्यप्रवृत्तिर्ज्ञापयति—'नैवंजातीयकानामित्वं भवती'ति यदयं

प्र.]भवति । एवंजातीयकानामिति । प्रकारवचने जातीयर्प्रत्ययः । अकज्वतामित्यर्थः । मामिकेति । ममेयं । 'युष्मदस्मदोरन्यतरस्यां खञ्चे'त्यन्यतरस्याङ्ग्रहणात्प्राग्दीव्यतोऽणित्यण् । 'तवकममकावेकवचने' इति ममकादेशः । 'केवलमामके'त्यनेन संज्ञाछन्दसोर्ङीपो नियमादन्यत्र टाप् । नरं कायतीति नरिका । दाक्षिणात्यिकेति । दक्षिणस्मिन्देशे [—दक्षिणा] । 'दक्षिणादाच्' । तत्र भवा 'दक्षिणापश्चात्पुरसस्त्य'गिति त्यक् । अज्ञाताद्यर्थविवक्षायां कः । इह भवा—इहत्यिका । 'अव्ययात्त्यप्' । पूर्ववत्कः । 'उदीचामात' इति पाक्षिकप्रतिषेधप्रसङ्गे वचनम् ॥

न यासयोः । या सेति प्रथमैकवचनान्तयोरुपादानाद्विभक्त्यन्तरे प्रतिषेधाऽप्रसङ्गादाह—(न) यत्तदोरिति । उपत्यकेति । 'उपाधिभ्यां त्यकन्नासन्नारूढयो'रिति त्यकन् । नैवंजातीयकानामिति । येऽनेकाचो व्यञ्जनादयः प्रत्ययाः संज्ञाविषयास्तेषामित्यर्थः । यदयमिति । ननु च तद्धितलुगर्थमिकारोच्चारणं स्यात्, अन्यथा पञ्चभिर्मृत्तिकाभिः क्रीत इत्या'र्हा'दिति ठकोऽध्यर्धपूर्वेति लुकि कृते' 'लुक्तद्धितलुकी'ति टापो लुकि निमित्ताऽभावादित्वं न स्यात्—पञ्चमृत्तिक इति । अन्तरङ्गांश्च विधीन्सर्वो-

---

उ.]करोती'त्यादिकाद्भाष्याल्लभ्यतेऽत आह—तुल्यकालमिति । 'तुल्यकालमेवोभयमाश्रित' मित्यन्वयः । आप्ककारश्च युगपदकारविशेषणत्वेनाश्रिताविति भावः ॥

न यासयोः । यत्तदोरिति । सूत्रे स्वरूपं न विवक्षितमिति तात्पर्यं । संज्ञाविषया इत्यस्य प्रयोजनं चिन्त्यम् । ननु लुकः पूर्वमन्तरङ्गत्वादित्त्वमत

'मृदस्तिक'न्नितीत्वभूतं निर्देशं करोति ॥*॥पावकादीनां छन्दस्युपसङ्ख्यानं ॥*॥ **पावकादीनां छन्दस्युपसङ्ख्यानं कर्तव्यम् । हिरण्यवर्णाः शुचयः पावकाः । ऋक्षका: अलोमकाः ॥ छन्दसीति किमर्थम् ? ॥ पाविका अलोमिका** ॥*॥ आशिषि चोपसङ्ख्यानं ॥*॥ **आशिषि चोपसङ्ख्यानं कर्तव्यम् । जीवतात् जीवका । नन्दतान्नन्दका । भवताद्भवका** ॥*॥ उत्तरपदलोपे चोपसङ्ख्यानं ॥*॥ **उत्तरपदलोपे चोपसङ्ख्यानं कर्तव्यम् । देवदत्तिका देवका । यज्ञदत्तिका यज्ञका** ॥*॥ क्षिपकादीनां चोपसङ्ख्यानम् ॥*॥ **क्षिपकादीनां चोपसङ्ख्यानं कर्तव्यम् । क्षिपका ध्रवका ध्रुवका चटका** ॥*॥ तारका ज्योतिष्युपसङ्ख्यानं ॥*॥ **तारका ज्योतिष्युपसङ्ख्यानं कर्तव्यम् । तारका । ज्योतिषीति किमर्थम् ? ॥ तारयतीति तारिका दासी** ॥*॥ वर्णका तान्तवे उपसङ्ख्यानं ॥*॥ **वर्णका तान्तवे उपसङ्ख्यानं कर्तव्यम् । वर्णका । तान्तव इति किमर्थम् ? ॥ वर्णिका भागुरी लोकायतस्य** ॥*॥ वर्तका शकुनौ प्राचामुपसङ्ख्यानं ॥*॥**वर्तका शकुनौ**

प्र.]लुग्बाधते न सुब्लुगेव, तथा च 'सनीस्रंस' इत्यादौ नलोपो न भवति । पञ्चभिः खट्वाभिः क्रीतः पञ्चखट्व इत्यादौ टापा सहैकादेशो न भवति । अन्यथैकादेशस्यादिवद्भावादाब्ग्रहणेन ग्रहणाल्लुकि कृतेऽकारस्य श्रवणं न स्यात् । तदेवं सति प्रयोजने न ज्ञापकमिकारोच्चारणमिति चिन्त्यमेतत् । त्यिकन्निति प्रक्रियालाघवाय स्त्रीविषयत्वाद्वक्तव्ये त्यकन्नित्यकारोच्चारणमित्त्वाऽभावस्य न ज्ञापकम् । पञ्चभिरुपत्यकाभिः क्रीतः पञ्चोपत्यक इत्यादौ तद्धितलुकि अकारश्रवणार्थत्वात्तस्य ।

पावका इति । पुनन्ति पावयन्तीति वा पावकाः । **जीवकेति** । 'आशिषि चे'ति वुन् । **देवकेति** । 'अनजादौ च विभाषा लोपो वक्तव्य' इति दत्तशब्दस्य लोपः । **क्षिपकेति** । क्षिपेरिगुपधत्वात् के कृते अज्ञातादिषु कः । अथ वा 'कुञ्छिलिपिसंज्ञयो'रिति क्वुन् । **ध्रुवकेति** । 'ध्रुव गतिस्थैर्ययोः' । **धुवकेति** । 'धू विधूनने' । **वर्णकेति** । वर्णयति महत्त्वादिकं गुणमिति **वर्णका**—प्रावरणविशेषः । तन्तूनां विकारस्तान्तवम् । 'ओरञि'त्यञ् । **वर्णिकेति** । व्याख्यानीत्यर्थः । **भागुरी—**

उ.]आह—**अन्तरङ्गांश्चेति । चिन्त्यमेतदिति।** वस्तुतस्तु भाष्यप्रामाण्यादेतद्विषयेऽन्तरङ्गानपीत्यस्य ज्ञापकसिद्धस्याऽसार्वत्रिकत्वेनाऽनित्यत्वमङ्गीकार्यम् ,अस्याऽनभिधानं (चे) वेत्याहुः । 'स्त्रीविषयत्वात्प्रक्रियालाघवाय त्यिकनिति वक्तव्यमित्यन्वयः । **पुनन्ति पावयन्तीति वेति** । अर्थद्वयस्याप्युपलंभादिति भावः । **ध्रु गतीति** । पचाद्यचि कुटादित्वाद्गुणाऽभावे अज्ञातादिषु कः क्वुन्वा ।

वर्णयतीति । स्वगतं गुणं प्रकाशयतीत्यर्थः । **व्याख्यानीति** । लोका-

प्राचामुपसङ्ख्यानं कर्तव्यम् ॥*॥ **वर्त्तका शकुनिः॥ शकुनाविति किमर्थम् ?॥ वर्तिका भागुरी लोकायतस्य। प्राचामिति किमर्थम् ?॥ वर्त्तिका** ॥*॥ अष्टका पितृदेवत्ये उपसङ्ख्यानम् ॥*॥ **अष्टका पितृदेवत्ये उपसङ्ख्यानं कर्तव्यम्। अष्टका। पितृदेवत्य इति किमर्थम् ? ॥ अष्टिका खारी** ॥*॥ वा सूतकापुत्रकावृन्दारकाणामुपसङ्ख्यानम् ॥*॥ **वा सूतकापुत्रकावृन्दारकाणामुपसङ्ख्यानं कर्तव्यम्। सूतका-सूतिका। पुत्रका-पुत्रिका। वृन्दारका वृन्दारिका ॥** [नया]

उदीचामातः स्थाने यकपूर्वायाः ॥ ७।३।४६ ॥

किमर्थं स्त्रीलिङ्गनिर्देशः क्रियते न यकपूर्वस्येत्येवोच्येत ? ॥ स्त्रीविषयो य आकारस्तस्य स्थाने योऽकारस्तस्य प्रतिषेधो यथा स्यादिह मा भूत्-शुभं यातीति शुभंयाः शुभंयिका। भद्रंयाः-भद्रंयिका ॥*॥ यकपूर्वे धात्वन्तप्रतिषेधः ॥*॥ **यकपूर्वे धात्वन्तप्रतिषेधो वक्तव्यः॥ किं प्रयोजनम् ? ॥ सुनयिका सुशयिका अशोकिका अपाकिका ॥** [उदीचामातः स्थाने] ॥

प्र.]टीकाविशेषः। **अष्टकेति**। 'इष्यशिभ्यां तक'न्निति तकन्। पितरश्च देवताः पितृदेवताः, तदर्थं कर्म-पितृदेवत्यम्। 'देवतान्तात्तादर्थ्ये य'दिति यत्। **अष्टिकेति**। अष्टौ परिमाणमस्याः। 'संख्याया अतिशदन्तायाः क'न्निति कन्। **सूतकेति**। 'न सामिवचने' इति प्रतिषेधाज्ज्ञापकात्स्वार्थे कन्। **पुत्रिकेति**। पुत्रशब्दाच्छार्ङ्गरवादित्वात् ङीन्प्रत्ययस्ततः स्वार्थे कन्। 'केऽण' इति ह्रस्वः। तस्य पक्षेऽकारो विधीयते। **वृन्दारिकेति**। वृन्दमस्यास्तीति 'शृङ्गवृन्दाभ्यामारकन्प्रत्ययो वक्तव्य' इत्यारकन् ॥ [**न यासयोः**] ॥

उदीचाम्। स्त्रीविषय इति। अर्थगतं स्त्रीत्वं शब्दे समारोप्य निर्देशः कृतः। **शुभंयिकेति**। शुभं याति, भद्रं यातीति क्विप्। शुभंभद्रंशब्दौ निपातौ। अज्ञाताद्यर्थविवक्षायां कः। 'केऽण' इति ह्रस्वः। **यकपूर्व इति**। धात्वन्ताभ्यां यकारककाराभ्यां परस्याऽऽतः स्थानेऽकारस्येत्त्वप्रतिषेधस्य प्रतिषे / निरव भव-

---

उ.]यतशास्त्रस्य व्याख्यानरूपो ग्रन्थविशेष इत्यर्थः। 'वर्त्तिका भागुरी'त्यत्रापि वर्तिकेत्यस्य व्याख्यानीत्यर्थः। **इष्यशिभ्यामिति**। अश्नन्ति ब्राह्मणा अस्यामित्यर्थः। **स्वार्थे कनिति**। सूतैव सूतकेत्यर्थः। यावादित्वादित्यन्ये। **पुत्रशब्दादिति**। वार्तिके 'पुत्रके'ति अकारमध्यपाठोऽपपाठः, कैयटविरोधात्। **अकार इति**। 'वा-अ' इति च्छेदेनेत्यर्थः। सूतकादौ त्वित्त्वबाधनार्थ एव पक्षेऽकार इति बोध्यम्। [**नयास**]।

उदीचामातः स्थाने यकपूर्वायाः। स्त्रीलिङ्गनिर्देशमात्रेण कथमाकारस्य स्त्रीविषयत्वं लभ्यतेऽत आह—**अर्थगतमिति**। धात्वन्तशब्देन तथाभूतौ यकारकारौ लक्ष्येते इत्याह—**धात्वन्ताभ्यामिति**। [उदीचामातः] ॥

भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि ॥ ७।३।४७ ॥

एषाद्वे नञ्पूर्वे अनुदाहरणे असुप इति प्रतिषेधात् ॥ अथ भस्त्राग्रहणं किमर्थं, न अभाषितपुंस्कादित्येव सिद्धम् ?॥*॥ भस्त्राग्रहणमुपसर्जनार्थम् ॥*॥ **उपसर्जनार्थोऽयमारम्भः । अभस्त्रका अभस्त्रिका ॥*॥** नञ्पूर्वग्रहणानर्थक्यं चोत्तरपदमात्रस्येद्वचनात् ॥*॥ **नञ्पूर्वग्रहणं चानर्थकम् ॥ किं कारणम् ? ॥ 'उत्तरपदमात्रस्येद्वचनात्' । उत्तरपदमात्रस्येत्वं वक्तव्यम् । निर्भस्त्रका–निर्भस्त्रिका । बहुभस्त्रका–बहुभस्त्रिका॥*॥**इति श्रीमद्भगवत्पतञ्जलिमुनिविरचिते व्याकरणमहाभाष्ये सप्तमस्य तृतीये पादे प्रथममाह्निकम् ॥*॥ ७।३।१ ॥

प्र.] त्येव । शोभनो नयोऽस्याः सुनया । नास्ति शोकोऽस्या अशोका । पूर्ववत्कः ।

भस्त्रै । पाक्षिकप्रतिषेधार्थ आरम्भः । **एषाद्वे इति** । न एषका, न द्वके इति विगृह्याऽन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधत इत्यकृतेषु त्यदाद्यत्वादिषु समासे कृते सुब्लुकि च समासाद्या विभक्तिस्तस्यां त्यदाद्यत्वं, ततष्टाप् । स च प्रत्ययलक्षणेन सुबन्ताभ्यां पर इत्यसुप इतीत्त्वप्रतिषेधस्य व्यापारादनेषका इत्येव भवति । तस्मादनञ्पूर्वयोरेवैतयोः पाक्षिकप्रतिषेधः–एषका एषिका, द्वके द्विके इति । एषेति प्रथमैकवचननिर्देशादन्यत्र नित्यमित्त्वम्–'एतिकाश्चरन्ती'ति । **अभस्त्रिकेति** । नास्ति भस्त्रा अस्या इति बहुव्रीहावुपसर्जनह्रस्वत्वे कृते यष्टावुत्पद्यते स भाषितपुंस्काद्भस्त्रशब्दात्पर इत्युत्तरसूत्रेण पाक्षिकप्रतिषेधाऽप्रसङ्गाद्भस्त्राग्रहणम् । **नञ्पूर्वग्रहणानर्थक्यमिति** । अपिग्रहणेन केवलानां समुच्चयादन्यपूर्वाणामप्रसङ्गान्न कर्तव्यं नञ्पूर्वग्रहणम् । तत्र पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च ग्रहणात्सर्वेष्टसिद्धिः॥

* इति **कैयटकृते** महाभाष्य**प्रदीपे सप्तमस्य तृतीये प्रथमाह्निकम्** ॥*

उ.] भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि । नित्यत्वस्य प्रत्ययस्थादित्येव सिद्धेः सूत्रारम्भफलमाह—**पाक्षिकेति** । 'उदीचा'मित्यनुवर्तनादिति भावः । **प्रत्ययलक्षणेनेति** । 'अन्तर्वर्तिसुब्लुक' इति शेषः । भाष्ये–**नञ्पूर्वे**त्युपलक्षणं, सपूर्वेऽनुदाहरणे इत्यस्याऽर्थस्य, तुल्यन्यायात् । तेन **परमैषके**त्येवे' त्यादि बोध्यम् ।

प्रथमैकवचनेति । अतएव 'एषाद्वे नञ्पूर्वे अनुदाहरणे' इति भाष्ये 'एषेत्येव'क्तम् । अविवक्षितत्वे 'एतद्वी'त्येव वदेदिति बोध्यम् । **नास्ति भस्त्रेति** । एतेनानुपसर्जनेप्यादाचार्याणामित्यात्वबाधनार्थं भस्त्राग्रहणमित्यपास्तम् । उपसर्जने चारिताथ्र्येन बाधे मानाऽभावात् । नञ्पूर्वग्रहणकरणे दोषमाह—**अन्यपूर्वाणामप्रसङ्गादिति** । अथाऽपिग्रहणेन केवलानामन्यपूर्वाणां ग्रहस्तथापि न कार्यमेवेत्याह–**तत्र पदाङ्गेति** । भाष्ये—**उत्तरपदमात्रस्येत्वं वक्तव्यमिति** । उत्तरपदमात्रस्य यथेत्त्वं भवति तथा तद्व्याख्येयमित्यर्थः ॥ इति श्री**नागोजीभट्टकृते** भाष्यप्रदी**पोद्द्योते सप्तमस्य** तृतीये **प्रथममाह्निकम्** ॥ ७।३।१ ॥

ठस्येकः ॥ ७।३।५० ॥

किमिदं ठादेशे वर्णग्रहणमाहोस्वित्सङ्घातग्रहणम् ? ॥ कश्चात्र विशेषः?॥
॥*॥ ठादेशे वर्णग्रहणं चेद्धात्वन्तप्रतिषेधः ॥*॥ **ठादेशे वर्णग्रहणं चेद्धात्वन्तस्य प्रतिषेधो वक्तव्यः। पठिता । पठितुम् ॥ अस्तु तर्हि सङ्घातग्रहणं** ॥*॥सङ्घातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेधः॥*॥ **सङ्घातग्रहणं चेदुणादिमाथितिकादीनां प्रतिषेधो वक्तव्यः। उणादीनां तावत्—कण्ठः शण्ठः वण्ठः । इह च मथितं पण्यमस्य माथितिक इति,—अकारलोपे कृते तान्तादिति कादेशः प्राप्नोति । वर्णग्रहणे पुनः सत्यल्विधिरयं भवति** ॥*॥ तस्माद्विशिष्टग्रहणम् ॥*॥ **तस्माद्विशिष्टस्य ठकारस्य ग्रहणं कर्तव्यम् ॥[तत्तर्हि कर्त्तव्यम् ?।]**

प्र.] **ठस्येकः। किमिदमिति** । किं व्यञ्जनमात्रं प्रतिपिपादयिषितमागन्तुना तूच्चारणार्थेन अकारेण निर्देशोऽथ सङ्घात एव स्थानी निर्दिष्ट इति प्रश्नः । **धात्वन्तप्रतिषेध इति** । सङ्घातग्रहणे त्वेष न दोषः। पठतीत्यत्रापि ठस्यानर्थक्यादर्थवद्ग्रहणपरिभाषयाऽर्थवत्सङ्घातग्रहणादप्रसङ्गः । वर्णग्रहणे त्वर्थवद्ग्रहणपरिभाषाया अव्यापारः, वर्णग्रहणपक्षे च ठगादिष्वकार उच्चारणार्थो, वर्णमात्रं प्रत्ययः। **कण्ठ इति** । 'कणेष्ठः' । **शण्ठ इति** । शमेः—'शमिदाच्युसि'ति ठः। **वण्ठ इति** । वनो'ऽन्येभ्योपि दृश्यत' इति ठः । वर्णपक्षेऽप्युणादीनां प्रसङ्गः, सत्यति सङ्घातस्य प्रत्ययत्वे । इह च सङ्घातग्रहणे ठगादयः सङ्घाता एव प्रत्ययाः प्रतिज्ञायन्ते । **माथितिक इति** । सन्निपातलक्षणपरिभाषामनाश्रित्य चोद्यते । अन्यथाऽजादिसन्निपातेन तान्तता उपजाता कथमजादिविघातनिमित्तं स्यात् । वर्णग्रहणे त्वनल्विधाविति स्थानिवत्त्वनिषेधादिकस्य कादेशाऽप्रसङ्गः । ननु तान्तादङ्गात्परस्य ठस्य कादेशो विधीयते, न चैतत्तकारान्तमङ्गं, तकारान्तात्प्रत्ययस्याऽविधानात् । नैतदस्ति । एकदेशविकृतस्यानन्यत्वादङ्गं भवति, तकारान्तं चेति कादेशः प्राप्नोत्येव । **तस्माद्विशिष्टग्रहण-**

उ.] ठस्येकः। ननु विशिष्टोच्चारणात्संशयोऽयुक्तोऽत आह—**किं व्यञ्जनेति** । ननु पठतीत्यत्र ठशब्दोऽस्त्येवेत्यत आह **आनर्थक्यादिति** । ननु वर्णग्रहणेऽप्यानर्थक्यं तुल्यमत आह—**वर्णग्रहणे त्विति** । ननु ठगादिषु सङ्घातस्योपलब्धेस्तेषामिहाऽनुकृतत्वाद्वर्णग्रहणपक्षानुपपत्तिरत आह—**वर्णग्रहणपक्षे चेति** । अतएवाऽत्र पक्षेऽङ्गनिमित्तं यष्ठकार इति वक्ष्यमाणं भाष्यं सङ्गच्छते । **वर्णपक्षेऽप्युणादीनामिति** । ठस्य सद्भावादिति भावः । ननु ठगादिषु वर्णमात्रस्य प्रत्ययत्वात्कथमत्र सङ्घातग्रहणमत आह—**इह चेति** । विशिष्टपदार्थमाह—**तद्धितस्येत्यादि** । वस्तुतः स्वरिताऽकारविशिष्टं पठनीयमित्यर्थः, 'विशिष्टस्य ठकारस्य ग्रहण'मिति भाष्यात् । माथितिस्तुकठक्छसोरितिवार्तिकस्थभाष्योक्तरीत्या संनिपातपरिभाषया सिद्ध इति

न कर्तव्यम् ॥ अस्तु तावद्वर्णग्रहणम् । ननु चोक्तं "ठादेशे वर्णग्रहणं चेद्धात्वन्त-प्रतिषेध" इति॥ नैष दोषः—'अङ्गा'दिति वर्तते ॥ न वै अङ्गादिति पञ्चम्यस्ति॥ एव तर्हि 'प्रत्ययस्थस्ये'ति वर्तते ॥ क्व प्रकृतम् ?॥ 'प्रत्ययस्थात्कात्पूर्वस्यात इ-दाप्यसुप' इति ॥ तद्वै पञ्चमीनिर्दिष्टं षष्ठीनिर्दिष्टेन चेहाऽर्थः॥ अर्थाद्विभक्ति-विपरिणामो भविष्यति । तद्यथा—'उच्चानि देवदत्तस्य गृहाणि । आमन्त्रय-स्वैनम् ।' 'देवदत्त'मिति गम्यते । 'देवदत्तस्य गावोऽश्वा हिरण्यञ्च । आढ्यो वैधवेयः' । 'देवदत्त' इति गम्यते । पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं, द्वितीयानिर्दिष्टं च भवति । एवमिहापि—पुरस्तात्पञ्चमीनिर्दिष्टं सदर्थात्षष्ठी-निर्दिष्टं भविष्यति ॥ एवमप्युणादीनां प्रतिषेधो वक्तव्यः ॥ न वक्तव्यः । ॥*॥ उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥*॥

एवमपि 'कर्मठ' इत्यत्र प्राप्नोति ॥ एवं तर्ह्यङ्गस्येति संबन्धषष्ठी विज्ञा-स्यते—'अङ्गस्य यष्ठकारः'॥ किञ्चाऽङ्गस्य ठकारः ? ॥ निमित्तम् ॥ यस्मिन्नङ्ग-मित्येतद्भवति ॥ कस्मिंश्चैतद्भवति ? ॥ प्रत्यये ॥

अथ वा पुनरस्तु सङ्घातग्रहणम् ॥ ननु चोक्तं 'सङ्घातग्रहणं चेदुणादि-माथितिकादीनां प्रतिषेध' इति ॥ उणादीनां तावत्प्रतिषेधो न वक्तव्यः । परिहृतमेतत्—"उणादयोऽव्युत्पन्नानि प्रातिपदिकानी"ति । यदप्युच्यते—"इह च मथितं पण्यमस्य माथितिक इत्यकारलोपे कृते 'तान्ता'दिति कादेशः प्राप्नोती"ति । नैष दोषः—अकारलोपस्य स्थानिवद्भावान्न भविष्यति ॥

प्र.]मिति । 'तद्धितस्य ठादेरिक' इति कर्तव्यम् । एवं च माथितिक इत्यत्र ठादेरिति वचनादल्विधित्वात्स्थानिवद्भावाऽभावात्कादेशस्याऽप्रसङ्गः । **अङ्गादिति वर्तत इति** । अर्थवशाद्विभक्तिविपरिणाम इति भावः । **एवं तर्हीति** । सामर्थ्यात्षष्ठ्यन्त-मूह्यते । इतरो न क्वचित्षष्ठ्यन्तं प्रकृतमिति मत्वाह—**क्व प्रकृतमिति** । **र्था-दिति** । ठस्येति षष्ठ्यन्तेन सम्बन्धात् षष्ठ्यन्तत्वेन विपरिणामः । कर्मणि घटते, 'कर्मणि घटोऽठ'जित्यठच् । **अङ्गस्येति** । संबन्धषष्ठीत्वेनोपादानाद्विशिष्टो निमित्त-निमित्तिभावलक्षणः संबन्धो विवक्षितः । तेनाङ्गाऽवयवस्याऽप्रसङ्गः। अङ्गव्यपदेश-निमित्तप्रत्ययग्रहणात्कर्मठ इति प्रत्ययावयवस्य न भवति । ननु समुदायस्य निमि-त्तत्वेनाऽवयस्यापि निमित्तत्वमाश्रीयते, तथा चकतुश्चक्रुरित्यत्र द्विर्वचननिमित्त-

उ.]भाष्यार्थ उचित इति भाति । यद्वोणादिविषयमेवैतत् । माथितिके त्वग्रे परिहरिष्यत इति भावः । 'अङ्गस्ये'त्यस्य प्रकृतत्वादङ्गादिति वर्तत इत्ययुक्तमत आह—**अर्थ-वशादिति** । धात्वन्तनिवृत्त्यर्थं पञ्चम्यन्तस्येहोपयोगादिति भावः । पञ्चम्यन्तस्य कथं षष्ठ्यन्तत्वमत आह—**सामर्थ्यादिति** । पञ्चम्यन्तस्याऽन्वयाऽयोग्यत्वादिति भावः । **तेनाऽङ्गावयवस्येति** । 'पठिते'त्यादौ । अरुचिपरिहारमुपपादयति—**अङ्गव्य-**

न सिध्यति–पूर्वविधौ स्थानिवद्भावो न चायं पूर्वविधिः ॥अयमपि पूर्वविधिः। पूर्वस्मादपि विधिः पूर्वविधिरिति ॥ अथाप्युणादयो व्युत्पाद्यन्ते एवमपि न दोषः, क्रियते न्यास एव विशिष्टग्रहणं–'ठस्ये'ति ॥ [ठस्येकः] ॥

इसुसुक्तान्तात्कः ॥ ७।३।५१ ॥

इह कस्मान्न भवति,–आशिषा तरति–आशिषिकः। उषा तरति औषिकः ? ॥ 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवे'ति ॥ अथेह कथं भवितव्यं–दोर्भ्यां तरति ?॥ दौष्क इति भवितव्यम् ॥ कथम् ?॥ यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते ॥ [इसुसुक्तान्तात्कः] ॥

प्र.] पदेशात्स्थानिवद्भवति। एवं तर्हि साक्षान्निमित्तमिह गृह्यते, स्थानिवत्त्वे तु लक्ष्यवशाद्यथाकथंचिन्निमित्तमाश्रीयते। **पूर्वस्मादपि विधिरिति** । सम्बन्धसामान्यवचनषष्ठ्यन्तस्य पूर्वशब्दस्य विधिशब्देन समास आश्रीयते। अथ वा वर्णग्रहणात्तदन्तत्वे लब्धे तान्तादित्यन्तग्रहणं प्रत्ययोपदेशकाले तान्तग्रहणार्थमिति माथितिके कादेशाऽप्रसङ्गः । **अथापीति** । सर्पिषा यजुषेत्यादौ षत्वाद्यर्थं व्युत्पत्तिपक्षोऽप्यङ्गीक्रियते। **(क्रियते) न्यास एवेति** । येषां ठशब्दानामिगिष्यते तेष्वकारः स्वरित उच्चारितः, तदनुकरणं स्वरितमेव ठस्येति, न चोणादिठस्याऽकारः स्वरित इत्यादेशाऽप्रसङ्गः । **[ठस्येकः]** ॥

इसुसु। **आशिषेति** । 'आङः शासु इच्छाया'मित्यस्मादाशासनमाशीरिति संपदादित्वाद्भावे क्विप्। 'आशासः क्वावुपसङ्ख्यान'मितीत्वम् । **उषेति** । वसेः क्विप् । 'वचिस्वपी'ति संप्रसारणम् । षत्वस्याऽसिद्धत्वादिसुसौ भवत इति कादेशप्रसङ्गः । **लक्षणेति** । **लाक्षणिकम्**–अनुमेयरूपम् । **प्रतिपदोक्तं** तु प्रत्यक्षरूपम् । **अथेति** । 'दौष्क' इति दृश्यते न च प्राप्नोतीति प्रश्नः । **दौष्क इति** । 'तरती'ति ठक्। उपसङ्ख्येयोऽत्र कादेश इति भावः। क्व चित्त–"कथं ?॥ यदि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते॥" इति पाठः। तत्र 'यदी'ति निपातो नसन्देहार्थ उपात्तः किं तर्हि यदेत्यस्यार्थे वर्तते ॥ ओकारे य उकारः स उकारग्रहणेन गृह्यते। यत्र च समुदायाश्रयं कार्यं नास्ति तत्राऽवयवाः स्वकार्यस्य प्रयोजका एव । तथा च नुड्विधिलादेसवि-

---

उ.]पदेशे इति। साक्षादिति । समुदायस्यैव मुख्यं निमित्तत्वमित्यर्थः। **अथवेति** । 'इसुसु'गिति भिन्नं लुप्तपञ्चम्यन्तं पदं, 'ता'दिति भिन्नं । तेन तकारेणैवाऽन्तपदसंबन्ध इति वायुदत्तशब्दाट्ठचि दत्तलोपे 'वायुक' इत्यादौ न दोषः । नियमेन प्रत्ययोपदेशकाले इत्यर्थलाभः कथमितीदं चिन्त्यम् । सन्निपातपरिभाषयाऽपि माथितिके दोषवारणं प्रागुक्तं । कथं यथान्यासेन वारणं, तदाह—**येषामिति** ।

इसुसु । **षत्वस्येति** । 'शासिवसिघसीनाञ्चे'त्यस्येत्यर्थः। ननु समुदाये गुणभूता अवयवाः कथं स्वकार्यं प्रवर्त्तयेयुरत आह—**यत्र समुदायेति** । सन्देहा-

हो हन्तेर्ञ्णिन्नेषु ॥ ७।३।५४ ॥

किमिदं ञ्णिन्नकारग्रहणं हन्तिविशेषणं 'ञ्णिन्नकारपरस्य हन्तेर्यो हकार' इति, आहोस्विद्धकारविशेषणं 'ञ्णिन्नकारपरस्य हकारस्य, स चेद्धन्तेरिति ?॥ कश्चात्र विशेषः ? ॥*॥ हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिः ॥*॥ **हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धिः। घ्नन्ति घ्नन्तु अघ्नन्॥अस्तु तर्हि हकारविशेषणम्॥**

॥*॥ हकारस्येति चेञ्ञ्णित्यप्राप्तिर्व्यवहितत्वात् ॥*॥ **हकारस्येति चञ्ञ्णित्यप्राप्तिः। घातयति घातकः॥ किं कारणम्?॥'व्यवहितत्वात्'। नकारेणव्यवहितत्वान्न प्राप्नोति॥ वचनाद्भविष्यति॥ इहापि वचनात्प्राप्नोति—हननमिच्छति हननीयति—हन-नीयतेर्ण्वुल्—हननीयक इति** ॥*॥ स्थानिवद्भावाच्चाऽचो नकारेऽप्रसिद्धिः॥*॥**स्थानिवद्भावाच्चाऽचो नकारेऽप्रसिद्धिः स्यात्। घ्नन्ति घ्नन्तु॥वचनाद्भविष्यति।** ॥*॥ वचनप्रामाण्यादिति चेदलोपे प्रतिषेधः॥*॥ **वचनप्रामाण्यादिति चेदलोपे प्रतिषेधो वक्तव्यः। हन्ता हन्तुम्।** [॥*॥नकारग्रहणसामर्थ्यादलोपे

प्र.]नामा ऋकारावयवाश्रयाः प्रवर्तन्ते। अग्रहणपक्षे तु यथा नुड्विधिलादेशविनामेषु प्रतिविधीयते तथा दोष उपसङ्ख्यानं कर्तव्यमिति सन्देहार्थोपि यदिशब्दो व्याख्येयः॥

हो हन्तेः। किमिदमिति। हन्तिरपीहोपात्तो हकारोऽपि, तत्र किं हकारस्य प्राधान्याद्विशेषणसंबन्धोऽथ प्रधानोपकाराय गुणस्यापि हन्तेः ?। पक्षद्वये च दोषदर्शनात्प्रश्नः। द्वन्द्वनिर्दिष्टास्तु ञ्णिन्ना एकयोगक्षेमा न्याय्या इति भिन्नेन संबन्धिना सम्बन्धं प्रतिपत्तुमनर्हाः—'ञ्णिति हन्तेर्नकारे हकारस्ये'ति। **हन्तेरिति।** स्वावयवेन पौर्वापर्याऽयोगात्। **ञ्णित्यप्राप्तिरिति।** 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति परिभाषोपस्थानाद्धकारस्य च ञ्णिताऽऽनन्तर्याऽसंभवात्। **वचनादिति।** निर्दिष्टपरिभाषोपस्थानायेन नाव्यवधानमिति शब्दान्तरव्यवायो निवर्त्यते। इतरस्तु व्यवधानसंभवान्निर्दिष्टाङ्गविकलपरिभाषोपस्थानं मत्वाह—**इहापीति। स्थानिवद्भावाच्चाऽच इति।** अचो य आदेशो लोपस्तस्येत्यर्थः। **नकारग्रहणेति।** सर्वत्र व्यवहितो नकारो

उ.] **र्थमिति।** पक्षान्तरे परिहारस्यानुत्थानं दर्शयितुं सन्देहार्थोऽपि **यदिशब्दो** व्याख्येय इत्यर्थः। वर्णैकदेशानां वर्णग्रहणेन ग्रहणेऽप्यनर्थकत्वादप्रत्ययत्वाच्च कथमस्य प्रवृत्तिरिति चिन्त्यम्। अतएवाऽस्य क्वाचित्कपाठता कैयटेनोक्ता। दौष्के 'इणः ष' इति षत्वम्। [इसुसुक्तान्तात्कः] ॥

हो हन्तेः। प्राधान्यादिति। विशेष्यत्वात्कार्यान्वयित्वाच्चेत्यर्थः। **प्रधानोपकारायेति।** प्रधानस्य कुत्वस्य बहुविषयलाभरूपोपकारायेत्यर्थः। **द्वन्द्वनिर्दिष्टास्त्विति।** सहविवक्षायां द्वन्द्वेन तन्निर्दिष्टानां तुल्यतया एकत्र सम्बन्धस्य न्याय्यत्वादित्यर्थः। **स्वावयवेनेति।** भिन्नवस्तुविषयत्वात्पौर्वापर्यव्यवहारस्येत्यर्थः।

न ॥*॥]। नकारग्रहणसामर्थ्यादल्लोपे न भविष्यति ॥ अस्त्यन्यन्नकारवचनस्य प्रयोजनम् ॥ ? किम् ? ॥ श्रूयमाणविशेषणम् । यत्र नकारः श्रूयते तत्र यथा स्यादिह मा भूत्–हतो हथ इति ॥*॥ सिद्धं तूपधालोप इति वचनात् ॥*॥ सिद्धमेतत् ॥ कथम् ? ॥ ['उपधालोप इति वचनात्'] । उपधालोपे चेति वक्तव्यम् ॥ सिध्यति, सूत्रं तर्हि भिद्यते ॥

यथान्यासमेवाऽस्तु । ननु चोक्तं–'हन्तेस्तत्परस्येति चेन्नकारेऽप्रसिद्धि'-रिति ? ॥ वचनाद्भविष्यति ॥ अथ वा पुनरस्तु–हकारविशेषणम् ॥ ननु चोक्तं 'हकारस्येति चेञ्णित्यप्राप्ति'रिति ? ॥ वचनाद्भविष्यति ॥ ननु चोक्त-'मिहापि वचनात्प्राप्नोति हननीयक' इति ? ॥ नैष दोषो, येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् । न च क्वचिद्धात्ववयवेनाऽव्यवधानम्, एतेन पुनः सङ्घातेन व्यवधानं भवति, न च भवति । यदप्युच्यते–'स्थानिवद्भावाच्चाऽचो नकारेऽप्रसिद्धि'रिति । वचनाद्भविष्यति ॥ ननु चोक्तं 'वचनप्रामाण्यादिति चेदल्लोपे प्रतिषेध' इति ॥ नैष दोषः । आनन्तर्यमिहाश्रीयते–'हकारस्य नकार' इति । क्व चिच्च संनिपातकृतमानन्तर्यं, न शास्त्रकृतमानन्तर्यं, क्व चिच्च न सन्निपातकृतं नापि शास्त्रकृतम् । लोपे सन्निपातकृतमानन्तर्यम्,

प्र.]हकारात्पर इति नकारग्रहणसामर्थ्याञ्ञ्णिद्ग्रहणसामर्थ्याच्च श्रुतिकृतमानन्तर्यमाश्रयिष्यते । सिद्धं त्विति । नकारग्रहणमपनीय उपधालोपग्रहणं कर्तव्यम् । वचनाद्भविष्यतीति । एकग्रहणकवाक्यनिबन्धनानि बहूनि वाक्यानि लक्ष्यस्य संस्कारकाण्युपप्लवन्ते।'हो हन्तेर्णिति''हो हन्तेर्निति''हो हन्तेर्न'इति । सहविवक्षायां द्वन्द्वेऽपि यथासंभवं विशेषणविशेष्यभाव इति ञिता णिता च हन्तिर्विशेष्यते, नकारेण हकारः। येन नाव्यवधानमिति । तस्मिन्निति निर्दिष्ट इति परिभाषोपस्थानेन धात्ववयवेन नित्यव्यवायाच्छब्दान्तरेण व्यवधानं निवार्यते। वचनादिति । सत्यपि स्थानिवद्भावकृते व्यवधाने श्रुतिकृताऽनान्तर्याश्रयणात् । नापि शास्त्रकृतमिति । यथामन्त्रितं

उ.] ननु वचनसामर्थ्याद्व्यवधाने प्रवृत्तावतिप्रसङ्गः स्यादत आह–निर्दिष्टेति । नन्वजादेशस्य स्थानिवत्त्वं नत्वच इत्यत आह–अचो य इति । ञ्णिद्ग्रहणसामर्थ्याच्चेति । सर्वत्र नकारपरत्वादेव सिद्धेस्तद्वैयर्थ्यमिति भावः । घातयतीत्यादावप्यन्तरङ्गत्वात्पूर्वं कुत्वं, ततस्तत्वमिति तात्पर्यम् । ननु सत्यपि वचने स्वावयवेनपौर्वापर्याभावादप्रतिपत्तिरत आह–एकग्रहणकेति ।सहविवक्षायां द्वन्द्वेपीति । 'हो हन्ते'-रिति समुदायविषयान्वयेन स साधुरिति भावः। सौत्रो द्वन्द्व इत्यन्ये । श्रुतिकृतेति । सामर्थ्यादिति भावः । भाष्ये 'न शास्त्रकृतमानन्तर्य'मिति पाठः । क्व पुनः शास्त्रकृतमानन्तर्यमत आह–यथेति । अत्र हि अविद्यमानवद्भावाच्छौतव्यवधानेऽपि

न शास्त्रकृतमानन्तर्यम्, अलोपे नैव सन्निपातकृतं नापि शास्त्रकृतम् । यत्र कुतश्चिदेवानन्तर्यं तदाश्रयिष्यामः ॥ [होहन्तेर्ञ्णिन्नेषु] ॥

अभ्यासाच्च ॥ ७।३।५५ ॥

॥*॥ अभ्यासात्कुत्वमसुपः ॥*॥ **अभ्यासात्कुत्वमसुप इति वक्तव्यम् । इह मा भूत्–हननमिच्छति हननीयति, हननीयतेः सन् जिहननीयिषतीति ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् ।** 'हन्तेरभ्यासा'दित्युच्यते **न चैष हन्तेरभ्यासः ॥ हन्तेरेषोऽभ्यासः ॥ कथम् ? ॥** 'एकाचो द्वे प्रथमस्ये'ति **॥ एवं तर्हि** 'हन्तेरङ्गस्य योऽभ्यासस्तस्मा'**दित्युच्यते न चैष हन्तेरङ्गस्याऽभ्यासः ॥ हन्तेरङ्गस्यैषोऽभ्यासः ॥ कथम् ? ॥** 'एकाचो द्वे प्रथमस्ये'ति **॥ एवं तर्हि यस्मिन् हन्तिरङ्गं तस्मिन्योऽभ्यासस्तस्मादित्युच्यते, यस्मिंश्चाऽत्र हन्तिरङ्गं न तस्मिन्नभ्यासो, यस्मिंश्चाभ्यासो न तस्मिन्हन्तिरङ्गं भवति** । [अभ्यासाच्च] ॥

प्र.]पूर्वमविद्यमानवदित्युक्तं तथाऽकारस्य शास्त्रेणाऽव्यवधायकत्वं न क्व चित्प्रतिपादितमित्यर्थः । कुतश्चिदिति । निर्दिष्टपरिभाषोपस्थानात् । [हो हन्तेः] ॥

अभ्यासा । असुप इति । असुबन्तावयवस्य हन्तेरभ्यासात्परस्य कुत्वं न तु सुबन्तावयवस्येत्यर्थः । **हन्तेरभ्यासादिति** । अङ्गाधिकारेण चाऽभ्यासेन च प्रत्ययस्याक्षेपादभ्यासनिमित्ते प्रत्यये हन्तेरङ्गस्य योऽभ्यासस्तस्मात्कुत्वमिति भावः।इतरस्त्वगृहीताभिप्राय आह–**हन्तेरिति** । पूर्वोक्तेनाऽभिप्रायेणाह–**हन्तेरङ्गस्येति** । तथा चोक्तं 'सिद्धं तु परस्परं प्रत्यङ्गप्रत्ययसंज्ञाभावा'दिति । **न चैष हन्तेरङ्गस्येति** । अभ्यासनिमित्ते प्रत्यये हन्तिरत्र नाङ्गमित्यर्थः। इतरोऽङ्गमात्रमाश्रित्याह–**हन्तेरिति**। आचार्यः स्वाभिप्रायं प्रकाशयति–**एवं तर्हीति** । यथा जघनिथेति थलि हन्तिरङ्गं, तस्मिन्नेव चाऽभ्यासः । [**अभ्यासाच्च**] ॥

उ.]शास्त्रकृतमव्यवधानं,न तथेह, तथा शास्त्राऽभावादित्यर्थः । [हो **हन्तेः**] ॥

अभ्यासाच्च । नन्वभ्यासस्य क्वापि सुबन्तत्वाऽभावादसुप इति व्यर्थमत आह–**असुबन्तेति** । 'जिहननीयिषती'त्यत्र सुबन्तात्क्यज्विधानेन सुबन्तावयवो हन्तिरित्यर्थः । 'आचारक्विबाख्यानण्यन्तेभ्यः सनादिकमनभिधानान्नास्त्येवे'ति भावः । तत्र कुत्वे इष्टापत्तिस्तु न, वक्ष्यमाणप्रत्याख्यानविरोधात् । ननु हन्तेरेवाऽयमभ्यासोऽत आह—**अङ्गाधिकारेण चेति । अभ्यासनिमित्ते प्रत्यय इति** । प्रत्यासत्त्येति भावः । अङ्गेन प्रत्ययाक्षेपे बीजमाह–**तथा चोक्तमिति** । 'अङ्गस्ये'-त्यत्र । अत एवास्याऽङ्गाधिकारे पाठश्चरितार्थः । नन्वङ्गाधिकारपाठाऽभावेऽपि अभ्यासेन स्वघटितसमुदायस्य प्रत्ययान्तत्वाक्षेपे तत्र प्रत्ययस्य प्रकृत्याकाङ्क्षायां प्रत्यासत्त्योपस्थितत्वेन हन्तेरेव संबन्धेन 'जिहननीयिषती'त्यादौ नाऽतिप्रसङ्गः । स्पष्टा चेयं रीतिर्ह्वः संप्रसारणमभ्यस्तस्येत्यत्र कैयट इति चेन्न, शब्दानुपस्थित-

ह्रेरचङि ॥ ७।३।५६ ॥

अचङीति किमर्थम् ?॥ प्राजीहयद्दूतम् ॥ ॥*॥ हेश्चङि प्रतिषेधानर्थक्यमङ्गाऽन्यत्वात् ॥*॥ **हेश्चङि प्रतिषेधोऽनर्थकः ॥ किं कारणम् ? ॥ 'अङ्गान्यत्वात्' । ण्यन्तमेतदङ्गमन्यद्भवति ॥ लोपे कृते नाऽङ्गान्यत्वम् ॥ स्थानिवद्भावादङ्गान्यत्वमेव** ॥*॥ ज्ञापकं त्वन्यत्र ण्यधिकस्य कुत्वविज्ञानार्थम् ॥*॥ **एवं तर्हि ज्ञापयत्याचार्यो'ऽन्यत्र ण्यधिकस्य कुत्वं भवती'ति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ 'प्रजिघायथिषती'त्यत्र कुत्वं सिद्धं भवति ॥** [ह्रेरचङि] ॥

सँल्लिटोर्जेः ॥ ७।३।५७ ॥

॥*॥ जिग्रहणे ज्यः प्रतिषेधः ॥*॥ **जिग्रहणे ज्यः प्रतिषेधो वक्तव्यः जिज्यतुः जिज्युरिति ॥ स तर्हि प्रतिषेधो वक्तव्यः ? ॥ न वक्तव्यः 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवे'त्येवमेतस्य न भविष्यति ॥ सा तर्ह्येषा परिभाषा कर्तव्या ? ॥ अवश्यं कर्तव्या, अध्याप्य गत इत्येवमर्थम् ॥**

प्र.] **ह्रेर । अचङीति किमर्थमिति ।** यस्मिन्हिनोतिरङ्गं तस्मिन्नभ्यासे विज्ञायमाने,—णौ हिनोतिरङ्गं चङ्यभ्यास इति कुत्वं न भविष्यतीति मत्वा प्रश्नः ।

अन्यत्रेति । सनादावित्यर्थः । [**ह्रेरचङि**] ।

सन्लिटोः । जिज्यतुरिति । 'ज्या वयोहानौ' लिट्यतुसि ग्रहिज्यादिसूत्रेण संप्रसारणे कृते पूर्वैकादेशे च यद्यपि 'हल' इति दीर्घत्वं क्रियते तथाप्येकदेशविकृतस्याऽनन्यत्वाद्यथा जयतेर्जिगीषतीत्यत्र कुत्वं भवत्येवं जिनातेः प्राप्नोति । **अध्याप्येति ।** 'विभाषाऽऽप' इत्ययादेश इङादेशात्पुगन्तात्परस्य णेर्न भवति ॥

उ.]प्रत्ययाक्षिप्तप्रकृतेः शाब्दबोधविषयत्वे मानाऽभावात् । अत्र चैवमादीनामङ्गाधिकारे पाठ एव ज्ञापकः। परे त्वत्र प्रत्ययाक्षेपस्य नोपयोगः, 'हन्तेरङ्गावयवस्य योऽभ्यास' इत्यर्थेऽङ्गाभ्यासयोर्द्वयोरपि शास्त्रेण निमित्तत्वग्रहात्, प्रत्यासत्त्याऽङ्गसंज्ञानिमित्तनिमित्तकाभ्यासस्यैव ग्रहणमिति भाष्यार्थमाहुः। भाष्ये—**यस्मिंश्चाभ्यास इति।** यन्निमित्तद्वयोः पूर्वोऽभ्यास इत्यर्थः।लिडादेः सप्तम्यन्तपदेनैव द्वित्वं प्रति निमित्तत्वबोधनात्तदभिप्रायेण भाष्ये सप्तमीनिर्देशः । विषयसप्तमी वा । [**अभ्यासाच्च**]॥

ह्रेरचङि । यस्मिन् हिनोतिरिति । पूर्वसूत्रोक्तरीत्येत्यर्थः। 'कुत्वविज्ञानार्थ'—मित्यनेन भाष्येणाऽस्य कुत्वमात्रविषयता नान्यविषयतेति ध्वन्यते । (भाष्ये) **प्रजिघायथिषतीति ।** एवमुत्तरसूत्रविषये प्रजिगाययिषतीत्यपि बोध्यम् । [**ह्रेरचङि**] ॥

सँल्लिटोर्जेः । यद्यपि दीर्घात्परं कुत्वं तथापि नित्यो दीर्घ इति भावः । **इङादेशादिति ।** इङः 'क्रीङ्जीना'मित्यात्वेऽर्त्तिह्रीति पुकि यदाबिति रूपं तस्मादित्यर्थः ।

न क्वादेः ॥ ७।३।५९॥

॥*॥ क्वाद्यजिव्रजियाचिरुचीनामप्रतिषेधो निष्ठायामनिटः कुत्ववचनात् ॥*॥

क्वाद्यजिव्रजियाचिरुचीनामप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः ॥ कुत्वं कस्मान्न भवति ? ॥ 'निष्ठायामनिटः कुत्ववचनात्' ॥ निष्ठायामनिटः कुत्वं वक्ष्यामि, सेटश्चैते निष्ठायाम् ॥ यदि निष्ठायामनिटः कुत्वमुच्यते कथं शोकः समुद्ग इति ? ॥*॥ शुच्युब्ज्योर्घञि कुत्वम् ॥*॥ **शुच्युब्ज्योर्घञि कुत्वं वक्तव्यम् ॥ कथमर्कः ? ॥*॥** अर्चेः कविधानात्सिद्धम् ॥*॥ **नैतद्घञन्तम्, औणादिक एष कशब्दस्तस्मिन्नाष्टमिकं कुत्वम् ॥** [न क्वादेः] ॥

प्र.] न क्वादेः । क्वाद्यजीति । 'चजोः कुघिण्ण्यतोर्निष्ठायामनिट' इति वक्तव्यं, तेनैव क्वाद्यजादीनां कुत्वनिवृत्तेः सिद्धत्वान्नाऽर्थः प्रतिषेधेनेत्यर्थः । ननु ग्लुचुग्लुञ्चुकुजुखुजूनां निष्ठायामनिट्त्वाद्घिण्ण्यतोः कुत्वं वार्तिककारमतेन प्राप्नोति, सूत्रकारमतेन तु 'न क्वादे'रिति प्रतिषेधप्रसङ्गः । तथाऽर्जिसर्जितर्जीनां निष्ठायां सेट्त्वात् कुत्वाऽप्रसङ्गः । उच्यते । वार्तिककारस्य सूत्रकारात्प्रमाणतरत्वात्तन्मतेन तु कुत्वस्य भावाऽभावाववगन्तव्यौ । नन्वसत्यजेः प्रतिषेधे 'वीत' इति निष्ठायामनिट्त्वात् 'समाज' इति कुत्वं प्राप्नोति। नैतदस्ति । व्यादेशो निष्ठायामनिण्न त्वजिः । न च स्थानिवद्भावः, 'अद्–निष्ठायाम'निडिति लौकिके व्यपदेशोऽस्ति। शास्त्रीयेष्वेव कार्येषु स्थानिवत्त्वाद्वलादावार्धधातुके विकल्प इष्यत इति वीभावाऽभावपक्षे 'अजित' इति निष्ठायामजिः सेडेव। **कथमिति।** शुच्युब्जी निष्ठायां सेटौ । 'ई शुचिर् पूतिभावे' इति यद्यपि निष्ठायामनिट् , तथाप्यर्थभेदाश्रयः प्रश्नः । **शुच्युब्ज्योर्घञीति ।** यथान्यासेऽपि घञ्येव यथा स्याण्ण्यति मा भूदिति नियमार्थं वाच्यं, तदेव न्यासभेदे विध्यर्थमिति भावः। यद्यपि गमेर्ड्वुपसर्गाड्डुप्रत्यये सति 'समुद्ग'

उ.] न क्वादेः । निष्ठायामनिट्त्वादिति । 'उदितो वे'ति क्वायां विकल्पाद्यस्य **विभाषे**ति निष्ठायामिण्निषेधादिति भावः । **कुत्वाऽप्रसङ्ग इति ।** 'वार्तिककृन्मते' इति शेषः। **वार्तिककारस्येति ।** तस्य भाष्यकृता तदप्रत्याख्यानात् । भाष्यकारस्य-चाऽज्ञानकल्पनापेक्षयैकस्य सूत्रकृतस्तत्काले तावन्मात्रलक्ष्यस्मरणकल्पना युक्तेति भावः । उक्ताऽनुक्तदुरुक्तचिन्ताकरत्वं हि **वार्तिककारत्वं** । स्थान्यादेशयोरभेदमाश्रित्य शङ्कते–**नन्विति । समाज इति ।** 'समुदोरजः पशु'ष्विति पशुषु अपि, ततोऽन्यत्र 'हलश्चे'ति घञ् । भेदेनोत्तरं । **न च स्थानिवद्भाव इति ।** इदं चिन्त्यम् , आदेशस्य तेन स्थानिवद्भावो न तु स्थानिन आदेशवद्भाव इति (हेतोः।) अतोऽत्रायमग्रन्थ इति बोध्यम । **निष्ठायामनिडिति ।** 'श्वीदितो निष्ठाया'मिति प्रतिषेधादिति भावः । **अर्थभेदेति ।** 'शुच शोके' इत्यस्य न सिद्ध्यतीत्यर्थः । ननु

भुजन्युब्जौ पाण्युपतापयोः ॥ ७।३।६१ ॥

॥*॥ भुजः पाणा ॥*॥ भुजः पाणाविति वक्तव्यम् ॥ कथं न्युब्ज उपताप इति ? ॥*॥ न्युब्जेः कर्तृत्वादप्रतिषेधः ॥*॥ [न्युब्जेः कर्तृत्वादप्रतिषेधः।] । अनर्थकः प्रतिषेधोऽप्रतिषेधः ॥ कुत्वं कस्मान्न भवति ? ॥ 'कर्तृत्वात्' । नैतद्धञन्तम् । कर्तृप्रत्यय एषः । न्युब्जतीति न्युब्जः ॥ ननु च अधिकारणसाधनो वै लक्ष्यते घञ्,—न्युब्जिताः शेरतेऽस्मिन्न्युब्ज उपताप इति ॥ एषोऽपि हि कर्तृसाधन एव ॥ कथं ?॥ न्युब्जयतीति न्युब्जः॥

यजयाचरुचप्रवचर्चश्च ॥ ७।३।६६ ॥

॥*॥ प्रवचिग्रहणमनर्थकं वचोऽशब्दसंज्ञाभावात् ॥*॥ प्रवचिग्रहणमन-

---

प्र.] इति सिध्यति, तथाप्युब्जेर्घञि जकारनिवृत्तये कुत्वमभ्युपेयम् । **औणादिक इति** । 'कृदाधारार्चिकलिभ्यः कः' । धिष्ण्यतोऽस्त्वर्चोऽर्च्यमिति भवति । [न क्वादेः] ।

भुज । भुजेस्तौदादिकस्य रौधादिकस्य वा घञि गुणकुत्वनिषेधौ निपात्येते । **भुजः पाणाविति** । न्युब्जोपतापग्रहणं न कर्तव्यमित्यर्थः । लोके बाहौ भुजशब्दो भुजावयवत्वात्प्रयुज्यते । **कर्तृप्रत्ययं इति** । पचाद्यच् । **न्युब्जतीति** । न्युब्जन्त्यस्मिन्नित्यधिकरणं प्रदर्शनीयम् । भाष्ये तु वस्तुमात्रं कथितम् । **एषोऽपीति** । यस्मिन् व्याधौ न्युब्जिताश्चेष्टारहिताः शेरते स व्याधिस्तान् न्युब्जयतीत्यच् । न चाऽत्र घञचोः स्वरे विशेषः, थाथादिसूत्रेणाऽन्तोदात्तत्वविधानात् । भुजशब्दस्तु घञ्याद्युदात्तो भवति । अचि त्वन्तोदात्तः स्यात् । [**भुजन्युब्जौ पाण्युपतापयोः**]।

उ.] वचनेन परिहारे गौरवमत आह—**यथान्यासेऽपीति** । **ड्युपसर्गादिति** । समुत्पूर्वादन्येष्वपि **दृश्यते** इति डः । [**न क्वादेः**] ॥

भुजन्युब्जौ । **तौदादिकस्येति** । कुटिलीक्रियत इति तदाऽर्थः । **रौधादिकस्येति** । अभ्यवह्रियतेऽनेनेति तदाऽर्थः । सूत्रे एव सत्त्वाद्धक्तव्यत्वानुपपत्तिरत आह—**न्युब्जेति** । **लोके बाहाविति** । मणिबन्धादधः पञ्चशाखप्रभेदः पाणिः, बाहुश्च समुदित इति तदनुपपत्तिरिति भावः । **भुजावयवत्वादिति** बहुव्रीहिः । सूत्रस्थपाणिपदस्य पाण्यवयवके लक्षणेति केचित् । **भाष्ये तु वस्तुमात्रमिति** । अन्तभावितण्यर्थतयेति भावः । इतर एतदजानान आह—**अधिकरणेति** । स्वाशयं प्रकटयति—**एषोऽपीति** । 'न्युब्जिता' इत्यस्य व्याख्यानं—**चेष्टारहिता इति** । ननु भुजेरप्यचि भुजस्य सिद्धत्वात्किं तत्रापि वचनेनेत्यत आह—**भुजशब्दस्त्विति** । **अन्तोदात्तः स्यादिति** । इगुपधलक्षणकेऽप्येवं स्यादिति भावः । वस्तुतः संज्ञापूर्वकविधेरनित्यत्वे मानाऽभावाद्गुणाऽभावार्थमपि तन्निपातनं बोध्यम् ॥ [**भुज**] ॥

यजयाचयत । भाष्ये—**प्रपूर्वो वचिरशब्दसंज्ञायामिति** । तत्रैवेत्यर्थः। एतेन 'प्रवाच्यं नाम ग्रन्थविशेष' इति वृत्त्युक्तं चिन्त्यम् । 'अविवाक्यस्य विशेष-

र्थकम् ॥ किं कारणम् ? ॥ 'वचोऽशब्दसंज्ञाभावात्' । वचोऽशब्दसंज्ञायां प्रतिषेध उच्यते, प्रपूर्वश्च वचिरशब्दसंज्ञायां वर्तते । ॥*॥ उपसर्गनियमार्थम् ॥*॥ उपसर्गनियमार्थं तर्हीदं वक्तव्यम् । प्रपूर्वस्यैव वचेरशब्दसंज्ञायां प्रतिषेधो यथा स्यादिह मा भूत्–अविवाक्यमहरिति । ॥*॥ उपसर्गपूर्वनियमार्थमिति चेदविवाक्यस्य विशेषवचनात्सिद्धम् ॥ * ॥ [उपसर्गपूर्वनियमार्थमिति चेदविवाक्यस्य विशेषवचनात्सिद्धमेतत्] । विशेषत एव तद्वक्तव्यम्-अविवाक्यमहरिति ॥ क माभूत् ?॥ अविवाच्यमेवान्यदिति ॥*॥ ण्यप्रतिषेधे त्यजेरुपसङ्ख्यानम् ॥*॥ ण्यप्रतिषेधे त्यजेरुपसङ्ख्यानं कर्तव्यम् । त्याज्यम् ॥

भोज्यम्भक्ष्ये ॥ ७।३।६९ ॥

॥*॥ भोज्यमभ्यवहार्ये ॥*॥ भोज्यमभ्यवहार्य इति वक्तव्यम् । इहापि यथा स्यात्–भोज्यः सूपः भोज्या यवागूरिति ॥ किं पुनः कारणं न सिध्यति ? ॥ भक्षिरयं खरविशदे एवं वर्तते तेन द्रवे न प्राप्नोति ॥ नावश्यं भक्षिः खरविशदे एव वर्तते ॥किं तर्हि ?॥ अन्यत्रापि वर्तते। तद्यथा–अब्भक्षो वायुभक्ष इति ॥ [भोज्यं भक्ष्ये] ॥

प्र.] यज । अविवाक्यस्येति । यद्ययं नियमः क्रियते तदाऽविवाक्यमित्येव स्यान्न त्वविवाच्यमिति । द्वयमपि चैतद्विषयविभागेनेष्यत इति यत्नान्तरं कार्यं, न त्वयं नियमः । अन्योपसर्गपूर्वस्य च प्रतिषेध इष्यत एव । दशरात्रस्य यज्ञविशेषस्य दशममहः–अविवाक्यमुच्यते,यस्मिन् याज्ञिका न विब्रुवते–न नानावाक्यान्युच्चारयन्तीत्यर्थः । तत्र पृषोदरादित्वात्कुत्वमन्यत्र प्रतिषेध इति प्रवचिग्रहणं प्रत्याख्यातम् । त्यजेरिति । पूज्यमिति तु ण्यन्तस्य पूजे रूपम् । [यजयाचयत] ।

भोज्यम् । नावश्यमिति–भाष्यकारः सूत्रन्यासं समर्थयते । अब्भक्ष इति । न च शब्दान्तरसन्निधिगम्यं सामान्यवाचित्वमिति शक्यं वक्तुम् । न हि शब्दस्या-

---

उ.]वचना'दित्यस्य नियमानुपपत्तौ हेतुत्वमुपपादयति–यद्ययमिति।यत्नान्तरं–नियमादन्यत् । नन्वेवमन्योपसर्गपूर्वस्य न स्यादिति शङ्कायामिष्टापत्तिमाह—अन्योपसर्गेति। तथा च प्रयुज्यते–'निर्वाच्या विधे'ति। न विब्रुवत इत्यस्य व्याख्यानं-'न नानावाक्ये'त्यादि । बाहुलकादधिकरणे कृत्यः। पृषोदरादित्वादिति । पृष्टोदरादिष्वविवाक्यमहरिति पठनीयमिति भावः। पूज्यमिति त्विति । एवञ्च 'पूजेश्चे'ति वृत्तिश्चिन्त्येति भावः । [यचयाचयत] ॥

भोज्यं । ननु भक्षिः खरविशदविषय एव, अब्भक्ष इत्यादौ शब्दान्तरसन्निधानात्सामान्यवृत्तित्वमिति शङ्कते–नचेति । उत्तरयति–नहीति । अनेकार्थस्याभिधे-

घोर्लोपो लेटि वा ॥७।३।७०॥

॥*॥ वेति शक्यमवक्तुम् ॥*॥ **कस्मान्न भवति–तदग्निरग्नये ददात् ? ॥ अस्त्वत्र लोपः, आटः श्रवणं भविष्यति । तेनोभयं सिध्यति–दधद्रत्नानि दाशुषे । दधाद्रत्नानि दाशुषे ॥** [घोर्लोपो लेटि वा] ।

ओतः श्यनि ॥ ७।३।७१ ॥

॥*॥ ओतः शिति ॥*॥ **ओतः शितीति वक्तव्यम् ॥ किं प्रयोजनम् ? ॥** ॥*॥ उत्तरत्र शिद्ग्रहणाऽभावाय ॥*॥ **तत्रायमप्यर्थः 'ष्ठिवुक्लमुचमां शिती'ति शिद्ग्रहणं न कर्तव्यं भवति ॥ ननु च भोः श्यन्ग्रहणमपि तर्ह्युत्तरार्थं कर्त्तव्यम् । 'शमामष्टानां दीर्घः श्यनी'ति श्यन्ग्रहणं न कर्तव्यं भवति ॥ अत्राप्यस्तु–शितीत्येव । यदि शितीत्युच्यते 'अनुत्वेन्द्रो भ्रमतु मदतु'–अत्रापि प्राप्नोति ॥ शमादिभिरत्र शितं विशेषयिष्यामः–'शमादीनां यः शि'दिति ॥ कश्च शमादीनां शित् ? ॥ शमादिभ्यो यो विहितः ॥ एवमपि तस्यति यस्यति–अत्र प्राप्नोति ॥ 'अष्टाना'मिति वचनान्न भविष्यति ॥** [ओतः]

प्र.]ऽनभिधेयं शब्दान्तरसन्निधानेनाऽभिधीयते, नित्यत्वाच्छब्दार्थसंबन्धस्य । भोज्यं भक्ष्यं लेह्यं पेयमित्यत्र गोबलीवर्दन्यायेन विशेषविषयत्वं भुजिभक्ष्योर्ज्ञेयम् ॥

घोर्लो । भाष्यकारेण 'वे'ति प्रत्याख्यातम् । केचित्त्वनित्यमागमशासनमिस्य ज्ञापकं वाग्रहणं वर्णयन्ति । अनित्यत्वात्तस्याऽऽव्यसति ददादिति न स्यादिति तत्सिद्धये वाग्रहणं क्रियमाणमेनां परिभाषां ज्ञापयति । [**घोर्लोपो**] ।

ओतः । **ओत इति** । न हि श्यनोऽन्य ओतः शिदस्ति । **तत्रायमप्यर्थ इति** । न केवलं मात्रालाघवं यावदयमप्यर्थ इत्यर्थः । **भ्रमत्विति** । 'वा भ्राशे'तिवचनात्पक्षे शप् । **मदत्विति** । व्यत्ययेन शप् । **शमादिभ्यो यो विहित इति** । श्यन्नेव सर्वेभ्यः शमादिभ्यो विहित इति स एव गृह्यते । **एवमपीति** । शिद्विशेषणे

उ.] यत्वे हि तस्य बोधनियामकत्वमात्रमिति भावः । [**भोज्यं भक्ष्ये**] ॥

घोर्लोपो । केचित्त्वनित्यमिति । अस्याऽर्थस्य भाष्यकृताऽस्पृष्टत्वादिदमप्रामाणिकं । जन्वेत्याद्यसाध्वेवेत्यन्ये । [**घोर्लोपो लेटि वा**] ॥

ओतः श्यनि । नहीति । न च 'भवती'त्यस्ति, 'ओत' इत्यस्य विहितविशेषणत्वाऽङ्गीकारात् । 'भवतेर' इत्यादिनिर्देशेन प्रतिपदोक्तौकारस्यैव ग्रहणाच्च । ओकारान्तप्रकृतिकाचारक्विबन्तास्तु न सन्त्येवाऽनभिधानादिति भावः। **न केवलमिति**। 'क्सस्ये'ति 'लुग्वे'तिच सूत्रे 'ओत' इत्यतः प्रागेव पाठ्ये । 'लुग्वे' त्यत्रापि लोपपदसम्बन्धे बाधकाऽभाव इति भावः । **ननु शबपि शमादिभ्यो विहित एवेत्यत आह—श्यनेवेति** । दिवादिभ्य इत्यादिग्रहणस्य व्यवस्थार्थकतया श्यन् शमादि-

ष्ठिवुक्लमुचमां शिति ॥ ७।३।७५ ॥

॥*॥ दीर्घत्वमाङि चमः ॥*॥ दीर्घत्वमाङि चम इति वक्तव्यम् । आचामति, इह मा भूत्—चमति विचमतीति ॥ [ष्ठिवुक्लमुचमां शिति] ॥

इषुगमियमां छः ॥ ७।३।७७ ॥

॥*॥ इषेश्छत्वमहलि ॥*॥ इषेश्छत्वमहलीति वक्तव्यम् । इह मा भूत् इष्णाति इष्यति ॥ तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । 'अची'ति वर्तते ॥ एवमपीषाणेत्यत्र प्राप्नोति ॥ अथाऽहलीत्युच्यमाने कस्मादेवाऽत्र छत्वं न भवति ?॥ नैवं विज्ञायते—न हल् अहल्, अहलीति ॥ कथं तर्हि ? ॥ अविद्यमानो हलस्मिन्सोऽयमहल्, अहलीति ॥ यद्येवमचीत्यपि वर्तमाने न दोषः । न ह्यचा शिद्विशेष्यते—'शिति भवति, कतरस्मिन्?, अची'ति ॥ कथं तर्हि ?॥ शिताऽज्विशेष्यते,—'अचि भवति, कतरस्मिन्?, शिती'ति [इषगमियमां छः] ॥

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥ ७।३।७८ ॥

॥*॥ पिबेर्गुणप्रतिषेधः ॥*॥ पिबेर्गुणप्रतिषेधो वक्तव्यः, पिबति—लघूपध-

---

प्र.]शमादीनामुपयोगात्कार्यिनिर्देशाऽभावात् । अष्टानामिति । 'अष्टाना'मित्यनेन सङ्ख्येयाः कार्यिणो निर्दिश्यन्ते, ते च सन्निधानाच्छमादय एव विज्ञायन्ते। [ओतः श्यनि]

ष्ठिवु । 'ष्ठिवुक्लमुचमां शिती'ति सूत्रपाठादाह—दीर्घत्वमाङि चमेरिति । अथ वा सूत्रे तन्त्रमाङ्, न तु यथोपेयिवानित्यत्रोपशब्दोऽतन्त्रमिति प्रदर्शनाय वार्तिकारम्भः । [ष्ठिवुक्लमुचमां शिति] ॥

इष । 'इषुगमी'ति पाठोऽनार्ष इत्याह—इषेश्छत्वमहलीति । इषाणेति । 'इष आभीक्ष्ण्ये' इत्यस्माद्धलः श्नः शानज्झाविति शानच् । स चाऽजादिरिति च्छत्वप्रसङ्गः । अथेति । 'अहली'ति तत्पुरुषे शानजजादिरिति भावः । न ह्यचेति । विशेषणविशेष्यभावे कामचारात् । तदादिविधिस्तदन्तविधिवद्विशेषणेन भवति, न विशेष्येण । [इषगमियमां छः] ।

उ.]शब्दोच्चारणेन विहितो नतु शप् तथेति परे । कार्यिनिर्देशाऽभावादिति । शमादिविहितशित्यङ्गस्य दीर्घ इत्यर्थः स्यादिति भावः । [ओतः श्यनि] ॥

ष्ठिवुक्लमु । ननु सूत्रे एवाऽऽचमामितिपाठाद्वार्तिकमनर्थकमत आह—ष्ठिव्वित । स पाठोऽनार्ष इति भावः । तमपि पाठं स्थापयति—अथवेति ॥

इषगमि । 'इषुगमी'ति पाठे तौदादिकस्यैवोदितः पाठादन्यस्य ग्रहणशङ्कैव नेत्यत आह—अनार्ष इति । गणेऽप्यनुदित एव पाठ इत्यर्थः । न विशेष्येणेति । एवञ्चाऽज्रूपे शितीत्यर्थान्न दोष इति भावः । अत्राऽचीत्यस्य मण्डूकानुवृत्तिर्बोध्या ।

गुणः प्राप्नोति । स तर्हि प्रतिषेधो वक्तव्यः ?॥ न वक्तव्यः ॥ गुणः कस्मान्न भवति ? ॥ पिबतिरदन्तः । ॥*॥ अदन्त इति चेदुक्तम् ॥*॥ **किमुक्तम् । "धातोरन्त इति चेदनुदात्ते च-बग्रहण"मिति । अथ 'वाऽङ्गवृत्ते पुनर्वृत्ताववविधिर्निष्ठितस्ये'त्येवं न भविष्यति ॥** [पाघ्राध्मास्थाम्ना] ॥

ज्ञाजनोर्जा ॥७।३।७९॥

दीर्घोच्चारणं किमर्थं, **न 'ज्ञाजनोर्ज' इत्येवोच्येत ?॥ का रूपसिद्धिः**—जानाति जायते ? ॥ अतो दीर्घो यञीति **दीर्घत्वं भविष्यति ॥ एवं तर्हि सिद्धे सति यद्दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा–'अङ्गवृत्ते पुनर्वृत्तावविधि'रिति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ पिबतेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति ॥** [ज्ञाजनोर्जा] ॥

प्र.] **पाघ्रा । धातोरन्त इति चेदिति ।** 'धातो'रित्यत्र द्वौ पक्षावुक्तौ-अन्त इति वर्तते न वा, यद्यनुवर्तते तदा 'अनुदात्ते चे'ति सूत्रं कर्तव्यं 'ददाती'त्याद्युदात्तार्थं, तथा 'पिबन्ती'त्यादावाद्युदात्तत्वं मध्योदात्तनिवृत्त्यर्थं बाऽन्तस्य धातोर्वक्तव्यम्।अन्तग्रहणनिवृत्तौ तु क्रमप्राप्तत्वादादेरेवोदात्तत्वं सिध्यति । तत्रायं निर्णयः–'अन्त' इति वर्तते ऊर्णोत्याद्यर्थम् । 'अनुदात्ते चे'ति कृतमेव । पिबतेश्चाद्युदात्तनिपातनमिह कार्यम् । **अथवेति ।** सत्यपि हलन्तत्वे गुणाऽभावः । पिबादेशेनैवाऽङ्गस्य प्रयोगाऽर्हत्वात् । [**पाघ्राध्मास्थाम्ना**] ।

ज्ञा ज । अतो दीर्घो यञीति । तत्र सार्वधातुकग्रहणं तुरुस्तुसूत्रादनुवर्तते न तु तिङीति।अत एवाऽऽने मुक् पूर्वान्तः कृतो न परादिः, दीर्घप्रसङ्गात्। **अङ्गवृत्त इति ।** 'ज्यादादीयस' इत्याकारविधानस्य ज्ञापकत्वे 'जा' इति दीर्घोच्चारणं दीर्घ-

---

उ.] अतएव 'क्रमः परस्मैपदे'ष्विति दीर्घः श्यन्यपि भवति । अतएव भगवता तत्सूत्रं विहायाऽत्रैवैतद्विचारोऽकारीति बोध्यम् । [**इषगमियमां छः**] ॥

पाघ्रा । आदेरेवेति । इदं च तत्रैवोपपादितम् । 'धातो'रिति सूत्रस्थपूर्वपक्षवार्तिकग्रहणं तत्रत्यसिद्धान्तवार्तिकस्याऽप्युपलक्षणमित्याशयेनाह–**तत्रायमिति । कृतमेवेति ।** इदमेव ज्ञापकं धातोरित्यत्रान्ताधिकारस्येति भावः । [**पाघ्रा**] ॥

ज्ञाजनोर्जा । जनिरत्र ज्ञासाहचर्याच्छ्रूयमाणविकरण एव न, जुहोत्यादिरित्याहुः। नन्वतो दीर्घ इत्यत्र 'तिङी'त्यनुवृत्तेः कथं जानातीत्यत्र दीर्घोऽत आह–**अतो दीर्घ इत्यादि ।** अत्रत्यमेतज्ज्ञापनपरं, ज्यादादीयस' इति सूत्रस्थश्च भाष्यमेकदेश्युक्तिः, अदन्तत्वेनैव गुणप्रतिषेधवार्त्तिकप्रत्याख्यानसम्भवेनाऽस्य यत्नस्य गुरुत्वात् । भ्यसोभ्यमिति सूत्रस्थश्च भाष्यमत्रत्यैतदेकदेशिमतेनैवेति बोध्यम् । फलान्तरन्तु नाऽस्या उपलभ्यते । नन्वनेन दीर्घेऽजानाम्भो इत्यादावनन्त्यस्य

जुसि च ॥७।३।८३॥

॥*॥ जुसि गुणे यासुट्प्रतिषेधः ॥*॥ **जुसि गुणे यासुडादौ प्रतिषेधो वक्तव्यः । चिनुयुः सुनुयुरिति ॥ [स तर्हि प्रतिषेधो वक्तव्यः ?] । न वक्तव्यः । नैवं विज्ञायते—'मिदेर्गुणः जुसि चे'ति ॥ कथं तर्हि ? ॥ 'मिदेर्गुणोऽजुसि चे'ति ॥ किमिदम्—'अजुसी'ति ? ॥ अजादावुस्यजुसीति ॥ इहाऽपि तर्हि प्राप्नोति—'चक्रुः जह्रु'रिति ॥ एवं तर्हि शितीति वर्तते ॥ एवमप्यजुहवुः अबिभयुरित्यत्र न प्राप्नोति ॥ ननु च भूतपूर्वगत्या भविष्यति ॥ न सिध्यति, न ह्युस् शिद्भूतपूर्वः ॥ उस् शिद्भूतपूर्वो नास्तीति कृत्वा उसि यश्शिद्भूतपूर्वस्तस्मिन् भविष्यति ॥ अथ वा क्रियते न्यास एव—अविभक्तिको निर्देशः । नैवं विज्ञायते—'मिदेर्गुणो जुसि चे'ति॥कथं तर्हि ? ॥ 'मिदेर्गुण उ जुसि चे'ति ॥ किमिदमु जुसीति ?॥ उकारादौ जुसि [उ जुसीति] । अथ वाऽचीति वर्तते तेन जुसं विशेषयिष्यामो'ऽजादौ जुसी'ति ॥ [जुसि च] ॥**

जाग्रोऽविचिण्णल्ङित्सु ॥ ७।३।८५ ॥

इह जागरयति जागरक इति गुणे कृते रपरत्वे चाऽत उपधाया इति

प्र.] श्रवणार्थम्। एतद्दीर्घोच्चारणे तु ज्ञापके तदाकारविधानमाकारश्रवणार्थम्। [ज्ञाजनो]।

जुसि च । चिनुयुरिति । तद्भक्तस्तद्ग्रहणेन गृह्यत इति गुणप्रसङ्गः । **शितीति वर्तत इति ।** 'ष्ठिवुक्लमुचमां शिती'त्यतः । न च लिटि शिदस्ति । **एवमपीति ।** 'उसि शिती'ति सामानाधिकरण्येन संबन्धं मन्यते। इतरस्तूसि यः शित्, तस्मिन्निति संबन्धं मत्वाह—**भूतपूर्वगत्येति ।** प्रत्ययलक्षणस्तु नास्ति, 'न लुमताऽङ्गस्ये'ति निषेधात् । **उकारादाविति ।** यासुडादेरनुकारादित्वाद्ग्रहणाऽभावः । अनुबन्धनिर्देशाच्च लिडादेशस्योसो ग्रहणाऽभावः । **अचीति वर्तत इति ।** 'क्सस्याची'त्यतः । [**जुसि च**] ।

जाग्रोऽवि । इहेति । अङ्गवृत्त इत्यनाश्रित्योच्यते। गुणस्याऽवकाशः—जागरित

उ.] प्लुतो न स्यात् । 'अत आत्'—इत्येव सिद्धे तत्रत्यदीर्घग्रहणस्य प्लुतव्यावर्त्तकताया हरदत्तादिभिरुक्तत्वात् , अतएव पचामि भोरित्यादौ न प्लुतः । नचाऽनन्त्यपदस्य टेरिति तदर्थात्पचामीत्यादौ तत्प्राप्त्यभावेन किमर्थं दीर्घग्रहणेन तन्निराकरणमिति वाच्यम्, दीर्घग्रहणसामर्थ्येनाऽन्त्यविषय एव टेरित्यस्य सम्बन्धादितिचेन्न ; ज्ञापकपरभाष्यप्रामाण्येन तत्रत्यदीर्घग्रहणस्य स्पष्टार्थतया तदर्थकत्वाऽभावकल्पनात् ॥

जुसिच । नच लिटीति । जुसि यः शित्तत्र परेऽङ्गस्य गुण इति सूत्रार्थः । **ननु** प्रत्ययलक्षणसत्त्वे किं भूतपूर्वगत्येत्यत आह—**प्रत्ययलक्षणन्त्विति । भाष्ये—गुण उ जुसीति ।** गुणेति लुप्तविभक्तिकमिति भावः । [**जुसि च**] ॥

जाग्रो । अनाश्रित्येति । अगतिकगतित्वादिति भावः । तस्या असत्त्वाच्चे-

वृद्धिः प्राप्नोति तस्याः प्रतिषेधो वक्तव्यः ॥*॥ चिण्णलोः प्रतिषेधसामर्थ्यादन्यत्र गुणभूतस्य वृद्धिप्रतिषेधः ॥*॥ **यदयमचिण्णलोरिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो 'न गुणाभिनिर्वृत्तस्य वृद्धिर्भवती'ति** ॥

किं पुनरयं पर्युदासो—'यदन्यद्विचिण्णल्ङिभ्य' इति, आहोस्वित्प्रसज्याऽयं प्रतिषेधो—'विचिण्णल्ङित्सु ने'ति ? ॥ कश्चाऽत्र विशेषः ? ॥*॥ प्रसज्य प्रतिषेधे जुसि गुणप्रतिषेधप्रसङ्गः 'उत्तमे चं णलि' ॥*॥ **प्रसज्य प्रतिषेधे जुसि गुणप्रतिषेधः प्राप्नोति—अजागरुः** । *उत्तमे च णलि* । **उत्तमेचणलि प्रतिषेधः प्राप्नोति—अहं जजागर** । ॥*॥ न वाऽनन्तरस्य प्रतिषेधात् । **न वैष दोषः ॥ किं कारणम् ? ॥ 'अनन्तरस्य प्रतिषेधात्' । अनन्तरं यद्गुणविधानं तस्य प्रतिषेधः ॥ कुत एतत् ? ॥ 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वे'ति ।** ॥*॥ जुसि पूर्वेण गुणविधानम् ॥*॥ **जुसि पूर्वेण गुणो विधीयते 'जुसि चे'ति ।** ॥*॥ णलि च ॥*॥ **[णलि च] । किम् ? ॥ 'न वानन्तरस्य प्रतिषेधा'दित्येव । णलि च पूर्वेण गुणो विधीयते—'सार्वधातुकार्धधातुकयो'रिति ॥**

प्र.]इति । 'अचो ञ्णिती'ति वृद्धेरवकाशः—कारक इति । 'जागरयती'त्यादावुभयप्रसङ्गे परत्वाद्गुणे कृते'ऽत उपधाया' इति वृद्धिः प्राप्नोति । **गुणभूतस्येति** । गुणशब्दः स्वरूपपदार्थकः । गुणशब्देन भूतो निष्पन्नो-गुणभूतः । एवं गुणशब्देनाऽभिनिर्वृत्तो गुणाऽभिनिर्वृत्तः । यद्यनेन गुणे कृतेऽत उपधाया इति वृद्धिःस्याच्चिण्णलोर्गुणप्रतिषेधोऽनर्थकः स्यात्, कृते गुणे वृद्ध्या रूपस्य सिद्धत्वात्, तस्माच्चिण्णलोः प्रतिषेध उपधावृद्ध्यभावस्य ज्ञापकः । वृद्धिमात्राऽभावस्य तु न ज्ञापकः,—तथा च 'ह्यन्तक्षणे'त्यत्र जागृग्रहणमजागरीदित्यत्र वृद्धिनिषेधार्थं कृतम् । अन्यथा गुणे कृते 'अतो ल्रान्तस्ये'त्यनेन वृद्धिर्न भविष्यतीति किं जागृग्रहणेन ?। **अजागरुरिति** । लङ् ।'सिजभ्यस्तविदिभ्यश्चे'ति जुसादेशः, तस्य ङित्त्वाज्जुसि चेत्यनेनापि प्राप्तस्य गुणस्य निषेधः प्राप्नोति । तथा 'जजागरे'त्यत्र णित्त्वाऽभावपक्षे 'सार्वधातुकार्धधातुकयो'रित्यनेनाऽपि प्राप्तस्य गुणस्य निषेधप्रसङ्गः । पर्युदासपक्षे तु न दोषः । तत्र विचिण्णल्ङिभ्योऽन्यत्र गुणो विधीयते न च तेषु निषिध्यत इति लक्षणाऽन्तरेण गुणः प्रवर्तत एव ।

उ.]त्यन्ये । ननु गुणात्पूर्वमचो ञ्णितीति वृद्धिः किं न शक्यतेऽत आह—**गुणस्येति** । 'अचिण्णलो'रित्यनेन वृद्धिविषयेऽस्य गुणस्य विशिष्य विधानादपवाद इति वक्तुं युक्तम् । **निष्पन्न इति** । भूधातुरुत्पत्त्यर्थ इति भावः । **किं जागृग्रहणेनेति** । तत्र तु सामान्यापेक्षज्ञापकत्वमाश्रित्य जागृग्रहणं प्रत्याख्यातमुपाध्यायैः । अत्रत्यभाष्यस्वरसोऽपि सामान्यापेक्षज्ञापकत्व एव दृश्यते । **निषेधप्रसङ्ग इति** ।

अथ वा पुनरस्तु पर्युदासः ॥*॥ अतोऽन्यत्र विधाने वावगुणत्वम् ॥*॥ **अतोऽन्यत्र विधाने वावगुणत्वं वक्तव्यम् । जागृविः ।** ॥*॥ न वा पर्युदास-सामर्थ्यात् ॥*॥ **न वा वक्तव्यम् ॥ किं कारणम् ? ॥ ['पर्युदाससामर्थ्यात्'] । पर्युदाससामर्थ्यादत्र गुणो न भविष्यति ॥ अस्त्यन्यत्पर्युदासे प्रयोजनम् ॥ किम् ? ॥ क्विबर्थं पर्युदासः स्यात् । शुद्धपरस्य विशब्दस्य प्रतिषेधेग्रहणम्, अनुनासिकपरश्च क्वौ विशब्दः ॥ वस्वर्थन्त्॥ई पर्युदासः स्यात् जागृवांसो अनुग्मन् ॥ कथं पुनर्वैः पर्युदास उच्यमानो वेस्वर्थः शक्यो विज्ञातुम् ? ॥ सामर्थ्याद्वैस्वर्थमिति विज्ञास्येत ।** ॥*॥ वस्वर्थमिति चेन्न सार्वधातुकत्वात्सिद्धम् ॥*॥ **वस्वर्थमिति चेत्तन्न ॥ किं कारणम् ? ॥ 'सार्वधातुकत्वात्सिद्धम्' । [सार्वधातुकत्वात्सिद्धमेतत्] ॥ कथं सार्वधातुकसंज्ञा ? ॥ छान्दसः क्वसुः, लिड्ढ छन्दसि सार्वधातुकमपि भवति । तत्र**

प्र.]जागृविरिति । 'वृहजागृभ्यो वि'न्निति सूत्रपाठाश्रयेण चोद्यते । यदा तु 'जृशस्तृजागृभ्यः क्वि'न्निति पाठस्तदा कित्त्वादेवार्धधातुकलक्षणगुणाऽप्रसङ्गः । यद्यपि प्रसज्यप्रतिषेधेऽप्ययं दोषोऽनन्तरस्य निषेधात्, तथापि पर्युदासो दोषवानिति प्रतिपादनायेदमुच्यते । **न वेति** । यदि 'जागृवि'रित्यत्र लक्षणान्तरेण गुणः स्याद्वेः पर्युदासोऽनर्थकः स्यात् । **क्विबर्थ(म्)इति** । नहि लक्षणाऽन्तरेण गुणप्रसङ्गः । नचाऽत्र तदनुबन्धकपरिभाषोपतिष्ठते, अनुबन्धस्याऽनिर्देशादिति 'वि'ग्रहणेन क्विबपि गृह्यत इति भावः । **शुद्धपरस्येति** । विशब्दे इकारो निरनुनासिक उच्चारित इति क्विपो ग्रहणं नास्ति । तस्य हीकारोऽनुनासिकः । **वस्वर्थ इति** । विशब्दः सप्तम्यन्तो निर्दिश्यते, निपातनाच्च सप्तम्या अलुक्, यथा–'वरेयलोपे'ति । अथ वा इकार उच्चारणार्थ इति तत्र तदादिविधानात् क्वसोर्ग्रहणं भवतीति भावः । इतरस्तु यथोक्तमप्रतिपद्य 'वी'ति समुदायो निर्दिष्ट इति मत्वाह–**कथं पुनरिति** । इतरः पूर्वोक्तेनाभिप्रायेणाह—**सामर्थ्यादिति** । औणादिको न पर्युदस्यते, लक्षणान्तरेण प्रसङ्गादिति सामर्थ्याद्विकारादेः क्वसोर्ग्रहणमित्यर्थः। **छान्दस इति** । भाषायां सद्वस-

उ.]तत्र पक्षे विशेषाऽभावेन सर्वस्य गुणस्य निषेधः स्यादिति भावः। भाष्ये–**पूर्वेणेति**। व्यवहितपूर्वेणेत्यर्थः । **तथापीति** । त्वत्पक्षोऽपि दुष्ट इति प्रसज्यप्रतिषेधवादिना प्रतिपाद्यत इत्यर्थः । **नहि तत्रेति** । कित्त्वादिति भावः । ननु क्विपो द्व्यनुबन्धकत्वाद्ग्रहणं नेत्यत आह–**नचात्र तदन्विति । तस्य हीकार इति**। विधेयविषये उच्चारणार्थवर्णानामपीत्संज्ञालोपौ । अन्यथा तद्विशिष्टविधिसंभावनया तदश्रवणे मानाऽभावादिति भावः । ननु वसौ विशब्दाऽभावात्कथमत्र ग्रहणमाशङ्क्यतेत्यत आह–**विशब्द इति** । औणादिकविशब्दग्रहणेन सप्रयोजनत्वात्कथं सामर्थ्यमत आह—**औणादिक इति** । 'लिटः कानज्वा क्वसुश्चे'त्यत्र 'छन्दसी'त्यनुव-

'सार्वधातुकमपिन्ङि'दिति ङित्त्वात्पर्युदासो भविष्यति ॥ अथ वा वकारस्यैवे-दमशक्तिजेनेकारेण ग्रहणम् ॥ [जाग्रोऽविचिण्णल्ङित्सु]॥

पुगन्तलघूपधस्य च ॥ ७।३।८६ ॥

॥*॥ संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति ॥*॥ **संयोगे गुरुसंज्ञायां भेत्ता भेत्तुमिति गुणो न प्राप्नोति ।** ॥*॥ विध्यपेक्षं लघोश्चासौ ॥*॥ **विध्य-**

प्र ...भ्य एव क्वसुर्नान्येभ्य इति भावः। केचित्तु भाषायामपि क्वसुमिच्छन्ति त एवं परि...रन्ति–'असंयोगाल्लिट्कि'दिति सिद्धे कित्त्वे क्वसोः कित्त्वं प्रतिषेधविषयस्याऽपि गुणस्य प्रतिषेधार्थमिति क्वसौ गुणाऽभावः । **अथ वेति ।** अनच्कस्य हल उच्चारयितुमशक्यत्वादिकार उच्चारणार्थो निर्दिष्ट इति वकारादेर्ग्रहणं,क्वसौ (च) प्रतिविहितमिति औणादिक एव पर्युदस्यते, तत्सामर्थ्याल्लक्षणान्तरेणापि गुणो न भवति, क्विपस्तु लोपाद्वर्णाश्रये प्रत्ययलक्षणनिषेधाच्च पर्युदासं नेच्छन्ति । **अन्ये** तु यथाऽतृणेडिति प्रत्ययलक्षणेन इमागमो भवति वर्णस्य प्रत्ययविशेषणत्वादेवं क्विपोऽपि पर्युदास इत्याहुः । [**जाग्रोऽविचिण्णल्ङित्सु**] ॥

पुगन्त । **संयोग इति** । धात्वन्तप्रत्ययाद्योर्हलोरानन्तर्ये संयोगे गुर्विति गुरुसंज्ञायां लघुसंज्ञाया बाधनाद्भेत्तेति गुणो न भवति । अजादौ च 'भेदन'मित्यादौ सावकाशो गुणः । **विध्यपेक्षमिति** । 'गुणविधान'मिति शेषः । लघूपधस्य ये सार्वधातुकार्धधातुके तयोरङ्गस्य गुण इत्यर्थः । ननु पञ्चम्यभावात्कथं विधानं भविष्यति । उच्यते। षष्ठीपक्षे(ऽपि) लघूपधस्य ये सार्वधातुकार्धधातुके, के च तस्य, ये तस्माद्विधीयेते इत्युपपद्यते विधानविशेषणम् । ननु सांप्रतिकलघूपधसंभवे कथं

उ.] र्तनादिति भाष्याभिप्रायः। अतएव 'भाषायां सदे'ति चरितार्थम् । **केचित्त्विति** । संयोगान्तधातुभ्यस्तु अनभिधानात्क्वसुरेव नेति तदाशयः । भाष्यविरोधोऽत्रारुचिः । कित्त्वन्तु तितीर्वानित्यादौ 'ऋच्छत्यृता'मिति गुणनिषेधेन चरितार्थमिति बोध्यम् । वस्तुतो 'विभाषा पूर्वाह्णे'ति सूत्रस्थभाष्यप्रामाण्याद्भाषायां क्वस्वङ्गीकारेऽपि जागृधातोर्लोके तस्याऽनभिधानाद्दोषाऽभाव इति वक्तुं युक्तम् । 'अथवा वकारस्ये'ति भाष्यग्रन्थो 'वस्वर्थः शक्यो विज्ञातुं, सामर्थ्या'दित्युत्तरं बोध्यः । तेनैव सङ्गतेः । **प्रत्ययलक्षणप्रतिषेधाच्चेति** । चिणादिसाहचर्येण श्रूयमाणस्यैव वेर्ग्रहणाच्चेत्यपि बोध्यम् । अतएव भाष्योक्तपूर्वपक्षेणाऽविरोधः । **अन्येत्विति** । भाष्योक्तपक्षयोः फलभेदोऽत्रारुचिः । [**जाग्रोऽविच्चिण्णल्**] ॥

पुगन्तल । **गुणविधानमितीति** । भाष्येऽपि लघुग्रहणशब्देन गुणविधानं लक्ष्यत इति बोध्यम् । **तयोरङ्गस्येति** । प्रत्यासत्त्या लघूपधस्याऽङ्गस्येत्यर्थः । **केच तस्येति** । अङ्गप्रत्यययोर्विधाननिमित्तसंबन्धस्याऽङ्गसंज्ञाशास्त्रे दृष्टत्वादिति भावः । भाष्ये–लघोश्चासावित्यस्य—लघूपधाच्चासावित्यर्थः । **सांप्रतिकलघूपधसंभवे**

पेक्षं लघुग्रहणं कृतं, लघोश्चाऽसौ विहितः ।

॥*॥ कथं कुण्डिर्न दुष्यति ? ॥*॥ **कुण्डिता हुण्डिता,–अत्र कस्मान्न भवति ?** ॥*॥ धातोर्नुमः । *॥ **धातोर्नुम्विधावुक्तं, तत्र धातुग्रहणस्य प्रयोजनं 'धातूपदेशावस्थायामेव नुम्भवती'ति ।** ॥*॥ कथं रञ्जेः ॥*॥ **कथं रञ्जे-रुपधालक्षणा वृद्धिः ?–आश्चर्यो रागः विचित्रो रागः** ॥*॥ स्यन्दिश्रन्थ्यो-र्निपातनात् ॥*॥ **यदयं स्यन्दिश्रन्थ्योरवृद्ध्यर्थं निपातनं करोति तज्ज्ञापयत्या-चार्यो–'भवत्येवञ्जातीयकानां वृद्धि'रिति ॥**

॥*॥ अनल्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः॥*॥ **अनल्लोपः–दध्ना सक्थ्ना । शिदीर्घत्वं–कुण्डानि वनानि॥ एवं तर्हि—**॥*॥ अभ्यस्तस्य यदाऽहाचि ॥*॥

प्र.] विधानं विशेष्यते, व्याप्तिन्यायाश्रयात्, एवं हि हलादावजादौ च गुणः सिध्यति। **कथं कुण्डिरिति** । अङ्गाधिकारे नुमो विधानादकृत एव नुमि प्रत्ययो लघूपधाद्विधीयते, तस्मिन् परतो नुमि गुणः प्राप्नोति । **उक्तं तत्रेति** । तेन 'कुण्डे'ति 'गुरोश्च हल' इत्यकारः सिध्यति, अन्यथा क्तिन् स्यात् । **कथं रञ्जेरिति** । यदि षष्ठीनिर्देशे (ऽपि) विधानं विशेष्यते तदान्यत्राऽपि प्रसङ्गः। ततश्चाऽकारोपधाद्विहिते प्रत्यये वृद्धिर्विधी-यमाना रञ्जेः प्रत्ययोत्पत्तेः पुरस्तान्नकारोपधत्वाद्वृद्धिर्न प्राप्नोति। **राग इति** । 'रञ्जेश्च' 'घञि च भावकरणयो'रिति नलोपः। ननु चोपधाया अकारस्य वृद्धिरुच्यते, न च ततः प्रत्ययविधिसंभव इति विध्यपेक्षत्वं नाश्रयिष्यते, एवं मन्यते–अकारो-पधायो विधीयते सोऽवयवादप्यनुमानाद्विहितो भवति। **स्यन्दिश्रन्थ्योरिति**। नलो-पार्थं वृद्ध्यभावार्थं निपातनं। यदि च वृद्धिविधौ विधानं विशेष्यते ततो वृद्धिप्रसङ्गा-ऽभावात्तदभावार्थं निपातनं न क्रियेत, नलोपसिद्धये विधिरेवाश्रीयेत । अनेकप्रयो-जनसिद्धये निपातनाश्रयणम्। **अनल्लोपइति**। 'अल्लोपोऽन' इत्यत्र षष्ठीनिर्देशेऽन्नन्ता-द्विहिते प्रत्यये लोपो विधीयमानो 'राज्ञ' इत्यादावेव स्यान्नाऽस्थ्ना दध्नेत्यादौ । शिदीर्घत्वं च 'सामानी'त्यादावेव स्यान्न तु 'कुण्डानी'त्यादौ । तस्मात् षष्ठीनिर्देशे विधानविशेषणे दोषप्रसङ्गाद्गुणो भेत्तुर्न सिध्यति । **अभ्यस्तस्येति** । अज्ग्रहणस्य

उ.] इति । स्थानषष्ठीत्वसंभवेन प्रधानगुणविशेषणत्वे संभवतीत्यर्थः । **अन्यथा क्तिन्स्यादिति**। ततश्चात्र लघूपधाद्विधानाऽभावेन न गुण इत्यर्थः। भाष्ये **धातोर्नुम** इति हेतौ पञ्चमी । यतस्तत्र धातोर्नुम्नाऽङ्गस्य तस्मादित्यर्थः । **कथं रञ्जेरिति** चोद्यस्य प्रकृते सङ्गतिं दर्शयति—**यदीति । अवयवादप्यनुमानादिति** । अवयवात्मकत्वा-त्समुदायस्येति भावः । ननु नलोपार्थमेव निपातनं स्यादत आह–**नलोपसिद्धये इति** । 'रञ्जेश्च' 'घञि चे'त्युत्तरमेव स्यदिश्रन्थी पठेदित्यर्थः। वार्त्तिके 'अनल्लोप' इति पाठे अनन्तस्य योऽल्लोपः सोऽनल्लोप इत्यर्थः । 'अनल्लोप' इति पाठे अनङो लोपोऽर्थात्तत्संबन्ध्यकारस्येत्यर्थः । **शिदीर्घत्वं**—'सर्वनामस्थाने चाऽसंबुद्धा'वित्य-

यदयं 'नाऽभ्यस्तस्याचि पिति सार्वधातुक' इत्यज्ग्रहणं करोति तज्ज्ञापयत्याचार्यो—'भवत्येवंजातीयकानां गुण' इति ॥*॥ लङ्वर्थं तत्कृतं भवेत् ॥*॥ **लङ्वर्थमेतत्स्यात्—अनेनेक्** ॥*॥ क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे ॥*॥

'यदयं त्रसिगृधिधृषिक्षिपेः क्नुः' 'इको झल्' 'हलन्ताच्चे'ति क्नुसनौ कितौ करोति तज्ज्ञापयत्याचार्यो—'भवत्येवंजातीयकानां गुण' इति ॥

॥*॥ संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति ।
विध्यपेक्षं लघोश्चासौ कथं कुण्डिर्न दुष्यति ॥१॥
धातोर्नुमः कथं रञ्जेः स्यन्दिश्रन्थ्योर्निपातनात् ।
अनङ्लोपशिदीर्घत्वे विध्यपेक्षे न सिध्यतः ॥२॥
अभ्यस्तस्य यदाऽहाचि लङ्वर्थं तत्कृतं भवेत् ।
क्नुसनोर्यत्कृतं कित्त्वं ज्ञापकं स्याल्लघोर्गुणे ॥३॥*॥

नाभ्यस्तस्याचि पिति सार्वधातुके ॥ ७।३।८७ ॥

॥*॥ अभ्यस्तानामुपधाह्रस्वत्वमचि परस्पशाते चाकशीमि वावशतीरिति दर्श-

---

प्र.] प्रयोजनं 'नेनेक्ती'त्यादौ गुणप्रतिषेधो मा भूत्। यदि च हलादावलघूपधत्वाद्गुणो न स्यात्तदा गुणस्य प्राप्तिरेव नास्तीति किं तन्निषेधनिवारणार्थेनाऽज्ग्रहणेन ?। **लङ्वर्थमिति** । लुप्ते प्रत्यये गुणप्रतिषेधनिवारणायाऽज्ग्रहणं न ज्ञापकम् । **अनेनेगिति** । 'णिजिर् शौचपोषणयो'रित्यस्माल्लङि तिप्शप्श्लुः। द्विर्वचनं । निजां त्रयाणां गुणः श्लौ'-वित्यभ्यासस्य गुणः । 'हल्ङ्याब्भ्य' इति तिलोपः । प्रत्ययलक्षणेन लघूपधगुणः ।

क्नुसनोरिति । ननु सनः कित्त्वममभावार्थं स्यात्—सिसृक्षति दिदृक्षत इति कथं ज्ञापकम् ? । उच्यते । यद्येतावत्प्रयोजनं स्यात्—'सृजिदृशोर्झल्यमकित्सनो'रित्येव ब्रूयात्, तस्माद्गुणप्रतिषेधार्थमपि कित्त्वं ज्ञापकमेव । किन्तु धिप्सति धीप्सतीत्यत्र नलोपार्थं सनः कित्त्वं स्यादिति क्नोरेव कित्त्वं ज्ञापकम् । **[पुगन्तलघूपधस्य च]**

नाभ्य । अभ्यस्तानामिति । गुणप्रतिषेधमविधाय ह्रस्वत्वमेव विधेयं, सर्वेष्ट-

---

उ.] नेन। तत्रापि नान्ताद्विहिते सर्वनामस्थाने इत्यर्थः स्यादिति भावः। **लुप्ते प्रत्यय इति** । प्रत्ययलोपे संयोगाऽभावेन गुरुत्वाऽभावाल्लघूपधत्वमस्त्येवेत्यर्थः । **क्नोरेवेति** । संयोगात्परत्वे सति ह्रस्वत्वरूपलघुत्वशरीरघटकसंयोगस्य प्रत्यासत्त्याऽङ्गावयवस्यैव ग्रहणम्, ईदृशार्थाश्रयणे च क्नोः कित्त्वं ज्ञापकमिति भावः । यद्वा भूतपूर्वलघूपधत्वमाश्रित्य गुण इति भावः । परे तु—'सृजिदृशोर्झल्यमकित्सनि' 'इको झल्' 'रभे'रिति लघुन्यासेन सिद्धे सामान्यतोऽतिदेशस्य गुणप्रतिषेधार्थत्वमिति भाष्याशयः । 'इको झल्—हलन्ताच्चेति' प्रकरणे 'रुदविदे'ति सूत्रेण विहितसनः कित्त्वमपि ज्ञापकं बोध्यम् । **[पुगन्तलघूपधस्य च]** ।

नाभ्यस्तस्याचि पिति सार्वधातुके । 'गुणनिषेधविधौ सत्येव उपधाह्रस्वत्वं वक्तव्य'मिति वार्तिकाऽर्थभ्रमं निरस्यति—**गुणप्रतिषेधमिति** । गुणे तस्य ह्रस्वे

नात् ॥*॥ **अभ्यस्तानामुपधा(या) ह्रस्वत्वमचि वक्तव्यम् ॥ किं प्रयोजनम् ?॥ 'पस्पशाते चाकशीमि वावशतीरिति दर्शनात्' । पस्पशाते चाकशीमि वावशतीरिति प्रयोगो दृश्यते । 'कपोतः शरदं पस्पशाते' । 'अहं भुवनं चाकशीमि' । 'वावशतीरुदाज'दिति** ॥*॥ बहुलं छन्दस्यानुषग्जुजोषदिति दर्शनात् ॥*॥ **बहुलं छन्दसीति वक्तव्यमुपधाह्रस्वत्वम् ॥ किं प्रयोजनम् ? ॥ 'आनुषग्जुजोषदिति दर्शनात्' । यस्त आतिथ्यमानुषग्जुजोषत् ॥ यद्युपधाह्रस्वत्वमुच्यते 'प्रियां मयूरः प्रति नर्नृतीति' । 'यद्वत्त्वं नरवर ! नर्नृतीषि हृष्टः'–अत्र गुणः प्राप्नोति । तस्मान्नाऽर्थ उपधाह्रस्वत्वेन ॥**

कस्मान्न भवति–'पस्पशाते' 'चाकशी'ति 'वावशती'रिति ?॥ स्पशिकशिवशयः प्रकृत्यन्तराणि ॥ [नाभ्यस्तस्याचि पिति सार्वधातुके] ॥

भूसुवोस्तिङि ॥ ७।३।८८ ॥

॥*॥ भूसुवोः प्रतिषेधे तिङि[1] एकाज्ग्रहणं बोभवीत्यर्थम् ॥*॥ **भूसुवोः**

प्र.]सिद्ध्य इति भावः। **किं प्रयोजनमिति**। गुणनिषेधे ह्रस्वे चाऽविशेषं मत्वा प्रश्नः ।

पस्पशात इति । स्पशिर्वार्तिककारवचनादपठितोऽपि धातुस्तस्माल्लेट् व्यत्ययेनात्मनेपदं, टेरेत्वं, लेटोऽडाटावित्याट्। शपो बहुलं छन्दसीति श्लुः द्विर्वचनम् । **चाकशीमीति**। काशृ दीप्तौ यङ्लुग् लट् मिप् शब्लुक् । 'यङो वे'तीडागमः। **वावशतीरिति** । 'वाशृ शब्दे' यङ्लुक् लट् शतृ ङीप् । **जुजोषदिति** । 'जुषी प्रीतिसेवनयोः । लेट् । व्यत्ययेन परस्मैपदं तिप् । 'इतश्च लोपः परस्मैपदे'ष्विति इकारलोपे लेटोऽडाटावित्यट्। व्यत्ययेन शपः श्लुः। द्विर्वचनं। गुणे कृते ह्रस्वाऽभावः। **यदि तर्हीति** । यदि गुणनिषेधं प्रत्याख्यायोपधाह्रस्वो विधीयते तदा नर्नृतीति गुणरपरत्वयोः कृतयोर्ह्रस्वभाविन्युपधा नास्तीति रूपं न सिध्यतीति गुणनिषेध एव ज्यायान् । ननु परत्वाद्गुणं बाधित्वा ह्रस्वो भविष्यति, 'सकृद्गतौ विप्रतिषेध' इति पुनर्गुणो न भविष्यति । एवं तर्हि पुनः प्रसङ्गविज्ञानाद्गुणः स्यात् । **स्पशिकशिवशय इति** । 'स्पश बाधनस्पर्शनयोः' 'कश गतिशासनयो'रिति केचित्पठन्ति । अन्ये तु 'कस गतिशासनयो'रिति, तन्मतेन कशिः सौत्रो धातुः । कशेर्मुट् । 'प्रतिष्कशश्च कशे'रिति पाठात् । 'वश कान्तौ' । [**नाभ्यस्तस्याचि पिति सार्वधातुके**] ॥

भू । एकाज्ग्रहणमिति । द्विर्वचने कृतेऽनेकाच्त्वे गुणनिषेधनिवृत्त्यर्थम् ।

उ.]इकि नेनिजतीत्यादिसिद्धेरिति भावः। **अविशेषमिति**। नेनिजतीत्यादावित्यर्थः । **उपधा नास्तीति** । जातेऽपि ह्रस्वे रूपाऽसिद्धेरेवेत्यपि बोध्यम् । **ननु परत्वादिति** । इदं चिन्त्यं, गुणस्य नित्यत्वात् । सौत्रत्वमुपपादयति–**कशेरिति** ॥

भूसु । द्विर्वचने कृत इति। उत्तरखण्डस्य भूत्वात्प्राप्तिः, । भूशब्दान्तस्याऽङ्गस्येत्यर्थ इति भावः । ननु 'माभू'दित्यत्रापि अनेकाच्त्वाद्गुणः स्यादत आह—

प्रतिषेधे एकाज्ग्रहणं कर्तव्यम् ॥ किं प्रयोजनम् ? ॥ 'बोभवतीत्यर्थम्' । इह मा भूत् बोभवतीति ॥ यद्येकाज्ग्रहणं क्रियते—अभूत्—अत्र न प्राप्नोति ॥ क तर्हि स्यात् ?॥ 'मा भूत्' ॥ तस्मान्नाऽर्थ एकाज्ग्रहणेन ॥ कस्मान्न भवति 'बोभवती'ति ? ॥ [॥*॥ बोभूत्वित्येतन्नियमार्थम् ॥*॥ बोभूत्वित्येतन्नियमार्थं भविष्यति 'अत्रैव यङ्लुगन्तस्य गुणो न भवति नान्यत्रे'ति ॥ क मा भूत्—बोभवतीति । [भूसुवोस्तिङि] ॥

तृणह इम् ॥ ७।३।९२ ॥

किमर्थं तृहिरागतश्नम्को गृह्यते न 'तृहेरिम्भवती'त्येवोच्येत ?॥ ॥*॥ तृणहिग्रहणं श्नमिमोर्व्यवस्थार्थम्॥*॥ तृणहिग्रहणं [क्रियते॥किं प्रयोजनं ? ॥ 'श्नमिमोर्व्यवस्थार्थम्' ।] श्नमि कृते इम्यथा स्यात् ॥*॥ तृहिग्रहणे हीम्विषये श्नमभावोऽनवकाशत्वात् ॥*॥ तृहिग्रहणे हि सतीम्विषये श्नमोऽभावः स्यात् ॥ किं कारणम् ? ॥ 'अनवकाशत्वात्' । अनवकाश इम् श्नमं बाधेत ॥ इदमयुक्तं वर्तते॥ किमत्राऽयुक्तम् ? ॥ "तृणहिग्रहणं श्नमिमोर्व्यवस्थार्थ"मित्युक्त्वा, तत उच्यते—"तृहिग्रहणे हीम्विषये श्नमभावोऽनवकाशत्वा"दिति । तत्र वक्तव्यं-'तृणहिग्रहणं श्नमिमोर्भावाय, तृहिग्रहणे हीम्विषये

प्र.]बोभवतीति। यङ्लुगन्ताल्लेट् तिप्। 'लेटोडाटा'वित्यट् । मा भूदिति।न माङ्योग इत्यद्प्रतिषेधादेकाच्त्वम् । अत्रैवेति । सिद्धे गुणनिषेधे निपातनं नियमार्थम् । यद्येवं सोषवीतीति,—गुणनिषेधः प्राप्नोति । उच्यते । यथा भाष्यं तथा भवत्येव, योगापेक्षं ज्ञापकमिति वक्तव्ये नियमार्थमिति वचनात् । अथ वा नियमार्थेन निपातनेन द्वयोरपि भूसुवोर्यङ्लुकि गुणनिषेधो निवार्यते । यद्वा छान्दसो यङ्लुक्, न च सुवो यङ्लुगन्तस्य छन्दसि प्रयोगः। भाषायां तु क चिद्यङ्लुग् भवति न सर्वत्र॥

तृणह । किमर्थमिति । 'तृहू' इत्यस्य निवृत्त्यर्थो विकरणनिर्देशो न भवति, ततः परस्य हलादेः पितः सार्वधातुकस्य विकरणेन व्यवधानादिति प्रश्नः । नह्य-

---

उ.]न माङिति। नियमार्थमिति।'भवतेश्च यङ्लुकि निषेधस्तर्हि बोभूत्वित्यत्रैवे'ति नियम इत्यर्थः । अथवेति । 'भूसुवो'रिति यः प्रतिषेधः स यङ्लुकि चेद्बोभूत्वित्यत्रैवे'ति नियम इत्यर्थः । 'एकाज्ग्रहणं कर्तव्य'मिति वार्तिकेन समानफलकत्वाय द्विविधोऽत्र नियमः—'छन्दस्येव' 'लोव्ये वे'ति च । अतएव वार्तिकारम्भे भाषायां गुणापत्तिर्दूषणं नोद्भावितमित्येके । परे त्वाहुः—भाषायामस्य यङ्लुगन्तप्रयोगे दृढतरं न मानं, बोभूत्वित्यस्य छान्दसेषु पाठस्तु यङ्लुकश्छान्दसत्वादेव । तदाह—भाषायां त्विति । [भूसुवोस्तिङि] ।

तृणह इम् । तृहू इत्यस्येति । नचाऽस्यैव यङ्लुगन्तस्य व्यावृत्त्यर्थं स्यादिति

श्नमभावोऽनवकाशत्वा'दिति ॥ तर्त्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । 'व्यवस्थार्थ'मित्येव सिद्धं, न ह्यसतो व्यवस्थाऽस्ति ॥ [तृणह इम्] ॥

तुरुस्तुशम्यमः सार्वधातुके ॥ ७।३।९५ ॥

सार्वधातुक इति वर्तमाने पुनः सार्वधातुकग्रहणं किमर्थम् ? ॥ *॥ [सार्वधातुक इति वर्त्तमाने] पुनः सार्वधातुकग्रहणमपिदर्थम् ॥*॥ अपिदर्थोऽयमारम्भः । 'अग्निगो शमीध्वं' 'सुशमि शमीध्वं' 'शमीध्वमध्रिगो' ॥

बहुवचने झल्येत् ॥ ७।३।१०३ ॥

॥*॥ अतो दीर्घाद्बहुवचन एत्वं विप्रतिषेधेन ॥*॥ अतो दीर्घाद्बहुवचन एत्वं भवति विप्रतिषेधेन । 'अतो दीर्घो यञि' 'सुपि चे'त्यस्यावकाशः—वृक्षाभ्यां प्लक्षाभ्याम् । 'बहुवचने झल्ये'दित्यस्यावकाशो—वृक्षेषु प्लक्षेषु । इहोभयं प्राप्नोति—वृक्षेभ्यः प्लक्षेभ्यः । एत्वं भवति विप्रतिषेधेन ॥ [बहुवचने] ।

अम्बार्थनद्योर्ह्रस्वः ॥ ७।३।१०७ ॥

[॥*॥ डलकवतीनां प्रतिषेधः ॥*॥] ॥ डलकवतीनां प्रतिषेधो वक्तव्यः ।

प्र.]सत इति । 'व्यवस्थार्थ'मित्येवं ब्रवता पूर्वं श्नमो भावः पश्चादिमित्युक्तं भवति । 'श्नमो भावाये'ति तूच्यमाने क्रमो न प्रदर्शितः स्यात् । [तृणह इम्] ॥

तुरु । अपिदर्थमिति । 'नाभ्यस्तस्याचि पिति सार्वधातुके'इति सार्वधातुकग्रहणं पिद्विशेषणसंबद्धमिति तदनुवृत्तौ पितोऽप्यनुवृत्तिः स्यादिति तन्निवृत्त्यर्थमन्यत्सार्वधातुकग्रहणमित्यपितोऽपि ईड्भवति । हल्ग्रहणमनुवर्तते, न हि तत्सार्वधातुकग्रहणेन सहनिर्दिष्टं, यतस्तन्निवृत्तौ हलो निवृत्तिः स्यात् । शमीध्वमिति । शमेरन्तर्भावितण्यर्थात्प्रैषे लेट् । व्यत्ययेनात्मनेपदं, शप् । तस्य 'बहुलं छन्दसी'ति लुक् ।

उ.]वाच्यं,सानुबन्धकत्वेनाऽस्याऽग्रहणमित्यत्र तात्पर्यात् ।यङ्लुक्सत्त्वे मानाऽभावाच्च। भाष्ये—अनवकाशत्वादिति । नच श्नमि कृते तन्मध्यपतितन्यायेनेमोऽवकाशः, मिदचोऽन्त्यादित्येकवाक्यतया तृहोऽन्त्यादच ऋकारात्पर इमित्यर्थेन श्नमि ऋकारस्याऽन्त्यत्वाभावेन तदप्राप्तेः । पुनर्वाक्यार्थे तु न मानम् । अनेनैव न्यायेनेमि श्नमोऽभावः । तद्ध्वनयन्नाह—श्नमिमोर्भावायेति । न ह्यसतो व्यवस्थास्तीति च । यद्वा तत्कालेऽवश्यं प्राप्तिसत्त्वेन तदप्राप्तिविषयेऽवकाशाऽभावेनाऽनवकाशत्वमित्यर्थः । पूर्वमिति । 'व्यवस्थार्थ' मित्यनेन श्नमिमो भावः क्रमश्च दर्शित इति भावः। [तृणहइम्] ॥

तुरुस्तु । नन्वेवं हल्ग्रहणस्यापि निवृत्तिः स्यादत आह—हल्ग्रहणमिति । 'उतो वृद्धि'रित्यतः। ननु शमिरकर्मकस्तत्कथं पशुविशसनप्रत्यायकतया सकर्मकोऽत आह—शमेरिति । शबिति। अत्रापि 'व्यत्ययेने'त्यपकृष्यते, श्यन्विकरणो हि शमिः परस्मैपदी च । [तुरुस्तुशम्यमः सार्वधातुके] ॥

अम्बार्थ । ननु शब्दस्य विशेष्यत्वात्स्त्रीलिङ्गनिर्देशोऽनुपपन्नोऽत आह—

अम्बाडे ! अम्बाले ! अम्बिके ! ॥*॥ तल् ह्रस्वत्वं वा ङिसंबुद्ध्योः ॥*॥ **तल् ह्रस्वत्वं वा ङिसंबुद्ध्योरिति वक्तव्यम् । देवत देवते । देवतायां देवते ॥**

स तर्हि प्रतिषेधो वक्तव्यः ? ॥ न वक्तव्यः ॥ स कथं न वक्तव्यो भवति ? ॥*॥ अम्बार्थं द्व्यक्षरं यदि ॥*॥ **यद्यम्बार्थं द्व्यक्षरं गृह्यते ॥**

तत्तर्हि ह्रस्वत्वं वक्तव्यम् ? ॥ [॥*॥ अवश्यं छन्दसि ह्रस्वत्वमुपगायन्त मां पत्नयो गर्भिणयो युवतय इत्येवमर्थम् ॥*॥] । **अवश्यं छन्दसि ह्रस्वत्वं वक्तव्यम्—उपगायन्तु मां पत्नयो गर्भिणयो युवतय इत्येवमर्थम्** ॥*॥ मातृणां मातच्पुत्रार्थमर्हते ॥*॥ **मातृणां मातजादेशो वक्तव्यः ॥ [किं प्रयोजनम् ? ॥]। 'पुत्रार्थमर्हते' । गार्गीमात वात्सीमात ॥** [अम्बार्थनद्योर्ह्रस्वः] ॥

प्र.] **अम्बा । डलकवतीनामिति ।** अर्थगतेन स्त्रीत्वेनाम्बार्थाः शब्दा निर्दिष्टाः । श्रुत्यपेक्षया वा स्त्रीत्वेन निर्देशः । असंयुक्तानां च डलकानां ग्रहणादक्काऽल्लेति ह्रस्वो भवत्येव । **देवत इति ।** ङौ- ह्रस्वे कृते 'ह्याब्ग्रहणेऽदीर्घ'इति स्थानिवत्त्वनिषेधादा-म्याडागमौ न भवतः ।. **अम्बार्थमिति ।** द्व्यच एवाम्बार्थस्य ग्रहणाड्डलकवता-मर्थात्प्रतिषेधः कृतो भवति । **अवश्यमिति ।** 'व्यत्ययो बहुल'मिति दीर्घस्य ह्रस्वः । **मातृणामिति ।** पूर्वपदे बहवो मातृशब्दा इति बहुवचनं । मातृशब्दस्य मातजादेशो वक्तव्यो यो मातृशब्दः पुत्रार्थं पुत्रमभिधातुमुपादीयते।बहुव्रीहौ च वर्तिपदैरन्यपदार्थो-ऽभिधीयते इति तत्रैवाऽयं संबुद्धौ मातजादेशः। **गार्गीमातेति ।** गार्गी माता यस्येति बहुव्रीहौ 'नद्यृतश्चे'ति कप् 'येननाऽप्राप्त' इति मातजा बाध्यते । यः पुत्रः श्लाघ्य-गुणत्वात्कुलसंभूतया मात्रा व्यपदेशमर्हति तत्र मातजादेशो, न त्वन्यत्र । गर्ग-वत्साभ्यां गर्गादिभ्यो यञ् । 'यञश्चे'ति ङीप् । [**अम्बार्थनद्योर्ह्रस्वः**] ।

उ.]**अर्थगतेनेति।अम्बा**—माता। **श्रुत्यपेक्षयेति।**शब्द एव विशेष्योऽध्याहर्तव्य इत्यर्थः। **असंयुक्तानामिति।** अतएव प्रत्याख्यानेन फलैक्यं । भाष्ये—**द्व्यक्षरमिति ।** व्यञ्जन-सहितोऽच्—अत्राक्षरम् । 'द्व्यजम्बार्थे'ति सूत्रं पाठ्यं । प्रतिषेधाच्चेदं लब्धिवति भावः । **तत्तर्हि ह्रस्वत्वमिति ।** 'तल्ह्रस्वत्वं वे'त्येतत् । तलन्तस्य ह्रस्वत्वं वेति तदर्थः । **पूर्ववदेवेति ।** अर्थगतं पूजाद्योतकं बहुत्वमादाय बहुवचननिर्देश इत्यर्थः । 'पूर्व-पदे बहव' इति पाठे तु—सति पूर्वपदे उत्तरपदभूतास्ते बहव इत्यर्थः । कथं मातृ-शब्दस्य पुत्रार्थाऽभिधानायोपादानमत आह—**बहुव्रीहौ चेति ।** 'अर्हत' इत्यस्योपयोग-माह—**यः पुत्र इति । श्लाघ्यत्वादिति ।** एतच्चाऽर्हः प्रशंसायामिति प्रशंसाऽर्थविहित-शतृप्रयोगाल्लभ्यते । 'पुत्रार्थमर्हते' इत्यत्र सापेक्षत्वेऽप्यत एव निपातनात्समासः । **नान्यत्रेति ।** यत्र पितुरसंविज्ञानेन मात्रा व्यपदेशस्तत्र न भवतीत्यर्थः।**[अम्बार्थ]**।

ह्रस्वस्य गुणः ७।३।१०८ ।

इह कस्मान्न भवति—नदि कुमारि किशोरि ब्राह्मणि ब्रह्मबन्धु ? ॥ 'ह्रस्ववचनसामर्थ्यात्' । अस्त्यन्यद्ध्रस्ववचने प्रयोजनम् ?॥ किं ?॥ पृथग्विभक्तिं मोच्चीचरमिति ॥ शक्या पृथग्विभक्तिरनुच्चारयितुम् ॥ कथम् ? ॥ एवमयं ब्रूयात् 'अम्बार्थानां ह्रस्वः' 'नदीह्रस्वयोर्गुण' इति॥ यद्येवमुच्यते 'जसि चे'-त्यत्र नद्या अपि गुणः प्राप्नोति ॥ एवं तर्हि योगविभागः करिष्यते—'अम्बार्थनद्योर्ह्रस्वः'। ततो 'ह्रस्वस्य' । ह्रस्वस्य च ह्रस्वो भवति ॥ किमर्थमिदं ? ॥ गुणं वक्ष्यति तद्बाधनार्थम् ॥ ततो 'गुणः' । 'गुणश्च भवति ह्रस्वस्ये'ति ॥ अथ वा 'ह्रस्वस्य गुण' इत्यत्राऽम्बार्थनद्योर्ह्रस्व इत्येतदनुवर्तिष्यते ॥ [ह्रस्वस्य गुणः]।

जसि च ॥ ७।३।१०९ ॥

॥*॥ जसादिषु छन्दसि वावचनं प्राङ्णौ चङ्युपधायाः ॥*॥ जसादिषु छन्दसि वेति वक्तव्यम् ॥ किमविशेषेण ? ॥ 'ने'त्याह । 'प्राङ्णौ चङ्युप-

---

प्र.] ह्रस्व । इह कस्मादिति । ह्रस्वविधानं नद्या गुणविघ्यर्थमेव स्यात् । पृथगिति। यद्यम्बार्थानां ह्रस्व इत्युक्त्वा 'नद्या गुणो ह्रस्वस्य चे'त्युच्यते तदा पृथगुच्चारयितव्या भवति । एवमयं ब्रूयादिति । ह्रस्वं विधाय गुणे विधीयमाने प्रक्रियागौरवं भवतीति लाघवार्थं साक्षादेव गुणं विदध्यात् । नद्या अपीति । एकसमासनिर्देशाद्द्वयोरपि नदीह्रस्वयोरनुवृत्तिप्रसङ्गात्। ह्रस्वस्य चेति। 'ह्रस्वस्ये'त्यत्राम्बार्थनद्योरित्यनुवर्तते, तेन नद्या ह्रस्वे कृते तस्य गुणबाधनाय ह्रस्व एव क्रियते । अथवेति । सिद्धे ह्रस्वे पुनरनुवृत्त्या तद्विधानं गुणबाधनार्थम् । [ह्रस्वस्य गुणः] ॥

जसि च । जसादिष्विति। आदिशब्दः प्रकारवाची । प्रकरणेऽस्मिन्येषु कार्यं

उ.] ह्रस्वस्य । ननु 'नदी'त्यादौ ह्रस्वविधानाद्गुणो न भविष्यतीत्यत आह—ह्रस्वविधानमिति । पृथग्विभक्तिरिति । तथा च गौरवं स्यादित्यर्थः । एवञ्च तत्परिहारायैवमुच्यते इति सामर्थ्योपक्षयान्नदीत्यादौ गुणः स्यादेवेति भावः । नन्वेवं निर्देशस्य यथान्यासेन समानत्वाल्लाघवाऽभावेन 'एवं ब्रूया'दित्ययुक्तमत आह—ह्रस्वं विधायेति। साक्षादेवेति । तदविधानाच्च गुणाभावोऽनुमीयत इत्यर्थः । तेन नद्या इति । अम्बार्थानां पुनर्ह्रस्वविधाने प्रयोजनाभावान्नदीविषयमेतद्ध्रस्वविधानमित्यर्थः । मातृशब्दे 'ऋतो ङी'ति गुणबाधोऽपि स्यादिति नदीग्रहणमात्रमनुवर्तत इति तत्त्वम् । पुनरनुवृत्त्येति । वाक्यभेदेनेत्यर्थः । 'अम्बार्थनद्योर्गुण' इत्येव सिद्धे ह्रस्वविधानसामर्थ्यान्न गुण इति कश्चित्तन्न, इक्परिभाषोपस्थितावम्बेत्यादौ गुणाऽनापत्तेः । तदनुपस्थितौ तु मातृवाचकाऽनःशब्देऽपि गुणापत्तेः । तस्य नपुंसकत्वेऽपि 'त्रपो' इतिवत्पक्षे गुणापत्तिरिति बोध्यम् । [ह्रस्वस्य गुणः] ॥

धायाः' ॥ किं प्रयोजनम् ?॥ ॥*॥ अम्बे दर्विं शतक्रत्वः पश्वे नृभ्यः किकिदीव्या ॥*॥ अम्बे–अम्ब । दर्वे–दर्वि । शतक्रत्वः–शतक्रतवः । पश्वे नृभ्यः, पशवे नृभ्यः। किकिदीव्या–किकिदीविना ॥ [जसि च] ॥

घेर्ङिति ॥ ७।३।१११ ॥

॥*॥ घेर्ङितिगुणविधाने ङीसार्वधातुके प्रतिषेधः ॥*॥ घेर्ङितिगुणविधाने ङीसार्वधातुके प्रतिषेधो वक्तव्यः । पट्वी मृद्वी कुरुत इति ॥*॥ सुबधिकारात्सिद्धम् ॥*॥ [सुबधिकारात्सिद्धम्]। सुबिति वर्तते ॥ क्व प्रकृतम् ? ॥ 'सुपि च' 'बहुवचने झल्ये'दिति ॥ [घेर्ङिति] ॥

याडापः ॥ ७।३।११२ ॥

इहातिखट्वाय अतिमालायेति ह्रस्वत्वे कृते स्थानिवद्भावाद्याड्प्राप्नोति तस्य प्रतिषेधो वक्तव्यः। न वक्तव्यः ॥*॥ याड्विधानेऽतिखट्वायेत्यप्रतिषेधो ह्रस्वादेशत्वात् ॥*॥ याड्विधानेऽतिखट्वायातिमालायेत्यप्रतिषेधः । अनर्थकः प्रतिषेधोऽप्रतिषेधः ॥ याड्कस्मान्न भवति ?॥ ह्रस्वादेशत्वात्' । ह्रस्वादेशोऽयम् । उक्तमेतत् 'ङ्याब्ग्रहणेऽदीर्घ' इति ॥ अथेदानीमसत्यपि स्थानिवद्भावे दीर्घ-

---

प्र.]विधीयते ते जसादय इति पूर्वयोगनिर्दिष्टानामपि ग्रहणम् । दर्वीति। 'कृदिकाराद-क्तिन' इति पक्षे ङीष्विधानात्सिध्यति रूपद्वयम् । ङीष्विकल्पं त्वनपेक्ष्यैतदुक्तम् ।

शतक्रत्व इति। 'जसि चे'ति गुणाऽभावपक्षे 'प्रथमयो'रिति पूर्वसवर्णदीर्घोऽपि 'वाछन्दसी'ति वचनान्न भवतीति यणादेशः प्रवर्तते । किकीदिविशब्दः कृविघृष्वि-त्युणादिषु निपातितः । [जसि च] ॥

घेः । कुरुत इति । 'शेषो घ्यसखी'ति यस्य नदीसंज्ञा नास्ति स घिसंज्ञ इति कुरुशब्दो घिः ।[घेर्ङिति] ॥

याडा । अतिखट्वायेति । खट्वामतिक्रान्त इति प्रादिसमासे ह्रस्वे च कृते चतुर्थ्येकवचनस्य 'ङेर्य' इति प्राप्नोति, 'याडाप' इति च, तत्र परत्वाद्याड्प्राप्नोति, तत्र कृते दीर्घत्वे चाऽतिखट्वायै देवदत्तायेतिप्रसङ्गः।ह्रस्वादेशत्वादिति। यतो ह्रस्वादेशः कृतस्ततो रूपभेदादाब्ग्रहणेन तस्य ग्रहणाऽभावात्। स्थानिवत्त्वं च नास्तीत्याह–

उ.] जसि च । प्रकारः–सादृश्यं । तच्चैकप्रकरणनिर्दिष्टत्वनिबन्धनं । किकीदिविः–पक्षिविशेषः । अनपेक्ष्येति । तदा ह्येकमन्तोदात्तं स्यात् । आद्युदात्तमेव प्रयोगद्वयमिष्यते इति भाष्यकृदभिप्रायमन्ये । [जसि च] ॥

घेर्ङिति । ननु कुरुशब्दस्य कथं घिसंज्ञा, 'यू स्त्र्याख्या'वित्यपेक्षया शेषविज्ञानादत आह—शेषो घीति । [घेर्ङिति] ।

याडापः । परत्वादिति । नित्यत्वेनोत्कृष्टत्वादित्यर्थः । लाक्षणिकं रूपमिति । नचैवं 'खट्वायै' इत्यत्रापि सवर्णदीर्घे लाक्षणिकत्वमिति तत्रापि न स्यात्, आदि-

त्वे कृते आबसौ भूतपूर्व इति कृत्वा याङ्कस्मान्न भवति ? ॥ 'लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैवे'ति ॥ ननु चेदानीं सत्यपि स्थानिवद्भाव एतया परिभाषया शक्यमुपस्थातुम् ?॥ 'नेत्याह । न हीदानीं क्वचिदपि स्थानिवद्भावः स्यात् ॥ [याडापः] ॥

ङेराम्नद्याम्नीभ्यः ॥ ७।३।११६ ॥

॥*॥ इदुद्भ्यामाम्विधानमौत्वस्य परत्वात् ॥*॥ **इदुद्भ्यामाम्विधेयः,–शकट्यां पद्धत्यां धेन्वामिति ॥ किं पुनः कारणं न सिध्यति ?॥ 'औत्वस्य परत्वात्' । परत्वादौत्वंप्राप्नोति**॥*॥ योगविभागात्सिद्धम् ॥*॥[**योगविभागात्सिद्धमेतत्**] । **योगविभागः करिष्यते 'ङेराम्नद्याम्नीभ्यः' । तत 'इदुद्भ्याम्' । 'इदुद्भ्यामुत्तरस्य ङेराम्भवती'ति । शकट्यां पद्धत्यां धेन्वामिति । तत 'औदच्च घेः' ।**

औदच्च घेः ॥ ७।३।११८-११९॥

॥*॥ औत्वे योगविभागः ॥*॥ **औत्वे योगविभागः कर्तव्यः । 'औत्' ।**

प्र.]**उक्तं चैतदिति । लक्षणेति** । अकारस्य दीर्घे सत्याबिति लाक्षणिकं रूपमिति न तस्य ग्रहणम् । **ननु चेति** । 'ङ्याब्ग्रहणेऽदीर्घ' इति न वक्तव्यमिति चोद्यते । 'नेत्याहे'ति परिहारः । [**याडापः**] ।

ङेराम्। शकट्यामिति।शकटिशब्दस्य 'ङिति ह्रस्वश्चे'ति वा नदीसंज्ञाविधानात्तदभावपक्षे घिसंज्ञायां शकटाविति भवति । नदीसंज्ञापक्षे तु परत्वादौत्वं प्राप्नोति । आमोऽवकाशः—कुमार्यामिति । औत्वस्याऽवकाशः–सख्यौ पत्याविति, अत आह –**इदुद्भ्यामिति** । पूर्वविप्रतिषेध आश्रयणीय इत्यर्थः । ननु कृते औत्त्वे पुनःप्रसङ्गविज्ञानादाम् भविष्यति, पुनरौत्त्वं न भविष्यति, चक्रकेष्विष्टतो व्यवस्थापनात् । नैतदस्ति । द्रव्यपदार्थपक्षे सकृद्गतिपरिभाषयाऽऽम्र स्यात् । **योगविभाग इति** । 'इदुद्भ्या'मित्यत्र योगे नदीग्रहणानुवृत्त्या सख्यौ पत्यावित्यत्रामोऽप्रसङ्गः।[**ङेराम्**]।

औदच्च घेः। औत्व इति । एकयोगे त्वत्त्वौत्त्वयोः सन्नियोगशिष्टत्वाद्यत्रात्त्वं तत्रौ-

---

उ.]वद्भावेन प्रवृत्तेः।यत्र लक्षणप्रवृत्तिं विना तद्रूपाऽसंभवस्तदेव लक्षणप्रतिपदोक्तपरिभाषानिषेधविषयः। नचैत्तत्तथा, एकादेशतः प्रागपि तद्रूपसत्त्वादिति केचित् । अतएवाऽऽकारप्रश्लेषेण वार्तिकप्रत्याख्यानेऽपि न दोष इति बोध्यम्। यत्तु तत्पक्षेऽङ्गस्याबन्तविशेषणात्वेनाऽऽबन्ताङ्गाऽभावान्न दोषः । उपसर्जनस्त्रीप्रत्यये तदादिनियमसत्त्वादिति, तन्न, 'अतिखट्वाये'त्युदाहरणविषयवार्तिकस्य, तत्प्रत्याख्यानाय प्रश्लेषस्य च वैयर्थ्यापत्तेः । स्थानिवद्भावेऽपि प्राप्त्यभावात्खट्वाया अर्द्धेऽर्द्धखट्वायामित्यादौ याडनापत्तिरिति दिक् । [**याडापः**] ।

ङेराम्नद्याम्नीभ्यः । शकट्यामिति । अत्र प्रयोगे शकटिशब्दस्येत्यर्थः । ननु योगविभागे 'सख्या'वित्यादावप्याम्स्यादत आह–**इदुद्भ्यामित्यत्रेति** । [ङेराम]।

औन्द्भवतीदुद्भ्याम् । ततः 'अच्च घे'रिति । अकारश्च भवति घेरिति ॥ किमर्थो योगविभागः ?॥*॥सखिपतिभ्यामौत्त्वार्थः॥*॥सखिपतिभ्यामौत्त्वं यथा स्यात्। सख्यौ पत्यौ ॥*॥ एकयोगे ह्यप्राप्तिरत्त्वसन्नियोगात् ॥*॥ एकयोगे हि सख्यौ-त्त्वस्याऽप्राप्तिः ॥ किं कारणम् ? ॥ 'अत्त्वसन्नियोगात्' । अत्त्वसन्नियोगेनौत्त्व-मुच्यते तेन यत्रैवात्वं तत्रैवौत्त्वं स्यात् ॥*॥ नवाऽकारस्याऽन्वाचयवचनाद्यथा क्यङि सलोपः ॥*॥ न वाऽर्थ औत्त्वे योगविभागेन ॥ किं कारणम् ? ॥ अ-कारस्यान्वाचयवचनात्' । प्रधानशिष्टमौत्त्वमन्वाचयशिष्टमत्त्वम् । 'यथा क्य-ङि सलोपः ।' तद्यथा प्रधानशिष्टः क्यङ् प्रातिपदिकमात्राद्भवति । यत्र च सकारस्तत्र लोपः ॥

॥*॥अत्त्वे टाप्प्रतिषेधः ॥*॥ अत्त्वे टापः प्रतिषेधो वक्तव्यः। शकटौ पद्धतौ धेनौ । अत्वे कृते['ऽत इति'] टाप् प्राप्नोति ॥*॥ न वा सन्निपातलक्षण-स्याऽनिमित्तत्वात् ॥*॥ न वा वक्तव्यः । किं कारणम् ? ॥ सन्निपातलक्षणस्याऽ-निमित्तत्वात्' । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्ये'त्येवं न भवि-ष्यति ॥*॥ ङित्करणाद्वा ॥*॥ अथ वा ङिदौकारः करिष्यते—औ ङिच्च घेः ।

प्र.]त्त्वं स्यात्। सख्यौ पत्याविति। असखीतिप्रतिषेधात्, पतिः समास एवेतिनियमा-च्चाऽनयोर्नास्ति घिसंज्ञा, अह्याख्यत्वाच्च नास्ति नदीसंज्ञा।यदा सखिशब्दः स्त्रियां वर्तते तदा सख्यशिश्वीतिभाषायामिति ङीषा भाव्यं, पतिशब्दस्य तु स्त्रीवृत्तेर्यज्ञसंयोगादन्यत्र 'ङिति ह्रस्वश्चे'ति पक्षे नदीसंज्ञेति पत्यामिति भवति । न वेति । अन्वाचये 'च'-शब्दः। इदुद्भ्यां परस्य ङेरौद्भवति यत्र तु घिसंज्ञाऽस्ति तत्र तस्यात्त्वमिति अत्त्वान-पेक्षमौत्त्वं प्रधानशिष्टम् । अत्त्व इति । टापि सत्यौङ आप इति शीभावः प्राप्नोति, यदा तत्र सामान्यग्रहणार्थो ङकारो वर्णनिर्देशो वा। यदा तु पूर्वाचार्यनिर्देशस्तदा प्रथमाद्वितीयाद्विवचनयोरेव शीविधानादस्याऽप्रसङ्गः । अन्ये टापि याड्प्रसङ्गमाहुः । न वेति। 'या से'त्यादौ टाब्भवति,'त्यदाद्यकारष्टाब्विधे'रिति दोषेषु परिगणनात् । ङित्करणाद्वेति । अन्तोदात्तेषु स्वरभेदोऽपि नास्ति । ङित्त्वे उदात्तनिवृत्तिस्वरेण भाव्यम्, अङित्त्वे त्वेकादेश उदात्तेनोदात्त इति । ननु ङित्वे सख्यौ पत्याविति टिलोपप्रसङ्गः । नैतदस्ति । 'औङ्च्चि घे'रिति न्यासः क्रियते । 'पत्यावैश्वर्य' इति

उ.] औत् । अच्च घेः । सखिपत्योः स्त्रियां वृत्तौ कथं भाव्यं, तत्राह—यदा सखीति । एवञ्च तस्य सख्यामित्येवेति भावः ।यज्ञसंयोगादन्यत्रेति । यज्ञसंयोगे हि पत्न्यामिति भवति । आद्युदात्तेषु स्वरभेदप्रसङ्ग एव न, अन्तोदात्तेष्वपि नेत्याह– ङित्त्वे इति । अघेरिति । सामान्यापेक्षं ज्ञापकमिति भावः । वस्तुतः शङ्कैवाऽ

आङो नाऽस्त्रियाम् ॥ ७।३।१२० ॥

किमर्थमस्त्रियामित्युच्यते ना'ऽऽङो ना पुंसी'त्येवोच्येत ? ॥ का रूपसिद्धिः—त्रपुणा जतुना ? ॥ नुमा सिद्धम् ॥ नैवं शक्यम् इह ह्यमुना ब्राह्मणकुलेनेति मुभावस्याऽसिद्धत्वान्नुम्न स्यात्। 'अस्त्रिया'मिति पुनरुच्यमाने न दोषो भवति ॥ कथम् ? ॥ वक्ष्यत्येतत्**'नमुटादेश' इति** ॥*॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते सप्तमस्य तृतीये द्वितीयमाह्निकम् ॥ पादः समाप्तः ॥*॥

णौ चङ्युपधाया ह्रस्वः ॥ ७।४।१ ॥

अथ णिग्रहणं किमर्थं न 'चङ्युपधायाः ह्रस्व' इत्येवोच्येत ? ॥ 'चङ्यु-

---

प्र.] निपातनाद्वाऽघेष्टिलोपाऽभावः। विंशताविव्यत्र 'ति विंशतेर्डिती'ति तिलोपो न भवति, 'नस्तद्धित' इतियोगविभागात्। तत्र तद्धित इत्यत्र तिविंशतेर्डितीति, न इति चाऽनुवर्तते। 'टे'रित्येतत्तु नानुवर्तते, अतद्धितानां डित्करणसामर्थ्यात्। अथ वा टेरित्यनुवर्तताम्, तथाऽप्यतद्धितानां डित्करणसामर्थ्याद्यथैव ह्यभस्य लोपो भवति एवमतद्धितेष्वपि। [औत्] ॥

आङो। किमर्थमिति। 'आङो ना पुंसी'त्युच्यमाने मात्रालाघवं भवतीष्टं च सिध्यतीति प्रश्नः। **नुमेति।** 'इकोऽचि विभक्ता'वित्यनेन। **अमुनेति।** 'पुंसी'त्युच्यमाने नपुंसके नाभावो न स्यात्। नुमपीग्लक्षणो मुत्वस्याऽसिद्धत्वान्नास्ति। **न मु टादेश इति।** टाया आदेशष्टायामादेश इत्यनेकविभक्त्यन्तसमासाश्रयेण नाभावे कर्तव्ये ने च परतो दीर्घे मुत्वस्य सिद्धत्वाद्विलक्षणो नाभावो भवत्य'तो दीर्घो यञि' 'सुपि चे'ति दीर्घत्वं न भवतीति सर्वेष्टसिद्धिः ॥*॥ इति० **कैयटकृते** महाभाष्यप्रदीपे **सप्तमस्य तृतीये** द्वितीयमाह्निकम् ॥ पादश्च तृतीयः समाप्तः ॥*॥

णौ चङ्युपधाया ह्रस्वः। अथ णिग्रहणमिति। ह्रस्वग्रहणादुपधाग्रहणाच्च

उ.] युक्ता, इदुद्भ्यामुत्तरस्य ङेरौत्, घेः परस्य तु स डिदित्यर्थात्। **योगविभागादिति।** 'तद्धित' इति विभज्य तत्र 'विंशतेर्डिति' 'न' इति चानुवर्त्य वाक्यभेदेन व्याख्येयमिति भावः। **टेरित्येतदिति।** 'तस्य 'टेर्डिति लोप' इति स्वातन्त्र्येणैवाऽर्थो न तु 'तद्धित' इत्येतदेकवाक्यतयेति भावः। 'अतद्धितानां'मिति पाठे यथाऽतद्धितानां 'डा' इत्यादीनां डित्करणसामर्थ्यात्सिद्धान्तेऽभत्वेऽपि टिलोपस्तथाऽतद्धितत्वेऽपि भविष्यतीति तदनुवृत्तावपि न क्षतिरित्यर्थः। क्वचित्तु 'तद्धितानां'मिति पाठः। यथा ञ्मतुपादितद्धितेऽभत्वेऽपि लोपस्तथा औडादावतद्धितत्वेऽपि लोप इत्यर्थः। क्वचित्तु तत्सामर्थ्यादेवोभयवैकल्येऽपि डादौ लोप इति बोध्यम्। [**औत्**]।

आङो ना। ननु 'न मुने' इत्यस्य तन्त्रेण नाभावे नकारे च कृते कर्तव्ये च मुत्वं नाऽसिद्धमित्यर्थान्नपुंसके नुमा सिद्धमित्यत आह–भाष्ये—**वक्ष्यत्येतदिति।** एवञ्च वार्तिकैकवाक्यतया सूत्रेऽपि नाभावे कृते कर्तव्ये चेत्येवार्थ इति भाव इति

पधाया ह्रस्व' इतीयत्युच्यमाने–अलीलवत् अपीपवत्–ऊकारस्यैव ह्रस्वत्वं प्रसज्येत ॥ नैतदस्ति प्रयोजनम्, वृद्धिरत्र बाधिका भविष्यति ॥

वृद्धौ तर्हि कृतायामौकारस्यैव ह्रस्वत्वं प्रसज्येत ॥ नैतदस्ति–अन्तरङ्गत्वादत्राऽऽवादेशो भविष्यति । न हीदानीं ह्रस्वभाविन्युपधा भवति । तस्माण्णिग्रहणं कर्तव्यम् ॥

प्र.] चङा णिराक्षिप्तः, न ह्यण्यन्तानां चङि ह्रस्वभागुपधाऽस्ति। ह्रस्वश्रुत्या ह्यचपरिभाषोपस्थानादच उपधाया ह्रस्वेन भाव्यम् । न श्रिद्रुस्रुश्वेट्श्वीनामजुपधा । कमिगुप्योस्तु ह्रस्व एवोपधा । तत्र णावन्तरङ्गत्वाद्वृद्ध्यादिषु कृतेषु चङ्युपधाह्रस्वभाङ्नास्तीति सामर्थ्याच्चङि यः प्रत्ययस्तस्मिन्नुपधाया ह्रस्वो विज्ञास्यत इति प्रश्नः । इतरो यथाश्रुतसंभवाच्चङि यः प्रत्यय इत्यध्याहारो न युक्त इति वचनादन्तरङ्गमपि वृद्ध्यादि ह्रस्वो बाधेतेति मत्वाह–चङ्युपधाया इति । इतरस्तु चङि यः प्रत्ययस्तस्मिन्नुपधाया ह्रस्व इत्यध्याहारेण सूत्रार्थसंभवादयुक्ताऽन्तरङ्गबाधेति मत्वाह–वृद्धिरत्रेति । इतरो ह्रस्वस्याऽनवकाशतां मत्वाह–औकारस्येति । नन्वेवं वृद्धिरनर्थिका स्यात् । एतदेव तर्ह्युच्यते वृद्ध्याऽत्र न भाव्यम्।अभ्युपगम्य तु वृद्धिरुच्यते–वृद्धौ तर्हि कृतायामिति । अपवादत्वाद्धि ह्रस्वो वृद्धेर्बाधक आवादेशस्य चेति भावः । इतरो वाक्याध्याहारेण ह्रस्वस्य सावकाशतां मत्वाह–नैतदस्तीति । इतरो यथाश्रुतसंबन्धसंभवादनवकाशतामेव मत्वाऽऽह–न हीदानीमिति । ननु वृद्धिं बाधित्वा भवतूका-

---

उ.] सर्वेष्टसिद्धिः। इति श्री शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते सप्तमाध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥ पादश्च तृतीयः समाप्तः ॥

णौ चङि । ह्रस्वग्रहणादिति । ह्रस्वविधानादित्यर्थः । विधेयसमर्पकह्रस्वग्रहणेन तल्लिङ्गात्परिभाषोपस्थानादिति यावत् । वृद्ध्यादिष्विति । आदिनाऽऽवादि, अदीदयदित्यादौ युक् । चङिः यः प्रत्यय इति । स च णिरेवेति णिग्रहणमनर्थकमित्यर्थः । यथाश्रुतेति । अनुपसंजातविरोधन्यायादिति भावः । अयमेव सिद्धान्त्याशयः । भाष्ये–ऊकारस्यैवेति । न त्वपीपचदित्यादाविति भावः । नन्वेवमिति । यद्यौकारस्य ह्रस्व उकारस्तर्हि प्रतिपत्तिगौरवपरिहारायोकारस्यैव ह्रस्वोऽस्त्वित्याशयः । अत्र वदन्ति-वृद्धिशास्त्रमर्थवदेवाऽन्यत्र । अत्र प्रवृत्तिरपि पर्जन्यन्यायेनेति चिन्त्यमिदम्–वृद्ध्याऽत्र न भाव्यमिति । आवादेशस्य चेति । वृद्धिबाधनद्वारेति भावः । अपवादत्वाद्धीति । क्रमेण संस्कारे वृद्धिप्राप्तिकाले ह्रस्वाऽप्राप्त्या इदं चिन्त्यम् । पदसंस्कारे तु वक्तुं शक्यं, परन्तु भाष्यस्य क्रमसंस्काराभिप्रायेण प्रवृत्तिर्लक्ष्यते । ह्रस्वभाव्युपधाया 'अलीलव'दित्यादावप्यभावाच्छास्त्रं व्यर्थमेव स्यादिति णिग्रहणं कार्यमिति भाष्याशयः । पदसंस्कारेऽपि तत्तद्धातुं सिद्धं कृत्वा तत्प्रकृतिकपदसंस्कार इति धातुसंज्ञासमकालमेव वृद्धिरिति तद्बाधो ह्रस्वे-

अथ चङ्ग्रहणं किमर्थं न 'णावुपधाया' इत्येव सिद्धम् ॥ 'णावुपधाया ह्रस्व' इतीयत्युच्यमाने कारयति हारयत्यत्रापि प्रसज्येत ॥ नैतदस्ति प्रयोजनम्। आचार्यप्रवृत्तिर्ज्ञापयति 'न णावेव ह्रस्वत्वं भवती'ति यदयं मितां ह्रस्वत्वं शास्ति ॥ इहापि तर्हि न प्राप्नोति—अचीकरत् अजीहरत् ॥ वचनाद्भविष्यति॥ इहापि तर्हि वचनात्प्राप्नोति—कारयति हारयति । तस्माच्चङ्ग्रहणं कर्तव्यम् ॥

अथोपधाग्रहणं किमर्थम् ? ॥ ॥*॥ णौ चङ्युपधाग्रहणमन्त्यप्रतिषेधार्थम् ॥*॥ णौ चङ्युपधाग्रहणं क्रियते ॥ किं प्रयोजनम् ? ॥

'अन्त्यप्रतिषेधार्थम्' । अन्त्यस्य ह्रस्वत्वं मा भूत् ।

'णौ चङि ह्रस्व'इतीयत्युच्यमाने अलीलवत् अपीपवत्—अन्त्यस्यैव

प्र.]रस्य ह्रस्वस्तस्मिंस्तु कृते बाधितत्वान्माभूद्वृद्धिः,गुणस्तु केन वार्यते ?, ततो गुणेऽवादेशे च सिद्धमलीलवदिति । नैतदस्ति । गुणस्य वृद्ध्या बाधितत्वाद्वृद्धेश्च ह्रस्वेन, भ्रष्टावसरस्य गुणस्य कुतः पुनः प्रवृत्तिरिति उवङ् प्रसज्येत । 'अदीदप'दित्यत्र च ह्रस्वेन पुग्बाध्येत । 'अपीपव'दित्यादौ च नैव ह्रस्वः स्यादिति णिग्रहणं क्रियते । यदा चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधस्तदा वृद्ध्यावादेशयोः कृतयोः पुकि च णिलोपस्य स्थानिवत्त्वाऽभावाच्चङि उपधा ह्रस्वभाविनी संभवतीति णिग्रहणं न कर्तव्यम् । सूत्रकारेण चङ्परनिर्ह्रासे स्थानिवत्त्वनिषेधो न कृत इति णिग्रहणं कृतम् । **अथेति** । मितां ह्रस्वविधानादनेन सर्वत्र णौ ह्रस्वो भविष्यति । प्रयोगदर्शनाच्चेष्टाऽनिष्टव्यवस्थाश्रयितव्येति मत्वा प्रश्नः । इतो वचनमन्तरेणेष्टानिष्टविभागो दुर्ज्ञान इति मत्वाह **णावुपधाया इति । अथोपधाग्रहणमिति** । न्याय्यान्नाग्लोपिशास्वृदितामिति निषेधाच्च लिङ्गादुपधाया एव ह्रस्वो भविष्यतीति प्रश्नः । **चङ्युपधाग्रहणमिति** । असत्युपधाग्रहणेऽच्परिभाषोपस्थानादचाऽङ्गस्य विशेषणादजन्तस्याऽङ्गस्य ह्रस्वो विधीयमानोऽलोन्त्यस्येत्यन्त्यः स्यात् । लू इ अत् इति स्थिते ऊकारस्य ह्रस्वत्वप्रसङ्गः ।

उ.] नाऽशक्यः । एतेनाऽदीदपदित्याद्यपि चिन्त्यम् । भ्रष्टावसरन्यायश्चाऽत्र शास्त्रे नास्तीत्यसकृदावेदितम् । **यदात्विति** । यदर्थं तद्वार्तिकं तस्याऽत्रैव सूत्रे 'णेर्णिच्युपसङ्ख्यान'मित्यनेन साधयिष्यमाणत्वात्तदनावश्यकमिति णिग्रहणम् । एतदुत्तरसूत्रे कैयटे एव स्पष्टम् । ननु चङ्ग्रहणाऽभावे 'कारयती'त्यत्रापि स्यादत आह—**मितामिति । वचनमन्तरेणेति** । मन्दबुद्धीनामित्यर्थः । ननूपधाग्रहणाऽभावेऽचकाङ्क्षदित्यादावतिप्रसङ्गोऽत आह—**न्यायादिति** । 'येन नाव्यवधान'मिति न्यायादित्यर्थः । निषेधज्ञापकेनाऽन्त्याऽचोऽपकर्षः, न्यायाच्च व्यवहितव्यावृत्तिरिति बोध्यम् । **असतीति** । एवञ्चाऽलीलवदित्यत्रैव स्यात् , 'अपीपच'दित्यादौ तु न स्यादिति भावः । **पूर्ववदिति** । अनवकाशत्वाद्वृद्ध्यादेर्बाधकं—ह्रस्वत्वं स्यादिति भावः । एतत्पूर्ववदेवाऽयुक्तमित्यन्ये । नन्वेवं तदनुषङ्गेणैव सिद्धे 'न तदस्ती' त्यादि भाष्यं व्यर्थ-

ह्रस्वत्वं प्रसज्येत ॥ नैतदस्ति प्रयोजनम्—अन्तरङ्गत्वादत्राऽऽवादेशो भविष्यति । न तर्हीदानीं ह्रस्वभाव्यनन्त्योऽस्ति, 'अन्त्यो ह्रस्वभावी नास्ती'ति कृत्वा वचनादनन्त्यस्य भविष्यति ॥ इहापि तर्हि वचनात्प्राप्नोति—अचकाङ्क्षत्, अववाञ्छत् ॥ येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् ॥ केन च नाव्यवधानम् ?॥ वर्णेन । एतेन पुनः सङ्घातेन व्यवधानं भवति (च) न भवति च । [॥*॥ उत्तरार्थन्तु ॥*॥] उत्तरार्थं तर्ह्युपधाग्रहणं कर्तव्यम् । 'लोपः पिबतेरीच्चाऽभ्यासस्य' उपधाया यथा स्यात् ।

प्र.] वृद्धिरत्र बाधिका भविष्यतीति पूर्ववत्सर्वत्रानुषञ्जनीयं। न्यायव्युत्पत्तये चाऽन्यदभिधातुमाह—**नैतदस्तीति**। इतरो ह्रस्वं निरवकाशत्वादन्तरङ्गाणां बाधकं मत्वाह—न **तर्हीदानीमिति** । इतरो विशेषणविशेष्यभावे कामचारादङ्गेनाऽज्विशेष्यते—'अङ्गस्य यत्र तत्र स्थितस्याऽचो ह्रस्वो भवती'त्येवं विध्यन्तराण्यपि न बाधितानि भवन्ति, ह्रस्वश्च सावकाशो भवतीति मत्वाह—**अन्त्यो ह्रस्वभावीति** । अङ्गस्येति चात्रयवषष्ठीविज्ञानादलोन्त्यस्येत्यस्योपस्थानाऽभावः । **येन नाव्यवधानमिति** । 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति परिभाषोपस्थानाद्येन शब्देनाऽवश्यं व्यवधानं तेन व्यवहितेऽपि कार्यं विज्ञायमानमन्यव्यवधाने न प्रवर्तते। ण्यङ्गाभ्यां ह्यज्विशेष्यते 'णौ परतोऽङ्गस्य योऽ'जिति सामर्थ्यादेकवर्णव्यवधानमवश्यंभावित्वादाश्रीयते । एकस्मिंस्तु विषयेऽन्त्यसदेशयोर्ह्रस्वभाविनोरसंभावादनन्त्यविकारेऽन्त्यसदेशस्यैव ग्रहणमिति परिहारो नोक्तः । **अपीप्यदिति** । 'अलोन्त्यस्ये'ति युक्तो लोपप्रसङ्गादुत्तरार्थमुपधाग्रहणम् ।

ननु ह्रस्वाऽपवादो लोपो विज्ञायमान उत्सर्गदेशत्वादपवादानामुपधाया एव भविष्यति । नैतदस्ति । ह्रस्वश्रुत्याऽच्परिभाषोपस्थानादङ्गेन चाऽचो विशेषणाद्युक्तं यदुपधाह्रस्वः स्यात्, लोपविधौ तु 'पिबते'रिति स्थाने षष्ठ्या अन्त्येऽल्युपसंहारादन्त्यस्यैव लोपः स्यात्। भिन्नदेशावप्युत्सर्गापवादौ दृश्येते, यथा शप्श्नमौ, काऽकचौ।

उ.]मत आह—**न्यायेति** । 'येन नाव्यवधान'मित्यादेः न्यायस्य **व्युत्पत्तये**—व्युत्पादनायाऽन्यत्—'इहापि वचना'दित्यादि वक्तुमुक्तमप्याहेत्यर्थः । भाष्ये—**अन्तरङ्गत्वादावादेशो भविष्यतीति** । वृद्धावावादेशो भविष्यतीत्यर्थः । अलोन्त्यपरिभाषायां सत्यां कथमनन्त्यस्य स्यादत आह—**इतर इति। अवयवषष्ठीति** । स्थाने विज्ञातस्य हि सोऽनुसंहार इत्यर्थः । ननु णावित्यनेनाङ्गविशेषणादेष न्यायोऽत्र नावतरतीत्याशयेनाह—**ण्यङ्गाभ्यां हीति** । उपधाग्रहणकरणलाघवाऽनुरोधेन णिपरस्याऽङ्गसंबन्धिनोऽच इत्यर्थः करिष्यत इत्यभिमानः । प्रत्ययस्याऽङ्गांशे उत्थिताकाङ्क्षत्वादियमेकदेश्युक्तिः । **लोपविधौ त्विति** । तत्राऽच्परिभाषोपस्थित्यभावादित्यर्थः । **स्थाने षष्ठ्या इति** । तस्या एव युक्तत्वादिति भावः । **भिन्नदेशाविति** । स्थान-

अपीप्यत्, अपीप्यताम्, अपीप्यन् ॥ अथेह कथं भवितव्यम्—मा भवानटिटदिति, आहो स्विन्माभवानाटिटदिति॥मा भवानाटिटदिति[एवं] भवितव्यम्॥ ह्रस्वत्वं कस्मान्न भवति ? ॥ द्विर्वचने कृते परेण रूपेण व्यवहितमिति कृत्वा ॥ इहमिह संप्रधार्यं,—द्विर्वचनं क्रियतां ह्रस्वत्वमिति, किमत्र कर्तव्यम्?॥ परत्वाद्ध्रस्वत्वम् ॥ नित्यं द्विर्वचनम् । कृतेऽपि ह्रस्वत्वे प्राप्नोत्यकृतेऽपि ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—'द्विर्वचनाद्ध्रस्वत्वं बलीय' इति यदयमोणिमृदितं करोति॥ कथं कृत्वा ज्ञापकम् ?॥ ऋदित्करण एतत्प्रयोजनम्—ऋदितां नेति प्रतिषेधो यथा स्यात् । यदि चाऽत्र पूर्वं द्विर्वचनं स्यादृदित्करणमनर्थकं स्यात्, द्विर्वचने कृते परेण रूपेण व्यवहितत्वाद्ध्रस्वत्वं न भविष्यति । पश्यति त्वाचार्यो—'द्विर्वचनाद्ध्रस्वत्वं बलीय' इति तत ओणिमृदितं करोति । तस्मान्मा भवानटिटदित्येव भवितव्यम् ॥

॥*॥ उपधाह्रस्वत्वे णेर्णिच्युपसङ्ख्यानम् [णिचा व्यवहितत्वात्] ॥*॥ उपधाह्रस्वत्वे णेर्णिच्युपसङ्ख्यानं कर्तव्यम् । वादितवन्तं प्रयोजितवान्अवीवदद्वीणां परिवादकेन॥ किं पुनः कारणं न सिध्यति ?॥ 'णिचा व्यवहितत्वात्'॥ णिलोपे कृते नास्ति व्यवधानम् ॥ स्थानिवद्भावाद्व्यवधानमेव॥ प्रतिषिध्यतेऽत्र स्थानिवद्भावः'चङ्परनिर्ह्रासे न स्थानिव'दिति॥एवमप्यग्लोपिनां नेति प्रतिषेधः प्राप्नोति ॥ वृद्धौ कृतायां लोपस्तन्नाऽग्लोप्यङ्गं भवति ॥ इदमिह संप्रधार्यं—वृद्धिः क्रियतां लोप इति, किमत्र कर्तव्यम् ? ॥ परत्वाद्वृद्धिः ॥ नित्यो लोपः। कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि ॥ अनित्यो लोपः,—अन्यस्य कृतायां वृद्धौ प्राप्नोत्यन्यस्याऽकृतायां । शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति ।

प्र.] 'सत्यपि संभवे बाधनं भवती'ति न्यायाद्भिन्नदेशोऽप्यपवाद उत्सर्गं बाधते। यदि तर्ह्युत्तरार्थमुपधाग्रहणं तत्रैव वक्तव्यम्—'आल्लोपः पिबतेरीच्चाभ्यासस्ये'ति। नैतदस्ति। अन्तरङ्गमपि युकमनवकाशत्वादाल्लोपो बाधेत, उपधाग्रहणे त्वन्तरङ्गत्वाद्युकि कृते आकारस्योपधाया लोप इति न कश्चिद्दोषः। अथेहेति । न्यायप्रयोगविरोधात्प्रश्नः । स एव प्रष्टा न्यायाश्रयेणाह—मा भवानाटिटदित्येवमिति । इतरो वक्ष्यमाणलिङ्गावष्टम्भेन पृच्छति—ह्रस्वत्वं कस्मान्न भवतीति । एवं तर्हीति । ज्ञापकात् पूर्वं ह्रस्वः पश्चाद्द्विर्वचनमिति क्रमः । कृतायामपीति । स्थानिवद्भावात् । एवं तर्हीति ।

उ.]षष्ठ्यलोन्त्यपरिभाषाऽबाधायेति भावः। ननु भिन्नदेशत्वे बाध्यबाधकभावो न स्यादत आह—सत्यपीति । उदाहरणाऽन्तरेभ्यो विशेषमाह—न्यायेति । 'अटिट'-दिति प्रयोगे दृश्यते, न्यायेन त्वाटिटदिति प्राप्नोतीति विरोध इत्यर्थः । ननु कृतायां वृद्धौ णिरूपत्वाऽभावाल्लोपो न स्यादत आह—स्थानिवद्भावादिति । पूर्वविप्रतिषे-

उभयोरनित्ययोः परत्वाद्वृद्धिः, वृद्धौ कृतायां लोपः, तत्राऽग्लोप्यङ्गं भवति ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति–'वृद्धेर्लोपो बलीया'निति,–यदयमग्लोपिनां नेति निषेधं शास्ति ॥ नैतदस्ति ज्ञापकम् । अस्त्यन्यदेतस्य वचने प्रयोजनम् ॥ किम् ? ॥ यत्र वृद्धावपि कृतायामगेव लुप्यते–अत्यरराजत् ॥ यत्तर्हि प्रत्याहारग्रहणं करोति । इतरथा ह्यलोपिनां नेति ब्रूयात् । एवं वा वृद्धेर्लोपो बलीयानिति ॥ अथ वाऽऽरभ्यते पूर्वविप्रतिषेधो 'ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घत्वेभ्य पूर्वविप्रतिषिद्ध'मिति । तस्मादुपसङ्ख्यानं कर्तव्यमिति ॥

नाग्लोपिशास्वृदिताम् ॥ ७।४।२ ॥

॥*॥ अग्लोपिप्रतिषेधानर्थक्यं च स्थानिवद्भावात् ॥*॥ अग्लोपिप्रतिषेधश्चाऽनर्थकः ॥ किं कारणम् ?॥ 'स्थानिवद्भावात्' । स्थानिवद्भावादत्र ह्रस्वत्वं

प्र.]सर्वत्राऽको वृद्धौ कृतायामैकारौकारयोर्लोपो न त्वकः।**अत्यरराजदिति**। राजानमतिक्रान्तवानिति 'प्रातिपदिकाद्धात्वर्थे' इति णिचि कृते'ऽत उपधायाः' इति वृद्धौ कृतायामगेव लुप्यते । **यत्तर्हीति** । प्रत्याहारग्रहणाल्लिङ्गात्पूर्वविप्रतिषेधेन लोपो भवति ।

ननु प्रत्याहारग्रहणं स्वामिनमाख्यत्–असस्वामत्। गोमिनमाख्यत्–अजुगोमदित्यादौ वृद्धिप्रसङ्गाऽभावाल्लोपे ह्रस्वनिषेधार्थं स्यादिति कथं ज्ञापकमिति चिन्त्यमेतत् । अत्राहुः–अनभिधानाण्णिजत्र नास्तीति भाष्यकारस्याऽभिप्रायः । एवं तु ज्ञापकेन लोपस्य बलीयस्त्वे यदुक्तं 'हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थ'मिति तद्विरुध्यते, असत्यपि अत्वनिपातने वृद्धिं बाधित्वेकारस्य लोपे सति सन्वद्भावस्याऽप्रसङ्गादनाश्रित्य ज्ञापकत्वं निपातनमुक्तम् । ज्ञापकाश्रयणं तु ज्यायः, पटुमाख्यत्–अपपटदित्यादावकृतायां वृद्धौ लोपे सति सन्वद्भावस्य प्रसङ्गाऽभावार्थम् । **अथवेति** । हलिकल्योरत्वनिपातनमेव ज्ञापकं 'लोपात्पूर्वं वृद्धिर्भवती'ति । णिलोपस्तु वाचनिकेन पूर्वविप्रतिषेधेन वृद्धेः पूर्वं भवति । एवं पटुमाख्यत्–अपीटदिति सन्वद्भावप्रसङ्गात्प्रत्याहारग्रहणमेव ज्ञापकमाश्रयणीयं, तेन वृद्धेः प्राग्लोपो विधेयः ।

नाऽग्लो। **अग्लोपीति**। मालामाख्यदममालदित्यादौ टिलोपस्य स्थानिवत्त्वाद-

---

उ.]**धेनेति**। लोपसामान्यं वृद्धेः पूर्वप्रतिषेधेनेत्यनेन ज्ञाप्यते। अतएव 'स्त्रीपुंसाभ्यां' 'कस्ये'दित्यादि सूत्रस्थभाष्यं सङ्गच्छते। **णिजत्र नास्तीति** । लुब्ध्वैषामनभिधानमित्यन्ये। विरोधं परिहरति–**अनाश्रित्येति** ।**ज्यायइति**। वस्तुतस्तु सूत्रभाष्यसंमतपक्षभेदेन विकल्पे एव तात्पर्यम् । तत्र लक्ष्यानुरोधाद्व्यवस्थेति तत्त्वम् । **अथवेत्या**दिना न पूर्वोक्तस्य त्यागः, किन्तु प्रकृतविषये समाध्यन्तरमित्येव । पूर्वोक्तार्थस्त्ववश्याश्रयणीय इत्याह–**एवमिति** । भाष्ये–**तस्मादुपसङ्ख्यानमिति** । यत्तु 'ण्याकृतिर्निर्दिष्टव्ये'ति, तन्न, जातेः पौर्वापर्याभावेन 'चङ्पर' इति विशेषणेनात्र व्यक्तिपक्षस्यैवाश्रयणात् । किञ्च तदाश्रयणे विषयसप्तम्या एव आर्द्धधातुके इति सूत्रे आकरे

न भविष्यति । यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः ॥ क्व च स्थानिवद्भावो नास्ति ? ॥ यो हलचोरादेशः–अत्यरराजत् ॥ किं पुनः कारणं हलचोरादेशो न स्थानिवदिति ?॥ उच्यते। अजादेशः स्थानिवदित्युच्यते, न चाऽयमच एवादेशः ॥ किं तर्हि ?॥ अचश्चाऽन्यस्य च ॥ 'अग्लोपिनां ने'–त्यपि तर्हि प्रतिषेधो न प्राप्नोति ॥ किं कारणम् ? ॥ 'अग्लोपिनां ने'त्युच्यते न चाऽत्राऽगेव लुप्यते ॥ किं तर्हि ?॥ अक्चाऽन्यश्च ॥ योऽत्राऽग्लुप्यते, तदाश्रयः प्रतिषेधो भविष्यति ॥ यथैवं तर्हि योऽत्राऽग्लुप्यते तदाश्रयः प्रतिषेधो भवत्येवं योऽत्राऽज्लुप्यते तदाश्रयः स्थानिवद्भावो भविष्यति ॥ एवं तर्हि सिद्धे सति यदग्लोपिनां नेति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः–'इत उत्तरं स्थानिवद्भावो न भवती'ति ॥ किमेतस्य ज्ञापने प्रयोजनम् ?॥ 'पूर्वत्रासिद्धे न स्थानिव'दित्युक्तन्तन्न वक्तव्यं भवति ॥ यद्येतज्ज्ञाप्यते आदी-

---

प्र.]नुपधात्वात्प्राप्तिरेव ह्रस्वस्य नास्तीति प्रतिषेधोऽनर्थकः।ननु प्रतिषिध्यते तत्र स्थानिवत्त्वंकिलुगुपधात्वचङ्परनिर्ह्रासकुत्वेष्विति।नैतदस्ति। यदर्थः स प्रतिषेधः तस्य 'णेर्णिच्युपसङ्ख्यान'मित्यनेन साधितत्वान्न वक्तव्यः। **हलचोरादेश इति** । यथा 'सुधातुरकङ्चे'त्यादेशे समुदाये ऽवयवस्यानादेशत्वादणो रपरत्वं न भवति–सौधातकिरिति, तथा समुदाये स्थानिन्यवयवस्याऽस्थानित्वादजादेशत्वाऽभावान्नास्ति स्थानिवद्भावः। **किं पुनरिति** । अवयवात्मकत्वात्समुदायस्य तस्मिन् स्थानिन्यवयवानामपि स्थानित्वादजादेशत्वान्न्याय्य एव स्थानिवद्भावः। तथा च 'खट्वर्श्य' इति ऋस्थानिकत्वाश्रयमणो रपरत्वं भवतीति भावः। इतरः पूर्वोक्तेनैवाभिप्रायेणाह- **अजादेश इति** । इतरस्त्वनुमीयमानोऽवश्याश्रयितव्यः स्थान्यादेशभाव इति मत्वाह- **अग्लोपिनामिति** । **इत उत्तरमिति** । पञ्चपाद्यामित्यर्थः। **पूर्वत्रासिद्ध इति** । 'तस्य दोषः संयोगादिलोपलत्वणत्वे'ष्विति वक्तव्यमेव । यद्वा 'ज्ञापकज्ञापिता

उ.]उक्ततया वृद्ध्यादीनामन्तरङ्गत्वं प्रागुक्तम्, ओर्णेर्ऋदितकरणस्य ज्ञापकत्वं च भज्येतेत्याहुः । [**णौ चङ्युपधाया ह्रस्वः**]

नाग्लोपि शा । **अनुपधात्वादिति** । ह्रस्वभाविन उपधात्वाऽभावादित्यर्थः। **यदर्थ इति** । ण्यन्तप्रकृतिकण्यन्तार्थः। फलान्तरन्तु नास्त्येव, तस्य तथाप्रयोगाऽनभिधानात्। **अवयवस्यानादेशत्वादिति** । समुदाये गुणभूतत्वादिति भावः। भाष्ये– **किं पुनरित्यादि स्थानिवदितीत्यन्ता** शङ्का, **उच्यत** इत्याद्युत्तरम्। **अवयवानामपि स्थानित्वादिति** । गुणानामपि प्रधानकार्याऽविरोधेन कार्यप्रवृत्त्यङ्गीकारादिति भावः। अत्र दृष्टान्तमाह–**तथाचेति** । **अनुमीयमान इति** । समुदायद्वाराऽवयवानामित्यर्थः। ननु इत उत्तरं स्थानिवत्त्वाऽभावे ज्ञापितेऽपि ह्रस्वे कथं स्थानिवत्त्वाऽभावोऽत आह–**पञ्चपाद्यामित्यर्थ इति** । **अर्थान्तरज्ञापना-**

धयतेः—आदीधकः । आवेवयतेः आवेवकः—'यीवर्णयोर्दीधीवेव्योरि'ति लोपो न प्राप्नोति । इह च यत्प्रलुनीह्यत्रेति 'तिङि चोदात्तवती'त्येष स्वरो न प्राप्नोति ॥ नैष दोषः । यत्तावदुच्यते—''आदीधयतेः आदीधकः । आवेवयतेः—आवेवकः । यीवर्णयोरिति लोपो न प्राप्नोती''ति ॥ यीवर्णयोरित्यत्र-वर्णग्रहणसामर्थ्याद्भविष्यति । यदप्युच्यते—'यत्प्रलुनीह्यत्रे तिङि चोदात्तव-

---

प्र.]विधयोऽनित्या' इति संयोगादिलोपलत्वणत्वेषु स्थानिवद्भावो भवत्येव। 'अचः परस्मि'न्नित्यत्र विचारितं 'हलचोरादेशः स्थानिवदिति चेद्दिंशतेस्तिलोप एकादेश' इत्यादि, तत्र निर्णीतं 'हलचोरादेशो न स्थानिव'दिति, इह तु प्रतिषेधवचनमर्थान्तरज्ञापनयोक्तमिति ग्रन्थविरोधः,तस्मान्न्यायाश्रयेण 'हलचोरादेशो न स्थानिव'दित्ययं पक्षो ग्राह्यः । इह त्वभ्युपेत्य स्थानिवत्त्वं ज्ञापकत्वमाश्रितम् । शिष्यबुद्धिव्युत्पादनायाऽस्थितोऽपि पक्षः क्व चिदुपन्यस्यत इत्येवं विरोधः परिहार्यः । अग्लोपिग्रहणसामर्थ्याच्च समुदायलोपेऽप्यग्लोप आश्रीयते, केवलाऽग्लोपे प्रतिषेधस्यानर्थक्यात्। खट्वर्श्य इत्यत्र त्वेकः पूर्वपरयोरित्यवयवावेव शब्देन चोदिताविति रपरत्वं प्रवर्तते। तदुक्तं—यो ह्युभयोः षष्ठीनिर्दिष्टयोः स्थाने भवति लभतेऽसावन्यतरतो व्यपदेशमिति ।

आदीधक इति। दीधी, णिच्, 'दीधीवेवीटा'मिति (गुणवृद्धि)प्रतिषेधः। ततो ण्वुलि लोपे कृते तस्य स्थानिवद्भावाऽभावाद्यीवर्णयोरिति लोपो न प्राप्नोति । यद्यप्यन्तरङ्गत्वाल्लोपः सिध्यति तथापि वर्णग्रहणस्याऽनन्यार्थस्य प्रयोजनाख्यानायोपक्षेपः। **यत्प्रलुनीह्यत्रेति** । 'तिङ्ङतिङ' इति निघातो 'निपातैर्यद्यदी'ति निषिद्धः । हेरपित्त्वादाद्युदात्तत्वान्न विकरणस्वरो लसार्वधातुकस्वरं बाधत इति श्नास्वराऽभावः। तत्र यणादेशे कृते उदात्तत्वाऽभावात्स्थानिवत्त्वाऽभावाच्च निघातो न प्राप्नोति । **वर्णग्रहणसामर्थ्यादिति** । वर्णग्रहणाद्भूतपूर्वगतिराश्रीयते । अन्तरङ्गत्वात्तु लोपे सिद्धे वर्ण-

---

उ.]**येति** ।तद्विरुद्धर्थान्तरेत्यर्थः। **इह त्वभ्युपेत्येति**। एवञ्चेदं भाष्यं प्रौढ्येति भावः। अस्थितपक्षाश्रयणे फलमाह—**शिष्यबुद्धीति** । 'अग्लोपिनां नेत्यपि तर्हि प्राप्नोती'त्यारभ्य एकदेश्युक्तिरिदं भाष्यमिति तत्त्वम् । प्रकृतेऽनग्लोपेऽप्यग्लोपित्वाश्रयणे बीजमाह—**अग्लोपिग्रहणसामर्थ्यादिति** । **आनर्थक्यादिति** । मालामाख्यदममालदित्यादेरनभिधानमिति भावः । णेर्णिचि लिप्यत एव ह्रस्व इति बोध्यम् । 'खट्वर्श्य' इत्यादौ रपरत्वोपपत्तिमाह—**खट्वर्श्य इत्यत्र त्विति । स्थानिवद्भावाभावादिति** । इत उत्तरत्र स्थानिवत्त्वाऽभावज्ञापनादित्यर्थः । **तथापीति** । एतदतिरिक्तप्रयोजनाऽभावबोधनायेति भावः । ननु हेः पित्त्वादनुदात्तत्वमत आह—**हेरिति** । सति शिष्टत्वात्सार्वधातुकस्वरं बाधित्वा विकरणस्वरः स्यादिति कथं हेरुदात्तत्वमत आह—**न विकरणेति** । 'सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य' इत्युक्तेरिति भावः । भाष्ये—**वर्णग्रहणसामर्थ्यादिति** । अयं भावः—'यीवर्णयो'रि-

तीत्येष स्वरो न प्राप्नोती'ति ॥ बहिरङ्गो यणादेशोऽन्तरङ्गः स्वरः । 'असिद्धं बहिरङ्गमन्तरङ्गे' । [नाग्लोपिशास्वृदिताम् ।]

आजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ॥ ७।४।३ ॥

॥*॥ काण्यादीनां वा ॥*॥ काण्यादीनां वेति वक्तव्यम् ॥ के पुनः काण्यादयः ? ॥ काणिराणिश्राणिभाणिहेठिलोपयः । अचकाणत् अचीकणत् । अरराणत् अरीरणत् । अशश्राणत् । अशिश्रणत् । अबभाणत् अबीभणत् । अजिहेठत् अजीहिठत् । अलुलोपत् अलूलुपत् ॥ [आजभासभाष] ॥

दयतेर्दिगि लिटि ॥ ७।४।९ ॥

इह अवदिग्ये अवदिग्याते अवदिग्यिरे । दिग्यादेशे कृते द्विर्वचनं प्राप्नोति ।

प्र.] ग्रहणं शक्यमकर्तुम् । तत्तु केचिज्ज्ञापकं वर्णयन्ति—उत्तरत्र स्थानिवत्त्वाऽभावस्य, अग्लोपिग्रहणं तु सति प्रयोजने न ज्ञापकमस्याऽर्थस्य । **अन्तरङ्गस्वर इति ।** यद्यप्युभयं पदद्वयाश्रयं तथापि पूर्वमुपसर्गेण सम्बन्धः पश्चादधिकरणवाचिनाऽत्र-शब्देनेति यणादेशो बहिरङ्गः । [**णौ चङ्युपधाया ह्रस्वः**] ॥

आज । काण्यादीनां वेति । आदिःशब्दः प्रकारे । येषां ह्रस्वविकल्पो दृश्यते ते काण्यादयः—काणिराणिश्राणिभाणिहेठिलोपिप्रभृतयः । [**आजभासभाष**] ।

दय । दिग्यादेशे कृत इति । यद्यपि नाऽप्राप्ते द्विर्वचने दिग्यादेश आरभ्यते तथापि बाध्यबाधकभावे द्वैतं,—लक्षणं वा लक्षणेन बाध्यते, लक्ष्यं वा । तत्र यदा द्विर्वचनशास्त्रं दिग्यादेशशास्त्रेण बाध्यते तदा दिग्यादेशे कृते नास्ति द्विर्वचनप्रसङ्गः ।

उ.] त्यत्र परसमाहारद्वन्द्वगर्भेतरेतरयोगः। यकारे इकारे वर्णे च परत इत्यर्थः। तत्र सन्निहितत्वाद्वर्णशब्देनेवर्ण एव । एतत्सामर्थ्याल्लुप्तेऽपि तस्मिन् भूतपूर्वगत्या लोपः । अतएवाऽचः परस्मिन्नित्यत्रादीध्ये इति भाष्यप्रयोगः सङ्गच्छते । वस्तुतस्त्वन्तरङ्गत्वेन णिलोपात्पूर्वं 'यीवर्णयो'रिति लोपे नेदमस्य फलं, तदाह—**अन्तरङ्गत्वात्वित्यादिना ।** इत उत्तरं स्थानिवत्त्वाभावज्ञापनपरं पूर्वभाष्यं तु एकदेश्युक्तिरित्युक्तमेव, कैयटेन ध्वनितञ्च। एतेन वर्णग्रहणसामर्थ्याच्छ्रूयमाणेवर्ण एव लोपः । तेन 'आदीध्यक' इत्येवेति हरदत्तोक्तमपास्तं, भाष्यविरोधात् । तस्मात्सिद्धान्ते न्यायप्राप्तार्थानुवादकमेव वर्णग्रहणमिति तत्त्वम् । **पूर्वमुपसर्गेणेति ।** तदर्थेनेत्यर्थः । विशिष्टक्रियावचनस्य पदस्य पदान्तरेण संबन्धादिति भावः। एवञ्चान्तरङ्गसंबन्धार्थकोपसर्गनिमित्तकं कार्यमन्तरङ्गमिति तात्पर्यम् । [**नाग्लोपिशास्वृदिताम्**] ॥

आजभासभाष । काण्यादीनां सन्निवेशेन क्वाऽप्यपाठादाह—**प्रकारे इति ।** प्रकारः सादृश्यं । केन रूपेणेत्यत आह—**येषामिति ।** 'प्रभृतय' इत्यनेन भाष्योक्तानामुपलक्षणत्वं ध्वनयति । अत्र मानं चिन्त्यम् ।

[॥*॥ तत्र[1] साभ्यासस्य] ॥*॥ **तत्र साभ्यासस्येति वक्तव्यम् । ननु च द्विर्वचने कृते साभ्यासस्य दिग्यादेशो भविष्यति ॥ न सिध्यति ॥ किं कारणम् ?** ॥*॥ दिग्यादेशस्य परत्वात्साभ्यासस्यादेशवचनम् ॥*॥ **दिग्यादेशः क्रियतां द्विर्वचनमिति । परत्वाद्दिग्यादेशेन भवितव्यं, तत्र 'साभ्यासस्ये'ति वक्तव्यम् ॥ एवं तर्हि दिग्यादेशो द्विर्वचनं बाधिष्यते ॥ पुनः प्रसङ्गविज्ञाना-द्द्विर्वचनं प्राप्नोति** ॥*॥ पुनः प्रसङ्गविज्ञानादिति[2] चेदमादिभिस्तुल्यम् ॥*॥ **पुनः-प्रसङ्गविज्ञानादिति चेदमादिभिस्तुल्यमेतद्भवति । तद्यथा अमादिषु कृतेषु पुनःप्रसङ्गाच्छिशीलुङ्नुमो न भवन्त्येवं दिग्यादेशे कृते पुनःप्रसङ्गा-द्द्विर्वचनं न भविष्यति ॥ अथ वा विप्रतिषेधे[3] पुनःप्रसङ्ग इत्युच्यते ।**

प्र.] यदा तु लक्ष्यं बाध्यते तदा तस्य द्विर्वचनं दिगिना बाध्यते, दिगेस्तु तत्प्राप्नोति, शास्त्रस्याऽबाधितत्वात् । ततश्च यथा 'चख्या'वित्यादौ ख्याञादेशे कृते द्विर्वचनं भव-त्येवं दिग्यादेशे कृते प्राप्नोति । **साभ्यासस्येति**। तेन कृते द्विर्वचने दिग्यादेशो न च पुनर्द्विवचनं भवति, सकृत्प्रवृत्त्या लक्षणस्य चरितार्थत्वात्साभ्यासग्रहणसामर्थ्याच्च । **ननु चेति** । पूर्वविप्रतिषेधाल्लक्ष्यसिद्धये इष्टक्रमाश्रयणाद्वेति भावः । **न सिध्यती-ति** । 'विप्रतिषेधे परं कार्य'मित्यस्मिन् व्यवस्थाहेतौ सत्येव क्रमो दुर्लभः । तत्र द्विर्वचनस्याऽवकाशः–पपाचेति । कृते द्विर्वचने दयतिसद्भावाद्दिग्यादेशस्य । अ-कृते तु द्विर्वचने उभयप्रसङ्गे परत्वाद्दिग्यादेशः । **एवं तर्हीति । नाऽप्राप्ते** द्विर्वचने दिग्यादेशस्यारम्भात् । इतरस्तद्बुद्धिपरीक्षार्थं विप्रतिषेधाश्रयेण सकृद्गताविर्त्येवं दि-ग्यादेशो द्विर्वचनस्य त्वया बाधक उक्त इत्यारोप्य कथयति–**पुनः प्रसङ्गविज्ञाना-दिति** । इतरोऽप्यभ्युपगम्य तावद्विप्रतिषेधं सकृद्गतावित्याश्रित्याह–**पुनः प्रसङ्गा-दिति चेदिति** । यथा यूयं ब्राह्मणकुलानि युवां त्वमित्यमादेशे कृते शिशीलुको न भवन्ति एवं दिग्यादेशे कृते द्विर्वचनाऽभावः। इदानीं न्याय्यं परिहारमाह–**अथवेति** । क्वचित्पाठो "**नैष युक्तः परिहारो विप्रतिषेधे पुनःप्रसङ्ग इति**" । योऽयं मदु-

---

उ.] **दयतेर्दिगि । लक्ष्यमिति ।** विधेयं कार्यमित्यर्थः । **नास्ति द्विर्वचनेति ।** शास्त्रस्य बाधितत्वेन पुनः प्रवृत्त्ययोगादिति भावः । **तस्य द्विर्वचनमिति**। दयेरि-त्यर्थः । लक्ष्यभेदाल्लक्षणभेद इति भावः । तत्र दृष्टान्तमाह–**ततश्च यथेति । सकृ-त्प्रवृत्त्येति** । आदेशकृतलक्ष्यभेदानाश्रयणादिति भावः । तत्र मानमाह–**साभ्यास-ग्रहणेति । चो** हेतौ । ननु परत्वाद्दिग्यादेशे कथिते पुनरेवं तर्हीत्यादीना तत्कथनं पुनरुक्तमत आह—**नाप्राप्ते इति** । कृते द्विर्वचने आदेशस्यावकाश इति त्वयुक्तं, यस्मिन्नवश्यं प्राप्ते यदारभ्यते तत्तस्य बाधकमित्येव सिद्धान्तात् । तदप्राप्तिविषये चारितार्थ्याऽभाव एव चाऽवनवकाशत्वमिति बोध्यम् । **'तर्हि पुनः प्रसङ्गे'** त्याद्य-

विप्रतिषेधश्च द्वयोः सावकाशयोः । इह पुनरनवकाशो दिग्यादेशो द्विर्वचनं बाधिष्यते ॥ यदि तर्ह्यनवकाशा विधयो बाधका भवन्ति–बभूव,–भूभावो द्विर्वचनं बाधेत॥ सावकाशो भूभावः॥ कोऽवकाशः ?॥ भविता भवितुम् ॥ इह तर्हि 'चक्षिङः ख्याञ्' 'वा लिटी'ति ख्याञ्द्विर्वचनं बाधेत ॥ इह चापि बभूवेति, यदि तावत्स्थाने द्विर्वचनं, भूभावः सर्वादेशः प्राप्नोति, अथ द्विःप्रयोगो द्विर्वचनं, परस्य भूभावे कृते पूर्वस्य श्रवणं प्राप्नोति ॥ नैष दोषः, आर्धधातुकीयाः सामान्येन भवन्त्यनवस्थितेषु प्रत्ययेषु । तत्रार्धधातुकसामान्ये भूभावे कृते यो यतः प्रत्ययः प्राप्नोति स ततो भविष्यति ॥

प्र.]क्तार्थस्य 'दिग्यादेशो द्विर्वचनं बाधिष्यत' इत्यस्य त्वया परिहारोऽभिहितः।'पुनः प्रसङ्गविज्ञानाद्द्विर्वचनं प्राप्नोती'ति स न युक्तः इत्यर्थः । **अनवकाशो दिग्यादेश इति** । पूर्वं सामान्यविशेषभावमनाश्रित्योभयोः सावकाशत्वमुक्तम् । इदानीं तु सामान्यविशेषाश्रयेण नाप्राप्ते द्विर्वचने आरभ्यमाणस्य दिग्यादेशस्यापवादत्वमुच्यते । **यदि तर्हीति** । नन्ववश्यमनवकाशेन बाधकेन भाव्यम्, अन्यथा न कश्चिद्बाधकः स्यात् । एवं तर्ह्यनवकाशाऽभिमता अनवकाशा इत्यर्थो विवक्षितः । नैवाऽयमनवकाशः, कृतेऽपि द्विर्वचने प्रवृत्त्यविघातात् । अथ पुनरेवमप्यनवकाशत्वं मन्यसे तदा लक्ष्यदोषप्रसङ्गः । **बभूवेति** । 'अस्तेर्भू'रिति भूभावः । **सावकाश इति** । यत्र द्विर्वचनाऽभावः । **इहापि तर्हीति** । आचख्यावित्यत्र कृतेऽपि द्विर्वचने ख्याञः प्रवर्तनादनवकाशत्वाऽभावः । यदा तु येन नाप्राप्तिन्यायेनानवकाशत्वमभ्युपगम्यते तदा ख्याञि कृते द्विर्वचनाऽप्रसङ्गः । **सर्वादेश इति** । स्थानिवद्भावादस्तिग्रहणेन ग्रहणात्कार्यकृतत्वाच्च नर्द्विर्वचनाऽभावादिष्टरूपासिद्धिः । **पूर्वस्य श्रवणमिति** । अयं दोषो नोत्सर्गापवाबादपक्षे उपात्तो भूभावस्याऽवकाशदर्शनेनोत्सर्गापवादभावनिराकरणात् । द्वयोस्तु सावकाशयोः परत्वाद्द्विर्वचने कृते बभूवेति **न** सिध्यतीति प्रतिपाद्यते ।

उ.]ग्रिमग्रन्थाऽसङ्गतिमाशङ्क्याह–**इतर इति**।**पूर्वं सामान्येति**। 'असंभवे एव स बाधप्रयोजक' इति वार्तिकमते बाधकत्वप्रयोजकतया तमनाश्रित्येत्यर्थः। **इदानीं त्विति** । 'सत्यपि संभवे बाधनं भवती'ति भाष्यमते इत्यर्थः । **कृतेऽपि द्विर्वचने इति** । इदं चिन्त्यमुक्तरीत्या । तद्ध्वनयन्नाह—**अथ पुनरेवमिति** । ख्याञादेशोऽपि सावकाशत्वाऽऽभासं दर्शयति–**आचख्यावित्यत्रेति** । वास्तवमर्थमाह–**यदात्विति** । अयमेव सिद्धान्त इति बोध्यम् । भूभावस्य सावकाशत्वायदि परत्वाद्द्विर्वचनं तदाप्यनिष्टमिति । भाष्ये–**यदीति** । तदाशयमाह—**स्थानिवद्भावादिति** । तदेव दर्शयति–**अयं दोष इति** । भाष्ये–**परस्य भूभावे कृते इति** । 'नानर्थके' इति परिभाषायामनभ्यासविकारे इत्युक्त्याऽभ्यासस्यानर्थकत्वेऽपि उत्तरखण्डस्याऽनर्थकत्वे मानाऽभाव इति भावः । प्रत्ययाऽव्यवहितप्राग्वर्तिनः सर्वत्राऽर्थवत्त्वदर्शनेन तत्त्यागे

ऋतश्च संयोगादेर्गुणः ॥ ७।४।१० ॥

॥*॥ संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थम् ॥*॥ **संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्तव्यम् ॥ किमर्थम् ? ॥ 'कृञर्थम्' । इहापि यथा स्यात्–संचस्करतुः संचस्करुः ॥ यदि संयोगोपधग्रहणं क्रियते नाऽर्थः संयोगादिग्रहणेन, इहापि सस्वरतुः सस्वरुः–संयोगोपधरयेत्येव सिद्धम् ॥ भवेत्सिद्धं सस्वरतुः सस्वरुरिति, इदं तु न सिध्यति–संचस्करतुः संचस्करुरिति ॥ किं कारणम् ? ॥ 'सुटो बहिरङ्गलक्षणत्वात्' । बहिरङ्गः सुडन्तरङ्गो गुणः । 'असिद्धं बहिरङ्गमन्तरङ्गे' । संयोगादिग्रहणे तु क्रियमाणे संयोगोपध-**

प्र.]**तत्रार्धधातुकसामान्य इति।** द्विर्वचननिमित्तस्य लिटोऽनुपजातत्वादसति विप्रतिषेधे पूर्वं भूभावः, पश्चाल्लिटि परतो द्विर्वचनमित्यदोषः। **यो यतः प्राप्नोतीति।** विषयसप्तमीफलं ज्ञापितं ख्याञ्विधावपि विषयसप्तम्याश्रीयते इति 'येन नाप्राप्त' इत्यस्य न्यायस्यानवतारात् कृते ख्याञि द्विर्वचनं भवत्येव। दिग्यादेशे तु लिटीति परसप्तम्याश्रयणान्नाऽप्राप्ते द्विर्वचने दिगिरारभ्यमाणस्तद्बाधते। **[दयतेर्दिगि लिटि]** ॥

ऋतश्च । संयोगादेरिति । इहाऽङ्गाधिकारादङ्गं संयोगाद्याश्रीयते न च 'स्कृ'-इत्येतदङ्गं संयोगादि भवतीति भावः । उपधाग्रहणं संयोगस्य देशविशेषोपलक्षणम्,-अल्मात्रस्योपधासंज्ञाविधानात्, संयोगस्योपधात्वाऽसंभवात् । अथ वा संयोगाऽवयवे संयोगशब्दो वर्तते, तस्योपधात्वमस्त्येव । **बहिरङ्गः सुडिति ।** 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण । साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि, न चाऽसिद्धस्य विशेषणेन सम्बन्धो भवति' । 'सुट्कात्पूर्व' इत्यत्र तूक्तं—'पूर्वं धातुरुपसर्गेण युज्यते' इति । एवं च सुटोऽन्तरङ्गत्वात्सिद्धो गुण इति नार्थ उपसङ्ख्या-

---

उ.]मानाऽभाव इति तात्पर्यम् । **फलमिति** । तेन 'भव्य'मित्यादौ ण्यन्न भवति । **परसप्तम्याश्रयणादिति** । लक्ष्यानुरोधेन क्वचित्परसप्तमी क्वचिद्विषयसप्तमीत्यर्थः । द्विर्वचने तु परसप्तम्येवेति भावः । **[दयतेर्दिगि लिटि]** ।

ऋतश्च सं । ननु 'चस्कृ' इत्यत्र 'स्कृ' इत्यस्य संयोगादित्वाल्लिड्ढरत्वात्किं संयोगोपधग्रहणेनेत्यत आह—**इहेति** । नन्वन्मात्रस्योपधात्वेन संयोग उपधा यस्येति सामानाधिकरण्यमनुपपन्नमत आह–**उपधाग्रहणमिति** । अत्र पक्षे उपधाशब्दो गौणः, उत्तरत्र संयोगशब्द इति विशेषः । **साधनेन**—तत्प्रयुक्तकार्येण लिडादिना । एवञ्च तावत्येव निमित्तसद्भावाद्गुणप्राप्तिरन्तरङ्गा । पश्चादुपनतोपसर्गसापेक्षः सुड्बहिरङ्ग इत्यर्थः । **साधनं**–तत्प्रयुक्तकार्यं,**क्रियां निर्वर्तयति**–बोधयति। पदस्यैवार्थबोधकत्वादित्यर्थः।**नचाऽसिद्धस्य**–शब्दादनुपस्थितस्य। **उपसर्गेणेति**।तद्द्योत्यार्थेनेत्यर्थः। एवं हि तत्र भाष्यं–पूर्वंधातुरुपसर्गेणेति न सारं । पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण । सत्यमेवमेतत् । यस्त्वसौ धातूपसर्गयोरभिसंबन्धस्त-

ग्रहणमनन्यार्थं विज्ञायते ॥*॥ ऋतो लिटि गुणाञ्ञ्णिति[1]वृद्धिर्विप्रतिषेधेन ॥*॥ **ऋतो लिटि गुणाञ्ञ्णि[ती[2]]ति वृद्धिर्भवति पूर्वविप्रतिषेधेन। ऋतो लिटि गुणस्याऽवकाशः—सस्वरतुः सस्वरुः। ञ्णिति वृद्धरवकाशः—स्वारकः ध्वारकः[3]। इहोभयं प्राप्नोति—सस्वार दध्वार। ञ्णिति वृद्धिर्भवति पूर्वविप्रतिषेधेन॥** ॥*॥पुनः प्रसङ्गविज्ञानाद्वा सिद्धम् ॥*॥ **अथ वा पुनः प्रसङ्गाद्गुणे कृते रपरत्वे चाऽत उपधाया इति वृद्धिर्भविष्यति॥ नैष युक्तः परिहारः। पुनः प्रसङ्गो नाम स[4] भवति यत्र तेनैव कृते प्राप्नोति तेनैव चाऽकृते। अत्र खलु गुणे कृते रपरत्वे चाऽत उपधाया इति वृद्धिः प्राप्नोति, अकृते चाऽचोञ्णितीति। तस्मात्सुष्ठूच्यते 'ऋतो लिटि गुणाञ्ञ्णिति वृद्धिः[5] पूर्वविप्रतिषेधेनेति॥**

शॄदॄप्रां ह्रस्वो वा॥ ७।४।१२॥

किमर्थं 'ह्रस्वो वे'त्युच्यते, न 'गुणो वे'त्युच्येत, तत्रायमप्यर्थो गुण-

---

प्र.]नेन। संस्कृषीष्ट संस्क्रियत इत्यत्र लिङ्गुणयोः प्रतिविधेयम्। **अनन्यार्थमिति**। कृञर्थमेवेत्यर्थः। तत्र वचनादसिद्धत्वं बाध्यते। यथाऽन्यत्रोक्तम्—'आश्रयात्सिद्धत्वं यथा रोरुत्व 'इति। **पुनः प्रसङ्गविज्ञानाद्वेति**। अस्तु परविप्रतिषेधेन गुणस्तस्मिन्कृते वृद्धिर्भविष्यति। अनाश्रितलक्षणभेदं च वृद्धिमात्रमेकत्वेनाश्रित्यैतदुक्तम्। **पुनःप्रसङ्गो नामेति**। वाचोयुक्तिरेवेयं न सङ्गच्छते लक्षणद्वयस्य परस्परप्रतिषेधादप्रतिप्रत्तौ प्राप्तायां 'विप्रतिषेधे परं कार्य'मित्यनेन परस्मिन् कार्ये विहिते निमित्तसंभवात् पूर्वस्य लक्षणस्य पुनः प्राप्तिः 'पुनःप्रसङ्ग' उच्यते न त्वपूर्वलक्षणप्राप्तिः पुनःप्रसङ्गः। **तस्मादिति**। ननु यदि नाम पुनःप्रसङ्गवाचोयुक्तिर्न घटते किमेतावता-गुणरपरत्वयोः कृतयोरुपधावृद्धिर्न प्राप्नोति ?, सत्यां च प्राप्तौ किं पूर्वविप्रतिषेधाश्रयेणेत्यत्र चिन्त्यमेतत्। [**ऋतश्च संयोगादेर्गुणः**]।

शॄदॄ। न गुणो वेत्युच्येतेति। गुण एव पूर्वसूत्रेण नित्यं प्राप्तो विकल्पनीयः,तत्र गुणपक्षे विशशरतुरित्यादि भविष्यति। तदभावपक्षे तु यणादेशेन विशश्रतुरित्यादीति भावः। **तत्रायमपीति**। न केवलं गुणविधानप्रकरणमनुसृतं भवति

उ.]मभ्यन्तरं कृत्वा धातुः साधनेन युज्यते'। एवञ्च सुड्वतोऽन्तरङ्गतरक इति संयोगादित्वादेव गुणसिद्धेरिति भावः। **प्रतिविधेयमिति**। तच्च 'सुड्का'दिति सूत्रे उक्तम्। **चिन्त्यमेतदिति।** न च 'जाग्र' इति सूत्रे गुणे कृते उपधावृद्धिर्नेति णल्ग्रहणेन ज्ञापनाददोषः, तस्य जागृमात्रविषयत्वात्। अतएव कृधात्वादौ भावकर्मणोः परत्वाद्गुणे उपदेशग्रहणाच्चिण्वद्भावे कारिष्यत इत्यादौ वृद्धिरुदाहृता भाष्यकारेण। अचोञ्णितीति सूत्रेऽपि स्पष्टमेवोक्तं भाष्ये। तस्मान्नैष युक्तः परिहार इत्यादि भाष्यमेकदेश्युक्तिरिति तात्पर्यम्। पुनःप्रसङ्गविज्ञानादित्यस्यायमर्थः—पुनर्गुणप्रवृत्त्युत्तरं वृद्धेः

ग्रहणं न कर्तव्यं भवति प्रकृतमनुवर्तते ॥ क्व प्रकृतम् ? ॥ 'ऋतश्च संयोगादेर्गुण' इति ॥*॥ ऋतां ह्रस्वत्वमित्त्वप्रतिषेधार्थम् ॥*॥ **ऋतो ह्रस्वत्वमुच्यते । [किं प्रयोजनम् ?] ॥ 'इत्त्वप्रतिषेधार्थम्' । इत्त्वं मा भूदिति । 'गुणो वे'तीयत्युच्यमाने गुणेन मुक्ते इत्त्वं प्रसज्येत । 'ह्रस्वो वे'ति पुनरुच्यमाने ह्रस्वेन मुक्ते यथाप्राप्तो गुणो भविष्यति ॥ [** शृदृप्रां ह्रस्वो वा **] ॥**

केऽणः ॥ ७।४।१३ ॥

॥*॥ केऽणो ह्रस्वत्वे तद्धितग्रहणं कृन्निवृत्त्यर्थम् ॥*॥ **केऽणो ह्रस्वत्वे तद्धितग्रहणं कर्तव्यम् ॥ किं प्रयोजनम् ? ॥ 'कृन्निवृत्त्यर्थम्' । कृति मा भूत् राका धाकेति ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम्** ॥*॥ उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥*॥ **[केऽणः] ॥**

उपसर्गाद्ध्रस्व ऊहतेः ॥ ७।४।२३ ॥

इह कस्मान्न भवति उपोह्यते प्रोह्यते? ॥ एकादेशे कृते व्यपवर्गाऽभावात् ॥

प्र.]यावल्लाघवमपीत्यर्थः। **इत्त्वं प्रसज्येतेति**। 'वार्णादाङ्गं बलीय' इति वर्णाश्रयमन्तरङ्गमपि यणं बाधित्वेत्त्वं स्यात् ह्रस्वविधाने तु यणादेशः सिध्यति। विशश्रवान् विदद्वान् विपप्रवानिति क्वसौ च सिध्यति । गुणविकल्पे त्वेतद्रूपाऽसिद्धिः । क्वसोः कित्त्वेन च प्रतिषेधविषयस्यापि गुणस्य प्रतिषेधः प्रदेशान्तरे भाष्यकृता प्रदर्शितः । उत्तरार्थं च ह्रस्वग्रहणं कर्तव्यमिति लाघवमपि, नास्ति ह्रस्वविधावपि उत्तरत्र ह्रस्वविधानादेकप्रकरणता भवतीति नास्ति पूर्वोक्तो विशेषः । [**शृदृप्रां**] ॥

उपसर्गा । प्रोह्यत इति । अकृते एकादेशे ह्रस्वभावाऽभावयोर्विशेषाऽभावादन्तरङ्गत्वाच्च प्रागेकादेशेन भाव्यम् । 'वार्णादाङ्ग'मित्येतत्तु समानाश्रयाङ्ग(वार्ण)-विषयं, तस्मादेकादेशे कृतेऽन्तादिवद्भावेन ह्रस्वप्रसङ्गश्चोद्यते। **एकादेशे कृत इति**। उपसर्गात्परस्योहतेर्ह्रस्वो विधीयमान एकादेशे कृते भेदाऽभावाद्भेदनिबन्धनपौर्वापर्यानुपपत्त्योभयत आश्रयेऽन्तादिवद्भावाऽभावाच्च ह्रस्वत्वाऽभावः । **आ ऊह्यत इति** । धातूपसर्गयोरसंहिता नास्ति। तदुक्तम्–"**संहितैकपदे नित्या नित्या धातूपसर्गयो**"रित्यादि। एवं च लौकिके प्रयोगे विग्रहाऽभावान्नित्येनैकादेशेन भाव्यम् ।

उ.]शास्त्रान्तरेण प्रसङ्गस्य विज्ञानादिति।एतदजानत एकदेशिनोऽग्रिमग्रन्थइतिबोध्यम्

शृदृप्राम् । अपिशब्दार्थमाह—**न केवलमिति** । **ह्रस्वविधाने त्विति** । इत्त्वस्य निमित्ताऽभावादित्यर्थः । **क्वसोः कित्त्वेनेति** । यद्यपि गुणे सत्यपीष्टं न सिध्यति तथापि तदप्राप्तावपि इष्टाऽसिद्धिरित्यर्थः । [**शृदृप्रां ह्रस्वो वा**] ॥

उपसर्गाद्ध्रस्व । समानाश्रयेति । अनित्यत्वात्तदनाश्रित्यैकदेश्युक्तिरियमिति तत्त्वम् । यद्यपि वास्तवपौर्वापर्यं नास्ति तथापि अन्तादिवच्चेति शास्त्रबोधितमार्थसमाजग्रस्तमस्त्येवेत्यत आह—**उभयत इति**।आ उह्यत इति ह्रस्वपाठनिराकरणा-

एवमपि आ ऊह्यते ओह्यते समोह्यते इत्यत्र प्राप्नोति ॥*॥अणं इति वर्तते ॥*॥

एतेर्लिङि ॥ ७।४।२४ ॥

॥ * ॥ एतेर्लिङ्युपसर्गात् ॥ * ॥ **एतेर्लिङ्युपसर्गादिति वक्तव्यम् । इह मा भूत् ईयात् ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । 'उपसर्गा'दिति वर्तते ॥ एवं तर्ह्याचार्योऽन्वाचष्टे 'उपसर्गादित्यनुवर्तत' इति । नैतदन्वाख्येयमधिकारा अनुवर्तन्त इति । एष एव न्यायो यदुताऽधिकारा अनुवर्तेरन् ॥**

रीङृतः ॥ ७।३।३७ ॥

दीर्घोच्चारणं किमर्थं न 'रिङृत' इत्येवोच्येत ? ॥ का रूपसिद्धिः—मात्रीयति पित्रीयति ? ॥ 'अकृत्सार्वधातुकयो'रिति दीर्घत्वं भविष्यति ॥ एवं तर्हि सिद्धे

प्र.]एवं च आ उह्यत इति ये ह्रस्वं पठन्ति ते न सम्यङ् न्यायविदः। लौकिकप्रयोगसंपादनाय हि ह्रस्वो विधीयते । तस्मादलौकिकेन प्रक्रियावाक्येनाऽकृतह्रस्वेनाऽऽङः प्रश्लेषप्रदर्शनमात्रं क्रियते, अथ त्वलौकिके प्रक्रियावाक्ये ह्रस्वत्वप्रतिपत्तिरुच्यते तथापि न काचित्क्षतिस्तत्रैकादेशस्यादिवद्भावादूहिग्रहणेन ग्रहणात्समः परस्य ह्रस्व(त्व)प्रसङ्गः । **अण इति वर्तत इति** ।एवं च रूपाश्रयोऽयं विधिरिति ताद्रूप्यानतिदेशादण्त्वाऽभावाद्ध्रस्वाऽभावः [**उपसर्गाद्ध्रस्व ऊहतेः**] ॥

एतेः । ईयादिति । आशिषि लिङ् । अकृत्सार्वधातुकयोर्दीर्घः । **नैतदन्वाख्येयमिति** । वार्तिककारेणैतदन्वाख्येयं,सर्वाधिकाराणामन्वाख्यानप्रसङ्गात् । वृत्तिकारास्त्वधिकाराणां प्रवृत्तिनिवृत्ती व्याचक्षते । [**एतेर्लिङि**] ।

रीङृतः । दीघत्वं भविष्यतीति । ननु नाऽप्राप्ते दीर्घे रीङारभ्यमाणस्तस्य बाधकः स्यात् । नैतदस्ति । ऋवर्णस्य बाध्यतां, रीङस्तु कथं बाध्यते ? । न हि तस्य दीर्घे प्राप्ते स आरभ्यते ततश्च द्रव्ये पदार्थे रिङि कृते दीर्घः प्रवर्तत एव । [**रीङृतः**] ।

उ.]याह -**धातूपसर्गयोरिति। लौकिकप्रयोगसंपादनायेति** । न हि ह्रस्वप्रवृत्तिमात्रेण लौकिकप्रयोगसंपत्तिरिति भावः । **तस्मादलौकिकेनेति** । अन्तरङ्गत्वेनैकादेशस्यैव युक्तत्वेन तत्र ह्रस्वो न युक्त इतिभावः। न्यायत एव ह्रस्वस्याऽयुक्तत्वमुच्यते, दोषस्तु नास्त्येवेत्याह—**अथत्विति**।चिन्त्यमिदम् । लक्ष्ये लक्षणस्येतिन्यायेन पुनर्ह्रस्वाऽप्राप्तेः । उक्तयुक्त्या ह्रस्वस्याऽप्रवृत्तेश्च । एवञ्चाऽण्ग्रहणानुवृत्तिरप्येकदेशिन एव । **अण्त्वाभावादिति** । अण् च सर्वत्र पूर्वेणैव अणुदित्सूत्रं वर्जयित्वेति सिद्धान्तः ॥

एतेर्लिङि । आशिषि लिङिति । विधिलिङि दीर्घाऽभावादाशीर्लिङ्येव ह्रस्वविषय इति भावः । तदाह—**अकृदिति । वार्तिककारेणेति** । उक्ताऽनुक्तदुरुक्तचिन्तैव हि तत्कार्यम् । [**एतेर्लिङि**] ॥

रीङृतः । द्रव्ये पदार्थ इति । तत्पक्षे रिविषयदीर्घशास्त्रस्याऽचरितार्थत्वादिति भावः । वस्तुतो जातिपक्षेऽपि तज्जात्याश्रयसकलव्यक्तिविषयत्वाज्जात्याश्रयण-

सति यद्दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्ये'ति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ पिबेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति ॥ [रीङृतः]

यङि च ॥ ७।४।३० ॥

॥*॥ यङ्प्रकरणे हन्तेर्हिंसायामीट् ॥*॥ **यङ्प्रकरणे हन्तेर्हिंसायामीड्वक्तव्यः । जेघ्नीयते । यदीट, अभ्यासरूपं न सिध्यति ॥ एवं तर्हि** ॥*॥ यङ्प्रकरणे हन्तेर्हिंसायामीक् ॥ * ॥ **एवमप्युपधालोपो न प्राप्नोति ॥ एवं तर्हि** ॥*॥ यङ्प्रकरणे हन्तेर्हिंसायां घ्नी ॥*॥ [**यङि च**] ॥

न च्छन्दस्यपुत्रस्य ॥ ७।४।३५ ॥

अत्यल्पमिदमुच्यते–'अपुत्रस्ये'ति ॥*॥ अपुत्रादीनामिति वक्तव्यम् ॥*॥ **इहापि यथा स्यात् जनीयन्तो न्वग्रवः । पुत्रीयन्तः सुदानवः** ॥*॥ छन्दसि

प्र.] **यङिच । यङ्प्रकरण इति ।** हिंसायास्त्वन्यत्र जङ्घन्यत इत्येव भवति । **अभ्यासरूपं न सिध्यतीति ।** उपधाया लोपस्य स्थानिवत्त्वाद्धनिति द्विर्वचनं प्राप्नोति । **एवं तर्हीति ।** ईको धातुभक्तत्वाद्द्विर्वचननिमित्तत्वाऽभावात् स्थानिवत्त्वाऽभावात् । **एवमपीति ।** अजादौ प्रत्यये विधानात् । **एवं तर्हीति ।** प्रक्रियालाघवाय घकाराद्यादेशविधानात्, ह्नीभावविधावभ्यासाच्चेति कुत्वे गौरवप्रसङ्गात् । व्यक्तिपदार्थाश्रयणे च घ्नीभावे कृते द्विर्वचनं प्रवर्तते । आकृतिपक्षे तु दिग्यादेशेनेव घ्नीभावेन द्विर्वचनबाधाऽप्रसङ्गात् ॥ [**यङि च**]

न च्छन्द । जनीयन्त इति । जनमिच्छन्तीति क्यच् । लटः शत्रादेशः । जस् ।

उ.]सामर्थ्यादेव प्रवृत्तिः सुलभेति 'द्रव्यपक्षे' इति चिन्त्यमेव । किं चाऽनवकाशत्वादत्र बाधकत्वं स्वस्य पूर्वं प्रवृत्तिरूपम् । तत्र कृते चोत्सर्गो भवत्येव, सति संभवे उत्सर्गे कृतेऽपवादप्रवृत्तियोग्यतायामेवाऽपवादत्वमिति 'गुणो यङ्लुको'रित्यत्र निरूपयिष्यते । वस्तुतः पिबेरदन्तत्वाद्गुणप्रतिषेधप्रत्याख्यानसंभवेन परिभाषायाः प्रयोजनान्तराऽभावाच्च दीर्घोच्चारणं स्पष्टार्थमेवेति बोध्यम् । [**रीङृतः**] ॥

यङि च । जङ्घन्यत इति । कुटिलं गच्छतीत्यर्थः । ननूपधालोपेऽनच्कत्वादभ्यास एव दुर्लभोऽत आह—**उपधालोपस्येति ।** ईटः प्रत्ययभक्तत्वेन द्वित्वनिमित्ताऽन्निमित्तत्वादुपधालोपस्येत्यर्थः । नन्वीक्यपि स्थानिवत्त्वेन हन एव द्वित्वेऽभ्यासरूपाऽसिद्धिस्तदवस्थैवेत्यत आह—**ईक इति । अभ्यासाच्चेति ।** उपलक्षणमेतत्, अन्तरङ्गत्वाद्द्वित्वात्प्राग् 'हो हन्ते'रित्यस्य न्याय्यत्वात् । **व्यक्तीति ।** घ्नीभावविषयद्वित्वशास्त्रस्याऽचारितार्थ्येनेति भावः । **'घ्नीभावे कृते'** इत्यस्य 'परत्वा'दित्यादिः । वस्तुतोऽत्र 'यङी'ति विषयसप्तमीति 'चक्ष्या' वित्यादाविव द्वित्वमिति बोध्यम् । [**यङि च**] ॥

प्रतिषेधे दीर्घप्रतिषेधः ॥*॥ **छन्दसि प्रतिषेधे दीर्घत्वस्य प्रतिषेधो वक्तव्यः । संस्वेदयुः मित्रयुः** ॥*॥ न वाऽश्वाघस्याद्वचनमवधारणार्थम् ॥*॥ **न वा वक्तव्यम् ॥ किं कारणम् ? ॥ [अश्वाघस्याद्वचनमवधारणार्थम्']॥ अश्वाघस्याद्वचनमवधारणार्थं भविष्यति—'अश्वाघयोरेव च्छन्दसि दीर्घो भवति नान्यस्ये'ति** ॥[न छन्दस्यपुत्रस्य]

शाच्छोरन्यतरस्याम् ॥ ७।४।४१ ॥

॥*॥ श्यतेरित्त्वं व्रते नित्यम् ॥*॥ **श्यतेरित्त्वं व्रते नित्यमिति वक्तव्यम् । संशितव्रतः ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् ॥**

॥*॥ देवत्रातो गलो ग्राह इतियोगे च सद्विधिः ।
मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः ॥*॥

प्र.]उगिदचामिति नुम् । **छन्दसीति** । आनन्तर्याद्दीलस्यैव प्रतिषेधः प्राप्नोति ततश्चापवादेऽपनीते उत्सर्गो दीर्घः प्राप्नोतीति तस्यापि प्रतिषेधो विधेयः । **संस्वेदयुरिति** । 'क्याच्छन्दसी'त्युप्रत्ययः । **न वेति** । अश्वाघयोरनेनेत्वे प्रतिषिद्धेऽकृत्सार्वधातुकयोरित्याकारे सिद्धे पुनराद्वचनं नियमार्थमित्यन्येषामाकारो न भवति । **[न छन्दस्य]**॥

शाच्छो । **श्यतेरिति** । व्रत इति विषयो निर्दिश्यते न तूत्तरपदं, तेन संशितो-ब्राह्मण इत्यत्रापि नित्यमित्त्वं भवति । यद्येवमित्त्वेन व्रतस्य द्योतितत्वात्संशितव्रतइति व्रतशब्दस्य प्रयोगो न प्राप्नोति । नैष दोषः । अन्यत्रापीत्त्वविधानात्संशितशब्दः सामान्यशब्द इति विशेषप्रतिपादनायाऽविरुद्धो व्रतशब्दप्रयोगः। व्रते तु नित्यमित्त्वं विधीयते । **न वक्तव्यमिति** । साधारणेन न्यायेन सिद्धत्वात् । अतएव तुल्यधर्मणः शब्दानुपन्यस्यति—**देवत्रातइति**। 'नुदविदोन्दत्रे'ति नत्वं संज्ञायां न भवति । देवग्रहणं संज्ञाविषयोपलक्षणार्थं, तेन 'भवत्रात' इत्यादावपि संज्ञात्वान्नत्वाऽभावः। यदा तु क्रियाशब्दस्त्राणं त्रातं इति, तदा नत्वविकल्पः। **गलइति** । 'अचि विभाषे'ति लत्वं प्राण्यङ्गे नित्यं भवति, विषे तु 'गर'इति लत्वाऽभावः। क्रियाशब्दे तूभयं भवति 'गरो' 'गल'इति। **ग्राह इति**। 'विभाषा ग्रह'इति णप्रत्ययो जलचरे नित्यं भवति, ज्योतिषि पचाद्यजेव 'ग्रह'इति। **इतियोगइति** । 'लक्षणहेत्वोः क्रियाया'इति शतृशानज्विधि'र्हन्तीति पलायते' 'वर्षतीति धावती'त्यादावितिप्रयोगे न भवति ।

उ.] न छन्दस्य। जनमिच्छन्तीति । जनीमिच्छन्तीति व्याख्यानं तु भाष्यविरुद्धम् । **दीर्घ इति** । 'अकृत्सार्वे'त्यनेन । [**न छन्दस्यपुत्रस्य**] ॥

शाच्छो । श्लोके **शंसितव्रत**निर्देशाद्व्रतमुत्तरपदमिति भ्रमं निवर्तयति—**विषय इत्यादि । शंसितो ब्राह्मण इति** । नियमविशेषे यत्नवानुच्यते । **विशेषप्रतिपादनायेति** । प्रकरणादिना विशेषप्रतीतौ तु क्वचिदप्रयोगोऽपि । **न्यायेन**—व्यवस्थितविभाषारूपेण। **संज्ञायामिति**। 'क्तिच्क्तौ च संज्ञाया'मिति क्तः। **ज्योतिषि**-

दो दद्घोः ॥ ७।४।४६ ॥

॥*॥ अवदत्तं विदत्तं च प्रदत्तं चाऽऽदिकर्मणि ।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥*॥

किं पुनरयं तकारान्त आहो स्विद्दकारान्त उत धकारान्तोऽथ वा थकारान्तः ? ॥ कश्चात्र विशेषः ? ॥*॥ तान्ते दोषो दीर्घत्वं स्यात् ॥*॥ **यदि तकारान्तो 'दस्ती'ति दीर्घत्वं प्राप्नोति** ॥*॥ दान्ते दोषो निष्ठानत्वम् ॥*॥ **अथ दकारान्तो 'रदाभ्यां निष्ठा तो न' इति नत्वं प्राप्नोति ।** ॥*॥ धान्ते दोषो धत्वप्राप्तिः ॥*॥ **अथ धान्तो 'झषस्तथोर्धोऽध' इति धत्वं प्राप्नोति** ॥*॥ थान्तेऽदोषस्तस्माथ्थान्तः ॥*॥ **अथ थकारान्तो न दोषो भवति** ॥ [दो दद्घोः] ।

प्र.] **मिथ इति।** एकस्मिन्विषये न विकल्प्यन्ते, किं तु विषयभेदेन । एतच्चाकृतिपक्षे उपपद्यते । तत्र हि सर्वं लक्ष्यमैकध्यमापाद्य उभयमुपदिश्यते, ततश्चोभयं भवतीत्येतावतैव लक्षणस्य व्यापारः । असंकीर्णत्वं तु प्रयोगवशात् प्रतीयते । **गवाक्षइति ।** वातायने 'अवङ्स्फोटायनस्ये'ति नित्यमवङ् भवति, प्राण्यङ्गे तु गोरक्षि गोक्षीति भवति। अन्यत्र तु विकल्पेन। एतच्चोदाहरणं. न व्यवस्थितविभाषाणां परिगणनम्, अन्यासामपि संभवात् ॥ **[शाच्छोरन्यतरस्याम् ।]**

दो दत्घोः। अवदत्तमिति। आदिकर्मग्रहणं प्रदत्तशब्दस्यैव संभवाद्विशेषणम्, अवदत्तादिसिद्ध्यर्थत्वाद्वचनस्य, अवत्तादयोऽपि भवन्ति । तथा चाऽच उपसर्गादित्यस्याऽवकाशः-प्रत्तमवत्तमिति वक्ष्यते। तस्मा'न्निदत्तमिति चेष्यते'इति चशब्देनाऽवत्तादयोऽपीष्यन्ते इति सूच्यते । **किं पुनरिति।** यद्यपि दकारः श्रूयते तथापि संहितायां तकारादीनामप्येतस्य रूपस्य संभवात्प्रश्नः । **तान्ते दोष इति ।** यदा'द'-इत्येतस्य यस्तकारान्त आदेशस्तत्र दीर्घ इति सूत्रार्थस्तदाऽयं दोषः। यदा तु तकारादौ दादेशे दीर्घस्तदा न दोषः। **तस्मात्थान्त इति ।** संनिपातपरिभाषाश्रये तु दान्तधान्तयोर्न दोषः ॥ **[दो दत्घोः]** ।

उ.] रविगुर्वादिरूपे । क्रियाशब्दे तूभयं बोध्यम् । **ऐकध्यम्**-एकरूपत्वम् । बुद्ध्या युगपदभिसमीक्ष्येत्यर्थः । व्यक्तिपक्षे तु प्रतिलक्ष्यं लक्षणभेदात्सर्वत्रैव भावाऽभावौ प्राप्नुत इति जातिपक्षाश्रयः । व्यक्तिपक्षेऽपि लक्ष्याऽनुरोधात्तद्व्यक्तिविषयकलक्षणानुपप्लव इति वक्तुं शक्यमिति बोध्यम् । जातिपक्षेऽपि लक्ष्याऽनुसार एवावश्यक इति बोध्यम् । **अन्यत्र**-गवाङ्गं गोङ्गमित्यादौ । **अन्यासामपीति ।** 'अजेर्वी'ति सूत्रे भाष्ये तस्य व्यवस्थितविभाषात्वकथनात्। **[शाच्छोरन्यतरस्याम्]**।

दो दत्घोः । अवदत्तादिसिद्ध्यर्थत्वादिति । 'अच उपसर्गा'दिति तत्वे प्राप्ते एतत्सिद्धिबोधनार्थमेवेदं न तु तन्निवृत्त्यर्थमिति भावः । अतएव वचने चकारबाहुल्यं, तैश्च तस्यापि सङ्ग्रह इत्याहुः । **सन्निपातेति ।** न च वत्वघत्वयोरसिद्धत्वादस्या

अच उपसर्गात्तः ॥ ७।४।४७ ॥

॥*॥ अच उपसर्गात्तत्वे आकारग्रहणम् ॥*॥ **अच उपसर्गात्तत्वे आकारग्रहणं कर्तव्यम् ॥ न कर्तव्यम् ॥ अलोऽन्त्यस्य विधयो भवन्तीत्याकारस्य भविष्यति ॥ न सिध्यति ॥ किं कारणम् ?** ॥*॥ आदेर्हि परस्य ॥*॥ **अत्र हि 'तस्मादित्युत्तरस्यादेः परस्ये'ति दकारस्य प्राप्नोति ॥ नैष दोषः** ॥*॥ अवर्णप्रकरणात्सिद्धम् ॥*॥ **[अवर्णप्रकरणात्सिद्धमेतत्] ॥ अस्येति वर्तते ॥ क्व प्रकृतम् ? ॥ 'अस्य च्वा'विति ॥**

यद्यवर्णग्रहणमनुवर्तते दद्भावे दोषो भवति ॥ एवं तर्ह्येवं वक्ष्यामि- 'दोऽद्धो'रिति[2] । दो य आकारस्तस्याऽद्भवति । ततः 'अच उपसर्गात्तः' । 'अस्ये'त्येव ॥ एवमपि सूत्रभेदः कृतो भवति ॥ नाऽसौ सूत्रभेदः । सूत्रभेदं तमुपाचरन्ति यत्र तदेवाऽन्यत्सूत्रं क्रियते भूयो वा, यद्धि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेदः । अथ वा द्वितकारको निर्देशः क्रियते सोऽनेकाल्शित्सर्वस्येति सर्वस्य भविष्यति ॥ इहापि तर्हि प्राप्नोति-अद्भिः,अब्भ्य इति ॥ 'अच' इति वर्तते । तच्चाऽवश्यमज्ग्रहणमनुवर्त्यं-लवाभ्यामित्येवमर्थम् ॥ अथ वा

प्र.] अच उ । यदीति । दाशब्दाकारस्य दद्भावे दत्तमिति संयोगादि श्रूयेत। **नासौ सूत्रभेद इति** । 'दोषाये'ति शेषः । तदेव सूत्रं लघु क्रियमाणं प्रत्युत गुणं संपादयति । **अथ वेति** । लघुकरणेऽपि यदि न्यासान्तरत्वात्स्पष्ट एव सूत्रभेद इति मतं तदैवमुत्तरम्-अलोन्त्यस्य द्वावपवादौ आदेः परस्यानेकाल्शित्सर्वस्येति, तयोर्विप्रतिषेधे परं प्रवर्तते । **अच इति वर्तत इति**। तेनाऽप्शब्दस्य योऽच् तस्मात्परस्य पकारस्य द्वितकार आदेशः,तत्रान्त्यस्य झलां जशोऽन्त इति जश्त्वं,पूर्वस्य झलां झश्

उ.]अप्रवृत्तिः। असिद्धत्वविषयेऽप्यस्याः प्रवृत्तेः 'क्नम्मेजन्त'सूत्रे भाष्ये ध्वनितत्वात् । किंच पूर्वत्र कर्तव्येऽसिद्धत्वेऽपि कृते तस्मिन्नस्याऽसिद्धत्वे मानाऽभावः । किं च आतिदेशिकनिमित्तविघाताऽभावमादायाऽस्या अप्रवृत्तौ 'गौरी'त्यादौ संबुद्धिलोपेऽपि स्थानिवद्भावेन ह्रस्वनिमित्तविघाताऽभावात्तत्र सन्निपातपरिभाषाया अतिव्याप्तिपर'क्नम्मेजन्त'सूत्रस्थभाष्याऽसङ्गतिः । न च सन्निपातस्याऽशास्त्रीयत्वान्न तत्र स्थानिवत्त्वमिति चेत्, असिद्धत्वेऽपि तुल्यं । किंच तस्य स्थानिवत्त्वे आर्थसमाजग्रस्तः सन्निपातः । अन्यथा 'हे त्रपो' इत्यत्र 'न लुमते'ति निषेधाऽनित्यत्वेऽपि गुणो दुर्लभ एव स्यात् । भाष्यकृतस्त्वयं भावः-'जग्ध'मित्यादौ धत्वसिद्धये तादिकित्सन्निपातनिमित्तकस्य तद्विघातकविधिप्रवर्तकत्वाय तद्विषये तदनित्यत्वमावश्यकमिति । एतत्सूत्रस्थस्थकारनिर्देश एव तज्ज्ञापक इति चेति दिक् ॥

अच उप । नन्वसावपि सूत्रभेद एवेत्यत आह—**दोषायेति** । ननु त्रितकारनिर्देशे त्रयाणामप्युभयत्र सम्बन्धः स्यादितीष्टविभागाऽलाभोऽत आह-

त्रितकारको निर्देशः करिष्यते–इहाऽर्थौ द्वावुत्तरार्थश्चैकः ॥*॥ द्यतेरित्त्वादच-स्तः ॥*॥ द्यतेरित्त्वादचस्त इत्येतद्भवति विप्रतिषेधेन । द्यतेरित्त्वस्याऽवकाशः निर्दितं निर्दितवान् । अचस्त इत्यस्याऽवकाशः–प्रत्तम् अवत्तम् । इहोभयं प्राप्नोति–नीत्तम् वीत्तम् । 'अचस्त' इत्येतद्भवति विप्रतिषेधेन॥ [अच उप]।

अपो भि ॥ ७।४।४८ ॥

॥*॥ अपो भि मासश्छन्दसि ॥*॥ अपो भीत्यत्र मासश्छन्दस्युपसङ्ख्यानं कर्तव्यम् । माद्भिरिष्ट्वा इन्द्रो वृत्रहा ॥ अत्यल्पमिदमुच्यते ॥*॥ स्वव-स्स्वतवसोर्मास उषसश्च त इष्यते ॥*॥ स्ववद्भिः, स्वतवद्भिः, समुषद्भिरजायथाः । माद्भिरिष्ट्वा इन्द्रो वृत्रहा ॥ [अपो भि]

सनि मीमाघुरभलभशकपतपदामच इस् ॥ ७।४।५४ ॥

॥*॥ इस्त्वं सनि राधो हिंसायाम् ॥*॥ इस्त्वं सनि राधो हिंसायामिति वक्तव्यम् । प्रतिरित्सति ॥ हिंसायामिति किमर्थम् ? ॥ आरिरात्सति ॥

प्र.]झशीति। लवाभ्यामिति। 'लूञ्' ऋदोर'बित्यप्। अस्यापि भकारादौ तः प्राप्नोति । अज्ग्रहणानुवृत्तौ त्वप्शब्दस्य योऽच् तस्मात्परो भकारादौ न कश्चिदस्तीति तत्वाऽ-भावः । अथ वेति। तत्र तकारद्वयात्मक आदेशः पृथग्विभक्तिक इहार्थो, यस्तु सा-च्कस्सकारः तस्याऽचः स्वरितत्वप्रतिज्ञानादुत्तरत्रानुवृत्तिः । लवाभ्यामित्यादौ तु तत्वं न भवति, पकारलोपादप्शब्दाऽभावात् । न च भूतपूर्वगत्याश्रयो न्याय्यः; अ-द्भिरित्यादौ सांप्रतिकाऽप्शब्दसंभवे गौणस्याऽग्रहणात्।अत एव समकक्षत्वाऽभावात्प्रत्य-याऽप्रत्ययोः प्रत्यये संप्रत्यय इति नावतिष्ठते। 'अद्भिः संस्कृत'मिति लिङ्गाद्वा । नहि प्रत्ययस्यैव ग्रहणे'ऽद्भि'रिति निर्देशोपपत्तिः । द्यतेरित्त्वादिति । 'पुरस्तादपवादा' इति न्यायादित्त्वं दद्भावस्यैव बाधकं, न तत्वस्य। ततश्चेत्वतत्वयोर्दद्भावापवादयोर्वि-प्रतिषेधे परं तत्वं प्रवर्तते । [अच उपसर्गात्तः] ॥

अपो । माद्भिरिति । 'पद्न्नोमा'सिति मासशब्दस्य मासादेशस्य छन्दस्येव विधानान्मासश्छन्दसीति छन्दोग्रहणं न कर्तव्यं, तत्क्रियते भाषायामपि क्व चित्प-दादयः प्रयुज्यन्त इति ज्ञापनायेत्याहुः । [अपो भि]॥

उ.]तत्रेति । पृथग्विभक्तिक इति। 'त' इत्यपेक्षयेत्यर्थः । संयोगान्तलोपस्तु न, अद्वत् । नन्वेवमुत्तरत्राऽज्ग्रहणाननुवृत्तौ 'लवाभ्या'मिति दोषः स्यादत आह— लवभ्यामित्यादौ चेति । नावतिष्ठत इति । तस्याः सिद्धान्तिना क्वाऽप्यानाश्रय-णाच्चेत्यपि बोध्यम् । ननु द्यतेरित्त्वं दद्भावस्येव तत्वस्याप्यपवाद इति कथं विप्र-तिषेधोऽत आह—पुरस्तादिति । [अच उपसर्गात्तः] ॥

अपो भि । छन्दस्येवेति । वृत्तिकृतोक्तां छन्दसीत्यनुवृत्तिमभ्युपेत्येदम् ॥

आप्ज्ञप्यृधामीत् ॥ ७।४।५५ ॥

॥*॥ज्ञपेरीत्त्वमनन्त्यस्य ॥*॥ **ज्ञपेरीत्त्वमनन्त्यस्येति वक्तव्यम्। ज्ञीप्सति ॥ तत्तर्हि वक्तव्यम्? ॥ न वक्तव्यम्। लोपोऽन्त्यस्य बाधको भविष्यति ॥ अनवकाशा हि विधयो बाधका भवन्ति सावकाशश्च णिलोपः॥ कोऽवकाशः?॥ कारणा हारणा ॥ एवमपीत्त्वमन्त्यस्य लोपस्य बाधकं स्यात् ॥ अनवकाशा हि विधयो बाधका भवन्ति ॥ ईत्त्वमपि सावकाशम् ॥ कोऽवकाशः? ॥ अनन्त्यः ॥ कथं पुनः सत्यन्त्येऽनन्त्यस्येत्त्वं स्यात्? ॥ भवेद्योऽचाऽङ्गं विशेषयेत्तस्याऽनन्त्यस्य न स्याद्वयं तु खल्वङ्गेनाऽचं विशेषयिष्यामः-'अङ्गस्याऽचो यत्र तत्रस्थस्ये'ति ॥ एवमप्युभयोः सावकाशयोः परत्वादीत्त्वं प्राप्नोति तस्मादनन्त्यस्येति वक्तव्यम् ॥** [आप्ज्ञप्यृधामीत्]।

अत्र लोपोऽभ्यासस्य ॥ ७।४।५८ ॥

॥*॥ अभ्यासस्याऽनचि ॥*॥ **अभ्यासस्येति यदुच्यते तदनचि द्रष्टव्यम्। पतापतः चराचरः। चलाचलः वदावदः।** [अत्र लोपोऽभ्यासस्य]।

प्र.] आप्ज्ञ। ज्ञपेरिति। इहाऽज्ग्रहणमनुवर्तते, तेन ज्ञपौ विशेष्यमाणेऽजन्तस्य ज्ञपेरीत्त्वं विधीयमानमलोन्त्यस्येत्यन्त्यस्य प्राप्नोतीति भावः। **लोपोऽन्त्यस्येति।** ज्ञपिनाऽज्विशेष्यते यथाऽऽप्यृधिभ्याम्। एवं चैकप्रस्थानो विशेषणविशेष्यभावो भवेतीति। तत्राऽनन्त्यस्याचः सावकाशमीत्त्वं पूर्वविप्रतिषेधेन णिलोपो बाधते। इतरस्त्वगृहीताभिप्राय आह-**अनवकाशा इति।** ईत्त्वमेव त्वनवकाशत्वाद्बाधकं प्राप्नोति। **एवमपीति।** नन्वस्तु परत्वादीत्त्वं, तस्य स्थानिवद्भावाण्णिलोपो भविष्यति, ईत्त्ववचनं त्वनन्त्यस्य श्रवणार्थं स्यात्। नैतदस्ति। 'सकृद्गतौ विप्रतिषेधे यद्बाधित'मिति लोपाऽप्रसङ्गात् ॥ [**आप्ज्ञप्यृधामीत्**] ॥

अत्र लोपो। चराचर इति। 'चरिचलिपतिवदीनामच्याक्चाभ्यासस्ये'ति द्विर्वचनमगागमश्चेति हलादिशेषोऽत्र न भवति। नन्वागागमविधानसामर्थ्याद्धलादिशेषो न भविष्यति। नहि हलादिशेषे आगमस्यादेशस्य वा विशेषोऽस्तीत्यादेश एव आकारो विधेयः स्यात्। नैतदस्ति। सत्यपि हलादि शेषे विगृहीतश्रवणार्थमाग्विधानं स्यादित्यनचीत्युच्यते। [**अत्र लोपोऽभ्यासस्य**]।

उ.] आप्ज्ञप्यृ। नन्वच इत्यनुवर्तनादनन्त्यस्यैव भविष्यतीत्यत आह—**इहेति।** ननु येननेतिन्यायेन अन्तस्य ईत्वं लोपस्य बाधकं स्यादत आह-**ज्ञपिनेति। यथाऽऽपिति।** तयोरजन्तत्वाऽसंभवादिति भावः। **पूर्वविप्रतिषेधेनेति।** 'ण्यल्लोपा'वित्यनेन। तत्र दीर्घग्रहणेनाऽस्यापि ग्रहादिति भावः। **ईत्त्वमेवेति।** न तु लोपस्य बाधकत्वं युक्तमित्यर्थः। भाष्ये-एवमपीत्त्वमित्यस्य-एवमीत्त्वमेवेत्यर्थः। अपि-

हलादिः शेषः ॥ ७।४।६० ॥

किमयं षष्ठीसमासः हलामादिर्हलादिः, हलादिः शिष्यत इति । आहोस्वित्कर्मधारयः—हल् आदिर्हलादिः, हलादिः शिष्यत इति?॥ कश्चात्र विशेषः?॥ ॥*॥ हलादिःशेषे षष्ठीसमास इति चेदजादिषु शेषप्रसङ्गः ॥*॥ **हलादिःशेषे षष्ठीसमास इति चेद्जादिषु शेषः प्राप्नोति । आनक्ष आनक्षतुः आनक्षुः । अस्तु तर्हि कर्मधारयः** ॥*॥ कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभावेऽन्त्यलोपवचनम् ॥ * ॥ **कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य तदभावे—आद्यस्य हलोऽभावे—ऽन्त्यलोपो वक्तव्यः। आटतुःआटुः।**॥*॥तस्मादनादिलोपः॥*॥**तस्मादनादिर्हलुप्यत इति वक्तव्यम्** ॥*॥ उक्तं वा ॥*॥ **[उक्तंवा]। किमुक्तम् ? ॥ 'प्रतिविधास्यते हलादिशेष' इति ॥ अयमिदानीं स प्रतिवि-**

प्र.] हलादिःशेषः । हलामादिरिति विग्रहप्रदर्शनं विस्पष्टप्रतिपत्त्यर्थम् । **अजादिष्विति** । अजादिष्वभ्यासेषु हलन्तरापेक्षयाऽऽदित्वे हल आश्रीयमाणे शेषः प्राप्नोति । **आनक्षेति** । 'अक्षू व्याप्तौ सङ्घाते च'त्यस्माल्लिट् । अत्र ककारस्य शेषः प्राप्नोति। कर्मधारये त्वभ्यासापेक्षमादित्वं हलो विज्ञायत इति शेषो न भवति । **आदिशेषनिमित्तत्वादिति ।** शेषशब्दोऽन्यनिवृत्तियुक्तमवस्थानमाहेति यत्रैवाऽभ्यासे पपाचेत्यादावादेर्हलोऽवस्थानं तत्रैवाऽन्यस्य निवृत्तिः स्यान्नाऽन्यत्र । अवस्थानं हि शब्दार्थत्वात्प्रधानम्।न च प्रधानाऽभावे आनुषङ्गिककार्यप्रवृत्तिः, आनक्षेत्यत्रापि ककारषकारयोरस्यामवस्थायां निवृत्त्यप्रसङ्गः। षष्ठीसमासेऽप्याटतुः आटुरित्यत्र टकारस्यादिवद्भावेन शेषप्रसङ्गः। स च प्रागुक्त एव। तत्र यद्याकृतिपक्ष आश्रीयते तदाभ्यासाकृतौ वर्तमानो हलादिः सर्वस्यामभ्यासव्यक्तावनादेर्निवृत्तिं करोतीति दोषाऽभावः। व्यक्तिपक्षे तु यस्यामेवाऽभ्यासव्य [illegible] हल आदेरवस्थानं तत्रैवाऽनादेर्निवृत्तिर्नान्यत्रेति

उ.]शब्दस्यैवकारार्थस्य स्थानव्यत्ययात् । [**आप्ज्ञप्यृधामीत्**] ॥

अत्र लोपो । विगृहीतेति । सवर्णदीर्घबाधनद्वारेत्यर्थः । तत्प्रवृत्तिकाल एव वैयर्थ्योपस्थितेरिति भावः । [**अत्र लोपोऽभ्यासस्य**] ॥

हलादिः शेषः। भाष्ये—**हलामादिरिति ।** नच 'न निर्धारणे' इति निषेधात्स दुर्लभः । त्रितयसन्निधान एव निर्धारणषष्ठीतत्समासनिषेधयोरङ्गीकारेणाऽदोषात् । एवञ्च प्रकृते शेषे षष्ठ्येवेति समासो भवत्येवेति भावात् कथमादिशेषनिमित्तत्वमनादिलोपस्येत्यत आह—**शेषशब्द इति । आनुषङ्गिकेति ।** सामर्थ्यसिद्धेत्यर्थः। अवस्थितस्यावस्थानविधानं हि सामर्थ्यादन्यनिवृत्तिं फलतीति यत्रैव तत्त्रैव तत्फलितमपि स्यादित्यर्थः । **अस्यामवस्थायामिति ।** कर्मधारयाश्रयणेत्यर्थः । **आदिवद्भाव इति ।** 'आद्यन्तव'दित्यनेन । **प्रागुक्त एवेति ।** प्रागुक्तोदाहरणन्याये-

धानकालः ॥ इदं प्रतिविधीयते, इदं प्रकृतम् अत्र लोपोभ्यासस्येति । ततो वक्ष्यामि 'ह्रस्वः' । ह्रस्वो भवत्यादेशः । 'अभ्यासस्य लोप' इत्यनुवर्तते । [अभ्यासस्य च लोपो भवति] । तत्र ह्रस्वभाविनां ह्रस्वो, लोपभाविनां लोपो भविष्यति । ततो 'हलादिः शेषश्चे'ति ॥ अथ वैवं वक्ष्यामि—'ह्रस्वोऽहल्' । ['ह्रस्वः'] ह्रस्वो भवत्यभ्यासस्येति । ततो'ऽहल' । अहल् च भवत्यभ्यासः । तत 'आदिः शेषः' । आदिःशेषश्च भवत्यभ्यासस्येति । अथ वा योगविभागः करिष्यते । 'ह्रस्वः' । ह्रस्वादेशो भवत्यभ्यासस्य । ततो 'हल्' । हल् च लुप्यतेऽभ्यासस्य । तत 'आदिः शेषः' । आदिःशेषश्च भवत्यभ्यासस्य ॥

शर्पूर्वाः खयः ॥ ७।४।६१ ॥

॥*॥ शर्पूर्वशेषे खर्पूर्वग्रहणम् ॥*॥ शर्पूर्वशेषे खर्पूर्वग्रहण कर्तव्यम् । खर्पूर्वाः खयः शिष्यन्ते खरो लुप्यन्त इति वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ उचिच्छिषति । व्युचिच्छिषति । तुकः श्रवणं मा भूदिति ॥ तत्तर्हि वक्त-

---

प्र.] दोषप्रसङ्गः।ह्रस्वभाविनामिति। ह्रस्वश्रुत्याऽच्परिभाषोपस्थानादजन्तस्याऽभ्यासस्य ह्रस्वो विधीयमानोऽलोऽन्त्यस्येति वचनादच एव दीर्घस्य, ह्रस्वस्य च लोपबाधनार्थो विज्ञायते इति हल्विषय एवादिशेषनिरपेक्षो लोपोऽवतिष्ठते । तत आदेरपि हलो लोपे प्राप्ते तद्बाधनार्थं 'हलादिः शेष' इति सूत्रम् । एतदेव ज्ञापकं लोपविधावलोन्त्यपरिभाषा नोपतिष्ठत इत्यानक्षेत्यादावनन्त्यस्यापि हलो लोपो भवतीति न कश्चिद्दोषः । अहल्चेति । अविद्यमानहल्कोऽभ्यासो भवतीत्यर्थः । [हलादिः शेषः] ।

शर्पू । उचिच्छिषतीति । 'उछी विवासे' 'छेचे'त्यन्तरङ्गत्वात्तुक् । सन इट् । 'पूर्वत्रासिद्ध'मिति चुत्वस्याऽसिद्धत्वात्—छिशब्दो द्विरुच्यते,तकारस्य शेषे प्राप्ते छशेषार्थं वार्तिकम् । ननु च 'पूर्वत्राऽसिद्धीयमद्विर्वचने' इति चुत्वे कृते छिब्दस्य द्विर्वचने चकारशेषेणैव रूपं सिध्यति । न चेदमस्ति—'निमित्ताऽभावान्नैमित्तिकस्याप्य-

---

उ.]नोक्त एवेत्यर्थः। के ह्रस्वभाविनस्तत्राह—ह्रस्वश्रुत्येति। 'ह्रस्व' इति सूत्रे 'लोप' इत्यनुवर्तनादभ्यासस्य ह्रस्वो लोपश्च विधीयते। तत्र लोपस्य हल्विषये चरितार्थस्य ह्रस्वेन स्वीयाऽज्विषये बाध इति भावः। अजन्ताभ्यासस्येति । 'अभ्यासावयवस्याऽच' इति वक्तुं युक्तम् । अन्यथा 'क्षी'इत्यादावेव स्यान्नतु 'ययाचे' इत्यादावित्याहुः । आदिशेषनिरपेक्ष इति। तेनाऽऽटतुरित्यादि सिद्धम् । [हलादिः शेषः]॥

शर्पूर्वाः खयः । नचेदमस्तीति । प्रवृत्तस्य निवर्त्तयितुमशक्यत्वादिति भावः । प्रदर्शयिष्यते इति । 'वृत्तिकारादिभि'रिति शेषः । इदं वार्तिकमपि तदनित्यत्वे ज्ञापकमिति तत्त्वम् । अतधातोःकेनिष्पन्नाऽत्कशब्दादाख्यानणिचि चङि 'त्क'शब्दस्य द्वित्वे आकत्कदिति रूपार्थं वार्तिकमावश्यकमित्यन्ये, तन्न; एतत्प्रत्या-

व्यम् ? ॥ न वक्तव्यं, चर्त्वे कृते तुग्न भविष्यति ॥ असिद्धं चर्त्वं तस्याऽसिद्धत्वात्तुक्प्राप्नोति॥सिद्धकाण्डे पठितम्—॥'अभ्यासजश्त्वचर्त्वमेत्वतुकोः'॥ **इति॥**

एवमप्यन्तरङ्गत्वात्प्राप्नोति ॥ तस्मात्खर्पूर्वग्रहणं कर्तव्यम् ॥ न कर्तव्यम् । एत्वतुग्ग्रहणं न करिष्यते 'अभ्यासजश्त्वचर्त्वं सिद्ध'मित्येव ॥*॥आदिशेषप्रसङ्गस्तु ॥*॥ **आदिशेषस्तु प्राप्नोति । तिष्ठासति ॥ ननु चाऽनादिशेष आदिशेषं बाधिष्यते ॥ कथमन्यस्योच्यमानमन्यस्य बाधकंस्यात् ? ॥ असति खल्वपि संभवे बाधनं भवतीति, अस्ति च संभवो यदुभयं स्यात् [इति] ॥**

यद्यादिशेषोऽपि भवति शर्पूर्ववचनमिदानीं किमर्थं स्यात्?॥*॥शर्पूर्ववचनं किमर्थमिति चेत्खयां लोपप्रतिषेधार्थम् ॥*॥ **शर्पूर्ववचनं किमर्थमिति चेत्खयां [लोपप्रतिषेधार्थं, खयां] लोपो मा भूदिति** ॥*॥ व्यपकर्षविज्ञानात्सिद्धम्॥*॥ **व्यपकर्षविज्ञानात्सिद्धमेतत् ॥ किमिदं व्यपकर्षविज्ञानादिति ? ॥ अपवाद-**

प्र.] भाव' इति येन चुत्वं निवर्तेत । एवं तर्हि 'पूर्वत्रासिद्धीयमद्विर्वचन' इत्येतदनित्यम्, 'उभौ साभ्यासस्ये'ति वचनात् । अन्यथा कृतणत्वस्य द्विर्वचने प्राणिणदित्यादि सिध्यतीति किं सूत्रेण ?। तथा चौजढदित्यसिद्धत्वस्योदाहरणं प्रदर्शयिष्यते। इतरो व्यवस्थितस्य समुदायस्य प्रविभज्याऽन्वाख्यानेऽन्तरङ्गत्वं तुकोऽनपेक्ष्याऽकृत एव तुकि द्विर्वचनं मत्वाह—**चर्त्वे कृत इति ।** 'अभ्यासे चर्चे'ति चर्त्वे छस्य कृते तुगभावाद्रूपं सिध्यति । **असिद्धमिति।** तुकि कर्तव्ये । **एवमप्यन्तरङ्गत्वादिति ।** शब्दनित्यत्वेऽप्युपायानामवश्याश्रयणीयोऽन्तरङ्गबहिरङ्गभावः । **एत्वतुग्ग्रहणमिति ।** तदकरणे हलादिशेषेऽपि कर्त्तव्ये चुत्वलक्षणस्य चर्त्वस्याऽसिद्धत्वाभावात्तकारस्य चकारे कृते हलादिशेषेण निवर्तिते छकारे रूपं सिध्यति। **आदिशेषप्रसङ्गस्त्विति ।** विषयभेदाद्विरोधाऽभावाच्च बाध्यबाधकभावाऽयोगः । **शर्पूर्ववचनमिति ।** अपवादा वाक्या-

---

उ.] ख्यानपरभाष्यविरोधेनैषामनभिधानात् । 'द्विर्वचने' इत्यस्य च द्वित्वे कर्तव्ये कृते चेत्यर्थः । अतएव वाक् वाक् इति भाष्योदाहृतं सङ्गच्छते । अन्यथा चर्त्वस्याऽसिद्धत्वाद्गस्यैव द्वित्वेऽन्त्यस्य 'वावसाने' इति चर्त्वे गस्यैव श्रवणं स्यात् । किंच कृतेऽपि कस्य द्वित्वे चर्त्वस्याऽसिद्धत्वाद्गकारे झशि पूर्वस्य जश्त्वे उक्तरीत्यैव चर्त्वाऽभावे गस्यैव श्रवणं स्यात् । नन्वन्तरङ्गस्तुक्कथमभ्यासचर्त्वं प्रतीक्षेतेत्यत आह—**इतर इति । शब्दनित्यत्वेऽपीति ।** अन्वाख्येयस्य शब्दस्य नित्यत्वेऽपीत्यर्थः । वाक्यपदरूपश्च स नित्यः। **उपायानां**—तदन्वाख्यायकानां शास्त्रीयाणाम् । **अवश्याश्रयणीय इति ।** अन्यथा न्याय्यमन्वाख्यानं न स्यादिति भावः ।

चुत्वलक्षणस्येति । तच्छब्दस्य द्वित्वेऽभ्यासखण्डे तकारस्थानिकचुत्वेत्यर्थः । 'पूर्वत्राऽसिद्धीयमद्वित्वे' इत्यनेनाऽपि सिद्धेर्व्यर्थमेवैतदिति बोध्यम् । **ननु** येन नाप्राप्तिन्यायेनाऽस्य हलादिःशेषबाधकत्वात्कथमादिशेषप्रसङ्गोऽत आह— **विषयभेदादिति ।** ननु खयः शेषविधानार्थत्वात्कथमानर्थक्यं शङ्कितमत आह-

विज्ञानात् । अपवादत्वादत्राऽनादिशेष आदिशेषं बाधिष्यते॥ ननु चोक्तं–'कथमन्यस्योच्यमानमन्यस्य बाधकं स्या'दिति॥ इदं तावदयं प्रष्टव्यः–यदि तन्नोच्येत किमिह स्यात् ? ॥ हलादिशेषः ॥ हलादिशेषश्चेन्नाऽप्राप्ते हलादिशेष इदमुच्यते तद्बाधकं भविष्यति ॥ यदप्युच्यते–'असति खल्वपि संभवे बाधनं भवत्यस्ति च संभवो यदुभयं स्या'दिति । सत्यपि संभवे बाधनं भवति, तद्यथा 'दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याये'ति, सत्यपि संभवे दधिदानस्य तक्रदानं बाधकं भवति । एवमिहापि सत्यपि संभवे अनादिशेष आदिशेषं बाधिष्यते ॥ [शर्पूर्वाः खयः] ॥

दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च ॥ ७।४।६५ ॥

दाधर्त्तीति किं निपात्यते ? ॥*॥ धारयतेः श्लावभ्यासस्य दीर्घत्वं णिलुक्च ॥*॥ [**धारयतेः श्लावभ्यासस्य दीर्घत्वं णिलुक्च निपात्यते**] ॥ अनिपात्यं, तूतुजानवदभ्यासदीर्घत्वं पर्णशुषिवण्णिलुग्भविष्यति ॥*॥ धृङो

प्र.] र्थद्वयं साधयन्ति, अपवादं च विदधत्युत्सर्गञ्च निवर्तयन्ति । तत्रोत्सर्गाभ्युपगम एकार्थवद्द्वितीयार्थस्य त्यागादानर्थक्यप्रसङ्ग एवेत्यर्थः। 'हलादिः शेष' इत्यनेन खयां निवृत्तौ प्राप्तायामवस्थानविधानादानर्थक्यं नास्ति। **व्यपकर्षविज्ञानादिति**। व्यपकर्षणम्–उत्सर्गस्य निवर्तनं, तस्य विज्ञानं तस्मात्॥ अपवादविधानादित्यर्थः। एकाभ्यासविषयत्वादविरोधेऽप्युत्सर्गापवादभावः। [**शर्पूर्वाः खयः**] ।

दाधर्ति । **श्लाविति** । 'बहुलं छन्दसी'ति शपः श्लुः । **तूतुजानवदिति** । 'तुजादीनां दीर्घोऽभ्यासस्ये'ति दीर्घत्वमित्यर्थः। **पर्णशुषिवदिति**। यथा पर्णानि शोषयन्ति पर्णशुषो वाता इत्यादौ क्विपि 'बहुलमन्यत्रापि संज्ञाछन्दसो'रिति णिलुक् भवत्येवं दाधर्तीत्यादौ भविष्यतीत्यर्थः। **धृङ इति** । धृङ् अवस्थान इत्यस्य शे प्राप्ते

उ.] **अपवादवाक्यार्थद्वयमिति** । अपवादत्वमेवाऽस्याऽसिद्धमित्युत्तरवादिन आशयमाह–**हलादिः शेष इत्यनेनेति** । ननु विषयभेदे कथमपवादत्वमत आह— **एकाभ्यासेति** । अवयवद्वारा तस्यैव कार्यित्वमिति भावः । विषयभेदेऽपि बाधकत्वदर्शनादस्योपयोगश्चिन्त्यः । 'इदं तावदयं प्रष्टव्य' इत्यादिना विषयभेदेनैव बाधकत्वस्य भाष्ये उक्तेरित्यलम् । [**शर्पूर्वाः खयः**] ॥

दाधर्तिदर्ध । धृञो ण्यन्तस्य जुहोत्यादिष्वपाठादाह—**बहुलमिति** । 'तुजादीनां दीर्घोऽभ्यासस्येति तूजानव'दिति क्वाचित्कोऽपपाठः । **णिलुगिति** । अतएव गुणाऽभावः। प्रकृते च वृद्ध्यभावः । भाष्ये–**धृङो वेति** । ण्यन्तार्थस्य केव-

वा श्लावभ्यासस्य दीर्घत्वं परस्मैपदं च ॥*॥ [धृङो वा श्लावभ्यासस्यदीर्घत्वं परस्मैपदञ्च निपात्यते ।]॥ अनिपात्यं, तूतुजानवदभ्यासस्य दीर्घत्वं युध्यतिवत्परस्मैपदं(च) भविष्यति॥ दर्धर्तीति किं निपात्यते ? ॥*॥ धारयतेः श्लावभ्यासस्य रुग्णिलुक्च ॥*॥ [धारयतेः श्लावभ्यासस्य रुक् णिलुक्च निपात्यते ।] ॥ अनिपात्यम् । देवा अदुह्रवद्दुर्णशुषिवण्णिलुक्च भविष्यति ॥ ॥*॥ धृङो वाऽभ्यासस्य रुक्परस्मैपदञ्च ॥*॥ [धृङो वाऽभ्यासस्य रुक्परस्मैपदञ्च निपात्यते ।] । अनिपात्यम्, देवा अदुह्रवद्रुक्युध्यतिवत्परस्मैपदञ्च भविष्यति ॥ दर्धर्षीति किं निपात्यते ?॥*॥ धारयतेः श्लावभ्यासस्य रुग्लिलुक्च ॥*॥ [धारयतेः श्लावभ्यासस्य रुग्णिलुक्च निपात्यते] ॥ अनिपात्यम्, देवा अदुह्रवद्दुर्णशुषिवण्णिलुक्च भविष्यति ॥*॥ धृङो वाऽभ्यासस्य रुक् परस्मैपदं च ॥*॥ [धृङो वाऽभ्यासस्य रुक्परस्मैपदञ्च निपात्यते]॥ अनिपात्यम् । देवा अद्रुह्वद्रुक्युध्यतिवत्परस्मैपदं च भविष्यति ॥

बोभूत्विति किं निपात्यते ? ॥*॥ भवतेर्यङ्लुगन्तस्याऽगुणत्वम् ॥*॥ [भवतेर्यङ्लुगन्तस्याऽगुणत्वं] निपात्यते ॥ नैतदस्ति प्रयोजनं, सिद्धमत्राऽगुणत्वं 'भूसुवोस्तिङी'ति ॥ एवं तर्हि नियमार्थं भविष्यति—'अत्रैव यङ्लुगन्तस्य गुणो न भवति नान्यत्रे'ति ॥ क्व मा भूत् ? ॥ बोभवतीति ।

तेतिक्ते इति किं निपात्यते ? ॥*॥ तिजेर्यङ्लुगन्तस्यात्मनेपदं ॥*॥ [तिजेर्यङ्लुगन्तस्यात्मनेपदं] निपात्यते॥ नैतदस्ति प्रयोजनं, सिद्धमत्रात्मनेपदमनुदात्तङित आत्मनेपदमिति ॥ एतन्नियमार्थं तर्हि भविष्यति 'अत्रव यङ्-

---

प्र.]व्यत्ययेन शप् । युध्यतिवदिति । 'व्यत्ययो बहुल'मित्यनेनेत्यर्थः । रुडिति । 'शीङो रुट् बहुलंछन्दसी'त्यनेन। बोभवतीति। लिङर्थे लेट् । 'लेटोऽडाटा'वित्यट् । सिद्धमत्रेति । प्रत्ययलक्षणेन यद्यप्यनुदात्तङित इति ङित्त्वनिमित्तमात्मनेपदं न प्रत्ययनिमित्तं तथापि लोलूयत इत्यादौ यद्यङन्तादात्मनेपदं तत्प्रत्ययलक्षणं भवत्येव । एतन्नि-

---

उ.] लार्थस्य च प्रयोगेषु प्रतीतेरिति भावः । व्यत्ययेनेति । अस्य तुदादित्वादिति भावः । शस्यैव व्यत्ययेन श्लुरित्यन्ये । कैयटमते श्लुरपि छान्दसत्वात्कल्प्यः । 'देवा अदुह्व'दिति भाष्ये पाठः । 'अदुद्रुवद्र'दित्यपाठः द्रुधातोश्चङि रूपस्य सत्त्वात् । अत्रैव यङ्लुगन्तस्येति भ्वन्तस्याङ्गस्य गुणो नेत्यर्थ इति भावः । प्रत्ययलक्षणेनेति । 'न लुमते'ति तु न, आत्मनेपदस्याऽङ्गकार्यत्वाऽभावात् । तथापि 'लोलूयते' इति प्रत्ययलक्षणसूत्रं विध्यर्थमिति वार्तिककृन्मते इदं । नियमार्थत्वपक्षे तु प्रत्ययाऽसाधारणरूपाऽनाश्रयणात् प्रत्ययलक्षणेनात्मनेपदप्राप्तिरेवेति

लुगन्तस्यात्मनेपदं भवति नान्यत्रे'ति॥ क्व मा भूत्?॥बेभिदीति चेच्छिदीति॥

द्युतिस्वाप्योः संप्रसारणम् ॥ ७।४।६७ ॥

किमर्थं स्वपेरभ्यासस्य संप्रसारणमुच्यते यदा सर्वेष्वभ्यासस्थानेषु स्वपेः संप्रसारणमुक्तम् ? ॥*॥ स्वापिग्रहणं व्यपेतार्थम् ॥*॥ **स्वापिग्रहणं क्रियते ॥ [किं प्रयोजनं ?] ॥ 'व्यपेतार्थम्' । व्यपेतार्थोऽयमारम्भः । सुष्वापयिषतीति ॥ अस्ति प्रयोजनमेतत् ? ॥ किं तर्हीति** ॥*॥ तत्र क्यजन्तेऽतिप्रसङ्गः ॥*॥ **तत्र क्यजन्तेऽतिप्रसङ्गो भवति । इहापि–प्राप्नोति स्वापकमिच्छति स्वापकीयति । स्वापकीयतेः सन् सिष्वापकीयिषतीति** ॥*॥सिद्धं तु णिग्रहणात् ॥*॥ **सिद्धमेतत् ॥ कथम् ?॥ ['णिग्रहणात् ॥] णिग्रहणं कर्तव्यम् । [तर्त्तर्हि णिज्ग्रहणं कर्त्तव्यम् ?॥]॥ न कर्तव्यम् । निर्देशादेव हि व्यक्तं ण्यन्त-**

प्र.] यमार्थमिति । एवं चाऽदादिषु चर्करीतं परस्मैपदमिति लिङ्गसिद्धानुवादः परस्मैपदग्रहणं । कर्तर्येव चेदमात्मनेपदं नियम्यत इति भावकर्मणोर्यङ्लुगन्तादात्मनेपदं भवत्येव । [**दाधर्तिदर्धर्त्तिदर्धर्षि**] ।

द्युति । किमर्थमिति । स्वपिरेव सौत्रत्वान्निर्देशस्य दीर्घं कृत्वा निर्दिष्ट इति पूर्वः पक्षः । तत्र च लिटि किति 'वचिस्वपी'ति संप्रसारणविधानात्कृतसंप्रसारणस्य द्विर्वचने सत्यभ्यासस्य संप्रसारणं श्रूयते । अकिति लिट्यभ्यासस्येति संप्रसारणं । सनो 'रुदविदे'ति कित्त्वविधानाद्वचिस्वपीति संप्रसारणं।'स्वपिस्यमिव्येञां यङी'ति यङि च। ङि 'स्वापेश्चङी'ति । **व्यपेतार्थमिति** । स्वपेः सनादिषु परतो विहितं संप्रसारणं णिचा व्यवधाने न प्राप्नोतीति स्वापेर्ण्यन्तस्याऽभ्यासस्य संप्रसारणं विधीयते। **सुष्वापयिषतीति**। स्वापयितुमिच्छतीति सन् । इड्गुणायादेशाःणौ कृतस्य स्थानिवत्वात्स्वपेर्ण्यन्तस्यद्विर्वचनमभ्याससंप्रसारणं,'स्तौतिण्यो'रिति षत्वम्। इतरस्तु ण्यन्तस्य ग्रहणमबुद्ध्वा येन केन चित्प्रत्ययेन व्यवहितस्य स्वपेरभ्याससंप्रसारणमनेनोक्तमिति मत्वाह–**अस्ति प्रयोजनमिति** । स्वपितीति स्वापकः। तमिच्छतीति क्यच् । **निर्देशा-**

उ.] विध्यर्थमेवेदम् । **लिङ्गसिद्धानुवाद इति** । अनुदात्तङिदादिभ्यो यङ्लुकोऽनभिधाने इदम् । तत्सत्त्वे तु वचनमेवेदं बोध्यम् । **परे तु** तत्सत्त्वेपि 'श्तिपाशपे'त्यस्याऽभावादनुवाद एवाऽयमित्याहुः । **कर्त्तर्येवेति** । तुल्यजातीयविषयत्वान्नियमस्येत्यर्थः । अतएव प्रत्ययलक्षणसूत्रस्थनियमपक्षेण न फलभेदः । यदि यङ्लुगन्ताद्भावकर्मणोरभिधानमस्ति तदेदम् । [**दाधर्त्तिदर्धर्त्ति**] ॥

द्युतिस्वाप्योः । ननु 'स्वापी'पि ण्यन्तग्रहणात्तस्य च लक्षणान्तरेणाऽसिद्ध्या प्रश्नोऽयुक्तोऽत आह—**स्वपिरेवेति** । वार्तिके 'व्यपेत'शब्देन व्यवहितमुच्यते । वस्तुतो निमित्तत्वप्रयोजकधर्मेभ्यश्च्युतं व्यपेतं। तत्त्वं चात्र सनो व्यवहितत्वादकित्त्वाच्च बोध्यम् । **स्वपेर्ण्यन्तस्येति** । अन्यथा ह्रस्वमेवोच्चारयेदिति

स्य ग्रहणमिति ॥ नात्र निर्देशः प्रमाणं शक्यं कर्तुम् । यथा हि निर्देशस्त-थेहापि प्रसज्येत–स्वापं करोति स्वापयति । स्वापयतेः सन्–सिष्वापयिषतीति । तस्माण्णिग्रहणं कर्तव्यम् । [द्युतिस्वाप्योः सम्प्रसारणम्] ॥

निजां त्रयाणां गुणः श्लौ ॥ ७।४।७५ ॥

॥*॥ त्रिग्रहणानर्थक्यं गणान्तत्वात् ॥*॥ त्रिग्रहणमनर्थकम् ॥ किं कारणम् ? ॥ 'गणान्तत्वात्' । त्रय एव निजादयः ॥*॥ उत्तरार्थं तु ॥*॥ उत्तरार्थं तर्हि त्रिग्रहणं कर्तव्यम्–भृञामित्–त्रयाणां यथा स्यात्–इह मा भूत्–जहाति ॥ [निजां त्रयाणां गुणः श्लौ] ॥

अर्तिपिपर्त्योश्च ॥ ७।४।७७ ॥

अर्तिग्रहणं किमर्थं न 'बहुलं छन्दसी'त्येव सिद्धं, न ह्यन्तरेण छन्दोऽर्तेः श्लुर्लभ्यः ? ॥ एवं तर्हि सिद्धे सति यदर्तिग्रहणं करोति तज्ज्ञापयत्याचार्यो

प्र.] देवेति । ण्यन्त एव स्वपिः सूत्रे निर्दिष्ट इत्यर्थः। **स्वापं करोतीति** । स्वपेर्घञन्तात्तत्करोतीति णिच् । **तस्माण्णिग्रहणमिति** । 'स्वपेर्णे'रिति वक्तव्यम् । तेन स्वपेर्यो णिर्विधीयते तदन्तस्य ग्रहणाद्घञन्ताण्णेर्ग्रहणाऽभावः। [**द्युतिस्वाप्योःसम्प्रसारणम्**]।

निजां । त्रिग्रहणमिति । वृत्करणपरिच्छिन्नास्त्रय एव णिजादय इत्यर्थः। एकारे विधातव्ये गुणग्रहणमिक्परिभाषोपस्थानार्थं, तेन हलादिशेषे कृते गुणो भवति,अन्यथा तदपवादो हलः स्थान एकारः स्यात्। अथाऽभ्यासविकारेऽपवादा नोत्सर्गान्बाधन्त इत्याश्रीयते तदा विस्पष्टार्थं गुणग्रहणम् । [**निजां त्रयाणां गुणः श्लौ**] ॥

अर्ति । अर्तिग्रहणमिति । ऋ सृ गताविति जुहोत्यादौ पठ्यते, गा स्तुतौ च । छन्दसीति छन्दोग्रह पूर्वेषामपि घृप्रभृतीनां शेष इति छान्दस एवाऽर्तिः श्लु-

---

उ.] भावः । **णौ कृतस्येति** । वृद्धिरूपस्येत्यर्थः । 'णावच आदेशः स्थानिव'दिति वचनादिति भावः । अस्य प्राप्तिमात्रेणोल्लेखो न त्वत्र फलमस्ति किञ्चित् । 'तस्माण्णिग्रहणं कर्तव्य'मित्यस्य स्वपेर्ण्यन्तस्य ग्रहणमिति व्याख्येयमित्यर्थः। द्युतेस्त्वण्यन्तस्यैव । एवञ्च वृत्त्याद्युक्तमदिद्युतदिति चिन्त्यमेव, भाष्याऽनुक्तत्वात् । अभ्यासाऽङ्गनिमित्तप्रत्यययोरैक्य एवैतत्प्रवृत्तेश्च । अतएव 'दुद्योतकीयिषती'त्यादौ दोष इति बोध्यम् । [**द्युतिस्वाप्योः सम्प्रसाणम्**] ॥

निजां त्रयाणां । तेनेति । गुणोत्तरं वा 'हलादिः शेष' इत्यपि बोध्यम् । **विस्पष्टार्थमिति** । लिङ्गसिद्धपरिभाषाश्रयणगौरवपरिहारायेत्यर्थः । तदाश्रयणे च हलादिः शेषोत्तरमवशिष्टस्यैकार इति बोध्यम् । भाष्ये–**उत्तरार्थमिति** । कपिञ्जलाधिकरणन्यायस्त्वत्र शास्त्रे नाश्रीयत इति भावः । [**निजां त्रयाणाम्**] ॥

अर्तिपि । गणान्तस्थं छन्दसीति घृप्रभृतीनां सर्वेषां शेष इति पूर्वपक्षः । इत एव ज्ञापकान्न सर्वशेष इत्युत्तरम् । [**अर्त्तिपिपर्त्योश्च**] ॥

'भाषायामर्तेः श्लुर्भवती'ति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ इयर्तीत्येतत्सिद्धं भवति ॥ [अर्त्तिपिपर्त्त्योश्च] ॥

गुणो यङ्लुकोः ॥ ७।४।८२ ॥

॥*॥ ऐचोर्यङि दीर्घप्रसङ्गो ह्रस्वाद्धि परं दीर्घत्वम् ॥*॥ **ऐचोर्यङि दीर्घत्वं प्राप्नोति डोढौक्यते तोत्रौक्यत इति ॥ ननु च ह्रस्वत्वे कृते [गुणो भविष्यति] दीर्घत्वं न भविष्यति ॥ न सिध्यति ॥ किं कारणम् ? ॥ 'ह्रस्वाद्धि परं दीर्घत्वम्'** । ह्रस्वत्वं क्रियतां दीर्घत्वमिति किमत्र कर्तव्यम् ? ॥ **परत्वाद्दीर्घत्वेन भवितव्यम्** ॥* न वाऽभ्यासविकारेष्वपवादस्योत्सर्गाऽबाधकत्वात् ॥*॥ **न वैष दोषः ॥ किं कारणम् ? ॥ 'अभ्यासविकारेष्वपवादस्योत्सर्गाऽबाधकत्वात्' । 'अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्त' इत्येषा परिभाषा कर्तव्या ॥ कान्येतस्याः परिभाषायाः प्रयोजनानि ?** ॥*॥ प्रयोजनं सन्वद्भावस्य दीर्घत्वम् ॥*॥ [**सन्वद्भावस्य दीर्घत्वं प्रयोजनम्**] ॥ **अचीकरत् अजीहरत् । सन्वद्भावमपवादत्वाद्दीर्घत्वं न बाधते** ॥ * ॥ मान्प्रभृतीनां दीर्घत्वमित्त्वस्य ॥ * ॥ **मान्प्रभृतीनां दीर्घत्वमपवादत्वादित्त्वन्न बाधते** ॥*॥ गणेरीत्वं हलादिशेषस्य॥*॥ **गणेरीत्वमपवादत्वाद्धलादिशेषं न बाधते ॥**

इदमयुक्तं वर्तते ॥ किमत्राऽयुक्तम् ? ॥ "ऐचोर्यङि दीर्घप्रसङ्गो ह्रस्वाद्धि परं दीर्घत्व"**मित्युक्त्वा तत उच्यते**–"न वाभ्यासविकारेष्वपवादस्योत्सर्गाऽबाधकत्वा"**दिति । तस्याश्च परिभाषायाः प्रयोजनानि नामोच्यन्ते**–"प्रयोजनं सन्वद्भावस्य दीर्घत्वं, मान्प्रभृतीनान्दीर्घत्वमित्त्वस्य, गणेरीत्वं हलादिशेषस्ये"**ति च** ।

प्र.] विषयः । **इयर्तीति** । तिप् शप् । शपः श्लुः । द्विर्वचनम् । उरदित्यत्वम् । इत्वम् । अभ्यासस्यासवर्ण इति इयङ् । गुणरपरत्वे । [**अर्त्तिपिपर्त्त्योश्च**] ।

गुणो । ऐचोरिति । ह्रस्वस्याऽवकाशः–ययावित्यादि । दीर्घोऽकित इत्यस्यावकाशः–कृतेऽकृते वा ह्रस्वत्वे–पापच्यत इति । डोढौक्यत इत्यादौ तु परत्वादौकारस्य दीर्घ औकार एव प्राप्नोति । ऐकारस्योदाहरणं–पेपैण्यते इति । **ह्रस्वत्वे कृत इति** । वक्ष्यमाणोऽभिप्रायः । गुणश्च दीर्घस्याऽपवाद इति दीर्घाऽभावः । **इदमयुक्तमिति** ।

उ.] **गुणो यङ्लुकोः । औकार एवेति** । ततश्चेगन्तत्वाऽभावाद्गुणस्याऽप्राप्तिः । **पेपैण्यत इति** । 'पैणृ गतौ'त्यादिधातुः । अस्य स्थाने 'प्रैणृ' इत्यन्ये पठन्ति । तन्मते 'पेप्रैण्यते' इति रूपं । 'वेवेथ्यते' इति पाठे 'विथृ वेथृ याचने' इति धातुः । 'ऐचो'रित्युपलक्षणमिति भावः । 'वेवैत' इति पाठे धातुश्चिन्तनीयः । कैयटप्रामाण्याद्वैप् धातुं कल्पयन्ति, यङ्लुकि च रूपं वदन्ति । ननु कृतेऽपि ह्रस्वत्वे दीर्घः स्यात्परत्वान्न तु गुण इत्यत आह—**गुणस्त्विति** । दीर्घे नाप्राप्ते गुणारंभादिति

न[1] खलु सन्वद्भावमपवादत्वाद्दीर्घत्वं बाधते ॥ किं तर्हि ? ॥ परत्वात् । न खल्वपि मान्प्रभृतीनां दीर्घत्वमपवादत्वादित्त्वं बाधते ॥ किं तर्हि ?॥ अन्तरङ्गत्वात् । न खल्वपि गणेरीत्वमपवादत्वाद्धलादिशेषं बाधते ॥ किं तर्हि ?॥ अनवकाशत्वात् ॥ एवं तर्हीयं परिभाषा कर्तव्या—'अभ्यासविकारेषु बाधका न बाधन्त'[2]इति ॥ सा तर्ह्येषा परिभाषा कर्तव्या ? ॥ न कर्तव्या । आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयमकित इति प्रतिषेधं शास्ति ॥

प्र.]परत्वाद्दीर्घप्रसङ्गमुक्तोत्सर्गापवादयोर्बाध्यबाधकत्वाऽभावःप्रतिपाद्यत इत्ययुक्तं,प्रयोजनमपि किं चिन्न वचनानुरूपमिति पौर्वापर्यविरोधादयुक्तम् ।**न च सन्वद्भावमिति**। सन्वद्भावस्यावकाशः—अचिक्षणदिति।दीर्घस्यावकाशः—अदीदपदिति।इहोभयं प्राप्नोति—अचीकरदिति । तत्र परत्वाद्दीर्घः प्राप्नोति । **न खल्वपीति** ।. सन्प्रत्ययोऽभ्यासदीर्घत्वंच संनियोगेन विधीयत इत्यन्तरङ्गं दीर्घत्वम् , इत्वं तु बहिरङ्गं, सनि परतोऽङ्गाधिकारेऽभ्यासस्याऽकारान्तस्य विधानात् । **न खल्वपीति**। आदेः शेषो विधीयतेऽन्त्यस्य त्वीत्वमिति नास्त्युत्सर्गापवादभावो हलादिशेषे । अभ्यासस्येत्यवयवषष्ठी 'ई च गण' इत्यत्राऽभ्यासस्येति स्थानषष्ठीति भिन्नविषयावीत्वहलादिशेषौ । अनवकाशत्वात्तु बाधकमीत्वं हलादिशेषस्य । 'निरवकाशा हि विधयः सावकाशान्विधीन् बाधन्त' इति न्यायात् । यदा तु येन नाप्राप्त इति न्यायस्तदाऽस्त्येवोत्सर्गापवादभावः। **अभ्यासविकारेषु बाधका इति** । बाधकत्वमनपेक्षित[3]निमित्तविशेषमाश्रयणीयमित्य-

उ.]भावः।**प्रतिपाद्यत इतीति** ।अस्याऽयुक्तत्वं हेतोर्वैयधिकरण्यात् । **उक्तं प्रयोजनमपीति** । तदपि वैयधिकरण्यादयुक्तमित्यर्थः । **पौर्वापर्यविरोधादिति** । पूर्वापरविरोधादित्यर्थः । **अचिक्षणदिति** । अत्राऽभ्यासस्य लघुत्वाऽभावाद्दीर्घाऽप्राप्तिः । **अदीदपदिति** । अत्र 'सन्यत' इत्यादिना सनि कस्य चित्कार्यस्याऽविधानात्सन्वत्त्वाऽप्राप्तिः । दीर्घस्तु सन्वद्भावविषये उच्यते, न तु तेनेति भावः । **सन्प्रत्ययोभ्यासेति** । ननु सन्प्रत्ययकालेऽभ्यासाऽभावेन कथं दीर्घस्याऽन्तरङ्गत्वमिति चेन्न, अभ्यासस्यावश्यकत्वेन तावत्पर्यन्तं दीर्घस्याऽवस्थानेपि इत्वपर्यन्तमवस्थितौ कारणाऽभावेन तदपेक्षयाऽन्तरङ्गत्वादिति भावः । नन्वनवकाशत्वमेवाऽपवादत्वमित्ययुक्तमेतद आह—**आदेः शेष इति** । **नास्तीति** । विषयभेदादिति भावः । विषयभेदेऽप्यनवकाशत्वमात्रं बाधनिमित्तमस्तीति तात्पर्यम् । तदाह—**निरवकाशा हीति** । उत्सर्गे कृते चरितार्थस्यैवाऽपवादत्वं, गणेरीत्वं तु नाऽभ्यासलोपे कृते प्राप्नोति, 'अलोन्त्यस्ये'त्येकवाक्यतया वाक्यार्थेन णस्यैव तत्प्राप्तेः । एवञ्चाऽनवकाशत्वं स्पष्टमेवेति भावः । शेषपदलभ्यनिवृत्तिबाधकत्वे भाष्यतात्पर्याद्यदा त्वित्यादिः कैयटश्चिन्त्यः । **अनपेक्षितेति** । अनपेक्षितो निमित्तविशेषो येननाप्राप्तत्वपरत्वादिकं येन तदित्यर्थः । [**गुणो यङ्लुकोः**] ॥

दीर्घोऽकितः ॥ ७।४।८३ ॥

अकित इति किमर्थम् ? ॥ यंयम्यते रंरम्यते ॥ अकित इति शक्यमकर्तुम् ॥ कस्मान्न भवति–यंयम्यते रंरम्यत इति ? ॥ नुकि कृतेऽनजन्तत्वात् ॥ अत उत्तरं पठति ॥*॥अकिद्वचनमन्यत्र किदन्तस्याऽलोऽन्त्यनिवृत्त्यर्थम् ॥*॥ **अकिद्वचनं क्रियते ज्ञापकार्थम् ॥ किं ज्ञाप्यम् ? ॥** एतज्ज्ञापयत्याचार्यो**ऽ'न्यत्र किदन्तस्याऽभ्यासस्यालोऽन्त्यविधिर्न भवती'ति॥किमेतस्य ज्ञापने प्रयोजनम् ?** ॥*॥ प्रयोजनं ह्रस्वत्वात्वेत्त्वगुणेषु ॥*॥ [**ह्रस्वत्वात्वेत्त्वगुणेषु प्रयोजनम्**] ॥ ह्रस्वत्वम्–**अवचच्छतुः अवचच्छुः** । अत्वं–**चच्छृदतुःचच्छृदुः** ॥ इत्त्वं–**चिच्छादयिषति चिच्छर्दयिषति** । गुणः–**चेच्छिद्यते चोच्छुप्यते** । **तुकि कृतेऽनन्त्यत्वादेते विधयो न प्राप्नुवन्ति** ॥ * ॥ विप्रतिषेधात्सिद्धम् ॥*॥ **नैतानि सन्ति प्रयोजनानि । विप्रतिषेधेनाऽप्येतानि सिद्धानि । तुक् क्रियतामेते विधय इति, किमत्र कर्तव्यं, परत्वादेते विधय इति** ॥*॥ तद-

---

प्र.]र्थः।**यदयमिति**।यथाचाऽकित इति ज्ञापकं तथोत्तरत्र वक्ष्यते।[**गुणो यङ्लुकोः**]।

दीर्घो । नुकि कृत इति । दीर्घश्रुत्याऽच्परिभाषोपस्थानादचाऽभ्यासस्य विशेषणादजन्तस्याऽभ्यासस्य दीर्घो विधीयते । स चालोऽन्त्यस्येति वचनादन्त्यस्याऽचो भवति । **अकिद्वचनमिति** । यद्यचाऽभ्यासो विशेष्यते अकित इति प्रतिषेधोऽनर्थकः स्यात्, तस्मादभ्यासेनाऽज्विशेष्यते ततोऽभ्यासस्येति विशेषणषष्ठीत्यलोऽन्त्यस्येति नोपतिष्ठत इत्येतज्ज्ञाप्यत इत्यर्थः। **अवचच्छतुरिति**। 'छो छेदने'। आत्वं। लिट्। छाशब्दस्य द्विर्वचनम्। अन्तरङ्गत्वात्तुकि कृतेऽनन्त्यस्याप्यचो ह्रस्वत्वम् । **चच्छृदतुरिति** । 'उच्छृदिर् दीप्तिदेवनयोः' । छृदो द्विर्वचनं । छे चेति तुकि कृते उरदित्यत्वम्,अभ्यासेन ऋवर्णस्य विशेषणात्। **चिच्छादयिषतीति**।'छद संवरणे'। **परत्वादेते विधय इति** । न ह्येतेषूदाहरणेषु तुगन्तरङ्गः, प्रत्ययविशेषनिमित्तत्वादभ्या-

---

उ.] **दीर्घोऽकितः** । ननु कृतेऽपि नुकि अन्तस्य दीर्घः स्यादत आह–**दीर्घश्रुत्येति** । अस्याऽलोन्त्यनिवृत्तौ ज्ञापकत्वमुपपादयति—**यद्यचेति** । **अन्तरङ्गत्वादिति** । वर्णाश्रयत्वेनेति भावः । न च तुकि कृतेऽपि हलादिः शेषेण तन्निवृत्तौ ह्रस्वः सुलभः । अभ्याससंज्ञाप्रवृत्तिकाले स्थानिद्वारा साक्षाद्वा सन्निहितानां हलामेव तेन निवृत्तेः, अत एव 'नुगत' इत्यादि चरितार्थमिति तात्पर्यम् । नन्वन्तरङ्गस्य तुको बहिरङ्गह्रस्वादीनाञ्च विप्रतिषेधोऽयुक्तोऽत आह–**नह्येतेष्विति** । **प्रत्ययविशेषनिमित्तत्वादिति** । तुग्विधावभ्यासस्यानाश्रयणेऽपि प्रकृतलक्ष्येऽभ्याससापेक्षत्वं तुकः । अत एव 'दध्यानये'त्यादौ यणः संयोगान्तलोपं प्रत्यसिद्धत्वं वार्तिककारेणाश्रितमिति भावः । तुकोऽन्तरङ्गत्वेन 'विप्रतिषेधात्सिद्ध'मित्ययुक्तम्, ह्रस्वादीना-

न्ताऽग्रहणाद्वा ॥*॥ **अथ वा नैवं विज्ञायते—अभ्यासस्याऽजन्तस्य ऋकारान्तस्याऽकारान्तस्येगन्तस्येति ॥ कथं तर्हि ? ॥ अभ्यासे योऽच्, अभ्यासे य ऋकारः, अभ्यासे योऽकारः, अभ्यासे य इगिति । एवं च कृत्वा दीर्घत्वं प्राप्नोति ॥ एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति ॥ किम् ? ॥ 'अपवादो नुग्दीर्घत्वस्ये'ति ॥ एवं तर्हि सिद्धे सति यदकित इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो 'भवत्येषा परिभाषा—अभ्यासविकारेषु बाधका न बाधन्त' इति ॥ किमेतस्य ज्ञापने प्रयोजनम् ?** ॥ 'ऐचोर्यङि दीर्घप्रसङ्गो ह्रस्वाद्धि परं दीर्घत्व''**मित्युक्तं स न दोषो भवति** ॥ [दीर्घोऽकितः] ॥

नुगतोऽनुनासिकान्तस्य ॥ ७।४।८५ ॥

॥*॥ नुकि यंयम्यते रंरम्यत इति रूपाऽसिद्धिः ॥*॥ **नुकि सति यंयम्यते**

प्र.]सस्य,अभ्यासाश्रयत्वात्तुग्घ्रस्वादीनाम् । **तदन्ताग्रहणाद्वेति** । ज्ञापकमन्तरेणापि विशेषणविशेष्यभावे कामचारात्कृतेऽपि तुक्येते विधयःसिध्यन्ति । **एवं च कृत्वेति** । ततश्चाऽकित इति वचनं दीर्घनिषेधाय, न तु ज्ञापनाय । **अपवादो नुगिति** । नाऽप्राप्ते दीर्घे नुक आरम्भात् । **एवं तर्हीति** । 'ओहाक् त्यागे'इत्यस्य निषेधायाऽकित इति न भवति, धातुर्ह्ययं किन्न त्वभ्यासः । ककारो हि 'हश्च व्रीहिकालयो'रित्यत्र हाङ्हाकोः सामान्यग्रहणार्थः । [**दीर्घोऽकितः**]

नुग । तपरकरणं भूतपूर्वस्याऽपि दीर्घस्य निवृत्त्यर्थं, तेन बाभाम्यत इति नुग्न भवति । **नुकि यंयम्यत इति** । अज्झल्परत्वादनुस्वारो न प्राप्नोति । **एवम-**

उ.]माङ्गत्वेन बहिरङ्गत्वादित्याशयेन 'तदन्ताग्रहणाद्वे'ति वार्तिकं। तद्याचष्टे—भाष्ये—**अथवेति** । अतएव 'चिच्छासति' 'चाच्छायते' इत्यादावन्तरङ्गत्वात्तुक्यभ्यासह्रस्वत्वेत्वदीर्घत्वसिद्धिः। ननु ज्ञापकेनाप्यस्यैवाऽर्थस्योक्तत्वात्पुनरुक्तमेतदत आह—**ज्ञापकमन्तरेणेति** । न्यायसिद्धेऽर्थे लिङ्गमनावश्यकमित्यर्थः । **नाप्राप्ते इति** । अपवादप्रवृत्तौ नोत्सर्गप्रवृत्तिस्तद्विषये इति भावः । नन्वेवं धातोः कित्करणं व्यर्थमत आह—**ककार इति** । अन्यथा तदनुबन्धकपरिभाषया ओहाङो न स्यादिति भावः । अत्र सूत्रेऽनुबन्धानुच्चारणादेतत्परिभाषाया विषयाऽभावेन 'वनो रचे'त्यत्रेव सामान्यग्रहणं ककारं विनाऽपि सूपपादमिति चिन्त्यम् । तस्मात् 'गः स्थकन्' 'प्रुसृल्वः' इति पूर्वोत्तरसाहचर्येण 'हश्चे'ति सूत्रेऽप्यन्ननुबन्धकस्यैव ग्रहणं स्यादिति हाकः कित्त्वमिति कैयटाशयः । ज्ञापकपरभाष्यप्रामाण्याद्वाधातोर्यङ्लुकावेव न स्तः । अन्यथा कित्त्वस्य चारितार्थ्येऽपि द्विःप्रयोगत्वाद्विर्वचनस्याभ्यासस्य कित्त्वमेवेति अकिद्ग्रहणचारितार्थ्यं **स्पष्टमेवेत्यपरे । अन्ये तु** न विद्यते किदस्मिन्निति बहुव्रीह्याश्रयणात्तत्र चाऽनन्तरस्येति न्यायेन प्रतिपदोक्तपरिभाषया चाऽभ्यासनिमित्तकित एव ग्रहणमिति न दोषः । अतएव 'चाच्छायत' इत्यादौ माधवाद्युदाहृतो दीर्घः सङ्गच्छते इत्याहुः । [**दीर्घोऽकितः**] ॥

रंरम्यत इति रूपं न सिध्यति ॥*॥ अनुस्वारागमवचनात्तु सिद्धम् ॥*॥ **[अनुस्वारागमवचनात्सिद्धमेतत्] । अनुस्वारागमो वक्तव्यः । एवमपीदमेव रूपं स्यात्— यँयम्यते, इदं न स्यात् यंयम्यते** ॥*॥ पदान्तवच्च ॥ * ॥ **पदान्तवच्चेति वक्तव्यम् । वा पदान्तस्येति** ॥ [नुगतोऽनुनासिकान्तस्य] ।

रीगृदुपधस्य च ॥ ७।४।९० ॥

॥*॥ रीगृत्वतः संयोगार्थम् ॥*॥ **'रीगृत्वत' इति वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ 'संयोगार्थम्' । संयोगान्ताः प्रयोजयन्ति । वरीवृश्च्यते परीपृच्छ्यते बरीभृज्ज्यते** ॥ [रीगृदुपधस्य च] ॥

रुग्रिकौ च लुकि ॥ ७।४।९१ ॥

॥*॥ मर्मृज्यते मर्मृज्यमानास इति चोपसङ्ख्यानम् ॥*॥ **मर्मृज्यते मर्मृज्यमानास इति चोपसङ्ख्यानं कर्तव्यम् । मर्मृज्यते मर्मृज्यमानासः** ॥

ऋतश्च ॥ ७।४।९२ ॥

किमिदमृकारग्रहणमङ्गविशेषणमृकारान्तस्याङ्गस्येति, आहो स्विदभ्यासविशेषणमृकारान्तस्याभ्यासस्येति ? ॥ 'अङ्गविशेषण'मित्याह ॥ कथं ज्ञायते ?॥ यदयं तपरकरणं करोति ॥ कथं कृत्वा ज्ञापकं ?॥ नहि कश्चिदभ्यासे दीर्घोऽस्ति यदर्थं तपरकरणं क्रियते ॥ अथाऽङ्गविशेषणे ऋकारग्रहणे सति तपरकरणे किं प्रयोजनम् ? ॥ इह मा भूत्—चाकर्ति चाकीर्तः चाकिरति ॥

॥*॥ किरतिं चर्करीताऽन्तं पचतीत्यत्र यो नयेत् ।
प्राप्तिज्ञं तमहं मन्ये प्रारब्धस्तेन सङ्ग्रहः ॥*॥

प्र.]**पीति** । नित्यं परसवर्णः प्राप्नोति, विकल्पेन चेष्यते । **पदान्तवच्चेति** । तेन 'वा पदान्तस्येति' परसवर्णविकल्पः । [**नुगतोऽनुनासिकासिकान्तस्य**] ।

रुग्रिकौ । मर्मृज्यत इति । 'रुग्रिकौ च लुकी'ति रुग्विधीयमानो न प्राप्नोतीति वचनम् । [**रुग्रिकौ च लुकि**] ।

ऋतश्च । अङ्गविशेषणमिति । यद्यप्यभ्यासविशेषणे भूतपूर्वदीर्घनिवृत्त्यर्थं तपरकरणं तथापि मुख्यकल्पनासंभवे गौणी कल्पना किमित्याश्रीयत इति मत्वा भाष्यकारेणाऽङ्गविशेषणमृत इत्याश्रितम् । पचतीति लट उपलक्षणं, तेन च लटि चाकर्तीत्यादि रूपाणि किरतिं यो नयेदित्यर्थः । **प्राप्तिज्ञमिति** । तपरकरणा-

---

उ.] **नुगतो । नित्यं परसवर्ण इति** । 'अनुस्वारस्य ययी'त्यनेन । भाष्ये पूर्वत्र परसवर्णघटित उत्तरत्रानुस्वारघटितः पाठः । [**नुगतोऽनासिकान्तस्य**] ॥

रीगृ । रीगृत्वत इति । अपूर्वमेवेदं न तु ऋदुपधस्येत्यस्य स्थाने, उत्तरार्थं तस्यावश्यकत्वात् । [रीगृत्वतः] ॥

सन्वल्लघुनि चङ्परेऽनग्लोपे ॥ ७।४।९६ ॥

इह कस्मान्न भवति—अजजागरत् ? ॥ लघुनि चङ्पर इत्युच्यते व्यवहितं चाऽत्र लघु चङ्परम् ॥ इहापि तर्हि न प्राप्नोति—अचीकरत् अजीहरत् ॥ वचनाद्भविष्यति ॥ इहापि वचनात्प्राप्नोति—अजजागरत् ॥ येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् ॥ केन च नाऽव्यवधानम् ? ॥ वर्णेन । एतेन पुनः सङ्घातेन व्यवधानं भवति न भवति च ॥ एवमपि अचिक्षणत्—अत्र न प्राप्नोति॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजातीयकानामित्त्वमिति यदयमत्स्मृदृत्वरप्रथम्रदस्तृस्पशामितीत्त्वबाधनार्थमत्त्वं शास्ति।

॥*॥ सन्वद्भावदीर्घत्वे णेर्णिच्युपसङ्ख्यानम् [णिचा व्यवहितत्वात्] ॥*॥ **सन्वद्भावदीर्घत्वे णेर्णिच्युपसङ्ख्यानं कर्तव्यम् । वादितवन्तं प्रयोजितवान् अवीवदद्वीणां परिवादकेन ॥ किं पुनः कारणं न सिध्यति ?॥ 'णिचा व्यवहितत्वात्' ॥ लोपे कृते नाऽस्ति व्यवधानम् ॥ स्थानिवद्भावाद्व्यवधानमेव ॥ प्रतिषिध्यतेऽत्र**

प्र.]दङ्गविशेषणमृत इति, तेन रुगादीनां विषयविभागेन या प्राप्तिस्तां जानातीत्यर्थः। **प्रारब्ध इति** । सङ्ग्रहणं सङ्ग्रहः—साधुशब्दराशिः, स तेन प्रारब्ध इति योग्यतातिशयोद्भावनेन स्तूयते । [**ऋतश्च**] ॥

सन्वल्ल। चङ्पर इति बहुव्रीहिणाऽन्यपदार्थो णिराश्रीयते, तेनाचकमतेति केवले चङि सन्वद्भावो न भवति। नहि णिव्यतिरेकेणाऽन्यश्चङ् परः संभवति, तेन चङ्परे णौ यल्लघु तस्मिन् परतोऽभ्यासस्य सन्वत्कार्यं भवति । **इह कस्मादिति** । न क्व चिदभ्यासो लघोरनन्तरः संभवतीति सत्सप्तमीविज्ञानादत्रापि प्रसङ्ग इति भावः । इतरः परसप्तम्याश्रये येन नाव्यवधानमित्याश्रीयते इति मत्वाह—**लघुनीति**। **एवंजातीयकानामिति** । संयोगव्यवहितानामित्यर्थः । **णिचा व्यवहितत्वादिति** । चङ्परे णौ यल्लघु तस्मिन् परतोऽभ्यासस्य सन्वद्भावः । यस्मिंश्चाऽत्र णौ लघु-

---

उ.] **ऋतश्च** । **नयेदिति** । प्रापयेदित्यर्थः । [**ऋतश्च**] ॥

सन्वल्लघुनि । अग्रिमभाष्योत्थानाय सोपपत्तिकं सूत्रार्थं दर्शयति—**चङ्पर इतीति** । परशब्दसामर्थ्याच्चङ्परो यस्मादिति बहुव्रीहिः । कर्मधारये हि 'चङी'त्येव वदेदिति भावः। भाष्यस्थ**चङ्पर**पदेष्वप्येवमेव। अन्यपदार्थश्च सामर्थ्याण्णिरेव। तदाह—**णिरिति** । लघ्वक्षरे त्वन्यपदार्थे बहुव्रीह्याश्रयणं, परशब्दश्च व्यर्थः स्यादिति भावः।एवञ्च 'चङ्परे लघुनी'ति वैयधिकरण्येन सम्बन्ध इत्याह—**तेनेति** । **सन्वदिति**। 'सन्यत' इत्यादियोगत्रयेण विहितमित्यर्थः । नन्वजजागरदित्यादावभ्यासस्य लघ्वक्षरपरत्वाऽभावात्कथमतिप्रसङ्गोऽत आह—**न क्वचिदिति**। **सत्सप्तमीति** । सामर्थ्यात्तस्मिन्नितिपरिभाषया अप्रवृत्तेरिति भावः । 'अपीपच'दित्यादावपि पका-

स्थानिवद्भावो 'दीर्घविधिं प्रति न स्थानिव'दिति ॥ एवमप्यनग्लोप इति प्रतिषेधः प्राप्नोति ॥ वृद्धौ कृतायां लोपस्तन्नाऽग्लोप्यङ्गं भवति ॥ एवं तर्हीदमिह संप्रधार्यं—वृद्धिः क्रियतां लोप इति, किमत्र कर्त्तव्यम् ?॥ परत्वाद्वृद्धिः ॥ नित्यो लोपः । कृतायामपि वृद्धौ प्राप्नोत्यकृतायामपि ॥ लोपोऽप्यनित्यः । अन्यस्य कृतायां वृद्धौ प्राप्नोत्यन्यस्याऽकृतायाम् । 'शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति।' उभयोरनित्ययोः परत्वाद्वृद्धिर्वृद्धौ कृतायां लोपस्तन्नाऽग्लोप्यङ्गं भवति ॥*॥ मीमादीनां तु लोपप्रसङ्गः ॥*॥ **मीमादीनां तु लोपः प्राप्नोति । अमीमपत्** ॥*॥ सिद्धं तु रूपातिदेशात् ॥*॥ **सिद्धमेतत् ॥ कथम् ? ॥ ['रूपातिदेशात्'] ॥ रूपातिदेशोऽयं—'सनि यादृशमभ्यासरूपं तत्सन्वद्भावेनाऽतिदिश्यते, न च मीमादीनां सन्यभ्यासरूपमस्ति** ॥*॥ अङ्गा-

---

प्र.]नासौ चङ्परः, यस्तु चङ्परो न तस्मिन् परतो लघु । **दीर्घविधिं प्रतीति** । ननु दीर्घे कर्तव्ये भवति स्थानिवत्त्वनिषेधः, सन्वद्भावे तु प्राप्नोति स्थानिवद्भावः । एवं तर्हि दीर्घभावित्वादिकारोऽप्युपचाराद्दीर्घशब्देनोच्यत इति भाष्यकारस्याभिप्रायः । किन्तु मुख्ये दीर्घे संभवति गौणग्रहणमयुक्तमिति चिन्त्यमेतत् । **वृद्धौ कृतायां लोप इति** । एतण्णौ चङीति सूत्रेभाष्येण विरुध्यते, तत्र त्वगिति प्रत्याहारग्रहणसामर्थ्यात्कृतायां वृद्धौ लोप इति प्रतिपादितम् । **मीमादीनां त्विति** । सनि यद्दृष्टमभ्यासकार्यं तदतिदिश्यते, मीमादीनां च सन्यभ्यासस्य लोपो दृष्ट इति सन्वद्भावात्प्राप्नोति । **सिद्धं त्विति** । नेह कार्यमतिदिश्यते अपि तु रूपं, लोपश्चाऽभावः, रूपं लोपो न भवतीति नाऽतिदिश्यते । किं चात्र लोपोभ्यासस्येति ।

उ.] रेण व्यवधानमिति तात्पर्यम् । भाष्ये **व्यवहितं चात्र लघु चङ्पर इति**। चङ्परे णौ यल्लघु तदभ्यासस्य व्यवहितमित्यर्थः । **चङ्परमिति** पाठेऽपि चङ्पदेन तत्परणिर्लक्ष्यत इति न दोषः। **अत्स्मृदृत्वरेति**। अत्र चङ्परे णाविति वर्तते, तद्दीत्वबाधनार्थम्, अन्यथा 'अचिक्षण'दित्यादाविव तत्रापि सन्वत्त्वाभावादित्त्वाऽप्राप्तौ तद्वैयर्थ्यं स्पष्टमेवेति बोध्यम् । नन्वव्यवहितणिचमादाय दीर्घोऽस्त्वत आह—**चङ्परे इति । सन्वद्भावे त्विति** । एवं चेत्त्वं न स्यादिति भावः । सन्वद्भावदीर्घत्वे इति विषयनिर्देशमध्ये दीर्घत्वरूपविषयनिर्देशप्रत्याख्यानपरतया भाष्यस्य युक्तत्वेन कैयटोक्तं चिन्त्यमेव चिन्त्यम् । **एतच्चेति** । ण्यन्ताण्णिविषय एव तत्र तदाश्रितं, ण्यल्लोपाविति पूर्वविप्रतिषेधसत्त्वाच्च, णिविषये वृद्धौ कृतायां लोप इत्याश्रयितुमशक्यमित्यपि बोध्यं। तस्मादुपसङ्ख्यानमेवाश्रयणीम् । **तन्नाऽग्लोप्यङ्गमिति**। तत्रेवात्राप्येकदेशिनो वाक्यं, तस्य तत्रत्यदूषणमपि सूचितमनेनेति बोध्यम् । **सनि यद्दृष्टमिति** । कार्यातिदेशाश्रयेण पूर्वः पक्ष इति भावः । **सन्वद्भावादिति** । सन्वद्भावाल्लोपः प्राप्नोतीत्यर्थः । कार्यातिदेशेऽपि स्वयं परिहरति—**किंचेति** । **तदभावेत्विति**।

न्यत्वाद्वा सिद्धम् ॥*॥ **अथ वा ण्यन्तमेतदङ्गमन्यत् ॥ लोपे कृते नाऽङ्गा-न्यत्वम् ॥ स्थानिवद्भावादङ्गमन्यत् ॥ कथमजिज्ञपत् ? ॥ अत्र सन्यपि ण्यन्तस्यैवोपादानमाज्ञप्य धामीदिति । अत्राऽङ्गान्यत्वाऽभावादभ्यासलोपः स्यात्। तस्मात्पूर्व एव परिहारः**'–'सिद्धं तु रूपातिदेशा''**दिति** ॥

॥*॥ **इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये** सप्तमाध्यायस्य

प्र.]अत्रग्रहणं विषयावधारणार्थं, तेनेसादिविषय एवाभ्यासस्य लोपो भवतीति, तद-भावे तु सन्वद्भावान्न भवति । **अङ्गान्यत्वादिति** । मीमादीनामङ्गानामभ्यासलोपो विहितः । अयं त्वभ्यासो ण्यन्तानामिति न लुप्यते । **अन्ये तु** व्याचक्षते–चङ्परे णौ यदङ्गं तदभ्यासस्य सन्वद्भावो विधीयते, णौ मीमादीन्येवाऽङ्गानि, युक्तस्तद्भक्त-त्वात्तद्ग्रहणेन ग्रहणात् । तस्मादङ्गाऽन्यत्वादित्यस्याऽयमर्थः,–येषामङ्गानामच इसा-दिर्विधीयते तदभ्यासस्याऽत्रग्रहणाद्विषयाधारणाल्लोपो नान्येषामिति इसादिरहि-तानाममीमपदित्यादौ च धातोः सन्वद्भावादिसाद्यभावादभ्यासलोपाऽभावः । अथ वा सकारादौ सन्यभ्यासलोपो विहितो न सन्मात्रे, सामान्यातिदेशे विशेषानतिदेशा-ल्लोपाऽभावः ॥ * * * * * * *

॥ * ॥ इत्युपाध्यायजैयटपुत्र**कैयटकृते महाभाष्यप्रदीपे सप्तमा**ध्यायस्य

उ.] धातोः सन्वद्भावाऽभावादिस्भावस्य सन्वद्भावेनाऽभावे त्वित्यर्थः । अन्ये तु सादौ सनि तद्विधानात्सामान्यातिदेशे विशेषानतिदेशेनोभयोरपि सन्वद्भावेनाऽभाव इत्याहुः । **मीमादीनामिति** । चङ्निरूपिताङ्गाऽभ्यासस्य ह्यनेन सन्वद्भावः। न च तदङ्गसंबन्ध्यभ्यासस्य लोपोऽत्रलोप इत्यनेनेति नानेन तदतिदेश इति भावः ।

अन्ये त्विति। 'चङ्परे णौ यल्लघु' इत्यर्थेऽपि 'अङ्गस्याभ्यास' इत्यत्राङ्गं किं निरूपितं ग्राह्यम् ? चङ्निरूपितं णिनिरूपितं वा ?। तत्रोपस्थितत्वात्प्राधान्याच्च णिनि-रूपितमेव गृह्यत इति तात्पर्यान्न पूर्वभाष्यविरोधोऽत्रेति बोध्यम् । एवञ्चोक्त-व्याख्याऽसङ्गतैवेत्याशयेनाह–**तस्मादिति । नान्येषामित्यस्य** व्याख्या–**इसादि-रहितानामिति** । इसाद्यभावे हेतुः–**धातोः सन्वद्भावाभावादिति** । मीमादीनां धातूनामच इसादयो विधीयन्ते, न च धातुकार्यं प्रति सन्वद्भावोऽस्ति, अभ्यास-कार्यविषयत्वात्तस्येत्यर्थः । **एतत्**–ण्यन्तमङ्गम्, अभ्यासलोपविषयादिसादि-विशिष्टादङ्गा**दन्यदिति** भाष्याक्षरार्थः । **सकारादाविति** । 'सः सी'त्यनुवर्तनादिति भाव । यद्यपि शाब्दे प्राधान्यं णेस्तथापि ण्यन्तप्रकृतिकतिङर्थद्योतकतया चङोऽ-प्यार्थं प्राधान्यमेवेति तन्निरूपिताङ्गसम्बन्ध्यभ्यासस्यैव सन्वत्त्वमिति पूर्वोक्तार्थमे-वाभिप्रेत्य शङ्कते भाष्ये–**लोपे कृत इति** । सिद्धान्त्येकदेशी आह—**स्थानिवद्भा-वादिति** । चोदक आह—**कथमजिज्ञपदिति**। अत्र ण्यन्ताङ्गाभ्यासस्यैव 'आप्ज्ञ-पीतीत्त्वविषयसनन्तसम्बन्धिनो लोप इति भावः। सिद्धान्त्येकदेश्याह–**तस्मादिति**॥

चतुर्थे पादे प्रथममाह्निकम् ॥ चतुर्थः पादश्च समाप्तः ॥*॥

॥ सप्तमोऽध्यायः समाप्तः ॥

प्र.] चतुर्थे पादे प्रथममाह्निकम् ॥*

❀ पादश्चतुर्थोऽध्यायश्च सप्तमः समाप्तः । ❀

उ.] इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते भाष्यप्रदीपोद्द्योते सप्तमाध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥

पादोऽद्ध्यायश्च समाप्तः ॥ ७।४।१ ॥

* श्रीगणेशाय नमः *

श्रीमद्भगवत्पतञ्जलिमुनिविरचितं-

उद्द्योतोद्भासितप्रदीपविराजितम् ।

तस्यायम्—

अष्टमोऽध्यायः

* तस्य प्रथमे पादे प्रथममाह्निकम् *

सर्वस्य द्वे ॥८।१।१॥

सर्ववचनं किमर्थम् ॥*॥ सर्ववचनमलोऽन्त्यनिवृत्त्यर्थम् ॥*॥ **सर्वग्रहणं क्रियते ॥ [किं प्रयोजनम् ?] ॥ 'अलोऽन्त्यनिवृत्त्यर्थम्' । 'अलोऽन्त्यस्य**

[प्रदीपः] सर्वस्य द्वे । सर्वशब्दो द्रव्यप्रकारावयवकात्स्न्यर्यवृत्तिः । द्रव्यकात्स्न्यें यथा—'सर्वस्वं ददाती'ति । प्रकारकात्स्न्यें यथा-'सर्वान्नं भक्षयती'ति। सर्वप्रकारमन्नं भुङ्क्ते इति गम्यते। अवयवकात्स्न्यें यथा—'सर्वः पटो दग्ध' इति । इह तु पर्यादीनां विशिष्टार्थानां कार्यित्वेनोपादानाद्द्रव्यप्रकारकात्स्न्यार्ऽसंभवादवयवकात्स्न्यर्वृत्तिः सर्वशब्दः । तस्योपादानमलोऽन्त्यनिवृत्त्यर्थं वा स्याद्द्विःप्रयोगनिवृत्तये स्थान-षष्ठ्यर्थं वा । तत्र वक्ष्यमाणैर्लिङ्गसामर्थ्यादिभिरलोऽन्त्यनिवृत्तिं षष्ठ्यर्थप्रकॢप्तिं च सिद्धां मत्वा, स्थाने द्विर्वचनस्य द्विःप्रयोगद्विर्वचनस्य च फलभेदमपश्यन् पृच्छति-**सर्ववचनमिति । अलोन्त्यनिवृत्त्यर्थमिति । ननु सर्वस्येत्यस्मिन्नसति स्थानषष्ठ्यभावादनुसंहाराऽभावः।स्थाने विज्ञातस्याऽनुसंहार इत्युक्तत्वात् । कथं** चान्त्यस्य द्विर्वचनं प्राप्नोति यावता अनेकाल्त्वात्सर्वादेशेन तेन भवितव्यम् ।

[उद्द्योतः] सर्वस्य द्वे । ननु 'सर्व'शब्दस्याऽलोन्त्यनिवृत्त्यर्थत्वात्प्रश्नानुपपत्तिरत आह—**सर्वशब्द इति । उपादानादिति ।** यत्रापि 'नित्यवीप्सयो'रित्यादौ न कश्चिद्विशेष उपादीयते, तत्रापि विशेषाऽनुपादानादेव सर्वेषां शब्दानां सिद्धमिति द्रव्य-प्रकारार्थाऽसम्भव इति भावः । **स्थानषष्ठ्यभावादिति ।** 'नित्यवीप्सयो'रित्यादाविति

विधयो भवन्ती'त्यन्त्यस्य द्विर्वचनं मा भूदिति ॥ क्व पुनरलोन्त्यनिवृत्त्यर्थेनाऽर्थः सर्वग्रहणेन ? ॥ 'नित्यवीप्सयो'रिति ॥ 'नित्यवीप्सयो'रित्युच्यते, न चाऽन्त्यस्य द्विर्वचनेन[1] नित्यता वीप्सा वा गम्यते ॥ इह तर्हि-'परेर्वर्जने' इत्यन्त्यस्याऽपि[2] द्विर्वचनेन[1] वर्ज्यमानता गम्येत । ॥*॥ षष्ठीनिर्देशार्थश्च[3] ॥*॥ षष्ठीनिर्देशार्थं च सर्वग्रहणं कर्तव्यं । षष्ठीनिर्देशो यथा प्रकल्पेत ॥*॥ अनिर्देशे हि षष्ठ्यर्थाऽप्रसिद्धिः[3] ॥ * ॥ अक्रियमाणे हि सर्वग्रहणे षष्ठ्यर्थस्याऽप्रसिद्धिः स्यात् ॥ कस्य ? ॥ स्थानेयोगत्वस्य ॥ क्व पुनरिह षष्ठीनिर्देशाऽर्थेनार्थः सर्वग्रहणेन यावता सर्वत्रैव षष्ठ्युच्चार्यते[4]-'परेर्वर्जने' 'प्रसमुपोदः

प्र.] उच्यते। 'परेर्वर्जने'इत्यादौ तावत् षष्ठी विद्यत एव। 'नित्यवीप्सयो'रित्यत्रापि सामर्थ्यलभ्या षष्ठी । यच्चोक्तम'नेकाल्त्वात्सर्वादेशो भविष्यती'ति, हलन्तेष्वेव तत्स्यात् । अजन्तेषु तु पर्यादिष्विकारादेरन्त्यस्य प्राप्नोति । ननु द्वाविकारौ सर्वस्य स्यातां, यथा डा-आ-डा इति प्रश्लेषनिर्देशात्सर्वादेशो डा भवति। उच्यते-द्वाविकारौ कृतैकादेशावादेशत्वं प्रतिपद्येते इत्येकाल्त्वादादेशोऽलोन्त्यस्य प्राप्नोति । डास्तु प्रश्लेषनिर्देशसामर्थ्याद्विगृहीतरूपः सर्वादेशत्वं प्रतिपद्य सवर्णदीर्घत्वं प्रतिपद्यते । क्व **पुनरिति** । नित्यादिरर्थोऽन्त्यद्विर्वचनेन न द्योतयितुं शक्यत इति भावः । **अन्त्यस्यापीति** । यथाऽन्तरेण द्विर्वचनं परिर्वर्जनार्थः प्रयुज्यते-'परि त्रिगर्तेभ्य' इति। अत एवोच्यते-'परेर्वर्जने वावचन'मिति। एवमन्त्यस्यापि द्विर्वचने परेर्वर्जनं प्रतीयेत। **षष्ठीनिर्देशार्थं चेति**। इष्टस्य षष्ठ्यर्थस्य प्रक्लृप्त्यर्थमित्यर्थः । **कस्येति**। 'नित्यवीप्सयोर्यः शब्दस्तस्य द्वे' इति सामर्थ्यात् षष्ठ्यर्थो लभ्यत इति भावः। इतरः शब्दमन्तरेणाऽऽनन्तर्यादिरपि संबन्धः सामर्थ्याद्विज्ञायेतेति मत्वाह-**स्थानेयोगत्वस्येति** । **क्व पुनरिति** ।

उ.] भावः।'परे'रित्यादौ स्थानषष्ठीसत्त्वादाह-**कथं वाऽन्त्यस्येति। सामर्थ्यलभ्येति।** नित्यवीप्सयोर्वर्त्तमानस्य पदस्य द्वित्वविधानादित्यर्थः । **हलन्तेष्विति** । तत्र हि-अन्त्यद्विर्वचनेऽपि आदेशस्याऽनेकाल्त्वेनाऽपवादविषयसत्त्वादलोऽन्त्याऽप्रवृत्तौ सर्वस्यैव भविष्यतीति भावः। यथा-'डा-आ' इति 'लुटः प्रथमस्ये'त्यत्र, यथा च 'युष्मदस्मद्भ्यां ङस' इत्यत्र शित्त्वप्रत्याख्यानाय 'अ-अ' इति प्रश्लेषेण सर्वाऽऽदेशत्वमुक्तं । '**द्वाविकारा**'वित्यादि पूर्वपक्ष्याशयवर्णनमात्रम् , षष्ठीनिर्देशस्य वक्ष्यमाणरीत्या सुलभत्वादाह-**इष्टस्येति। आनन्तर्यादिरपीति**। वस्तुतो 'द्वे उच्चारणे'इति उच्चारणक्रियानिरूपितं

पादपूरणे' 'उपर्यध्यधसः सामीप्ये' 'वाक्यादेरामन्त्रितस्ये'ति ॥

इह न का चित् षष्ठी–'नित्यवीप्सयो'रिति? ॥ ननु चैषैव षष्ठी ॥ नैषा षष्ठी ॥ किं तर्हि ? ॥ अर्थनिर्देश एषः–'नित्ये चाऽर्थे वीप्सायां चे'ति ॥

अलोऽन्त्यनिवृत्त्यर्थेन तावन्नार्थः सर्वग्रहणेन । इदं तावदयं प्रष्टव्यः— 'नित्यवीप्सयोर्द्वे भवत' इत्युच्यते, द्विशब्द आदेशः कस्मान्न भवति ? ॥ आचार्यप्रवृत्तिर्ज्ञापयति–'न द्विशब्द आदेशो भवती'ति–यदयं 'तस्य परमाम्रेडितम्' 'अनुदात्तं चे'त्याह ॥ कथं कृत्वा ज्ञापकम् ? ॥ द्विशब्दोऽयमेकाच् , तस्यैकाच्त्वात्तस्य परमाम्रेडितमनुदात्तं चेत्येतन्नास्ति । पश्यति त्वाचार्यो– 'न द्विशब्द आदेशो भवती'ति, ततस्तस्य परमाम्रेडितमनुदात्तं चेत्याह ॥

प्र.] षष्ठी सर्वत्र विद्यत इति भावः। ननु चैषैवेति । नित्यार्थवचनः शब्दो नित्यो, वीप्सार्थवचनश्च वीप्सेत्याश्रीयत इति भावः । अर्थनिर्देश इति । प्रयोक्तृधर्मो वीप्सा, यथा आबाधो, नत्वभिधेयधर्मः । यद्वक्ष्यते 'वीप्सुश्चेत्कर्त्ता भवती'ति । वीप्सायाश्चाऽर्थत्वे नित्यशब्दोऽप्यर्थवृत्तिरेव ग्राह्यो, द्वन्द्वनिर्देशाद्भिन्नविभक्तिकत्वाऽयोगात् । अलोऽन्त्यनिवृत्त्यर्थेनेति। ननु च नित्यवीप्सयोरित्यत्रार्थाश्रयणेन पूर्वमेवालोऽन्त्यविधिर्निवारितस्ततिकमर्थं 'नित्यवीप्सयो'रित्युपादीयते, परेर्वर्जन इत्यादि ह्युपादेयं । प्रकरणोपलक्षणार्थत्वात्सर्वेषु वा सूत्रेषु परिहारस्य तुल्यत्वाददोषः । कथं पुनर्द्विशब्द आदेशः संभाव्यते यावता 'ग्रामो ग्राम' इत्यस्मिन्नर्थे प्रतिपाद्ये द्विशब्दो न प्रवर्त्तते। पराभिप्रायेणैतदुच्यते, यथा भवान् सामर्थ्यादिन्यायत्यागेन शास्त्रसद्भावमात्रेणालोऽन्त्यविधिं मन्यते तथा 'स्वं रूपं शब्दस्ये'ति शास्त्रप्रामाण्याद्विशब्दःप्राप्नोति। न्यायाश्रये तु स्वरूपविधिवदलोऽन्त्यविधिर्न भविष्यति। आचार्यप्रवृत्तिरिति। न्यायसिद्धेऽर्थे लिङ्गदर्शनम्। नहि द्विशब्द आदेशो- ग्रामादिशब्दस्यार्थं वक्तुं समर्थ इति न प्रवर्तते । 'नाम्रेडितस्यान्त्यस्य तु वा'

उ.] कर्मत्वमेव प्रतीयेतेति बोध्यम् । ननु नित्यादिशब्दयोरर्थपरत्वादेषैव षष्ठीत्यनुपपन्नमत आह–नित्यार्थेति । भिन्नविभक्तिकत्वेति । वीप्सांशे विषयसप्तमी, नित्यांशे षष्ठीत्येवमित्यर्थः। ननु चेति । 'नित्यवीप्सयोरर्थयोर्द्वे भवत'इत्यर्थे स्थानषष्ठ्यभावादलोऽन्त्यस्याऽप्रसङ्ग इति भावः । परिहरति–प्रकरणेति । परिहारस्येति। वक्ष्यमाणस्येत्यर्थः। इत्यस्मिन्नर्थे इति । एवंरूपैः शब्दैर्हि वीप्साप्रत्ययो न तु 'द्वि'शब्देनेति भावः । सामर्थ्यादिन्यायेति । आदिना ज्ञापकसङ्ग्रहः । 'सर्वस्ये'त्यस्य सर्वशब्दस्येत्यर्थवारणाय

यदि तर्हि न द्विशब्द आदेशो भवति के तर्हीदानीं द्वे भवतः ? ॥ द्विशब्देन यदुच्यते ॥ किं पुनस्तत् ?॥ द्विशब्दोऽयं सङ्ख्यापदं, सङ्ख्यायाश्च सङ्ख्येयमर्थः । सङ्ख्येये द्वे भविष्यतः ॥ के पुनस्ते ? ॥ पदे वाक्ये मात्रे (वा) ॥

तद्यदा तावत्पदे वाक्ये वा तदाऽनेकाल्त्वात्सर्वादेशः सिद्धः । यदा तावन्मात्रे अपि तदा 'ऽनेकाल्शित्सर्वस्ये'ति सर्वादेशो भविष्यति ॥

यदा तर्ह्यर्द्धमात्रे तदा सर्वादेशो न सिध्यति ॥ नैष दोषः । [तदापि सिद्धः] । न चार्द्धमात्रे द्विरुच्येते ॥ किं कारणम् ?॥ इह व्याकरणे यत्सर्वाऽल्पीयान् स्वरव्यवहारः स मात्रया भवति । नाऽर्द्धमात्रया व्यवहारोऽस्ति, तेनाऽर्द्धमात्रे न भविष्यतः ॥ एवमपि कुत एतत्–'पदे द्वे भविष्यत'इति, न पुनर्वाक्ये स्यातां मात्रे वा ? ॥ 'नित्यवीप्सयोर्द्वे भवत' इत्युच्यते न च वाक्यद्विर्वचनेन मात्राद्विर्वचनेन वा नित्यता वीप्सा वा गम्यते ॥

प्र.] 'नित्यमाम्रेडिते डाची'त्येतदपि लिङ्गं द्रष्टव्यम्। **यदि तर्हीति** पृष्टे **द्विशब्देन** यदुच्यतइत्युत्तरे उक्तेऽपि सामान्याभिधानाद्विशेषो दुर्ज्ञान इति पृच्छति–**किं पुनस्तदिति** । **सङ्ख्येयमर्थ इति** । अभिधेयमित्यर्थः । यदुच्यते–'आदशभ्यः सङ्ख्याः सङ्ख्येये वर्त्तन्ते तत उत्तरं सङ्ख्याने सङ्ख्येये चे'ति। **पदे इति** । शब्दानुशासनप्रस्तावाच्छब्दप्रकारोपन्यासः । **यदा तावन्मात्रे इति** । यदुक्तं–'द्वाविकारौ कृतैकादेशावेकालादेशोऽन्त्यस्य प्राप्नोती'ति, तदयुक्तं,न ह्यप्रवृत्तयोरेकादेशशास्त्रप्रवृत्तिरस्ति, प्रवृत्तिकाले चाऽनेकाल्त्वात्सर्वादेशत्वमिति नास्त्यलोऽन्त्यविधिः । **यदा तर्हीति** । परिशब्देकारस्य द्वे अर्धमात्रे अल्ग्रहणेनाऽर्द्धमात्राया अग्रहादनेकाल्त्वाऽभावात्प्राप्नुतः । **इहेति** । विशिष्टमर्द्धमात्राद्वयमुच्चारणाऽयोगादशक्य आदेशः कर्त्तुम् । 'तस्यादित उदात्तमर्द्धह्रस्व'मित्यनेन तु ह्रस्वादिवर्णस्थाया अर्द्धमात्राया गुणाख्यानं क्रियते। **न च वाक्यद्विर्वचने इति।**

उ.] ज्ञापकान्तरमाह-**नाम्रेडितस्यान्त्यस्येति**। भाष्ये-**सङ्ख्यापदं**–सङ्ख्याप्रवृत्तिनिमित्तकं पदम् । **सङ्ख्यायाश्चेति** । तत्प्रवृत्तिनिमित्तकपदस्येत्यर्थः। **अत उत्तरं**–दशभ्यः उत्तरं । विंशत्यादय इत्यर्थः । ननु सङ्ख्येयस्याऽनन्तत्वात्पदादीनामेवोपन्यासोऽयुक्तोऽत आह–**शब्दानुशासनेति** । **प्रकारो**–भेदः । भाष्ये–**अपि तदेति**। तदापीत्यर्थः । अत्र 'मात्रा'-शब्दो वर्णोपलक्षणम् । **प्राप्नुत इति**। 'अन्तस्ये'तिशेषः । भाष्ये–**व्याकरणे यत्सर्वेति** । 'य'दिति सामान्ये नपुंसकम् । 'य' इति वा पाठः । **गुणाऽऽख्यानं क्रियत इति** । न तु

षष्ठीनिर्देशार्थमेव तर्हि सर्वग्रहणं कर्त्तव्यम् ॥

॥*॥ न वा पदाधिकारात् ॥*॥ न वा वक्तव्यम् ॥ किं कारणम् ? ॥ 'पदाधिकारात्' । पदस्ये'ति प्रकृत्य द्विर्वचनं वक्ष्यामि ॥*॥ तच्च समासतद्धितवाक्यनिवृत्त्यर्थम् ॥*॥ तच्चावश्यं पदग्रहणं कर्त्तव्यं ॥ [किं कारणं ?॥ 'समासतद्धितवाक्यनिवृत्त्यर्थम्'] । समासनिवृत्त्यर्थं तद्धितनिवृत्त्यर्थं वाक्यनिवृत्त्यर्थञ्च ॥ समासनिवृत्त्यर्थं तावत्–सप्तपर्णः । अष्टापदम् । तद्धितनिवृत्त्यर्थं–द्विपदिका त्रिपदिका । माषशः कार्षापणशः । वाक्यनिवृत्त्यर्थं–ग्रामे ग्रामे पानीयम् । माषं माषं देहि [इति] ॥

अथ क्रियमाणेऽपि वै पदग्रहणे 'समासनिवृत्त्यर्थ'मिति कथमिदं

प्र.]नित्यत्वाद्यर्थप्रतिपादनाय तत्प्रतिपादनसमर्थः शब्दः प्रयुज्यते, 'स्थानेऽन्तरतम' इत्युपस्थानाच्च शब्दतोऽर्थतश्चान्तरतमे एव द्वे पदे आदेशौ भवतः । 'परेर्वर्जने' इत्यादौ तु पर्यादिशब्दसंनिधानाद्धिशब्दः पर्यादीनेव सङ्ख्येयानाचष्ट इति वाक्ये मात्रे पदे अपि ये के चिन्न प्रवर्तेते । न वेति । शब्दान्तरं षष्ठ्यन्तमुपादेयम् , को विशेष इति चेदाह–तच्चेति । सप्तपर्ण इति । सप्तसङ्ख्यानि पर्णानि वीप्स्यन्ते न तु तद्वान् वृक्ष इति वीप्सायामेकत्वस्याऽनन्तर्भावात्प्रागेव विभक्तेर्द्विवचनं प्राप्नोति–सप्तपर्णसप्तपर्ण इति । पदाधिकारात्तु न भवति । द्विपदिकेति । द्वित्वसङ्ख्यायुक्तः पादार्थो वीप्स्यते इति वीप्सायां स्त्रीत्वैकत्वलक्षणयोर्लिङ्गसङ्ख्ययोरनन्तर्भावात् प्राक्तद्धितोत्पत्तेः समासे कृते पदत्वाऽभावाद्द्विर्वचनाऽभावः । ग्रामे ग्रामे पानीयमिति । वाक्यस्याऽपदत्वाद्द्विर्वचनाऽभावः । अथेति । 'सप्त-

उ.](सा)पृथगुच्चारणविषयेति भावः। ननु यत्किञ्चित्पदद्वयमेवाऽऽदेशः स्यादत आह–अन्तरतमे एव द्वे पदे इति । द्विपदे एव, न तु वाक्ये । तादृशार्थबोधनाऽसामर्थ्येनानन्तरतमत्वादिति भावः । नित्यवीप्सयोर्यः शब्दस्तस्येति षष्ठीं स्थानषष्ठीं मन्यते । पर्यादीनेवेति । प्रत्यासत्त्येति भावः । ये केचिदिति । 'पदे अपी'त्यनेन सम्बध्यते । को विशेष इति । षष्ठ्यन्तशब्दान्तरोपादाने किमेतद्दूषणेनेत्यर्थः । एकत्वस्यानन्तर्भावादिति । वीप्साविषयव्याप्तिबोधसमये वृक्षगतैकत्वस्याऽननुभवाद्विभक्त्युत्पत्तेः प्रागेव द्वित्वमित्यर्थः । पृथगेव विभक्तेरिति । विभक्तेः पृथग्भूतस्य । विभक्तिरहितस्येत्यर्थः । 'प्रागेव विभक्ते'रिति तु युक्तः पाठः । पदाऽधिकारे तु 'सप्तपर्ण' इति पदवाच्यस्य वीप्सायोगाऽभावान्न दोषः । पादार्थ इति । पादशब्दार्थ इत्यर्थः । पदत्वाभावादिति । अत्यन्तस्वार्थिकत्वात्सुबुत्पत्तेः पूर्वमेवाऽयं तद्धित इति भावः । भाष्ये–'द्विपदिका' 'त्रिपदिके'त्युत्तरं–'माषशः कार्षापणशः' इत्यपाठः । पदग्रहणेनाऽपि तत्र तन्निवृत्तेरशक्यत्वात्, शसन्तस्यापि पदत्वात्

विज्ञायते–समासस्य निवृत्त्यर्थं समासनिवृत्त्यर्थमाहो स्वित्समासे निवृत्त्यर्थं समासनिवृत्त्यर्थमिति ?॥ किं चातः ? ॥ यदि विज्ञायते समासस्य निवृत्त्यर्थं समासनिवृत्त्यर्थमिति, सिद्धं–सप्तपर्णः सप्तपर्णौ सप्तपर्णा इति। सप्तपर्णाभ्यां सप्तपर्णेभ्य इत्यत्र प्राप्नोति। अथ विज्ञायते–समासे निवृत्त्यर्थं समासनिवृत्त्यर्थमिति,–सप्तपर्णः सप्तपर्णौ सप्तपर्णा इत्यत्रापि प्राप्नोति ॥

तथा–'तद्धितनिवृत्त्यर्थ'मिति,–कथमिदं विज्ञायते–तद्धितस्य निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति, आहो स्वित्तद्धिते निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति ?॥ किं चातः ? ॥ यदि विज्ञायते तद्धितस्य निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति, सिद्धं द्विपदिका त्रिपदिका [इति], द्विपदिकाभ्यां त्रिपदिकाभ्यां माषशः

प्र.] पर्ण'इत्यत्र किं सङ्ख्याया वीप्सा, अथ पर्णानाम्, अथ सङ्ख्याविशिष्टानां पर्णानाम् ?।तत्र यदि समुदायो वीप्स्यते तदा समुदायस्य प्राप्तं द्विर्वचनं पदाधिकारेण निवर्त्यते। अथ त्ववयवार्थवीप्सा तदाऽवयवस्य प्राप्तं द्विर्वचनमिति समासे विद्यमानस्य निवृत्त्यर्थमित्यर्थः संपद्यते। एवं वाक्यतद्धितयोर्योज्यम्।

यदि विज्ञायते इति। यदा 'समुदायो वीप्सायुक्त' इति पक्षः। **सिद्धं सप्तपर्ण इति।** विभक्तौ परतः समासस्याऽपदत्वात्। **सप्तपर्णाभ्यामिति।** स्वादिषु पूर्वस्य पदत्वाद्द्विर्वचनप्रसङ्गः। **अथेति।** यदाऽवयवार्थवीप्सा तदा समासे प्रत्ययलक्षणेनाऽवयवस्य पदत्वाद्द्विर्वचनप्रसङ्गः। उत्तरपदस्य तूत्तरपदत्वे चाऽपदादिविधाविति प्रत्ययलक्षणप्रतिषेधात्पदत्वाऽभावः। **सिद्धं द्विपदिकेति।** हल्ङ्यादिलोपे तद्धितान्तस्य पदत्वा'द्विपदिका'इति बहुवचनान्तं पठितव्यम्। **द्विपदिकाभ्यामिति।** एकादेशस्याऽन्तवद्भावात्तद्धितान्तं, 'स्वादिष्वि'ति पदं च।

उ.] तत्पूर्वभागस्यापि सुबन्ताच्छस उत्पत्त्या पदत्वात्। **वाक्यस्येति।** अन्यथा'ग्रामे पानीयं ग्रामे पानीय'मिति स्यादिति भावः। 'किं सङ्ख्याया वीप्सा अथ पर्णाना' मित्यन्तेनावयवार्थवीप्सापक्षो दर्शितः। समुदायवीप्सापक्षमाह–**अथवेति।** तत्रान्त्ये षष्ठीसमासोत्थितिरित्याह–**तत्र यदीति।** आद्ययोः सप्तमीसमास इत्याह—**अथ त्विति। समासे निवृत्त्यर्थमिति।** समासे विद्यमानस्य निवृत्त्यर्थमित्यर्थः। **तद्धितयोरिति।** तद्धितपदं तद्धितान्तपरं बोध्यम्। **प्रत्ययलक्षणेनेति।** 'अन्तरङ्गानपी'ति न्यायेन सर्वतः पूर्वं सुब्लुक्प्रवृत्तेरिति भावः। **अवयवस्य पदत्वादिति।** पूर्वपदस्येत्यर्थः। **पदत्वाभाव इति।** परे तु–'अपदादिविधा'वित्यस्य तद्भिन्नपदान्तविधावित्यर्थादत्र न तत्प्राप्तिः। अन्यथा वर्णवीप्सापक्षे दोषानुद्भावनेन भाष्यस्य न्यूनता स्यादित्याहुः। भाष्ये–**त्रिपदिका इत्य-**

कार्षापणश इत्यत्र प्राप्नोति ॥ अथ विज्ञायते—तद्धिते निवृत्त्यर्थं तद्धितनिवृत्त्यर्थमिति, द्विपदिका(:)त्रिपदिका इत्यत्रापि प्राप्नोति ॥

तथा 'वाक्यनिवृत्त्यर्थ'मिति कथमिदं विज्ञायते वाक्यस्य निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति । आहो स्विद्वाक्ये निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति ? ॥

किं चातः ?॥ यदि विज्ञायते—वाक्यस्य निवृत्त्यर्थं वाक्यनिवृत्त्यर्थमिति,—यदि वाक्यं वीप्सायुक्तं; भवितव्यमेव द्विर्वचनेन । अथाऽप्यवयवः,—भवत्येव । तदेतत्क्रियमाणेऽपि पदग्रहणे आलूनविशीर्णं भवति, किं चित्सङ्गृहीतं किं चिदङ्गृहीतं [च] । ॥*॥ सगतिग्रहणं च ॥*॥ सगतिग्रहणञ्च कर्त्तव्यम् । प्रपचति—प्रपचति, प्रकरोति—प्रकरोतीति ॥

किं पुनः कारणं न सिध्यति ? ॥ न हि सगतिकं पदं भवति ॥

समासनिवृत्त्यर्थेन तावन्नार्थः पदग्रहणेन । समासेनोक्तत्वाद्वीप्साया द्विर्वचनं न भविष्यति ॥ किं च भोः 'समासो वीप्साया'मित्युच्यते ? ॥

प्र.] माषश इति । प्रत्ययलक्षणेन सुबन्तं, तद्धितान्तं च । वाक्यं वीप्सायुक्तमिति । वाक्यार्थस्य वीप्सायोगा(ऽभावा)द्वीप्साग्रहणं द्विर्वचननिमित्तोपलक्षणं, तेन 'प्रपचति-प्रपचती'ति नित्यतायां वाक्यस्य द्विर्वचनं भवत्येव । अथेति । यदा ग्रामार्थस्य वीप्सा तदा 'ग्रामे ग्रामे पानीय'मिति भवति । यदा पानीयस्य तदा 'ग्रामे पानीयं पानीयं स्वा'द्विति भवति । तदेतदिति । अतिव्याप्तिर्न कथंचित्परिहर्तुं शक्यते । सगतिग्रहणं चेति । पदाधिकारे क्रियमाणे सगतिग्रहणमधिकं कर्तव्यम् । भाष्यकारः पदाधिकारेण विनापि समासादिनिवृत्तिप्रतिपादनायाह—समासेनेति । 'सप्तपर्ण'इति रूढिशब्दः परिगृहीतावयवार्थविशेषो वृक्षविशेषे वर्तत इत्यर्थः । किं च भो इति । ननु न वचनादर्थं शब्दः प्रत्याययति

उ.] त्रापीति । अपिना 'द्विपदिकाभ्यां' 'माषशः इत्यादौ च दोषः । वीप्साऽयोगादिति । वीप्सयाऽयोगादित्यर्थः । वाक्यस्य—पदसमुदायस्य । वीप्सायुक्तमिति भाष्यस्य वीप्सापदघटितसूत्रोपात्तार्थयुक्तमित्यर्थ इति भावः । भाष्ये—अथाऽप्यवयव इत्यादिसप्तमीसमासदूषणम् । एतत्प्रयोजनवचनम्—आलूनविशीर्णं । तद्व्याचष्टे—किञ्चिदिति । किञ्चिदसङ्गृहीतमिति । किञ्चिद्व्यावर्त्यं न व्यावर्तितमित्यर्थस्तदाह—अतिव्याप्तिर्न कथंचिदिति । वाक्यविषये चाऽव्याप्तिवारणाय वचनान्तरमावश्यकमित्याह भाष्ये—सगतीति । तद्व्याचष्टे—पदाधिकारे इति । परिगृहीतावयवार्थेति । अनेन योगरूढोऽयमिति ध्वनि-

न खलु वीप्सायामित्युच्यते गम्यते तु सोऽर्थः ॥ ततः किम्[1] ? ॥ उक्तः[2] समासेनेति कृत्वा द्विर्वचनं न भविष्यति । यत्र च[3] समासेनाऽनुक्ता वीप्सा-भवति तत्र द्विर्वचनम् । तद्यथा—एकैकविचिताः अन्योन्यसहाया इति ।

अथ वा यदत्र वीप्सायुक्तं नाऽदः प्रयुज्यते ॥ किं पुनस्तत् ? ॥ पर्वणि पर्वणि सप्त पर्णान्यस्य, पङ्क्तौ पङ्क्तावष्टौ पदान्यस्येति ॥

तद्धितनिवृत्त्यर्थेन चाऽपि नार्थः पदग्रहणेन । तद्धितेनोक्तत्वाद्वीप्साया द्विर्वचनं न भविष्यति । तद्धितः खल्वपि 'वीप्साया'मित्युच्यते । यत्र च तद्धि-तेनाऽनुक्ता वीप्सा भवति तत्र द्विर्वचनम् । तद्यथा—एकैकशो ददातीति ॥

प्र.] किन्तर्हि, स्वसामर्थ्यात् । एवं मन्यते-वाक्ये द्विर्वचनेन वीप्सा व्यज्यते-'सप्त सप्त पर्णान्यस्ये'ति, एवं समासेऽपि वीप्साप्रतिपादनाय द्विर्वचनस्य प्रसङ्गात् प्रतिषेधो विधेयो—'नित्यवीप्सयोरसमासे' इति । यथा वक्ष्यते—'परेरसमासे' इति । **न खल्विति** । रूढिशब्दत्वादस्याक्षिप्तवीप्सोऽवयवार्थः । यथा 'त्रिदशा' इत्यादा-वाक्षिप्तसुजर्थः । अन्ये हि वाक्यधर्मा अन्ये वृत्तिधर्माः । **ततः समासेनोक्तत्वा-दि**त्यस्यायमर्थः—समासेनाभिव्यक्तत्वादिति । **यत्र चेति** । यो न रूढिशब्दः । **एकैक-विचिता इति** । एकैकेन विचिताः । **अन्योन्यसहाया इति** । अन्योन्यस्य सहाया इत्यर्थः । अत्र कर्मव्यतिहारो द्विर्वचनद्योत्यः । **अथ वेति** । न चाऽप्रयुज्यमानस्य द्विर्वचनसंभवः, गतार्थत्वाच्च पर्वादिशब्दस्याऽप्रयोगो, रूढिशब्दत्वाच्च गतार्थत्वम् । **तद्धितेनेति** । तद्धितस्य स्वार्थिकत्वादभिव्यक्तिरेवोक्तिरवसेया । **एकैकश इति** । केचिदाहुः—अल्पार्थोऽप्येकशब्दोऽस्ति तस्य वीप्सायां द्विवचने कृते 'बह्वल्पार्था'-

उ.] तम् । **ननु चेति** । तथा हि सति समर्थसूत्रस्थभाष्यविरोध इत्यर्थः । **प्रतिषेधो विधेय इति** । सप्तपदस्य पदत्वसत्त्वात्पदस्येत्यनेन वारणमिति भावः । **रूढीति** । अनेनाऽवय-वानां वीप्साविशिष्टस्वार्थबोधकत्वे निमित्तं दर्शितम् । नन्वेवं वाक्येऽपि द्विर्वचनं न स्यादत आह—**अन्ये हीति** । वृत्तिविषयाणामेवाऽयं स्वभाव इति भावः । नन्वेवमवयवेनोक्तावपि समासेनोक्तत्वादित्यसङ्गतमत आह—**अभिव्यक्तत्वादिति** । अवयवद्वारेत्यर्थः । **'वीप्सो-क्त'**त्यस्य व्यापकत्वमुक्तमित्यर्थः । **कर्मव्यतिहार इति** । भाष्यस्थवीप्सापदमुपलक्षणमिति भावः । ननु यदि पर्वाद्यर्थो वीप्सापन्नोऽवगम्यते तर्हि तत्प्रयोगोऽपि स्यादत आह—**गतार्थ-त्वाच्चेति** । पर्वपर्वाधिकरणकसप्तपर्णसम्बन्धिनि विशिष्टे शक्त्यङ्गीकारादिति भावस्तदाह—**रूढिशब्दत्वाच्चेति** । भाष्ये—**तद्धितेनोक्तत्वादिति** । न च 'नित्यवीप्सयो'रित्यस्य 'येन नाप्राप्ति'न्यायेन शसा बाधात्कथमत्र द्विर्वचनप्राप्तिरिति वाच्यं, शसन्तस्य प्राप्तेः । शस्प्र-

वाक्यनिवृत्त्यर्थेन चाऽपि नार्थः पदग्रहणेन। पदद्विर्वचनेनोक्तत्वाद्वीप्साया वाक्यद्विर्वचनं न भविष्यति। यत्र च पदद्विर्वचनेनाऽनुक्ता वीप्सा भवति तत्र द्विर्वचनम्। तद्यथा—प्रपचति—प्रपचति, प्रकरोति—प्रकरोतीति ॥

[॥*॥ उत्तरार्थन्तु ॥*॥] उत्तरार्थं तर्हि पदग्रहणं कर्त्तव्यम्। 'तस्य परमाम्रेडितम्' 'अनुदात्तं चे'ति वक्ष्यति[3]। तत्पदद्विर्वचने[4] यथा स्या-

---

प्र.] दिति शस्प्रत्ययः। अन्ये त्वाहुः—एकैकमेकैस्मै ददातीति कर्मसंप्रदानवीप्साद्वय-प्रतिपादनाय शस्द्विर्वचने भवत इति, तदयुक्तम्, एकेन पदेन युगपत्कारकद्वयस्याऽभिधानाऽसंभवात्। पदद्विर्वचनेनोक्तत्वादिति। आधारवीप्सयाऽऽधेयवीप्साया आक्षेपादाधेयवाचिपदद्विर्वचनाऽभावः। **यत्र चेति।** अडादिव्यवस्थार्थं धातूपसर्गयोः पृथक्कल्पनेति। परमार्थतः समुदायस्य क्रियाविशेषवाचित्वान्नित्यता-

---

उ.] कृतिप्राप्तद्विर्वचनाऽपवादत्वेऽपि शसन्ते तदपवादत्वाऽभावात्। **कचिदाहुः—अल्पार्थोऽर्पाति।** अत्राऽरुचिबीजन्तु तस्याऽल्पार्थत्वे न मानं। 'ष्णान्ता षट्' 'बहुषु' 'एकादाकिनिजि'त्यादि सूत्रेषु सङ्ख्याऽसहायान्यार्थस्यैवैकशब्दस्य भाष्य उक्तेः। 'एको गोत्र' इति सूत्रशेषे च भाष्ये लक्षणया प्रथमार्थकोऽप्युक्तः। एवञ्च प्रधानसमानसाधारणाऽल्पार्थत्वे न मानं, समानसाधारणार्थौ सङ्ख्यापदैकशब्दप्रयोगेणैव फलितौ भवतः। किञ्चाऽल्पार्थकतत्सत्त्वेऽपि तदर्थत्वेनैकशब्दस्य प्रसिद्ध्यभावा'द्बह्वल्पार्था'दिति सूत्रे न तद्ग्रहणं। किञ्च सङ्ख्याशब्दातिरिक्तशब्दार्थानां परिगृहीतैकत्वानामेव वीप्सासत्त्वेन ततो द्वित्वाऽपवादः शसेव प्राप्नोति। किञ्चाऽल्पत्वस्य परिमाणविशेषताया 'अल्पे' इति सूत्रभाष्यकैयटयोरुक्तत्वेन प्रस्थाद्यर्थानामिव परिगृहीतैकत्वस्यैव वीप्सेति भाष्याऽसङ्गतिः। न चैकं बहुव्रीहिवदिति तत्र द्वित्वम्, न च तस्य शसपवादो नाऽप्राप्त्यभावादिति वाच्यम्, एकपदेन शास्त्रे प्रसिद्धतरतया सङ्ख्यावाचकस्यैव ग्रहणेनाऽत्र तदप्राप्तेः। स्पष्टञ्चेदमाकिनिज्विधायके भाष्ये। किञ्च तेन वीप्सायां कृतद्वित्वैकशब्दाऽनुवादेन बहुव्रीहिवद्भावस्यैव विधिः। अत एवैकश इत्यस्य सिद्धिः। तस्मादयमत्र भाष्यार्थः—'सङ्ख्यैकवचनाच्चे'त्यत्र चस्य 'वीप्साया'मित्यनेन सम्बन्धाद्वीप्सायां स्वार्थे च शसित्यर्थः। तत्र स्वार्थिकोऽभिधानस्वाभाव्यादेकशब्दात्कृतद्विर्वचनैकैकशब्दाच्च। तेन नातिप्रसङ्गः। एवञ्चैकशब्दप्रकृतिकशसः स्वार्थिकत्वस्यापि सत्त्वेन न ततो नियमेन वीप्सोक्तिरिति, तत्र वीप्साशसभावपक्षे द्विर्वचने कृते ततः स्वार्थिकः शसिति। अत्र चेदं भाष्यमेव मानम्। एकश इत्येतत्स्वार्थिकशसन्तं, वीप्सार्थकशसन्तं वेत्यत्र शास्त्रे व्याख्यानं लोके प्रकरणादिकं नियामकं बोध्यम्। **तद्धितः खल्व**पीत्यनेन समासतो वैषम्यमुक्तं। **युगपदिति।** 'विप्रतिषेधविषयविभक्ति विने'त्यादिः। **आधारवीप्सयेति।** 'ग्रामे ग्रामे पानीय'मित्यादौ। अनेनैव न्यायेन यत्तच्छब्दयोः प्रयोगे उभयत्र वीप्सां नेच्छन्ति।

द्वाक्यद्विर्वचने माभूत्—मह्यं ग्रहीष्यति—मह्यंग्रहीष्यति, मामभिव्याहरिष्यति—मामभिव्याहरिष्य[ती]ति ॥

कथं चाऽत्र द्विर्वचनम् ? ॥ छान्दसत्वात् ॥

स्वरोऽपि तर्हि च्छान्दसत्वादेव न भविष्यति ॥ उत्तरार्थमेव तर्हि पदग्रहणं कर्त्तव्यं,'पदस्य पदा'दिति वक्ष्यति,तत्पदग्रहणं न कर्त्तव्यं भवति॥

सर्वग्रहणमपि तर्ह्युत्तरार्थम् । 'अनुदात्तं सर्वमपादादा'विति वक्ष्यति तत्सर्वग्रहणं न कर्तव्यं भवति ॥ उभयं क्रियते तत्रैव ॥

इहार्थमेव तर्हि षष्ठीनिर्देशार्थमन्यतरत्कर्त्तव्यं, षष्ठीनिर्दिष्टस्य स्थाने

प्र.] प्रतिपादनाय पदसमुदायस्य द्विर्वचनमित्यर्थः । वीप्सयाऽत्र नित्यत्वं लक्ष्यते ।

मह्यमिति । 'आबाधे चे'ति द्विर्वचनमित्याहुः । **कथमिति** । आबाधस्याऽसंप्रत्ययादर्थान्तरस्य च द्विर्वचननिमित्तस्याऽभावाद्द्विर्वचनाऽप्रसङ्गः । **स्वरोऽपीति** । अनुदात्तत्वाऽभावे प्रकृतिस्वरो भवति । **उत्तरार्थमिति** । 'सर्वस्ये'त्यपनीय 'पदस्ये'ति क्रियमाणे मण्डूकप्लुतिन्यायेन द्विर्वचनप्रकरणमुल्लङ्घ्योत्तरत्रोपतिष्ठते । **इहार्थमेवेति** । ननु सामीप्यादिसंबन्धप्रतीतिनिवारणमप्यन्यतरोपादानस्य प्रयोजनं कस्मान्न भवति ? । उच्यते । 'नित्यवीप्सयो'रित्यर्थनिर्देशेन शब्दस्याक्षेपात्—'नित्यवीप्सयोर्यो वर्तते शब्दस्तस्य द्वे भवत'इति प्रक्रियावाक्यस्योपप्लवनाद्विशिष्टषष्ठ्यर्थावगमात्सामीप्यादिसंबन्धप्रतीत्यभावः सिद्धः । पक्षद्वयसंभवे तु

उ.] नन्वाभीक्ष्ण्यरूपनित्यत्वस्य क्रियाधर्मत्वाद्धातोश्च क्रियावाचित्वात्कथं स'प्र'शब्दस्य द्वित्वमत आह—**अडादीति** । तिङ्क्षु वीप्साया अभावादाह—**वीप्सयेति** । एवञ्च पदग्रहणाऽभावे सगतिकग्रहणं सुतरां व्यर्थमिति तात्पर्यम् । **उल्लङ्घ्येति** । अत्र फलाऽभावेनाऽसम्बन्धादित्यर्थः । न च नित्ये द्वित्वं धातुमात्रस्य मा भूदिति पदस्येत्यावश्यकं, किञ्च सुपः प्राग्वर्तिनोऽपि द्वित्वं वारयितुं तत् , किञ्चाऽऽबाधादिविषये वाक्यद्वित्वव्यावृत्त्यर्थमिति वाच्यं, धातुद्वित्वेन नित्याद्यर्थानवगतेः । किञ्च सुबादिभिः स्वार्थे परिपूर्णस्यैव लोकव्युत्पत्त्या शब्दादुपस्थितस्य बहिर्भूतवीप्सादियोग इति न तद्द्विर्वचनप्रसक्तिः । आबाधाविषयवाक्याऽभावाच्च । अत एव भाष्ये छान्दसत्वेन वाक्ये द्वित्वमुक्तम् । न च पदस्येत्यस्याऽभावे गत्यर्थेभ्यः कौटिल्यमात्रे सावकाशो यङ् कौटिल्यपौनःपुन्योभयविवक्षायां परेण द्वित्वेन बाध्येत, एवं भृशार्थपौनःपुन्योभयविवक्षायामपि । तत्सत्त्वे तु बहिरङ्गत्वाद्द्विर्वचनस्य यङेव । अत एव 'स्वरितो वे'तिसूत्रे लत्वढत्वादीनां द्वित्वस्य च समत्वं वक्ष्यति भाष्यकार इति वाच्यम्, एवं (विधे) विषये उभयविवक्षैव नाऽनभिधानादित्याशयात् ।

ननु सामीप्यादीति । अस्याः शङ्काया कोक्तिसंभव इति चिन्त्यम् । **विशिष्ट-**

द्विर्वचनं यथा स्याद्द्विःप्रयोगो मा भूदिति ॥ किं च स्यात् ?॥ 'आम्पचसि पचसि देवदत्ता३' । 'आम एकान्तरमामन्त्रितमनन्तिक' इत्येकान्तरता

प्र.] षष्ठीनिर्देशेन 'षष्ठी स्थानेयोगे'ति परिभाषोपस्थानाद्द्विःप्रयोगो निवर्तते । 'द्वे'इत्येतावत्युच्यमाने सङ्ख्येयमुच्चारणं यद्यपेक्षते–'शब्दस्य द्वे उच्चारणे भवत' इति,–तदा शब्दस्य क्रियायाश्च स्थान्यादेशभावाऽयोगाद्द्विःप्रयोगो द्विर्वचनमिति पक्षः । यदा तु-शब्दरूपं सङ्ख्येयं तदा 'द्वे शब्दरूपे एकस्य प्रसङ्गे भवत' इति स्थाने द्विर्वचनं विज्ञायते । अथैकाचो द्वे प्रथमस्येत्यत्र षष्ठीनिर्देशात्स्थाने द्विर्वचनं कस्मान्न भवतीति । 'अभ्यासाच्चे'त्यनेनाऽभ्यासादुत्तरस्य हन्तिहकारस्य कुत्वविधानाल्लिङ्गात् । न हि स्थाने द्विर्वचनेऽभ्यासादुत्तरो हन्तिः संभवति, शब्दान्तरत्वादादेशस्य । स्थानिवद्भावादपि समुदायो हन्तिग्रहणेन गृह्यते न तु तदवयवः । **एकान्तरतेति ।** आवृत्तिभेदनिबन्धनया द्वित्वसङ्ख्यया स्वाश्रयस्यैकत्वस्य निवर्तनात् । तथा चोक्तम्–"एकाजनेकाज्ग्रहणेषु चावृत्तिसङ्ख्यानादिति, ऋषिसहस्रमेकां कपिलां दत्वा सर्वे ते सहस्रदक्षिणाः संपन्नास्तत एकदक्षिणा आनीयन्तामित्युक्ते सहस्रदक्षिणात्वान्न त आनीयन्ते" । तत्र आम्शब्दो निपातत्वादाद्युदात्तः। एकस्य 'पचसि'शब्दस्य 'तिङ्ङतिङ'इति निघातो, द्वितीयस्याऽ'नुदात्तं चे'त्यामन्त्रितस्य पदात्परस्य निघाते प्राप्ते, प्रतिषिद्धे, 'आमन्त्रितस्य चे'त्याद्युदात्तत्वम् । प्लुतस्याऽप्युदात्तत्वम् । अथ स्थाने द्विर्वचने कथमेकान्तरता, यावतैकस्य स्थाने द्वौ शब्दावादेशौ विधीयेते ?। उच्यते–

उ.] **षष्ठ्यर्थेति ।** स्थानरूपः कर्मत्वरूपो वेत्यर्थः । कथं पुनरन्यतरोपादानेन द्विःप्रयोगनिवृत्तिरत आह–**पक्षद्वयसंभवे त्विति** । तदभावे पक्षद्वयसंभवमुपपादयति–**द्वे इति । शब्दस्येत्यु**च्चारणक्रियापेक्षया कर्मषष्ठीति भावः। **यदा त्विति ।** परं तु कारकषष्ठीसंभवे इतरस्या अन्याय्यत्वेन द्विःप्रयोग एव स्यात्, तदर्थं 'सर्वस्ये'त्याद्युक्तिः । तदुक्तौ तु तत्सामर्थ्यात्स्थानषष्ठीति भावः ।

ननु 'पचसि'शब्द एक एव, उच्चारणमेव तु भिद्यत इति द्विःप्रयोगेप्येकान्तरता सिद्धेत्यत आह-**आवृत्तीति । उक्तमिति ।** 'अ इ उ'णित्यत्र । 'न ते आनीयन्ते' इत्यन्तरतत्रत्यो ग्रन्थः । **प्रतिषिद्धे इति** । 'आम एकान्तर'मित्यनेनेत्यर्थः । **आमन्त्रितस्य चेति ।** षाष्ठिकेत्यर्थः। **प्लुतस्याप्युदात्तत्वमिति** त्रिपाद्यामनुदात्तं पदमित्यस्याऽप्रवृत्त्या तत्प्रयुक्तशेषनिघातस्याऽभावादिति भावः। ननु पुनःशब्दस्याऽसत्त्ववाचित्वेन कथं भावसम्बन्धयोगोऽत

न स्यात् । इह च 'पौनःपुन्यं' 'पौनःपुनिक' इति,–अप्रातिपदिकत्वात्तद्धितोत्पत्तिर्न स्यात् ॥

यदि तर्हि स्थाने द्विर्वचनं–राजा-राजा वाग्वाक्,–पदस्येति नलोपादीनि न सिध्यन्ति ॥ इदमिह संप्रधार्यं–द्विर्वचनं क्रियतां नलोपादीनीति, किमत्र कर्त्तव्यम् ?॥ परत्वान्नलोपादीनि॥ पूर्वत्राऽसिद्धे नलोपादीनि । सिद्धाऽसिद्ध-

---

प्र.]एकपदादेशत्वात् स्थानिवद्भावादेकपदत्वम् । **पौनःपुन्यमिति** । पुनः पुनर्भवितरि वर्तमानात् 'पुनः पुनः'शब्दाद्भावे प्रत्ययो, यथा नानात्वमिति नानाभूतवृत्तेर्नानाशब्दात् । **पौनःपुनिक इति** । 'पुनः पुनर्भव' इति 'कालाट्ठञ्' । तत्र द्विःप्रयोगे पदस्य विज्ञायमाने वीप्स्यमानार्थवाचित्वादर्थवत्त्वेऽप्यर्थवतः समुदायस्य समासग्रहणान्नियमार्थादप्रातिपदिकत्वम् । स्यादेतत्–अनुत्पन्न एव सुपि पुनःशब्दस्य नित्यतायुक्तक्रियाप्रधानस्याऽव्ययस्य द्विःप्रयोगो विधास्यते, ततो सुबन्तसमुदायत्वादव्यावृत्तं प्रातिपदिकत्वं, यथैकशेषे सरूपप्रातिपदिकसमुदायस्य । तच्च न । द्विर्वचनस्य नित्यत्वाद्यर्थापेक्षत्वाद्बहिरङ्गत्वात्सुबुत्पत्तेरव्ययार्थमात्रापेक्षयाऽन्तरङ्गत्वात् । स्थाने द्विर्वचने तु स्थानिवद्भावात्प्रातिदिकत्वम् । ननु स्थान्येव सुबन्तत्वान्न प्रातिपदिकम् । नैतदस्ति । सुब्लुकि सत्यप्रत्ययान्तत्वात् । न च प्रत्ययलक्षणेनाऽप्रत्यय इति प्रातिपदिकसंज्ञानिषेधो, 'न ङिसंबुद्ध्यो'रिति नलोपनिषेधाल्लिङ्गात् । अन्यथा प्रातिपदिकत्वाऽभावान्नलोपस्य प्राप्त्यभावान्निषेधो न कर्त्तव्यः स्यात् । **राजाराजेति** । पदस्य स्थाने समुदाय आदेशत्वात्पदं न तदवयव इति पूर्वस्य नलोपाद्यसिद्धिः । अन्तरङ्गबहिरङ्गान-

---

उ.]आह–**पुनः पुनर्भवितरीति** । वृत्तिविषये इति भावः । **पुनःशब्दस्येति** । आकृतिगणत्वाद्विसर्गान्तस्यापि स्वरादिपठितस्येत्यर्थः । **नित्यतायुक्तक्रियाप्रधानस्येति** । तादृशक्रियाकारकवृत्तेरित्यर्थः । अतएव ततः ष्यञादिसिद्धिः । **यथैकशेषेति** । सरूपप्रातिपदिकसमुदायादेकस्यां विभक्तौ परत एकशेष इति पक्षे इदम् । **अन्तरङ्गत्वादिति** । एतच्च सुबन्तत्वा'द्यत्र सङ्घाते पूर्वो भागः पद'मिति नियमात्प्रातिपदिकत्वव्यावृत्तिरिति भावः । तत्रत्यपदशब्दस्याऽर्थवत्परत्वेऽपि न क्षतिः, लोके तदानुपूर्वीकादपि प्रयुज्यमानादर्थप्रत्ययेनाऽऽद्यस्याऽप्यर्थवत्त्वात् । बोधावृत्तिस्तु 'द्वा'वित्यादिवद्वारणीया । **सुब्लुकीति** । ननु प्रातिपदिकत्वेपि तत्प्रकृतिकसुबन्तत्वं दुर्लभं, सुबन्तात्तद्धितोत्पत्तिरिति हि सिद्धान्त इति चेन्न, तत्त्वस्याप्यतिदेशेन लाभात् । प्रत्ययग्रहणपरिभाषायां 'यस्मा'दित्यस्य सत्त्वेन प्रकृतेरुपादानात्प्रातिपदिकप्रकृतिकसुबन्तत्वस्याऽपि शास्त्रीयत्वात् । **इति पूर्वस्येति** । उत्तरस्य

योश्च नास्ति संप्रधारणा ॥ एवं तर्हि—'पूर्वत्राऽसिद्धीयमद्विर्वचन' इति [वक्ष्यामि[1] । तच्चावश्यं—] वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ विभाषिताः प्रयोजयन्ति—द्रोग्धा-द्रोग्धा । द्रोढा-द्रोढेति ॥ इह तर्हि—बिसंबिसं मुसलंमुसलम्,—'आदेशप्रत्यययो'रिति षत्वं प्राप्नोति ॥ 'आदेशो यः सकारः' 'प्रत्ययो यः सकार' इत्येवमेतद्विज्ञायते ॥ इह तर्हि—नृभिर्नृभिः,—'रषाभ्यां नो णः समानपद' इति णत्वं प्राप्नोति ॥ 'समानपद' इत्युच्यते, समानपद[2]-

---

प्र.] पेक्षे च चोद्यसमाधाने। नलोपादीनि हि पदत्वमात्रनिबन्धनत्वादन्तरङ्गाणि, द्विर्वचनं तु वीप्साद्यपेक्षत्वाद्बहिरङ्गम् । एवं विभाषिता अपि विधयोऽन्तरङ्गाः ।

विभाषिता इति। ननु 'न ह्येकस्या आकृतेश्चरितः प्रयोग' इति न्यायाद्यदा पूर्वस्य घत्वादि तदा परस्यापि लाघवाद्भविष्यति । एवं मन्यते—धात्वाकृतिः प्रत्ययाकृतिश्चैकैव। प्रक्रान्तार्थभेदाशङ्कापि नास्ति यथा—'गवां स्वाम्यश्वेषु चे'ति। नित्यत्वविरोधिनी च विभाषा। शक्या चाऽत्र युगपदेकत्र प्रयोगे सा विधातुमिति तस्याः प्रसङ्गः। एतन्न्यायाऽनपेक्षया चैतदुच्यते। **आदेश इति**। सकारस्यादेशस्य षत्वं न त्वादेशावयवस्य । **प्रत्ययो यः सकार इति** । आदेशानुरोधेनैतदुक्तं । प्रत्ययावयवस्य तु सकारस्य षत्वं व्यवस्थापयिष्यते । **नृभिर्नृभिरिति** । स्थानिवत्त्वात्समुदायस्यैकपदत्वाण्णत्वप्रसङ्गः । **समानमेवेति** । यत्र निमित्तनिमित्तिनोरवियोगस्तत्र णत्वम् । इह तु वीप्साऽभावे द्विर्वचनाऽभावान्नृभिरिति

उ.] तु समुदायपदत्वेनापि सिद्ध्यतीति भावः। **अन्तरङ्गबहिरङ्गानपेक्षे इति**। वक्ष्यमाणे भाष्यगतचोद्यसमाधाने इत्यर्थः। त्रैपादिकेऽन्तरङ्गे तदप्रवृत्तेः। अर्थाऽपेक्षस्य बहिरङ्गत्वाऽभावाच्चेति भावः। **विभाषिता अपीति**। अतएव 'स्त्रियं–स्त्रियं पश्ये'त्यादौ खण्डद्वयेऽपि विभाषितेयङ्सिद्धिः। **एकस्या आकृतेरिति** । द्रोह्ता–द्रोह्तेति स्थितिर्बोध्या। **लाघवादिति**। प्रतिपत्तिलाघवादित्यर्थः । एतन्न्यायबीजादि 'कृभ्वे'त्यत्र निरूपितम् । **धात्वाकृतिरिति**। धातुप्रत्ययाकृतिभेदाभावादेकैवाऽऽकृतिरित्यर्थः । स्वरूपभेदादाकृतिभेदः स्यादेवेत्यरुचेराह—**प्रक्रान्तार्थभेदशङ्कापि नास्तीति**। यथा—'गवां स्वाम्यश्वेषुचे'त्यत्राश्वेषु तिष्ठतीत्यर्थान्तरप्रतीतिर्नैवमत्रेत्यर्थः । तद्भेदशङ्कैव तन्न्यायबीजमिति भावः । **नित्यत्वविरोधिनी चेति**। एकत्र प्रयोगे तदनुष्ठानानुपपत्त्या ह्यकरणम्, नचाऽत्र साऽस्तीति भावः। **अनपेक्षयेति**। अनित्यत्वादिति भावः । 'प्रत्ययो यः सकार' इत्येष न सिद्धान्त इत्याह—**आदेशानुरोधेनेति** । ननु पदद्वयस्याऽऽदेशत्वात्समानपदस्थत्वाऽभावेन निमित्तनिमित्तिनोः कथं णत्वप्रसङ्ग इत्यत आह—**स्थानिवत्त्वादिति**। **यत्रेति** । पदे 'आस्तीर्ण'मित्यादौ ।

मेव यन्नित्यं, न चैतन्नित्यं समानपदमेव ॥ किं वक्तव्यमेतत् ? ॥ न हि ॥ कथमनुच्यमानं गंस्यते ? ॥ 'समानग्रहणसामर्थ्यात्' । यदि हि यत्समानं चाऽसमानं च तत्र स्यात्समानग्रहणमनर्थकं स्यात् ॥

अथ वा पुनरस्तु द्विःप्रयोगो द्विर्वचनम् ॥ ननु चोक्तम्—"आम्पचसि-पचसि देवदत्ता ३ ।—आम एकान्तरमामन्त्रितमनन्तिक इत्येकान्तरता न प्राप्नोती"ति ॥ नैष दोषः—सुप्तिङ्भ्यां पदं विशेषयिष्यामः । 'सुप्तिङन्तं पदं'। यस्मात्सुप्तिङ्विधिस्तदादि सुप्तिङन्तं च [पदम्] ॥ ननु चैकैकस्मादेवात्र

प्र.] रेफं पूर्वमन्तरेणाऽपि नकारस्य प्रयोगात्सर्वदा समानपदस्थत्वाऽभावः । अथवा स्थानिवद्भावादेकपदत्वं,तत्त्वतस्तु पदद्वयात्मक आदेशः । **समानग्रहणमिति।** 'रषाभ्यां नो णः पदे' इत्येव वक्तव्यं, तत्राऽपदस्थयोर्निमित्तनिमित्तिनोरसंभवाद्गुणे सङ्ख्याया विवक्षितत्वाच्चैकपदस्थत्वे सिद्धे समानग्रहणं नियमार्थमाश्रीयत इत्यत्र णत्वं न भवति । **यस्मात्सुप्तिङ्विधिरिति** । अर्थरूपसामान्यात्स एव पच्शब्दः स एव च तिङिति यः पूर्वस्माद्विहितः सः परस्मादपि, यः परस्मात्स पूर्वस्मादपि । तदादिग्रहणं चानुवर्त्तते । तेन 'पचसि-पचसी'ति समुदायःपच्छब्दादिःपदसंज्ञ इति सिद्धमेकान्तरत्वम्। **ननु चेति**। ततो नैकं पदम्।

उ.] **अथवेति।** पूर्वं प्रयोगान्तराश्रयेण समानपदस्थत्वं नेत्युक्तम् । इदानीमस्मिन्नेव प्रयोगे इति विशेषः । **गुणे सङ्ख्याया इति** । उद्देश्यगतसङ्ख्यायाः सर्वथाऽविवक्षितत्वात्प्रयोगान्तरेऽनापत्तेश्च चिन्त्यमिदं । तस्मात्पदत्वपर्याप्त्यधिकरणे इत्यर्थः। न च पदसमुदायस्तथेति बोध्यम् । **नियमार्थमिति।** नियमश्चाऽखण्डपदत्वाश्रयणरूपः। अखण्डत्वञ्च—निमित्तानधिकरणनिमित्तिमत्पदाऽघटितत्वम् । तेन 'मातृभोगीण' इत्यादौ णत्वं । पदं चाऽत्रार्थबोधकं, तेन 'रामनाम' 'गन्धर्वगान'मित्यादौ न णत्वम् । नन्वेवम'प्यपचन्नपच'निति ङमुट्, 'अग्रेऽग्रे' इति पूर्वरूपं,'रामान् रामा'निति णत्वनिषेधादिकं च न स्यादिति चेन्न,'द्वे' इति द्विर्वचनबलेनानस्तमिताऽवयवभेदसमुदायस्यैवादेशस्य विधानेन प्रत्येकमपि पदत्वसिद्धेः । तदुक्तं कैयटेन—'पदद्वयाऽऽत्मक आदेश' इतीत्याहुः । भाष्ये—**सुप्तिङ्भ्यामिति** । 'यस्मा'दिति परिभाषासंस्कृताभ्यामाभ्यां **पदं**-पदसंज्ञां विशेषविषयां करिष्याम इत्यर्थः। ननु यस्माद्यस्तिङ् विहितस्तदादि तदन्तस्यैव पदत्वं युक्तम् । 'पचसि-पचसी'त्यत्र य आदिः 'पच्' शब्दो न तस्मादन्त्यस्तिङिति कथं समुदायस्य पदत्वमत आह—**अर्थरूपेति** । यः पूर्वस्मात्तिङ् विहितः स परस्मादपीत्यस्य प्रकृते उपयोगश्चिन्त्यः । न च द्वित्वात्पूर्वं प्रवृत्ततया 'लक्ष्ये लक्षणस्ये'ति न्यायेन पुनरप्रवृत्तिः,लक्ष्यभेदात् । **तदादिग्रहणञ्चेति** । 'प्रत्ययग्रहण'इति

सुप्तिङ्विधिः ॥ समुदाये या वाक्यपरिसमाप्तिस्तया पदसंज्ञा ॥ कुत एतत्? ॥
॥*॥ शास्त्रा[1]ऽहानेः ॥*॥ एवं हि[2] **शास्त्रमहीनं भवति ॥ यदप्युच्यते—**
इह पौनःपुन्यं पौनःपुनिकमिति,—अप्रातिपदिकत्वात्तद्धितोत्पत्तिर्न प्राप्नोति
[इति]। मा भूदेवं 'समर्था'दित्येवं भविष्यति । अथ वाऽऽचार्यप्रवृत्ति-

---

प्र.] **समुदाय इति।** यथा समुदायस्याऽवयवानां चैकाच्त्वे तुल्ये समुदायस्यैव द्विर्वचनं भवति नाऽवयवानां, पपाचेति, तथेहापि पदसंज्ञा। **एवं हि शास्त्रमिति।** प्रत्यवयवं तु पदसंज्ञायां पदसमुदायस्य त्यागात्तद्विषयं शास्त्रं हीनं स्यात्। तदादिग्रहणाऽनुवृत्तिश्चाऽनर्थिका स्यात्। **मा भूदेवं समर्थादिति ।** तद्धितोत्पत्तौ द्वैतं, विभक्त्यन्ताद्वोत्पत्तिः, तदवयवात्प्रातिपदिकाद्वेति । तत्र विभक्त्यन्ता-दुत्पत्तिरिति पक्ष आश्रीयते । समुदायश्च पूर्वोक्तेन न्यायेन विभक्त्यन्त इति ततस्तद्धितोत्पत्तिरविरुद्धा । **अथ वेति।** यद्यपि प्रातिपदिकात्तद्धितोत्पत्ति-

---

उ.] परिभाषयैव सिद्धे 'यस्मात्प्रत्ययविधि'रित्यनुवृत्तेरीदृशार्थलाभ इति भावः । **ननु चैकैकस्मा'दिति।** द्विःप्रयोगत्वाद्वितीयस्य प्रयोगोऽपि शास्त्रप्रक्रियानिष्पन्न इति भावः।

यथा समुदायस्येति। समुदायस्य संज्ञाप्रवृत्तिमात्रेऽयं दृष्टान्तः नतु तद्व-दवयवानां पदत्वाऽभावः । समुदायपदत्वेनाऽवयवमात्रनिष्ठपदकार्याननुग्रहेण तन्न्याय-विषयाऽभावात् । अत एव—'अग्रेऽग्रे' इत्यादौ पूर्वखण्डान्त्येन पदान्तत्वनिबन्धनपूर्वरूपादि-सिद्धिः। 'निवर्त्तकमिदं प्रकरण'मिति 'नित्यवीप्सयो'रिति सूत्रस्थभाष्येण तथैव बोधनात्। **समुदाये वाक्यपरिसमाप्तिस्तया पदसंज्ञे'ति** भाष्यस्य तयापि पदसंज्ञेत्यर्थ इति न विरोधः। अत एव शास्त्राऽहानिरुपपन्ना। अन्यथाऽवयवविषयशास्त्रहानेरतदवस्थत्वमेव स्यादिति बोध्यम्। एतच्चै**काचो द्वे** इति सूत्रे विस्तरेण निरूपितं। न चैवमनेकपदान्तरत्वस्यापि सत्त्वेन कथमेकान्तरतेति वाच्यम्, अनेकपदान्तरे न भवतीत्यर्थस्य विधिस्पृष्टत्वाऽभावेन विशिष्टस्यापि पदत्वेनैकान्तरे भवतीति विधिस्पृष्टार्थस्य सत्त्वेनाऽदोषात् । **प्रत्यवयवं त्विति।** प्रत्यवयव-मात्रं त्वित्यर्थः। ननु पौनःपुन्यादेरपि पूर्वोक्तन्यायेन सिद्धत्वात्पुनः प्रश्नोऽयुक्तोऽत आह—**तद्धितोत्पत्ताविति।** भाष्ये—**समर्थादित्येवमिति।** प्रातिपदिकात्समर्थादित्यन्वयः । प्रातिपदिकस्य पदस्य च तत्प्रकृतिके लक्षणेत्यर्थके सुबन्तादव्यवहितपरत्वम्, प्रातिपदिकात्तु व्यवहितमिति न क्षतिः । अङ्गत्वन्तु व्यापकत्वात्समुदायस्यैव, प्राधान्याच्च । 'एकाचो द्वे' इति सूत्रे (च) भाष्ये स्फुटमेतत्। तत्र प्रातिपदिकात्तादृशपदत्वस्याप्यसंभवादाह—भाष्ये—**अथ-वेति।** एवं द्विःप्रयोगपक्षोऽपि भाष्ये स्थापितः । अस्माज्ज्ञापकात्स्थानेद्विर्वचनपक्षाश्रयणमेव युक्तमित्याहुः । न चैवं द्विःप्रयोगत्वे 'घटोऽयं घट'इति वाक्यस्यापि पदत्वापत्तिः, एकस्यैव घटस्य बोधनार्थं मन्दं प्रति लौकिको द्विःप्रयोगोऽयमिति नाऽर्थभेदोऽत्र। तथा च—'आम्

ज्ञापयति—'भवत्येवंजातीयकेभ्यस्तद्धितोत्पत्ति'रिति, यदयं कस्कादिषु कौतस्कुतशब्दं पठति ॥ [सर्वस्य द्वे] ॥

नित्यवीप्सयोः ।८।१।४।

इह कस्मान्न भवति—हिमवान्, वाडवः, पारियात्रः, समुद्र इति । 'नित्ये द्वे भवत'इति प्राप्नोति ॥ नैष दोषः—अयं नित्यशब्दोऽस्त्येव कूटस्थेष्व-

प्र.] स्तथाप्यप्रातिपदिकादपि द्विरुक्ताज्ज्ञापकात्तद्धितोत्पत्तिः । कुत कुत आगत इति कस्कादिषु पाठान्निपातनादव्ययलक्षणत्यबभावे अण्प्रत्ययः । [सर्वस्य ।]

नित्यवीप्स । इहेति । यदा नाश्रितप्रवृत्तिनिमित्तविशेषो नित्यशब्दः परिगृह्यतेऽङ्गीकृतसामान्यप्रवृत्तिनिमित्तो वा तदाऽत्रापि प्राप्नोति । निमित्तविशेषाङ्गीकरणेऽप्याभीक्ष्ण्यमङ्गीकृतं न कूटस्थत्वमिति विशेषे प्रमाणाऽभाव इति मत्वा प्रश्नः । अथ वा नित्यशब्दस्य कूटस्थत्वलक्षणो मुख्योऽर्थः, शब्दान्तरसंनिध्यनपेक्षणात् ,आभीक्ष्ण्यं तु क्रियापदप्रयोगसमधिगम्यं गौणोऽर्थः, अविच्छेदोपलब्धिसामान्यमाश्रित्य तत्र प्रयोगात् । ततश्च गौणमुख्ययोर्मुख्ये संप्रत्यय इति कूटस्थवाचिनामेव द्विर्वचनेन भाव्यम् । येषां च प्रयोक्तृभिरुत्पादविनाशौ नोपलभ्येते ते नित्याः । तत्र नित्यशब्दस्य तत्पर्यायाणां च 'नित्यं कौटिल्ये गतौ' 'ध्रुवमपाये' इत्यादिनिपातनाच्छक्यो द्विर्वचनाऽभावः प्रतिपत्तुमिति विशेषानुपन्यस्यति—हिमवानिति । कूटस्थेष्वविचालिष्विति । उभयोपादानं नित्यार्थाभिव्यक्त्यर्थं । कूटस्थे-

उ.] घटोऽयं घटः अग्निदत्ता ३' इत्यत्राप्येकान्तरता स्यात् । अतः स्थाने द्विर्वचनत्वमेव न्याय्यमिति वाच्यम् , ईदृशप्रयोगस्यानभिधानेनाऽदोषात् ॥ [सर्वस्य द्वे] ॥

नित्यवी । नन्वाभीक्ष्ण्यवृत्तिर्नित्यशब्दस्य ग्रहणादाभीक्ष्ण्यस्य च क्रियाविषयत्वात्कथमतिप्रसङ्गोऽत आह—यदा नाश्रितेति । अत्र पक्षे नित्यशब्दप्रतिपाद्येऽर्थे इत्यर्थः । अङ्गीकृतसामान्येति । तच्च नित्यशब्दरूपमिति भावः । विशेषे प्रमाणाभावइति । तथा च सकलविशेषाणां ग्रहणमिति भावः । अथवेति । योऽर्थः शब्दादुच्चारितमात्रादन्यनिरपेक्षः प्रतीयते स मुख्यः, यस्तु शब्दान्तरसंनिधानादिना प्रतीयते स गौण इति विभागः । क्रियापदेति । 'नित्यप्रहसित' इत्यादौ । मुख्यार्थसादृश्यसंबन्धेन प्रतीयमानस्य गौणत्वात्तं दर्शयति—अविच्छेदोपलब्धीति । कूटस्थस्य यथाऽविच्छेदेनोपलब्धिस्तथा प्रसहनादेरपीति भावः । सामान्यम्—सादृश्यं । कूटस्थत्वं नाम किं तदाह—येषाञ्चेति । न तु सर्वथोत्पादविनाशराहित्यं, तस्य ब्रह्मण्येव सत्त्वेन 'नित्या पृथिवी'त्यादेरुच्छेदापत्तेः । अत्र पक्षेऽनिष्ट एव द्वित्वं प्राप्नोति न त्विष्ट इति भाष्यार्थः । तत्र नित्यशब्दतत्पर्यायाणां

विचालिषु भावेषु वर्त्तते । तद्यथा–नित्या द्यौः नित्या पृथिवी नित्यमाकाश-मिति । अस्त्याभीक्ष्ण्ये वर्तते । तद्यथा–नित्यप्रहसितो नित्यप्रजल्पित इति । सद्य आभीक्ष्ण्ये वर्तते तस्येदं ग्रहणम् ॥

प्र.] ष्वित्येतावत्युच्यमाने राशेरपि नित्यत्वं प्रतीयेत, यस्माद्व्ययो न क्रियते। तथा चोच्यते 'तथा कूटस्थं राशिं कुरु, नाऽस्माद्व्ययः कर्तव्य' इति । एवमविचा-लिष्वित्युच्यमाने यदा क्रियारहितं द्रव्यं भवति तदा तस्य नित्यत्वप्रसङ्गः । उभयोपादाने तु 'येऽर्था उत्पादविनाशरहितास्ते नित्या' इत्युक्तं भवति । **नित्या पृथिवीति** । अवयवानां विचालित्वेऽप्यवयविस्वभावा पृथिवी स्वरूपान्न चलतीति नित्योच्यते । **तदिति**। आभीक्ष्ण्यवचन एवाऽत्र नित्यशब्दो गृह्यते न कूटस्थवचनः। कूटस्थवचने हि तद्वाचिनां सुबन्तानां स्वार्थ एव द्विर्वचनं स्यात् । न चैवं लोके प्रयोगोऽस्ति,प्रयुक्तानां चेदमन्वाख्यानं ।'हिमवान्–हिमवा'निति ह्युक्ते वीप्सा प्रती-यते न तु स्वार्थः । सुबन्तानामेव च नित्यवीप्सालक्षणद्विर्वचनविधानेन तिङन्ता-नि नाऽनुगृहीतानि स्युः । आभीक्ष्ण्यलक्षणे तु नित्यत्वे गृह्यमाणे तल्लक्षणं द्विर्वचनं तिङन्तानां, वीप्सालक्षणं तु सुबन्तानामित्युभयानुग्रहः कृतो भवति । गौणोपि चार्थो लक्ष्यदर्शनवशादिहाश्रीयते, यथा 'शीतोष्णाभ्यां कारिणि' 'पार्श्वेनान्वि-च्छती'त्यादौ । यद्याभीक्ष्ण्ये द्विर्वचनं विधीयते किमर्थं वार्तिककारः–'क्रिया-समभिहारे द्वे भवतः इति वक्तव्यम्' 'आभीक्ष्ण्ये द्वे भवत इति वक्तव्य'मिति वक्ष्यति ? । क्रियासमभिहारे द्विर्वचनं विधीयमानं यथा लोडन्तस्य भवति–'लुनीहिलुनीहीत्येवायं लुनाती'ति, तथा पापच्यत इत्यादौ यङन्तस्य कस्मान्न

उ.] त्यागे बीजमाह—**तत्र नित्यशब्दस्येति** । पौनरुक्त्यपरिहारायाह–**उभयेति** । **नित्यार्थेति** । नित्यशब्दप्रसिद्धार्थेत्यर्थः । उभयोपादाने तु तत्सामर्थ्यादभिमतार्थलाभ इत्याह–**येऽर्था उत्पादेति** । प्रयोक्रुपलभ्यमानेत्यादिः । ननु पृथ्वीविकाराणां घटादीनाम-नित्यत्वदर्शनात्कथं नित्यत्वमत आह–**अवयवानामिति** । भाष्ये–'तस्येद'मित्यत्र तस्यै-वेदमित्यवधारणमित्याह–**आभीक्ष्ण्यवचन एवेति** । अत्रोपपत्तिमाह-**कूटस्थग्रहणे हीति** । 'नित्यपदेने'तिशेषः । बह्वनुग्रहाय च आभीक्ष्ण्यवाचिग्रहणमेव न्याय्यमित्याह- **सुबन्ता-नामेवेति** । **आभीक्ष्ण्यं**–पौनःपुन्यम् । **गौणेऽपिचेति** । पदान्तरसमभिव्याहारगम्य-त्वाच्चाऽस्य गौणत्वमुक्तम् । शीतोष्णपार्श्वशब्दाश्च मन्दकारिशीघ्रकार्यनृजूपायलाक्षणिका इति बोध्यम् । **यद्याभीक्ष्ण्ये इति** । आभीक्ष्ण्यमेव च क्रियासमभिहार इत्यभिमानः । एवमाभीक्ष्ण्ये द्वे वाच्य इत्यस्यापि वैयर्थ्यं । शङ्कान्तरं करोति–**क्रियासमभिहारे इति** ।

प्र.] भवति ?। उच्यते—क्त्वाणमुलावाभीक्ष्ण्ये विषये विहिताविति ताभ्यामेव तस्य द्योतितत्वादप्राप्तं द्विर्वचनं मत्वा तद्विधानम्। प्रत्ययद्विर्वचनाभ्यां सहिताभ्यामाभीक्ष्ण्यं द्योत्यत इति वा वार्तिककारः प्रदर्शयति। क्रियासमभिहारश्च द्विविधो भृशार्थः पौनःपुन्यं च। तत्र भृशार्थे द्विर्वचनस्याऽप्रसङ्ग एव। आभीक्ष्ण्यमपि लोटाऽभिव्यक्तमिति तत्रापि तन्न प्राप्नोतीति विधीयते। तत्र यङः क्रियासमभिहारव्यभिचाराऽभावाद्यङैव स्वार्थिकेन क्रियासमभिहारद्योतनाद्यङन्तस्य न भवति। यदा तु भृशार्थे यङ् तदा पौनःपुन्यप्रतिपिपादयिषायां द्विर्वचनं भवत्येव—पापच्यते—पापच्यते इति। लोडपि भवति,—पापच्यस्व—पापच्यस्वेति। लोट् तु विषयान्तरेऽपि विधानाद्व्यभिचरति क्रियासमभिहारमिति द्विर्वचनसहित एव तं द्योतयतीति तदन्तस्यैव क्रियासमभिहारलक्षणद्विर्वचनप्रवृत्तिः। अथ नित्यतायां द्विर्वचनं विधीयमानं धातुमात्रस्य कस्मान्न भवति ?, धातुर्हि क्रियावाची, क्रियाधर्मश्चाभीक्ष्ण्यम्। नैतदस्ति। परिगृहीतसाधना क्रिया व्यवहारोपयोगिनीति तिङन्तस्यैव भवति। न च धातुमात्रद्विर्वचनेन नित्यत्वं द्योत्यते इति धातु-

---

उ.] भृशार्थः—पौनःपुन्यं च—क्रियासमभिहारः। **अप्राप्तं द्विर्वचनं मत्वेति।** समानकर्तृकयोरित्यादिनाऽर्थान्तरेऽपि तद्विधानात्केवलयोस्तद्द्योतने सामर्थ्याऽभावान्मत्वेत्युक्तं, तदाह—**प्रत्ययेत्यादि।** एवञ्च न्यायसिद्धार्थानुवादकमेव तदिति भावः। एवमाभीक्ष्ण्ये इत्यस्य सार्थक्यमुक्त्वा 'क्रियासमभिहारे' इत्यस्य तदाह—**क्रियासमभिहारश्चेति।** एवञ्च भृशार्थेऽप्राप्तविध्यर्थमेतदिति भावः। नन्वेवं 'भृशार्थे' इत्येव वक्तव्ये 'क्रियासमभिहार' ग्रहणं व्यर्थमत आह—**आभीक्ष्ण्यमपीति। विधीयतइति।** लोटो विध्यादौ समुच्चये च विधानादाभीक्ष्ण्याभिव्यक्तौ केवलस्य सामर्थ्याऽभावाद्द्विर्वचनमावश्यकमिति प्रतिपादयितुं विधीयत इति तात्पर्यम्। यङन्ते द्वित्वं निवारयति—**तत्रेति। द्विर्वचनं भवत्येवेति।** 'नित्यवीप्सयो'रित्यनेनेत्यर्थः। सकलाऽवयवविशिष्टक्रियां संपादयन् पुनः पुनः पचतीत्यर्थः। नच पौनःपुन्ये यङि ततो भृशार्थविवक्षायामपि द्वित्वापत्तिः, सूत्राऽप्राप्तेः। वार्तिकं तु लोडन्तमात्रविषयमित्यग्रे निरूपयिष्यामः। **लोडपीति।** भृशार्थविशिष्टे पौनःपुन्यप्रतिपादनाय धातुसम्बन्धे विवक्षिते लोड्द्विर्वचने अपि भवत इत्यर्थः। **तदन्तस्यैवेति।** लोडन्तस्यैव, नतु यङन्तस्येत्यर्थः। अतएव 'क्रियासमभिहारे लोण्मध्यमपुरुषैकवचनस्य द्वे भवत'इति वचनं 'क्रियासमभिहारे लो'डितिसूत्रे भाष्ये पठितमिति भावः। नच पौनःपुन्ये यङि 'नित्यवीप्सयो'रिति यङन्ते दुर्वारम्। नच यङोक्तत्वान्नतत्। भृशार्थेऽपि यङो विधानेन केवलस्य द्योतने सामर्थ्याभावादिति वाच्यं, भृशार्थे इत्येव सिद्धे क्रियासमभिहारग्रहणादाभीक्ष्ण्ये द्वे इत्यस्माच्च ज्ञापकात्पौनःपुन्यस्य केनचिद्द्योतने सौत्रद्वित्वाऽप्रवृत्तिज्ञापनेन यङन्ते द्वित्वा-

अथ किमिदं वीप्सेति ? ॥ आप्नोतेरयं विपूर्वादिच्छायामर्थे सन् विधीयते ॥ यद्येवं–चिकीर्षति जिहीर्षतीत्यत्रापि प्राप्नोति ॥ नैष दोषः–नैवं विज्ञायते–'वीप्सायामभिधेयाया'मिति ? ॥ कथं तर्हि ? ॥ कर्तृविशेषणमेतत् । [वीप्सतीति वीप्सः ।] वीप्सश्चेत्कर्त्ता भवतीति ।

प्र.] मात्रस्य द्विर्वचनाऽभावः। **आप्नोतेरिति**। व्युत्पत्तिप्रदर्शनेन क्रियाविशेषे योगरूढिर्वीप्साशब्द इति दर्शयति। इतरोरूढित्वमबुद्ध्वाह–**यद्येवमिति**। करोत्यादिभिः क्रियाभिः कटादीनां या व्याप्तुमिच्छा तद्वाचित्वाच्चिकीर्षतीत्यादेर्द्विर्वचनप्रसङ्गः । रूढत्वाश्रयेणाह–**नैष दोष इति** । चिकीर्षति-चिकीर्षतीति द्विर्वचने आभीक्ष्ण्यमेव प्रतीयते न तु स्वार्थमात्रम् । नाऽभिधेया वीप्सा गृह्यते–'वीप्सावाचिनो द्वे भवत' इति, किं तर्हि प्रयोक्तृधर्मो, यथा आबाधः । गतगत इति ह्युक्ते प्रियस्य चिरगमनेन पीडितो वाक्यं प्रयुङ्क्ते इति प्रतिपत्तिः । **वीप्सश्चेत्कर्तेति**। अत्र प्रयोक्ता कर्ता विवक्षितः । यदा पृथक् संख्यायुक्तानितरेतरयोगमप्राप्तान्सर्वानर्थान् क्रियया गुणेन वा युगपद्व्याप्नुवन् वाक्यं वक्ति तदा स वक्तुस्थ इच्छाविशेषो द्विर्वचनेन

उ.] भावसिद्धेः। **धातुमात्रस्येति**। 'पदस्ये'त्यधिकाराभावादिति भावः। **गृहीतसाधनेति**। 'कुत्सिते'इति सूत्रस्थभाष्यरीत्या,'पूर्वं धातुः साधनेने'ति न्यायेन चाऽन्तरङ्गत्वात् पूर्वं साधनाऽऽकाङ्क्षया तत्प्रयुक्तकार्यप्रवृत्त्युत्तरं तदन्वितार्थे एव बहिर्भूताऽऽभीक्ष्ण्यादिसम्बन्ध इति भावः । भावाख्यातान्तेऽपि अन्तरङ्गत्वात्प्रत्यये तदनन्तरमेव द्वित्वमिति तात्पर्यम् । अनभिधानादपि धातोर्द्वित्वाऽभाव इत्याह-**नच धातुमात्रेति**। **क्रियाविशेषेति**। व्याप्तिप्रतिपिपादयिषारूपे योगरूढिर्यस्येत्यर्थः। 'रूढिमबुद्ध्वे'ति पाठः। **तद्वाचित्वादिति**। वीप्सावृत्तेः शब्दस्य द्वित्वमित्यर्थेऽयं दोष इत्यर्थः। **रूढत्वेति**। पङ्कजादिवद्योगरूढोऽयमिति भावः। 'रूढित्वे'ति पाठो लेखकप्रमादात्। वीप्साया अभिधेयत्वाभावेऽनभिधानं हेतुमाह–**चिकीर्षतीत्यादि**। **प्रयोक्तेति**। व्याप्तिप्रतिपिपादयिषारूढवीप्साकर्तृत्वस्य तत्रैव संभवादिति भावः। वीप्सास्वरूपं दर्शयति–**यदेति**। पृथक्सङ्ख्याऽरिक्तत्वे हेतुः–**इतरेतरयोगमप्राप्तानिति**। साहित्यमप्राप्तानित्यर्थः। अत्र साहित्यभानाऽभावात्। तेनैकशेषे विषये न द्विर्वचनं, पृथक्सङ्ख्यायोगश्च परिगृहीतैकत्वादीनामेव भानादिति बोध्यम्। केचित्तु–'इतरेतरयोगं प्राप्ता'निति पाठः। 'बोधे' इति शेषः। पृथक्सङ्ख्यायोगाच्चैकशेषतो वैलक्षण्यं बोध्यमित्याहुः, तेषामितरेतरयोगं प्राप्तानिति स्वरूपकथनम्। युगपद्ग्रहणात् क्रमविवक्षायां न द्विर्वचनं, यथा'ऽत्र वनेऽयं वृक्षः शोभनोऽयं वृक्षः शोभन'इति क्रमेण शोभनत्वप्रतिपादने बहूनां शब्दानां प्रयोगो भवति ।

युगपद्व्याप्नुवन्–व्याप्तिरूपं सम्बन्धं युगपत्प्रतिपादयन्। **अर्थः प्रयोजनमिति** । ना-

कः पुनर्वीप्सार्थः ? । ॥*॥ अनवयवाभिधानं वीप्सार्थः ॥*॥ **अनवयवेन द्रव्याणामभिधानमेवं वीप्सार्थः ।** ॥*॥ अनवयवाभिधानं वीप्सार्थ इति चेज्जात्याख्यायां द्विर्वचनप्रसङ्गः ॥*॥ **अनवयवाभिधानं वीप्सार्थ इति चेज्जात्याख्यायां द्विर्वचनं प्राप्नोति । व्रीहिर्यव इति** ॥*॥न वैकार्थत्वाज्जातेः॥*॥ **न वैष दोषः॥ किं कारणम् ? ॥ 'एकार्थत्वाज्जातेः' ।** एकार्थो हि जातिः ।

प्र.] द्योत्यते । **कः पुनर्वीप्सार्थ इति ।** अर्थः प्रयोजनम् । एवं भूताया वीप्साया उपादाने किं प्रयोजनमिति प्रश्नः । **अनवयवाभिधानमिति ।** साकल्येन द्रव्याणां क्रियागुणसंबन्धप्रतिपादनं वीप्साफलमित्यर्थः । **जात्याख्यायामिति ।** जातौ पदार्थे साकल्येन द्रव्याणां प्रतिपत्तिर्भवति । यथा 'ब्राह्मणो न हन्तव्य' इति सर्वब्राह्मणहननप्रतिषेधः प्रतीयते । **न वैकार्थत्वादिति ।** यदि व्यक्तिव्यतिरिक्ता जातिरथ व्यक्तभेदहेतवो व्यक्तय एव जातिः, उभयथा भेदाभावाज्जातिलक्षण एकोऽर्थः, तत्र यथाग्न्यानयने चोदितेऽचोदितमपि पात्रं नान्तरीयकत्वादग्न्यानयनस्योपादीयते तथा जातौ चोदितायां द्रव्यं क्रियाङ्गभावेन प्रतीयते, ततोऽनवयवाभिधानस्य भेदविषयत्वाज्जात्यभिधाने तदभावाद्विर्वचनाऽभावः । एकशेषेऽप्यस्मिन्वने शोभना वृक्षा इति कतिपयानामपि वृक्षाणां शोभनत्वेन प्रयोगदर्शनादनवयवाभिधानाऽभावाद्विर्वचनाऽभावः । 'ग्रामो-ग्रामो रमणीय'

उ.]भिधेय इत्यर्थः। अतः'किमिदं वीप्से'त्यनेन न पौनरुक्त्यम्। **अनवयवाभिधानं**-साकल्येनाभिधानं, व्याप्यत्वमिति फलति। **साकल्येन द्रव्याणां क्रियागुणेति।** ग्रामे ग्रामे पानीयमित्यादावपि अस्तिक्रियायाः सत्त्वेन तया सम्बन्धस्य प्रतिपादनाददोषः। वस्तुत इदमुपलक्षणं द्रव्याऽभावयोरपि, 'ग्रामे ग्रामे स्वामी' 'शशेशशे न शृङ्ग'मित्युदाहरणे। आद्ये स्वामीश्वरेति सप्तमी । **भेदाभावादिति ।** आद्यमते स्वरूपत एव तस्याऽभावः । अन्त्ये तद्धेतोस्त्यागात्तद्भानाऽभावः । ननु जातेः क्रियाङ्गत्वाऽयोगाद्द्रव्यस्यापि शब्दवाच्यताया आवश्यकतेत्यत आह–**तत्र यथेति ।** आक्षेपाद्द्रव्यप्रतीतिर्न तु शब्दवाच्यं तदिति भावः। **भेदविषयत्वादिति ।** शब्दवाच्याऽर्थगतपरस्परनिरूपितभेदविषयत्वादित्यर्थः । शब्दवाच्यभिन्नार्थविषयत्वादिति यावत्। द्विर्वचनविषयानवयवाभिधानस्य स्वरूपकथनमिदं । जातिव्यावृत्तये एव 'पृथक्सङ्ख्यायुक्ता'निति पूर्वलक्षणे दत्तम्। अनेनाऽप्येकशेषस्य व्यावृत्तिरित्याह–**एकशेषेऽपीति । कतिपयानामपीति ।** परिगृहीतैकत्वानामभावाच्च पृथक्सङ्ख्यायुक्तत्वाऽभावः । अत एवैकशेषे प्रत्येकं विधेयसम्बन्धो नियमेन न प्रतीयते । नहि 'ब्राह्मणेभ्यः शतं देय'-मित्युक्ते नियमेन प्रत्येकं शतं देयं (भवति)। 'वृक्षं वृक्षं प्रति सिञ्चती'त्यत्र च तथा प्रतीतिः।

'एकमर्थं प्रत्याययिष्यामी'ति जातिशब्दः प्रयुज्यते ॥*॥ अनेकार्थाश्रयत्वाच्च वीप्सायाः ॥*॥ अनेकार्थाश्रया च पुनर्वीप्सा । 'अनेकमर्थं संप्रत्याययिष्यामी'ति वीप्सा प्रयुज्यते । एकार्थत्वाज्जातेरनेकार्थाश्रयत्वाच्च वीप्साया जात्याख्यायां द्विर्वचनं न भविष्यति ॥*॥ निवर्तकत्वाद्वा ॥*॥ अथ वा नाऽनेन

प्र.]इति तूक्ते निःशेषग्रामगतरमणीयत्वप्रतीतिः, तथाऽस्मिन्वने वृक्षो वृक्षः शोभन इत्युक्ते सर्वेषामेव वृक्षाणां प्रत्येकं सन्निवेशनिरपेक्षदर्शनीयत्वयोगप्रतीतिः, 'सर्वे वृक्षाः शोभना' इत्यत्र तु सर्वनाम्ना वीप्साया द्योतनाद्द्विर्वचनाऽभावः । इह तु 'सर्वे माषा ब्राह्मणेभ्यो दत्ता' इति यद्यपि कस्मै चित्त्रयो दत्ताः कस्मैचित् पञ्च, तथापि प्रयोगाद्वीप्साऽभावः। यदा त्वेकैको दत्तस्तदा वीप्सासंभवान्माषोमाषो दत्त इति द्विर्वचनं भवति । वृत्तिकारैरप्युक्तम्—'नानावाचिनामधिकरणानां क्रियागुणाभ्यां युगपत्प्रयोक्तुर्व्याप्तुमिच्छा वीप्से'ति । नानाभूतमर्थं द्रव्यलक्षणं ये शब्दा ब्रुवन्ति तेषां यान्यधिकरणान्यभिधेयानि तेषां सहाऽविवक्षितानां पृथक् सङ्ख्यायुक्तानां प्रत्येकं क्रियागुणयुक्तानां प्रयोक्तुः क्रियया गुणेन वा युगपदेककाला व्याप्तुमिच्छा सा वीप्सा । तत्र नानावाचिशब्देन जातिशब्दनिरासः । युगपद्ग्रहणेन क्रमविवक्षायां द्विर्वचननिरासः । यथाऽस्मिन्वनेऽयं वृक्षः शोभनोऽयं वृक्षः शोभन इति क्रमेण शोभनत्वप्रतिपादने बहूनपि शब्दान् प्रयुङ्क्ते । **वीप्सा प्रयुज्यत इति ।** वीप्साविषयत्वाद्द्विर्वचनं वीप्साशब्देनोच्यते । **निवर्तकत्वाद्वेति ।** नेदं द्विर्वचनस्य विधायकमिति जाति-

---

उ.] द्विर्वचनविषयेऽनवयवाभिधानं स्फोरयति-**ग्रामो ग्राम इति । सन्निवेशनिरपेक्षेति ।** साहित्यनिरपेक्षेत्यर्थः । तेनैकशेषाद्वैधर्म्यं दर्शितम् । वैषम्यान्तरमाह—**इह तु सर्वे माषा इति । युगपदिति ।** क्रियागुणाभ्यां युगपद्व्यापकत्वेनान्वयं बोधयितुमिच्छेत्यर्थः । **सहाविवक्षितानामिति ।** साहित्यभानाऽभावात्तत्वं बोध्यं, तदेवाऽऽह—**'पृथक्सङ्ख्यायुक्तानामिति ।** तदुपपादकमेव 'प्रत्येकं क्रियागुणयुक्ताना'मिति । **'युगप'**दित्यस्य व्याख्या—**एककालेति ।** नन्वर्थरूपाया वीप्सायाः प्रयोगकर्मत्वमयुक्तमत आह—**वीप्साविषयत्वादिति ।** अनेन च जातिशब्देषु प्रयोक्तुर्वीप्साऽसम्भवान्न द्विर्वचनप्रवृत्तिरित्युक्तं । **नेदमिति ।** ननु द्विःप्रयोगद्विर्वचनपक्षे समुदायपदत्वायेदमावश्यकमिति कथं नियमार्थं स्यात्, व्यक्त्यभिप्रायकनानाप्रयोगेषु सैव प्रकृतिः स एव प्रत्यय इति कल्पना वक्तुमशक्याऽर्थभेदादिति समुदायपदत्वं दुर्लभमिति चेन्न, वीप्साविषये एकान्तरताप्रयुक्तप्रतिषेधो-

द्विर्वचनं निर्वर्त्यते ॥ किं तर्हि ? ॥ अद्विर्वचनमनेन निवर्त्यते । यावन्तस्तेऽर्थास्तावतां शब्दानां प्रयोगः प्राप्नोति, तत्राऽनेन निवृत्तिः क्रियते–'नित्यवीप्सयोरर्थयोर्द्वे एव शब्दरूपे प्रयोक्तव्ये नातिबहु प्रयोक्तव्य'मिति ॥

॥*॥ सर्वपदसगतिग्रहणानर्थक्यं चार्थाभिधाने द्विर्वचनविधानात् ॥*॥ सर्वग्रहणं चानर्थकम् ॥ किं कारणम् ? ॥ ['अर्थाभिधाने द्विर्वचनविधानात्'] । सर्वस्यैव हि द्विर्वचनेनार्थो गम्यते नावयवस्य ॥ 'पदग्रहणं चानर्थकं' । पदस्यैव हि द्विर्वचनेनाऽर्थो गम्यते नाऽपदस्य । 'सगतिग्रहणं चानर्थकं' । सगतिकस्यैव हि द्विर्वचनेनाऽर्थो गम्यते नाऽगतिकस्य ॥

किं पुनरिदं वीप्सायां सर्वमभिधीयते आहो स्विदेकम् ? ॥ कश्चाऽत्र

प्र.] शब्दानां द्विर्वचनाऽभावः । द्रव्यशब्दानां तु यावदर्थं प्रयोगे प्राप्ते द्वयोरेव प्रयोग इति नियमः क्रियते । **नातिबह्विति** । बहुशब्दस्य वैपुल्यार्थत्वाद्बहुवचनाऽभावः । **सर्वपदेति** । यदा निवर्तकमिदं तदा सर्वादिग्रहणं न कर्तव्यमित्यर्थः । येषां हि बहूनां प्रयोगः प्राप्तस्तेषां द्विर्वचनेनाऽसौ निवर्त्तते, न चावयवस्याऽपदस्य गतिसन्निधावगतेर्वा आवृत्तिप्रसङ्गः । अथ परेर्वर्जन इत्यादिषु विधायकेषु कथमवयवद्विर्वचनाऽभावः ? । उच्यते । 'परेर्द्वे भवत' इत्युक्ते समुदायसन्निधौ द्विशब्दः श्रुतः प्रत्यासत्त्या समुदायमेव सङ्ख्येयं प्रतिपादयतीति सर्वादेशः सिद्ध इति नार्थः सर्वग्रहणेन ।

किं पुनरिति । 'अनवयवाभिधानं वीप्सार्थ'इति यदुक्तं तन्नोपपद्यत इति मत्वा

उ.] दाहरणाऽनभिधानेन क्षत्यभावात् । सूत्रारम्भेऽपि तदुपपादनाऽसंभवाच्च । नियमत्वे समुदायेनैव सकलार्थप्रतीत्या एकैकस्यार्थाऽभावात्, विधायकत्वाऽसंभवाच्च । स्थाने द्विर्वचनपक्षेऽपि प्राप्ताऽनेकप्रयोगस्य स्थाने तदवयवीभूतं प्रयोगद्वयमेव कर्त्तव्यमिति बोध्यते । स्थानषष्ठीनिर्देशाच्चेतरनिवृत्तिः—रमागमेन रोपधयोरिवेति दिक् ।

नित्यवीप्सयोरर्थयोरिति भाष्ये नित्यग्रहणन्तु संपातायातम् । ननु 'नातिबहूनी'ति वक्तव्ये नातिबह्वित्यसङ्गतमत आह–**बहुशब्दस्येति** । **आवृत्तिप्रसङ्ग इति** । न चैषामभावे स्थाने द्विर्वचनत्वं न सिद्ध्येत, द्विःप्रयोगेऽपि दोषाणामुद्धारात् । सत्यपि तस्मिन्नेकाचो द्वे' इतिवद्द्विःप्रयोगस्य दुर्वारतया व्याख्यानस्यैव लक्ष्यानुरोधेन शरणीकर्त्तव्यतया 'नित्यवीप्सयो'रित्यत्र 'शब्दस्ये'त्यस्य 'परे'रित्यादेश्च सत्त्वेनाऽदोषाच्चेति भावः । **उच्यते परेरिति** । एवमन्यत्रापि बोध्यम् । नन्वनवयवाभिानं वीप्सार्थं इत्युक्त-

विशेषः ॥*॥ वीप्सायां सर्वाभिधाने वचनाऽप्रसिद्धिः ॥*॥ **वीप्सायां सर्वाऽभिधाने वचनं न सिध्यति–ग्रामो-ग्रामः जनपदो-जनपद [इति] ॥ बहवस्तेऽर्थास्तत्र बहुषु 'बहुवचन'मिति बहुवचनं प्राप्नोति ॥ अस्तु तर्ह्येकम् ॥**
॥*॥ एकाभिधानेऽसर्वद्रव्यगतिः ॥*॥ **एकाऽभिधाने सर्वद्रव्यगतिर्न सिध्यति ॥ अस्तु तर्हि सर्वाभिधानम्**[2] ॥ **ननु चोक्तं–"वीप्सायां सर्वाभिधाने वचनाऽप्रसिद्धि"रिति** ॥*॥ न वा पदार्थत्वात् ॥*॥ **न वैष दोषः ॥ किं कारणम्?॥ 'पदार्थत्वात्' । पदस्याऽर्थो वीप्सा, सुबन्तं च**[3] **पदं, ङ्याप्प्रातिपदिकाच्चैकत्वादिष्वर्थेषु स्वादयो विधीयन्ते, न चैतत्प्रातिपदिकम् ॥ यत्तर्हि प्रातिपदिकं दृषद्-दृषत् समित्समिदिति॥ एतदपि प्रत्ययलक्षणेन सुबन्तं न**[4] **प्रातिपदिकम्॥ अपर आह–**॥*॥ न वा पदार्थत्वात् ॥*॥ **न वैष दोषः ॥ किं कारणम् ?** ॥

प्र.] प्रश्नः । ग्रामो ग्राम इत्येकवचनं श्रूयते अर्थास्तु बहवः, तत्र किं श्रुतिप्रामाण्यादेकत्वावसायोऽथाऽर्थवशाद्वीप्साविषयस्य शब्दस्य बह्वर्थत्वं,यथैकशेषशब्दस्य द्व्यर्थत्वं बह्वर्थत्वं वा । **कश्चात्र विशेष इति ।** परिगृहीतैकत्वानां बहूनामर्थानां वीप्सायामभिधानात्सर्वाभिधाने एकाभिधाने वा नास्ति विशेष इति भावः । **वीप्सायामिति ।** सर्वे चेद्ग्रामशब्देनोच्यन्ते तदैकत्वविरोधिबहुत्वसङ्ख्योपजननादेकवचनमिष्टं न सिध्यति । **एकाऽभिधानेऽसर्वद्रव्यगतिरिति ।** यद्येकाभिधानमभ्युपगम्यते तदा सर्वद्रव्यगतिर्न प्राप्नोति । **अस्तु तर्हीति ।** परिगृहीतैकत्वस्य सर्वस्याभिधानमित्यर्थः । **पदस्यार्थ इति ।** निर्ज्ञातसङ्ख्यस्यार्थस्य वीप्सायोग इत्यर्थः । उत्तरकालं तु सत्यपि बहुत्वे प्रातिपदिकत्वाऽभावाद्बहुवचनाऽभावो यथा 'पश्य मृगो धावती'ति दर्शनक्रियापेक्षे सत्यपि कर्मत्वे द्वितीयाऽभावः । **न चैतदिति ।** 'सुबन्तत्वादप्रत्यय' इति प्रतिषेधात् । **एतदपीति** । 'न ङिसंबुद्ध्यो'रिति तु नलोपविषयमेव ज्ञापकं मन्यते । **अपर आहेति ।** पूर्वमप्रातिपदिकत्वाद्बहु-

उ.] त्वेन कोटिद्वयाऽभावात्सन्देहानुपपत्तिरत आह–**अनवयवाभिधानमिति ।** एकवचनश्रुत्यैकत्वावसायादिति भावः, तदाह–**ग्रामो ग्राम इति । नास्ति शेष इति ।** अन्तरङ्गैकत्वमादाय वचनं, बहुविषयबोधश्च सिद्ध इति भावः । सर्वाभिधानशब्देन विशिष्टसर्वाभिधानं विवक्षितमित्याह–**परिगृहीतैकत्वस्येति ।**

निर्ज्ञातसङ्ख्यस्येति । एवं च पदाधिकाराऽभावेऽपि इदंपदस्यैव तत्साहचर्यादन्येषामपि तत्संबन्धित्वमेवेति बोध्यम् । **उत्तरकालंत्विति ।** द्विर्वचनोत्तरकालमित्यर्थः ।

'पदार्थत्वात्' । पदास्याऽर्थो वीप्सा । सुबन्तं च[1] पदम् । ङ्याप्प्रातिपदिका-च्चैकत्वादिष्वर्थेषु स्वादयो विधीयन्ते न चैतत्प्रातिपदिकम् ॥ यत्तर्हि प्राति-पदिकं दृषद्-दृषत् समित्समिदिति ॥ एतदपि प्रत्ययलक्षणेन सुबन्तं न[2] प्रातिपदिकम् ॥

अथेह कथं भवितव्यं-पचति-पचतितरां तिष्ठति, आहो स्वित् पचति-तरां-पचतितरां तिष्ठतीति ? ॥ पचतिपचतितरां तिष्ठतीति भवितव्यम् ॥ कथम् ? ॥ द्विर्वचनं क्रियतामातिशायिक इति द्विर्वचनं भविष्यति विप्रति-षेधेन ॥ इहापि तर्ह्यातिशायिकाद्द्विर्वचनं स्यात्–'आढ्यतरमाढ्यतरमानये'-

---

प्र.] हुवचनाऽभाव उक्त इदानीमन्यथोच्यते । सङ्ख्यान्तरेणाऽनाविष्टस्य यद्बहुत्वं तस्य वाचकं द्योतकं वा बहुवचनमुत्पद्यते, वीप्सायां तु परिगृहीतैकत्वानामर्थानां बहुत्वोपजनादन्तरङ्गत्वादेकवचनमुत्पन्नमिति स्वादिशास्त्रस्य कृतार्थत्वात्पुनर-प्रवृत्तिः । ततो 'न चैतत्प्रातिपदिक'मित्यस्याऽयमर्थः–सङ्ख्यान्तरानाविष्टं प्राति-पदिकमत्र नास्तीति । **यत्तर्हीति** । अर्थाऽभावात्स्वभावतो निवृत्तस्य प्रत्ययस्य लोपविधानद्वारेणानुत्पत्तिरेव प्रत्ययलक्षणायान्वाङ्ख्यायत इत्येकत्वानाविष्टमेतत्प्रा-तिपदिकमिति भावः । **एतदपीति** । प्रत्ययो लक्षणं यस्य तत्प्रत्ययलक्षणम्–ए-कत्वं । तेन सुबन्तमेतदेकत्वाविष्टमर्थं प्रतिपादयति । निवृत्ते हि प्रत्यये प्रकृतिरेवै-कत्वयुक्तमर्थं प्रतिपादयति, यथा राजा तक्षेति नास्त्येकत्वस्याऽप्रतीतिः । 'एकैक'-मित्यत्र सत्यपि बहुव्रीहिवद्भावात्प्रातिपदिकत्वे परिगृहीतैकत्वस्यार्थस्य वीप्सा-योगादन्तरङ्गत्वादेकवचनं भवति । बहुत्वप्रतीतेस्तु बहिरङ्गत्वाद्बहुवचनाऽभावः । एतस्यैवार्थस्यैकैकस्य प्राचामिति निर्देशो लिङ्गम् । **अथेहेति** । विनापि चशब्देन

उ.] **द्वितीयाभाव इति** । कर्मप्रतिपादकस्य धावतीत्यस्य प्रातिपदिकत्वाऽभावादिति भावः । **मन्यतइति** । अतएवाऽस्वरसाद्भाष्येऽ**पर आहेति** पक्षान्तरोपादानं । तत्र पूर्वस्माद्विशेष-मुपपादयंस्तदाशयमाह–**पूर्वमिति** । **सङ्ख्यान्तरेणाऽनाविष्टस्येति** । एकत्वादिने-त्यर्थः । सङ्ख्यान्तरावेशे तु अन्तरङ्गत्वात्तन्निमित्तमेव वचनमिति भावः । नन्वेवं सति **यत्तर्हि प्रातिपदिकमिति** ग्रन्थोऽसङ्गत इत्यत आह–**अर्थाभावादिति** । 'एतदपि प्रत्ययलक्षणेने'-त्युत्तरमुक्तेऽर्थे योजयति–**प्रत्ययो लक्षणमिति** । प्रत्यायने निमित्तमित्यर्थः । नन्वसतः सुपः कथमर्थप्रत्यायकत्वं स्यादत आह–**निवृत्ते हीति** । 'निवृत्तेऽपी'ति क्वचित्पाठः । अयमेव पक्षो युक्तो नतु पूर्वोक्त इत्याह–**एकैकमितीति** । आद्यपक्षे ह्यत्र बहुवचनं दुर्वार-मिति भावः । ज्ञापकेनाऽप्ययमेव पक्षो ज्ञापयितुं युक्त इत्याह–**एतस्यैवेति** । तिङन्तद्वय-

ति ॥ अस्त्यत्र विशेषः—अन्तरङ्ग आतिशायिकः ॥ काऽन्तरङ्गता? ॥ ङ्याप्प्रातिपदिकादातिशायिकः, पदस्य द्विर्वचनम् ॥ आतिशायिकोऽपि नाऽन्तरङ्गः ॥ कथम्? ॥ समर्थात्तद्धितोऽसावुत्पद्यते, सामर्थ्यं च सुबन्तेन । अथ वा स्पर्द्धायामातिशायिको विधीयते न चाऽन्तरेण प्रतियोगिनं स्पर्धा गम्यते ॥

एवं तर्हीह द्वावर्थौ वक्तव्यौ नित्यवीप्से चाऽतिशयश्च,नचैकस्य प्रयोक्तुरनेकमर्थं युगपद्वक्तुं संभवोऽस्ति । तदेतत्प्रयोक्तर्यधीनं भवति, एतस्मिंश्च प्रयोक्तर्यधीने क्व चित्का चित्प्रसृततरा गतिर्भवति । इह तावत्—पचतिपचतितरां तिष्ठतीत्येषा प्रसृततरा गतिर्यन्नित्यमुक्त्वाऽतिशय उच्यते ।

प्र.]पाकस्थानयोरत्र समुच्चय इति केचिदाहुः । अन्ये तु तिष्ठतीति शत्रन्तमाहुः । तिष्ठति देवदत्ते यज्ञदत्तः पक्त्रन्तराऽपेक्षया पचतिपचतितरामित्यर्थः । **नित्यवीप्से चातिशयश्चेति** । यद्यप्येते त्रयोऽर्थास्तथापि प्रयोगभेदाश्रयेणैतदुक्तम् । तिङन्तेषु नित्यत्वाऽतिशयौ द्वावर्थौ, सुबन्तेषु वीप्साऽतिशयौ । **न चैकस्येति** । यद्यपि वृक्षा इत्यादौ युगपदनेकार्थाभिधानमस्ति तथापि प्रकृतार्थापेक्षयैतदुच्यते । नित्यतातिशययोर्वीप्सातिशययोश्च निमित्तभेदाद्युगपदभिधानाऽसंभवः ।

प्रयोक्तर्यधीनमिति । नन्वध्युत्तरपदात्खविधानात्कथं केवलस्याधीनशब्दस्य प्रयोगः । अवृत्तिजा वृत्तिजसदृशा अधीनादय इत्यदोषः । इनशब्देन वाऽधिशब्दस्याऽव्ययीभावः परायत्तताप्रतिपादनपरः । **क्व चित्काचिदिति** । क्रियाप्रकर्षः प्रतियोग्यपेक्षो बहिरङ्ग इत्यन्तरङ्गं पौनःपुन्यं पूर्वं विवक्ष्यते । इह त्वाढ्यतर-

उ.]स्यान्वयोपपत्तिमाह—**विनापीति । अन्येत्विति** । एतत्पक्षे 'षष्ठी चानादर' इति सप्तमी । भाष्ये—**पदस्येति** । तदर्थस्यैव बहिर्भूताभीक्ष्ण्यादियोगादिति भावः । प्रकारान्तरेणातिशायिकस्य बहिरङ्गत्वं दर्शयति—**अथवा स्पर्धायामिति** । एवञ्च परत्वादन्तरङ्गत्वाच्च द्वित्वं प्राप्नोतीति भावः । **त्रयोऽर्था इति** । एवञ्च द्वावर्थावित्येतदनुपपन्नमिति भावः । **निमित्तभेदादिति** । शब्दभेदादित्यर्थः । द्वित्वं नित्यवीप्से वक्ति । तरबादि त्वतिशयमिति भावः । **अवृत्तिजा इति** । अव्युत्पन्नाः । **वृत्तिजाः**—तद्धितान्तसदृशा इत्यर्थः । **इनशब्देनेति** । ईश्वरवाचिनेनशब्देन सप्तम्यर्थवृत्त्यधिशब्दस्याऽव्ययं विभक्तीति समासः । यो यत्र वर्त्तते स तदधीनो भवतीति परायत्तालाभः । तिङन्ते द्वित्वे कृते प्रकर्षप्रत्ययः, सुबन्ते तु प्रकर्षप्रत्यये कृते द्वित्वमित्युक्तं भाष्ये । तत्रोपपत्तिमाह—**क्रियाप्रकर्ष इति** । पदार्थान्तरापेक्षया प्रकर्षयोगात्तस्य बहिरङ्गत्वं । पौनःपुन्यं तु स्वापेक्षयेत्यन्तरङ्गमिति भावः । सुबन्ते त्वेतद्विपरीतमित्याह—**इह त्विति** । वीप्साद्विर्वचने हि स्वप्रकृत्यर्थे व्याप्यताप्रतीतिः । प्रकृते चाऽतिशय

इहेदानीमाढ्यतरमाढ्यतरमानयेत्येषा प्रसृततरा गति र्यदतिशयमुक्त्वा वीप्साद्विर्वचनमुच्यते ॥ [नित्यवीप्सयोः] ॥

परेर्वर्जने ।८।१।५।

॥*॥ परेरसमासे ॥*॥ **परेरसमासे इति वक्तव्यम् । इह मा भूत्— परित्रिगर्तं वृष्टो देवः ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यं ।** ['परेर्वर्जन' इत्येव

प्र.] माढ्यतरमानयेति प्रकर्षयुक्ता एवाढ्या आनयनक्रियायामुपयुज्यन्त इति लब्ध-प्रकर्षा एव वीप्स्यन्ते । किं च—कृतद्विर्वचनात्तरपि सत्याढ्याढ्यतरमानयेति भाव्यम् । ततश्च प्रकर्षोऽर्थो गम्यते न तु वीप्सा । तस्मात् प्राक् प्रकर्षो विवक्ष्यते ततो वीप्सेति यथेष्टं सिद्धम् ॥ [नित्यवीप्सयोः] ॥

परेर्वर्जने। परित्रिगर्तमिति । त्रिगर्तान्वर्जयित्वा वृष्टो देव इति वर्जन-क्रियाकृतो वर्षत्रिगर्तानां संबन्ध इति परेः सन्निधाने वाक्यवत्समासेऽपि प्रतीयत इति द्विर्वचनप्रसङ्गः । **कस्तर्हि समास इति ।** 'जहत्स्वार्था वृत्ति'रिति समास एव वर्ज्यमानोपसर्जने वर्जने वर्तते, अवयवौ त्वनर्थकौ । यदाऽप्यजहत्स्वार्था वृत्तिरिति पक्षस्तदा वाक्ये केवले वर्जने परिर्वर्तते इति तत्रैव द्विर्वचनं । समासे तु वर्ज्यमानार्थास्कन्दी ह्यर्थः परिः केवले वर्जने न वर्तत इति सिद्धो द्विर्वचनाऽभावः । अत्र पक्षे 'न चात्र परिर्वर्जने वर्तत' इत्यस्यायमर्थः—शुद्धवर्जने न

उ.] विशिष्टे व्याप्यत्वप्रतीतौ तात्पर्यात्पूर्वं तरबिति भावः। आद्ये तु पौनः पुन्यविशिष्टक्रियायामतिशयान्वयेऽतिशयविशिष्टायां वा पौनःपुन्यान्वये न विशेष इत्यन्तरङ्गत्वाद्द्वित्वं । सुबन्ते त्वतिशयवद्व्याप्यत्वमपि पदार्थान्तरापेक्षमिति समत्वेऽपि द्वयोर्विशिष्टे व्याप्यत्वप्रतीतिनिर्वाहाय पूर्वं तरबितितात्पर्यम्। पूर्वं द्वित्वे विवक्षितार्थाप्रतिपत्तेरप्ययं विभागो युक्त इत्याह—**किंचेति ।** कृतद्वित्वात्तरपि तदन्तस्य प्रातिपदिकत्वात्सुब्लुकि 'प्रकारेगुणवचनस्ये'ति द्वित्वे कर्मधारयवद्भावात्सुब्लुक्ति 'पटुपटु'रित्यादाविवात्रापि प्रकारार्थो गम्येतेतीष्टार्थप्रतीतिलाभाय पूर्वं प्रकर्षयोगः पश्चाद्वीप्सेतीष्टसिद्धिरित्यर्थः ।

परेर्वर्जने । वाक्यसमानार्थत्वात्समासस्यवाक्य वद्द्विर्वचने प्राप्ते प्रतिषेध इति प्रतिपादयितुं वाक्यवृत्त्योरर्थाऽभेदं दर्शयति—**त्रिगर्त्तानित्यादिना । संबन्धइति ।** वाक्ये पञ्चमीबोध्यो, वृत्तौ तु तद्बोध्य इत्यर्थः। 'अपपरीवर्जने'इति कर्मप्रवचनीयत्वं, 'पञ्चम्यपाङ्परिभि'रिति पञ्चमी। 'अपपरिबहि'रिति समासः। ननु वाक्यवत्समासेऽपि परिणैव वर्जनंद्योत्यते इति किमिति समासस्य तत्र शक्तिः कल्प्यत इत्यत आह—**जहदिति । वर्जनं**—संबन्धाऽभावः। एवञ्च त्रिगर्तनिष्ठाऽभावप्रतियोगिसंबंधवद्वृष्टिकर्त्तृतिबोधः। तदाह-**वर्ज्यमानोपस-**

सिद्धम् ॥] । 'परेर्वर्जन'इत्युच्यते न चाऽत्र परिर्वर्जने वर्तते ॥ कस्तर्हि ? ॥ समासः । ॥*॥ परेर्वर्जने वावचनम् ॥*॥ [परेर्वर्जने वावचनङ्कर्त्तव्यम्] । परेर्वर्जने वेति वक्तव्यम् । परि त्रिगर्तेभ्यो वृष्टो देवः । परि-परि त्रिगर्तेभ्यो वृष्टो देवः ॥ [परेर्वर्जने]

वाक्यादेरामन्त्रितस्याऽसूयासंमतिकोपकुत्सनभर्त्सनेषु ८।१।८।

॥*॥ असूयाकुत्सनयोः कोपभर्त्सनयोश्चैकार्थत्वात्पृथक्त्वनिर्देशानर्थक्यम्॥*॥ असूया कुत्सनमित्येकोऽर्थः । कोपो भर्त्सनमित्येकोऽर्थः । असूयाकुत्सनयोः कोपभर्त्सनयोश्चैकार्थत्वात्पृथक्त्वनिर्देशोऽनर्थकः । न ह्यनसूयन् कुत्सयति, न चाप्यकुपितो भर्त्सयते ।। ननु च भो अकुपिता अपि दृश्यन्ते दारकान् भर्त्सयमानाः । अन्ततस्ते तां शरीराकृतिं कुर्वन्ति या कुपितस्य भवति ।

प्र.] वर्तते । अन्य एव ह्यर्थः परिः समासे, अन्यो वाक्ये शुद्धवर्जनविषयः । **कस्तर्हि समास इति** । समासविषयत्वात्परिरेव समासः । अन्य एव परिर्ह्यर्थ इत्यर्थः । वाक्ये नित्यद्विर्वचनप्रसङ्गादाह-**परेरिति** । [परेर्वर्जने] ॥

वाक्या । असूयाकुत्सनयोरिति । यद्यप्यसूयादयः परस्परस्माद्भिन्नास्तथापि कार्यकारणभावेनैकविषयत्वमेकार्थत्वं ज्ञेयं, तमेव कार्यकारणभावं दर्शयति-**न ह्यनसूयन्निति** । तत्र कुत्सनभर्त्सनाऽभावेऽप्यसूया कोपश्च भवतो न तु कोपाऽसूयाऽभावे भर्त्सनकुत्सने इति कोपाऽसूययोर्द्विवचनं विधीयमानं भर्त्सनकुत्सनयोरपि तत्सद्भावात्सिध्यतीति कुत्सनभर्त्सनग्रहणमनर्थकं भवतीत्यर्थः ।

ननु चेति । कोपमन्तरेणापि भर्त्सनसद्भावात्पृथग्विधेयं द्विर्वचनमित्यर्थः ।

उ.] **र्जनइति । अवयवौ त्वनर्थकाविति** । इदं चिन्त्यम्, ईदृशजहत्स्वार्थवृत्ते रूढेरन्यत्र भाष्यकारैरनभ्युपगमात्। **ह्यर्थः परिरिति** । चिन्त्यमिदं-सूत्राक्षरैः केवले वर्जने वर्तमानपरेरित्यर्थाऽलाभात्। तस्मादयमत्र भाष्यार्थः-कर्मप्रवचनीयानां स्वयोगविहितविभक्त्यर्थसंबन्धपरिच्छेदकत्वेन तत्र विभक्त्यभावेन तत्त्वाऽसम्भवान्निरर्थकः परिः । किंच वाक्यदृष्टविभक्त्यर्थान्तर्भावेण तत्र समासस्यैव शक्तिकल्पने परेस्तद्द्योतकत्वाऽभावः । नहि समासस्य पदार्थान्तर्भावेण शक्तिः, तत्र तद्द्योतकापेक्षा । अतएव घनश्यामादाविवाद्यप्रयोगः । परिशब्दस्तु वृत्तौ साधुत्वमात्रार्थं प्रयुज्यते, 'समूलकाषं न्यवधी'दित्यादौ कपिरिवेति । [**परेर्वर्जने**]॥

वाक्यादेरा । ननु परगुणासहनमसूया, कुत्सनं निन्दनं, कोपः-क्रोधः, शब्दैर्भयोत्पादनं भर्त्सनमिति कथं तेषामेकार्थत्वमत आह-**यद्यपीति । तत्र कुत्सनेति** । कार्य

एवं तर्ह्याह—

सामृतैः पाणिभिर्घ्नन्ति गुरवो न विषोक्षितैः ।
लालनाश्रयिणो दोषास्ताडनाश्रयिणो गुणाः ॥ १ ॥

एकं बहुव्रीहिवत् ।८।१।९।

इह कस्माद्बहुव्रीहिवद्भावो न भवति—'एक' इति ? ॥ एकस्य द्विर्वचने-

प्र.]अत्राप्यस्ति कोप इति दर्शयति—**अन्तत इति ।** यद्यकुपिता भर्त्सयेरन् गुरवो नैव दारकास्तेभ्यो बिभियुरिति कोपं प्रदर्शयन्तो भर्त्सयन्ते । ततः सर्वत्र भर्त्सने कोपसद्भावात्पृथग्भर्त्सनग्रहणं न कर्तव्यम् । कुत्सनभर्त्सनग्रहण-समर्थनायाह—**सामृतैरिति ।**

गुरवो हि हितैषित्वादकुप्यन्तोऽपि भर्त्सनम् ।
कुर्वते भर्त्स्यमानास्तु कुपितान् प्रतियन्ति तान् ॥ १ ॥
विनाऽप्यसूयया कुत्सां कुर्वन्तीति पृथक्कयोः ।
निर्देशः सूत्रकारेण विहितः सूक्ष्मबुद्धिना ॥ २ ॥

एकम् । इह कस्मादिति । केवलो बहुव्रीहिवद्भावोऽनेन विधीयतेऽनिर्दिष्टविषय इति मत्वा प्रश्नः । किं पुनरत्राऽनिष्टं यावता कृतेऽपि सुब्लुकि बहुव्रीहिवद्भावादपरः सुब्भविष्यति । समासग्रहणं च नियमार्थं न तु विध्यर्थ-

उ.] विनाऽपि कारणं भवति, नतु कारणं विना कार्यमिति भावः । कोपाऽभावे भर्त्सनं न स्यादतस्तत्राप्यारोपितः कोपोऽस्तीत्याह—**यद्यकुपिता इति ।** इदमुपलक्षणं, यद्यसूया-हीना निन्देरन्नित्यस्यापि । तदेव ध्वनयन्नाह—**कुत्सनभर्त्सनग्रहणेति । एवं तर्ह्याहेति ।** एवं तर्हि यत आह ऋषिः—'**सामृतै**'रिति अतोऽसूयाकुत्सनयोः पृथग्ग्रहणं कर्तव्यमि-त्यर्थः । तदाह—**गुरवोहीति ।** 'विनाप्यसूयये'त्यस्य 'एव'मित्यादिः । ननु कोपाऽभावे भर्त्सनैव कथं स्यादत आह—भाष्ये—**लालनेति ।** [वाक्यादेरामन्त्रितस्याऽसूया] ॥

एकं बहुव्रीहिवत् । ननु द्वित्वसन्नियोगेन विधानात्कथमत्र प्राप्तिरत आह—**केवल इति ।** सुब्लुकमभ्युपगम्य दोषाऽभावमुक्त्वा सुब्लुगेव नास्तीति युक्त्यन्तरमाह—**समास-ग्रहण चेति ।** विध्यर्थत्वे त्वप्रत्यय इति प्रतिषेधं बाधित्वा बहुव्रीहिवद्भावात्प्रातिपदिकत्वं स्यादिति भावः । वस्तुतो द्वित्वे कृतेऽपि स्थाने द्विर्वचनत्वे स्थानिवद्भावेन द्विःप्रयोगपक्षे उक्तयुक्त्या प्रत्ययान्तत्वेनाऽप्रत्यय इति निषेधो दुर्वारः । यदि बहुव्रीहिवद्भावेन तत्र दृष्टत्व-मात्रेण प्रातिपदिकत्वमुच्यते तर्हीदानीमपि तुल्यमिति चिन्त्यमेवैतत् । पुंवद्भाव इत्यपि चिन्त्यम् । सहि 'सर्वनाम्नो वृत्तिमात्र'इत्यनेन वाच्यः । सहि वृत्तिघटकानेकभागमध्ये पूर्व-भागस्यैव । अत एकशेषे 'दक्षिणपूर्वस्यै' इत्यत्रोत्तरपदस्य च न, नचैवं प्रकृते तस्मादेक

सम्बन्धेन बहुव्रीहिवद्भाव उच्यते न चाऽत्र द्विर्वचनं पश्यामः ॥*॥ एकस्य द्विर्वचनसंबन्धेनेति चेदर्थनिर्देशः ॥*॥ **एकस्य द्विर्वचनसंबन्धेनेति चेदर्थनिर्देशः कर्तव्यः । द्विर्वचनमपि ह्यत्र कस्मान्न भवति तस्माद्वाच्यम्—'अस्मिन्नर्थे द्वे भवतो बहुव्रीहिवच्चे'ति** ॥*॥ न वा वीप्साधिकारात् ॥*॥ **न वा वक्तव्यम् ॥ किं कारणम् ? ॥ 'वीप्साधिकारात्' । 'नित्यवीप्सयो'रिति वर्तते ॥**

अथ बहुव्रीहिवत्त्वे किं प्रयोजनम् ? ॥*॥ बहुव्रीहिवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावौ ॥*॥ [**बहुव्रीहिवत्त्वे सुब्लोपपुंवद्भावौ प्रयोजनम्**] । सुब्लोपः-

---

प्र.] मिति प्रत्ययान्तत्वादेक इत्यस्याऽप्रातिपदिकत्वान्नैव वा सुब्लुक् प्राप्नोति । एवं तर्ह्युदाहरणदिक्प्रदर्शिता। इदं तूदाहरणमेकेति । अत्र हि पुंवद्भावः प्राप्नोति।

एकस्येति । 'द्वे'इत्यधिकाराद्द्विर्वचनसन्नियोगेन विधीयमानो बहुव्रीहिवद्भावस्तदभावे न भवति । द्विर्वचनमप्यनेन विधीयमानमत्र प्राप्नोतीति मत्वाह— **एकस्येति । नवेति ।** वीप्साशब्दः स्वरितत्वप्रतिज्ञानात् 'परेर्वर्जने'इत्यादावर्थान्तरनिर्देशादाकाङ्क्षाया अभावात्तत्संबन्धमननुभूयेहैवोपतिष्ठते। सत्यपि संभवे बाधनं भवतीति न्यायाद्वीप्सायां विधीयमानेन बहुव्रीहिवद्भावेन द्विर्वचनस्य बाधाऽप्रसङ्गादनेनैवोभयं विधीयते । **अथेति ।** किं बहुव्रीहौ दृष्टं सर्वं कार्यमति-

---

उ.] इत्यादौ दधीत्यादाविव सुब्लुकिं'लक्ष्येलक्षणस्ये'न्यायात्तद्रहितस्यैव साधुत्वापत्तिरिति यथाश्रुतभाष्यमेव रमणीयम् । कृते द्वित्वे तु लक्ष्यभेदात् पुनर्विभक्तिरिति न दोषः । न च कार्यातिदेशेऽनेनैव सुबुत्पत्तिरिति लक्षणभेदादेक इत्यत्र पुनः सुब्दुर्वार इति वाच्यं, कार्यातिदेशेऽपि प्रतिपदिकत्वरूपकार्यमतिदिश्यते । तद्द्वारैव कार्यान्तरस्य तत्र दर्शनात् । ततः **सुब्लोपादि स्वशास्त्रेणैवे**त्यदोषात् । अतएव प्रयोजनान्वाख्यानपरसिद्धान्तभाष्ये 'सुब्लोपपुंवद्भावौ'**इत्यत्र न न्यूनता** । अन्यथा सुबुत्पत्तिरपि तत्र वक्तव्या स्यात् । मम तु सुब्लोपपदेन तन्निमित्तभूतप्रातिपदिकत्वलक्षणान्न दोष इति बोध्यम् । **द्विर्वचनसन्नियोगेनेति ।** कृतद्विर्वचनैकशब्दानुवादेनेत्यर्थः । अनेनैव तद्विधाने हि 'एकश'इति न सिध्येत् । परत्वाद्द्वित्वस्यैवापत्तेः । अस्य तु न शसपवादः । अनेन सह येन नाप्राप्तिन्यायाऽभावात् । **द्विर्वचनमप्यनेनेति ।** अर्थविशेषानिर्देशादिति भावः । भाष्ये—**वीप्साधिकारादिति ।** समुदायोच्चारणेऽप्येकदेशे स्वरितत्वप्रतिज्ञानाद्वीप्सापदानुवृत्तिः । ननु मध्येऽपि संबन्धः स्यादत आह—**परेरिति ।** ननु तेनैव वीप्सायां द्विर्वचनस्य सिद्धत्वादनेन पुनस्तद्विधानं व्यर्थमत आह—**सत्यपीति । बहुव्रीहिवद्भावादिति ।** प्रातिपदिकसंज्ञातिदेशद्वा-

एकैकम् । पुंवद्भावः—**गतगता** ॥ **यद्येवम्**—॥*॥ सर्वनामस्वरसमासान्तेषु दोषः ॥*॥ **सर्वनामस्वरसमासान्तेषु दोषो भवति** । [सर्वनाम—] **सर्वनामविधौ दोषो भवति—एकैकस्मै** । 'न बहुव्रीहा'विति प्रतिषेधः प्राप्नोति । **सर्वनाम** ॥ स्वर—**ननं सुसु** । 'नञ्सुभ्या'मित्येष स्वरः प्राप्नोति । **स्वर** ॥ समासान्त **ऋगृक्** । **पूःपूः** । 'ऋक्पूरब्धूःपथामानक्षे' इति समासान्तः प्राप्नोति ॥

प्र.] दिश्यते अथ किंचिदेवेति प्रश्नः । **एकैकमिति** । सुबन्तसमुदायस्य बहुव्रीहिवद्भावात्सुब्लुकि कृते पुनर्बहुव्रीहिवद्भावादेव सुबुत्पत्तिः । **गतगतेति** । उत्तरसूत्रेण द्विर्वचनबहुव्रीहिवद्भावौ । एकैकेत्यत्र तु पुंवद्भावे विशेषाऽभावः । अवग्रहे त्वत्रापि विशेषोऽस्ति । न चाऽत्र नित्या संहिता, 'एकैकयेत्येक' इत्यवग्रहकरणात्, 'अग्रे अग्रे सूक्ष्म' इत्युदाहरणाच्च । **नन सुसुइति** । 'आबाधे चे'ति द्विर्वचनम् । नन करोति सुसु जागर्तीत्येवमादिवाक्यैकदेश उदाहृतः । अथ 'नञ्सुभ्या'मित्यन्तोदात्तत्वेऽसति केन स्वरेण भाव्यम् ? । अत्र हि चत्वारः स्वराः प्राप्नुवन्ति । समासान्तोदात्तत्वं, पूर्वपदप्रकृतिस्वरो, नञ्सुभ्यामित्यन्तोदात्तत्वमाम्रेडितानुदात्तत्वं च । तत्र कार्यातिदेश इदमेव कार्याणां विधायकमिति परत्वादाम्रेडितानुदात्तत्वमनेन बाध्यते । शास्त्राऽतिदेशे विरुद्धस्य स्वाश्रयस्यातिदेशेन निवर्तनान्न भाव्यमाम्रेडिताऽनुदात्तत्वेन । यथा च 'नञ्सुभ्या'-

---

उ.] रेति । अस्याशय उक्तः । **उत्तरसूत्रेणेति** । 'आबाधे चे'त्यनेन । अत्र पुंवत्त्वं तु 'स्त्रियाः पुंव'दित्यनेन अतिदेशबलेनोत्तरपदस्यैकार्थेन भिन्नार्थत्वाऽभावेन च सामानाधिकरण्यस्य सत्त्वादिति भावः । नन्वेतत्सूत्रविषये पुंवत्त्वं कुतो नोदाहृतमित्यत आह—**एकैकेत्यत्रेति** । **नचात्रेति** । द्विर्वचनविषये इत्यर्थः । 'संहितैकपदे नित्ये'त्यस्य समासग्रहणसामर्थ्येनाऽखण्डपद एव प्रवृत्तेरिति भावः । तदेवाह—**अग्रे इति । उदाहरणात्** । 'प्रकारे इति सूत्रे भाष्यकारेणे'ति शेषः । अत 'एकैकया आहुत्या'इत्यत्र 'एकऽएकये'त्यवग्रहं याजुषाः कुर्वन्ति । न चाऽत्रेत्यादेरुपयोगश्चिन्त्यः । 'मयूररोमभि'रित्यादौ मुख्यसमासेऽप्यवग्रहणकरणेनाऽवग्रहे संहितानित्यत्वस्याऽप्रतिबन्धकत्वादिति केचित् । 'नन''सुसु'इत्येतावन्मात्रेण कथमाबाधाप्रतीतिरत आह—**नन करोतीति** । भृत्यादीनां कार्यकरणे मान्द्यात्पीडित एवंप्रयुङ्क्ते, प्रियस्यात्यन्तजागरणाच्च पीडितः । **समासान्तोदात्तत्वमिति** । व्याप्यधर्मातिदेशे व्यापकधर्मस्याप्यतिन्नदेशादिति भावः । **पूर्वपदप्रकृतिस्वर इति** । 'बहुव्रीहौ प्रकृत्ये'त्यनेन । **परत्वादिति** । अनुदात्तस्यावकाशो 'भुङ्क्ते'इत्यादौ । शास्त्रातिदेशेऽनुदात्तत्वमेव परमत आह—**विरुद्धेति** । अतिदेशस्वाभाव्यादिति भावः । कार्यातिदेशेऽप्यतिदिश्यमानकार्या-

सर्वनामविधौ तावन्न दोषः । उक्तं तत्र बहुव्रीहिग्रहणस्य प्रयोजनम्–'बहुव्रीहिरेव यो बहुव्रीहिस्तत्र प्रतिषेधो यथा स्याद्बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भू'दिति । स्वरसमासान्तयोरपि–प्रकृतं समासग्रहणमनुवर्तते, तेन बहुव्रीहिं विशेषयिष्यामः–'समासो यो बहुव्रीहि'रिति ॥

प्र.] मित्यस्य समासग्रहणानुवृत्त्याऽनतिदेशादप्रवृत्तिरेवं पूर्वपदप्रकृतिस्वरस्याऽपीति समासान्तोदात्तत्वप्रसङ्गः । उच्यते । 'नञ्सुभ्या'मित्यत्रैव 'वनं समासे' इत्यतःसिंहावलोकितन्यायेन समासग्रहणमनुवर्तते, न तु 'बहुव्रीहौ प्रकृत्ये'त्यत्र, तेन पूर्वपदप्रकृतिस्वरोऽतिदेशेन भवन् समासाऽन्तोदात्तत्वं बाधते। **ऋक् ऋगिति ।** समासमात्राद्विधीयमानो बहुव्रीहेरपि दर्शनादकारो बहुव्रीहिवद्भावात्प्राप्नोति ।

उक्तं तत्रेति । 'विभाषा दिक्समास'इत्यतो 'न बहुव्रीहा'वित्यत्र बहुव्रीहिग्रहणानुवर्तनाद्बहुव्रीहिरेव यो बहुव्रीहिर्मुख्यस्तस्य सर्वनामसंज्ञानिषेध इत्यतिदेशान्न प्रवर्तते । **स्वरसमासान्तयोरिति । स्वरे** व्याख्यातम् । **समासान्ते** व्याख्यायते–'समासान्ता'इत्यत्र 'समासाच्च तद्विषया'दित्यतः समासग्रहणमनुवर्तते, तेन मुख्यसमासपरिग्रहादतिदेशात्समासान्ताऽप्रसङ्गः । समासमात्रस्य समासग्रहणेन विशेषणादर्थाद्बहुव्रीहेरपि विशेषणम् । 'तेनबहुव्रीहिं विशेषयिष्याम' इत्येतद्भाष्यमुपपद्यते । अन्ये त्वाहुः–'बहुव्रीहौ सङ्ख्येये डजबहुगणा'दित्यतः

उ.] णामुत्पत्तिदेशस्यैव देशत्वेऽनयैव युक्त्या तद्वारणं बोध्यम् । तर्हि पूर्वपदप्रकृतिस्वरः स्यादत आह-**यथाचेति । अन्तोदात्तत्वप्रसङ्ग इति** । एवञ्च विशेषाऽभावाद्विचारोऽयमयुक्त इति भावः । **अनुवर्त्तत इति** । अपकृष्यत इत्यर्थः । सन्निहितत्वाच्च 'नञ्सुभ्या'मित्यत्रैव संबन्धो न तु 'बहुव्रीहौ प्रकृत्ये'त्यत्रेत्याशयः । **बाधत इति** । तेन 'निपाता आद्युदात्ता' इति पूर्वपदमाद्युदात्तं, शिष्टमनुदात्तम् । एवञ्च सत्याम्रेडितानुदात्तत्वेऽपि विशेषाऽभावाच्चिन्त्योऽयं कैयटः । अतिदिश्यमानकार्याणामुत्पत्तिदेशस्यैव देशत्वेन परत्वेनाऽऽम्रेडितानुदात्तत्वस्यैव प्राप्तेश्च । स्वरे समासग्रहणापकर्षेण समाधानपरं भाष्यं त्वतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याऽभावेन, 'नञ्सुभ्या'मित्यतिदेशे आम्रेडितानुदात्तत्वाप्राप्तेरिति बोध्यम् । इदमेवाभिप्रेत्य भाष्ये उपक्रमे लुब्लोपपुंवद्भावावेव प्रयोजने उक्ते, आम्रेडितानुदात्तत्वेनैव स्वरसिद्ध्या विशेषाऽभावात् । अतएव समासवद्भावो नोक्तः । तथाहि सत्यन्तोदात्तत्वापत्तेः । **तेन मुख्येति** । समास एव समास इत्याश्रयणादिति भावः । एवञ्चानुवृत्तिसामर्थ्यादनेनातिदेशेन तयोरनतिदेश इति तात्पर्यम् । नन्वेवं सति'तेन बहुव्रीहिं विशेषयिष्याम' इत्ययुक्तमत आह–**समासमात्रस्येति** । एवं च भाष्येण सामर्थ्यसिद्धं वस्त्वेव

कर्मधारयवदुत्तरेषु ।८।१।११।

कर्मधारयवत्त्वे कानि प्रयोजनानि ? ॥ * कर्मधारयवत्त्वे प्रयोजनं सुब्लोपपुंवद्भावान्तोदात्तत्वानि ॥*॥ [**कर्मधारयत्त्वे सुब्लोपपुंवद्भावाऽन्तोदात्तत्वानि**] ? ॥ **प्रयोजनं** सुब्लोपः-पटुपटुः । [**सुब्लोपः**] ॥ **पुंवद्भावः**–**पटुपट्वी** [**पुंवद्भावः**] ॥ अन्तोदात्तत्वम्–पटुपटुः [कर्मधारयवदुत्तरेषु] ॥

प्रकारे गुणवचनस्य ८।१।१२।

गुणवचनस्येति किमर्थम् ? ॥ **अग्निर्माणवकः गौर्वाहीकः** । ॥*॥ प्रकारे

प्र.] **'ऋक्पूरब्धू'**रित्यत्र बहुव्रीहिग्रहणं, 'समासाच्च तद्विषया'दित्यतःसमासग्रहणं च संबन्धानुवृत्त्याऽनन्तरैर्योगैः संबन्धमगच्छदनुवर्तते । तदुभयं वाक्यभेदेन संबध्यते, तेन 'ऋगाद्यन्तात्समासादकारः प्रत्ययो भवति । बहुव्रीहेस्तु समासादेव न त्वतिदेशा'दित्यर्थः संपद्यते । अथ 'नने'त्यत्र बहुव्रीहिवद्भावाभावान्नलोपः कस्मान्न भवति ? । 'वनं समासे' इत्यतः समासग्रहणं संबन्धानुवृत्त्या पुंवद्भावमविशेषयन्नलोपेऽनुवर्तते इत्यदोषः । [एकं बहुव्रीहिवत्] ॥

कर्म । 'कालककालिके'त्यादौ 'न कोपधाया' इति प्रतिषेधात् पुंवद्भावो बहुव्रीहिवद्भावेन न सिध्यति, पूर्वपदप्रकृतिस्वरश्च प्राप्नोतीति कर्मधारयवद्भावाऽधिकारः ॥ [कर्मधारयवदुत्तरेषु] ॥

प्रकारे । **गुणवचनस्येति किमर्थमिति** । क्रियमाणेऽपि गुणवचनग्रहणेऽनिष्टप्रसङ्ग इति प्रश्नः । **अग्निर्माणवक इति** । अग्निशब्दो वह्नौ वृत्तः सोऽय-

---

उ.] दर्शितमिति भावः । ननु 'स्थूलादिभ्यः प्रकारवचने क'नित्यादावपि संबन्धः स्यादत आह–**संबंधानुवृत्त्येति** । **'वनं समासे' इत्यत इति** । उत्तरपदाक्षिप्तसमासस्य तेन विशेषणान्मुख्यसमास एव तत्प्रवृत्तिरिति भावः । **परेतु** बहुव्रीहिवद्भावेन नोत्तरस्य मुख्यसमासचरमावयवत्वरूपमुत्तरपदत्वम् ,अतो नात्र लोप इत्याहुः । **इत्यदोष इति** । अधिज्ञब्दस्याऽऽबाधायां द्वित्वे 'इकोऽसवर्ण'इत्यस्य 'न समास' इति शाकलप्रतिषेधस्तु सित्साहचर्येणौपदेशिकसमासस्यैव तत्र ग्रहणान्नेति बोध्यम् । यद्यभिधानमस्ति । [**एकं बहुव्रीहिवत्**] ॥

कर्मधारयव । ननु 'बहुव्रीहिव'दित्यनुवृत्त्यैव सिद्धे किमनेनेत्यत आह–**कालकेत्यादि** । स्वार्थिककान्तमेतत् । आबाधाविषये तु नैतादृशेषु पुंवत्त्वम् । अतएव तत्रैवं कर्मधारयवद्भावो नोक्तः । **अन्तोदात्तत्वमिति** भाष्ये । आम्रेडितानुदात्तत्वं तु न, अतिदेशेन स्वाश्रयविरुद्धस्य निवर्तनात् । अतएवाधिकारत्वेऽपि तस्यात्रानुपस्थितिरिति बोध्यम् ॥

प्रकारे गुण । **प्रकारोऽत्र** सादृश्यम् । **अनिष्टप्रसङ्ग इति** । सर्वस्यापि सादृश्ये

सर्वेषां गुणवचनत्वात्सर्वप्रसङ्गः ॥*॥ [**प्रकारे सर्वेषां गुणवचनत्वात्सर्व-प्रसङ्गः**] । **सर्वे हि शब्दाः प्रकारे वर्तमाना गुणवचनाः सम्पद्यन्ते । तेनेहापि प्राप्नोति–अग्निर्माणवकः । गौर्वाहीक इति** ॥*॥ सिद्धन्तु प्रकृत्यर्थविशेषण-त्वात् ॥*॥ **सिद्धमेतत्** ॥ **कथम्** ? ॥ **'प्रकृत्यर्थविशेषणत्वात्' । प्रकृत्यर्थो विशेष्यते । नैवं विज्ञायते–'प्रकारे वर्तमानस्य गुणवचनस्ये'ति ॥ कथं तर्हि** ? ॥ **'गुणवचनस्य शब्दस्य द्वे भवतः प्रकारे वर्तमानस्ये'ति । अथवा–'प्रकारे गुणवचनस्ये'त्युच्यते, सर्वश्च शब्दः प्रकारे वर्तमानो गुणवचनः सम्पद्यते ।**

प्र.] मिति सादृश्यनिमित्तादभेदोपचारान्माणवके वर्तत इति द्रव्ये पूर्वं संवृत्य संप्र-त्यपि द्रव्यवचन इति गुणवाचित्वाऽभावान्न द्विरुच्यते । एवं 'गौर्वाहीक' इति गोशब्दः सास्नादिमति वर्तित्वा पूर्ववद्वाहीके वर्तते । **प्रकारे सर्वेषामिति ।** अग्निशब्दोऽग्निगतं तैक्ष्ण्यं माणवके प्रतिपादयितुं प्रयुज्यत इति गुणशब्दः । एवं गोशब्दः सास्नादिमद्गतजाड्यप्रतिपादनाय वाहीके प्रयुज्यते । **गुणगुणिनोश्चात्र** विषये नित्यमभेदोपचाराद्भेदनिबन्धनषष्ठ्यभावः । **सिद्धंत्विति ।** द्विर्वचनस्य प्रकृतिः स्थानीति तदर्थो विशेष्यते न तु प्रकारः । तत्र सर्वस्य गुणवचन-त्वाव्यभिचाराऽभावात्तद्ग्रहणाद्गुणवचनो यः शब्दो निर्ज्ञातस्तस्य सादृश्ये द्योत्ये

उ.] वर्त्तमानस्य गुणवचनत्वादिति भावः । **अग्निगततैक्ष्ण्यमिति ।** साधारणं तदेवाग्नि-शब्दलक्ष्यम्, एतत्प्रतीतिस्तु व्यञ्जनयेति भावः । नन्वेवं गुणवचनत्वे 'पटस्य शुक्ल'इतिवत् 'मा णवकस्याग्नि'रित्यपि कदाचित्प्रयुज्येतेत्यत आह–**गुणगुणिनोश्चेति ।** इति केचित् । परे-त्वेवं रीत्या व्याख्याने 'गौर्वाहीको जड'इत्यत्र पौनरुक्त्यं, सादृश्यादिनिमित्ताऽभेदोपचार एव लक्षणेत्यर्थपरेण 'पुंयोगा'दिति सूत्रस्थभाष्येण विरोधश्च, तस्माद्गुणवचनग्रहणाऽभावेऽग्नि-र्माणवक इत्यादौ सादृश्यस्य व्यङ्ग्यतया प्रतीतेर्द्विवचनं स्यादित्याशयः । कैयटस्याप्यय-मेवाशयः, अन्यथा प्रकारे वृत्तित्वस्याऽप्यभावात्तदसङ्गतिः । **प्रकारे सर्वेषामिति ।** गुण-व्यञ्जकत्वेन सर्वोऽपि गुणवचनस्तव लक्षकत्वेनेवेति भावः । तद्व्यङ्ग्यार्थे गुणे भेदान्वयेन षष्ठ्यापि स्यादित्याशङ्कावारणाय 'गुणगुणिनोश्चे'त्याद्युक्तं, प्रकारव्यञ्जकत्वात्प्राग्यो गुण-वचन इत्यर्थ इत्युत्तरमित्याहुः । **द्विर्वचनस्येति ।** उपस्थितत्वात् । न तु प्रत्ययस्य प्रकृति-रित्यर्थः । **न तु प्रकार इति ।** प्रकारे वर्तमानः सन्यो गुणवचन इत्येवंनार्थः, किन्तु गुणवचनः सन्यः प्रकारे वर्त्तमान इत्यर्थ इति भावः । तत्र हेतुमाह–**तत्र सर्वस्येति ।** प्रकारे वर्तमा-नस्य सर्वस्येत्यर्थः । प्रकृत्यर्थविशेषणत्वे योऽर्थो निष्पन्नस्तं दर्शयति—**तद्ग्रहणाद्गुण-वचनो य इति ।** गुणवचनग्रहणसामर्थ्यादीदृशोऽर्थ इति भावः । **सादृश्ये द्योत्ये इति ।**

तत्र प्रकर्षगतिर्विज्ञास्यते–'साधीयो यो गुणवचन'इति ॥ कश्च साधीयः? ॥ यः[1] प्रकारे च प्राक्च[2] प्रकारात् ॥ अथ वा 'प्रकारे गुणवचनस्ये'त्युच्यते, सर्वश्च शब्दः प्रकारे वर्त्तमानो गुणवचनः संपद्यते त[3] एवं विज्ञास्यामः— 'प्राक्प्रकाराद्यो गुणवचन'इति ॥ * ॥ आनुपूर्व्ये[4] द्वे भवतः ॥ * ॥ **आनुपूर्व्ये द्वे भवत इति वक्तव्यम् । मूलेमूले स्थूलाः । अग्रे[5]ऽग्रे सूक्ष्माः ॥*॥ स्वार्थे-**

प्र.] द्वे भवत इति सूत्रार्थः। ननु वक्ष्यत्येतत्–'त एवं विज्ञास्यामः प्राक् प्रकाराद्यो गुणवचन' इति, तत्कोऽनयोरर्थयोर्भेदः ? । उच्यते–इह प्रतिज्ञामात्रं कृतं 'सिद्धं त्वि'ति। तत्र तूपपत्तिर्वक्ष्यते। **तत्र प्रकर्षगतिरिति।** सामर्थ्याद्गुणवचनत्वे लब्धे पुनर्गुणवचनग्रहणं प्रकर्षप्रतिपत्त्यर्थमुपात्तमित्यर्थः । **प्राक् प्रकारादिति ।** गुण-वचनग्रहणसामर्थ्यादवस्थाविशेषः परिगृहीतः। इह च सादृश्यं प्रकार आश्रीयते न तु भेदः। पटुपटुरिति ह्युक्ते पटुसदृशः प्रतीयते। 'प्रकारवचने जातीय'रित्यत्र सादृश्यं प्रकारः केषांचिन्मते गृह्यतेऽन्येषां तु भेदः प्रकारः। अत्र केचिदाहुः–गुणोपसर्जनद्रव्यवाचिनोपि द्विर्वचनं भवति 'शुक्लशुक्लः पट'इति, गुण-मात्रवाचिनोऽपि 'शुक्लशुक्लं रूप'मिति। अन्ये तु गुणविशिष्टद्रव्यवाचिन एव

उ.] व्यङ्ग्ये इत्यर्थः। एवं च द्विर्वचने पटुादयः शब्दाः सादृश्यनिमित्तादभेदोपचारादपटुबोधका इति भावः। एवं हि पटुसादृश्यं तत्र द्योतितं भवति। एवं च यस्य परिपूर्णं पटुत्वं यः पटु-कार्याणि सर्वाणि करोति तेन यो न्यूनस्तत्कार्यकारी स 'पटुपटु'रित्युच्यते। 'प्रकारेवर्तमान-स्ये'त्यस्यापि-व्यञ्जनया प्रकारे वर्तमानस्येत्यर्थः। **इह प्रतिज्ञामात्रमिति**। 'अथवे'ति पक्षान्त-रोक्तिद्वारेणोक्तेऽर्थे हेतुरभिधीयते इति भावः। **सामर्थ्यादिति।** प्रकारे वर्तमानस्य सर्वथा-गुणवचनत्वादिति भावः। पूर्वव्याख्यानादुत्तरत्र विशेषं दर्शयति–**गुणवचनग्रहणेति**। गुणवचनस्य प्रकारे वर्त्तमानस्येत्यर्थ आश्रीयत इति भावः। 'गौर्वाहीक'इत्यादौ तु प्रकार-वृत्तितायाः प्राङ् गुणवचनत्वमिति तात्पर्यम्। आद्यपक्षे द्वित्वोत्तरं प्रकारे व्यञ्जनावृत्तिग्रहः, द्वितीये प्रकारे तद्ग्रहोत्तरं द्वित्वमिति पक्षयोर्भेदः। अत्राद्य पक्ष एव ज्यायानिति ध्वनयितुं पुनरप्यथवेत्यादिना भाष्ये तस्यैवोपादानं। **केषाञ्चिन्मतेनेति**। वामनादीनामित्यर्थः। **अन्येषान्त्विति**। जयादित्यादीनाम्। तत्राद्यमते द्रव्यवचनेभ्यः सावकाशस्य जातीयरो गुणवचने सादृश्येऽनवकाशेन द्वित्वेन प्राप्तोऽपि बाधो नेष्यत इति **वामनः**। तत्र मानं चिन्त्यमिति **जयादित्य**मतमेव युक्तमिति बोधयितुं तत्तन्मतोक्तिः। **गुणमात्रवाचिनोऽपीति**। व्याप्तिन्यायादिति भावः। **अन्येत्विति**। वचनग्रहणबलेन गुणवचनादित्या-

ऽवधार्यमाणेऽनेकस्मिन् द्वे भवतः ॥❀॥ **स्वार्थेऽवधार्यमाणेऽनेकस्मिन् द्वे भवत इति वक्तव्यम् । अस्मात्कार्षापणादिह भवद्भ्यां माषं माषं देहि ॥ अवधार्यमाण इति किमर्थम् ? ॥ अस्मात्कार्षापणादिह भवद्भ्यां माषं देहि द्वौ देहि त्रीन् देहि ॥ अनेकस्मिन्निति किमर्थम् ? ॥ अस्मात्कार्षापणादिह भवद्भ्यां माषं देहि । माषमेव देहि ॥ किं पुनः कारणं न सिध्यति ? ॥ अनवयवाभिधानं वीप्सार्थ इत्युच्यते, अवयवाभिधानं चाऽत्र गम्यते ।**

प्र.] द्विर्वचनं मन्यते—'मूलेमूल'इति । अग्रमध्यमूलानि त्रयो भागाः, तत्रैकमेव मुख्यमग्रं मूलं च, अन्येषां तु भागानामपेक्षाकृतोऽग्रमूलव्यपदेशः, अधःसंनिवेशापेक्षोऽग्रव्यपदेशः । उपरि संनिवेशमपेक्ष्य मूलव्यपदेशः । नचैकरूपं भागानां स्थौल्यं सौक्ष्म्यं वा, किं तर्हि यथामूलमुपचीयते स्थौल्यं, यथाग्रं च सौक्ष्म्योपचय इति वीप्साया अभावः । **स्वार्थ इति ।** स्वार्थग्रहणमर्थान्तराऽभावप्रदर्शनार्थम् । **अस्मात्कार्षापणादिति ।** अनेकमाषसमुदायः कार्षापणः । तत्र सर्वे माषा दानक्रियया न व्याप्यन्ते किं तर्हि द्वावेवेति वीप्साऽभावः । **भिन्नार्थत्वा**च्चाऽनेन द्विर्वचनेनैकशेषो न बाध्यते । 'इह भवद्भ्यां माषौ देही'त्युक्ते एकैकं देहीत्यर्थो न गम्यते । माषं माषं देहीत्युक्ते एकैकदानप्रतीतिः । **द्वौ देहीति ।** माषं माषौ माषान्देहीत्यस्यार्थस्य प्रदर्शनपरमेतत् । माषशब्दस्य हि द्विर्वचनाऽभावः प्रदर्शयितव्यस्तत्र यथेच्छं देहीत्यस्यार्थस्य प्रदर्शनादवधारणस्याऽभावः । **माषमेव देहीति ।** अवधारणमत्राऽस्तीति प्रतिपादयति । **किं पुनरिति ।** यथा द्वावेव माषौ निर्ज्ञातौ यदा दानक्रियया व्याप्येते तदा माषं माषं देहीति वीप्सायां द्विर्वचनं भवति, एवमनेकमाषसमुदायादपि कार्षापणाद्द्वयोरस्ति दानक्रियया व्याप्तिरिति सिद्धं द्विर्वचनमिति भावः । इतर आह—**अनवयवाभिधानमिति ।** एवं मन्यते—वीप्सायां संनिहिताऽर्थस्य न कस्य चिद्वर्जन-

---

उ.] द्वाविवेति तदाशयः । ननु वीप्साद्विर्वचनेनैवानुपूर्व्येऽपिसिद्धत्वात्किं वचनेनेत्यत आह—**अग्रमध्येति । वीप्साया इति ।** एकजातीयानां पदार्थानामेकरूपगुणाद्यन्वये हि वीप्सेति भावः । 'मूले मूले पथि विटपिना'मित्यादौ तु वीप्सायामेव द्वित्वं बोध्यम् । **स्वार्थग्रहणमिति ।** अन्यथात्राऽपि एकमितिवद्वीप्सार्थसंबन्ध इति भ्रमः स्यादिति भावः । भिन्नार्थत्वमुपपादयति—**इह भवद्भ्यामिति । न गम्यत इति ।** किन्तु प्रत्येकं माषद्वयदानं प्रतीयते इति भावः । ननु 'द्वौ देही'त्याद्ययुक्तं, द्विशब्दादेर्द्विवचनाऽभावप्रतिपादने तात्पर्याऽभावादित्यत आह—**माषं माषाविति ।** भाष्ये 'माषं देही'त्यस्य विवरणं—'माषमेव

आर्तश्चावयवाभिधानं, यो ह्युच्यते–'अस्मात्कार्षापणादिह भवद्भ्यां माषं माषं देही'ति । माषं माषमसौ दत्वा पुनः शेषं पृच्छति–'किमनेन क्रियता'मिति ॥ यः पुनरुच्यते–'इमं कार्षापणमिह भवद्भ्यां माषं माषं देही'ति माषंमाषमसौ दत्वा तूष्णीमास्ते ॥ ॥ * ॥ चापले द्वे भवतः ॥ * ॥ चापले द्वे भवत इति वक्तव्यम् । अहिरहिर्बुध्यस्व बुध्यस्व ॥ न चावश्यं द्वे एव, यावद्भिः शब्दैः सोऽर्थो गम्यते तावन्तः प्रयोक्तव्याः । अहिरहिरहि बुध्यस्व बुध्यस्व बुध्यस्वेति ॥

॥*॥ क्रियासमभिहारे द्वे भवतः ॥*॥ क्रियासमभिहारे द्वे भवत इति वक्तव्यम् । स भवान् लुनीहिलुनीहीत्येवायं लुनाति । पुनीहि पुनीहीत्येवाऽयं पुनाति ॥ ॥ * ॥ आभीक्ष्ण्ये द्वे भवतः ॥ * ॥ आभीक्ष्ण्ये द्वे भवत

प्र.] मस्ति इह तु वर्जनमस्तीति वीप्साया अभावः । **इमं कार्षापणमिति** । अत्र वीप्सायां द्विर्वचनमिति निःशेषमाषदानावगमः । **चापल इति** । आशुप्रतिपादनं चापलम् । **अहिरहिरिति** । यद्यहमेनं न बोधयामि तदा हन्यत एवायमहिनेति ज्ञात्वाऽऽशु प्रतिपादनाय वाक्यप्रयोगः । **न चावश्यमिति** । एवं च ब्रुवताऽनेन नेदं शास्त्रीयं द्विर्वचनं किं तर्हि परप्रत्यायनायाऽनेकस्वतन्त्रपदप्रयोग इत्युक्तं भवति । एवं चाहिरहिरित्याम्रेडितानुदात्तत्वाऽभावाद्यथाप्राप्तः स्वरो भवतीत्याहुः । **क्रियासमभिहार इति** । लोडन्तस्यैवेदं द्विर्वचनं न यङन्तस्य, लोटः समुच्चयेऽपि विधानात्क्रियासमभिव्याहारव्यक्तौ केवलस्य सामर्थ्याभावात् । यङ् तु क्रियासमभिहारविषय एवेति तद्द्योतने स्वयं सामर्थ्यान्नापेक्षते द्विर्वचनम् । **आभीक्ष्ण्य इति** । ननु चाभीक्ष्ण्यं नित्यतेति नित्यवीप्सयोरिति सिद्धं द्विर्वचनम् । नैतदस्ति । पुनःपुनः क्रियाया उत्पत्तिराभीक्ष्ण्यम् ।

उ.] देही'ति । **न कस्यचिद्वर्जनमिति** । यथा 'ग्रामो ग्रामो रमणीय' इत्यादौ । **एवञ्च ब्रुवतेति** । वचनप्रत्याख्याने तात्पर्यमिति भावः । **लोडन्तस्यैवेति** । अस्य बीजादि प्रागेव निरूपितम् । आभीक्ष्ण्य इति वचनस्य प्रयोजनं वक्तुं नित्याभीक्ष्ण्यशब्दयोरर्थभेदप्रदर्शनायाह–**ननु चेति । यथा जीवति जीवतीति** । किं देवदत्तो मृतो वा तिष्ठति वेति प्रश्ने इदमुत्तरम् । **आभीक्ष्ण्यविषय इति** । कूटस्थादिव्यावृत्तये इत्यर्थः । विच्छेदा-

इति वक्तव्यम्। भुक्त्वा भुक्त्वा व्रजति। भोजंभोजं व्रजति। ॥*॥ डाचि च द्वे भवतः ॥*॥ डाचि च द्वे भवत इति वक्तव्यम्॥ पटपटायति घटघटायति शरशरायति ॥*॥ पूर्वप्रथमयोरर्थातिशयविवक्षायां

प्र.] तथा हि 'भुक्त्वाभुक्त्वा व्रजती'त्युक्ते सत्यपि क्रियाविच्छेदे पुनर्भुङ्क्ते पुनर्व्रजतीति क्रियाऽऽवृत्तिः प्रतीयते। नित्यतो क्रियाया अविच्छेदो, यथा 'जीवतिजीवती'त्युक्ते जीवत्येवायमिति प्रतीयते न त्वावृत्तिः, न ह्यसौ जीवित्वा म्रियते मृत्वा वा जीवति, जीवनमेव दीर्घमविच्छिन्नं प्रतीयते। यत्तूक्तं भाष्ये–'तद्य आभीक्ष्ण्ये वर्तत'इति,–नित्यशब्दस्य विषयोपलक्षणार्थम्, आभीक्ष्ण्यविषयो यो नित्यशब्दस्तस्य ग्रहणमित्यर्थः। तथा च **वृत्तिकारा** आहुः–'यां क्रियां कर्ता प्राधान्येनाऽनुपरमन्करोति तन्नित्यम्'। अन्ये त्वाहुः–भुक्त्वाभुक्त्वा व्रजतीत्यादौ क्त्वाणमुलन्तस्य द्विर्वचनं प्राप्नोति तिङन्तस्य च। तत्राभीक्ष्ण्यसंशब्दनेन यो विहितस्तदन्तस्य यथा स्यात्तिङन्तस्य मा भूदिति नियमार्थमिदम्। अन्ये तु प्रत्ययेनाभीक्ष्ण्यस्य द्योतनादप्राप्तं द्विर्वचनं विधीयत इत्याहुः। अथ 'क्रियासमभिहारे द्वे भवत'इति सिद्धे 'आभीक्ष्ण्ये द्वे भवत'इति किमर्थमुच्यते। क्रियासमभिहारसंशब्दनेन यो विधीयते तदन्तस्यैव द्विर्वचनमिति कश्चिद्विपर्यस्येदिति

उ.] ऽविच्छेदौ तु न विवक्षिताविति तात्पर्यम्। **तिङन्तस्य चेति।** भोजनवद्व्रजनस्यापि पौनःपुन्यावगमादिति भावः। अत्र नियमे 'आभीक्ष्ण्यविहितप्रत्ययान्तसमभिव्याहारे'इति पूरणीयम्। तेन पचति पचतीत्यादावप्येवं सति द्विर्वचनानापत्तिरिति परास्तम्। **अन्ये त्विति।** अत्राऽरुचिर्बीजन्तु अर्थान्तरेऽपि तयोर्विधानेन केवलयोस्तद्द्योतने सामर्थ्याऽभाव इति। आद्यं व्याख्यानमपि न युक्तं,'तद्य आभीक्ष्ण्य'इति भाष्यसङ्कोचे मानाभावात्। 'नित्यवीप्सयोरित्येव सिद्ध'मिति वृत्तिविरोधाच्च। वृत्तिस्थनित्यलक्षणमपि चिन्त्यमेव, अप्रधानक्रियाकृतविच्छेदस्य नित्येआभीक्ष्ण्ये चावश्यं सत्त्वं। विच्छेदकाऽप्रधानक्रिया च 'भुक्त्वा भुक्त्वे'त्यादावुपात्तव्रजनादिरूपैव, उपस्थितपरित्यागे मानाऽभावात्। एवं क्त्वाप्रत्ययस्तत्वाद्यन्तद्वित्वाभ्यामेव व्रजनादिनिष्ठाभीक्ष्ण्यस्य द्योतनान्न त्त्वाद्यन्तसमभिव्याहारे तिङन्तस्य द्वित्वमिति द्वितीयमतमपि चिन्त्यम्। 'जीवति जीवती'त्यादौ तु 'कमलानि कमलानी'तिवदेकं जीवतिपदं दीर्घाऽविच्छिन्नजीवनलक्षकमिति न तत्र शास्त्रीयद्वित्वमिति मम प्रतिभाति। एतत्प्रयोजनन्तु पौनःपुन्यस्य केनचिद्द्योतने सौत्रद्वित्वाऽप्रवृत्तिज्ञापनमिति 'नित्यवीप्सयो'रित्यत्र उपपादितमस्माभिः। **कश्चिद्विपर्यस्येदिति।** वस्तुतस्तु इदमेव ज्ञापकं,–'तस्य लोप्यैव प्रवृत्ति'रिति, तेन यङन्ते न तस्य प्रवृत्तिरित्याहुः।

द्वे भवतः ॥ * ॥ **पूर्वप्रथमयोरर्थातिशयविवक्षायां द्वे भवत इति**

प्र.] वाक्यद्वयोपन्यासः । **डाचीति**। विषयसप्तमीयम्। तेनाऽनुत्पन्न एव डाच्यकृत-टिलोपस्य पटदित्यादेर्द्विर्वचनं,ततोऽव्यक्तानुकरणादिति डाच् । ततष्टिलोपः। ततो 'नित्यमाम्रेडिते डाची'ति पररूपत्वम्। केचित्तु पररूपविधानमच्छब्दस्य डाचीति परसप्तम्यामपि टिलोपात्प्राग्द्विर्वचनमित्यस्यार्थस्य ज्ञापकमाहुः । तदयुक्तम् । 'पत'दित्यादेः कृतटिलोपस्याऽप्यच्छब्दस्य संभवात्। तस्मा'ड्डाची'ति विषयसप्तम्ये-वाश्रयणीया । प्रयोगदर्शनवशाच्चाव्यक्तानुकरणाड्डाचीदं द्विर्वचनं न तु सूत्रान्तर-विहिते इति द्वितीयाकरोतीत्यादौ द्विर्वचनाऽभावः । केचित्तु 'नित्यमाम्रे-डिते डाची'ति पररूपविधानमेवाऽव्यक्तानुकरणाड्डाचि द्विर्वचनमनुमापयती-त्याहुः । यदा तु पररूपमकारान्तानुकरणाद्वेतीति प्रत्याख्यायते तदा द्विर्वचनं वक्तव्यमेव । बहुलग्रहणमत्राऽन्येऽधीयते, तेन द्वितीयाकरोतीत्यादौ द्विर्वचना-भावो, डाचीति परसप्तम्यामपि नित्यादपि टिलोपात्पूर्वं द्विर्वचनं च सिध्यति । **पूर्वप्रथमयोरिति** । केचिदाद्यादिविवक्षायामिति पठन्ति । अन्ये त्वर्थातिशय-विवक्षायामिति । तत्र भिन्नार्थत्वाद्द्विर्वचनेनातिशायिको न बाध्यत इत्याहुः । तथा हि 'पूर्वतरं भुङ्क्ते' इत्युक्ते किमात्मसाध्यक्रियान्तरापेक्षं भोजनस्य पूर्वत्वमथ भोक्त्रन्तरसाध्यभोजनापेक्षमिति सन्देहः । एवं 'पूर्वपूर्वतरं पुष्यती'त्ययमप्यर्थो

उ.] **विषयसप्तमीति** । परसप्तम्यां तु डाचि द्विर्वचनस्य शब्दान्तरप्राप्त्याऽनित्यत्वेन नित्यत्वाट्टिलोपे पटपटेत्यस्याऽसिद्धिरन्योन्याश्रयश्च,–डाचि द्वित्वं द्वित्वे द्व्यजवरार्धत्वं सति च तस्मिन् डाजितीति भावः । **ततष्टिलोप इति** । उत्तरखण्डे पररूपं च, डाच्परा-म्रेडिते परे पूर्वखण्डस्य पररूपमेवेति । अन्यथा डाच्पराम्रेडिते पररूपविधानमनर्थकं स्यादिति भावः । **यदा तु पररूपमिति** । 'नित्यमाम्रेडिते डाची'त्येतत् । **अत्रान्यै-रिति** । वृत्तिकारैः । **आश्रीयत इति**। अपकृष्य व्याख्यात इत्यर्थः । बहुलग्रहणस्य प्रयोजनान्तरमाह–**परसप्तम्यामपीति** । अतएव डाजभावेऽपि क्वचिद्भवति 'पटपटे'ति । अतएव 'नाम्रेडितस्यान्त्यस्य तु वे'ति चरितार्थं । भाष्ये **डाचिचेति** । चेन तदभावेऽपीत्यपि बोध्यम् । अन्योन्याश्रयपरिहाराय विषयसप्तम्या आवश्यकत्वमिति । **केचिदाद्यादीति** । पाठद्वयेऽपि पूर्वप्रथमशब्दयोर्योऽर्थस्तस्यातिशयविवक्षायामित्यर्थः । नन्वेवं विशेषविहि-तत्वादातिशायिकस्य द्वित्वेन बाधः प्राप्नोतीत्यत आह–**तत्र भिन्नार्थत्वादिति** । आति-शायिकशब्दोऽनुशतिकादिः । **पूर्वत्वमिति**। पूर्वत्वातिशय इत्यर्थः । **इति सन्देह इति** । प्रकरणादिवशाच्च निर्णय इति भावः। 'पूर्वं पूर्वं भुङ्क्ते' इत्यतस्तु अन्येभ्यो भोक्तृभ्योऽ-

वक्तव्यम्। पूर्वंपूर्वं पुष्प्यन्ति । प्रथमंप्रथमं पच्यन्ते ॥ * ॥ डतरडतमयोः समसम्प्रधारणायां स्त्रीनिगदभावे द्वे भवतः ॥ * ॥ **डतरडतमयोः समसंप्रधारणायां स्त्रीनिगदे भावे द्वे भवत इति वक्तव्यम्। उभाविमावाढ्यौ, कतराकतराऽनयोराढ्यता। सर्वे इमे आढ्याः, कतमा कतमैषामाढ्यतेति।** ॥ * ॥ कर्मव्यतिहारे सर्वनाम्नो [द्वे भवतः] समासवच्च बहुलं, यदा न समासवत्प्रथमैकवचनं तदा पूर्वपदस्य ॥ * ॥ **कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यम्। 'समासवच्च बहुलं। यदा न समासवत्प्रथमैकवचनं भवति तदा पूर्वपदस्य'। अन्योन्यमिमे ब्राह्मणा भोजयन्ति।**

प्र.] गम्यते न तावदयं किसलयितो यावदेव पुष्प्यतीति। 'पूर्वं पूर्वं पुष्प्यती'त्यस्मात्तु पुष्पितृभ्योऽन्येभ्यः पूर्वं पुष्प्यतीत्यर्थः प्रतीयते। अत एवाद्यादिविवक्षायामित्युच्यते । आदेरादिविवक्षायामादेर्वातिशयविवक्षायां द्विर्वचनमित्यर्थः। **डतरडतमयोरिति**। डतरडतमान्तस्य द्वे भवतः, आढ्यत्वादिना समेन तुल्येन गुणेन संप्रधारणायां निरूपणायां विषये। तथाहि उभाविमावाढ्याविरयुक्तेऽनेकप्रकाराढ्यत्वसंभवात्प्रतिपत्ता किंकृतमनयोराढ्यत्वमिति सन्दिहानः पृच्छति—'कतराकतरानयोराढ्यते'ति। स्वार्थे चैतद्विर्वचनम्। **स्त्रीनिगदो भावः**—स्त्रीलिङ्गशब्दाभिधेयो भूतिः, ऋद्धिः, संपत्, आढ्यतेति। निगद्यत इति **निगदः**। '**नौ गदे**'त्यप्। स्त्रिया निगदः—स्त्रीनिगदः। **कर्मव्यतिहार इति**। क्रियाव्यतिहार इत्यर्थः। तत्र द्विर्वचनं नित्यं भवति। **समासवद्भावस्तु** बहुलम्। तत्र बहुल-

---

उ.] तिशयेनेत्यर्थ एव गम्यते। **अयमपीति**। अन्येभ्यः पुष्पितृभ्योऽतिशयेनेत्यप्यर्थः। **अन्येभ्यः पूर्वमिति**। अन्येभ्योऽतिशयेनेत्यर्थः। पाठान्तरेणैकवाक्यत्वायाह—**आदेर्वातिशयेति**। द्वितीय 'आदि'शब्दोऽतिशयलक्षक इति भावः। एवं चेदं वचनं नावश्यकम्, एकस्य पूर्वशब्दस्यातिशयलक्षणयाऽप्युपपत्तेः। **किं कृतमिति**। किं साधनसंपत्कृतमुत दैवकृतमित्यर्थः। परिप्रश्ने प्रत्ययौ। '**स्त्रीनिगद**' इत्यस्यार्थकथनं—**स्त्री लिङ्गेति**। स्त्रीलिङ्गशब्दाभिधेये भावे वर्तमानयोरित्यर्थः। भावश्चाऽविशेषात्कृत्तद्धितोऽपि गृह्यते। तदाह—**भूतिः ऋद्धिः संपत् आढ्यतेत्यादि**। **निगदः**—निगदनकर्मीभूतोऽर्थः। स्त्रीशब्देन स्त्रीलिङ्गः शब्दः। कर्तृषष्ठ्या समासः। **क्रियाव्यतिहार इति**। परस्परकरणमत्र सः। समासवद्भावस्तु बहुलमिति। अनन्तरत्वात्तेनैव बहुलशब्दस्य संबन्ध इति भावः। अत

अन्योऽन्यस्य भोजयन्ति । इतरेतरं भोजयन्ति । इतरेतरस्य भोजयन्ति ।
॥*॥ स्त्रीनपुंसकयोरुत्तरपदस्य वाऽम्भावः ॥*॥ **स्त्रीनपुंसकयोरुत्तरपदस्य वाऽम्भावो वक्तव्यः । अन्योन्यमिमे ब्राह्मण्यौ भोजयतः । अन्योन्यां [च] भोजयतः । इतरेतरम् [इमे ब्राह्मण्यौ] भोजयतः । इतरेतरां भोजयतः । अन्योन्यमिमे ब्राह्मणकुले भोजयतः । अन्योन्यां भोजयतः । इतरेतरम् [इमे ब्राह्मणकुले] भोजयतः । इतरेतरां भोजयतः ॥** [प्रकारे गुणवचनस्य] ॥

प्र.] ग्रहणादन्योन्यशब्दे समासवद्भावाऽभावात्सुब्लुग्न भवति, नाऽपि समासान्तोदात्तत्वमित्याम्रेडितानुदात्तत्वं भवति । इतरेतरशब्दे तु नित्यः समासवद्भाव इति सुब्लुक्समासस्वरौ भवतः । **स्त्रीनपुंसकयोरिति** । उत्तरपदस्य या विभक्तिस्तस्या आम्भावोऽन्यथानेकाऽल्त्वात् सर्वस्योत्तरपदस्याऽऽम्भावः स्यात् । तत्र 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव'इति स्त्रीनपुंसकयोः पुंवद्भावे कृते पक्षे आम्विधिः । वार्तिकेषु कर्मधारयवदिति न संबध्यत इति सुब्लोपादि न भवति ॥

उ.] एव भाष्ये 'यदा न समासव'दित्येवोक्तम् । **समासवद्भावाभावादिति ।** अत्र नित्यस्तदभावः । तथैव भाष्योदाहरणात् । एवं च **यदे**ति यत्रेत्यर्थकं भाष्यम् । भाष्ये— **प्रथमैकवचनं भवतीति ।** बहुलग्रहणसिद्धोऽयमर्थः । 'परस्पर'शब्दे तस्य स्त्वाद्यभावो नपुंसकेऽन्योन्यमित्यादौ पूर्वखण्डेऽमभावश्च । **तत एव नित्य इति ।** तथैव भाष्योदाहरणादिति भावः । भाष्ये **अन्योन्यस्ये**त्यादि कर्मणः शेषत्वविवक्षायां षष्ठी, पुत्राद्यपेक्षया । वार्तिकेषु कर्मधारयवत्पदासंबन्धज्ञापनायाऽत्र 'समासव'दित्युक्तिः । **उत्तरपदस्य या विभक्तिरिति ।** नन्वितरेतरशब्दसमासवद्भावात्सुपो लुकि समुदायात्पुनः सुबिति नोत्तरपदस्यायं सुबिति चेन्न; उत्तरपदोत्तरवर्त्तिसुप इत्यर्थेनाऽदोषात् । **स्त्रीनपुंसकयोरिति ।** 'सर्वनाम्नो वृत्तिमात्रे'इत्यस्य 'स्त्रिया'इति प्रकरणाद्बहिःपाठेन नपुंसकेऽपि प्रवृत्तिरिति भावः । तत्र नपुंसके पुंवत्त्वप्रवृत्तेः फलं चिन्त्यं । पुंवत्त्वं तु पूर्वखण्ड एव **इत्युक्तम्** । इदमपि इतरेतरशब्दविषयम् । अन्योऽन्ये समासवद्भावाऽभावेन वृत्तित्वाऽभावात् । तस्मात् **दलद्वये टाबभावः क्लीबे चाद्ड्डिरहः स्वमोः । समासे सोरलुक चेति सिद्धं बाहुलकात्त्रयम् ॥'** इति बोध्यम् । अतएवेतरेतरमित्यादावद्ड्भावः । अन्योन्यसंश्रयंत्वेतदिति स्त्रियामिति सूत्रस्थभाष्यप्रयोगः, अन्योन्यसहाया इति 'सर्वस्य द्वे'इति सूत्रस्थभाष्यप्रयोगश्च संगच्छते । तथा नपुंसकेऽन्योन्यमिति पूर्वपदे सोरम्भावोऽपि बाहुलकादेव बोध्यः । **परे तु** डतरादिभ्यो विहितयोः स्वमोरद्ड्डित्यर्थस्य सर्वादिसूत्रे भाष्ये उक्तत्वादितरेतरं मित्यादौ नाऽद्ड्डः प्राप्तिः । 'अन्योन्यमिमे ब्राह्मण्या'वित्यादावपि **'क्षुदुपहन्तुं शक्य'** मितिवत्सामान्ये नपुंसकमितिरीत्याऽन्यशब्दस्यैव द्वित्वेन टाप एवाऽभावः । **'स्त्रीनपुंसक-**

द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगा-ऽभिव्यक्तिषु ।८।१।१५।।

॥ * ॥ अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्युपसङ्ख्यानम् ॥ * ॥ अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्युपसङ्ख्यानं कर्तव्यम् । द्वन्द्वं स्कन्दविशाखौ । द्वन्द्वं–नारदपर्वतौ ॥ अत्यन्तसहचरित इति किमर्थम् ? ॥ द्वौ युधिष्ठिरार्जुनौ ॥ लोकविज्ञात इति किमर्थम् ? ॥ द्वौ देवदत्तयज्ञदत्तौ । अथ 'द्वन्द्व'मिति किं निपात्यते ॥ * ॥ 'द्वन्द्व'मिति पूर्वपदस्य चाऽम्भाव उत्तरपदस्य चाऽत्वं नपुंसकत्वं च ॥*॥ द्वन्द्वमिति पूर्वपदस्य चाऽम्भावो निपात्यते उत्तरपदस्य चात्वं नपुंसकत्वं च ॥ * ॥ उक्तं वा ॥ * ॥ [उक्तं वा] ॥ किमुक्तम् ? ॥ "लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्ये"ति, तत्र नपुंसकत्वमनिपात्यम् ॥ [द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्र] ॥

पदस्य ।८।१।१६। पदात् ।८।१।१७।

प्र.] द्वन्द्वम् । अत्यन्तसहचरित इति । अभिव्यक्तिग्रहणादतिप्रसङ्ग इति वचनम् । द्वौ युधिष्ठिरार्जुनाविति । लोकविज्ञानादभिव्यक्तावेतौ, न त्वत्यन्तसहचरितौ । पूर्वपदस्येति । द्वि औ द्वि औ इति स्थिते कर्मधारयवद्भावात्सुब्लुकि कृते पूर्वपदावयवस्येकारस्याऽम्भावः, उत्तरपदावयवस्याऽत्वं,समासान्तोदात्तत्वंच भवति । [द्वन्द्वं रहस्यमर्यादा] ॥

पदस्य । अथ किमर्थं पदस्येत्यधिक्रियते यावता वक्ष्यमाणानि कार्याणि पदविषयाण्येव । अर्थे प्रयुक्तस्यैवेदमन्वाख्यानं पदं चार्थे प्रयुज्यते । न च समर्थपरिभाषोपस्थानार्थः पदाधिकार उपयुज्यते । यस्मात्पदद्वयनिबन्धनेषुकार्येषु

उ.] यो'रित्यस्य तत्समानाधिकरणयोरित्यर्थ इत्याहुः । सुब्लोपादि न भवतीति । 'मूले मूले स्थूल' इत्यादौ । [प्रकारे गुणवचनस्य]

द्वन्द्वं रहस्य । अभिव्यक्तिग्रहणादिति । लोकप्रसिद्धिमात्रार्थकत्वात्तस्येति भावः । भाष्ये नपुंसकत्वं चेति । चेन कृतद्वित्वाद्विवचनोत्पत्त्यभावस्य सङ्ग्रहः । [द्वन्द्वंरहस्य]॥

पदस्य । यावता वक्ष्यमाणानीति । आमन्त्रितनिघातो युष्मदस्मदादेशाश्च सुबन्तस्यैव विधीयन्ते । 'तिङ्ङतिङ'इति निघातस्तिङन्तस्येत्यादि द्रष्टव्यम् । कुत्वादिसाधारण्येन पदस्यैव कार्ययोगे युक्त्यन्तरमाह–अर्थप्रयुक्तस्य चेति । न चेति । पदद्वयनिबन्धनेष्वित्यर्थः ।

आ कुतः पदाधिकारः ? ॥*॥ पदाधिकारः प्रागपदान्ताधिकारात् ॥*॥ **'अपदान्तस्य मूर्द्धन्य' इत्यतः[1] प्राक् पदाधिकारः ॥**

अथ 'पदा'दित्यधिकार आ कुतः ? ॥*॥ पदात्प्राक्[2] सुपि कुत्सनात्॥*॥ **पदादित्यधिकारः प्राक्सुपि कुत्सनात् । 'कुत्सने च सुप्यगोत्रादा'[3]विति वक्ष्यति प्रागेतस्मात्** ॥ * ॥ यणेकादेशस्वरस्तूर्ध्वं पदाधिकारात् ॥ * ॥ **यणेकादेशस्वरस्तूर्ध्वं पदाधिकारात्कर्तव्यः** ॥ * ॥ इह वचने ह्यपदान्तस्याऽ-

प्र.] समानवाक्ये निघातयुष्मदस्मदादेशा इति वक्ष्यते । कुत्वादीनि त्वेकपद-निबन्धनान्येव । नच भसंज्ञकस्य व्यावृत्त्यर्थः पदाधिकारो, अवयवस्य भत्वेपि समुदायपदावयवत्वाश्रयकुत्वादिप्रवृत्त्यभ्युपगमात्—वक्तरि दोग्धरीति । उच्यते—नलोपाद्यर्थः पदाधिकारः । असति (हि) तस्मिन् यथा राजभ्यामित्यादौ प्रातिपदि-कान्तस्य नकारस्य लोपो भवत्येवं राजानावित्यादावपि स्यात् । पदाधिकारे तु प्रातिपदिकस्य पदस्य योऽन्तो नकारस्तस्य लोपः । तथा संयोगान्तस्य पदस्य लोपो भवति गोमानित्यादौ, न तु गोमन्तावित्यादौ । 'मो नो धातो'रिति नकारः प्रशानित्यादौ भवति न तु प्रशामावित्यादौ । **आ कुत इति** । कस्य चित्कार्यस्याऽसिद्धिं मत्वा पृच्छति । **प्रागिति** । अपदान्तस्येति विरोध्यु-पादानात्प्रागतः पदाधिकारः । **प्राक्सुपि कुत्सनादिति** । यदि त्वत्र पदादित्य-नुवर्तेत 'देवदत्तो यत्पचति पूती'त्यत्रैव तिङन्तस्य निघातः स्यान्न तु 'पचति पूती'-त्यत्र । **यणेकादेशस्वर इति** । 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्ये'ति यणा-श्रयः स्वर 'एकादेश उदात्तेनोदात्त' इत्येकादेशस्वरश्चेडाया वेत्यस्मात्परौ कर्त-व्यौ । **इह वचने हीति** । पदस्येति स्थानषष्ठीत्युदात्तस्वरितयोर्यं यण्ततः परो

उ.] यत्र समानवाक्याधिकारो नास्ति तत्रापि तदुपयोगाऽभावमाह—**कुत्वादीनि त्विति** । एवञ्च पदद्वयनिबन्धनसामर्थ्यस्य तत्र वक्तुमशक्यत्वमित्यर्थः । **अवयवस्य भत्वेऽपीति** । सुपः प्राग्भागस्येत्यर्थः । **समुदायपदेति** । सुबन्तसमुदायपदेत्यर्थः । **कस्यचित्कार्य-स्येति** । वक्ष्यमाणावधिपरिग्रहे 'उदात्तस्वरितयोर्यण' इत्यादेर्वक्ष्यमाणरीत्या सर्वकार्यसि-द्धिमभिप्रेत्योत्तरम् । अस्याऽवधेरुपादानं लक्ष्यानुरोधेनेत्यत आह—**यदि त्वत्रेति** । यणेका-देशाश्रयः स्वर इति मध्यमपदलोपी समासस्तदाह-**यणाश्रय इति** । तत्र यण्निमित्तम्, एकादेशः स्थानी । **इडाया वेत्यस्मात्पराविति** । तदन्तमेव पदाधिकारस्योपयोगादिति भावः । **स्थानषष्ठीति** । 'षष्ठीस्थान'इति परिभाषणादिति भावः । **हल्स्वरेति** । 'स्वर-

प्राप्तिः ॥ * ॥ इह **क्रियमाणेऽपदान्तस्याऽप्राप्तिः स्यात्।** उदात्तस्वरितयो-र्यणः स्वरितोनुदात्तस्ये'ति। **इहैव स्यात्—कुमार्यौ किशोर्यौ। इह न स्यात्—कुमार्यः किशोर्यः॥** एकादेश उदात्तेनोदात्तः—**इहैव स्यात्—वृक्षौ प्लक्षौ। इह न स्यात्—वृक्षाः प्लक्षाः** ॥*॥ न वा पदाधिकारस्य विशेषणत्वात् ॥*॥ **न वोर्ध्वं पदाधिकारात् कर्तव्यो यणेकादेशस्वरः ॥ किं कारणम् ? ॥ 'पदाधिकारस्य विशेषणत्वात्' । पदस्येति नैषा स्थानषष्ठी ॥ का तर्हि ? ॥ विशेषणषष्ठी ॥ किं वक्तव्यमेतत् ? ॥ न हि ॥ कथमनुच्यमानं गंस्यते ? ॥ प्रत्याख्यायते स्थानषष्ठी ।** ॥ * ॥ अन्तग्रहणाद्वा नलोपे ॥ * ॥ **अथ वा**

प्र.] योऽनुदात्तस्तदन्तस्य पदस्य स्वरितत्वमलोऽन्त्यस्य भवतीति वाक्यार्थः। एवमुदात्तानुदात्तयोर्य एकादेशस्तदन्तस्य पदस्यालोऽन्त्यस्योदात्तआदेश इति स्यात्। **कुमार्य इति।** हल्स्वरप्राप्तिरत्र नास्तीति व्यञ्जनस्याऽविद्यमानत्वाऽभावः। **न वेति।** इह पदस्येति संबन्धसामान्ये षष्ठी, सा तूत्तरेषु वाक्येषु यथायोगं संबन्धविशेषेऽवतिष्ठते। क्व चित्स्थानेषष्ठी, क्व चिदवयवषष्ठी। तत्र यणेकादेशस्वरयोः पदस्येत्यनुवृत्तं कार्यिविशेषणार्थं न तु कार्यिप्रतिपत्त्यर्थं, तेन पदावयवयोरनुदात्तैकादेशयोः स्वरविधानादनन्त्ययोरपि भवति । **किं वक्तव्यमिति।** 'षष्ठीस्थाने योगे'ति नियमादलभ्या विशेषणषष्ठीति प्रश्नः। **प्रत्याख्यायत इति।** योगे प्रत्याख्याते यत्राऽन्यः सबन्धोऽस्ति यथोदुपधाया गोह इति—तत्र विशेषणविशेष्यभाव आश्रीयते—'गोहोऽङ्गस्य योपधा तस्या ऊद्भवती'ति। यत्र तु विशिष्टः संबन्धो न प्रतीयते तत्र स्थानसंबन्ध एवाश्रीयते यथाऽस्तेर्भूरिति। तदुक्तं भाष्ये—'शब्दस्य तु शब्देन कोऽन्यः संबन्धोऽन्यदतः स्थाना'दिति। एवं यणेकादेशस्वरयोः स्थान्यन्तरोपादानात्पदस्येत्यवयवषष्ठी। 'मो नो धातो'रित्यादौ स्थानषष्ठी, प्रयोगमूलत्वाद्व्याकरणस्मृतेर्यथाप्रयोगं लक्षणव्यवस्थापनात्। **अन्तग्रहणाद्वेति।** पठ्यमाने योगे विशेषणषष्ठी न लभ्यते इति लिङ्गेनाऽसौ प्रतिपा-

---

उ.] विधा'वित्यस्यापि न प्रवृत्तिः। स्वरोद्देश्यकविधेरभावात्। **क्वचित्स्थाने षष्ठीति।** 'नैषा स्थानषष्ठी'ति भाष्यं तु प्रकृताभिप्रायेणेति भावः। 'प्रत्याख्यायते स्थाने षष्ठी'ति भाष्यस्य 'षष्ठीस्थाने योगे'ति सूत्रं प्रत्याख्यायत इत्यर्थ इत्याह—**योगे इति। स्थानसंबन्ध एवेति।** अन्तरङ्गत्वादिति भावः। स्थान्यन्तरोपादानादिति हेतो'र्मोन'इत्येतत्साधारणत्वं मत्वा हेत्वन्तरमाह—**प्रयोगमूलत्वादिति। पठ्यमाने योगे इति।** 'षष्ठी

यदयं 'नलोपः प्रातिपदिकान्तस्ये'त्यन्तग्रहणं करोति तज्ज्ञापयत्याचार्यो–'विशेषणषष्ठ्येषा न स्थानषष्ठी'ति ॥ [पदस्य पदात्]

अनुदात्तं सर्वमपदादौ ।८।१।१८।

सर्ववचनं किमर्थम्? ॥ * ॥ सर्ववचनमनादेरनुदात्तार्थम् ॥ * ॥ सर्ववचनं क्रियते ॥ [किं प्रयोजनम् ?॥ 'अनादेरनुदात्तार्थम्']। अनादेरप्यनुदात्तत्वं यथा स्यादिति। तिङ्ङतिङ इति, इहैव स्यात् 'देवदत्तः पचती'ति। इह न स्यात्–'देवदत्तः करोती'ति ॥

॥ * ॥ सर्ववचनमनादेरनुदात्तार्थमिति चेल्लुटि प्रतिषेधात्सिद्धम् ॥ * ॥ सर्ववचनमनादेरनुदात्तार्थमिति चेत्तन्न ॥ किं कारणम् ? ॥ 'लुटि प्रतिषेधात्सिद्धम्'। यदयं लुटि प्रतिषेधं शास्ति 'नलु'डिति तज्ज्ञापयत्याचार्योऽनादेरप्यनुदात्तत्वं भवती'ति ॥ कथं कृत्वा ज्ञापकम् ?॥ न हि लुडन्तमाद्युदात्तमस्ति।

प्र.]यते, यदि पदस्येति स्थानषष्ठ्येव स्यात्–अलोन्त्यस्य लोपस्य सिद्धत्वादन्तग्रहणमनर्थकं स्यात्तस्मादन्तग्रहणात्क्वचिद्विशेषणषष्ठ्यपि विज्ञायते। प्रातिपदिकान्तस्य चेत्यसमासनिर्देशस्तेन प्रातिपदिकस्य पदस्य योऽन्तो नकारस्तस्य लोप इति सूत्रार्थः।

अनुदात्तम्। सर्ववचनमिति। वक्ष्यमाणोऽभिप्रायः। **सर्ववचनमनादेरिति।** असति सर्वग्रहणे पदादित्यधिकारादादेः परस्येत्यनेन पदस्येति स्थानषष्ठ्या आदावल्यनुसंहारादादेरेवोदात्तस्याऽनुदात्तत्वं स्यान्न त्वनादेः, सर्वग्रहणे तु पदस्येति विशेषणषष्ठीविज्ञानात्पदस्य सर्वोऽवयवोऽनुदात्तो भवतीत्यर्थः संपद्यते। **पचतीति।** धातुस्वरेणाऽऽद्युदात्तं पदं, शप्तिपोः पित्त्वादनुदात्तत्वात्। **करोतीति।** प्रत्ययस्वरेण मध्योदात्त(त्व)म्। **नहि लुडन्तमिति।** लुडन्तः कश्चिदन्तोदात्तः कश्चिन्मध्योदात्त इति श्वःकर्ते'त्यादौ निघात-

---

उ.] स्थाने योगे'त्येतस्मिन्नित्यर्थः। 'न स्थानषष्ठी'ति भाष्यस्य–न स्थानषष्ठ्येवेत्यर्थः। **प्रातिपादिकान्त्यस्य चेति।** चस्त्वर्थे। **असमासनिर्देश इति।** समासनिर्देशे उपसर्जनस्याऽन्येन संबन्धाभावः स्यादित्यर्थः। **[पदस्य पदात्] ॥**

अनुदात्तम्। आदेरेवोदात्तस्येति। इदं स्वरितस्याप्युपलक्षणं, यदि संभवः। अनुदात्तस्यानुदात्तविधाने फलाऽभावादिति भावः। **सर्वोऽवयव इति।** अवयवकार्त्स्न्यवृत्तिः सर्वशब्द इति भावः। **प्रत्ययस्वरेण**–विकरणस्वरेण। **कश्चिदिति।** लुडन्ते सर्वत्र तासेः परलसार्वधातुकानुदात्तत्वात्तासिरुदात्तः। तत्र टिलोपविषये कर्त्तेत्यादावुदात्त-

॥ * ॥ अलोन्त्यविधिप्रसङ्गस्तु ॥ * ॥ अलोन्त्यस्य विधयो भवन्तीत्यन्त्यस्य विधिः प्राप्नोति । यत्र ह्यादिविधिर्नास्ति[2] अलोन्त्य[स्य][3] विधिना तत्र भवितव्यम् ॥ तत्र को दोषः ? ॥ 'तिङ्ङतिङ'इतीहैव स्यात्—देवदत्तयज्ञदत्तौ कुरुतः । इह न स्यात्—देवदत्तः करोतीति ।

॥ * ॥ लृटि प्रतिषेधात्सिद्धम् ॥ * ॥ [लृटि प्रतिषेधात्सिद्धमेतत्[3]] यदयं लृटि[4] प्रतिषेधं शास्ति यज्ज्ञापयत्याचार्योऽनन्त्यस्याप्यनुदात्तत्वं भवतीति ॥ कथं कृत्वा ज्ञापकम् ? ॥ न हि लृडन्तमन्तोदात्तमस्ति ॥ ननु चेदमस्ति भोक्ष्य इति ? ॥ * ॥ उक्तं वा ॥ * ॥ किमुक्तम् ? ॥ 'न वा पदाधिकारस्य विशेषणत्वा[5]'दिति ॥ इदं तर्हि प्रयोजनम्—'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावा'विति [वक्ष्यति ते][3] वान्नावादयः सविभक्तिकस्य यथा स्यु'रिति ॥ एतदपि नास्ति प्रयोजनं । 'पदस्ये'ति हि वर्तते[6] । विभक्त्यन्तं च

प्र.] प्रसङ्गात्किं न लुडिति निषेधेन । निषेधात्तु लिङ्गात्पदस्येति विशेषणषष्ठी विज्ञायते न स्थानषष्ठीति स्थानषष्ठीशेषस्याऽऽदेः परस्येत्यस्योपस्थानाभावादनादेरप्यनुदात्तत्वं भविष्यति । **अलोन्त्यप्रसङ्गस्त्विति** । 'अलोऽन्त्यस्ये'त्यस्यापवादः—'आदेः परस्ये'ति । तत्र लिङ्गादपवादेऽपनीते उत्सर्गेण प्रवर्त्यमिति भावः । **कुरुत इति** । लसार्वधातुकस्य प्रत्ययस्वरेणाऽन्तोदात्तत्वं, विकरणस्य तु शेषनिघातः । न विकरणस्वरो लसार्वधातुकस्वरं बाधते, तासेर्लसार्वधातुकानुदात्तत्वविधानेन ज्ञापनात् । अत्रापि लिङ्गमुच्यते—**लृटीति** । 'गत्यर्थलोटे'त्यनेन लृडन्तस्य निघातः प्रतिषिध्यते, सर्वं च लृडन्तं लसार्वधातुकानुदात्तत्वेन मध्योदात्तमिति निघातस्य प्रसङ्गाऽभावान्नाऽर्थो, निषेधेन । तदेतस्माल्लिङ्गादलोऽन्त्यविध्यभावः । **भोक्ष्य इति** । 'एकादेश उदात्तेनोदात्त'इत्यन्तोदात्तमेतत् । ततश्चाऽत्र निघाताऽभावार्थत्वादलिङ्गं लृटि निषेध इत्यलोन्त्यनिवृत्त्यर्थं सर्वग्रहणं कर्तव्यम् । **उक्तं वेति** । असत्यपि सर्वग्रहणे भूयोलक्ष्यसिद्धयेऽनुदात्तविधौ

उ.] निवृत्तिस्वरेणान्तोदात्तः, कर्त्तारावित्यादौ मध्योदात्त इति भावः[3] । **न स्थानषष्ठीति** । यथाऽलोन्त्यस्येति स्थानषष्ठ्या अनुसंहारस्तथा तदपवादभूतमादेः परस्येत्यपीत्यर्थः । **तत्र लिङ्गादिति** । अवयवषष्ठीत्वे इदं ज्ञापकमित्यजानतोऽयं प्रश्न इत्यर्थः । **असत्यपीति** । 'न लु'डित्यनेनाऽवयवषष्ठीत्वमेव ज्ञाप्यते इति न दोषः । स्वरविधौ सङ्घातः

पदं। तत्राऽन्तरेण सर्वग्रहणं सविभक्तिकस्य[1] भविष्यति॥ भवेत्सिद्धं यत्र विभक्त्यन्तं पदं, यत्र तु खलु विभक्तौ पदं तत्र न सिध्यति—ग्रामो वां दीयते, ग्रामो नौ दीयते। जनपदो वां दीयते, जनपदो नौ दीयते॥

ननु च स्थग्रहणं क्रियते तेन सविभक्तिकस्यैव भवति॥ अस्त्यन्यत्स्थ-ग्रहणस्य प्रयोजनम्॥ किम्?॥ श्रूयमाणविभक्तिविशेषणं[2] यथा विज्ञायेत—'यत्र विभक्तिः श्रूयते तत्र यथा स्युः'। इह मा[3] भूवन् 'इति युष्मत्पुत्रो ददाति'

प्र.] विशेषणषष्ठ्याश्रयिष्यते न तु स्थानषष्ठीत्यर्थः। **सविभक्तिकस्येति**। अन्यथा केवलयोर्युष्मदस्मदोरादेशाः स्युः। तत्र षष्ठ्येकवचने ङसिङसोश्चेत्यसि पूर्वैकादेशे दोषाऽभावेऽपि वचनाऽन्तरेषु दोषप्रसङ्गः। सर्वग्रहणे तु सति युष्मदस्मद्भ्यां तदवयवः समुदायो लक्ष्यत इति युष्मदस्मदवयवस्य सर्वस्य पदस्य वान्नावादय आदेशा भवन्ति। **पदस्येति हि वर्तत इति**। तेन युष्मद-स्मद्वतः पदस्यादेशा भवन्तीत्यर्थः। **भवेत्सिद्धमिति**। यत्र केवले युष्मद-स्मदी पदे तत्र तद्वतः प्रतिपत्तेरयोगादिति भावः।

स्थग्रहणमिति। षष्ठ्यादिष्वादेशविधानाद्युष्मदस्मदोस्तत्स्थत्वे लब्धे स्थग्रहणं निमित्तसहितयुष्मदस्मत्प्रतिपत्त्यर्थं विज्ञायत इति सविभक्तिकयोरादेशसिद्धिः। यथाऽश्वस्थ आनीयतामित्युक्ते सहैवाऽश्वेनाऽऽनीयते। **श्रूमाणविभक्तिविशेषण-मिति**। यत्र श्रूयते विभक्तिस्तत्र तत्स्थत्वं युष्मदस्मदोर्न तु तस्यां लुप्तायाम्। प्रत्ययलक्षणेन च कार्यं शास्त्रं वाऽतिदिश्यते न तु तात्स्थ्यं, तस्याऽपौरुषेयत्वात्। तदेवमन्यार्थत्वात्स्थग्रहणस्य सर्वग्रहणं सविभक्तिकादेशार्थं कर्तव्यम्। **इति**

उ.] कार्यीति षष्ठीज्ञापनायेत्यपि बोध्यम्। **ङसिङसोश्चेत्यसि पूर्वैकादेश इति**। 'तै-अ' इत्यादिस्थितौ ङसिङसोश्चेति पूर्वैकादेश इत्यर्थः। **वचनान्तरेषु**—'ग्रामो वां, जनपदो नौ'इत्यादिषु। **तदवयव** इति बहुव्रीहिः। ननु युष्मदस्मदोः प्रातिपदिकयोः पदत्वाऽभावात्सामानाधिकरण्येनाऽन्वयः कथमुपपद्यतेऽत आह—**तद्वतः प्रतिपत्तेरिति**। किन्तु पदयोर्युष्मदस्मदोरित्येव प्रतीतिः स्यादिति भावः। ननु यत्र षष्ठ्यादिसद्भावस्तत्र युष्मदस्म-दोरादेशार्थं स्थग्रहणं स्यादिति कथं सविभक्तिकयोरादेशसिद्धिरत आह—**षष्ठ्यादिष्विति। तत्स्थत्वे लब्धे इति**। तत्प्रकृतित्वमेव तत्स्थत्वमित्यभिमानः। **तत्र तत्स्थत्वमिति**। असत आधारत्वाऽयोगात्। भाष्ये 'श्रूयमाणविभक्तिविशेषण'मिति कर्मधारयगर्भः कर्मधारयः। **अपौरुषेयत्वादिति**। पाणिन्यादिपुरुषीयत्वाऽभावादित्यर्थः। अशास्त्रीयत्वादिति यावत्।

'इत्यस्मत्पुत्रो ददाती'ति ॥ * ॥ समानवाक्ये निघातयुष्मदस्मदादेशाः ॥ * ॥ **समानवाक्य इति प्रकृत्य निघातयुष्मदस्मदादेशा वक्तव्याः ॥ किं प्रयोजनम् ? ॥ नानावाक्ये मा भूवन्निति । अयं दण्डो,हराऽनेन । ओदनं पच, तव भविष्यति, मम भविष्यति ॥**

॥ * ॥ पश्यार्थैश्च प्रतिषेधः ॥ * ॥ **पश्यार्थैश्च प्रतिषेधः समानवाक्य इति प्रकृत्य वक्तव्यः । इतरथा हि यत्रैव पश्यार्थानां**[1] **युष्मदस्मदी साधनं तत्र प्रतिषेधः स्यात्—ग्रामस्त्वां संप्रेक्ष्य संदृश्य समीक्ष्य गतः ॥ ग्रामो**

प्र.]**युष्मत्पुत्र इति ।** 'इति'शब्दात्पदात्परयोः षष्ठ्यन्तयोर्युष्मदोर्वस्नसौ न भवतः।

समानवाक्यइति। 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्या'दिति लौकिकं वाक्यलक्षणम् । इह तु वाक्यं परिभाषितम्—'आख्यातं साऽव्ययकारकविशेषणं वाक्य'मिति । आख्यातमित्येकत्वं विवक्ष्यते । 'अयं दण्डोहराऽनेने'ति वाक्यद्वयमेतत् , अयं दण्डोऽस्ति हरानेनेति तिङन्तद्वययोगात् । तत्रानेनेति सर्वनाम्ना दण्डस्य परामर्शात्करणत्वादस्ति सामर्थ्यमिति निघातप्रसङ्गः । **ओदनं पचेति।** त्वत्कर्तृकेण पाकेन त्वत्स्वामिको, मत्कर्तृकेणपाकेन मत्स्वामिकश्चौदनो भविष्यतीत्येवंरूपपाकस्य युष्मदस्मदर्थस्य च व्यपेक्षाऽस्तीत्यादेशप्रसङ्गः। **पश्यार्थैश्चेति।** विधौ समानवाक्यग्रहणं कृतं, प्रतिषेधश्चायमिति वाक्यान्तरारम्भः । तेन समानवाक्ये पश्यार्थैर्युक्ते युक्तयुक्ते च युष्मदस्मदर्थे[2] आदेशप्रतिषेधः । संप्रेक्ष्य

उ.] **अर्थैकत्वादिति ।** विभागे सति साकाङ्क्षावयवकमेकार्थबोधकं पदकदम्बकमित्यर्थः । **इहत्विति ।** अस्मिञ्शास्त्रे इत्यर्थः । **परिभाषितमिति ।** समर्थसूत्रे इति भावः । **एकत्वं विवक्ष्यत इति ।** अन्यथाऽयं दण्डो हराऽनेनेत्यादावतिप्रसङ्गाऽनिवारणादेतदधिकारोऽलौकिकवाक्यलक्षणकरणं चानर्थकं स्यादिति भावः । वस्तुत इदं न पारिभाषिकं, किन्त्वेकतिङ्त्येवेति निरूपितं समर्थसूत्रे, अतस्तदेवात्र वक्तुं युक्तं । नन्वत्रैकस्यैव तिङः श्रवणात्कथमदोषोऽत आह—**वाक्यद्वयमिति ।** समर्थपरिभाषयैवातिप्रसङ्गनिरासमाशङ्क्याह—**तत्रानेनेति ।** वस्तुतश्चिन्त्यमिदम् , एकार्थीभावयोग्यसूत्रोपात्तद्वितीयाऽभावेन एकार्थीऽभावाऽभावात्। व्यपेक्षायाश्च तत्र सूत्रेऽग्रहणात्समर्थपरिभाषाया अत्राऽप्रवृत्तेरित्याहुः। केचित्तु समर्थ इत्येवात्राधिकारे कर्तव्ये 'समानवाक्ये' इति गुरुभूताधिकारप्रयोजनं दर्शयतीत्याहुः । **मत्कर्तृकेण पाकेनेति ।** मम भविष्यतीत्यतः प्रागोदनं पचामीत्यध्याहार्यमितिभावः । **विधाविति ।** एवञ्चैतस्मिन्निषेधेऽपि तस्य संबन्ध इत्यर्थबोधकं वाक्यमिति भावः । **युक्तयुक्ते चेति ।** अन्यथा साक्षात्संबन्धे चरितार्थं शास्त्रं परंपरासंबन्धे न प्रव-

मां संप्रेक्ष्य संदृश्य समीक्ष्य गतः। इह न स्यात्—ग्रामस्तव स्वं संप्रेक्ष्य संदृश्य समीक्ष्य गतः॥ ग्रामो मम स्वं संप्रेक्ष्य संदृश्य समीक्ष्य गतः॥

सपूर्वायाः प्रथमाया विभाषा ।८।१।२६।

॥*॥ युष्मदस्मदोरन्यतरस्यामनन्वादेशे ॥*॥ **युष्मदस्मदोरन्यतरस्यामनन्वादेश इति वक्तव्यम्। ग्रामे कम्बलस्ते स्वम्, ग्रामे कम्बलस्तव स्वम्। ग्रामे कम्बलो मे स्वम्, ग्रामे कम्बलो मम स्वम्॥ अनन्वादेशइति किमर्थम्?॥ अथो ग्रामे कम्बलस्ते स्वम्। अथो ग्रामे कम्बलो मे स्वम्॥**

अपर आह॥*॥ सर्व एव वान्नावादयोऽनन्वादेशे विभाषा वक्तव्याः॥*॥ **कम्बलस्ते स्वम् कम्बलस्तव स्वम्। कम्बलो मे स्वम् कम्बलो मम स्वम्॥ अनन्वादेशइति किमर्थम्?॥ अथो कम्बलस्ते स्वम् अथो कम्बलो मे स्वम्॥ न तर्हीदानीमिदं वक्तव्यं,—सपूर्वायाः प्रथमाया विभाषेति?॥ वक्तव्यञ्च॥ किं प्रयोजनम्?॥ 'अन्वादेशार्थम्'। अन्वादेशे विभाषा यथा स्यात्। अथो ग्रामे कम्बलस्ते स्वम्। अथो ग्रामे कम्बलस्तव स्वम्। अथो ग्रामे कम्बलो मे स्वम्। अथो ग्रामे कम्बलो मम स्वम्॥** [सपूर्वायाः प्रथमायाः]

प्र.] संदृश्य समीक्ष्येति पर्यायत्वाद्विकल्पेनैषां प्रयोगः। भाष्ये तु पश्यार्थैरित्यर्थग्रहणप्रयोजनकथनायैषामुपादानम्। [**अनुपादत्तं सर्वमपादादौ**]॥

सपूर्वायाः। युष्मदस्मदोरिति। 'सपूर्वायाः प्रथमाया विभाषे'ति यो विकल्पः सोऽनन्वादेशे भवति, अन्वादेशे तु नित्य आदेशविधिरित्यर्थः। व्यवस्थितविभाषेयमित्युक्तं भवति। **अन्वादेशार्थमिति।** विरोधात्पूर्ववाक्यं 'युष्मदस्मदोरन्यतरस्यामनन्वादेश' इति बाध्यते, तेनाऽन्वादेशानन्वादेशयोः सपूर्वायाः प्रथमाया विभाषा भवति। [**सपूर्वायाः प्रथमाया विभाषा**]॥

उ.] चेतेति भावः। समानवाक्याधिकारात्तु युक्तयुक्तेऽपि भवतीति बोध्यम्। 'नचवे'ति सूत्रं तु तत्र समानवाक्ये इत्यस्याऽभावाद्युक्तयुक्ते न प्रवर्तत इति बोध्यम्। अतएव भाष्ये 'पश्यार्थैश्च प्रतिषेध' इत्येवोक्तम्। **विकल्पेनेति।** पर्यायाणां सह प्रयोगाऽभावादिति भावः। भाष्ये पर्यायोपादानं किमर्थमत आह—**भाष्येत्विति।** [॥ अनुदात्तं सर्वं ॥]

सपूर्वायाः। व्यवस्थितेति। तथैव सिद्धत्वाद्वचनान्तरं व्यर्थमिति भावः। वार्तिकस्य व्याख्यानान्तरं भाष्ये-**अपर आहेति।** ननु पूर्वव्याख्याने 'सपूर्वाया'इति विकल्पोऽन्वादेशे न भवतीत्युक्तम्, इदानीं तु तत्र विकल्प इति फलभेदात् कथं साधुत्वव्यवस्थेत्यत आह—**विरोधादिति।** परया व्याख्यया पूर्वव्याख्या बाध्यत इत्यर्थः। 'पूर्ववाक्य'मित्यस्य पूर्वमेतद्व्याख्यानवाक्यमित्यर्थो बोध्यः।

तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ।८।१।२७।

किमिदं तिङो गोत्रादिषु कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणं—'कुत्सनाभीक्ष्ण्ययोरर्थयोर्गोत्रादीनि भवन्ति तिङः पराण्यनुदात्तानी'ति, आहोस्विदनुदात्तविशेषणं—'तिङः पराणि गोत्रादीनि कुत्सनाभीक्ष्ण्ययोरर्थयोरनुदात्तानि भवन्ती'ति ? ॥*॥ तिङो गोत्रादिषु कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणम् ॥*॥ तिङो गोत्रादिषु कुत्सनाभीक्ष्ण्यग्रहणं क्रियते ॥ [किं प्रयोजनं?]॥ 'पाठविशेषणम्' । पाठो विशेष्यते ॥*॥ अनुदात्तविशेषणे ह्यन्यत्र गोत्रादिग्रहणे कुत्सनाभीक्ष्ण्यग्रहणम् ॥*॥ अनुदात्तविशेषणे हि सत्यन्यत्र गोत्रादिग्रहणे कुत्सनाभीक्ष्ण्यग्रहणं कर्तव्यं स्यात्—'चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगते'रिति । 'कुत्सनाभीक्ष्ण्ययो'रिति वक्तव्यं स्यात् ॥*॥ अनुदात्तग्रहणं वा ॥*॥ अथ वा 'यान्यनुदात्तानी'ति वक्तव्यं स्यात् । तस्मात्सुष्ठूच्यते—"तिङो गोत्रादिषु कुत्सनाभीक्ष्ण्यग्रहणं पाठविशेषणमनुदात्तविशेषणे ह्यन्यत्र गोत्रादिग्रहणे कुत्सनाभीक्ष्ण्यग्रहणमनुदात्तग्रहणं वे"ति ॥*॥

तिङ्ङतिङः ।८।१।२८।

अतिङ इति किमर्थम् ? ॥ पचति करोति ॥*॥ अतिङ्वचनमनर्थकं समानवाक्याधिकारात् ॥ * ॥ अतिङ्वचनमनर्थकम् ॥ किं कारणम् ? ॥

प्र.] तिङो । पाठविशेषणमिति । पठ्यत इति पाठः । संनिवेशविशेषो ग्रन्थसन्दर्भ उच्यते । एतयोरेवाऽर्थयोर्गोत्रादिव्यपदेशं प्रतिपद्यन्ते नान्यत्रेत्यर्थः । अयं चार्थो योगविभागेन लभ्यते ।'तिङो गोत्रादीनी'त्येको योगोऽनुदात्तविध्यर्थः, 'कुत्सनाभीक्ष्ण्ययो'रिति द्वितीयो 'गोत्रादीनी'त्यस्याऽनुवृत्त्या परिभाषाऽर्थः—'इह शास्त्रे गोत्रादीनि कुत्सनाभीक्ष्ण्यविषयाण्येव ग्राह्याणी'ति । [तिङो गोत्रा] ॥

तिङ्ङतिङः । पचति करोतीति । विनापि 'च'शब्देन समुच्चयावगमात् संबन्धसद्भावः । न चेति । 'आख्यातं साव्ययकारकविशेषणं वाक्य'मिति निघा-

---

उ.] तिङो गोत्रा । पाठशब्देन कर्मव्युत्पत्त्या गोत्रादीन्युच्यन्ते इत्याह—पठ्यत इति । नन्वेकस्माद्वाक्यात्पाठविशेषणमनुदात्तविधानं चेत्युभयं कथं लभ्यत इत्यत आह—अयं चेति । [तिङो गोत्रा] ।

तिङ्ङतिङः । विनाऽपि चेति । क्रियाकर्मभावेनाऽप्यन्वयः सुवचः । अर्थैक्यादिति । लौकिकैकवाक्यत्वमाश्रित्याऽतिङ्ग्रहणं कृतम् । वार्तिककारेण तु समानवाक्या-

'समानवाक्याधिकारात्' । समानवाक्य इति वर्त्तते, न च समानवाक्ये द्वे तिङन्ते स्तः ॥ [तिङ्ङतिङः] ॥

निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् ।८।१।३०।

निपातैरिति किमर्थम् ? ॥ यत्कूजति शकटम्[1] । यती[2] कूजति शकटी । यन् रथः[3] कूजति ॥ निपातैरिति शक्यमवक्तुम् । कस्मान्न भवति–यत्कूजति शकटम्, यती[2] कूजती शकटी, यन्रथः[3] कूजतीति ? ॥ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति ॥ नैषा परिभाषेह[4] शक्या विज्ञातुम्, इह हि दोषः स्याद्यावद्यथाभ्याम् । इह न स्यात्–यावदस्य[5]त्रैषः सरो जनेभ्यः कृणात्[6] ।

प्र.] तादिव्यवस्थायै वाक्यस्य परिभाषणादाख्यातमित्येकत्वस्य विवक्षितत्वादेकैकस्याख्यातस्य वाक्यत्वाद्द्वयोराख्यातयोरेकवाक्यताऽभावः । आख्यातमित्येकत्वस्याऽविवक्षाशङ्का स्यादिति द्वितीयं वाक्यलक्षणं वाक्यकारेण पठितम्–'एकतिङ् वाक्य'मिति । अत्रैकशब्देन यत्नेन सङ्ख्या प्रतिपाद्यते । **[तिङ्ङतिङः]** ॥

निपातैः । यत्कूजतीति । इणः शतरि 'इणो य'णिति यणि रूपम् । **यतीति ।** प्रातिपदिकग्रहणे लिङ्गविशिष्टस्याऽपि ग्रहणमिति प्राप्तिः । **यन्निति ।** संयोगान्तलोपस्याऽसिद्धत्वात्तन्मध्यपतितस्य नुमस्तद्ग्रहणेन ग्रहणात्प्राप्तिः । **लक्षणप्रतिपदोक्तयोरिति ।** लाक्षणिकस्यानुमानेन रूपाऽवधारणं, प्रतिपदोक्तस्य तु प्रत्यक्षेण । प्रत्यक्षानुमानयोश्चाऽविलम्बितप्रतीतिरूपत्वात्प्रत्यक्षं बलीयः ।

यावदिति । यत्परिमाणमस्येति वतुबन्तस्य यावच्छब्दस्य लाक्षणिकत्वात्कृणादित्यस्य लेडन्तस्य निघातप्रतिषेधो न स्यात् । निपातस्यैव तु ग्रहणं तस्य स्यात्, तत्र यदा प्रायोगिकं रूपमाश्रीयते तदा शास्त्रानपेक्षणाल्लक्षणप्रतिपदोक्तयोरिति परिभाषा नोपतिष्ठते । शास्त्राऽपेक्षायां वा प्रत्यक्षानुमानयोः समकक्ष्यत्वाश्रयणं

उ.] धिकारं पारिभाषिकं च वाक्यमाश्रित्य प्रत्याख्यातम् । तच्चावश्यकमित्युक्तमेव । अतएव 'पश्य मृगो धावती'त्यादौ धावतीत्यस्य न निघातः । यथोत्तरं च मुनीनां प्रामाण्यमिति दिक् । **एकत्वस्य विवक्षितत्वादिति** चिन्त्यमित्युक्तं समर्थसूत्रे । [**तिङ्ङतिङः**] ।

निपातैर्य । लेडन्तस्येति । 'कृवि हिंसाया'मित्यस्येत्यर्थः । **प्रायोगिकमिति ।** तद्धि नित्यमनवयवमिति भावः । **शास्त्रापेक्षायामिति ।** शास्त्रीयस्य कल्पितप्रवृत्तिप्रत्ययाद्यवयवकस्य ग्रहणे इत्यर्थः । शास्त्रीयप्रक्रियायां शास्त्रीयस्यैव ग्रहणं युक्तमिति भावः । समकक्ष्य-

॥ * ॥ चणिगद्विशिष्टश्चेदर्थे ॥ * ॥ **चणिगद्विशिष्टश्चेदर्थे द्रष्टव्यः । 'अयं च वै मरिष्यति' । अयं चेन्मरिष्यति न च पितृभ्यः पूर्वेभ्यो दास्यति । अप्रायश्चित्तिकृतौ च स्याताम्** ॥ [तिङ्ङतिङः] ॥

छन्दस्यनेकमपि साकाङ्क्षम् ।८।१।३५।

'अनेक'मिति किमुदाहरणम्?॥ यदाह्यसौ मत्तो भवति अथ यत्तपति ॥ नैतदस्ति । एकमत्र हियुक्तमपरं यद्युक्तन्तत उभयोरप्यनिघातः ॥

इदं तर्हि 'अनृतं हि मत्तो वदति पाप्मा एनं विपुनाति'॥ एकं खल्वपि 'अग्निर्हि पूर्वमुदजयत्तमिन्द्रोऽनूदजय'दिति ॥ [छन्दस्यनेकमपि साकाङ्क्षम्]॥

प्र.] तत्र निपातग्रहणमिह प्रकरणे एतत्परिभाषानाश्रयणस्य लिङ्गम्। **चेदर्थ इति ।** आशङ्कावधारणादिकश्चेदर्थः । 'अयं च वै मरिष्यती'त्याशङ्का गम्यते । अप्यर्थो वा-'अपि मरिष्यत्ययं न च दास्यती'ति । [**निपातैर्यद्यदिहन्त**] ॥

छन्द । हेतुहेतुमद्भावस्य द्योतको हिरित्यनेकमपि तिङन्तं हियुक्तं भवति। **उभयोरप्यनिघात इति ।** लक्षणान्तरेण-'हि चे'ति,'निपातैर्यद्यदी'ति च । यद्यपि द्वे हियुक्ते तथापि द्वितीयस्याऽनिघातकारणान्तरसद्भाव'देकं हियुक्त'मित्युक्तम् । **इदं तर्हीति** । अनिघातकारणान्तराऽभावात् । पाप्मा एनं उच्यते । यस्मान्मत्तोऽनृतं वदति तस्मादनृतवदनदोषेण न युज्यते इत्यर्थः । **उदजयदिति ।**

उ.]स्याऽयुक्तत्वं मनसि निधायाह-**तत्रेति**। ज्ञापकेनैव निर्वाह इति भावः। **चेदर्थ इति ।** समुच्चयादिषु दृष्टश्चशब्दश्चेदर्थेऽपि । तदर्थग्रहणे च चिह्नमित्संज्ञकणकार इति भाष्याभिप्रायः । **अप्यर्थो वेति ।** तदुपपादकं भाष्ये-'न च पितृभ्य'इत्यादि । **न** चेत्यस्य च नैवेत्यर्थ इति भावः। **अप्रायश्चित्तिकृतौ चेत्यत्रा**ऽप्यवधारणार्थं इति बोध्यम् । **प्रायश्चित्तिः**-प्रायश्चित्तम् । अस्याऽप्ययं चेन्मरिष्यतीत्याद्येकं वाक्यं, तादृशमरणेऽपि न प्रायश्चित्तमित्यर्थ इति केचित् ॥ [**निपातैर्यद्यदिहन्त**] ॥

छन्दस्यने । नन्वनेकस्य कथं 'हि'योगः स्यादत आह-**हेतुहेतुमदिति । यद्यपीति ।** अत्रापि हेतुहेतुमद्भावसत्त्वादिति भावः। मत्तत्वावस्थायामेव तपति शत्रून्पीडयतीत्यस्याऽर्थ इति तात्पर्यम् । **पाप्मा एन इति ।** क्वचित्तु 'पाप्मा मद' इति पाठः। तत्र पापहेतुत्वात्पाप्मा। मदादीनां हि विरुद्धानां दोषेषु गणनात्। यस्मान्मद्युक्तः पुरुषो मद्यपानादिना व्याकुलचित्ततयाऽज्ञानादनृतं वदति तस्मात्स मद एव अनृतवादिनं पुरुषं पुनाति। अनृतवदनदोषकृतमपावित्र्यं न करोतीत्यर्थः। यद्वा-अनृतवदनजन्यमेनः तं न सं-

तुपश्यपश्यताऽहैः पूजायाम् ।८।१।३९।

'पूजाया'मिति वर्त्तमाने पुनः पूजाग्रहणं किमर्थम् ? ॥ अनिघातप्रतिषेधाऽभिसंबद्धं तत्[1] । यदि तदनुवर्त्तेत[2] इहाऽप्यनिघातप्रतिषेधः प्रसज्येत । इष्यते चाऽत्र निघातप्रतिषेधः ॥ यथा पुनस्तत्र यावद्यथेत्येताभ्यामनिघाते प्राप्तेऽनिपातप्रतिषेध उच्यते इहेदानीं केनाऽनिघाते प्राप्तेऽनिघातप्रतिषेध उच्येत[3] ? ॥ इहापि 'यद्वृत्तान्नित्य'मित्येवमादिभिः ॥ [तुपश्यपश्य]

एहि मन्ये प्रहासे लृट् ।८।१।४६ ।

किमर्थमिदमुच्यते, न 'गत्यर्थलोटा लृ'डित्येव सिद्धम्?॥ [॥*॥ नियमाऽर्थोऽयमारम्भः॥*॥]॥ नियमार्थोयमारम्भः—'एहि मन्ये प्रहास एव यथा स्यात्'॥ क्व मा भूत् ?॥ एहि मन्ये रथेन यास्यसीति ॥ [एहि मन्ये प्रहासे लृट्]॥

जात्वपूर्वम् ।८।१।४७ ।

प्र.] एकमजयदिति पदमट्स्वरेणाद्युदात्तमपरमनुदात्तं,तत्र पूर्वेणानेकस्य निघातनिषेधे प्राप्ते क्व चिदेकस्य यथा स्यादिति वचनम् । तत्र छन्दसि दृष्टाऽनुविधानायथाप्रयोगं व्यवस्था । [**छन्दस्यनेकमपि साकाङ्क्षम्**] ॥

तुपश्य । अनिघातेति । 'यावद्यथाभ्या'मित्यनेनाऽनिर्घातः प्राप्तः 'पूजायां नानन्तर'मिति प्रतिषिद्धः । इह त्वनिघात इष्यत इति पुनः पूजाग्रहणम् ॥

एहि । आङ्पूर्वादिणो लोट् सिप् हिरादेशः । **एहि मन्य इति ।** अप्रहासेऽपि वैयधिकरण्यादुत्तमप्रयोगः । एहि त्वं रथेन यास्यसीत्येवमहं मन्य इत्यर्थः । 'यास्यसी'त्यस्य निघातो भवत्येव । उत्तमस्याऽतन्त्रत्वादेहि मन्यसे रथेन यास्यामीत्यत्रापि नियमादनिघाताऽभाव इति केचिदाहुः । [एहिमन्ये] ॥

उ.]बध्नाति, मत्तत्वादेवेत्यर्थः । पापाऽसंबन्ध एवाऽत्र पवनमिति भावः । **एकमजयदिति** । आद्यमित्यर्थः । **तत्रपूर्वेणेति** । अपिरहितेनाऽनेनेत्यर्थः । **वचनमिति** । अपिरूपमित्यर्थः ।

तुपश्यपश्यता । एतद्विषये निघाताऽप्राप्त्या न तत्प्रतिषेधसंभव इति शङ्कते भाष्ये—**यथापुनरित्यादि प्रतिषेध उच्यते** इत्यन्तेन । उत्तरयति—**इहापीति** । [तुपश्य] ॥

एहि मन्ये । वैयधिकरण्यादिति । आगमनमननयोः कर्तृभेदादित्यर्थः । प्रहासे तु 'एहि मन्ये रथेन यास्यसी'त्यादावेककर्तृकत्वं; 'रथेन यास्यामीति यदि त्वं मन्यसे' इत्यर्थः । **अतन्त्रत्वादिति** । 'सूत्रे'इति शेषः । **केचिदाहुरिति** । वृत्त्यनुसारिणः । भाष्यानुक्तत्वमत्रारुचिबीजम् । [**एहि मन्ये प्रहासे लृट्**] ॥

किमिदमपूर्वग्रहणं जातुविशेषणं—'जातुशब्दादपूर्वात्तिङन्त'मिति, आहो स्वित्तिङन्तविशेषणं 'जातुशब्दात्तिङन्तमपूर्व'मिति ? ॥ जातुविशेषण-मित्याह ॥ कथं ज्ञायते ? ॥ यदयं 'किंवृत्तं च चिदुत्तर'मित्याह ॥ कथं कृत्वा ज्ञापकम् ? ॥ अत्राऽप्यपूर्वमित्येतदनुवर्तते न चाऽस्ति संभवो यत्किंवृत्तं च चिदुत्तरं स्यात्तिङन्तं चाऽपूर्वम् । अत्रापि तिङन्तविशेषणमेव स्यात्[२] ॥ कथम् ?॥ किंवृत्ताच्चिदुत्तरात्तिङन्तमपूर्वमिति ॥ यत्तर्हि 'आहो उताहो चानन्तर'मित्यनन्तरग्रहणं[३] करोति॥ एतस्याप्यस्ति वचने प्रयोजनम्॥ किम् ?॥ शेषप्रक्लृप्त्यर्थमेतत्[४]स्यात्—'शेषे विभाषा' ॥ कश्च शेषः ?॥ सान्तरं शेष इति ॥ अन्तरेणाऽप्यनन्तरग्रहणं प्रक्लृप्तः शेषः ॥ कथम् ? ॥ 'अपूर्व' इति वर्तते ॥

शेषे विभाषा । ८।१।५० ।

कश्च शेषः ?॥ ॥*॥ 'सपूर्वः शेषः' ॥*॥ इति ॥ [शेषे विभाषा] ॥

❀ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्येऽष्टमाध्यायस्य प्रथमे पादे प्रथममाह्निकम् ❀ । ८।१।१ ।

प्र.] जात्व । **किमिदमिति** । निमित्तनिमित्तिसन्निधौ सति संशयात्प्रश्नः । **कथं ज्ञायत इति** । निमित्तस्याऽप्राधान्यात्सति प्रधाने विशेषणसम्बन्धयोग्येन युक्तो विशेषणसम्बन्ध इति प्रश्नः । **तिङन्तं चाऽपूर्वमिति** । चिदुत्तरात्किंवृत्तात्परस्य तिङन्तस्य विद्यमानपूर्वत्वात् । **अत्रापीति** । 'कश्चिद्भुङ्क्ते'इत्यादावेवाऽनिघातो यथा स्यात् 'कश्चित्पुरुषो भुङ्क्ते'इत्यादौ व्यवधाने मा भूदित्येवमर्थं तिङन्तविशेषणमपूर्वग्रहणं स्यात् । **यत्तर्हीति** । तिङन्तविशेषणे ह्यपूर्वग्रहणेऽन्तरमेवापूर्वं भवतीत्याहो देवदत्तः पचतीति सपूर्वत्वादेवाऽनिघातो न भविष्यतीति किमनन्तरग्रहणेन, तस्मान्निमित्तविशेषणमपूर्वग्रहणमित्यनुमीयते । तथाचाहो देवदत्तः पचतीति निमित्तस्याऽपूर्वत्वादनिघातः स्यादिति कर्तव्यमनन्तरग्रहणम् । इति **महाभाष्यप्रदीपेऽष्टमाध्यायस्य प्रथमे पादे प्रथममाह्निकम्** ॥

उ.] **जात्वपूर्वं । निमित्तेति** । जातु इत्येतन्निमित्तं, तिङन्तं निमित्ति । जातुयुक्तं तिङन्तं नानुदात्तमिति सूत्रार्थात् । **कश्चित्पुरुषो भुङ्क्ते इति** । व्यवहितोऽपि किंवृत्तेन चिदुत्तरेण युक्तो भवत्येवेति भावः । इतिश्रीशिवभट्टसुतसतीगर्भज**नागोजीभट्ट**विरचिते भाष्यप्रदीपोद्योते अष्टमस्य प्रथमे पादे प्रथममाह्निकम् ।८।१।१।

गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् । ८।१।५१ ।

॥*॥ लृटः प्रकृतिभावे कर्त्रन्यत्व उपसङ्ख्यानं कारकाऽन्यत्वात् ॥*॥

लृटः प्रकृतिभावे कर्त्तुर्यत्कारकमन्यत्तस्याऽन्यत्व उपसङ्ख्यानं कर्त्तव्यम् । **आगच्छ देवदत्त ग्राममोदनं भोक्ष्यसे** ॥ किं पुनः कारणं न सिध्यति ? ॥ **'कारकान्यत्वात्'** । **'न चेत्कारकं सर्वान्य'दित्युच्यते सर्वान्यच्चाऽत्र कारकम्**॥ **किं पुनः कारणं सर्वान्यत्प्रतिषेधेनाश्रीयते न पुनरसर्वाऽन्यद्विधानेनाश्रीयेत** ?॥

प्र.] **गत्यर्थं । लृट इति ।** निघातप्रतिषेध एव प्रकृतिभावः। कर्तुरिति पञ्चमी । कर्तुरन्यत्कारकं कर्मादि, तस्यान्यत्व इत्यर्थः । **आगच्छेति ।** भोजनगमनयोरेको देवदत्तः कर्ता, कर्म तु ग्रामो गमनस्यौदनो भोजनस्येति कर्मभेदादनिघाताऽप्रसङ्गः । कारकशब्देन सूत्रे कारकव्यक्तिराश्रीयते, तेन कर्मत्वाऽभेदे ऽपि ग्रामौदनव्यक्तिभेदात्कारकभेदः । **किं पुनरिति ।** कारकमत्र न सर्वमन्यत् , कर्मभेदे

उ.] **गत्यर्थ लोटा ।** नन्वत्र प्रकृतिभावो न प्रकृतोऽत आह-**निघातप्रतिषेधे एवेति । कर्तुरन्यदिति ।** कर्त्रन्यत्व इति वार्तिके कर्तृपदेन कर्तृभिन्नं लक्ष्यते, तस्याऽन्यत्वेइत्यर्थः । 'कर्त्रन्यान्यत्वे' इति वा वार्तिकपाठः। **कर्मभेदादिति ।** लोडन्तलृडन्तयोर्यद्यत्कारकं तत्सर्वं यद्यन्यन्न भवतीत्यर्थादिति भावः। **सर्वान्यदिति,**–समासस्तु सौत्रत्वाद्बोध्यः । लुप्तविभक्तिकं वा 'सर्वे'ति भिन्नं पदम् । ननु कारकपदवाच्यतत्तच्छक्तेरेकत्वादनन्यदेवात्र कारकमत आह–**कारकशब्देनेति ।** सामर्थ्यादिति भावः। **कर्मत्वाभेदेऽपीति ।** अखण्डशक्तिरूपं तदकम् । अत एवाग्रे वक्ष्यति–'तिङ्भ्यामेकद्रव्याभिधाना'दिति । न तु सूत्रस्थपदेनैककारकाभिधानादिति । न च तदेकत्वे ग्रामः पाककर्मेत्याद्यापत्तिः । एवमोदनं पचति देवदत्ते शाकं पचतीत्याद्यापत्तिरिति वाच्यं, कारकाधिकारसहकृतैः 'कर्तुरीप्सिततम'मित्यादिभिः क्रियाजनकत्वतत्तद्धात्वर्थाश्रयत्वादिज्ञानस्य तत्तत्कारकशक्तेर्विवक्षायां नियामकत्वबोधनेन तदज्ञानेनतच्छक्त्यविवक्षणादिति भावः। इदं चिन्त्यं, 'सप्तमीपञ्चम्यौ कारकमध्ये'इति सूत्रस्थाकरविरोधात् । आगमनभोजननिरूपितकर्तृत्वशक्तिभेदेऽपि 'कर्तृसामान्यात्सिद्ध'मिति भाष्यानुपपत्त्या कारकशब्देन द्रव्यं गृह्यत इत्यन्यत् । 'ऊह्यन्ता'मित्युदाहरणे शालिषु वहनभोजननिरूपितशक्तिभेदात्–'एकद्रव्याभिधाने'इत्युक्तमिति बोध्यम् । भाष्ये–**सर्वन्यच्चात्रेति ।** तिङन्तद्वयसंबन्धिसर्वकारकमध्ये किञ्चिदन्यदप्यत्र कारकमित्यर्थः । **सर्वान्यत्प्रतिषेधेनेति ।** अत्र पक्षे 'सर्वकारकं लोडन्ते यद्यत्कारकं तन्मध्ये लृडन्ते यत्किञ्चिदप्यन्यच्चेत्तदा निघातप्रतिषेधो ने'त्यर्थः । **न पुनरसर्वान्यद्विधानेनेति ।** लोडन्ते य(द्य)त्कारकं तत्सर्वमन्यन्न, किं चित्त्वन्यदपि तदापि निघातप्रतिषेध इत्येतत्पक्षेऽर्थः । 'सर्वे'ति लुप्तविभक्तिकं कारकविशेषणम् । तत्राऽन्त्ये लक्ष्यसिद्धिं दर्शयति–**कारकमत्र नेति । अन्याऽभिधाने**

कर्त्ता चाऽत्राऽसर्वान्यस्ततः कर्तृसामान्यात्सिद्धम् ॥ * ॥ कर्तृसामान्यात्सिद्धमिति चेत्तद्भेदेऽन्यसामान्ये प्रकृतिभावप्रसङ्गः ॥ * ॥ कर्तृसामान्यात्सिद्धमिति चेत्तद्भेदे–कर्तृभेदे–अन्यस्मिन्कारकसामान्ये प्रकृतिभावः प्राप्नोति । आहर देवदत्त शालीन्यज्ञदत्त एनान्भोक्ष्यते ॥ एवं तर्हि–व्यक्तमेव पठितव्यं 'न चेत्कर्त्ता सर्वोऽन्य इती'ति ॥ * ॥ न चेत्कर्ता सर्वान्य इति चेदन्याऽभिधाने प्रतिषेधमेके ॥ * ॥ 'न चेत्कर्त्ता सर्वान्य' इति चेदन्याभिधाने प्रतिषेधमेके इच्छन्ति । 'उह्यन्तां देवदत्तेन शालयो यज्ञदत्तेन भोक्ष्यन्त'इति प्राप्नोति । 'भोक्ष्यन्त'इति चेष्यते ॥ * ॥ सिद्धं तु तिङोरेकद्रव्याऽभिधानात् ॥ * ॥ सिद्धमेतत् ॥ कथम् ? ॥ 'तिङोरेकद्रव्याभिधानात्' । यत्र तिङ्भ्यामेकं द्रव्यमभिधीयते तत्रेति वक्तव्यम् ॥ [गत्यर्थलोटा]

आम एकान्तरमामन्त्रितमनन्तिके ।८।१।५५।

प्र.]ऽपि कर्तुरेकत्वादित्यनिघातो भविष्यतीत्यर्थः । आहरेति । अत्रापि न सर्वान्यत्कारकं, शालिलक्षणकर्मैकत्वात् । अन्याभिधान इति । यदैकमेव कर्म लकारद्वयवाच्यं कर्तृभेदश्च तदाप्यनिघात इ[ती]ष्यते । कर्तृशब्दोपादाने तु न सिध्यति। एकग्रहणं न विकल्पार्थमपि त्वागमपारंपर्यप्रतिपादनार्थम् ।

सिद्धं त्विति । एकद्रव्यं कारकशक्त्या विशिष्टं कर्म कर्तृ वा यदा लोड्ऌङ्भ्यामुच्यते तदाऽनिघातः । न चेदमपूर्वं कर्तव्यं, सूत्रेणैवाऽस्यार्थस्य सङ्ग्रहात् । तथा हि लोड्ऌटोः सन्निधानात्तद्वाच्यमेवात्र कारकमाश्रीयते, लोडन्तऌडन्तयोश्चाऽर्थलक्षणो निमित्तनिमित्तिभावः । [गत्यर्थलोटा] ।

उ.]इति भाष्यस्य–अन्यकर्मण आख्यातवाच्यत्वे इत्यर्थस्तदाह–यदैकमेवेति । 'एक इच्छन्ती'त्यस्याऽन्ये नेच्छन्तीति नार्थ इत्याह–एकग्रहणमिति । नचेदमपूर्वमिति । एवञ्च वक्तव्य'मित्यस्य' व्याख्येयमित्यर्थः। तद्वाच्यमेवेति । अन्तरङ्गत्वादिति भावः । सर्वग्रहणं तु 'आगच्छ देवदत्त ग्रामं त्वं चाहृच भोक्ष्याव एन'मित्यत्रापि निघातप्रतिषेधाय, 'सर्वं चेत्कारकमन्यत्र तदा निघातप्रतिषेध'इति सूत्रार्थात् । योगश्च न सहप्रयोगमात्रं, किंत्वर्थद्वारक इत्याह–लोडन्तेति । अर्थलक्षण इति । अर्थद्वारक इत्यर्थः । 'शक्तेरेव वाच्यत्व'मिति पक्षे एकस्यैव द्रव्यस्याभिधानात्–शक्त्याश्रयत्वेन ग्रहणादित्यर्थः। [गत्यर्थ]।

कस्यायं प्रतिषेधः ? ॥ * ॥ आम एकान्तर ऐकश्रुत्यप्रतिषेधः ॥ * ॥ **आम एकान्तर ऐकश्रुत्यस्याऽयं प्रतिषेधः॥ कथं पुनरप्रकृतस्याऽसंशब्दितस्यैकश्रुत्यस्य प्रतिषेधः शक्यो विज्ञातुम् ? ॥ अनन्तिक इत्युच्यते । अनन्तिकं**

प्र.] आम ए । कस्यायमिति । 'आम्भो देवदत्ते'त्युदाहरणम् । आमिति निपातत्वादाद्युदात्तः । भो इति भवच्छब्दस्य 'विभाषा भवद्भगवदघवतामोच्चावस्ये'ति रुत्वे ओत्वे च रूपं, तस्य पदात्परस्यामन्त्रितस्य चेति निघातः । देवदत्तेत्यस्य निघातः प्राप्तोऽनेन प्रतिषिध्यते । भोःशब्दस्य 'नामन्त्रिते' इत्यनेनाऽविद्यमानवत्त्वनिषेधादेकान्तरत्वे निघाते च निषिद्धे 'एकश्रुति दूरात्संबुद्धा'वित्येकश्रुतिः प्राप्नोति, 'दूराद्धूते चे'ति प्लुतोदात्तत्वं च । तत्र 'स्वरितस्यार्द्धह्रस्वोदात्तादोदात्तस्वरितपरस्य सन्नतरादूर्ध्वमुदात्तादनुदात्तस्य स्वरितात्कार्यं स्वरितादिति सिद्ध्यर्थ'मिति वचनात्प्लुतोदात्ते कर्त्तव्ये पूर्वत्राऽसिद्धमित्येकश्रुतेरसिद्धत्वात्प्लुतोदात्तत्वमेव भवति नैकश्रुतिः । तत्राऽनेकप्रतिषेधसम्भवात्प्रश्नः । यदि प्रकरणमपेक्ष्यते तदा निघातस्यैव निषेधेन भाव्यं, नैकश्रुतेः । अथ सामर्थ्यात्प्राप्तस्य निषेधः, तदैकश्रुतेरेव निषेधो न निघातस्य । **ऐकश्रुत्यस्येति ।** एका श्रुतिर्यस्य तदेकश्रुतिः, तस्य भाव ऐकश्रुत्यम् । **कथं पुनरिति ।** प्रकृतस्य वा प्रतिषेधो भवति, यथा नाज्झलाविति सवर्णसंज्ञायाः । संशब्दितस्य वा,—यथा 'न संप्रसारणे संप्रसारण'मिति ।

इतरः सामर्थ्यमाश्रित्याह–**अनन्तिक इत्युच्यत इति ।** ततश्चार्थादेकश्रुतिः सन्निहिता । कथं पुनरनन्तिकं दूरम् ? । उच्यते । कश्चिन्नञ्समासोऽर्थान्तरस्य वाचकः । यथा अनादर इति,–परिभवः अवज्ञानं वोच्यते, न त्वादराऽभावः ।

उ.] आम एकान्तरमा । ननु भोःशब्दस्यामन्त्रितं पूर्वमित्यविद्यमानवत्त्वे कथमेकान्तरत्वमत आह–**भोःशब्दस्येति । एकान्तरत्वमिति ।** अन्तरयतीत्यन्तरं–व्यवधायकम् । एकमन्तरं यस्य तद्भाव एकव्यवहितत्वमित्यर्थः । वस्तुतस्तत्र वत्करणेन स्वाश्रयानिवृत्तेस्तत्त्वमिति बोध्यम् । **नैकश्रुतिरिति ।** प्लुतोदात्तत्वोत्तरमेकश्रुत्यप्रवृत्तिः केन वार्यतामिति चिन्त्यम् । **अथ सामर्थ्यादिति ।** अनन्तिकशब्दस्य दूरवाचित्वेनैकश्रुतेरेव प्राप्तत्वादित्यर्थः । यथाचैकश्रुतेरेव प्राप्तिस्तथोपरिष्टात्स्फुटीभविष्यति । ऐकश्रुत्यशब्दे भावप्रत्ययाऽसङ्गतिं परिहरति–**एका श्रुतिरिति । इतरः सामर्थ्यमिति ।** यथा प्रकरणाच्छब्देनोपादानाद्वा सन्निधानं तथा सामर्थ्यादपीत्यर्थः । लक्षणप्रतिपदोक्तपरिभाषया दूरवाचकपदो

च किम्? ॥ दूरम् ॥ दूरात्संबुद्धौ चैकश्रुतिरुच्यते ॥ अस्ति प्रयोजनमेतत्?॥ किं तर्हीति ॥ * ॥ निघातप्रसङ्गस्तु ॥ * ॥ **निघातस्तु प्राप्नोति—आम्भो देवदत्ता३ । आमन्त्रितस्याऽनुदात्तत्वं प्राप्नोति** ॥*॥ सिद्धं तु प्रतिषेधाधिकारे प्रतिषेधवचनात्'॥*॥ **सिद्धमेतत्॥ कथम्?॥ 'प्रतिषेधाधिकारे[प्रतिषेधवचनात्' । प्रतिषेधाधिकारे] प्रतिषेधवचनसामर्थ्यान्निघातो न भविष्यति ॥ नैव वा पुनरत्रैकश्रुत्यं प्राप्नोति ॥ किं कारणम्? ॥ अनन्तिक इत्युच्यते, अन्यच्च दूरमन्यदनन्तिकम् ॥ यद्येवं प्लुतोऽपि तर्हि न प्राप्नोति, प्लुतोऽपि हि**

प्र.] एवमनृताऽमित्राऽधर्मादयोऽर्थान्तराभिधायिनः । तथाऽनन्तिकशब्दोऽपि दूरार्थाभिधायी । तत्रानुदात्तत्वं 'पचसि देवदत्ते'त्यादौ सावकाशं बाधित्वा एकश्रुतिः प्राप्ताऽनेन प्रतिषिध्यते । **निघातस्त्विति** । अपवादे प्रतिषिद्धे उत्सर्गस्य न्यायप्राप्तत्वात् । **सिद्धं त्विति** । निघातप्रतिषेधाधिकारे वचनान्निघातोऽपि प्रतिषिध्यते, अन्यथैकश्रुतिर्दूरात्सम्बुद्धावित्युक्त्वा 'नाम एकान्तर' इत्युच्येत । एवं ह्यामन्त्रितमनन्तिक इति न वक्तव्यं भवति । केवलस्य च निघातस्यैकश्रुत्या बाधितत्वात्प्रतिषेधोऽनर्थक इति सामर्थ्यादुभयप्रतिषेधः । **ननु** चैकश्रुतिर्देवदत्ता ३ आगच्छेत्यादौ सावकाशा कथमाम् भो देवदत्ता३ इत्यादौ निघातस्य बाधिका ?, प्रत्युत परत्वादेकश्रुतेर्निघात एव बाधक इति तस्यैवाऽत्र प्रसङ्ग इति प्रतिषेधोऽपि तस्यैव न्याय्यः । तस्य च प्रतिषेधे एकश्रुतिः स्यादेव । **नैष** दोषः । पदद्वयनिबन्धननिघातापेक्षयाऽधिकनिमित्तं दूरात्सम्बोधनमपेक्ष्यमाणा एकश्रुतिः सति शिष्टस्वरो भवतीति तयैव भाव्यम् । **अन्यच्चेति** । अन्तिकसदृशं

उ.] चारणेन विहितस्य निषेध इति सामर्थ्यमिति भावः। उत्तरमाह—**कश्चिदिति । अर्थान्तरस्येति** । उत्तरपदार्थविपक्षरूपस्येत्यर्थः । ननु परत्वादेकश्रुत्यस्याऽसिद्धत्वाद्वा निघात एव प्राप्नोतीत्यत आह—**तत्रेति** । ननु अप्राप्तावसरत्वात्कथं निघातप्राप्तिरत आह—**अपवाद इति** । 'तौ स'दिति निर्देशात्स न्यायो नास्त्येवेति भावः । नन्वेवमेकश्रुतिनिषेधे मानाभावोऽत आह—**केवलस्य चेति । सावकाशेति** । पदात्परत्वाऽभावेन निघाताऽप्राप्तिरिति भावः । **परत्वादिति** । इदं च यथान्यासे । वार्तिकोक्तोत्कर्षे तु असिद्धत्वान्निघातो भविष्यतीति बोध्यम् । **सति शिष्टेति** । अन्तरङ्गत्वात्पूर्वं निघाते पश्चात्प्रवर्त्तमानतयेत्यर्थः । वस्तुतोऽसिद्धत्वादेकश्रुतेः पूर्वं निघाते तस्याः प्राप्त्या सतिशिष्टत्वं बोध्यम् । एतेनाऽर्थकृतबहिरङ्गत्वानाश्रयणेऽपि न क्षतिः । एवञ्च तस्या एव निषेधो युक्तः, प्रतिषेधाधिकारे विधानाच्च निघातस्यापीति उभयनिषेधसिद्धिरिति भावः । **अन्तिकसदृशमिति** ।

'दूरा'दित्युमच्यते?॥ इष्टमेवैतत्संगृहीतम्, आम्भो देवदत्तेत्येव भवितव्यम् ॥

यद्धितुपरं छन्दसि ।८।१।५६ ।

किमर्थमिदमुच्यते यदाद्यैरेव[1] सर्वै रेतैरनिघातकारणैर्योगेऽनिघात[2] उच्यते, यथैव पूर्वैर्योगे एवं परैरपि ?॥ अत उत्तरं पठति ॥ * ॥ यद्धितुपरस्य च्छन्दस्यनिघातोऽन्यपर[3]प्रतिषेधार्थः ॥*॥ यद्धितुपरस्य च्छन्दस्यनिघात उच्यते ॥ [किं प्रयोजनम् ?॥] 'अन्यपरप्रतिषेधार्थः'। अन्यपरस्य प्रतिषेधो मा भूदिति।

प्र.] यत्र दूरं न चान्तिकं तदनन्तिकं गृह्यते । अन्यथा दूरग्रहणमेव कुर्यात् । अथ वा दूरमध्ययोः सामान्यशब्दोऽपि दूरे निघातस्याऽप्राप्त्या तत्प्रतिषेधसामर्थ्यान्मध्याभिधाय्यनन्तिकशब्दः । स्वरव्यङ्ग्यं च—आम् भो देवदत्तेत्यादावन्तिकाऽनन्तिकत्वम् , अन्तिके निघातस्य विधानात् । अनन्तिके निषेधात् ॥

यद्धि । यदाद्यैरिति । 'निपातैर्यद्यदी'ति 'हि चे'ति 'तुपश्ये'ति सूत्रैः । जाये स्वो रोहावेहीति । आङ्पूर्वादिणो लोटः सिपो हिः । गत्यर्थलोटा युक्तस्य 'रोहावे'त्यस्य 'लोट् चे'त्यनिघातः प्राप्तोऽनेन नियमेन निवर्त्यत इति स्वःशब्दाश्रयो निघातो भवति । ननु 'परमपि छन्दसी'ति वचनात् स्वशब्दस्य पूर्वाङ्गवद्भावाज्जाये स्वरित्यस्यामन्त्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वान्निघातो नैव प्राप्नोति । नैष दोषः। 'अव्ययानां प्रतिषेध' इति वचनात् परस्य पूर्वाङ्गवत्त्वाऽभावादव्ययस्य । यद्वा—षष्ठ्यामन्त्रितकारकवचनं तन्निमित्तवचनं वा अङ्गवद्भावे आश्रितमिति नास्ति पूर्वाङ्गवद्भावः । नहि स्वःशब्दः षष्ठ्यन्तो, नाप्यामन्त्रित-

---

उ.] अब्राह्मण इत्यादाविव सादृश्यफलको नञ् न तु विपक्षफलक इत्यर्थः । **अन्यथेति** । प्रतिपत्तिलाघवान्मात्रालाघवाच्चेति भावः। नन्वत्रानन्तिकग्रहणसामर्थ्याद्दूरमध्ययोरुभयोरपि ग्रहणमस्त्वत आह—**अथवेति । निघातस्याऽप्राप्त्येति** । एकश्रुत्या बाधादिति भावः । कथं पुनरत्रार्थनिर्णयोऽत आह—**स्वरव्यङ्ग्यञ्चेति** । भाष्ये **इत्येव भवितव्यमिति** । आद्यपक्षे प्लुतस्याप्यनेन निषेधः । एकश्रुतेरिव तस्याऽपि प्रतिपदोक्तत्वात् । वार्तिके चैकश्रुत्यग्रहणमप्राकरणिकस्याप्ययं निषेध इत्यर्थस्योपलक्षणमित्याशयः । 'प्लुतोदात्तत्वमेव भवती'ति पूर्वकैयटस्तु प्राप्तिमात्राभिप्रायः । एवञ्च 'सर्वस्य द्वे'इति सूत्रस्थे 'आम्पचसि देवदत्ते'त्युदाहरणे प्लुतलेखो लेखकप्रमादात, 'प्लुत उदात्त' इति तत्रत्यकैयटोऽप्येवमिति दिक् ॥

यद्धितु । भाष्ये—**अन्यपरस्येति** । परैर्योगे चेदेतैरेव नान्यैरित्यर्थः । **निघातो नैवेति** । पदात्परत्वाऽभावादिति भावः । परस्याऽव्ययस्य पूर्वाङ्गवत्त्वाऽभावादित्यन्वयः । **षष्ठ्यन्त इति** । कर्मशक्तिप्रधानत्वादिति भावः । **स्वरे चेति** । स्वरे इत्यवधारणाद्यथा

जाये स्वो रोहावेहि ॥ अथेदानीं रोहावेत्यनेन युक्ते 'एही'त्यस्य कस्मान्न भवति ?, लोट्चगत्यर्थलोटा युक्त इति प्राप्नोति ॥ न हि रुहिर्गत्यर्थः॥ कथं ज्ञायते ?॥ यदयं 'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्चे'ति पृथग्रुहिग्रहणं करोति ॥ यदि न गत्यर्थः,-आरोहन्ति हस्तिनं मनुष्याः, आरोहयति हस्ती स्थलं मनुष्यान्',-'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माऽकर्मकाणामणि

प्र.] कारकं, नाऽपि तन्निमित्तम् । स्वरे चे पूर्वाङ्गवत्त्वविधिर्नाऽविद्यमानवत्त्वे ।

अथेदानीमिति। आङः परस्येहीत्यस्य निघात इष्यते, न च प्राप्नोति, 'लोट् चे'ति निषेधात् । केवलोऽपि रुहिश्छन्दसि गत्यर्थो दृश्यत इत्याङ इणा योगो, न रुहिणा । 'छन्दसि परेऽपी'तिवचनाद्यदि रुहिणाऽऽङो योगः स्यात्तदा नानावाक्यत्वादाङो निघातो न स्यात् । ननु नित्यत्वादेकादेशे कृते व्यपवर्गाऽभावादुभयत आश्रयेऽन्तादिवद्भावनिषेधाच्च निघातो न प्राप्नोति । एवं तर्ह्यस्मादेव भाष्यकारविचारादनुमीयते-'प्राङ्निघातस्ततत एकादेश'इति। **न हि रुहिरिति।** येषामुपसर्गयोगाद्विना गतिप्रतीतिहेतुत्वं ते गत्यर्थाः । रुहिस्तूपसर्गयोगे गतिवाची। यद्वाऽवष्टम्भवाची रुहिः। गतिस्तु तदवयवक्रियेति भावः। **यदयमिति।** अनुपसर्गस्य रुहेरकर्मकत्वात्कर्तरि क्तः सिद्धः, सोपसर्गस्य तु गत्यर्थत्वादिति किं रुहिग्रहणेन ? । तत्क्रियमाणमुपसर्गयोगेन विना ये गत्यर्थास्ते गत्यर्थग्रहणेन गृह्यन्ते । अथ वा रुहिरवष्टम्भवाची, तदवयवस्तु गतिः। सत्यपि वा गत्यर्थत्वे गत्यर्थग्रहणेन रुहिर्न गृह्यते इति ज्ञापयति । **यदीति** । उपसर्गयोगेऽपि ये यदर्थास्ते तदर्थग्रहणेन गृह्यन्ते, यथा हरतिरभ्यवपूर्वः प्रत्यवसानार्थ इति तद्ग्रहणेन

उ.]षत्वादिकं प्रति नातिदेश एवमविद्यमानवत्त्वं प्रत्यपीति भावः। ननु केवलस्य रुहेर्गत्यर्थत्वाऽभावादिह च तस्येष्टत्वेन परत्र श्रुतोऽप्याङ् पूर्वत्र योजनीय इति समानवाक्यस्थत्वाऽभावादाङाश्रयनिघात 'इही'त्यस्य न स्यादत आह-**केवलोपीति । आङो निघातो न स्यादिति ।** आङः परस्य 'इही'त्यस्य निघातो न स्यादित्यर्थः। **प्राङ्निघात इति ।** 'नेन्द्रस्य परस्ये'ति सामान्यापेक्षं ज्ञापकमिति भावः । **उपसर्गयोगे इति ।** 'आरोहन्ति हस्तिन'मित्यादौ केवलोऽपि रुहिर्गत्यर्थः । **'छन्दसि दृश्यत' इति** प्रागुक्तेन विरोधात्पक्षान्तरमाह-**यद्वाऽवष्टम्भेति।** हस्तिनमुपरि गत्वा समाश्रयत इत्यर्थावगमादिति भावः । एवञ्च प्राधान्येन न गत्यर्थत्वमिति तात्पर्यम् । **सत्यपीति ।** केवलस्यापि रुहेर्गतौ वेदे प्रयोगादिति भावः। **उपसर्गयोगेऽपीति ।** इदं चोक्तोपपत्तित्रयस्याप्युपलक्षणं । कथं

कर्ता स णा'विति कर्मसंज्ञा न प्राप्नोति। तस्मान्नैतच्छक्यं वक्तुं 'न रुहिर्गत्यर्थ' इति ॥ कस्मात्तर्हि रोहावेत्यनेन युक्ते 'एही'त्येतस्य न भवति ? ॥

छान्दसत्वात् ॥ [यद्धितुपरं छन्दसि] ॥

चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः ।८।१।५७।

॥ * ॥ 'आम्रेडितेष्वगतेः' 'सगतिरपि ति'ङित्यत्र गतिग्रहणे उपसर्गग्रहणम् ॥*॥ 'आम्रेडितेष्वगतेः' 'सगतिरपि ति'ङित्यत्र गतिग्रहणे उपसर्गग्रहणं द्रष्टव्यम् । इह मा भूत् । शुक्लीकरोति चन कृष्णीकरोति चन । यत्काष्ठं शुक्लीकरोति यत्काष्ठं कृष्णीकरोति ॥ अपर आह—"सर्वत्रैवाष्टमिके गतिग्रहणे उपसर्गग्रहणं द्रष्टव्यं—'गतिर्गतौ' 'तिङि चोदात्तवति' वर्ज"मिति॥ [चनचिदि]

यद्वृत्तान्नित्यम् ।८।१।६६।

प्र.] गृह्यते। तथा च 'हृक्रोरन्यतरस्या'मित्युभयत्र विभाषा प्रतिपादिता। तस्माद्रुहेर्गत्यर्थग्रहणेनाऽवश्याभ्युपेयं ग्रहणं । केवलोऽपि रुहिश्छन्दसि गतौ प्रयुज्यत इति प्रागेवोक्तं। गतिरेव रुहेरर्थोऽवष्टम्भस्तु तत्फलमित्यभ्युपेयं। 'गत्यर्थाकर्मके'त्यत्र तु रुहिग्रहणं प्रपञ्चार्थम् ॥ [यद्धितुपरं छन्दसि] ॥

चनचिदिव। शुक्लीकरोति चनेति। 'अगते'रिति प्रतिषेधाऽभावादत्राऽनिघातो भवत्येव। यत्काष्ठमिति। शुक्लीशब्दस्य (तु) निघातो न भवति। सर्वत्रेति। चादिषु च 'चवायोगे प्रथमे'त्येतयोरगतिग्रहणमनुवर्तत इति तत्राप्युपसर्ग एव गतिः। [चनचिदिवगोत्रादितद्धिता] ॥

उ.] तर्हि रोहावेत्यत्र विनोपसर्गं गतिप्रतीतिस्तत्राह—केवलोऽपीति। अध्यारोपितप्रेषणे 'आरोहयति हस्ती स्थल'मिति भाष्योदाहरणम्। तत्र स्थलशब्देन हस्त्युपरिध्रियमाणं काष्ठादिमयमुपवेशनस्थानमुच्यते। सौकर्यातिशयाय प्रेरणावृद्धिवत्फलांशस्यापि वृद्ध्या द्विकर्मकत्वं प्रपञ्चार्थमिति। तेन फलान्तराय नाभिनिवेष्टव्यं भाष्यविरोधादिति तात्पर्यम्। भाष्ये—छान्दसत्वादिति। सर्वविकल्पानां छन्दसि व्यवस्थितत्वादित्यर्थः। [यद्धितुपरम्] ॥

चनचिदिव। अगतेरिति। ऊर्यादीनां गतिसंज्ञैव, नोपसर्गसंज्ञेति भावः। प्रतिषेधाऽभावादिति। निघातप्रतिषेधस्य प्रतिषेधाऽभावादित्यर्थः। 'अनिघातो भवत्येवे'ति पाठः। शुक्लीशब्दस्येति। 'यद्वृत्तान्नित्य'मिति निघातप्रतिषेधे प्राप्ते 'सगतिरपी'त्यनेन पुनर्विधीयते। तत्रोपसर्गग्रहणमव्यन्तस्य प्रतिषेध एवेत्यर्थः। [चनचिदिव] ॥

यद्वृत्तादित्युच्यते तत्रेदं न सिध्यति—यः पचति यं पचति येन पचतीति ॥ [॥*॥ वृत्तग्रहणेन तद्विभक्त्यन्तं॥*॥] वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात् ॥ कथं यतरः पचति यतमः पचतीति ॥ [॥*॥ डतरडतमौ च॥*॥] डतरडतमौ च प्रतीयात् ॥ कथं यदा ददातीति ?॥ एषोऽपि विभक्तिसंज्ञः ॥ कथं 'यावदस्यस्त्यत्रैषः सरो जनेभ्यः कृणवत्' ॥ यावद्यथाभ्यामित्येवं भविष्यति ॥ कथं 'यद्यङ्वायुः पवते' 'यत्कामास्ते जुहुमः' ॥ एवं तर्हि यदस्मिन् वर्तते यद्वृत्तं, यद्वृत्तादित्येवं भविष्यति ॥ ॥*॥ वा याथाकाम्ये ॥*॥ वा याथाकाम्य इति वक्तव्यम् । यत्र क्व चन यजते तद्देवयजन एव यजते ॥

पूजनात्पूजितमनुदात्तं [काष्ठादिभ्यः]।८।१।६७।

प्र.] यद्वृत्तात् । यद्वृत्तादित्युच्यते इति । वृत्तमुच्चारणमित्युच्यते । यथा 'त्यदादिवृत्त'मिति । ततश्चेहैव स्यात्-यत्पचतीति । वृत्तग्रहणेनेति। वृत्तशब्दोऽधिकरणसाधनो वर्ततेऽस्मिन्निति वृत्तं, यदो वृत्तं यद्वृत्तम् । 'अधिकरणवाचिना चे'ति प्रतिषेधे-प्राप्तेऽत एव निपातनात्समासः। यदा ददातीति। स्वादय एव विभक्तित्वेन प्रसिद्धा इतिप्रश्नः। एषोऽपीति। 'प्राग्दिशो विभक्ति'रिति विभक्तिसंज्ञाविधानात्। यावद्यथाभ्यामिति । निपातैर्यद्यदी'ति 'निपातग्रहणाल्लिङ्गाल्लक्षणप्रतिपदोक्तयोरिति परिभाषा नाश्रीयत इत्युक्तम्। यद्यङिति। यदञ्चतीति क्विन्। 'विष्वग्देवयोश्चे'ति टेरद्र्यादेशः । यदस्मिन्निति । सर्वं पदं यच्छब्दवद्वृत्तग्रहणेन गृह्यत इत्यर्थः । पञ्चमीनिर्देशेऽप्यत्र व्यवहितस्य कार्यं भवतीति 'पूजनात्पूजित'मित्यत्र पूजनग्रहणस्य सम्बन्धिशब्दत्वात्पूजितग्रहणे सिद्धे पुनःपूजितग्रहणेन ज्ञाप्यते। वा याथाकाम्य इति । याथाकाम्यं—यथेच्छं प्रवृत्तिर्देशकालावनपेक्ष्य , तत्र गम्यमाने वा निघातप्रतिषेधः । [यद्वृत्तान्नित्यम्] ।।

उ.] यद्वृत्तान्नित्यं । त्यदादिवृत्तमिति । त्यदादीनामुच्चारणमित्यर्थः । एवमिहापि उच्चारिताद्यदित्येतस्मादित्यर्थः स्यादिति भावः । अधिकरणसाधन इति । अकर्मकत्वाद्वृत्तमित्यधिकरणे क्तः । यदो वृत्तमिति । यच्छब्दो यस्मिन् पदे वर्तत इत्यर्थः । नाश्रीयते इति । अत्र हि यावदिति परिमाणार्थकवत्वन्तमिति भावः । सर्वं पदमिति । 'वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात्। डतरडतमौ चे'त्येतन्नेहाश्रीयत इति भावः। ननु पञ्चमी निर्देशाद्व्यवहिते यावदस्य कृणवदित्यादौ कथं प्राप्तिरत आह-पञ्चमीनिर्देशेपीति । पुनःपूजितेति । पुनस्तदनन्तरपूजितप्रतिपत्त्यर्थमन्यत्र व्यवहितप्रतिपत्तौ ज्ञापकमित्यर्थः।

॥ * ॥ पूजितस्याऽनुदात्तत्वे काष्ठादिग्रहणम् ॥ * ॥ **पूजितस्यानुदात्तत्वे काष्ठादिग्रहणं कर्तव्यम् । काष्ठादिभ्यः पूजनादिति वक्तव्यम् ॥ इह** मा भूत्–शोभनोऽध्यापकः । ॥ * ॥ मलोपवचनं च ॥ * ॥ **मलोपश्च** वक्तव्यः । दारुणाध्यापकः[1] । दारुणाभिरूपः[2] ॥ [पूजनात्पूजितमनुदात्तम्] ॥

सगतिरपि तिङ् ।८।१।६८।

सगतिग्रहणं किमर्थम् ? ॥ ॥ * ॥ सगतिग्रहणमपदत्वात्[3] ॥ * ॥ **सगतिग्रहणं क्रियते** ॥ [**किंकारणम् ?**] ॥ 'अपदत्वात्' । **पदस्येति वर्तते**

प्र.] **पूजनात्** । **काष्ठादिग्रहणमिति** । 'काष्ठादिभ्य' इति,–सूत्रे वार्तिकदर्शनात्कैश्चित्प्रक्षिप्तम् । **दारुणाध्यापक इति** । क्रियाविशेषणं दारुणशब्दो द्वितीयान्तः। यथा 'ग्रामं गत' इत्यादौ गुणभूताया अपि क्रियायाः साधनेन योगस्तथा विशेषणेनाऽपि। तत्र वैयधिकरण्यात्समासाऽभावान्मलोपो विधीयते ।

दारुणाभिरूपक इति । आभिरूप्यं दारुणशब्देन विशेष्यत इति दारुणस्य नपुंसकत्वं, पूर्ववत्समासाऽभावः । [**पूजनात्पूजितम्**] ॥

सगतिः । सहशब्दोऽत्र तुल्ययोगे, तेन गतिरपि निहन्यते । **अपदत्वादिति** । नन्वतिङन्तत्वादिति वक्तव्यं, नहि सगतिस्तिङन्तो भवति । **उच्यते** । अतिङन्तत्वादित्युच्यमाने मा भूदनेन सगतेर्निघातः, पूर्वेण तु कस्मान्न भवतीति स्यादेव चोद्यं, तत्रेदमेवाभिधानीयं स्यात्–अपदत्वादिति । **तस्मात्पूर्वो-**

उ.] **पूजनात्पू** । ननु 'दारुणाध्यापक'इत्यादौ विशेषणसमासे विभक्तिलोपेन सिद्धे किं मलोपवचनेनेत्यत आह–**क्रियाविशेषणमिति** । ननु अध्यापकशब्दे समासे **एकार्थीभूतोपसर्जनाध्यापकेन** कथमस्याऽन्वयोऽत आह–**गुणभूताया अपीति** । साधनवदस्यापि क्रियांशे उत्थिताकाङ्क्षत्वादिति भावः । साधन इवाऽत्रापि क्रिया आकाङ्क्षावतीति वा । नियतैतत्प्रयोगाऽभावस्तु करणादिप्रयोगाऽभाववदुपपाद्यः । **वैधिकरण्यादिति** । दारुणं यदध्यापनं तत्कर्त्तेति बोधेन द्रव्यवाचिना सामानाधिकरण्याऽभावादिति भावः । **केचित्तु** मयूरव्यंसकादित्वाद्वैयधिकरण्येऽपि समासः । **सुप्सुपेति** वा । समासविषय **एव समासान्तो**दात्तत्वापवादोऽयं निघात इति तत्तु भाष्यविरुद्धं । कर्तृकर्मणोरिति षष्ठी तु न, **धात्वर्थे**भेदेनान्वयिकर्तृसाहचर्येण तादृशस्यैव कर्मणो ग्रहणात् । इदं च **समानाधिकरणं** क्रियाविशेषणं न तथेति बोध्यम् । अद्भुतपर्यायाः काष्ठादयः पूजनवचना **बोध्याः** ॥

सगतिरपि तिङ् । इदं सूत्रं पूजनवाचिभ्यः काष्ठादिभ्यः परस्य तिङन्तस्य **'निपातैर्यद्यदि'**ति निघातप्रतिषेधे प्राप्ते प्रतिप्रसवार्थं । तत्र सगतिकस्य तिङन्तत्वाऽभावादप्राप्ते

च[1] सगतिकं पदं भवति ॥ ॐ ॥ उत्तरार्थश्च ॥ * ॥ उत्तरार्थं चापि[2] सगतिग्रहणं क्रियते–'कुत्सने च सुप्यगोत्रादौ'। सगतिरपि[3] पचति। प्रपचति पूति ॥

अथाऽपिग्रहणं किमर्थम् ? ॥ अगतिकस्यापि यथा स्यात्–यत्काष्ठा पचतीति। नैतदस्ति प्रयोजनं सिद्धं, पूर्वेणाऽगतिकस्य ॥ न सिध्यति। मलोपाभिसम्बद्धं तत्। यदि तदनुवर्तते[4] इहापि मलोपः प्रसज्येत–दारुणं पचतीति [॥ ॐ ॥ उत्तरार्थश्च ॥ * ॥] उत्तरार्थं चापि ग्रहणं क्रियते–'कुत्सने च सुप्यगोत्रादौ'। 'अगतिरपी'ति। पचति पूतीति ॥ * ॥ तिङ्निघातात्पूजनात्पूजितमनुदात्तं विप्रतिषेधेन ॥ * ॥ तिङ्निघातात्पूजनात्पूजितमित्येतद्ब-

---

प्र.] त्तरयोरपि योगयोर्यत्साधारणमुत्तरं तदेवोक्तमपदत्वादिति। तिङ्निघातादिति। 'पूजनात्पूजितमितीहानुवर्तत' इत्यनेन सह विप्रतिषेधोपन्यासो न तु पूर्वेण सह, तस्य सुबन्तविषयत्वात्, तत्रैव मलोपस्येष्टत्वात्। काष्ठाध्यापक इति। पूर्वोत्तरयोः सूत्रयोरेकवाक्यत्वात् 'पूजनात्पूजित'मित्येतदभिसबन्धाच्चाऽभेदमाश्रित्याऽवकाशः प्रदर्शितः। यत्काष्टं पचतीति। 'निपातैर्यद्यदी'ति तिङ्निघाते प्रतिषिद्धेऽनेन निघातः प्रवर्तते। ननु च 'तिङ्ङतिङ' इति निघातस्य प्रतिषेधोऽपवादस्तस्याऽपि 'सगतिरपि ति'ङित्यपवादः, तत्राऽपवादापवादत्वाद्विप्रतिषेधानुपपत्तिः। नैतदस्ति। गतेरप्राप्त एवाऽनेन निघातो विधीयत इति नास्त्यपवादत्वम्। अपिग्रहणं तूत्तरार्थमपि स्यादित्यपिग्रहणादपिनाऽस्यापवा-

---

उ.] सगतिग्रहणं क्रियते, तेन यथा गतेः सिध्यति तदाह–सहशब्दोऽत्रेति। अनेन सहेति। भाष्ये–'पूजनात्पूजित'मित्यनेन तदनुवृत्तिविशिष्टं प्रकृतसूत्रं लक्षणीयमिति भावः। तस्य सुबन्तविषयत्वे युक्तिमाह–तत्रैव मलोपस्येति। यत्र मलोपस्तत्रैव सन्नियोगशिष्टन्यायात्तस्य प्रवृत्तिरिति भावः। नन्वेवं 'काष्ठाध्यापक' इत्यवकाशप्रदर्शनमयुक्तमत आह–पूर्वोत्तरयोरिति। एकवाक्यत्वादिति। उद्देश्याऽनेकत्वेऽपि विधेयैकत्वादितिभावः। उद्देश्यानेकत्वेऽपि वाक्यभेदाङ्गीकारादाह–पूजनादित्यादिना। ननु चेति। तृतीयकक्षाप्राप्तः प्रथमकक्षाप्राप्तेन सह न स्पर्धतेऽतुल्यबलत्वादिति भावः। गतेरप्राप्त एवेति। प्राप्ताऽप्राप्तविवेकन्यायादिति भावः। तत्र 'सगति'रित्यस्य विशेष्यतया तिङन्तोपादानात् 'यत्काष्ठा प्रपचती'त्यादौ तिङो निघातस्तिङ्ङतिङ इत्यनेनाऽनेन वेति सन्देहे परत्वादनेनैव तत्फलं प्रतिषेधाऽभाव इति तात्पर्यद्। नन्वपिग्रहणादगतेस्तिङन्तस्याऽपि निघातोऽनेन विधीयते प्रतिषेधबाधनायेति विप्रतिषेधानुपपत्तिस्तदवस्थैवेत्यत आह–अपिग्रहणंत्विति।

द्भवति विप्रतिषेधेन । तिङ्निघातस्याऽवकाशः—देवदत्तः पचति । पूजनात्पूजितमित्यस्यावकाशः—काष्ठाध्यापकः [काष्ठाभिरूपकः] । इहोभयं प्राप्नोति—काष्ठा पचति । 'पूजनात्पूजित'मित्येतद्भवति विप्रतिषेधेन ॥ कः पुनरत्र विशेषस्तेन वा सत्यनेन वा ?॥ अयमस्ति विशेषः । साऽपवादकः स विधिः, अयं पुनर्निरपवादकः। यदि हि तेन स्यादिह न स्यात्—यत्काष्ठापचति॥ [सगति]

कुत्सने च सुप्यगोत्रादौ ।८।१।६९।

॥ * ॥ सुपि कुत्सने क्रियायाः ॥ * ॥ क्रियायाः कुत्सन इति वक्त-

---

प्र.] दत्वम् । यद्वा—पूर्वोत्तरयोर्योगयोरेककार्यत्वादभेदं विवक्षित्वा विप्रतिषेधोपन्यासः । तत्र येन नाप्राप्त इति वा मध्येऽपवादा इति वा 'तिङ्ङतिङ' इत्यस्यैव 'न लु'डित्यादिः प्रतिषेधोऽपवादो, नत्वस्येति सापवादकः स विधिरित्युक्तम्॥

कुत्सने । पचति पूतिरिति । पूतिः कर्तुर्विशेषणं न क्रियाया इति क्रियाकुत्सनाऽभावः । ननु क्रियाप्रधानत्वादाख्यातस्य विशेषणेन योगः साधनस्य नोपपद्यते । नैतदस्ति । यदुपसर्जनं जहत्स्वार्थमुपसर्जनीभूतस्वार्थं वाऽर्थान्तरे वर्तते तस्य न भवति विशेषणेन योगो, यथा 'राजपुरुष' इति राजशब्दस्य वृत्तिविषयस्य । वाक्यविषयस्य त्वर्थान्तरानुपादानाद्भवति विशेषणयोगो, यथा 'मद्राणां राज्ञः पुरुषः' 'ऋद्धस्य राज्ञः पुरुष' इति । एवं साधनं क्रियां प्रति अङ्गभावं गच्छदपि एकार्थीभावाऽभावाद्विशेषणेन युज्यते । तथा कृदन्ते क्रिया उपलक्षणभावेनोपात्ता तथैव विशेषणैर्युज्यते 'शोभनमध्यापक' इति । यथा तर्हि साधनस्य विशेषणेन योग एवं क्रियान्तरेणाऽपि प्राप्नोति, तत्र यदुक्तं 'न हि

उ.] अभेदं विवक्षित्वेति । अपवादत्वरूपं भेदमविवक्षित्वेत्यर्थः । नन्वस्यापि स निषेधः कुतो नेत्यत आह—तत्र येननेति । [सगतिरपि तिङ्] ॥

कुत्सने च सु । कर्तृविशेषणमिति । प्रत्ययार्थः कर्त्ताऽत्र कुत्स्यते, क्रिया तु शोभनैव । पूतिशब्दः कुत्सितवाची । साधनस्येति । तद्विशेषप्रतिपादकस्य देवदत्तादेः पूत्यादेश्चेत्यर्थः । 'पदार्थः पदार्थेनान्वेती'ति व्युत्पत्तिभङ्गभियेति तात्पर्यम् । उपसर्जनीभूतस्वार्थं वेति । अजहत्स्वार्थापक्षे स्वार्थविशेषणकार्थान्तरोपस्थापकमित्यर्थः । अर्थान्तरानुपादानादिति । स्वार्थमात्रस्यापि बोधजननादित्यर्थः । उपलक्षणभावेनेति । अध्यापनाद्यभावेऽपि तद्व्यवहारप्रवृत्तेरिति भावः । उपलक्षणस्याऽपि विशेषणत्वमस्त्येवेति बोध्यम् । 'शोभनमध्यापक'इति सुबन्तात्तुद्देश्यकवृत्तिविषये एकार्थीभावाऽभावादिति भावः । इदं चिन्त्यम्—'प्रकृतिप्रत्ययौ सहार्थं ब्रूत'इति भाष्यादेकार्थीभावाऽभावेऽपि " प्रत्ययार्थविशेषणक एव तिङन्ताद्बोधो न पृथक् ताभ्यां बोध इत्यर्थस्य लाभात् । किंच अध्यापकपदे

व्यम् । कर्तुः कुत्सने मा भूत् । पचति पूतिः [गिरति पूतिः] ॥ * ॥ पूतिश्च चानुबन्धः ॥ * ॥ पूतिश्च चानुबन्धो द्रष्टव्यः । पचति पूति ॥

॥ * ॥ विभाषितं चापि बह्वर्थम् ॥ * ॥ **विभाषितं चापि बह्वर्थं द्रष्टव्यम् । पचन्ति पूति । पचन्ति पूति ॥**

प्र.] भवति 'पचति पठती'ति, तद्विरुध्यते । अथ मतं क्रियावशीकृतं क्रियारूपतामापन्नमाख्यातवाच्यं साधनं क्रियान्तरेण न संबध्यते इति ; विशेषणेनाप्येवं न संबध्येत । संबध्यमानं वा क्रियारूपतामापन्नं नपुंसकेन विशेषणेन संबध्येत । नैष दोषः । यथा भार्या पत्युर्वनिताऽन्तरसंबन्धं न सहते स्नानादिसंस्कारं तु स्वार्थमनुमन्यते तथा क्रियाविशिष्टं साधनमात्मन्यङ्गत्वं गमयितुं तस्य विशेषणेन संबन्धं न प्रतिबध्नाति । क्रियान्तराऽङ्गत्वापत्तिस्तु स्वार्थविरोधिनीति तां नाऽनुजानाति । **पूतिश्चेति ।** पूतिरयमिति सामानाधिकरण्यदर्शनात् पूतिशब्दो न क्तिन्नन्तो नापि क्तिजन्तः, संज्ञात्वात् । तस्माद्व्युत्पन्नं प्रातिपदिकम् । तत्र प्रातिपदिकस्वरेणाऽन्तोदात्तत्वे सिद्धे निघातनिमित्तस्य तस्याऽन्तोदात्तत्वं यथा स्यादन्यत्र त्वाद्युदात्तत्वमिति वचनमित्याहुः । नन्वाद्युदात्तत्वं लक्षणा-

---

उ.] समासनिबन्धनैकार्थीभावसत्त्वात्कृन्मात्रेऽपि तदङ्गीकाराच्च । अत एव कृदन्तेषु संबन्धप्रवृत्तिनिमित्तकत्वक्रियाप्रवृत्तिनिमित्तकत्वादिव्यवहारः । तस्मादाख्यातार्थकर्त्रादेर्नियमेन विशेषाकाङ्क्षाबलात्तद्विशेषदेवदत्तपूत्यादेस्तत्रान्वयः । आकाङ्क्षावशादेव कारकाणामिव क्रियाविशेषणानामपि गुणभूतक्रियया संबन्ध इत्येव सांप्रतम् । अतएव 'कृतपूर्वी कट'मित्यादि सङ्गच्छते इत्याहुः । **पचति पठतीति ।** एककर्तृकपाकक्रियासंबंधिकर्तृका पाठक्रियेति बोधसंभवादिति भावः । कृदन्तवाच्यसाधनात्तिङन्तवाच्ये विशेषं शङ्कते–**अथ मतमिति ।** क्रियागुणीभूतत्वरूपं–**क्रियावशीकृतत्वं** क्रियारूपतापन्नत्वे हेतुः । **न सहत इति ।** स्वार्थविरोधित्वादितिभावः । **विशिष्टं साधनमिति ।** विशेषणविशिष्टं साधनमित्यर्थः । कुत्सितेन कर्त्रा इयं क्रिया निष्पादितेति बोधयितुमिति भावः । अत्राऽस्मदुक्ता नियतविशेषाकाङ्क्षैव बीजम् । **स्वार्थविरोधिनीति ।** स्वार्थस्य प्राधान्यविरोधिनीत्यर्थः । अयं भावः–तथाहि सति 'पचति-पठती'त्यस्य उक्तरीत्या बोधे कारकनिरूपितविशेषणत्वेन तदपगम एव तदना-

॥ * ॥ सुपि कुत्सने क्रियाया मकारलोपोऽतिङीति चोक्तार्थम् ।
पूतिश्च चानुबन्धो विभाषितं चापि बह्वर्थम् ॥ १ ॥ * ॥

गतिर्गतौ ।८।१।७०।

गताविति किमर्थम् ? ॥ **प्रपचति । प्रकरोति** ॥ * ॥ गतेरनुदात्तत्वे गतिग्रहणानर्थक्यं तिङ्यवधारणात् ॥ * ॥ **गतेरनुदात्तत्वे गतिग्रहणमनर्थकम्** ॥ **किं कारणम् ?** ॥ **'तिङ्यवधारणात्'** । **'तिङि चोदात्तवती'त्येतन्नियमार्थं भविष्यति—'तिङ्युदात्तवत्येव गतिरनुदात्तो भवती'ति**॥ [॥*॥ छन्दोर्थन्तु ॥*॥] ॥ **छन्दोऽर्थं तर्हि गतिग्रहणं कर्त्तव्यम्** । छन्दसि **गतौ परतो-**

प्र.] ऽभावात्कथं स्यात्? । एवं तर्हि वसेस्तिबिति तिबन्तो बाहुलकादुत्पाद्यः । **विभाषितमिति** । बह्वर्थं तिङन्तं विभाषा निहन्यते, यदा च तस्य निघातस्तदा पूतिरन्तोदात्तः । **अतिङीति** । तिङन्ते मलोपो न भवति 'दारुणं पचती'ति । **उक्तार्थमिति** । आचार्यपरंपराकथितप्रयोजनमेतदित्यर्थः। [कुत्सने च सुप्यगोत्रा]।

गतिः । गतेः शुद्धे वा तिङन्ते प्रयोगो गतियुक्ते वा । एवं कृदन्ते । रूढिशब्देषु तु गवाश्वादिषु क्रियाया अभावान्नाऽस्ति गतेः प्रयोगः । तत्र कृदन्ते सगतावगतौ च कृत्स्वरथाथादिस्वरगतिस्वरेषु कृतेषु शेषनिघातेन गतेर्निघातस्य भावात्तिङि चोदात्तवतीति नियमादनुदात्ते तिङन्ते तदप्रसङ्गात्पारिशेष्याद्गतावेव भविष्यतीति मत्वाह—**गताविति किमर्थमिति** । 'तिङ्युदात्तवत्येवे'ति विपरीतनियमस्तु न भवति, 'तिङ्येवोदात्तवति नाऽन्यत्र प्रकारक इत्यादा'वि-

---

उ.]काङ्क्षैवाऽत्र बीजमिति । **न क्तिनन्त इति** । स्त्रियां क्तिन्विधानादिति भावः । **बाहुलकादिति** । तत एव च गुणाऽभावोऽपि बोध्यः । **तिङन्ते मलोप इति** । 'मलोपश्चे'ति वार्तिकोक्तो मलोपस्तिङन्ते नेष्टः । एवंचाऽस्य वाक्यस्य विशिष्टविषयत्वं यदुक्तं तदाचार्यपरंपराकथितत्वात्प्रमाणमित्यर्थः । **[कुत्सने च सुप्यगोत्रादौ]** ॥

गतिर्गतौ । ननु गतावित्यस्याऽभावे 'प्रपचती'त्यादावपि निघातः स्यादत आह—**गतेः शुद्धेवेति। एवं कृदन्तेपीऽति**। शुद्धे गतियुक्ते वेत्यर्थः। **अभावात्**—अप्रतीतेः। **गतिस्वरः**—'गतिरनन्तर'इति । एवं च कृदन्ते गतिपरगतिनिघातस्य फलाऽभावः । तिङन्तेऽप्युदात्तवतीत्युत्तरसूत्रेण भवत्येव सः । अनुदात्ते तु नियमाश्रयणादप्रवृत्तिरित्याह-**तिङि चेति** । **अनन्तरस्य वेति** । यथाऽनन्तरस्य नियमेन व्यावृत्तिर्न तु शेषनिघातस्य तथा व्याख्यातुमुचितं नान्यथाऽतो वा विपरीतनियमो नेत्यर्थः। 'आ मन्द्रै'रिति प्रयोजनं पाक्षिक-

ऽनुदात्तत्वं यथा स्यान्मन्द्रशब्दे मा भूत् । आ मन्द्रैरिन्द्र हरिभिर्याहि मयूर-रोमभिः ॥*॥ छन्दोऽर्थमिति चेन्नाऽगतित्वात् ॥*॥ छन्दोऽर्थमिति चेत्तन्न ॥ किं कारणम् ? ॥ 'अगतित्वात्'-। यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतः। न चात्राऽऽङो मन्द्रशब्दं प्रति क्रियायोगः॥ किं तर्हि ?॥ याहिशब्दं प्रति ॥ इहापि तर्हि न प्राप्नोति—अभ्युद्धरति समुदानयति उपसमादधातीति॥ अत्रापि नाऽभेरुदं प्रति क्रियायोगः ॥ किं तर्हि ? ॥ हरतिं प्रति क्रियायोगः॥

प्र.] तीष्टसिद्धये शास्त्रारम्भात्। अनन्तरस्य वा नियमाच्छेषनिघाताऽव्याघातात् । आमन्द्रैरिति। 'ते प्राग्धातो'रित्यत्र द्वौ पक्षौ, प्रयोगनियमः संज्ञानियमो वा। तत्र यदा प्रयोगनियमः—'धातोः प्रागेव गत्युपसर्गाः प्रयोक्तव्या' इति, तदा 'छन्दसि परेऽपि' 'व्यवहिताश्चे'त्यारब्धव्यम् । तत्रैव चेदमुक्तं—"प्राग्वचनं प्रयोगनियमार्थं चेदनुकरणस्येतिकरणपरप्रतिषेधोऽनिष्टशब्दनिवृत्त्यर्थः, छन्दसि परव्यवहित-वचनं चे"ति । अस्मिन्पक्षे याहीत्येतदपेक्षया आङो गतित्वान्निघातप्रसङ्गः । यदा तु संज्ञानियमो 'धातोः प्राक् प्रयुज्यमाना गत्युपसर्गसंज्ञा भवन्ति न तु परे नापि व्यवहिता' इति तदाऽत्राङो गतित्वाऽभावान्निघाताऽप्रसङ्गः ॥

न चात्राङ इति। मन्द्रशब्दस्य रूढिशब्दत्वात्क्रियावाचित्वाऽभावात् । ननु परनिमित्ताऽनुपादाने 'यत्क्रियायुक्तास्तं प्रती'ति कथं लभ्यते ?। उच्यते। 'पदस्ये'-त्यधिकारात्पदविधित्वात्समर्थपरिभाषोपस्थानादेतद्विशेषलाभः । **नाभेरुदं प्र-**

उ.] मित्याह—**ते प्रागिति। तत्रादाङ इति।** तत्पक्षे छन्दसि परेऽपि व्यवहिताश्चेत्यस्य प्रत्याख्यानान्न तद्बलेन छन्दसि व्यवहितपरयोर्गतित्वमिति भावः । अयमेव भाष्ये उत्तराशयः ।

ननु मदे रकि मन्द्रशब्दनिष्पत्तेस्तत्र मदिक्रियानुषङ्गान्मन्द्रं प्रति क्रियायोगोऽस्त्येवेत्यत आह—**मन्द्रशब्दस्येति ।** उणादिषु व्युत्पत्त्यर्थमेव क्रियोपादीयते, रूढ्यर्थं एव तु प्रवृत्तिनिमित्तमिति भावः । **ननु परेति।** यथो'पसर्गस्य घञि' 'उपसर्गादसमासेऽपी'त्यादौ, तत्रैव 'यत्क्रिया युक्ता' इति न्यायो न चाऽत्र तथेति भावः । **समर्थेति ।** ततश्च 'येन गतेः सामर्थ्यं तत्प्रति यो गतिः स तस्मिन्परे निहन्यत' इत्यर्थ इति भावः । चिन्त्यमेतत्—एकार्थीभावविषय एव तत्प्रवृत्तेः, न चैतेषु तत्संभावना, साक्षाद्विध्युद्देश्ययोर्विधेयोद्देश्य-योर्वा तत्स्वीकारात्। भाष्यस्य त्वयमर्थः, यया क्रिययाऽव्यवहितपरया युक्तास्तं प्रत्येव गत्यादि-संज्ञाः । प्रकृते तु यया क्रियया योगस्तद्व्यवहितत्वेन संज्ञानियमपक्षे गतित्वाऽभावो, येन चाऽव्यवधानं तस्य क्रियात्वाऽभाव इति सर्वथा गतित्वाऽभाव इति । **'किं तर्हि याहि**

नैष दोषः । उदं प्रति क्रियायोगः ॥ कथम् ? ॥ उत्-हरतिक्रियां विशिनष्टि । उदा विशिष्टाम् अभिर्विशिनष्टि । तत्र 'यत्क्रियायुक्ता' इति भवत्येव सङ्घातं प्रति क्रियायोगः ॥ इहापि तर्हि मन्द्रसाधना क्रियाऽऽङाऽभिव्यज्यते— 'आयाहि मन्द्रै'रिति॥ ननु 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेने'ति ?॥ नैतत्सारम्—'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' ॥ किं कारणम् ? ॥ साधनं हि क्रियां निर्वर्तयति तामुपसर्गो विशिनष्टि, अभिनिर्वृत्तस्य चोपसर्गेण विशेषः शक्यो वक्तुम् ॥ सत्यमेवमेतत् । यस्त्वसौ धातूपसर्गयोरभि-

---

प्र.] **तीति** । उच्छब्दस्य क्रियावाचित्वाऽभावात् । **उदमिति** । उपसर्गः क्रियायाः समानाधिकरणो विशेषकः, तत्राऽन्वयव्यतिरेकाभ्यां धातुः क्रियावचनः । उपसर्गास्तु विशेषस्य वाचका इति धातूपसर्गसमुदायं क्रियाविशेषवचनं प्रत्यभेगतित्वादवयवव्यतिरेकेण समुदायाऽभावादवयवमुदं प्रति गतित्वमित्यर्थः ।

इहापीति । मन्द्रादिकरणमिन्द्रकर्तृकं यानमाङा विशेष्यत इति समुदायं क्रियाविशेषवाचिनं प्रत्याङो गतित्वमिति वक्तव्यम् । **पूर्वं धातुरिति** । यानक्रिया आङा विशिष्टा मन्द्रादिभिः साधनैः सम्बध्यते इति न समुदायं प्रत्याङो गतित्वमपि तु 'याही'त्येतत्पदं प्रतीत्यर्थः । **अभिनिर्वृत्तस्येति** । सतो ह्यर्थस्य विशेषणेन सम्बन्धो दृश्यते । साधनायत्तं च क्रियायाः सत्त्वमिति तस्याः प्राक्साधनेन योगः, पश्चादुपसर्गेण । कथमसती साधनेनाऽभिसम्बध्यत इति चेत् , साधनेन तस्या उत्पाद एव सम्बन्धः । ततश्च साधनादवाप्तजन्मा क्रियोपसर्गेण विशेष्यत इत्युक्तं भवति । **यस्त्वसाविति** । नहि साधनादुत्पन्ना क्रियाऽन्यतो

उ.] **शब्दंप्रती'ति** भाष्यस्यं—तद्व्यवहितत्वाद्गतित्वाऽभाव इति भावः । नानार्थस्य धात्वर्थे विभक्त्यर्थमद्वारीकृत्य भेदेनाऽन्वयाऽभावादाह—**समानाधिकरण इति** । कथं तर्हि **'उदं प्रति अत्र क्रियायोग'** इति परिहारवादिनो वचनमत आह—**अन्वयव्यतिरेकेणेति** । **मन्द्रादिकरणमिति** । ससाधनक्रियाया आङा विशेषणादुक्तन्यायेन मन्द्रं प्रत्यपि क्रियायोगादतिप्रसङ्गनिवारणाय गताविति वक्तव्यमित्यर्थः । भाष्ये—**आङाऽभिव्यज्यत** इत्यनेन द्योतकत्वपक्षं सूचयति । भाष्येऽभ्युद्धरतिविषये आह—**गतिनेति** । गतिना तु विशिष्टः । **आङा विशिष्टेति** । आङर्थेन वक्तृसंमुखोत्तरदेशसंयोगानुकूलत्वेनेत्यर्थः । **सतो हीति** । ज्ञातस्येत्यर्थः । क्रियायाः सत्त्वं—ज्ञानम् । अयं भावः—साधनकार्यतिङादिविशिष्टो धातुः साध्यत्वविशिष्टार्थबोधकः, उपस्थिता च क्रिया विशेषणेन संबध्यत इति । **कथमसतीति** । अज्ञातेत्यर्थः । **उत्पाद एव**—ज्ञानोत्पाद एवेत्यर्थः । **साधनात्**—साधन-

सम्बन्धस्तमभ्यन्तरीकृत्य[1] धातुः साधनेन युज्यते । अवश्यं चैतदेवं विज्ञेयं, यो हि मन्यते–'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणे'ति । 'आस्यते गुरुणे'त्यकर्मकः 'उपास्यते गुरु'रिति केन सकर्मकः स्यात् ? ॥

गतिना तु[3] विशिष्टस्य गतिरेव विशेषकः ।
साधने केन ते न स्याद्बाह्यमाभ्यन्तरो हि सः ॥ १ ॥

तिङि चोदात्तवति ।८।१।७१।

तिङ्ग्रहणं किमर्थम् ? ॥ * ॥ तिङ्ग्रहणमुदात्तवतः परिमाणार्थम् ॥ * ॥

प्र.] विशेषं लभते, अपि तु विशिष्टैव क्रिया साधनेनोत्पाद्यते, ततश्च प्रयोक्ता विशिष्टायाः क्रियायाः साधनेन सम्बन्धं प्रतिपादयितुं सोपसर्ग(स्य)समुदायं प्रयुङ्क्ते । यथैव यानस्येदं साधनं न पाकादेरिति प्रतिपादनाय यातेः प्रयोग एवमागमनस्येदं साधनं न गमनस्येति प्रतिपादयितुं सोपसर्गस्य प्रयोगः । ततश्च परमार्थतो धातूपसर्गसङ्घात एव क्रियावाची, पृथगुपदेशस्तु धातूपसर्गयोरडादिव्यवस्थार्थः । ततश्चाऽन्तरङ्ग उपसर्गयोगो बहिरङ्गः साधनयोगः । **आस्यत इति** । केवल आसिरकर्मक इति तस्मात्कर्तृभावयोर्लकार उत्पद्यते । उपसर्गयोगे त्वर्थान्तरवृत्तित्वात्सकर्मकत्वात्कर्मणि लकारोत्पत्तिः । यदि तु प्राक् साधनेन सम्बन्धः स्यात्ततोऽकर्मकत्वात्कर्मणि लकारो नोपपद्यते । तस्मात् क्रियाविशेषणप्रतिपादनाय 'पूर्वं धातुरुपसर्गेण युज्यत' इत्याङो मन्द्रं प्रत्यगतित्वाद्गताविति न कर्त्तव्यम् । **गतिनेति** । ऊर्ध्वताविशिष्टा हरतिक्रिया गतिना विशेष्यतेऽभ्युद्धरतीत्यत्रेत्यर्थः । **साधन इति** । गतावित्यस्मिन्नसति आ मन्द्रैरित्यत्र मन्द्रशब्दे साधनाभिधायिनि परतो निघातः कथं न स्यादिति **चोद्यम्** ।

उत्तरमाह–**बाह्यमिति** । साधनं बाह्यं, तत्सम्बन्धस्य बहिरङ्गत्वात् । धातूपसर्गयोस्त्वन्तरङ्ग इति मन्द्रं प्रत्यगतित्वान्निघाताऽभावः ॥ [**गतिर्गतौ**] ॥

तिङि चोदा । तिङ्ग्रहणमिति । या क्रिया यत्क्रिया, यत्क्रियया युक्ता

उ.] प्रयुक्तकार्यविशिष्टाद्धातोर**वासजन्मा** जातज्ञाना **उत्पाद्यते** ज्ञाप्यते । 'लोक **इति** शेषः । **अन्तरङ्ग उपसर्गयोग इति** । उपसर्गार्थयोग इत्यर्थः । **उपसर्गयोगे त्विति** । उपसर्गद्योत्यार्थयोगे-त्वित्यर्थः । **उपसर्गेणेति** । तदर्थेनेत्यर्थः । अत्र यद्वक्तव्यं तत्सुट्कात्पूर्वं इत्यत्रोक्तम् । **निघातः कथं न स्यादिति** । ते–तव,–साधने परतः केन न स्यादित्यन्वयः । **धातूपसर्गयोरिति** । तदर्थयोरित्यर्थः । [**गतिर्गतौ**] ॥

तिङ्ग्रहणं क्रियते ॥ [किं प्रयोजनम् ?] । 'उदात्तवतः परिमाणार्थम्' । तिङ्ग्युदात्तवति यथा स्यान्मन्द्रशब्दे मा भूत्–आ मन्द्रैरिन्द्र हरिभिर्याहि ।

॥ * ॥ यद्योगाद्गतिः ॥ * ॥ **यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न चाङो मन्द्रशब्दं प्रति क्रियायोगः ॥ किं तर्हि ? ॥ 'याहि'शब्दं प्रति ॥**

॥ * ॥ यद्योगाद्गतिरिति चेत्प्रत्ययोदात्तत्वेऽप्रसिद्धिः ॥ * ॥ **यद्योगाद्गतिरिति चेत्प्रत्ययोदात्तत्वेऽप्रसिद्धिः स्यात् । यत्प्रकरोति । तस्मात्तिङ्ग्रहणं कर्तव्यम् ॥**

यदि तिङ्ग्रहणं क्रियते आमन्ते न प्राप्नोति,–प्रपचतितरां प्रजल्पति-

---

प्र.] यत्क्रियायुक्ता इत्याश्रयणादव्याप्तिर्न भविष्यति, क्रियमाणे च तिङ्ग्रहणेऽव्याप्तिः, 'प्रपचतितरा'मित्यामन्ते निघाताऽप्रसङ्गादिति प्रश्नः। **परिमाणार्थमिति।** असति तिङ्ग्रहणे सर्वस्मिन्नुदात्तवति निघातः स्यादिति तत्परिच्छेदाय तिङ्ग्रहणमित्यर्थः । **आ मन्द्रैरिति ।** मन्द्रशब्दो रक्प्रत्ययान्तोऽन्तोदात्तः । **यद्योगादिति ।** गतिशब्दः पित्रादिशब्दवत्सम्बन्धिशब्दत्वात्सम्बन्धिनमाक्षिपतीति क्रियावाचिन एवोदात्तवतो ग्रहणं नान्यस्येत्यर्थः । **प्रत्ययोदात्तत्व इति ।** धातुरेव क्रियावाचित्वाद्गतिसंज्ञानिमित्तमिति धातावेवोदात्तवति गतेर्निघातः स्यान्न तु प्रत्यये। तिङ्ग्रहणात्तु परिमाणार्थात्प्रत्ययोदात्तेनाप्युदात्तवति तिङन्ते गतेर्निघातो भवति । **प्रपचतितरामिति ।** यदा 'गतिकारकोपपदानां कृद्भिरेव समासो नान्येन स च प्राक् सुबुत्पत्ते'रिति दर्शनं तदामः स्वरेणोदात्तवत्यामन्ते गतेर्निघात इष्यमाणस्तिङ्ग्रहणे सति न प्राप्नोति, अतिङन्तत्वादामन्तस्य । यदा त्वविशेषेण 'गतीनां समासः प्राक्सुबुत्पत्ते'रिति पक्षस्तदाऽऽमन्तेन प्रशब्दस्य समासेऽव्ययपूर्वपद-

---

उ.] तिङि चो । ननु यस्य वाच्या क्रिया यत्क्रियेत्याश्रयणे क्रियावाचकधातावेवोदात्तवति स्यात् 'यत्प्रपचती'त्यादौ, न तु 'यत्प्रकरोती'त्यादौ प्रत्ययोदात्तवतीति तिङ्ग्रहणमवश्यं कर्तव्यमत आह–**या क्रियेति ।** अत्र पक्षेऽर्थं प्रति गतित्वं, न शब्दं प्रति, तत्रार्थे कार्याऽसंभवात्तद्बोधकशब्दे परतः कार्यं विधीयमानं क्रियाप्रधाने सर्वत्रोदात्तवति सिद्ध्यतीत्यसत्यपि तिङ्ग्रहणेऽव्याप्त्यभाव इत्यर्थः । 'आमन्ते निघाते'ति पाठः। 'आमन्तेन त्वि'त्यपपाठः। **तत्परिच्छेदायेति ।** विशेषेऽवस्थापनायेत्यर्थः। **संबन्धिशब्दत्वादिति।** क्रियायोगे गतिसंज्ञाविधानादित्यर्थः । **धातुरेवेति ।** यस्य वाच्या क्रियेत्यर्थादिति भावः । एवञ्च 'यत्प्रपचती'त्यादावेव स्यादिति तात्पर्यम् । **यदा त्विति ।** तदा नात्राऽव्याप्तिरिति भावः । **शेषनिघातेनेति ।** एवञ्चोदात्तवतः परत्वाऽभावान्नास्य तत्र प्राप्तिरिति भावः । वस्तुतोऽत्र समासो

तराम् । असति पुनस्तिङ्ग्रहणे क्रियाप्रधानमाख्यातं तस्मादतिशये तर[1]-बुत्पद्यते, तरबन्तात्स्वार्थे आम्, तत्र 'यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत' इति भवेत्येतं[2] सङ्घातं प्रति क्रियायोगः । तस्मान्नार्थस्तिङ्ग्रहणेन ।। कस्मान्न भवति–आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः? ।। 'यद्योगाद्गति'[3]रिति । [यद्योगाद्गतिस्तं[4] प्रति गत्युपसर्गसंज्ञे भवतो न चाङो मन्द्रशब्दं प्रति क्रियायोगः] ।। ननु चोक्तं–"यद्योगाद्गतिरिति चेत्प्रत्ययोदात्तत्वेऽप्रसिद्धि"रिति ।। नैष दोषः । 'यत्क्रियायुक्ता' इति नैवं विज्ञायते यस्य क्रिया यत्क्रिया, यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति ।। कथं तर्हि ?।। या क्रिया यत्क्रिया यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति।।

आमन्त्रितं पूर्वमविद्यमानवत् ।८।१।७२।

वत्करणं किमर्थम् ? ।। स्वाश्रयमपि यथा स्यात् । आम् भो देवदत्ते-

प्र.] प्रकृतिस्वरेण शेषनिघातेन च भाव्यम् । अथवा 'गतिकारकोपपदात्कृ'-दित्यत्र कृद्ग्रहणप्रत्याख्यानादुत्तरपदप्रकृतिस्वरेण प्रशब्दस्य शेषनिघातस्तदा तिङ्ग्रहणस्याऽव्याप्तिदोषो न चोदनीयः । कस्मादिति । 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणे'ति दर्शने सङ्घातं प्रत्यस्य गतित्वात्प्राप्नोति । यद्योगादिति । 'पूर्वमुपसर्गेण धातोर्योगः पश्चात्साधनेने'ति प्रतिपादनात् । यस्य क्रियेति । अन्वयव्यतिरेकाभ्यां यस्य क्रिया धातोरेवासौ क्रिया वाच्येति तमेव प्रति गतित्वं स्यात् । यदि तु या क्रिया यत्क्रियेति क्रियालक्षणोऽर्थ आश्रीयते तदाऽर्थं प्रति गतित्वं न शब्दं प्रति । तत्राऽर्थे कार्याऽसम्भवात्तद्वाचिनि शब्दे परतः कार्यं विज्ञायमानं क्रियाप्रधाने सर्वस्मिन् प्रत्ययोदात्तत्वेन धातूदात्तत्वेन चोदात्तवति सिध्यति । [तिङि चोदात्त] ॥

आमन्त्रितं । वत्करणमिति । वतिमन्तरेणाप्यतिदेशो दृश्यते यथा 'गोतो

उ.] वैकल्पिक इति 'गतिकारकोपपदा'दित्यत्र निरूपितं । तेन समासाऽभावपक्षे इदं भाष्यमिति न कश्चिद्दोषः । अस्य गतित्वादिति । आङ इत्यर्थः । 'प्रस्ये'ति त्वपाठः । पूर्वमुपसर्गेणेति । तदर्थेनेत्यर्थः । यस्य क्रियेति । कुत्र संबन्धषष्ठीत्यत आह–अन्वयव्यतिरेकेति । एवञ्च यत्प्रकरोतीत्यादावव्याप्तिः स्यादिति भावः । तद्वाचिनीति । तद्बोधके इत्यर्थः । एवञ्च सूत्रे तिङ्ग्रहणं क्रियाप्रधानोपलक्षणमिति भावः।। [तिङि चोदात्तवति] ।।

आमन्त्रितं पूर्वं । ननु वत्करणाऽभावेऽर्थान्तरस्यापत्तेरतिदेशो दुर्लभ इत्याशङ्क्य

त्यत्र[1] 'आम एकान्तरमामन्त्रितमनन्तिक' इत्येकान्तरता यथा स्यात् ।
॥ * ॥ पूर्वं प्रति विद्यमानत्वादुत्तरत्रानन्तर्याप्रसिद्धिः ॥ * ॥ **पूर्वं प्रति विद्यमानत्वादुत्तरत्रानन्तर्यस्या[2]ऽप्रसिद्धिः स्यात् । इमं मे गङ्गे यमुने सरस्वति शुतुद्रि[3] । गङ्गेशब्दोऽयं यमुनेशब्दं प्रत्यविद्यमानवद्भवति । [न तु[3] मेशब्दं प्रति] । तत्रामन्त्रितस्य पदात्परस्येत्यनुदात्तत्वं न स्यात् ॥** * ॥ सिद्धं तु पदपूर्वस्येति वचनात् ॥ * ॥ **सिद्धमेतत् ॥ कथम् ? ॥ 'पदपूर्वस्येति वचनात्' । पदपूर्वस्य चामन्त्रितस्याऽविद्यमानवद्भावो भवतीति वक्तव्यम् ॥**

कानि पुनरस्य योगस्य प्रयोजनानि ? ॥ * ॥ अविद्यमानवत्त्वे प्रयोजनमामन्त्रित[6]युष्मदस्मत्तिङ्निघाताः ॥ * ॥ **[अविद्यमानवत्त्वे आमन्त्रितयुष्मदस्मत्तिङ्निघाताः प्रयोजनम्] ॥ 'आमन्त्रितस्य पदात्परस्यानुदात्तो भवती'-तीहैव भवति'पचसि देवदत्त' । 'देवदत्त यज्ञदत्ते'त्यत्र न भवत्यविद्यमानवत्त्वादामन्त्रितस्य । 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ' इतीहैव भवति-'ग्रामो वां स्वम्' 'जनपदो नौ स्वम्'। 'देवदत्तयज्ञदत्तौ युवयोः स्व'मि-**

प्र.] णि'दिति प्रश्नः । नन्वसति वत्करणे 'पूर्वमामन्त्रितमविद्यमान'मित्युच्यमाने पूर्वस्यामन्त्रितस्य निवृत्तिः स्यात् । नैष दोषः । अर्थप्रत्यायनाय शब्दप्रयोगादनिवृत्तेऽर्थे शब्दनिवृत्त्यभावात् । अथापि 'परप्रयोगो भवतु पूर्वप्रयोगो मा भू'दित्यर्थः कल्पेत तथापि राजदन्तादिषु 'परमामन्त्रितं चे'ति वक्तव्यं स्यात् । **स्वाश्रयमपीति ।** यत्स्वाश्रयं कार्यमातिदेशिकेन विरुध्यते तद्बाध्यते । यथा 'चण्डालवदस्मिन् ब्राह्मणे वर्तितव्य'मित्यतिदेशे कृते 'ब्राह्मणा भोज्यन्ता'-मित्युक्ते नाऽसौ भोज्यते। तथा च पूर्वविधिग्रहणस्य 'नैधेय' इति प्रत्युदाहरण-मुक्तं, सति स्थानिवत्त्वे त्र्यज्व्यपदेशेन द्व्यज्व्यपदेशस्य बाधनाड्ढकोऽप्रसङ्गात् ।

उ.] परिहरति-**नन्वसतीति । अनिवृत्तेऽर्थे इति ।** इदं चिन्त्यम् , अर्थाऽनिवृत्तावेव लोपादिदर्शनात् । तस्माल्लोपपदे वक्तव्ये गुरूच्चारणादतिदेश इति बोध्यम् । **इति वक्तव्यं स्यादिति ।** न च वाक्येऽपि पूर्वप्रयोगाऽभावायाऽत्र पाठः, एवमप्यामन्त्रितं परमित्येव सिद्धे शेषवैयर्थ्यापत्तेः । ननु सामर्थ्यादतिदेशलाभेऽपि स्वाश्रयकार्याऽसिद्धिः कुतोऽत आह-**यत्स्वाश्रयमिति । तद्बाध्यत इति ।** न त्वविरुद्धं बाध्यत इत्यर्थः । तत्र दृष्टान्तमाह-**यथेति ।** नैधेये निपूर्वाद्धाञः कावातो लोपे **'द्व्यचः'** 'इतश्चानिञ'इति ढक् ।

स्यत्र न भवत्यविद्यमानवत्त्वादामन्त्रितस्य।'तिङ्ङतिङः' इतीहैव भवति—'देवदत्तः पचती'ति[1]।'देवदत्त पचसी'त्यत्र न भवत्यविद्यमानवत्त्वादामन्त्रितस्य॥
॥ * ॥ पूजायामनन्तरप्रतिषेधः ॥ * ॥ पूजायामनन्तरप्रतिषेधः प्रयोजनम्। यावत्पचति शोभनम्। यावद्देवदत्त पचसीत्यत्रापि सिद्धं भवति॥
॥ * ॥ जात्वपूर्वम् ॥ * ॥ जात्वपूर्वं प्रयोजनम्। जातु पचति। देवदत्त जातु पचसीत्यत्रापि सिद्धं भवति ॥*॥ आहो उताहो चानन्तरविधौ ॥*॥ आहो उताहो चानन्तरविधौ प्रयोजनम्। आहो[2] पचसि, उताहो पचसि। आहो देवदत्त पचसि उताहो देवदत्त पचसीत्यत्रापि सिद्धं भवति। ॥*॥ आम एकान्तरविधौ ॥ * ॥ आम एकान्तरविधौ प्रयोजनम्। आम् पचसि

प्र.]एवमिहाप्येकान्तरताऽविद्यमानवत्त्वेन विरोधान्निवर्तेत,वत्करणात्तु यत्नान्न निवर्तते। आम् भो देवदत्तेति। 'नामन्त्रित' इति निषेधादेकान्तरता सिद्धेति चिन्त्यमेतत्। पूर्वं प्रतीति। पूर्वशब्दस्य सम्बन्धिशब्दत्वात्परं प्रत्यामन्त्रितस्याऽविद्यमानवत्त्वात्[3] पूर्वं तु प्रति विद्यमानत्वमेवेति तेन व्यवधानात्पूर्वाश्रयकार्याऽप्रसङ्गः। सिद्धं त्विति। पूर्वं यत्पदं तदपेक्षयापि पूर्वस्याऽऽमन्त्रितस्याविद्यमानत्वाद्व्यवधायकत्वाऽभावः। अन्ये तु न्यायसिद्ध एवायमर्थ इत्याहुः। पूर्वत्वस्य परापेक्षत्वात्प-

---

उ.]वत्करणात्त्विति। तत्सामर्थ्याद्विरुद्धमपि स्वाश्रयं प्रवर्त्येत इत्यर्थः। व्याख्यानाच्चेदं काचित्कमिति नातिप्रसङ्गः। चिन्त्यमेतदिति। एवञ्च बहुवचनान्तं प्रत्युदाहर्त्तव्यं। तत्र हि 'विभाषितं विशेषवचने'इत्यनेन पक्षेऽविद्यमानवद्भावान्निघातप्रसङ्ग इति भावः। वस्तुतस्तु 'नामन्त्रित'इति सूत्रे उत्तरसूत्रापकृष्टसामान्यवचनमित्यनेन संबन्धिशब्दत्वादामन्त्रित इति सप्तम्यन्तार्थे विशेषवचनत्वाक्षेपे सामानाधिकरण्यस्यार्थलब्धतया समानाधिकरणग्रहणमत्यन्तसमानाधिकरणग्रहणार्थम्। एवञ्च नाऽत्र निषेधप्राप्तिः। भोःशब्दस्य सामान्यवचनत्वेऽपि निपातत्वाल्लिङ्गादिवाचित्वाऽभावेन सत्त्वार्थकदेवदत्तपदेनाऽत्यन्तसमानाधिकरणत्वाऽभावादिति चिन्त्यमेव चिन्त्यम्। तेन व्यवधानादिति। 'गङ्गे'इत्यस्य 'यमुने'शब्दं प्रत्यविद्यमानवत्त्वेऽपि 'मे'शब्दं प्रति विद्यमानत्वाद्व्यवधानेन, 'मे'शब्दनिमित्तो 'यमुने' इत्यस्य निघातो न स्यादित्यर्थः। पूर्वं यत्पदमिति। वार्तिके 'पदं च तत्पूर्वं चे'ति कर्मधारयः। 'तत्संबन्ध्यानन्तर्यादावपि अविद्यमानव'दिति वाच्योऽर्थस्तत्फलितमाह— तदपेक्षयापीति। एवञ्च पूर्वशब्दस्य संबन्धिशब्दतया परं प्रति; अस्माद्वचनात्पूर्वं

देवदत्त । आम् भोः पचसि देवदत्तेत्यत्रापि सिद्धं भवति । अविद्यमानवत्त्वा-दामन्त्रितस्य ॥ [आमन्त्रितं पूर्वमविद्यमानवत्] ॥

नामन्त्रिते समानाधिकरणे ८।१।७९।

इह कस्मान्न भवति—अघ्न्ये देवि सरस्वति इडे काव्ये विहव्ये एतानि ते अघ्न्ये नामानि ? ॥ योगविभागः करिष्यते—'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' । ततो 'विभाषितं विशेषवचन' इति ॥ [नामन्त्रिते समानाधिकरणे] ॥

सामान्यवचनं विभाषितं विशेषवचने ।८।१।८०।

इह कस्मान्न भवति—ब्राह्मण वैयाकरण ? ॥ 'बहुवचन'मिति वक्ष्यामि ॥

प्र.] रस्य कार्ये स्वनिमित्तेऽन्यनिमित्ते वा कर्तव्ये आमन्त्रितस्याऽविद्यमानवत्त्वान्मे-शब्दात्परोऽनन्तरो भवति 'यमुने'शब्द इति निघातसिद्धिः । [**आमन्त्रितं पूर्वम्**] ॥

नामन्त्रिते । इहेति । 'नामन्त्रिते समानाधिकरणे' इति सूत्रं पठितं, ततः 'सामान्यवचनं विभाषितं विशेषवचने' इति द्वितीयं, ततश्च पर्यायशब्दानामपि सामानाधिकरण्यादविद्यमानवत्त्वनिषेधान्निघातप्रसङ्गः । **योगविभाग इति** । पर्यायत्वाच्च सामान्यवचनत्वाऽभावः, सामान्यस्य विशेषापेक्षत्वात् । एवं चामन्त्रिताद्युदात्तत्वं सर्वेषामेतेषां भवति । [**नामन्त्रिते समानाधिकरणे**] ॥

सामान्यवचनं विभाषितम् । इहेति । बहुवचनग्रहणमपाणिनीयमिति प्रश्नः । **बहुवचनमिति** । तेन 'ब्राह्मणा वैयाकरणा'इति वा निघातः, 'ब्राह्मण-

---

उ.] प्रत्यपीति 'मे' शब्दाश्रयो 'यमुने'इत्यस्य निघातः सिद्ध्यतीति भावः । **स्वनिमित्तेऽन्यनिमित्ते वेति** । परं प्रत्येवाऽविद्यमानवदित्यवधारणं नाश्रीयते मानाऽभावात् । परस्य कार्ये पूर्वं प्रत्यपि तत्त्वमिति भावः । [**आमन्त्रितं पूर्वमविद्यमानवत्**] ।

नामन्त्रिते । सामानाधिकरण्यादिति । समानार्थत्वं सामाधिकरण्यम् । तच्च पर्यायशब्दानां सुतरामस्तीति भावः । भिन्नप्रवृत्तिनिमित्तत्वं तु भाष्यकृता तल्लक्षणेनाश्रितमिति तात्पर्यम् । अतएव पटीमृद्ध्यावित्यत्र युगपदधिकरणवचनतापक्षे पुंवद्भावः शङ्कितश्चाऽर्थे द्वन्द्व इति सूत्रे भाष्ये । अघ्न्यादीनां पर्यायत्वं श्रुतावेवोक्तमित्याह—भाष्ये—**एतानि ते अघ्न्ये नामानीति । एवञ्चेति** । पदात्परत्वाऽभावेन निघाताऽप्राप्तावित्यर्थः । एतदुदाहरणम्—अग्ने पावक रोचिषेति । पावकेत्यग्नेर्विशेषणमत्र । [**नामन्त्रिते समाना**] ।

सामान्यवचनं विभा । ननु पूर्वसूत्रार्थं सामान्यवचनग्रहणमावश्यकमत आह—

सामान्यवचनमिति शक्यमवक्तुम् ॥ कथम् ? ॥ 'विभाषितं विशेषवचन' इत्युच्यते, तेन यत्प्रति विशेषवचनमित्येतद्भवति तस्य भविष्यति ॥ किं च प्रत्येतद्भवति ? ॥ सामान्यवचनम् । अपर आह–"विशेषवचन इति शक्यमवक्तुम् ॥ कथम् ? ॥ 'सामान्यवचनं विभाषित'मित्युच्यते तेन यत्प्रति सामान्यवचनमित्येतद्भवति [तस्य भविष्यति]।। किं च प्रत्येतद्भवति ? ॥ विशेषवचनम् । सामान्यवचनं विभाषितं विशेषवचन इति ॥

॥ * ॥ इति श्रीमद्भगवत्पतञ्जलिमुनिविरचिते व्याकरणमहाभाष्ये अष्टमाध्यायस्य प्रथमे पादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः ॥*॥

पूर्वत्राऽसिद्धम् ।८।२।१।

येयं सपादसप्ताध्याय्यनुक्रान्ता एतस्यामयं पादोनोऽध्यायोऽसिद्धो

प्र.] वैयाकरणे'त्यत्र नित्यः । **सामान्यवचनमिति** । 'विशेषवचन'इत्यस्य पूर्वेण संबन्धात्पर्यायस्य विशेषवाचित्वाऽभावात्पूर्वसूत्रार्थमपि सामान्यवचनग्रहणं न कर्तव्यम् 'अघ्न्ये देवी'त्यादौ सर्वेषामामन्त्रिताद्युक्तत्वसिद्धये ।।*।। इति कैयटकृते महाभाष्यप्रदीपेऽष्टमस्य प्रथमे द्वितीयमाह्निकम् ।। पादश्च प्रथमः ॥*॥

पूर्वत्रासिद्धम् । येयमिति । वृत्तिग्रन्थोपक्षेपेण शास्त्राऽसिद्धत्वमाश्रीयते न तु कार्याऽसिद्धत्वं, शास्त्रस्य संनिवेशात्पौर्वापर्यसंभवात्, कार्याणां तु प्रयोगसमवायात्पौर्वापर्याऽयोगात् । शास्त्रद्वारेण वा कार्याणां पौर्वापर्ये शास्त्रस्य मुख्यं पौर्वापर्यमिति तस्यैव ग्रहणं न्याय्यमित्युत्सर्गलक्षणकार्यसिद्धिरपि भवतीति दर्शयति । एतच्च सूत्रमात्मानं विहाय सूत्रान्तराणामसिद्धत्वं प्रतिपादयति न त्वात्मनः,बोधकस्य बोध्यत्वाऽभावात् । एतस्य चाऽसिद्धत्वे सर्वेषां सिद्धत्वात्सूत्रारम्भएवाऽनर्थकः स्यात् । यथा 'सर्वं मिथ्या ब्रवीमी'ति वाक्यं वाक्यान्तराणामेव मिथ्यात्वं प्रतिपादयति । एतस्याऽपि मिथ्यात्वे वाक्यान्तराणां मिथ्यात्वं

उ.] विशेषवचन इति । अस्यैव पूर्वेण संबन्ध इति सर्वेष्टसिद्धिः । * इति श्री**नागोजी**-**भट्टकृते** भाष्यप्रदी**पोद्योते अष्टमस्य** प्रथमे पादे **द्वितीय**माह्निकम् ।। पादश्चायं समाप्तः।।

पूर्वत्रासिद्धम् । सूत्रार्थमात्रकथनस्य भाष्ये क्वाऽप्यदृष्टत्वादत्र तत्कथनं किमर्थमत आह–**वृत्तिग्रन्थोपक्षेपेणेति** । अस्यव क्ष्यमाणेन 'दर्शयती'त्यनेनान्वयः । **उपक्षेपः**–**तिरस्कारः** । अत एवाग्रिमप्रश्नप्रतिवचनाद्युपपत्तिः । कार्यस्य प्राधान्येऽपि कार्याऽसिद्धत्वे

वेदितव्यः ॥ यदि 'सपादायां सप्ताध्याय्यामयं पादोनोऽध्यायोऽसिद्ध' इत्युच्यते ये इह सप्तमीनिर्देशाः पञ्चमीनिर्देशाः षष्ठीनिर्देशाश्चोच्यन्ते तेऽप्यसिद्धाः स्युः ॥ तत्र को दोषः ? ॥ झलो झलि' 'ह्रस्वादङ्गात्' 'संयोगान्तस्य लोप' इत्येतेषां निर्देशानामसिद्धत्वा'त्तस्मिन्निति निर्दिष्टे पूर्वस्य' 'तस्मादित्युत्तरस्य' 'षष्ठी स्थानेयोगा' इत्येताः परिभाषा न प्रकल्पेरन् ॥ नैष दोषः, यद्यपीदं तत्राऽसिद्धं तत्त्विह सिद्धम् ॥ कथम् ? ॥ ॥ * ॥ कार्यकालं संज्ञापरिभाषम् ॥ * ॥ यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम् । 'झलो झलि' 'ह्रस्वादङ्गात्' 'संयोगान्तस्य लोपः' । उपस्थितमिदं भवति,–'तस्मिन्निति निर्दिष्टे पूर्वस्य' 'तस्मादित्युत्तरस्य' 'षष्ठी स्थानेयोगे'ति ॥ यदि 'कार्यकालं संज्ञापरिभाष'मित्युच्यते इयमपि प्ररिभाषाऽस्ति 'विप्रतिषेधे पर'मिति । सा-

---

प्र.] न स्यादित्यनर्थकमेवैतद्वाक्यं स्यात् । यदीति,–यथोद्देशं संज्ञापरिभाषमाश्रित्य चोद्यते । यदा प्रतिपत्ता यथाश्रुतग्राही 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'त्यस्य सूत्रस्य 'यत्र सप्तमीनिर्दिष्टः शब्दस्तत्र पूर्वस्य कार्यं भवती'त्येतमर्थं प्रतिपद्यते, स तु सप्तमीनिर्देशः क्व स्यादिति विशेषं न पर्यालोचयति, तदेको यणची'त्येवमादौ प्रदेशवाक्ये सप्तमीश्रवणात्पूर्वस्य कार्यं प्रतिपद्यते। अस्मिन्पक्षे 'झलो झली'त्येवमादौ सप्तम्या निर्देशस्याऽसिद्धत्वात्परिभाषाफलाऽभावप्रसङ्गः । तथा 'संयोगान्तस्य लोप'इत्यत्र 'षष्ठी स्थानेयोगे'त्येतत्फलाऽभावात्तच्छेषस्याऽलोन्त्यस्येत्यस्याऽपि फलाऽप्रवृत्त्याऽन्तरङ्गत्वात्स्थानसंबन्धविज्ञानेऽपि सर्वस्य पदस्य लोपप्रसङ्गः । यद्यपीदमिति । यथोद्देशपक्षे । तत्त्विह सिद्धमिति । 'कार्यकालं संज्ञापरिभाष'मित्यस्मिन्दर्शने संज्ञापरिभाषाणां ह्यत्यन्तपाराथ्यांन्न स्वा-

---

उ.] दोषमाह–उत्सर्गलक्षणेति । 'अमुष्मै' इत्यादौ स्मायादिः । अनर्थकमेवैतदिति । एवञ्च सामर्थ्यादेवात्मनोऽसिद्धत्वं न प्रतिपादयतीत्यर्थः । यद्यपि जगतो मिथ्यात्वप्रतिपादकश्रुतिवाक्यैरात्मनोऽपि मिथ्यात्वं प्रतिपाद्यते, तथापि शास्त्रवैयर्थ्यापत्त्याऽत्र न तथात्वमिति तत्त्वम् । यद्यपि परिभाषाणां कार्यार्थत्वात्कार्यकालत्वमेव युक्तं तथापि प्रतिपत्तृविशेषापेक्षो यथोद्देशपक्ष इत्याह–यदेति । पूर्वस्य कार्यमिति । 'तद्देशस्थेनैव तेने'ति शेषः । इत्येतत्फलाभावादिति । तत्फलभूतस्थानसंबन्धाऽभावादित्यर्थः । फलाप्रवृत्त्येति । फलप्रवृत्त्यभावप्रसङ्गेनेत्यर्थः । सर्वस्य पदस्येति । अलोऽन्त्यस्येत्येतद्दृष्ट्याऽस्याऽसिद्धत्वात्तदप्रवृत्ताविति भावः । कार्यकालमिति । ननु कार्यकालपक्षेऽपि यत्कार्यं सिद्धं तत्रोपस्थि-

ऽर्पाहोपतिष्ठेत ॥ तत्र को दोषः ? ॥ विस्फोर्यम् अवगोर्यमिति । गुणाद्दीर्घत्वं स्याद्विप्रतिषेधेन ॥ अत उत्तरं पठति—॥ * ॥ पूर्वत्राऽसिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्य ॥ * ॥ पूर्वत्रासिद्धे नास्ति विप्रतिषेधः ॥ किं कारणम् ? ॥ 'अभावादुत्तरस्य' । द्वयोर्हि सावकाशयोः समवस्थितयोर्विप्रतिषेधो भवति न च पूर्वत्राऽसिद्धे परं पूर्वं प्रति भवति ॥ यद्येवं दोग्धा दोग्धुं,—घत्वस्याऽसिद्धत्वाड्ढत्वं प्राप्नोति ॥ काष्ठतट् कूटतट् । संयोगादिलोपस्याऽसिद्धत्वात्संयोगान्तलोपः प्राप्नोति । ॥ * ॥ अपवादो वचनप्रामाण्यात् ॥ * ॥

प्र.] तन्त्र्येण कार्यावगमहेतुत्वम् । केवलमाचार्येण लाघवायाऽनेकप्रधानाङ्गवद्भावप्रतिपत्तये पृथगुपदेशः कृतः । ततश्च 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'त्यनेन केवलेन न किं चित्क्रियते नाऽपि 'झलो झली'त्यनेन, किं तर्हि, संहत्य कार्यं क्रियते, ततो झल्यनन्तरे पूर्वस्य सकारस्य झलः परस्य लोप इति वाक्यार्थ इत्येकवाक्यतायां पौर्वापर्याऽभावादसिद्धत्वाऽभावः । पूर्वत्रासिद्ध इति । गुणे दीर्घस्याऽसिद्धत्वाद्युगपत्प्रसङ्गाऽभावाद्विप्रतिषेधस्य निमित्ताऽभावात्परिभाषाऽनुपस्थानाद्गुण एव प्रवर्तते । यद्येवमिति । 'अभावादुत्तरस्ये'ति न्यायाड्ढत्वे घत्वस्या-

---

उ.] तिरस्तु, एषां शास्त्राणामसिद्धत्वे तस्य कथमत्रोपस्थितिरिति चेन्न, तत्पक्षे कार्येण स्वसंस्काराय स्ववृत्तिलिङ्गचिह्नितपरिभाषाणामाक्षेपः क्रियते । परिभाषा अपि स्वसंस्कार्यत्वेन विधीनपेक्षन्ते । तत्र सपादसप्ताध्याय्यामुभयाकाङ्क्षया संबन्धः । अत्र त्वेतदाकाङ्क्षयैवेति न दोषः । एवञ्च पक्षद्वयसाधारणः पूर्वपक्षः । कार्यकालाश्रयेणान्यतराकाङ्क्षयापि संबन्ध इत्युत्तरम् । तत्त्विह सिद्धमिति । परिभाषाशास्त्रं तु त्रिपाद्यां सिद्धमित्यर्थः । कथमिति । तावतापि कथं सिद्धमित्यर्थः । असिद्धेऽस्मिन्कथं तदुपस्थितिरिति भावः । उत्तरमाह-कार्यकालमिति । नन्वस्यापि कार्येण समकालं तयोः प्रवृत्तिरित्यर्थः, तत्र कार्यस्याऽसिद्धत्वे कथं तत्समकालं प्रवृत्तिरत आह—यत्र कार्यं तत्रैवावस्थितमिति । कार्येणाक्षेपादित्यर्थः । प्रायस्तत्रैवोपस्थितमिति पाठः । कार्यकालशब्दस्य च—कार्येण काल्यते स्वसंस्काराय स्वसन्निधिं प्राप्यते इत्यर्थः । कैयटोक्तव्याख्यायां तु 'यद्यपीदं तत्राऽसिद्धं तत्त्विह सिद्ध'मिति भाष्यस्य फलं चिन्त्यम् । पौर्वापर्याभावादिति । इदमपि चिन्त्यम्—एकवाक्यतामात्रेण पाणिनीयपठितसन्निवेशापेक्षपौर्वापर्याऽहानिः । ध्वनितं चेदं 'तस्मिन्निति निर्दिष्ट'इत्यत्र भाष्ये । तत्र हि 'ङमो ह्रस्वादची'त्यत्र परत्वात्तस्मादित्युत्तरस्येत्येव प्रवर्त्तेत इत्युक्तं । किं चैवमन्योन्याश्रयः, एकवाक्यताज्ञानोत्तरं पौर्वापर्याऽभावज्ञानेऽसिद्धत्वाऽभावज्ञानं, तज्ज्ञाने चैकवाक्यतेति । दीर्घस्य—'हलि चे'त्यस्य । निमित्ताभावादिति । द्वयोः सावकाशयोः समवस्थितयोरेकत्र युगपत्प्रसङ्गो हि तच्छास्त्रप्रवृत्तिनिमित्तमित्यर्थः, न च स प्रकृते इति

[अपवादो वचनप्रामाण्यात्][1] । अनवकाशावेतौ[2] वचनप्रामाण्याद्भविष्यतः। तस्मात्कार्यकालं संज्ञापरिभाषमिति न दोषः ॥*॥ पूर्वत्रासिद्धमधिकारः ॥*॥ 'पूर्वत्राऽसिद्ध'मित्यधिकारोऽयं द्रष्टव्यः ॥ किं प्रयोजनम् ? ॥ ॥ * ॥ परस्य[3] परस्य पूर्वत्र पूर्वत्राऽसिद्धविज्ञानार्थम् ॥ * ॥ [परस्य परस्य पूर्वत्र पूर्वत्राऽसिद्धविज्ञानार्थम्] । परः परो योगः पूर्वं पूर्वं योगं प्रत्यसिद्धो यथा स्यात् । ॥ * ॥ अनधिकारे हि समुदायस्य समुदायेऽसिद्ध(त्वं)विज्ञानम् ॥ * ॥ अनधिकारे हि सति समुदायस्य समुदायेऽसिद्धत्वं विज्ञायेत ॥ तत्र को दोषः ?॥ ॥ * ॥ तत्राऽयथेष्टप्रसङ्गः ॥ * ॥ तत्राऽयथेष्टं प्रसज्येत । गोधुङ्मान् गुड-

---

प्र.] ऽसिद्धत्वाड्डत्वप्रसङ्गः । **अपवाद इति** । योऽपवादः स एव भवति, वचनसामर्थ्यात्प्रकरणस्य श्रुत्या बाधनात् । **पूर्वत्रासिद्धमधिकार इति** । न तु विधिः। तथा हि वक्ष्यमाणत्रिपादीलक्षणात्समुदायाद्यत्पूर्वं तत्र स एव समुदायः सपादसप्ताध्याय्यपेक्षालब्धपरव्यपदेशोऽनपेक्षितान्तर्गतावयवपौर्वापर्योऽसिद्धो भवतीत्येतावानस्य विधिवाक्यस्यार्थो विज्ञायेत, अधिकारे तु परस्य परस्य पूर्वत्र पूर्वत्रासिद्धत्वं संपद्यते । सकलशास्त्रव्यापित्वनिरासार्थं तु परिभाषात्वं नाश्रितं, तेन तैस्तस्येत्यादाविनादिषु कर्तव्येष्वत्वस्यासिद्धत्वादकारान्तनिमित्ता इनादयो न स्युः।

अनधिकारे हीति । यदि स्वतन्त्रो विधिरयं स्यादित्यर्थः। यद्यप्यवयवा एव कार्येषु व्याप्रियन्ते न समुदायः, तथाऽप्यवयवद्वारकस्तस्यापि व्यापारोऽस्तीति वक्ष्यमाणस्य समुदायस्याऽतिक्रान्ते समुदायेऽसिद्धत्वं स्यात् । अधिकारे तु सर्वेष्टसङ्ग्रहः । **अयथेष्टमिति** । अयथेष्टमपि प्राप्नोति न तु यथेष्टमेवेत्यर्थः । **गोधुङ्मानिति** । गोदुहोऽस्य सन्तीति मतुप् । 'दादेर्धातोर्घ'इति घत्वं, जश्त्वस्याऽ-

---

उ.] भावः । भाष्ये-**परं पूर्वं प्रति भवतीति** । परं पूर्वदृष्ट्याऽवस्थितं भवतीत्यर्थः । एवञ्च सा यथोद्देशैवेति भावः । अपवादत्वे वचनप्रामाण्यं न हेतुः, किं तर्हि, अपवादभवने इत्याह-**योऽपवाद इति** । नन्वधिकारादसिद्धत्वसंबन्धे जाग्रति सत्यपि वचनेन कथमपवादत्वं स्यादत आह-**प्रकरणस्येति**। अस्याऽधिकारत्वेनाऽसिद्धत्वं प्रकरणलभ्यमिति भावः। भाष्ये-**कार्यकालं संज्ञापरिभाषमिति न दोष इति** । इतिपक्षेऽन्यतराकाङ्क्षया संबन्धेन न दोष इत्यर्थः । **अनपेक्षितेति** । त्रिपाद्यन्तर्गतपौर्वापर्यस्य शब्देनाऽनपेक्षितत्वादिति भावः । **इत्येतावानिति** । एवञ्च त्रिपाद्यां पूर्वं प्रति परमसिद्धं न स्यादित्यर्थः । **अधिकारे त्विति** । उत्तरत्रोपस्थित्या ततस्ततः पूर्वसूत्रसमुदायस्य पूर्वशब्देन ग्रहणान्न दोषः ।

लिण्मानिति,–षत्वढत्वयोः कृतयो'र्झय' इति वत्वं प्रसज्येत ॥

॥ * ॥ तस्मादधिकारः ॥ * ॥ तस्मादधिकारोऽयं द्रष्टव्यः ।

अथाऽसिद्धवचनं किमर्थम् ॥ * ॥ असिद्धवचम उक्तम् ॥ * ॥ [असिद्धवचने उक्तम्] ॥ किमुक्तम् ? ॥ तत्र तावदुक्तं–"षत्वतुकोरसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं चे"ति । एवमिहाऽपि पूर्वत्राऽसिद्धवचनमादेशलक्षणप्रतिषेधार्थमुत्सर्गलक्षणभावार्थं च । आदेशलक्षणप्रतिषेधार्थं तावत्—राजभिः तक्षभिः राजभ्यां तक्षभ्याम् राजसु तक्षसु इति । नलोपे कृते'ऽत' इत्यैस्भावादयः प्राप्नुवन्ति । असिद्धत्वान्न भवन्ति । उत्सर्गलक्षणभावार्थं च–अमुष्मै अमुष्मात् अमुष्य अमुष्मिन्निति । अत्र मुभावे'ऽत' इति स्मायादयो न प्राप्नुवन्ति, असिद्धत्वाद्भवन्ति । सुपर्वाणौ ।

प्र.] सिद्धत्वादेकाचो बश इति भष्भावः । ततो जश्त्वं गकारः । 'यरोनुनासिकत्वे प्रत्यये भाषायां नित्यवचन'मिति ङकारः । **असिद्धवचनमिति** । किं शास्त्रस्याऽसिद्धत्वमथ कार्यस्येति प्रश्नः। अथवा यच्छास्त्रमुच्चारितं तस्याऽसिद्धत्वमशक्यं कर्तुमिति प्रश्नः । **असिद्धवचन उक्तमिति** । सिद्धस्याऽसिद्धवचनादतिदेश आश्रीयते । शास्त्रस्य चाऽसिद्धवद्भाव आश्रीयते न तु कार्यस्य । अन्यथोत्सर्गलक्षणकार्यं न सिध्येत् । **षत्वतुकोरिति** । 'कोऽस्ये'त्यादौ षत्वं न भवति । 'अधीत्ये'-त्यादौ पूर्वं तुग्भवति पश्चादेकादेशः । **राजभिरिति** । नलोपशास्त्रमैसादिषु कर्त्तव्येष्वसिद्धत्वात्स्वकार्यं न प्रदर्शयतीत्यैसाद्यभावः । **अमुष्मा इति** । अदसो

उ.] **परिभाषात्वमिति** । लिङ्गविशेषानुपादानाच्चेत्यपि बोध्यम् । शास्त्रत्वस्यैव लिङ्गत्वे तु सपादसप्ताध्याय्यामपि पूर्वं प्रति पराऽसिद्धत्वापत्तिः । मध्ये पाठसामर्थ्याश्रयणे तु त्रिपाद्यामपि अप्रवृत्तिः स्यादिति भावः । **वक्ष्यमाणस्य समुदायस्येति** । न तु तदवयवपूर्वं प्रति-तदवयवपरमसिद्धं स्यादिति भावः । ननु किञ्चिदिष्टस्यापि सिद्धेरयथेष्टं प्रसज्येतेत्ययुक्तमत आह–**अयथेष्टमिति** । **जश्त्वस्याऽसिद्धत्वादिति** । इदं सिद्धान्तिरीत्या । भाष्ये–**वत्वं प्रसज्येतेति** । न च वत्वात्परत्वात्प्रत्यये भाषायामित्यनुनासिकत्वे झयोऽसत्त्वात्कथं वत्वापादनमिति वाच्यम् । एतत्पक्षे यथोद्देशत्वमाश्रित्य त्रिपाद्यां तदप्रवृत्तिरित्याशयात् । त्रिपादीस्थे परशास्त्रे तदप्रवृत्तेः सर्वसंमतत्वात् । **किं शास्त्रस्येति** । भाष्येऽर्थशब्दो विषयपर इति भावः । **अथवेति** । अत्राऽर्थशब्दः प्रयोजनपर इति भावः । उभयमपि समाधत्ते–**सिद्धस्येति** । **षत्वं नेति** । आदेशलक्षणमित्यर्थः । **तुगिति** । स्थानिलक्षणः । **स्माया**

सुपर्वाणः। णत्वे कृते 'नोपधाया' इति दीर्घत्वं न प्राप्नोति। असिद्धत्वाद्भवति।

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ।८।२।२।

'सुब्विधिं प्रति नलोपोऽसिद्धो भवती'त्युच्यते भवेदिह राजभिः तक्षभिरिति, नलोपे कृते'ऽत'इत्यैसभावो न स्यात्। इह तु खलु राजभ्यां तक्षभ्यां राजसु तक्षस्विति,–नलोपे कृते दीर्घत्वैत्त्वे प्राप्नुतः ॥ नैष दोषः। ॥ * ॥ सुब्विधिरिति सर्वविभक्त्यन्तः समासः ॥ * ॥ [सुब्विधिरिति सर्वविभक्त्यन्तः समासः]। सुपो विधिः सुब्विधिः, सुपि विधिः सुब्विधिरिति।

प्र.] विभक्तौ त्यदाद्यत्वे कृते परत्वान्नित्यत्वाद्वोत्वप्रसङ्गादकारान्तत्वनिबन्धनस्मायाद्यप्रसङ्गः। उत्वशास्त्रस्याऽसिद्धत्वादप्रवर्तनात्पूर्वं स्मायादयः पश्चादुत्वम्।

नलो। सर्वविभक्त्यन्त इति। सर्वविभक्त्यन्ताऽवयवत्वात्सर्वविभक्त्यन्तः। अथ वा अर्श आदित्वादच्प्रत्ययः,–सर्वविभक्त्यन्तोऽवयवोऽस्यास्तीति। सर्वग्रहणं चाऽनेकोपलक्षणं, द्वितीयाद्यसंभवात्। ननु चैकार्थेन शब्देन भाव्यमिति कथं सर्वविभक्त्यन्तत्वमाश्रीयते?। उच्यते, प्रवृत्तिनिमित्तविशेषाऽनपेक्षया सुब्विधिशब्दवाच्याऽर्थः सुब्विधिरित्याश्रीयते। अथ वा संबन्धसामान्ये षष्ठीं विधाय षष्ठीसमासः क्रियते। न तु स्थान्यादेशसंबन्ध एवाश्रीयते, तेन सुपि यो विधिः स सुपः संबन्धी भवतीति तत्राऽप्यसिद्धत्वं भवति। सर्वविभक्त्यर्थाऽन्तर्भावाच्च सर्वविभक्त्यन्त उच्यते। न चाऽत्र सुपः कार्यं विधीयते। तेन षष्ठी स्थानेयोगेत्यस्योपस्थानाऽभावः। 'उदीचामातः स्थान'इतिस्थानग्रहणाल्लिङ्गानुवादेऽस्याः परिभाषाया अप्रवृत्तिः। यदा त्वेषा परिभाषा प्रत्याख्याता तदाऽपि संबन्धसामान्यस्योपादानात्तस्य चैकत्वादयं संबन्धः संनिकृष्टोऽयं विप्र-

---

उ.] द्यप्रसङ्ग इति। उत्वस्याऽसिद्धत्वेऽपि देवदत्तहन्तृहतन्यायेनाऽदन्तत्वाभावादिति भावः।

न लोपः सु। भाष्ये दीर्घत्वैत्वे प्राप्नुत इति। न हीमे सुपो विधीयन्त इति भावः। ननु समासस्य सर्वविभक्त्यन्तत्वमसंभवीत्यत आह–सर्वविभक्त्यन्तावयवत्वादिति। नन्वेवं सर्वविभक्त्यन्तावयवत्वं समासस्याऽनुपपन्नमत आह–सर्वविभक्त्यर्थेति। तेन षष्ठीति। विध्यङ्गभूतपरिभाषाणां साक्षात्तद्विशेषणे एव प्रवृत्तेरुचितत्वादिति भावः। अत्रैवार्थे लिङ्गमप्याह–उदीचामिति। क्वचित्तु लक्ष्यानुरोधाद्भवत्येव तत्रापि परिभाषाणां प्रवृत्तिः, यथोदात्तस्वरितयोरित्यादौ। वस्तुत इदं चिन्त्यमित्यसकृदावेदितम्। यदा त्वेषेति। षष्ठी स्थाने इत्येषेत्यर्थः। संबंधसामान्यस्येति। संबन्धत्वेन संबन्धस्य षष्ठ्य-

अथ संज्ञाविधौ किमुदाहरणम् ? । **पञ्च सप्त** ॥ **पञ्च सप्तेत्यत्र नलोपे कृते 'ष्णान्ता ष'डिति षट्संज्ञा न प्राप्नोति । असिद्धत्वाद्भवति** ॥

॥*॥ संज्ञाग्रहणानर्थक्यं च तन्निमित्तत्वाल्लोपस्य ॥*॥ **संज्ञाग्रहणं चाऽनर्थकम्** ॥ **किं कारणम् ?** ॥ **'तन्निमित्तत्वाल्लोपस्य' । नाऽकृतायां षट्संज्ञायां जश्शसोर्लुक्, न चाऽकृते लुकि पदसंज्ञा, न चाऽकृतायां पदसंज्ञायां नलोपः प्राप्नोति । तदेतदानुपूर्व्या सिद्धं भवति** ॥ **इदं तर्हि प्रयोजनं पञ्चभिः सप्तभिरिति । 'षट्त्रिचतुर्भ्यो हलादिः' 'झल्युपोत्तम'मित्येष स्वरो यथा स्यात्** ॥

॥*॥ स्वरेऽवधारणाच्च ॥*॥ **स्वरेऽवधारणाच्च सञ्ज्ञाग्रहणमनर्थकम्** ।

प्र.]कृष्ट इति भेदनिबन्धनो व्यवहारो नास्ति । **पञ्चेति** । लौकिकात्प्रयोगान्नकाराऽसंभवं, शास्त्राच्च विभक्त्यभावं मन्यते । **तन्निमित्तत्वादिति** । यथा विभक्तिलोपः शास्त्राधीन एवं नलोपः, ततश्चानुपूर्व्या सिद्धमेतदित्यर्थः । **षट्त्रीति** । अन्यथा नलोपे कृते नान्तत्वाऽभावादसत्यां षट्संज्ञायां 'झल्युपोत्तम'मिति स्वरो न स्यात् । ततश्च 'त्रः सङ्ख्याया'इत्याद्युदात्तं पदं श्रूयते । न चाऽत्र भूतपूर्वगतिराश्रयितुं शक्यते, 'षट्त्री'त्यस्य 'षड्भि'रित्यादौ सावकाशत्वात्, 'झल्युपोत्तम'मित्यस्यापि तिसृभिश्चतुर्भिरित्यादौ । समुदाये ह्यनुवर्त्तमाने केषु चिदवयवेषु कृतार्थं शास्त्रं तद्द्वारेण समुदाये प्रवृत्तमेव भवति । तथा च 'वान्यस्य संयोगादे'रित्यत्र ध्वादिनिवृत्त्यर्थमन्यग्रहणं [कृतम्][2] । अत एव वार्तिककारः परिहारान्तरमाह— **स्वरेऽवधारणाच्चेति** । स्वरे लोपस्याऽसिद्धत्वमुक्तमेवेति स्वरार्थायां षट्संज्ञायामसिद्धत्वं न वक्तव्यम् । केचित्तु 'पञ्च ब्राह्मण्य' इत्यादौ 'न षट्स्वस्रादिभ्य'इति टाप्प्रतिषेधाय षट्संज्ञायां नलोपस्याऽसिद्धत्वमुच्यते इत्याहुः । तत्र नान्तत्वात्पूर्वं

उ.]र्थत्वमिति भावः । **नास्तीति** । तेनाऽन्तरङ्गत्वात्स्थानसंबन्ध एव षष्ठ्यर्थः स्यादिति न शङ्कनीयमिति भावः । ननु 'पञ्चे'त्यत्र संज्ञानिबन्धने[3] जश्शसोर्लुकि ततो नलोप इति नलोपे षट्त्वस्य न फलमत आह—**लौकिकादिति** । 'नलोपे कृत'इति भाष्यस्य लोकतो नकारापगमे कृत इत्यर्थः । **एवं नलोप इति** । लौकिकापगमस्याऽसिद्धत्वमपि दुर्वचनम्, शास्त्रीयत्वादिति भावः । ननु षड्विषयकं 'झल्युपोत्तम'मित्यचरितार्थमेवाऽत आह-**समुदाये हीति । तथा चेति** । अन्यथा स्थाविषयस्य एर्लिङीत्यस्याऽचरितार्थत्वादेव तत्र नित्यसिद्धावन्यग्रहणवैयर्थ्यं स्पष्टमेव । ज्ञापिते तु दाविषये तस्य चारितार्थ्यात्स्थाधातौ [illegible]त्वाद्विकल्पः स्यादित्यन्यग्रहणम् । **पञ्च ब्राह्मण्य इत्यादाविति** । यद्यपीदं

स्वरेऽवधारणं क्रियते—'स्वरविधिं प्रती'ति ॥ इदं तर्हि—दण्डिदत्तौ दत्तदण्डिनौ ।

तुग्विधौ किमुदाहरणम् ? ॥ वृत्रहभ्याम् वृत्रहभिः । नलोपे कृते 'ह्रस्वस्य पिति कृति तु'गिति तुक् प्राप्नोत्यसिद्धत्वान्न भवति ॥ * ॥ तुग्विधौ चोक्तम्॥ * ॥ [तुग्विधौ चोक्तम्]॥ किमुक्तम् ?॥ 'संनिपातलक्षणो विधि-

---

प्र.]ङीप्प्राप्तो निषिध्यते, ततो जसो लुकि नलोपे चाऽकारान्तत्वाट्टाप्प्राप्तः-सोऽपि निषिध्यते; 'स्त्रियां यदुक्तं तत्षट्स्वस्रादिभ्यो न भवती'ति सामान्येन निषेध-विधानात्। अत्रान्ये आहुः—स्त्रीसमानाधिकरणपक्षः स्त्रीसूत्रे नाश्रितः, अपि तु प्रकृत्यर्थविशेषणपक्षः प्रत्ययार्थविशेषणपक्षो वेति पञ्चादीनामलिङ्गत्वात्स्त्रीप्रत्ययस्य प्राप्तिर्नास्तीति नाऽर्थस्तन्निषेधेन । अथापि तत्प्राप्तिः स्यात्तथापि नलोपस्य बहि-रङ्गत्वादन्तरङ्गे टाप्यसिद्धत्वान्नाऽस्ति टाप्प्राप्तिः। सत्यामपि टाप्प्राप्तावन्तरङ्गायां षट्संज्ञायां नलोपस्याऽसिद्धत्वात्सिद्ध एव तत्प्रतिषेधः। **तुग्विधौ चोक्तमिति ।** द्वयमत्राऽस्ति-संनिपातलक्षणत्वं, बहिरङ्गलक्षणत्वं च । विभक्तिनिमित्तो हि नलोपः, किन्निमित्तस्तुक्। संनिपातपरिभाषायास्तु तुगभावः प्रयोजनत्वेनोक्त इति

उ.]यथोद्देशपक्षे प्रागेव कृतया संज्ञया सिध्यति। यथा द्वादशेऽह्नि कृतेन नाम्ना पश्चात्सर्वं कार्याणि क्रियन्ते तद्वत्, 'पञ्चभिर्ब्राह्मणीभि'रित्यादावपि तद्वदेवाऽग्रे कार्यं भविष्यतीति बुद्ध्या प्रथमं संज्ञाकरणान्न दोषः, तथापि कार्यकालपक्षे विधिवाक्येनैकवाक्यतापन्नसंज्ञाप्रवृत्तिरिति तत्पक्षे इदम्। अतएव स्वरविषये फलाशङ्का सङ्गच्छते। सूत्रविरोधादलिङ्गत्वमसङ्गतमित्या-शयेनाह—**अथापीति । बहिरङ्गत्वादिति ।** पदसंज्ञाद्वारा विभक्तिसापेक्षत्वेनेति भावः। **सत्यामपीति ।** 'नाजानन्तर्य' इति तत्प्राप्तिरित्यभिमानः। **षट्संज्ञायामिति ।** 'बहि-रङ्गत्वेने'ति शेषः। इदं चिन्त्यं, संज्ञाकृतबहिरङ्गत्वस्यानाश्रयणात्। 'न ष'डिति निषेधस्तु भूत-पूर्वषट्त्वमादाय सिद्ध इति न भाष्ये उक्तः। भाष्ये—**दण्डिदत्ताविति ।** अत्र हि नलोपे दण्डिशब्दस्य घिसंज्ञायां तस्यैव पूर्वनिपातापत्तिः, इष्यते त्वनियमः। असिद्धत्वे तु घित्वाऽ-भावात्सिध्यति। यद्यपि पूर्वनिपाते नलोपो, नलोपे च घित्वे पूर्वनिपात इत्ययुक्तमिदं तथापि 'यस्य पूर्वपदत्वे घित्वं भवति तत्पूर्वमेव प्रयोक्तव्य'मिति सूत्रार्थ इति भावः। **विभक्तिनिमित्त इति ।** स्वादिष्विति पदसंज्ञाद्वारेति भावः। **त्वेनोक्त इति ।** क्रुन्मेजन्त सूत्रे। **तथैवेति ।** बहिरङ्गपरिभाषानादरेण सन्निपातपरिभाषाश्रयेणेत्यर्थः। भाष्यकृता तु संज्ञानिमित्तस्य न बहिरङ्गत्वं,विभक्तिस्तु संज्ञानिमित्तं न। नलोपस्य परंपरया निमित्तत्वमादाय बहिरङ्गत्वाश्रयणे न मानमित्याशयेन सा नोक्तेत्यन्ये। न च 'वृत्रहधन'मित्यादावसन्निपात-

रनिमित्तं तद्विघातस्ये'ति ॥ इदं तर्हि प्रयोजनं 'कृतीति वक्ष्यामी'ति । इह मा भूत्–ब्रह्महच्छत्रम् । भ्रूणहच्छाया । न ह्येषे संनिपातलक्षणो नलोपः ॥

न मु ने ।८।२।३।

इह 'ने यत्कार्यं प्राप्नोति तत्प्रति मुभावो नाऽसिद्ध' इत्युच्यते नाभावश्चैव तावन्न प्राप्नोति ॥ एवं तर्हि,–॥ * ॥ न मु टादेशे ॥ * ॥ न मु टादेश इति वक्तव्यम् ॥ किमिदं टादेश इति ? ॥ टाया आदेशः टादेशः ॥ यदि तर्हि टाया आदेश इत्युच्यते टायामादेशोऽप्रतिषिद्धं भवति ॥ तत्र को दोषः?॥ 'अमुने'त्यत्र मुभावस्याऽसिद्धत्वादतो दीर्घो यञि सुपि चेति दीर्घत्वं प्रसज्येत ॥ नैष दोषः ['टादेश' इति] सर्वविभक्त्यन्तोऽयं समासः–टाया आदेशः टादेशः, टायामादेशः टादेश इति ॥ सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवाऽस्तु ॥ ननु चोक्तं 'ने यत्कार्यं प्राप्नोति तस्मिन्मुभावो नासिद्ध इत्युच्यते नाभावश्चैव तावन्न प्राप्नोती'ति ॥ नैष दोषः । इहेङ्गितेन चेष्टि-

प्र.] भाष्यकारस्तथैव व्याचष्टे–**सन्निपातेति । इदं तर्हीति ।** नियमार्थमिदं–'कृल्लक्षण एव तुग्माभूत् , छलक्षणस्तुग्यथा स्या'दित्यर्थः । **इह मा भूदिति ।** तुगभावः । **नैष इति ।** पदत्वमात्रनिबन्धनत्वान्नाऽत्र बहिरङ्गो नलोपः । [**नलोपः सु**] ॥

न मु ने । ने यत्कार्यमिति । भूतस्य सप्तमीनिर्देशो युज्यते । परसप्तमी च शास्त्रे प्रसिद्धेति निष्पन्ने नाशब्दे परतो यत्कार्यं प्राप्नोति तत्र मुभावस्य सिद्धत्वं न्याय्यमिति भावः । **नाभावश्चैवेति ।** नाभावे कर्तव्ये मुभावस्याऽसिद्धत्वाद्धिलक्षणो नाभावो न प्राप्नोति, ततश्च सूत्रमेवैतदसंबद्धं , नाभावस्यैवाऽभावात् , तत्कुतस्तस्मिन्परतः कार्यं प्राप्नोति यत्र मुभावस्य सिद्धत्वमुच्येत ! । **इहेङ्गितेनेति ।** न निर्देशादेवाऽर्थप्रतिपत्तिः, किं तर्हि आचार्य एवं स्मरतीत्येतावत्-सूत्रनिर्देशा-

उ.] लक्षणे नलोपे तुगभावार्थं कृति तुग्ग्रहणं, तेषामनभिधानमित्याशयात् । एकदेश्याह–**इदं तर्हीति ।** इतरस्तत्खण्डयति–**नैष इति ।** एवञ्च नियमानुपयोग इति भावः । **सुबन्तमिति ।** पदसंज्ञामात्रनिमित्तकत्वादिति तात्पर्यम् । तदेवं प्रत्याख्यातं 'कृति तुग्ग्रहण'मिति दिक् ।

न मुने । ननु ने कर्तव्य इत्यर्थेन नाभावः सिध्यतीत्यत आह–**भूतस्येति ।** तस्यैवौपश्लेषिकाधारत्वौचित्यादिति भावः । 'ने कर्तव्य' इत्यर्थे दीर्घप्राप्तिरूपो दोषः, उक्तेऽर्थे तु नाभावाऽसिद्धिरिति तात्पर्यम । 'नलोपः सुप्स्वरे'त्यत्राऽस्य व्यभिचारादाह–**परसप्तमी चेति ।** तत्र त्वसंभवात्त्याग इति भावः । **न निर्देशादेवेति ।** न उच्चारणादेवे-

तेन निमिषितेन महता वा[1] सूत्रनिबन्धेनाचार्याणामभिप्रायो लक्ष्यते। एत[2]-देव ज्ञापयत्याचार्यो[3] 'भवत्यत्र नाभाव'इति यदयं ने परतोऽसिद्धत्वप्रतिषेधं शास्ति॥ अथ वा 'द्विगता[4] अपि हेतवो' भवन्ति। तद्यथा–आम्राश्च सिक्ताः पितरश्च प्रीणिता भवन्ति। तथा वाक्यान्यपि द्विगतानि दृश्यन्ते,–श्वेतो धावति, अलंबुसानां यातेति[5], अथ वा 'वृद्धकुमारीवाक्यव'दिदं द्रष्टव्यम्। तद्यथा-वृद्धकुमारीन्द्रेणोक्ता 'वरं वृणीष्वे'ति, सा वरमवृणीत–'पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीर'न्निति। न च तावदस्याः पति-र्भवति कुतः पुत्राः, कुतो वा गावः, कुतो धान्यम्?॥ तत्राऽनयैकेन वाक्येन पतिः पुत्रा गावो धान्यमिति सर्वं सङ्गृहीतं भवति। एवमिहापि ने-ऽसिद्धत्वप्रतिषेधं ब्रुवता नाभावोऽपि सङ्गृहीतो भवति॥ [न मु ने]

उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ।८।२।४।

॥ * ॥ यण्स्वरो यणादेशे स्वरितयणः स्वरितार्थम्॥ * ॥ यण्स्वरो यणादेशे सिद्धो वक्तव्यः॥ किं प्रयोजनम्?॥ स्वरितयणः स्वरितार्थं'। स्वरितयणः

प्र.] दवसीयते। ततश्च यदाचार्यो ने यत्प्राप्नोति तत्र मुभावस्य सिद्धत्वं शास्ति, तस्मान्नाभावेऽपि मुभावस्य सिद्धत्वं स्मरतीति प्रतीयते। **अथ वेति**। तन्त्रेण योगद्वयमुच्चारितम्। अथ वैकस्याप्यनेकशक्तिसंभवादनेकार्थप्रत्यायनमविरुद्ध-मित्यर्थः। **वाक्यान्यपीति**। न केवलमर्थस्याऽनेकप्रयोजनत्वमपि तु शब्दस्या-ऽपीत्यर्थः। **श्वेतो धावतीति**। किंजातीयो धावति? किंवर्णो धावतीत्येवमेकेना-ऽनेकेन वा पृष्टः कौशलादेवं कश्चिदर्थद्वयं प्रतिपादयति। **अथ वेति**। अश-ब्दार्थस्या[6]ऽपि नान्तरीयकत्वादुपादानं दृश्यते। यथाऽग्निरानीयतामित्युक्ते अचो-दितमपि पात्रानयनमग्न्यानयनेऽन्तर्भवति, एवमिहाऽपि ने परतः प्राप्तं कार्यं प्रति मुभावस्य सिद्धत्वं ब्रुवताऽर्थाच्चेऽपि कर्तव्ये सिद्धत्वमाश्रितम्। **[न मु ने]**

उदात्त। यण्स्वर इति। यण्निमित्तत्वाद्यणः सम्बन्धी स्वरो यण्स्वरः।

उ.] त्यर्थः। किन्त्वनुमानादपीत्यर्थः। सन्निपातपरिभाषामनाश्रित्येदम्। इदमपि सन्निपातप-रिभाषाऽनित्यत्वे ज्ञापकमिति वा भावः। दीर्घे तदप्रवृत्तिरिति वा। अर्थभेदेऽपि शब्दैक्यमिति पक्षे आह–**अथवैकस्येति। न केवलमिति**। दृष्टान्तार्थन्तु भाष्ये अर्थोपादानम्। **नान्त-रीयकत्वादिति**। पूर्वमनुमानादर्थान्तरसङ्ग्रहः, इदानीं तु नान्तरीयकत्वादिति भेदः॥

उदात्तस्वरितयोर्यणः। ननु हलां स्वराऽभावाद्यण्स्वर इत्यनुपपन्नमत आह–

स्वरितत्वं यथा स्यात्,—खलप्व्यटति खलप्व्यश्नाति ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । आहाऽयं—'स्वरितयण' इति, न चाऽस्ति सिद्धः[1] स्वरितः, तत्राश्रयात्सिद्धत्वं भविष्यति[2] ॥*॥ आश्रयात्[3]सिद्धत्वमिति चेदुदात्तात्स्वरिते दोषः ॥ * ॥ आश्रयात्सिद्धत्वमिति चेदुदात्तात्स्वरिते दोषो भवति—दध्याशा[4] मध्वाशा ॥ एवं तर्हि योगविभागः करिष्यते । ['उदात्त[5]यणः'] उदात्तयणः परस्याऽनुदात्तस्य स्वरितो भवति । ततः 'स्वरितयणः' । स्वरितयणश्च[6] परस्यानुदात्तस्य स्वरितो भवति । 'उदात्तयण' इत्येव ॥ अथ वा स्वरितग्रहणं न करिष्यते ॥ केनेदानीं स्वरितयणः परस्याऽनुदात्तस्य स्वरितो भविष्यति ?॥ 'उदात्तयण' इत्येव ॥ ननु च स्वरितयणा व्यवहितत्वान्न प्राप्नोति ॥ 'स्वरविधौ

प्र.] खलप्व्यटतीति । खलं पुनातीति क्विप् । उपपदसमासः । कृत्स्वरेणान्तोदात्तत्वम् । ङौ परत 'ओः सुपी'ति यणादेशः । तस्मात्परस्य ङेः सुप्त्वादनुदात्तस्योदात्तयणो हल्पूर्वादित्युदात्तत्वे प्राप्ते 'नोङ्धात्वो'रिति निषिद्धेऽनेन स्वरितत्वं, तस्य यणादेशे कर्त्तव्येऽसिद्धत्वात् स्वरितयणः परोऽटतिशब्दस्य 'तिङ्ङतिङ' इति निघातस्याऽकारो न भवतीति तस्य स्वरितत्वं न प्राप्नोतीति यण्स्वरस्य सिद्धत्वमुच्यते । केचिदाहुः—'एकपदाश्रयत्वादन्तरङ्गं स्वरितत्वं, पदद्वयाश्रितस्तु यणबहिरङ्गः, ततोऽसिद्धं बहिरङ्गमन्तरङ्ग इति यणोऽसिद्धत्वात् पूर्वत्रेति निर्दिष्टविषयाऽभावाद्यण्यसिद्धत्वप्रसङ्गः स्वरितस्य नास्ती'ति। तदयुक्तम्। 'नाजानन्तर्ये बहिष्ट्वप्रक्लृप्ति'रिति बहिरङ्गपरिभाषाया निषेधात् , इको यणचीति द्वयोरचोरानन्तर्याश्रयेण यण्विधानात् । दध्याशामिति । दधिशब्दो 'नब्विषयस्याऽनिसन्तस्ये'त्याद्युदात्तः। 'उदात्तादनुदात्तस्य स्वरित' इति इकारः स्वरितः । आशाशब्द 'आशाया अदिगाख्या चे'दित्यन्तोदात्तत्वादनुदात्तादिस्तत आकारस्य स्वरितत्वप्रसङ्गः । उदात्तयण इत्येवेति । तेनोदात्तयण इत्येवं यो निर्वृत्तः

उ.] यण्निमित्तत्वादिति । 'तिङ्ङतिङ इति निहतस्ये'ति पाठः। 'निघातस्ये'ति पाठे अर्श आद्यचा निघातवत इत्यर्थः । नाजानन्तर्य इति । वस्तुतस्त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषाऽभावस्य 'खरवसानयो'रिति सूत्रे भाष्ये वक्ष्यमाणतया शङ्कैवेयं निर्दला । असिद्धपरिभाषाया अनित्यत्वादत्राऽप्रवृत्तेश्च । भाष्ये—उदात्तात्स्वरित इति । 'उदात्तादनुदात्तस्ये'ति यः स्वरितस्तस्याऽपि सिद्धत्वात्तत्स्थानिकयणः परस्यापि स्वरितत्वप्रसङ्ग इत्यर्थस्तदाह—

व्यञ्जनमविद्यमानव'दिति नास्ति व्यवधानम् ॥ अथ वा नैवं विज्ञायते— स्वरितस्य यण्, स्वरितयण्, स्वरितयण इति ॥ कथं तर्हि ? ॥ स्वरिते यण् स्वरितयण्, स्वरितयण इति ॥

स्वरितो वाऽनुदात्ते पदादौ ।८।२।६।

स्वरितग्रहणं[1] शक्यमकर्त्तुम् ॥ कथम् ? ॥ 'अनुदात्ते परतः [पदादौवा[2]] उदात्त' इत्येव सिद्धम् ॥ केनेदानीं स्वरितो भविष्यति–गाङ्गेऽनूपे इति ? ॥ आन्तर्यत उदात्तानुदात्तयोरेकादेशः स्वरितो भविष्यति ॥ इदं तर्हि प्रयोजनं तेन वर्ज्यमानता मा भूदिति[3] ॥ अथ क्रियमाणेऽपि स्वरितग्रहणे यः सिद्धः

प्र.] स्वरितस्तस्य यणः परस्याऽनुदात्तस्य स्वरितो भवतीत्यर्थः । ततश्चाऽस्यैव स्वरितस्याश्रयणात्सिद्धत्वं भवति । **स्वरिते यणीति** । 'उदात्तस्वरितयो'रिति सप्तमी, उदात्तस्य यो यण् स उदात्तेऽपि भवति, तद्विषयत्वात् । 'स्वरिते यणी'-त्येषा तु परसप्तमी, तेन लौकिके प्रयोगे यः स्वरितस्तस्मिन् परतो यो यण् ततः परस्य लक्षणवशादनुदात्तस्य स्वरितः साधुर्भवतीत्ययमर्थः। न च दध्याशामि-त्याकारो लौकिके स्वरित इति न कश्चिद्दोषः। लौकिकस्य स्वरितस्याश्रयणे यणि कर्त्तव्ये तस्याऽसिद्धत्वाऽभावः । [**उदात्तस्वरितयोर्यणः**] ॥

स्वरितो वानु । गाङ्गेऽनूप इति। गङ्गाया इदमिति तस्येदमित्यण्। प्रत्ययस्वरे-णाऽन्तोदात्तः । ततो ङिः सुप्त्वादनुदात्तः । तयोरेकादेश उदात्तः । अपोऽनु-गतमनूपमिति प्रादिसमासः । 'तत्पुरुषे तुल्यार्थे'ति पूर्वपदप्रकृतिस्वरे प्राप्ते-'ऽनोरप्रधानकनीयसी' इत्युत्तरपदमन्तोदात्तं, शेषनिघातः । 'एङः पदान्ताद-ती'त्युदात्तानुदात्तयोरेकादेशः पक्षे स्वरितः। पक्षे उदात्तः। **तेन वर्ज्यमानतेति** । आन्तरतम्याद्यत्स्वरितत्वं सिद्ध्यति तत्सिद्धमिति शेषनिघातेन'पे'शब्दोऽनुदात्तः

उ.] **दधिशब्द इति** । भाष्ये–**स्वरविधाविति** । स्वरोद्देश्यके विधावित्यर्थः ।

ननु स्वरितस्याद्याप्यनिष्पत्तेः 'स्वरिते य'णित्यनुपपन्नमत आह–**तेन लौकिके इति** । ननु स्वरितस्याऽसिद्धत्वात्कथमयं स्वरिते यणत आह–**लौकिकस्येति** । शास्त्रीयस्यैवाऽ-सिद्धत्वमिति भावः। अत्र योगविभागपक्ष एवाचार्यस्य। [**उदात्तस्वरितयोर्यणः**] ।

स्वरितो वा । भाष्ये–**उदात्त इत्येवेति** । स च विकल्पेन। वाग्रहणस्य सत्त्वादिति भावः। तेन पक्षे स उदात्तः, पक्षे चान्तर्यतः स्वरित इति तत्फलाऽसिद्धिरिति तात्पर्यम् । पदाद्यनुदात्तयोरेकादेशं व्युत्पादयति–**गङ्गाया इदमिति । स्वरितस्यासिद्धत्वादिति** ।

स्वरितस्तेन वर्ज्यमानता कस्मान्न भवति–कन्याऽनूप इति ? ॥ बहिरङ्गलक्षणत्वात् । असिद्धं बहिरङ्गमन्तरङ्ग इत्येवं न भविष्यति ॥ यथैव तर्हि क्रियमाणे स्वरितग्रहणे यः सिद्धः स्वरितस्तेन वर्ज्यमानता न भवत्येवमक्रियमाणेऽपि न भविष्यति । तस्मान्नार्थः स्वरितग्रहणेन । 'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षण' इत्येव सिद्धम् ॥ * ॥ एकादेशस्वरोऽन्तरङ्गः [अयवायावेकादशशतृस्वरैकानुदात्तसवानुदात्तार्थम्] ॥ * ॥ [**एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः ॥ किं प्रयोजनम् ? ॥** * ॥ 'अयवायावेकादेशशतृस्वरैकानुदात्तसवानुदात्तार्थम्' ॥ *] ॥ अय्–**वृक्ष इदम् प्लक्ष इदम् । उदात्तानुदात्तयोरेकादेशस्तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति । तस्य सिद्धत्वं वक्तव्यम् ।**

प्र.] प्राप्नोत्युदात्तश्चेष्यते । अस्य तु स्वरितस्याऽसिद्धत्वाद्यथोक्तदोषाऽभावः ।

कन्यानूप इति । कन्याशब्दः 'कन्याराजन्यमनुष्याणामन्त' इत्यन्तस्वरितः । ततः स्वरितानुदात्तयोरेकादेश आन्तर्यतः स्वरितः । तस्य सिद्धत्वाद्वर्ज्यमानस्वरे सत्युदात्तस्वरितयोर्यौगपद्यं न प्राप्नोति । ततश्चाऽत्र यः परिहारः स एव 'गाङ्गेऽनूप' इत्यत्र भविष्यतीति भावः । **असिद्धमिति ।** पदद्वयाश्रयत्वादेकादेशस्य बहिरङ्गत्वात्स्वरोऽपि तदीयो बहिरङ्गः । **एकादेशस्वर इति ।** एकादेशस्वरे चत्वारि दर्शनानि । उदात्तानुदात्तयोरेकादेश आन्तर्यात्स्वरितोऽभिनिर्वृत्तः । तस्य च स्थान एकादेश उदात्तेनोदात्त इत्युदात्तगुण आदेशः क्रियते इत्येकं दर्शनम् । स्वरितगुणस्योदात्तगुणमात्रं क्रियत इति द्वितीयम् । एकादेश उदात्तेनोदात्त इति परिभाषा यत्रैकादेशो विधीयते तत्रोपतिष्ठते । तत्रायमर्थो भवति–'आद्गुणो भवत्युदात्तानुदात्तयोस्त्वाद्गुण उदात्त इत्येकादेशो विधीयमान एवोदात्तो भवती'ति तृतीयम् । चतुर्थदर्शनं तूदात्तानुदात्तयोरेकादेश उदात्तो भवति । स्वरितगुणः प्राप्तस्तत्र येन नाप्राप्त इति स्वरितत्वापवाद उदात्तविधिः सम्प-

---

उ.] 'अनुदात्त'मित्यस्याः कार्यकालत्वेऽपि स्वरितत्वप्रतिज्ञानादधिककार्यार्थादसिद्धेऽप्रवृत्तेरिति भावः । अत्र चेदमेव भाष्यं मानम् । षाष्ठभाष्येऽपि स्फुटमेतत् । **आन्तर्यतः स्वरित इति ।** 'स्वरितो वानुदात्ते' इत्यस्य तु न प्रवृत्तिः, उदात्तेन सहैकादेशाऽभावादिति भावः । **स्वरोऽपीति ।** आन्तर्यत आगत इत्यर्थः । एकादेशस्याऽसिद्धत्वात्तदाश्रितस्वरस्य ज्ञानाऽभावात्तदेकवाक्यताऽस्य नेति भावः । 'अनुदात्तं पद'मिति त्वेकपदविषये स्वरे चरितार्थमिति तात्पर्यम् । **गुणमात्रं क्रियते इति ।** प्राप्ताऽप्राप्तविवेकन्यायेनेति भावः । तत्राद्यौ सम-

आन्तर्यत उदात्तस्य उदात्तोऽयादेशो यथा स्यात् ॥ [अय्[1]] ॥ अयादेशो नास्ति। आय्–कुमार्या इदम् किशोर्या इदम्[1]। उदात्तानुदात्तयोरेकादेशस्तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति, तस्य सिद्धत्वं वक्तव्यम् । आन्तर्यत उदात्तस्य उदात्त आयादेशो यथा स्यात् ॥ नैतदस्ति प्रयोजनं, एकादेशे कृते 'उदात्तयणो हल्पूर्वा'दित्युदात्तो भविष्यति ॥ इदमिह संप्रधार्यम्–उदात्तत्वं क्रियतामेकादेश इति, किमत्र कर्त्तव्यम् ?। परत्वादुदात्तत्वम् ॥ नित्य एकादेशः। कृतेऽप्युदात्तत्वे[1] प्राप्नोत्यकृतेऽपि प्राप्नोति ॥ एकादेशोऽप्यनित्यः[2] । अन्यथास्वरस्य कृते उदात्तत्वे प्राप्नोत्यन्यथास्वरस्याऽकृते, 'स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यो भवति' ॥ अन्तरङ्गस्तर्ह्येकादेशः ॥ काऽन्तरङ्गता ? ॥ वर्णावाश्रित्यैकादेशः पदस्योदात्तत्वम् ॥ एवं तर्हीदमिह संप्रधार्यम्-आट् क्रियतामुदात्तत्वमिति; किमत्र कर्त्तव्यम् ? ॥ परत्वादाडागमः ॥ नित्यमुदात्तत्वम्, कृतेऽप्याटि प्राप्नोत्यकृतेऽपि प्राप्नोति ॥ आडपि नित्यः,–कृतेप्युदात्तत्वे प्राप्नोत्यकृतेऽपि प्राप्नोति ॥ अनित्य आट् । अन्यथास्वरस्य कृते उदात्तत्वे प्राप्नोत्यन्यथास्वरस्याऽकृते । 'स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यो भवति' ॥ उदात्तत्वमप्यनित्यम्–अन्यस्य कृते आटि प्राप्नोत्यन्यस्याऽकृते प्राप्नोति ।

प्र.]द्यते। तत्र परिभाषापक्षे सिद्धमुदात्तत्वमयादिषु। इतरेषु पक्षेष्वसिद्धत्वे प्राप्ते सिद्धत्वमुच्यते। **उदात्तोऽयादेश इति**। अन्यथा स्वरितः स्यात् । **कुमार्या इदमिति** । कुमारीशब्द उदात्तनिवृत्तिस्वरेणाऽन्तोदात्तः। 'कुमारी ए' इति स्थिते आडागमे कृते यणादेशे चोदात्तयणो हल्पूर्वादित्याट उदात्तत्वे आडेकारयोरुदात्तानुदात्तयोर्वृद्धिरेकादेश उदात्तस्तस्याऽयादेशः। **एकादेश इति**। आडेकारयोरनुदात्तयोः प्रागेकादेशः पश्चाद्विभक्त्युदात्तत्वमित्यर्थः । **पदस्योदात्तत्वमिति** । विभक्तेरुदात्तत्वविधानात् । **आट् क्रियतामिति** । एकादेशस्थानिना सह विभ-

---

उ.]फलावेव । **तत्र परिभाषेति** । वस्तुतोऽत्रापि पक्षेऽसिद्धत्वं भवत्येव, पाठकृतपरत्वाऽनपलापात् । किंच परिभाषा वक्तुमप्यशक्या, अनियमप्रसक्त्यभावात्, नियमेन स्वरितस्यैव प्राप्तेः । भाष्यस्वरसोऽप्येवमेवेति चिन्त्यमेतत् । **अन्यथा स्वरित इति** । आद्ययोः स्वरितप्राप्तिः स्पष्टैव । चतुर्थेऽपि उदात्ताऽसिद्धत्वे स्थानिस्वरेण स्वरितबुद्ध्यान्तरतम्यात्स्वरितः स्यादिति भावः। भाष्ये–**अयादेशो नास्तीति**। 'स्मृतवे'त्यादीनां तु नाऽभिधानमिति भावः । **प्रागेकादेश इति** । अन्तरङ्गत्वादिति भावः । ननु 'उदात्तयण'इत्यनेन

'शब्दान्तरस्य च प्राप्नुवन् विधिरनित्यो भवति'। उभयोरनित्ययोः परत्वादाडागमः। आटि कृतेऽन्तरङ्ग एकादेशः। [आयै]।

आव्—वृक्षाविदम्। प्लक्षाविदम्॥[1] उदात्तानुदात्तयोरेकादेशः। तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति, तस्य सिद्धत्वं वक्तव्यम्। आन्तर्यत उदात्तस्योदात्त आवादेशो यथा स्यात्। [आवे[1]]॥

एकादेशस्वरः—गाङ्गेऽनूप इति। उदात्तानुदात्तयोरेकादेशः। तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति, तस्य सिद्धत्वं वक्तव्यं, 'स्वरितो वानुदात्ते पदादा'वित्येष[2] स्वरो यथा स्यात्। [एकादेशस्वरः]॥ शतृस्वरः—तुदती तुदती। उदात्तानुदात्तयोरेकादेशः, तस्यैकादेश उदात्तेनोदात्त इत्येतद्भवति तस्य सिद्धत्व वक्तव्यम्। 'शतुरनुमोऽनद्यजादिरन्तोदात्ता'[3]दित्येष स्वरो यथा स्यात्॥ नैतदस्ति प्रयोजनम्—आचार्यप्रवृत्तिर्ज्ञापयति 'सिद्ध एकादेशस्वरः शतृस्वरे' इति, यदयमनुम इति प्रतिषेधं शास्ति॥ कथं कृत्वा ज्ञापकम्?॥ न ह्यन्तरेणोदात्तानुदात्तयोरेकादेशं शत्रन्तं सनुम्कमन्तोदात्तमस्ति॥

प्र.] त्युदात्तत्वं विचार्यते। ननु च यणादेशे कृते विभक्तिस्वरेण भाव्यं, ततश्च नदीसंज्ञाया अभावादाण्न प्राप्नोति। विहितविशेषणं नदीग्रहणं, नद्या यो विहितो ङित्तस्या[4]डित्यदोषः। अन्तरङ्ग एकादेश इति। वर्णावाश्रित्यैकादेशः, पदस्योदात्तत्वमिति प्रतिपादनेन। तस्मान्नाऽर्थः सिद्धत्ववचनेन। गाङ्गेऽनूप इति। एकारोदात्तत्वस्याऽसिद्धत्वात्स्वरितानुदात्तयोरेकादेश आन्तर्यात्स्वरित एव स्यान्न तु कदा चिदुदात्तः। तुदतीति। 'तास्यनुदात्ते'दिति शताऽनुदात्तः। शप्रत्यय उदात्तः। 'शतुरनुम' इत्यत्रान्तोदात्तादिति वर्तते। न ह्यन्तरेणेति। असिद्धत्वे चाऽन्तोदात्तत्वाऽभावादेव तुदन्तीत्यादावुदात्तत्वं न भविष्यतीति किमनुम इति प्रतिषेधेन?। प्रतिषेधात्तु नुमि सिद्धत्वमनुमीयते। ननु चेति।

उ.] विभक्तेरुदात्तत्वं क्रियते तत्किमुच्यते 'पदस्ये'ति?। अत आह—विभक्तेरिति। एवञ्च पदत्वसंपादकबहिर्भूतविभक्तिसंबन्धित्वेन बहिरङ्गत्वमिति भावः। आण्न प्राप्नोतीति। वर्णसंज्ञापक्षे इदं, ततश्चाडपि नित्य इति भाष्यमसङ्गतमिति भावः। केचित्तु यणः पूर्वं वार्णादाङ्गमिति न्यायेनाऽऽडिति चिन्त्यमेतदित्याहुः। अङ्गसंबन्धिन्याङ्ग एव तत्प्रवृत्तिरिति भाष्याशय इत्यन्ये। स्वरितानुदात्तयोरिति। एकादेशं प्रति उदात्तत्वाऽसिद्धत्वे आन्तर्यकृतस्वरितबुद्धिसत्त्वादिति भावः। नतु कदाचिदुदात्त इति। उदात्तेन सहैकादेशस्यैव विकल्पेन स्वरितविधानादिति भावः। प्रतिषेधात्तु नुमि सिद्धत्वमनुमीयते इति।

ननु चेदमस्ति यान्ती वान्तीति ॥ एतदपि निघाते कृते नाऽन्तरेणोदात्तानुदात्तयोरेकादेशं शत्रन्तं सनुम्कमन्तोदात्तं[1] भवति ॥ इदमिह संप्रधार्यं-निघातः क्रियतामेकादेश इति, किमत्र कर्तव्यम् ? ॥ परत्वान्निघातः ॥ नित्य एकादेशः,-कृतेऽपि निघाते प्राप्नोत्यकृतेऽपि प्राप्नोति ॥ एकादेशोऽप्यनित्यः । अन्यथास्वरस्य कृते निघाते प्राप्नोत्यन्यथास्वरस्याऽकृते निघाते । 'स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यो भवति' ॥ अन्तरङ्गस्तर्ह्येकादेशः ॥ काऽन्तरङ्गता ? ॥ वर्णावाश्रित्यैकादेशः पदस्य निघातः ॥ निघातोऽप्यन्तरङ्गः ॥ कथम् ? ॥ उक्तमेतत्[2],-'पदग्रहणं परिमाणार्थ'मिति । उभयोरन्तरङ्गयोः परत्वान्निघातो, निघाते कृते एतदपि नाऽन्तरेणोदात्तानुदात्तयोरेकादेशमन्तोदात्तं भवति । शतृस्वर ॥

एकानुदात्त-तुदन्ति लिखन्ति । उदात्तानुदात्तयोरेकादेशस्तस्य 'एकादेश उदात्तेनोदात्त' इत्येतद्भवति, तस्य सिद्धत्वं वक्तव्यं, तेन वर्ज्यमानता यथा स्यात् । [एकानुदात्त[3]]॥ सर्वानुदात्त-ब्राह्मणास्तुदन्ति ब्राह्मणा लिखन्ति ।

प्र.] अत्र लसार्वधातुकानुदात्तत्वस्य निमित्ताऽभावाद्द्वयोरुदात्तयोरेकादेश उदात्त इति भावः । शेषनिघातः पदस्येति मन्यते । **एतदपीति ।** प्रत्ययस्वरे सति निघाते धातोरनुदात्तत्वात् । एवमनुम इति ज्ञापकं स्थितमेव । **एकाननुदात्तेति ।** एकाननुदात्तग्रहणेना'ऽनुदात्तं पदमेकवर्ज'मित्येव स्वरोऽभिधीयते । तत्र ह्युक्तं-'सिद्धं त्वेकाननुदात्तत्वा'दिति । **तुदन्तीति।** विकरण उदात्तो लसार्वधातुकमनुदात्तं, तत्रोदात्तानुदात्तयोरेकादेशस्वरस्य धातुस्वरेऽसिद्धत्वाच्छेषनिघाताऽप्रसङ्गाद्धातोरप्यन्तोदात्तत्वं स्यात् । ननु चोदात्तत्वाऽसिद्धत्वेऽपि स्वरितेन वर्ज्यमानस्वरो भविष्यति ? । सत्यं सिध्यति-यदा स्वरितस्योदात्तता भवतीति पक्षः । यदा तु **'स्वरितापवाद उदात्त'** इति पक्षस्तदैकादेशस्योदात्तत्वं विधीयते, तस्य चाऽसिद्धत्वे स्वरान्तराऽभावाद्वर्ज्यमानस्वरो न स्यादिति सिद्धत्वमुच्यते । **ब्राह्मणास्तुदन्तीति ।** अत्रापि 'स्वरितस्य स्थाने उदात्तः क्रियत' इति दर्शने उदात्तस्या-

उ.] 'एकादेशोदात्तत्वस्ये'ति शेषः। 'नुमी'त्यस्य नुम्पदघटितसूत्रविहिते स्वर इत्यर्थः। 'निमित्ताऽभावा'दिति पाठः। **निघाते इति ।** पदग्रहणं परिमाणार्थमिति भावः । भाष्ये-**निघातोऽप्यन्तरङ्ग इति ।** परिभाषात्वेनोदात्तादिविधिभिरैकवाक्यतयैवाऽस्य विधानादिति भावः । **धातुस्वरे इति ।** धातोस्तन्मूलके निघाते कर्तव्ये इत्यर्थः । **सिद्धत्वमुच्यत इति ।**

उदात्तानुदात्तयोरेकादेशस्तस्य 'एकादेश उदात्तेनोदात्त'इत्येतद्भवति, तस्य सिद्धत्वं वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ 'तिङ्ङतिङ' इति निघातो यथा स्यात् ॥ किमुच्यतेऽन्तरङ्ग इति ? ॥ यो हि बहिरङ्गोऽसिद्ध एवासौ भवति– प्रपचतीति, सोमसुत्पचतीति ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । सर्वत्रैव नुम्प्रतिषेधो ज्ञापकः–'सिद्ध एकादेशस्वरोऽन्तरङ्ग' इति ॥

॥*॥ संयोगान्तलोपो रोरुत्वे हरिवो मेदिनं त्वा ॥*॥ संयोगान्तलोपो रोरुत्वे सिद्धो वक्तव्यः ॥ किं प्रयोजनम् ?॥ 'हरिवो मेदिनं त्वा'। संयोगान्तलोपस्याऽसिद्धत्वाद्धशीत्युत्वं न प्राप्नोति ॥*॥ प्लुतिश्च॥*॥ प्लुतिश्चोत्वे सिद्धा वक्तव्या। 'सुस्रोता३अत्र न्वसी'त्यत्र प्लुतेरसिद्धत्वादतोऽतीत्युत्वं प्राप्नोति। अप्लुतादप्लुत

प्र] सिद्धत्वेऽपि स्वरितस्य निघातविधानादुदात्तस्याऽप्रयोगः सिद्ध एवेति स्वरिताऽपवाद उदात्तत्वमिति दर्शनाश्रयेण सिद्धत्वमुच्यते। अन्यथोदात्तस्यानुदात्ताऽभावादुदात्तः प्रयोगे श्रूयेत। **प्रपचतीति**। बाह्यपदापेक्षत्वादेकादेशस्य बहिरङ्गत्वात्तत्स्वरो बहिरङ्गः। तस्याऽसिद्धत्वात्तिङि चोदात्तवतीति गतेर्निघातो न भवति। **सोमसुत्पचतीति**। 'तिङ्ङतिङ' इति निघात ईकारस्य न भवति। **सर्वत्रैवेति**। लक्ष्यापेक्षया सामान्यविषयमनुमानमाश्रीयते। अनुमानत्वाज्ज्ञापकस्य तत्रैकपदाश्रयैकादेशस्वरः सिद्ध इत्यनुम इति प्रतिषेधेन ज्ञाप्यते। अथ वा 'एकादेश उदात्तेनोदात्त' इति परिभाषाश्रयितव्येति ज्ञाप्यते। यस्तु बहिरङ्ग एकादेशस्वरस्तस्याऽसिद्धं बहिरङ्गमन्तरङ्गे इत्यसिद्धत्वं भवत्येव। **हरिव इति**। हरयोऽस्य सन्तीति मतुप्। 'छन्दसीर' इति वत्वं। सुनुम्संयोगान्तलोपरुत्वानि।

उ.] विकरणोदात्तत्वप्रवृत्तिकाले तदेकवाक्यतापन्ननिघातस्याऽन्तरङ्गत्वात्पूर्वं प्रवृत्त्या सिद्धेरिदं प्रयोजनं चिन्त्यमिति कश्चित्तन्न, पदस्य विभज्यान्वाख्याने एकादेशेन विकरणस्य विनश्यदवस्थत्वात्तन्निमित्तनिघाताऽप्रवृत्तिरिति भाष्याशयात्। **अन्यथेति**। उदात्तस्याऽसिद्धत्वात्पूर्वनिघाते पश्चादेकादेशस्योदात्तत्वं स्यादिति भावः। सिद्धत्वे तु परत्वादेकादेशोदात्तत्वे कृते तिङन्तनिघातप्रवृत्तिरितीष्टसिद्धिः। **बाह्यपदापेक्षत्वादिति**। 'तिङि चे'ति सूत्रं तु 'यत्प्रपचती'त्यादौ तिङन्तनिघाताऽविषये चरितार्थम्। **ईकारस्य नेति**। स्वार्थाऽसंबद्धबहिर्भूतेतिशब्दनिमित्तकतया बहिरङ्गत्वेनैकादेशस्वरस्याऽसिद्धत्वेनाऽन्तरङ्गत्वात्पूर्वनिघाते पश्चादेकादेशस्वरेणोदात्तत्वादिति भावः। **परिभाषाश्रयितव्या इति**। चिन्त्यमेतत्, उक्तयुक्तेः। **रुत्वानीति**। 'मतुवसो'रिति रुत्वम्। अत्र 'रोरुत्वे'इत्यस्य कर्तव्ये कृते

इत्येतन्न वक्तव्यं भवति ॥ नैतदस्ति प्रयोजनं, क्रियते न्यास एव ॥*॥ सिज्लोप एकादेशे [सिद्धः] ॥*॥ सिज्लोप एकादेशे सिद्धो वक्तव्यः । अलावीत् । अपावीत् । सिज्लोपस्याऽसिद्धत्वात्सवर्णदीर्घत्वं न प्राप्नोति ॥ यदि पुनरिडादेः सिचो लोप उच्येत ?॥ नैवं शक्यमिह हि मा हिलावीत् मा हि पावीत् । यद्यत्र इण्न स्यादनुदात्तस्य ईटः श्रवणं प्रसज्येत । ईटि पुनः सत्युक्तमेतत् 'अर्थवत्तु चित्करणसामर्थ्यादीट उदात्तत्व'मिति । तत्रैकादेश उदात्तेनोदात्त इत्युदात्तत्वं सिद्धं भवति ॥

॥ * ॥ संयोगादिलोपः संयोगान्तलोपे ॥ * ॥ संयोगादिलोपः संयोगान्तस्य लोपे सिद्धो वक्तव्यः । काष्ठतट् । कूटतट् । संयोगादिलोपस्याऽसिद्धत्वात्संयोगान्तलोपः प्राप्नोति । नैष दोषः । उक्तमेतत्—'अपवादो वचनप्रामाण्या'दिति ॥ * ॥ निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु ॥ * ॥ निष्ठादेशः

प्र.] यदा तु च्छन्दसीवनिपाविति वनिप्प्रत्ययः क्रियते 'वन उपसङ्ख्यान'मिति तस्य च रुत्वं तदा नाऽर्थः सिद्धत्ववचनेन । यदि पुनरिति । 'इट ईटी'त्यत्र 'रात्सस्ये'त्यतः सस्येति वर्तते । 'इट' इति षष्ठी न तु पञ्चमी । तेनेडादेः सस्य लोपो विधीयमान इटो भवति । यद्यत्रेति । यदि लोपेन निवर्त्तेतेत्यर्थः । ननु च उदात्तनिवृत्तिस्वरेणोदात्तत्वमीटो भविष्यति । नैतदस्ति । उदात्तनिवृत्तिस्वरे कर्त्तव्ये लोपस्याऽसिद्धत्वात् । संयोगादिलोप इति । ननु चोक्त'मपवादो वचनप्रामाण्या'दिति । एवं मन्यते-प्रवर्ततां संयोगादिलोपस्तस्मिंस्तु कृते तस्याऽसिद्धत्वात् संयोगान्तलोपः प्राप्नोति । उक्तमेतदिति । असिद्धश्चैवाऽपवादः संयोगादिलोपः । इट्प्राप्नोतीति । यदा 'तकारमात्रस्य लोपो निपात्यत' इति पक्षस्तदेट्

उ.] चेत्यर्थः । तेन 'हरिवोऽत्रे'त्यत्रैङः पदान्तादिति पूर्वरूपेऽपि नासिद्धत्वं, तत्प्रयोगसत्त्वे इति केचित् । तदा नार्थ इति । 'ह्रस्वनुड्भ्यां मतु'बित्यस्य सत्त्वेनात्रोदाहरणे मतुवन्योः स्वरभेदादिदं चिन्त्यम् । भाष्ये—प्लुतिश्चेति । अन्यथा तस्याऽसिद्धत्वादुत्वविधायकेऽप्लुतादप्लुते इत्यस्याऽसङ्गत्या तदवाच्यं स्यादिति भावः । क्रियते न्यास एवेति । तत्सामर्थ्यादेव तत्र सिद्धत्वं सिद्धमिति भावः । नन्विट इति पञ्चमीनिर्देशात्कथमिडादेर्लोपोऽत आह—इट ईटीति । रात्सस्येति । 'इटः सस्ये'ति यथाश्रुते सामानाधिकरण्यासंभवात्तेनेडादिर्लक्ष्यते इति भावः । इटो भवतीति । इटोऽपि भवतीत्यर्थः । तादृशार्थाश्रयणसामर्थ्यादिति भावः । असिद्धश्चैवेति । असिद्ध एव च संयोगादिलोपोऽपवाद इत्यन्वयः । एवञ्च तद्विषये नोत्सर्गप्रवृत्तिरिति भावः ।

षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः । वृक्णः वृक्णवान् । निष्ठादेशस्याऽसिद्धत्वाज्झलीति षत्वं प्राप्नोति [षत्व] ॥ स्वर—क्षीबः । निष्ठादेशस्यासिद्धत्वा[दिट्[1]सहितस्य निष्ठातस्य निपातनलोपरूपत्वा]त् 'निष्ठा च द्व्यजना'दित्येष स्वरो न प्राप्नोति [स्व[1]र] ॥ प्रत्ययः—क्षीबेन तरति क्षीबिकः । निष्ठादेशस्याऽसिद्धत्वाद्व्यचष्ठन्निति ठन्न प्राप्नोति ।। [प्रत्य[1]य] ॥ इड्विधि[1]:—क्षीबः । निष्ठादेशस्याऽसिद्धत्वाद्वलादिलक्षण इट् प्राप्नोति ॥ ननु च यः प्रत्ययविधौ सिद्धः [सिद्ध]सिद्धोऽसाविडिधौ ।। इदं तर्हि प्रयोजनम्—ओ लस्जी—लग्नः । निष्ठादेशः सिद्धो वक्तव्यः।[निष्ठादेशस्य[1] सिद्धत्वात्] 'नेड्वशि कृती'तीट्प्रतिषेधो यथा स्यात् । ईदित्करणं न वक्तव्यं भवति ।। एतदपि नास्ति प्रयोजनं, क्रियते न्यास[3] एव । ॥ ॥ वस्वादिषु दत्वं सौ दीर्घत्वे ॥ ॥ वस्वा-

---

प्र.]प्राप्नोति। ननु चेति । इडभावाश्रयत्वात्प्रत्ययविधेः प्रत्ययविधौ सिद्धत्वेनेडभाव आश्रित एवेति पृथगिड्ग्रहणं न कर्त्तव्यम्। सिद्ध इति। सुतरां सिद्ध इत्यर्थः। अथवा नाऽसिद्धो वचनेन सिद्धः, किन्तर्हि अन्तरेण वचनं सिद्धइत्यर्थः। क्रियते न्यास एवेति। येषां दत्वं नास्ति तदर्थं, चर्म वस्ते चर्मवः, पिण्डं ग्रसते पिण्डग्र इति। अदस इति। स्वरोऽच्, तद्विशेषणं 'बहिष्पदलक्षण'इति । बाह्यपदावयव इत्यर्थः। अथ वा बहिष्पदलक्षणे कार्ये कर्त्तव्ये स्वरे परत इत्यर्थः। यो ह्यन्य इति । बाह्यपदावयवो न भवतीत्यर्थः। असिद्ध एवासौ भवतीति ।

उ.]क्षीबो निष्ठादेशस्येति। भाष्ये इट्सहितस्य निष्ठातस्य लोपरूप आदेशो निपात्यत इति पक्षे इदं। नन्विट्सहितनिष्ठातलोपो निपात्यत इति पक्षस्य स्वरप्रत्ययरूपसिद्धत्वप्रयोजनाभ्यां लाभेन कथमिडापादानमत आह—यदेति। उक्तदोषवारणार्थमिति भावः। आश्रित एवेति। विशिष्टलोपनिपातनपक्ष एवाश्रयितव्य इत्यर्थः। भाष्ये—सिद्धसिद्धोऽसाविति—द्वयोः सिद्धशब्दयोः पाठो व्यर्थ इत्यत आह—सुतरामिति। एकं सिद्धपदमतिशयलक्षकमिति भावः। अथ वेति। सिद्ध एव सिद्धः, नासिद्धः सन् सिद्ध इति भाष्ये योजना। भाष्ये—ईदित्करणं न वक्तव्यमिति। 'श्वीदितो निष्ठाया'मिति सूत्रे इत्यर्थः। क्रियते न्यास एवेति। 'वृत्त'मित्यादिसिद्धये ईदिद्ग्रहणमावश्यकमिति भावः। 'बहिष्पदलक्षणे स्वरे कर्तव्य' इत्यर्थभ्रमो न कार्य इत्याह—स्वरोऽपीति। लक्षणशब्दो न निमित्तपरः, किन्त्ववयववचन इति भावः। अथवेति। स्वरपरत्वनिमित्तके बहिष्पदलक्षणे कार्ये कर्तव्ये इत्यन्वयः। अत्र लक्षणशब्दो निमित्तार्थक एव। नन्वचो नासिद्धत्वमुच्यते, किं तर्हि, अचि परतो यत्कार्यं तत्प्रतीत्वोत्वयोरित्यसिद्ध एवासावित्ययुक्तमत आह—असौ

दिषु दत्वं सौ दीर्घत्वे सिद्धं वक्तव्यम् । उखास्रत् । पर्णध्वत् । दत्वस्याऽसिद्धत्वादत्वसन्तस्येति दीर्घत्वं प्राप्नोति । अधातोरिति न वक्तव्यं भवति ॥ नैतदस्ति प्रयोजनं, क्रियते न्यास एव ॥ * ॥ अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे ॥ * ॥ अदस ईत्वोत्वे स्वरे बहिष्पदलक्षणे सिद्धे वक्तव्ये । अमी अत्र । अमी आसते । अमू आसाते । ईत्वोत्वयोरसिद्धत्वादेच इत्ययावेकादेशाः प्राप्नुवन्ति ॥ किमुच्यते 'बहिष्पदलक्षण' इति ? ॥ यो ह्यन्यः [2]सोऽसिद्ध एवाऽसौ भवति । अमुया अमुयोरिति ॥ * ॥ प्रगृह्यसंज्ञायां च ॥ * ॥ प्रगृह्यज्ञायां च सिद्धे वक्तव्ये । अमी अत्र । [अमी आसते[3] । अमू अत्र] ॥ अमू आसाते । इत्वोत्वयोरसिद्धत्वाददसो मादिति प्रगृह्यसंज्ञा न प्राप्नोति ॥ किमर्थमिदमुभयमुच्यते न 'प्रगृह्यसंज्ञाया'मित्येव स्वरेऽपि बहिष्पदलक्षणे चोदितं स्यात् ॥ पुरस्तादिदमाचार्येण दृष्टं, 'स्वरे बहिष्पदलक्षणे' इति, तत्पठितम् । तत उत्तरकालमिदं दृष्टं 'प्रगृह्यसंज्ञायां चे'ति, तदपि पठितम् । न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति । ॥*॥ प्लुतिस्तुग्विधौ छे च[3] ॥*॥ प्लुतिस्तुग्विधौ च्छे च सिद्धा वक्तव्या । अग्ना३ इच्छत्रम् । पटा३ उच्छत्रम् । प्लुतेरसिद्धत्वाच्छे चेति तुग्न प्राप्नोति ॥ किमुच्यते छे चेति[4] ? ॥ यो ह्यन्योऽसिद्ध एवाऽसौ भवति-अग्निचीः३त् । सोमसू३त् ।

प्र.]असौ स्वरोऽसिद्धत्वे विषये भवति, तत्राऽसिद्धत्वं भवतीत्यर्थः।**अमुयेति।** अदस् आ इति स्थिते त्यदाद्यत्वं टाप्। एकादेशः। उत्वस्याऽसिद्धत्वादाङि चाप इत्येत्वमयादेशस्ततो मुत्वम् । **न चेति।** व्याख्यानसूत्रेषु लाघवाऽनादरात्। **अग्ना ३ इच्छत्रमिति ।** 'एचोऽप्रगृह्यस्ये'त्याकारः प्लुतः। इदुतौ तु मात्रिकौ । तत्र इदुतोरसिद्धत्वादेकाराश्रयो विकल्पेन तुक् प्राप्नोति । ह्रस्वाश्रयस्तु नित्य इष्यते । प्लुतिशब्देन तत्सहचरिताविदुतौ लक्ष्येते । **अग्निची३दिति ।** प्लुतस्याऽसिद्धत्वात् ह्रस्वस्येति तुग्भवति । द्विविधं चाऽत्राऽसिद्धत्वं बहिरङ्गत्वात्, पूर्वत्रासिद्धमिति च ।

उ.]**स्वर इति।** असिद्ध इति भावप्रधानं सप्तम्यन्तं विषयत्वार्थकमिति भावः। **तत्राऽसिद्धत्वमिति।** यो ह्यन्यः स्वरस्तस्मिन् स्वरे परतः कार्येऽत्वादानामसिद्धत्वमित्यर्थः । नन्वानर्थक्ये त्याग एव युक्तोऽत आह-**व्याख्यानसूत्रेष्विति।** वार्तिकेष्वित्यर्थः नन्विदुतोः सिद्धत्वे साध्ये प्लुतेऽसिद्धवचनमसङ्गतमत आह-**प्लुतिशब्देनेति।** **इदुताविति ।** तावपीत्यर्थः। अत एवाग्रे

॥ * ॥ श्चुत्वं धुट्त्वे ॥ * ॥ श्चुत्वं धुट्त्वे सिद्धं वक्तव्यम् । अट्श्च्योतति [२] षट् श्च्योतति । श्चुत्वस्याऽसिद्धत्वाड्ङः सि धुडिति धुट् प्रसज्येत । ॥ * ॥ अभ्यासजश्त्वचर्त्वमेत्वतुकोः ॥ * ॥ अभ्यासजश्त्वचर्त्वमेत्वतुकोः सिद्धं वक्तव्यम् । बभणतुः बभणुः । अभ्यासादेशस्याऽसिद्धत्वादेत्वं प्राप्नोति । उचिच्छिषति । अभ्यासादेशस्याऽसिद्धत्वाच्छे चेति तुक्–प्राप्नोति ॥*॥ द्विर्वचने परसवर्णत्वम् ॥ * ॥ द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम् । सँय्यँन्ता । सँव्वँत्सरः तँल्लोकं यँल्लोकमिति । परसवर्णस्याऽसिद्धत्वाद्यर इति द्विर्वचनं न प्राप्नोति ॥ * ॥ पदाधिकारश्चेल्लत्वघत्व(ढत्वं [३])नत्वरुत्वषत्वानुनासिक-

---

प्र.] अट् श्च्योततीति । 'श्च्युतिर् क्षरणे' इति धातुः सकारादिः प्रतिज्ञायते, मधुश्च्युतमाचष्ट इति णिचि टिलोपे क्विपि 'मधु'गिति रूपं यथा स्यात् । शकारादौ मधुडिति स्यात् । उचिच्छिषतीति । उछी विवासे । तुक् सन् इट् । 'अजादेर्द्वितीयस्ये'ति 'च्छि'शब्दस्य द्विर्वचनं, 'शर्पूर्वाः खय' इति शेषः, छस्य 'अभ्यासे चर्चे'ति चकारस्तस्याऽसिद्धत्वाच्छेचेति पूर्वस्य तुक् प्राप्नोति । सँय्य-न्तेति । अनुस्वारस्याऽयोगवाहानामविशेषेण प्रत्याहार उपदेशकरणचोदनाद्य-

---

उ.] प्रत्युदाहरणपरं भाष्यं सङ्गच्छते । बहिरङ्गत्वादिति । दूराद्धूतादित्वापेक्षत्वात्प्लुतो बहिरङ्गः । एतच्च छेचेति विषयनिर्देशश्चिन्त्यफलः। आनन्तर्यात्पूर्वत्रासिद्धत्वस्यैवाऽनेन निषेधादिति भावः । अर्थकृतबहिरङ्गत्वानाश्रयणेन चिन्त्यमिदम् । अत्र चेदं भाष्यवार्तिकमपि मानं। नन्वयं शकारादिरेव धातुरत आह–सकारादिरिति । तदुक्तं वृद्धैः–'नकारजावनुस्वारपञ्चमौ झलि धातुषु। सकारजः शकारश्चेर्षाट्टवर्गस्तवर्गजः ॥' इति । सकारादिप्रतिज्ञायाः फलं दर्शयति–मधिवति । यस्य 'लोपो व्यो'रिति लोपः । यत्तु वृत्तौ 'यस्य संयोगान्तलोप'इत्युक्तं, तन्न, यणः प्रतिषेधात् । नच णिलोपस्य स्थानिवत्त्वात्कथं संयोगादिलोपः,'पूर्वत्रासिद्धीय' इति तु 'तस्य दोष' इत्यादिना निषिद्धमिति वाच्यं, 'कौलुप्त'मिति निषेधात् । तस्यात्राश्रयणे मानं च सकारप्रतिज्ञैव । केचित्तु सकारप्रतिज्ञाफलं 'सनूश्च्योतती'त्यत्र श्नितुग्व्यावृत्तिः । किंच संयोगान्तलोपे सस्य रुत्वे 'र्वो'रिति दीर्घे 'मधू'रिति रूपमिति तदाश्रयणे मानाऽभावात् 'मधु'गितीति कैयटश्चिन्त्य इत्याहुः । तुक्सन्नीति । एवं 'लक्ष्ये लक्षणस्ये'ति न्यायेन पुनस्तुगप्रवृत्तेश्चिन्त्यमिदं वचनमिति भावः । पदविषयत्वात्संहितायास्तत्कार्यं तुक् पश्चादेवेत्यन्ये भाष्याशयं वर्णयन्ति । शर्पूर्वा इति । तत्रत्येन 'खर्पूर्वा' इति वार्तिकेनेति बोध्यम् । क्वचित्तु 'खर्पूर्वाः खयः'इत्येव पाठः । द्विर्वचने चेति । अनुस्वारस्यैव द्वित्वे द्वयोरनुस्वारयोः क्रमेण परसवर्णाविति भावः। अनुस्वारस्य शर्षु पाठेन यत्वेऽपि ययुत्वा

च्छत्वानि ॥*॥ पदाधिकारश्चेल्लत्वघत्व(ढत्वे)नत्वरुत्वषत्वणत्वानुनासिकच्छ-त्वानि सिद्धानि वक्तव्यानि। लत्व—गरो गरः। गलो गलः। लत्व॥ घत्व—द्रोग्धा-द्रोग्धा। घत्व॥ [ढत्वं—] द्रोढा-द्रोढा। [ढत्वं]॥ नत्व-नुन्नो नुन्नः। नुत्तो नुत्तः। नत्व॥रुत्व—अभिनोऽभिनः। अभिनदभिनत्। रुत्व॥ षत्व—मातुः-ष्वसा मातुःष्वसा। मातुःस्वसा मातुःस्वसा। पितुःष्वसा पितुःष्वसा, पितुः-स्वसा पितुः स्वासा। षत्व॥ णत्व-माषवापाणि-माषवापाणि। माषवापानि माष-वापानि। णत्व॥ अनुनासिक—वाङ्नयनं वाङ्नयनम्। वाग्नयनं वाग्नयनम्। अनुनासिक॥ छत्व—वाक्च्छयनं वाक्च्छयनम् वाक्शयनं—वाक्शयनम्। उभयथा चाऽयं दोषो यद्यपि स्थाने द्विर्वचनमथापि द्विःप्रयोगः॥ कथम्?॥ यदि तावत्स्थाने द्विर्वचनं संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य लत्वाद्यभावः।

प्र.] त्वाद्विर्वचने च सिध्यति रूपम्। एतच्चाऽनपेक्ष्य सिद्धत्ववचनम्। **पदाधिकारश्चे-दिति**। यदि लत्वादिषु 'पदस्ये'त्यपेक्ष्यते तदा लत्वादीनां द्विर्वचनस्य च समक-क्षत्वाद्विर्वचने कर्त्तव्ये तेषामसिद्धत्वात्पूर्वं द्विर्वचने सत्यनिष्टोऽपि प्रयोगः स्यात्। यदा तु लत्वादिषु 'पदस्ये'ति नाऽपेक्ष्यते तदा द्विर्वचनस्य बहिरङ्गत्वादन्तर-ङ्गेषु लत्वादिषु कृतेषु द्विर्वचने सतीष्टं सिध्यतीति नाऽर्थः सिद्धवचनेन।

गल इति। 'अचि विभाषे'ति लत्वम्। **द्रोग्धेति**। 'वा द्रुहमुहे'ति वा घत्वं, पक्षे 'हो ढ' इति ढत्वम्। **नुन्न इति**। 'नुदविदे'ति वा निष्ठानत्वम्। **अभिन इति**। भिदेर्लङि सिपि श्नमि अटि हल्ङ्याादिलोपे 'सिपि धातोरुर्वा' 'दश्चे'ति वा रुत्वम्। **मातुःष्वसेति**। 'मातुःपितुर्भ्यामन्यतरस्या'मिति वा षत्वम्। **माषवापाणीति**। 'प्रातिपदिकान्ते'ति वा णत्वम्। **वाङ्नयनमिति**। 'यरोऽनुनासिके' इति वा गकारस्य ङकारः। **वाक्छयनमिति**। 'शश्छोटी'ति शकारस्य वा च्छत्वम्।

उ.] ऽभावाद्यकारादेरनुस्वारसवर्णत्वाऽभावाच्च वा पदान्तस्येत्यस्यानुस्वारस्य ययीत्येतदृष्ट्या-ऽसिद्धत्वाच्च चिन्त्यमिदम्। **एतच्चेति**। 'अनुस्वारस्ये'त्यादि मदुक्तमनपेक्ष्य 'द्विर्वचन' इति सिद्धत्ववचनमित्यर्थः। पूर्वत्रासिद्धीयमद्वित्व इत्येतदनपेक्ष्येदं सर्वम्। वस्तुतस्तस्याऽनित्य-बोधकानीमानि,'उभौ' ग्रहणवदिति बोध्यम्। **यदीति**। द्वित्वं तु यथा पदाधिकाराभावेऽपि पदस्यैव भवति तथोक्तम्। **अनिष्टोऽपीति**। गरो गलः गलो गर इत्यादीत्यर्थः। **बहि-रङ्गत्वादिति**। 'बहिरङ्गलक्षणत्वाद्वे'ति तत्र तत्र वार्तिककारोक्त्या तेन त्रैपादिकेऽन्तरङ्गे

[तेनैष दोषः सिद्धः]। अथ द्विः प्रयोगो द्विर्वचनमसिद्धत्वाल्लत्वादीनि निवर्त्तेरन्॥

न लोपः प्रातिपदिकान्तस्य ।८।२।७।

नलोपेऽन्तग्रहणं किमर्थम् ? ॥ * ॥ नलोपेऽन्तग्रहणं पदाधिकारस्य विशेषणत्वात् ॥ * ॥ नलोपेऽन्तग्रहणं क्रियते ॥ किं कारणम् ?॥ 'पदाधिकारस्य विशेषणत्वात्'। पदाधिकारो विशेषणम् ॥ कथम् ? ॥ पदस्येति नैषा स्थानषष्ठी ॥ का तर्हि ?॥ विशेषणषष्ठी ॥ ॥*॥ अह्नो नलोपप्रतिषेधः*॥ अह्नो नलोपस्य[3] प्रतिषेधो वक्तव्यः। अहोभ्याम्। अहोभिरिति ॥ स तर्हि प्रतिषेधो वक्तव्यः ? ॥ न वक्तव्यः। रुरत्र बाधको भविष्यति ॥ असिद्धो रुस्तस्याऽसिद्धत्वान्नलोपः प्राप्नोति। अनवकाशो रुर्नलोपं बाधिष्यते ॥ साऽवकाशो रुः ॥ कोऽवकाशः?॥ अनन्त्योऽकारः ॥ आचार्यप्रवृत्तिर्ज्ञापयति-

---

प्र.] लत्वादीनि निवर्त्तेरन्निति। द्विर्वचनात्प्राङ् प्रवर्तेरन्। कृते तु द्विर्वचनेऽनिष्टोऽपि तद्विकल्पः स्यात्। ततश्च गलो गरो गरो गल इत्याद्यपि प्रसज्येत ॥

न लोपः प्राति। अन्तग्रहणमिति। 'न लोपः प्रातिपदिकस्ये'त्येवाऽस्तु, पदस्येति वर्तते, तत्र नकारेण पदे विशेष्यमाणे तदन्तविधिना नकारान्तस्य पदस्य प्रातिपदिकस्य लोपो विधीयमानोऽलोऽन्त्यस्येत्यन्त्यस्य भविष्यतीति प्रश्नः।

नलोप इति। असत्यन्तग्रहणे प्रातिपदिकस्य पदस्य[1] योऽवयवो नकारस्तस्य यत्र तत्र स्थितस्य लोपः स्यात्। ततश्च नराभ्यामित्यत्र स्यात्। **अह्न इति।** 'अहन्' 'रोऽसुपी'ति रुत्वरत्वयोः संबुद्धौ सावकाशत्वात् 'पूर्वत्रासिद्ध'मित्यसिद्धत्वान्नलोपः प्राप्तो निषिध्यते। **अनन्त्य इति।** अकृतनलोपाऽपेक्षयाऽनन्त्यः। कृते तु नलोपे एकदेशविकृतस्याऽनन्यत्वात्स एव अहःशब्द इति प्रत्यभिज्ञाना-

---

उ.] तत्प्रवृत्तिस्वीकारादिति भावः। भाष्यकृत्तु 'खरवसानयो'रिति सूत्रे त्रैपादिकेऽन्तरङ्गे तदप्रवृत्तिमेव वक्ष्यति कार्यकालेऽपि। ननु जातस्य निवृत्त्ययोगान्निवर्त्तेरन्नित्यसङ्गतमत आह—**न प्रवर्त्तेरन्निति।** शास्त्राणामसिद्धत्वादिति भावः। [स्वरितो वाऽनुदात्ते पदादौ] ॥

नलोपः। 'ने'त्यविभक्तिकं पृथक्पदं, 'प्रातिपदिके'त्यपि तथा। भाष्ये **नैषा स्थानषष्ठीति।** स्थानषष्ठ्येवेत्यर्थः। ननु रुत्वरत्वाभ्यां बाधात्कथं नलोपप्राप्तिरत आह—**अहन्निति।** नन्वलोऽन्त्यस्य विधीयमानं रुत्वं कथमनन्त्ये सावकाशं स्यादत आह—**अकृतेति।** न चाऽकारस्य रौ रे वाविशेषाऽभावेनोभयविधानं व्यर्थं। संबुद्धिविषये लोपाऽभावेन तयोश्चारितार्थ्यमिति भावः। ननु नलोपे कृतेऽचारितार्थ्यात् कथं ज्ञापकत्वमत आह—

'नानन्त्यस्य रुर्भवती'ति यदयमहन्ग्रहणं करोति ॥ * ॥ अहन्ग्रहणादिति चेत्संबुद्ध्यर्थं वचनम् ॥ * ॥ **अहन्ग्रहणादिति चेत्संबुद्ध्यर्थमेत्स्यात् । हेऽह-रिति ॥ यत्तर्हि रुत्वं शास्ति ॥ एतदपि संबुद्ध्यर्थमेव स्यात् । हे दीर्घाहोऽत्र । यत्तर्हि रूपरात्रिरथन्तरेषूपसङ्ख्यानं करोति** तज्ज्ञापयत्याचार्यो **'नानन्त्य-स्य रुर्भवती'ति ॥ कथं कृत्वा ज्ञापकं ? ॥ न ह्यस्ति विशेषो रूपरात्रि-रथन्तरेष्वनन्त्यस्य रौ वा रे वा** ॥ [नलोपः प्रातिपदिकान्तस्य] ॥

न ङिसंबुद्ध्योः ।८।२।८।

प्र.] दलोऽन्त्यस्येति वचनादकारस्य रुत्वप्रसङ्गः । **यदयमहन्ग्रहणमिति**, नकारा-ऽपरित्यागेन निर्देशस्यैतत्प्रयोजनं—नकारान्तस्य स्थानित्वं यथा स्यात् । अन्य-था'ऽह' इति ब्रूयात् । **सम्बुद्ध्यर्थमिति** । संबुद्धौ नलोपस्य प्रतिषेधात्तदन्तानु-करणनिर्देशः स्यादिति नलोपाऽभावो न ज्ञाप्येत । **यत्तर्हि रुत्वमिति** । हेऽह-रित्यत्र 'रोऽसुपी'ति रादेशः क्रियते । 'अह'न्नित्यनेन तु रुत्वं विधीयते । तत्राऽकृतनलोपनिर्देशो नलोपाऽभावस्य ज्ञापक एवेति भावः । **हे दीर्घाहो-त्रेऽति** । दीर्घाण्यहानि यस्मिन्निति बहुव्रीहिः । हल्ङ्यादिलोपः । प्रत्ययलक्षणेन सुप्परत्वादुरुत्वम् । **यत्तर्हीति**—वार्तिककारवचनं ज्ञापकत्वेनोपन्यस्यति । **नह्य-स्तीति** । अतः परस्य रोरुत्वमुच्यते अकारस्य तु रौ रेफे वा विशेषाभावाद्रादे-शमेव विदध्यादिति रुत्वविधानान्नलोपाऽभावोऽनुमीयत इति नकारस्यैव रुत्व-रत्वाभ्यां तत्र भाव्यमिति सिद्धमिष्टम् ॥ [नलोपः प्रा] ।

उ.] **नकारेति** । लुप्तविभक्तिकत्वपूर्वं नकारापरित्यागेन निर्देशादित्यर्थः । **संबुद्धौ नलोप-स्येति** । एवञ्च नकारसहितनिर्देशस्याऽलुप्तनकारसम्बुद्ध्यर्थत्वादहोभ्यामित्यादौ नलोपः स्या-देव, रुत्वं च न स्यादेवेत्यर्थः। **हल्ङ्यादिलोप इति**। निदाघरूपस्य पुँल्लिङ्गस्याऽन्यपदार्थत्वा-न्न लुक् । **रादेशमेवेति** । 'रोऽसुपी'ति सूत्रेणेत्यर्थः । एतद्भाष्यप्रामाण्यादस्याऽसंबुद्धावेव प्रवृत्तिरिति 'भोऽह्नोऽरूपमस्ती'त्यादौ चारितार्थ्यमिति न शङ्क्यं, तदनभिधानात्। वस्तुतस्त्वन-वकाशो रुर्नलोपं बाधिष्यते इत्येव सिद्धान्त्युक्तिः । न च संबुद्धाववकाशः, तत्रापि नलोपप्राप्तेः । निषेधेनापि बाधित इत्यन्यत् । अत एव ब्राह्मणेभ्यो दधि दीयतां न रात्रौ तद्दीयतां, कौण्डिन्याय तु तक्रमित्यादावपि सर्वदा कौण्डिन्याय तक्रदानमेव भवति । अतएव पूर्वपक्षिणाऽत्रैव स्थाने संबुद्धौ चारितार्थ्यं नाशङ्कितम् । असंभवे एव बाध्यबाधकभाव इति वार्तिकमतानुसारी शङ्कते–**अनन्त्योऽवकाश इति** । तदनुसार्येवैकदेशी समाधत्ते–**आचार्येत्यादीत्यलम्** । [**न लोपः प्रातिपदिकाऽन्तस्य**] ॥

॥ * ॥ न ङिसंबुद्ध्योरनुत्तरपदे ॥ * ॥ न ङिसंबुद्ध्योरनुत्तरपद इति वक्तव्यम् । इह मा भूत्–चर्मणि तिला अस्य चर्मतिल इति । राजन् वृन्दारक राजवृन्दारकेति ॥ * ॥ वा नपुंसकानाम् ॥ * ॥ वा नपुंसकानामिति वक्तव्यम् ॥ हे चर्म हे चर्मन् । [हे वर्म हे वर्मन्] ॥ तत्तर्ह्यनुत्तरपद इति वक्तव्यम् ? ॥ न वक्तव्यम् । 'नङिसंबुद्ध्यो'रित्युच्यते न चाऽत्र ङिसंबुद्धी पश्यामः ॥ प्रत्ययलक्षणेन ॥ 'न लुमता तस्मि'न्निति प्रत्ययलक्षणप्रतिषेधः ॥ न क्वचिन्ङिर्लोपेन लुप्यते, सर्वत्र लुमतैव । स यथैवेह भवति–आर्द्रे चर्मन् लोहिते चर्मन्नित्येवमिहापि स्यात्–चर्मणि तिला अस्य चर्मतिल इति । तस्मादुपसङ्ख्यानं कर्त्तव्यम् ॥ एवं तर्हि ङ्यर्थेन तावन्नाऽर्थः ॥ * ॥ भत्वात्तु ङौ प्रतिषेधानर्थक्यम् ॥ * ॥ ङौ प्रतिषेधोऽनर्थकः ॥ किं कारणम् ? ॥ 'भत्वात्' । भसंज्ञाऽत्र भविष्यति ॥ यदि तर्हि भसंज्ञाऽत्र भवति रथन्तरे सामन्नित्यत्र 'अल्लोपोऽन'इत्यल्लोपः प्राप्नोति ॥ नैष दोषः ॥ उक्त'मुभयसंज्ञा-

---

प्र.] नङि । चर्मतिल इति । 'नलुमता तस्मि'न्निति प्रत्ययलक्षणनिषेधाद्भसंज्ञाया अभावात्सुबन्तत्वात्पदत्वान्नलोपः । राजन्वृन्दारकेति । अवयवाऽर्थसंबोधनेन समुदायार्थसम्बोधनं प्रतीयत इति सम्बुद्ध्यन्तयोरेव समासः । यथैवेहेति । वचनसामर्थ्यात्प्रत्ययलक्षणाश्रयत्वात् । भत्वादिति । अयस्मयादित्वात् । सम्बुद्ध्यन्तानामिति । पृथगनवयवार्थयोरभिमुखीकरणे परस्परस्यैकार्थीभावलक्षणसामर्थ्याऽयोगात् ।

उ.] न ङिसं । ननु ङिनिमित्तकभत्वात्पदत्वाऽभावेन कथं नलोपोऽत आह–न लुमतेति । ननु राजन् वृन्दारकेति समुदायरूपार्थस्य संबोधनेनाऽयोगात् प्रत्येकं-संबोधने उभयोरपि विधेयान्वयेन परस्परमेकार्थीभावाऽभावात्कथं समासोऽत आह–अवयवार्थेति । अवयवानां समुदायनान्तरीयकत्वादिति भावः । भाष्ये न क्वचिन्ङिर्लोपेनेति । नच परमे व्योमन्नित्यादौ घोषाल्पप्राणनिरनुनासिकत्वान्तर्येण पूर्वसवर्णे दकारे तस्य संयोगान्तलोपोऽस्त्येवेति वाच्यं, प्रक्रियालाघवाय तत्रापि लुक एव प्रवृत्तिरित्याशयात् ।

ननु'आर्द्रे चर्म'नित्यत्रापि लुक एव सत्त्वाद्दृष्टान्तानुपपत्तिरत आह–वचनसामर्थ्यादिति । केचित्तु सामर्थ्यादेव षष्ठ्यन्तं व्याचक्षते । अयस्मयादित्वादिति । नच राजनीवाचरति राजन्यति भिक्षुके इत्यत्राधिकरणाच्चेति क्यचि लोक उदाहरणसंभवः । एतद्भाष्यप्रामाण्यादनभिधानेन तत्र क्यजनुत्पत्तेः । एवञ्च सूत्रस्थं वार्तिकस्थं च ङिग्रहणं प्रत्याख्यातम् । न्यायेति । षष्ठ्यन्ततया व्याख्याने भाष्योक्त एव परिहारः । एवं वार्तिकस्थं संबुद्धिग्रहणं

न्यपि च्छन्दांसि दृश्यन्ते' । तद्यथा–स सुष्टुभा स ऋक्कता गणेन । पदत्वा-त्कुत्वं भत्वाजश्त्वं न भवति–एवमिहापि पदत्वादल्लोपो न [इति लोपो न[1]], भत्वान्नलोपो न भविष्यति । तस्मान्नाऽर्थो ङिग्रहणेन ॥

संबुद्ध्यर्थेन चाऽपि नार्थः ॥ कथम् ? ॥ संबुद्ध्यन्तानाम[2]समासो राज वृन्दारकेति ॥ किं वक्तव्यमेतत् ? ॥ न हि ॥ कथमनुच्यमानं गंस्यते ? ॥ इह तावत्[3]समानार्थेन वाक्येन भवितव्यं समासेन च । यश्चेहाऽर्थो वाक्येन गम्यते नाऽसौ जातु चित्समासेन गम्यते । अवयवसम्बोधनं वाक्येन गम्यते, समुदायसम्बोधनं समासेन ॥ 'वा नपुंसकाना'मित्येतद्वक्तव्यमेव ॥

मादुपधायाश्च मतोर्वोऽयवादिभ्यः ।८।२।९।

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ।८।२।४२।

॥ * ॥ अनन्त्ययोरपि निष्ठामतुपोरादेशः ॥ * ॥ निष्ठामतुपो[4]रादेशोऽनन्त्ययोरपीति वक्तव्यम् । भि[5]न्नवन्तौ भिन्नवन्तः । वृक्षवन्तौ वृक्षवन्तः । न[6] वक्तव्यम् ॥ वचनाद्भविष्यति ॥ अस्ति वचने प्रयोजनम् ॥ किम् ? ॥ भिन्नवान् । छिन्नवान् । वृक्षवान् । प्लक्षवान् ॥ ॥*॥ नार्मते प्रतिषेधः ॥*॥ नार्मते प्रतिषेधो वक्तव्यः । नृमतोऽ[7]पत्यं नार्मत इति । ॥*॥ उक्तं वा ॥*॥ [उ[8]क्तं वा] । किमुक्तम् ? ॥ निष्ठामतुपोस्तावदुक्तं–'न वा पदाधिकारस्य विशेषणत्वा'दिति । नार्मतेऽप्युक्तम्–'न वा बहिरङ्गलक्षणत्वा'दिति ॥

प्र.] यद्यपि हेराजन्नित्यादौलोपशब्देन सम्बुद्धेर्लोपात् प्रत्ययलक्षणेन संबुद्धिपरत्वान्नलोपनिषेधः प्रवर्त्तते, समासे तु लुमता लोपान्न लुमता तस्मिन्निति संबुद्धिपरत्वं नास्तीति परिहारोऽस्ति तथापि न्यायव्युत्पादनाय परिहारान्तरं भाष्यकारेणाभिहितम् । **वा नपुंसकानामिति** । प्रत्ययलक्षणे सति नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं, प्रत्ययलक्षणप्रतिषेधे त्वप्राप्ते प्रतिषेधे वचनम् । **[न ङिसम्बुध्योः]** ।

मादु । अनन्त्ययोरपीति । मतुन्निष्ठाभ्यां पदस्य विशेषणात्तदन्तस्यैव पदस्य संप्रत्ययः स्यादिति वचनम् । **नवेति** । पदेन मतुन्निष्ठे विशेष्येते, नतु

उ.] प्रत्याख्यातम् । **प्रत्ययलक्षणे सतीति** । 'न लुमते'त्यस्याऽनित्यत्वादनाश्रयणे, षष्ठ्यन्ततया व्याख्याने वेति भावः । **प्रतिषेधे त्विति** । सप्तम्यन्ततया व्याख्याने, न लुमते'त्यस्याश्रयणे चेति भावः ।

संज्ञायाम् ।८।२।११।

आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती ।८।२।१२।

किमयमेक योग आहो स्विन्नानायोगौ ? ।। किं चातः ? ॥ यद्येकयोगः अहीवती कर्पीवती-अत्र न प्राप्नोति ।। अथ नानायोगौ—इक्षुमती द्रुमती—अत्रापि प्राप्नोति ।।यथेच्छसि तथास्तु ।। अस्तु तावदेकयोगः ॥ कथमहीवती कर्पीवती ? ।। आचार्यप्रवृत्तिर्ज्ञापयति–'भवत्येवंजातीयकानां वत्व'मिति यदय'मन्तोऽवत्या' 'ईवत्या' इत्याह ।। अथवा पुनरस्तु नानायोगौ । ननु चोक्त'मिक्षुमती द्रुमती अत्रापि प्राप्नोतीति' ।। यवादिषु पाठः करिष्यते ।।

छन्दसीरः ॥८।२।१५॥

'छन्दसीर' इत्युच्यते तत्र 'ते विश्वकर्माणन्ते सप्तर्षिमन्त'मित्यत्रापि प्राप्नोति ।। नैष दोषो—नैवं विज्ञायते—'छन्दसि इर'इति ।। कथं तर्हि ? ।। छन्दसि—ईर इति ।। एवमपि—त्विषीमान् पतीमानित्यत्रापि प्राप्नोति ।। नैष दोषो—विहितविशेषणमीकारग्रहणम्—'ईकारान्ताद्यो विहित'इति ॥ एवमपि—'सूर्यं ते देवा पृथिवीमन्त'मित्यत्राऽपि प्राप्नोति । इह च न प्राप्नोति—'त्रिवती-

---

प्र.] ताभ्यां पदमिति तदन्तविध्यभावः । [**मादुपधायाश्च मतोर्वो**] ।

संज्ञायाम् । **आसन्दी** ।। **किमयमिति** । तत्रैकयोगे निपातनादेव संज्ञालाभात्संज्ञाग्रहणं विस्पष्टार्थं । नानायोगत्वे 'संज्ञाया'मिति वत्वे सिद्धे कार्यान्तरविधानार्थमासन्दीवदादीनां निपातनम् । **यदयमिति**। ननु चासन्दीवदाद्यर्थमीवत्या इति स्यादिति कथं ज्ञापकम् ?। नैतदस्ति। स्त्रियामेषां प्रयोगाऽभावादीवतीशब्दान्तत्वाऽभावात् । **यवादिष्विति** । आदिशब्दः प्रकारार्थस्तत्राश्रीयत इत्यर्थः । [**सञ्ज्ञायामासन्दीवद**] ॥

छन्दसीरः। **त्विषीमानिति**। 'अन्येषामपि दृश्यते' इति दीर्घः । **विहित-**

उ.] **संज्ञायामासन्दीव** । **निपातनादेवेति**। 'रूढ्यर्थं निपातन'मित्युक्तेः। **कार्यान्तरेति**। आसनशब्दस्यासन्दीभावः, अस्थ्नोऽष्ठीभावः, चक्रस्य चक्रीभावः, लवणशब्दस्य रुमण्भावः, चर्मणो नलोपाऽभाव इत्यर्थः। भाष्ये-**अत्र प्राप्नोतीति** । 'वत्व'मिति शेषः। ननु यवादिषु पाठाऽभावात्कथं निषेधोऽत आह-**आदिशब्द इति** । यवादिराकृतिगण इति भावः। [**सञ्ज्ञायामासन्दीव**] ।

र्याज्यानुवाक्या भवन्ती'ति ॥ एवं तर्हि परिगणनं कर्त्तव्यं-॥*॥ 'त्रिहर्यधिपत्यग्निरे' ॥*॥ त्रि–त्रिवतीर्याज्यानुवाक्या भवन्ति । त्रि ॥ हरि– हरिवो मेदिनं त्वा । हरि ॥ अधिपति–अधिपतिवतीर्जुहोति । अधिपति ॥ अग्नि–चतुरग्निवानिव । अग्नि ॥ रे–आरेवानेतु नो विश इति ॥ यदि तर्हि परिगणनं क्रियते सरस्वतीवान् भारतीवान्[2] अपूपवान् दधिवांश्चरुरित्यत्र न प्राप्नोति ॥ एवं तर्हि [॥ॐ॥छन्दसीरो[3] बहुलम् ॥ॐ॥]॥ छन्दसीरो बहुलमिति वक्तव्यम् ।

अनो नुट् ८।२।१६।

यदि पुनरयं नुट् पूर्वान्तः क्रियेत–'अनो[2] नु'गिति ॥ * ॥ अनो नुकि-विनामरुविधिप्रतिषेधः ॥ * ॥ अनो नुकि सति विनामो विधेयः । अक्षण्वान् 'पदान्तस्य[4] ने'ति निषेधः प्राप्नोति ॥ रुश्च प्रतिषेध्यः–सुपथिन्तरः । 'नश्छव्यप्रशा'निति रुः प्राप्नोति ॥ अस्तु तर्हि परादिः ॥*॥ परादौ वत्वप्रतिषेधोऽवग्रहश्च ॥ * ॥ यदि परादिर्वत्वस्य प्रतिषेधो वक्तव्यः । अक्षण्वानिति[2] । 'मादुपधायाश्च मतोर्वोऽयवादिभ्य' इति वत्वं प्राप्नोति । अवग्रहश्चाऽनिष्टे देशे प्राप्नोति–अक्षण्वानिति[2] ॥ अस्तु तर्हि पूर्वान्तः ॥ ननु चोक्तम्–'अनो नुकि विनामरुविधिप्रतिषेध'इति ।॥*॥ भत्वात्सिद्धम् ॥*॥ [भत्वात्सिद्धमेतत्[3]] भसंज्ञा वक्तव्या ॥ यदि तर्हि भसंज्ञा 'अल्लोपोऽन' इत्यल्लोपः प्राप्नोति ॥

प्र.] विशेषणमिति । लक्ष्यदर्शनवशेन वाक्यशेषकल्पनात् । एवं तर्हीति । बहुलग्रहणाद्रेशब्दादपि विजन्ताद्वत्वं भवति । अथवा रयिशब्दस्य 'रयेर्मतौ बहुल'मिति कृतसंप्रसारणस्य रूपम्–आरेवानिति । [छन्दसीरः] ॥

अनो नुट् । यदीति । यदि पूर्वान्तलिङ्गः पठ्येतेत्यर्थः । अक्षण्वानिति । अक्षिशब्दस्य मतुपि च्छन्दस्यपि दृश्यत इत्यनङादेशः । नुकोऽसिद्धत्वात्पूर्वं नलोपो, भूतपूर्वगत्या नुक् । सुपथिन्तर इति । 'नाद्धस्ये'ति नुकि सति पदान्तत्वान्नकारस्य रुत्वप्रसङ्गः। परादाविति । नुटो मतुब्भक्तत्वात्तद्ग्रहणेन ग्रहणाद्वत्वप्रसङ्गः । भत्वादिति । अयस्मयादित्वात् । अल्लोप इति । एतच्चाऽल्लोपे

उ.] छन्दसीरः । विजन्तादिति । रि पि गतावित्यस्माद्विचि गुणः । अत्रेरन्तत्वाभावेऽपि बहुलग्रहणाद्भवतीति भावः । अथवेति । अत्र पक्षे ईवर्णान्ताद्विहितत्वाद्भवति । भाष्ये–अपूपवानिति वाक्यसन्दर्भेण पठितम् । [छन्दसीरः] ॥

अनो नुट् । भाष्ये–यदीति । कृत्वा चिन्तेयं। यदि पूर्वान्तस्तत्र को दोष इति प्रश्नः ।

॥ * ॥ अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि ॥ * ॥ **अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि वक्तव्यम्** ॥

इह तर्हि सुपथिन्तरः—नान्तस्य टिस्तद्धिते लुप्यत इति लोपः प्राप्नोति ॥

॥ * ॥ घग्रहणं च ॥ * ॥ **घग्रहणं च कर्तव्यम्** ॥

तत्तर्हीदं बहुवक्तव्यं, नुग्वक्तव्यो, भसंज्ञा च वक्तव्या, अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि कर्त्तव्यं[1], घग्रहणं च कर्तव्यमिति ॥ न कर्तव्यम्—यत्तावदुच्यते 'नुग्वक्तव्य' इति, नुक एष परिहारो 'भत्वात्सिद्ध' मिति ॥ [यदप्युच्यते[2]] 'भसंज्ञा वक्तव्ये' ति । क्रियते न्यास एव—'अयस्मयादीनिच्छन्दसी' ति ॥ यदप्युच्यते 'अनस्तु प्रकृतिभावे मतुब्ग्रहणं छन्दसि घग्रहणं च कर्तव्य' मिति, न कर्तव्यम् । उभयसंज्ञान्यपि हि छन्दांसि दृश्यन्ते । तद्यथा—स सुष्टुभा स ऋक्कता गणेन । पदत्वात्कुत्वं, भत्वाज्जश्त्वं न भवति । एवमिहापि पदत्वादल्लोपटिलोपौ न, भत्वाद्विनामरुविधिप्रतिषेधौ भविष्यतः ॥ सिध्यति—सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवाऽस्तु ॥ ननु चोक्तं—'परादौ वत्वप्रतिषेधोऽवग्रहश्चे' ति ॥ यत्तावदुच्यते वत्वप्रतिषेध' इति । 'निर्दिश्यमानस्यादेशा भवन्ती' त्येवं न भविष्यति । यस्तर्हि[3] निर्दिश्यते तस्य न प्राप्नोति ॥ किं कारणम्? ॥

प्र.] नुकोऽसिद्धत्वमनाश्रित्योच्यते । नुकोऽसिद्धत्वाद्ध्यनन्तत्वाभावो, नलोपस्त्वल्लोपे सिद्धो 'नलोपः सुप्स्वरे' ति नियमात् । नाऽपि नलोपाऽपवादत्वान्नुको[4] नाऽनन्तत्वमिति शक्यते वक्तुम्, अक्षण्वानिति पूर्वस्य नकारस्याऽपदान्तत्वाण्णत्वे कृते परस्य ष्टुत्वेन सिद्धत्वाद्विनामविधानस्याऽयुक्तत्वप्रसङ्गात् । **घग्रहणं चेति ।** घे नान्तस्य टिलोपप्रसङ्गे प्रकृतिभावो विधेयः । **नुक एष इति ।** आश्रित्य नुकं

उ.] तस्य पदान्तत्वं दर्शयितुमाह—**अक्षिशब्दस्येति । भूतपूर्वगत्येति ।** सर्वत्र नलोपप्रसङ्गेन सांप्रतिकाऽभावादिति भावः । **वत्वप्रसङ्ग इति ।** 'आदेः परस्ये' ति नस्य वत्वप्रसङ्ग इति भावः । **असिद्धत्वमिति ।** 'पूर्वत्राऽसिद्ध' मित्यनेन । ननु नलोपस्याऽसिद्धत्वादनन्तत्वमित्यल्लोपोऽन इति दुर्वारमत आह—**नलोपस्त्विति ।** 'नलोपापवादत्वान्नुको नानन्तत्व' मिति पाठः । **विनामविधानस्येति ।** तस्मान्नलोपे कृते नुगिति वार्तिककारस्यदर्शनम्, असंभवे एव तस्य मतेऽपवादत्वादस्य नलोपदृष्ट्या सिद्धत्वाच्चेति भावः । **सुपथिन्तर** इत्यत्र 'नाद्धस्ये' त्युत्तरसूत्रेण नुट् । **प्रकृतिभाव इति ।** घसंज्ञकतरतमयोः परत इत्यर्थः । **आश्रित्य नुकमिति ।** नुको वक्तव्यत्वं न वार्तिककृतो दोषः, नुकमभ्युपगम्यैव 'भत्वा-

नुटा व्यवहितत्वात् ॥ असिद्धो नुट्, तस्याऽसिद्धत्वाद्भविष्यति ॥

अवग्रहेऽपि, न लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नाम लक्षणमनुवर्त्यम् । यथालक्षणं पदं कर्तव्यम् ॥ [अनो नुट्] ॥

नाद्धस्य ।८।२।१७।

॥ * ॥ ईद्रथिनः ॥ * ॥ **रथिन ईद्वक्तव्यः । रथीतरः** ॥ * ॥ भूरिदाव्नस्तुट् ॥ * ॥ **भूरिदाव्नस्तुड् वक्तव्यः । भूरिदावत्तरो जनः** ॥ [नाद्धस्य] ॥

कृपो रो लः ।८।२।१८।

॥ * ॥ कृपणादीनां प्रतिषेधः ॥ * ॥ **कृपणादीनां प्रतिषेधो वक्तव्यः । कृपणः । कृपाणः । कृपा[1] । कृपीटम्** ॥ * ॥ वालमूललघ्वलमङ्गुलीनां वा

प्र.] 'भत्वात्सिद्ध'मिति परिहाराभिधानान्नुग्वक्तव्य इति चोदनमयुक्तमित्यर्थः । **असिद्धो नुडिति** । अतोऽपि नुटो वत्वाऽभावः । **न लक्षणेनेति** । पौरुषेयत्वादवग्रहकरणस्य यथालक्षणं पदानि कर्तव्यानीत्यर्थः । [**अनो नुट्**] ॥

नाद्धस्य । ईद्रथिन इति । नुडपवाद ईकारो विधीयते स च नलोपे कृते ईकारस्य विधेयः । यदि तु नलोपाऽपवादो नकारस्य स्थाने विधीयेत तदा तस्याऽसिद्धत्वादेकादेशाभावाद्रूपं न सिध्येत् । **भूरिदावत्तर इति** । भूरि ददातीति वनिप् । [**नाद्धस्य**] ॥

कृपो । कृपण इति । 'रञ्जेः क्युँ'न्निति बाहुलकात् क्युन् । **कृपाण इति** । 'युधिबुधिदृशः किच्चे'ति बाहुलकादानच् । **कृपीटमिति** । 'कृकृपिभ्यां कीट'न्निति कीटन् । 'कृपे'त्येतत्तु 'क्रपेः संप्रसारणं चे'ति भिदादिषु पाठाद्भवति । ततो लाक्षणिकत्वाल्लत्वाऽभावः। अथ क्ळृपू सामर्थ्य इत्येव कस्मान्न पठ्यते, लत्वं हि न विधेयं भवति । नैतदस्ति । अचीक्ळृपदिति हि न सिध्येत् । 'ऋकारऌकारयोः सवर्णविधि'रिति ऌकारस्य ऋकारे कृतेऽचीकृपदिति स्यात् । यदा तु लत्वं

उ.] त्सिद्ध' मिति परिहाराभिधानादिति भाष्यार्थ इति भावः । [**अनो नुट्**] ॥

नाद्धस्य । नुडपवाद इति । रथशब्दान्मत्वर्थीयेनन्तात्तरपि नुटि प्राप्ते तदपवाद ईकार इत्यर्थः । **यदि त्विति** । नलोपदृष्ट्याऽस्याऽसिद्धत्वान्नलोपेऽस्य चारितार्थ्याच्च नाऽपवादत्वं भाष्यमतेऽपीति भावः । [**नाद्धस्य**] ॥

कृपो रो लः । ततो लाक्षणिकत्वादिति । एवं च वचनं विनाऽपि कृपा सिद्ध्यतीति भावः । तद्वचनं भिदादिष्वप्रामाणिकमिति भाष्याशयः। **ऋकारे इति**। 'उरृ'दित्य-

लो र(त्व)मापद्यते ॥*॥ वालमूललघ्वलमङ्गुलीनां वा लो र(त्व)मापद्यत इति वक्तव्यम् । वाल[1]—अश्ववारः । अश्ववालः[2] । वाल ॥ मूल—मूरदेवः । मूलदेवः[2] । मूल ॥ लघु—वरुणस्य[3] लघुस्यदः । वरुणस्य रघुस्यदः । लघु ॥ अलम्—अलं भक्तार्य[4] । अरं भक्ताय[4] । अलम् ॥ अङ्गुलि—सुबाहुः स्वङ्गुलिः । सुबाहुः स्वङ्गुरिः ॥ * ॥ संज्ञाच्छन्दसोर्वा कपिलकादीनाम् ॥ * ॥ संज्ञाच्छन्दसोर्वा कपिलकादीनामिति वक्तव्यम् । कपिरकः । कपिलकः[2] । तिलिपिलिकम् । तिर्पिरिकम् । कल्मषम् । कर्मषम् । रोमाणि । लोमानि । पांसुलम् । पांसुरम् । कर्म । कल्म । शुक्रः । शुक्लः[5] ॥

उपसर्गस्यायतौ ।८।२।१९।

किमिदमयतिग्रहणं रेफविशेषणम्—'अयतिपरस्य रेफस्य लो भवति स चेदुपसर्गस्य भवती'ति,—आहोस्विदुपसर्गविशेषणम्—'अयतिपरस्योपसर्गस्य यो रेफस्तस्य लो भवती'ति ॥ कश्चात्र विशेषः ? ॥ * ॥ रेफस्याऽयता-

---

प्र.] क्रियते तदा पूर्वत्राऽसिद्धमिति लत्वस्याऽसिद्धत्वात्पूर्वमृकारस्ततो लत्वमिति दोषाभावः । तथा चलीक्लृप्यत इति रीकोऽपि लत्वमिति दोषाऽभावः । तथा चलीक्लृप्यत इति रीकोपि लत्वसिद्धिः । **वालेति** । 'वल संवरणे' । वल्यत इति वालः । 'मूल प्रतिष्ठाया'मित्यस्मादिगुपधलक्षणः कः । 'लघिबंह्योर्नलोपश्चे'ति कुप्रत्यये लघुशब्दः । अङ्गेर्ऋतन्यञ्जीत्युलि प्रत्ययेऽङ्गुलिशब्दः। 'अमेर्गुरिश्च लोवे'ति नापेक्षितम् । कपिलकादिषु वा रस्य लः । **रोमाणीति** । रु शब्द इत्यस्मान्मनिनि-रोमन् । नामन्निति निपातनमनाश्रित्योदाहरणोपन्यासः । पांसुरस्मिन्नस्ति 'नगपांसुपाण्डुभ्यश्चे'ति रः । **कर्मेति** । कृञो मनिन् । **शुक्रः शुक्ल इति** । 'ऋज्रेन्द्राग्रे'ति निपातनादयुक्तः पाठः । [**क्लृपो रो लः**] ।

उपसर्ग । **किमिदमिति** । **'र'** इति वर्तते । तत्र किं प्राधान्याद्रेफस्यायति-

---

उ.] नेन । **वा रस्य ल इति** । पूर्ववाक्येन लस्य रत्वं वोक्तम्, अनेन रस्य लो वेत्यर्थः । 'कपिलकादि'ष्विति विषयसप्तमी । वार्तिकेऽपि 'सिद्धये रस्य लो वे'ति शेषो द्रष्टव्यः ।

निपातनमनाश्रित्येति । तत्र रोमन्लोमन्निति द्वयोः पाठादित्यर्थः । **ऋज्रेन्द्राग्रेति** । तत्र हि शुक्रशुक्लौ द्वावपि पठितौ । **अयुक्त इति** । वस्तुत उणादिसूत्र एवाऽयुक्तः पाठ इति बोध्यम् । तान्यपाणिनीयानीति बोध्यम् । [**क्लृपोरोलः**] ॥

विति चेत्परेरुपसङ्ख्यानम् ॥ * ॥ रेफस्याऽयताविति चेत्परेरुपसङ्ख्यानं कर्तव्यम् । पल्ययते॥ वचनाद्भविष्यति ॥ अस्ति वचने प्रयोजनम् ॥ किम् ? ॥ प्लायते । पलायते ॥ अस्तु तर्हि उपसर्गविशेषणम् ॥ * ॥ उपसर्गस्येति चेदेकादेशेऽप्रसिद्धिः ॥ * ॥ उपसर्गस्येति चेदेकादेशेऽप्रसिद्धिर्भवति । प्लायते पलायते । एकादेशे कृते व्यपवर्गाभावादयताविति लत्वं न प्राप्नोति ॥ अन्तादिवद्भावेन व्यपवर्गः ॥ उभयत आश्रये नान्तादिवत् ॥ एवं तर्ह्येकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यपवर्गः ॥ प्रतिषिध्यतेऽत्र स्थानिवद्भावः 'पूर्वत्रासिद्धे न स्थानिव'दिति ॥ दोषा एवैते तस्याः परिभाषायाः—'तस्य दोषः संयोगादिलोपलत्वणत्वे'ष्विति ॥ अथवा पुनरस्तु रेफविशेषणम् ॥ ननु चोक्तं—'रेफस्यायताविति चेत्परेरुपसङ्ख्यान'मिति ॥ वचनाद्भविष्यति ॥ ननु चोक्तम्—'अस्ति वचने प्रयोजनं, किं, प्लायते पलायत'इति ॥ अत्राप्यकारेण व्यवहितत्वान्न प्राप्नोति ॥ एकादेशे कृते नास्ति व्यवधानम् ॥ एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव ॥ प्रतिषिध्यतेऽत्र स्थानिवद्भावः—'पूर्वत्रासिद्धे न स्थानिव'दिति ॥ दोषा एवैते तस्याः परिभाषायास्तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति ॥

प्र.]विशेषणमुत श्रुतस्योपसर्गस्येति प्रश्नः । **पल्ययत इति** । यकारेण व्यवधानाल्लत्वाऽप्राप्तिः । **वचनादिति** । सर्वत्र व्यवधानसद्भावायेन नाव्यवधानमिति न्यायात् । न च निर्दुरावकाश इति वक्तुं शक्यम्, एवं हि निर्दुरोरयताविति वक्तव्यं स्यात् । **प्लायत इति** । एकादेशस्य परं प्रत्यादिवत्त्वादयतिग्रहणेन ग्रहणाद्व्यवधानाऽभावं मन्यते । **अस्त्विति**। प्रतेरयतिपरस्य प्रयोगो नास्ति, इण एव तेन योग इत्याहुः । **दोषा इति** । ततोऽस्ति स्थानिवद्भाव इत्युभयथाऽप्यदोषः ।

उपसर्गस्य । सन्देहे बीजमाह—**तत्र किमिति** । कार्यित्वेन प्राधान्यम् । **सर्वत्रेति** । 'प्लायते'इत्यादावप्येकादेशस्य स्थानिवत्त्वेन व्यवधानसद्भावादिति भावः । **वक्तव्यं स्यादिति** । प्रत्यासत्त्याऽयत्यर्थाऽन्वयिनोरेव निर्दुरोर्ग्रहणेन निरायतीत्यादौ ण्यर्थविशेषणत्वेनाऽतिप्रसङ्ग इति केचित् । नन्वत्रपक्षे प्रतेरपि स्यात्, पक्षान्तरे तु सङ्घातेन व्यवधानान्न भविष्यतीत्यत आह—**प्रतेरिति** । 'प्रत्यय'इत्यादिप्रयोगास्तर्हि कथमत आह—**इण एवेति । उभयथापीति** । उपसर्गविशेषणत्वेन स्थानिवद्भावाद्व्यपवर्गेण प्लायत इत्यादौ लत्वसिद्धिः । रेफविशेषणत्वे स्थानिवत्त्वेन सर्वत्र व्यवधानायेन नाऽव्यवधानमिति न्यायेनेष्टसिद्धिरित्यर्थः [**उपसर्गस्यायतौ**] ॥

अचि विभाषा ।८।२।२१।

॥ * ॥ णावुपसङ्ख्यानम् ॥ * ॥ णावुपसङ्ख्यानं कर्तव्यम् ॥ * ॥ इहापि यथा स्यात्-निगार्यते निगाल्यते ॥ किं पुनः कारणं न सिध्यति ?॥ अचीत्युच्यते न चात्राऽजादिं पश्यामः ॥ प्रत्ययलक्षणेन ॥ "वर्णाश्रये नास्ति प्रत्ययलक्षणम्" ॥ एवं तर्हि स्थानिवद्भावाद्भविष्यति ॥ प्रतिषिध्यतेऽत्र स्थानिवद्भावः 'पूर्वत्रासिद्धे न स्थानिव'दिति ॥ अत उत्तरं पठति ॥*॥ गिरतेर्लत्वे णावुक्तम् ॥*॥ [गिरतेर्लत्वे णावुक्तम्] ॥ किमुक्तम् ? ॥ 'तस्य दोषः संयोगादिलोपलत्वणत्वेष्वि'ति ॥ [अचि विभाषा] ।

परेश्च घाऽङ्कयोः ।८।२।२२।

॥ * ॥ योगे च ॥ * ॥ योगे चेति वक्तव्यम् । इहापि यथा स्यात्—परियोगः पलियोगः । ॥*॥ सङि लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानि ॥*॥ 'सङी'ति प्रकृत्य लत्वसलोपसंयोगादिलोपकुत्वदीर्घत्वानि वक्तव्यानि ॥ किं प्रयोजनम् ? ॥ * ॥ प्रयोजनं—गिरौ गिरः पयो धावति द्विष्टरां दृषत्स्थानं काष्ठशक्स्थाता कुञ्चा धुर्यः [इति] ॥*॥ [प्रयोजनं गिरौ गिरः पयो धावति द्विष्टरां दृषत्स्थानं काष्ठशक्स्थाता कुञ्चा धुर्य इति] ॥ गिरौ गिर इत्यत्र

प्र.] अचिवि। णाविति। पदस्य लत्वविधानाल्लत्वस्यान्तरङ्गत्वाऽभावात्पूर्वत्रासिद्धमित्यसिद्धत्वाण्णिलोपे कृते लत्वाऽप्रसङ्गः। वर्णाश्रय इति। विशेष्यस्य प्रत्ययस्याऽसंनिधानाद्वर्णाश्रयं लत्वं न तु प्रत्ययाश्रयमिति भावः॥ [अचिविभाषा]

परेश्च। सङीति। सनः सकारादारभ्य आ महिङो ङकारेण प्रत्याहारः। गिराविति। गिरतेः क्विबन्तादौजसौ। वक्ष्यत्येतदिति। इदं विरुध्यते 'वक्ष्यत्ये-

---

उ.] अचि वि। ननु णिमात्राऽपेक्षत्वेनाऽन्तरङ्गत्वात्पूर्वं लत्वे पश्चाण्णिलोपे रूपसिद्धेः किमुपसङ्ख्यानेनेत्यत आह—पदस्येति। नन्वेमपि परत्वाल्लत्वं स्यादत आह—पूर्वत्रेति। नन्वस्याजादौ प्रत्यये विधानेन वर्णप्राधान्याऽभावात्कथं स निषेधोऽत आह—विशेष्यस्येति। यद्यपि 'धातोः स्वरूपग्रहणे' इति परिभाषया संनिहितप्रत्ययस्य विशेष्यतया तदादिविधेः सुलभत्वेन प्रत्ययलक्षणेनापीदं सिध्यति तथापि तस्याऽविहितकार्यानियामकत्वेन न विध्येकवाक्यतेत्याशयः। [अचि विभाषा]॥

परेश्च। सन इति। तेन धातुविहितसर्वप्रत्ययसङ्ग्रहः। भाष्ये—उक्तमेतदिति।

'अचि विभाषे'ति लत्वं प्राप्नोति—'सङी'ति वचनान्न भवति ॥ नैतदस्ति प्रयोजनम्। उक्तमेतत्—'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्ध'मिति॥

पयो धावतीत्यत्र 'धि चे'ति सलोपः प्राप्नोति—'सङीति' वचनान्न भवति ॥ एतदपि नास्ति प्रयोजनं वक्ष्यत्येतत्—'धिसकारे सिचो लोप'इति ॥

द्विष्टरामित्यत्र 'ह्रस्वादङ्गा'दिति सलोपः प्राप्नोति 'सङी'ति वचनान्न भवति ॥ एतदपि नास्ति प्रयोजनम्—अत्रापि सिच इत्येवाऽनुवर्तिष्यते ॥

दृषत्स्थानमित्यत्र 'झलो झली'ति सलोपः प्राप्नोति 'सङी'ति वचनान्न भवति ॥ एतदपि नास्ति प्रयोजनम्—अत्रापि 'सिच' इत्येवानुवर्तिष्यते ॥

काष्ठशक्स्थातेत्यत्र 'स्कोः संयोगाद्योरन्ते चे'ति ककारलोपः प्राप्नोति 'सङी'ति वचनान्न भवति ॥

एतदपि नास्ति प्रयोजनं—काष्ठशगेव नास्ति कुतो यः काष्ठशकि तिष्ठेत्?॥

प्र.] तच्चकाधीत्येव भवितव्य'मिति । तस्मादिदं वक्तव्यम्—एकपदाश्रयत्वादन्तरङ्गे रुत्वे कर्तव्ये पदद्वयनिबन्धनत्वाद्बहिरङ्गस्य सलोपस्याऽसिद्धत्वात्पूर्वत्रेति निर्दिष्टविषयाऽभावाद्रुत्वमेवाऽसिद्धत्वाऽभावात्प्रवर्तते । अल्विधित्वाच्च स्थानिवत्त्वाऽभावाद्रोर्लोपाऽभावः । **द्विष्टरामिति ।** द्वौ वारौ द्विः । सुच्प्रत्ययः । परिपूर्णत्वाद्वारद्वयस्य प्रकर्षप्रत्ययः । तदन्तात्किमेत्तिङव्ययेत्याम्प्रत्ययः । **दृषत्स्थानमिति ।** 'उदः स्थास्तम्भोः पूर्वस्ये'ति पूर्वसवर्णविधानात्सिचोऽन्यस्य सकारस्य 'झलो झली'ति लोपो न भवतीति ज्ञापकमाहुः। अन्यथा सलोपेनैवोत्थानमित्यादेः सिद्धत्वात्पूर्वसवर्णविधानमनर्थकं स्यात् । **काष्ठशगेवेति ।** दृशिग्रहणात्प्रयोगानुसरणाच्चकारान्तेभ्यो धातुभ्यः क्विबभावात् । पक्स्थातेत्यत्र तु पचेः कुत्वस्याऽसिद्ध-

उ.] मृजेर्वृद्धिरित्यत्र ।'धिसकारे सिचोलोप'इत्यस्य पूर्वपक्षस्थत्वादिदं समाधानमुपलक्षणमित्याह- **इदं विरुध्यत इति ।** भाष्ये तु वार्तिकरीत्या वार्तिकप्रत्याख्यानं । भाष्यमते तत्समाधिमाह—**अल्विधित्वादिति ।** वस्तुतस्त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषायाः कार्यकालपक्षेऽप्यप्रवृत्तेः 'खरवसानयो'रिति सूत्रभाष्ये वक्ष्यमाणतयेदमपि चिन्त्यम् । **सिचोऽन्यस्येति ।** 'धिचे'तिवद्ज्ञ सामान्यापेक्षं ज्ञापकं । तेन 'द्विष्टरा'मित्यादौ 'ह्रस्वादङ्गा'दिति सलोपो न । भाष्ये त्वनुवृत्तिफललाभात्सिच इत्येवानुवर्तिष्यते इत्युक्तं । ज्ञापकमुपपादयति—**अन्यथेति ।** वस्तुत इदं ज्ञापकं 'झलो झली'ति प्रकरणस्थसलोपस्तिङ्प्रत्यय एवेति वर्णनीयं । तेन 'पयो धावति' 'द्विष्टरा'मित्यत्रापि न दोष इति ध्येयम् । ननु लक्षणसद्भावात्कुतस्तदभावोऽत आह—**दृशिग्रहणादिति ।** 'क्विप्चे'त्यत्र पूर्वसूत्राद्दृशिग्रहणमनुवर्तत इति भावः । 'क्विप्

क्रुञ्चेत्यत्र चोः कुर्झलीति कुत्वं प्राप्नोतिः 'सङी'ति वचनान्न भवति ॥ एतदपि नास्ति प्रयोजनं, निपातनादेतत्सिद्धम् ॥ किं निपातनम् ? ॥ 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चा'मिति ॥

धुर्य इत्यत्र 'हलि चे'ति दीर्घत्वं प्राप्नोति 'सङी'ति वचनान्न भवति॥ एतदपि नास्ति प्रयोजनं 'न भकुर्छुरा'मिति प्रतिषेधो भविष्यति ॥

संयोगान्तस्य लोपः ॥८।२।२३॥

॥*॥ सयोगान्तस्य लोपे यणः प्रतिषेधः ॥*॥ **संयोगान्तस्य लोपे यणः प्रतिषेधो वक्तव्यः।** दध्यत्र मध्वत्रेति ॥*॥ संयोगादिलोपे च [काक्यर्थं वास्यर्थम्]॥*॥ **संयोगादिलोपे च यणः प्रतिषेधो वक्तव्यः ॥ किमर्थम् ?॥ 'काक्यर्थं वास्यर्थम्'** । ॥*॥ न वा झलो लोपात् ॥*॥ **न वा वक्तव्यम् ॥ किं कारणम् ? ॥ 'झलो लोपात्' ॥ झलो लोपः संयोगान्तलोपो वक्तव्यः** ॥*॥ बहिरङ्गलक्षणत्वाद्वा ॥*॥

प्र.] त्वाल्लोपाप्रसङ्गः । **कुतो यः काष्ठशकी**त्यनेन सति समासे निमित्तनिमित्तिनोः समानपदस्थत्वे लोपप्रसङ्गो न तु वाक्य इति दर्शयति । पदस्येत्यधिकारात्प्रत्यासत्तिन्यायाश्रयाच्चैकपदस्थयोर्निमित्तनिमित्तिनोर्ग्रहणम् । एवञ्च पयो धावतीत्यत्र सलोपाऽभावः । [**परेश्च घाङ्कयोः**]

संयोगान्तस्य लोपः । काक्यर्थमिति । 'तस्य दोषः संयोगादिलोपलत्वणत्वेष्वि'ति वचनात्स्थानिवद्भावादपि लोपः परिहर्त्तुं शक्यः। **न वेति ।** झलो झली-

---

उ.] चान्येभ्योऽपि दृश्यत' इति ब्रह्मभ्रूणेति सूत्रभाष्यस्थपाठमभिप्रेत्यं वेदं। नन्वसमासेऽपि लोपप्राप्तेः समासप्रदर्शमनुपयोगीत्यत आह-**कुतो य इति । प्रत्यासत्तीति ।** अन्तरङ्गत्वादिति भावः। अनेनैव न्यायेनाऽन्यत्रापि परिहार इत्याह-**एवञ्चेति ।** 'पयो धावन'मिति समासवारणार्थमुक्तमेव समाधानं मुख्यं। 'काष्ठशक्स्थाते'त्यतिरिक्तानां झलि परे संयोगादिलोपप्राप्तियोग्यानामनभिधानमिति भाष्याशयमन्ये। भाष्ये-**क्रुञ्चेति ।** नन्वत्रानुस्वारस्य परसवर्णे तस्याऽसिद्धत्वाञ्ञकाराभावेन कस्य कुत्वमिति चेन्न, औपदेशिकञोपधत्वात् । अतएव क्रुञ्च्यादित्यादौ ञश्रवणं, नोपधत्वे हि नलोपः स्यादिति भावः। न च ञकारोच्चारणसामर्थ्यादेव कुत्वाऽभावे निपातनपर्यन्तं धावनं व्यर्थं, क्रुङित्यादावपि कुत्वानापत्तेः। निपातनेन तु चयोगे कुत्वाऽभावबोधनान्न दोष इति दिक्। परेतु अनेकज्ञापकनिपातानाश्रयणापेक्षया 'सङी'त्येव लघु इति सङीतिकार्यमेव। प्रत्याख्यानंत्वेकदेशिन इत्याहुः।

संयोगान्तस्य । तस्य दोष इति । एवं च तदनाश्रयेणेदमिति भावः। ननु

अथ वा बहिरङ्गो यणादेशोऽन्तरङ्गो लोपः। 'असिद्धं बहिरङ्गमन्तरङ्गे'। ॥*॥ संयोगान्तलोपे सग्रहणम् ॥*॥ संयोगान्तलोपे सग्रहणं कर्तव्यम्। 'संयोगान्तलोपः सस्य चे'ति वक्तव्यम्। इहापि यथा स्यात्—श्रेयान् भूयान् ज्यायान् ॥ किं पुनः कारणं न सिध्यति ? ॥ परत्वाद्रुः प्राप्नोति ॥ असिद्धो रुस्तस्याऽसिद्धत्वाल्लोपो भविष्यति ॥ न सिध्यति ॥ किं कारणं ? ॥ ॥*॥ रुविधानस्याऽनवकाशत्वात् ॥*॥ अनवकाशो रुर्लोपं[1] बाधेत ॥ सावकाशो रुः ॥ कोऽवकाशः ? ॥ पयः शिरः ॥ ननु चात्रापि जश्त्वं प्राप्नोति, स यथैव रुर्जश्त्वं बाधते एवं लोपमपि बाधेत ॥ न बाधते ॥ किं कारणं ? ॥ येन नाऽप्राप्ते तस्य बाधनं भवति न चाऽप्राप्ते जश्त्वे रुरारभ्यते, लोपे पुनः प्राप्ते चाप्राप्ते च ॥*॥ [अथवा[2]] योगविभागात्सिद्धम्[3] ॥*॥ अथवा योगविभागः करिष्यते। एवं वक्ष्यामि—'संयोगान्तस्य लोपोऽरात्'। संयोगान्तस्य लोपो भवत्यरात् ॥ ततः 'सस्य'। सस्य च लोपो भवति संयोगान्तस्य ॥ किमर्थम्पुनरिदमुच्यते ? ॥ 'प्रतिषिद्धार्थं रुबाधनार्थं च' ॥

प्र.] त्यतः सिंहावलोकितन्यायेन झल्ग्रहणमिहाऽनुवर्तते। तत्षष्ठ्या विपरिणम्यत इति यणो लोपाऽभावः। 'स्कोः संयोगाद्यो'रित्यत्र तु पञ्चम्यन्तमेव संबध्यते, तेन झलः पूर्वयोः स्कोर्लोपविधानाद्यणः पूर्वयोर्लोपाऽभावः। **अन्तरङ्ग इति**। एकपदाश्रयत्वात्। **स यथैवेति**। यदा लक्षणनिरपेक्षं कार्याणां बाधकत्वमिति दर्शनं तदा विध्यन्तरैरनाक्रान्तो विषयो नास्तीत्यविशेषात्सर्वं कार्यं बाध्यमिति भावः। **येन नाप्राप्त इति**। यदा 'लक्षणं बाध्यत'इति दर्शनं तदा येन सर्वो-

---

उ.] झल्ग्रहणस्याऽप्रकृतत्वात्कथं झलो लोपोऽत आह-**झलोझलीति**। **विपरिणम्यते इति**। तच्च वाक्यभेदेन संबध्यते, तेनाऽझलोऽपि कस्यचिल्लोप इत्याहुः। **तेन झलः पूर्वयोरिति**। वस्तुतस्तु झल्ग्रहणस्य संयोगान्तलोपसूत्र एव संबन्धो न तु 'स्को'रित्यत्र, 'झलो लोपः संयोगान्तलोप'इति भाष्यस्वरसादित्याहुः। **एकपदाश्रयत्वादिति**। यद्यपि यण्विधौ न पदद्वयमुपात्तं तथापि एतल्लक्ष्ये पदद्वयाश्रयो यणिति भावः। अत्र 'बहिरङ्गलक्षणत्वा'दिति वार्तिकस्वारस्यात्, 'बहिरङ्गो यणादेश'इति भाष्याच्च यणादेशव्यतिरिक्तसंयोगान्तलोपप्राप्तिविषययणघटितप्रयोगाऽनभिधानं बोध्यम्। अन्यथाऽन्तरङ्गलक्षणत्वादन्तरङ्गो लोप इत्येव वदेत्। एवंच 'काव्य्''कलत्र्'इत्यादि चिन्त्यमेवेति दिक्। बाध्यसामान्यचिन्ताश्रयणे बीजमाह-**यदेति**। विशेषचिन्ताबीजमाह-**यदेति**। प्रतिषिद्धलोपं यत्तत्र प्रयोजनं

अथ वा यदेतद्रात्सस्येति सग्रहणं तत्पुरस्तादपकृक्ष्यते[1]—'संयोगान्तस्य लोपः'। ततः 'सस्य'। सस्य च संयोगान्तस्य लोपो भवति। ततः—'रात्।' रात्सस्यैव संयोगान्तस्य लोपो भवतीति[2]। अथ वा रात्सस्येत्यत्र 'संयोगान्तस्य लोप' इत्येतदनुवर्त्तिष्यते ॥ [संयोगान्तस्य लोपः]।

धि च ८।२।२५

॥*॥ धिसकारे[3] सिचो लोपः ॥*॥ **धिसकारे सिचो लोपो वक्तव्यः ॥ किं प्रयोजनम् ? ॥** ॥*॥ चकाद्धीति[3] प्रयोजनम् ॥*॥ **इह मा भूत् सलोपः—'चकाद्धि पलितं शिर' इति ॥ यदि तर्हि सिचो लोप इत्युच्यते** ॥*॥ आशाध्वं तु कथन्ते[3] स्यात् ॥*॥ [**'आशाध्वं' तु कथम् ?**] ॥ **आशाध्वमित्यत्र लोपो न प्राप्नोति** ॥*॥ जश्त्वं[3] सस्य भविष्यति ॥*॥ **जश्त्वमत्र सकारस्य भविष्यति** ॥*॥ सर्वत्रैव[3] प्रसिद्धं स्यात् ॥*॥ **सर्वत्रैव जश्त्वेन सिद्धं स्यात्। इहापि आयन्ध्वमारन्ध्वमिति, जश्त्वेनैव सिद्धम्** ॥*॥ श्रुतिश्चापि[3] न भिद्यते ॥*॥ **श्रुतिकृतश्चापि न कश्चिद्भेदो भवति** ॥*॥ लुङश्चापि[3] न मूर्द्धन्ये

प्र.] विषय आक्रान्तस्तदेव बाध्यते। न हि तदबाधित्वा रुत्वं विषयं लभते। यस्य तु क्वचित्प्राप्तिस्तदबाधेनाऽपि विषयलाभान्न तद्बाध्यते। **अरादिति।** रात्परस्य संयोगान्तस्य लोपो न भवति। ऊर्क्। अमार्ट्। **प्रतिषिद्धार्थं चेति।** 'अरा'-दिति प्रतिषेधस्य बाधनार्थम्। यथा—मातुः पितुरिति। 'श्रेया'नित्यादौ तु रुत्वबाधनार्थम्। नन्वानन्तर्यात्प्रतिषेधस्यैव बाधनार्थं सस्येत्येतत्स्यान्न तु रुत्वस्येत्याशङ्क्याह—**अथवेति। अथ वा रात्सस्येत्यत्रेति।** वाक्यभेदेन संबन्धः। 'रात्सस्यैव लोपो भवती'त्येकं वाक्यम्। 'संयोगान्तस्य लोप'इति द्वितीयम् ॥

धि च। धिसकार इति। स्थानिनो लोपं प्रति विषयत्वविवक्षया सकार इति सप्तमीनिर्देशः। **चकाद्धीति।** हे शिरः! पलितं सच्चकाद्धि शोभस्वेत्यर्थः। **जश्त्वमिति।** 'झलां जश्झशी'त्यनेन। **श्रुतिश्चापीति।** एकस्याऽनेकस्य वा व्यञ्जनपरस्य श्रुतौ विशेषो नावधार्यते। **लुङश्चापीति।** श्लोकवार्तिककारस्याऽ-

---

उ.] यस्येत्यर्थ इत्याह—**अरादिति।** [**संयोगान्तस्य लोपः**]॥

धि च। स्थानिन इति। धकारे परतो यः सकारविषयो लोपः स सिच एवेति भाष्यार्थ इति भावः। **हे शिर इति।** अनेनायुः प्रार्थ्यते। भाष्ये **आयंध्वमरंध्व**मिति सानुस्वारः पाठः। भाष्ये—**जश्त्वेनैव सिद्धमिति।** एवं च धि चेति सूत्रं न कार्यमिति भावः। ननु जश्त्वे दकारधकारौ, लोपे तु ध एवेति कथं श्रुतिभेदो न स्यादत आह—**एकस्येति।**

ग्रहणम् ॥ॐ॥ तत्रायमप्यर्थः—इणः षीध्वंलुङ्लिटां धोऽङ्गादित्यत्र लुङ्ग्रहणं न कर्तव्यं भवति ॥ इहापि अच्योढ्वमप्लोढ्वमिति षत्वे सिचो धस्य ष्टुत्वे च कृते जश्त्वेन सिद्धम् ॥ॐ॥ सेटि दुष्यति ॥ॐ॥ सेटि दोषो भवति । इदमेव रूपं स्यात्—अलविढ्वम्,—इदं न स्यात्—अलविध्वमिति । तस्मात्सिचो ग्रहणं कर्तव्यम् ॥ यदि तर्हि सिचो ग्रहणं क्रियते—॥ * ॥ घसिभस्योर्न सिध्येत्तु ॥ * ॥ घसिभस्योर्न सिध्यति—'सग्धिश्च मे सपीतिश्च मे', 'बब्धां ते हरी धाना' इत्यत्र न प्राप्नोति ॥ॐ॥ तस्मात्सिज्ग्रहणं न तत् ॥ॐ॥ तस्माद्धि चेत्यत्र सिचो ग्रहणं न कर्तव्यम् ॥ कथं 'चकाद्धि पलितं शिर' इति ? ॥ एवं तर्हि सिज्ग्रहणं कर्तव्यम् ॥ कथं सग्धिश्च मे सपीतिश्च मे बब्धां ते हरीधाना इति ? ॥ नैष दोषः । इह तावत् सग्धिरिति, नैतद्घसेरूपं ॥ किं तर्हि ? ॥ सघेरेतद्रूपम् ॥ 'बब्धां ते हरीधाना' इति; नैतद्भसेरूपं ॥ किं तर्हि ? ॥ बन्धेरेतद्रूपम् ॥ॐ॥ छान्दसो वर्णलोपो

प्र.] युक्तमिदं वचनम् । अकृढ्वमभृढ्वमित्यादौ 'ह्रस्वादङ्गादिति' सिज्लोपे सति मूर्द्धन्यस्याऽविधाने रूपं न सिध्येत् । सग्धिरिति । अदेः क्तिनि 'बहुलं छन्दसी'ति घस्लादेशः । 'घसिभसोर्हलि चे'त्युपधालोपः, तत्र 'झलो झली'ति सलोपो न न प्राप्नोति इष्यते च । बब्धामिति । भसेर्लोटि तामि श्लौ द्विर्वचने पूर्ववदुपधालोपः । सघेरिति । सघ हिंसायामित्यस्य स्वरभेदोऽपि नास्ति, क्तिन्याद्युदात्तत्वात्तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरविधानाच्च । अनेकार्थत्वाच्च धातूनां समानादने सघिर्वर्तत इत्यर्थभेदोऽपि नास्ति । बन्धेरिति । 'बन्ध बन्धने'इत्यस्य भसेरर्थे वर्तमानस्य लोटि तामि व्यत्ययेन शपो लुकि नलोपे वर्णव्यत्ययेन धकारस्य वकारे बब्धामिति भवति । क्वचिद्बधेरिति पाठः, सत्वयुक्तः, बधेः सन्विषय-

---

उ.] अनेकस्येति । 'एकस्थानकानेकस्ये'त्यर्थः । व्यञ्जनपरस्येति । पञ्चमीतत्पुरुषबहुव्रीह्योरतन्त्रेण निर्देशः । अकृढ्वमिति । एतदर्थं मूर्द्धन्ये लुङ्ग्रहणस्यावश्यकत्वं, पूर्वपक्षत्वात्तु भगवता सूक्ष्मेक्षिका न कृतेति भावः । तादृशानामनभिधानमिति तदाशयं कश्चित् । भाष्ये 'अच्योढ्'मिति च्युङ्प्लुङो रूपे । इदं न स्यादलविध्वमिति । 'विभाषेट' इत्यस्याऽप्राप्तेः, धिचेत्यस्याऽभावाच्च । तस्माल्लुङ्ग्रहणं धिचेति च कार्यमिति भावः । तत्पुरुषे इति । समाना ग्धिरिति समासेप्याद्युदात्तत्वमेवेत्यर्थः । ननु सघेर्हिंसार्थत्वात्समानादनरूपार्थोऽलाभोऽत आह—अनेकार्थत्वाच्चेति । सन्विषयत्वादिति । मान्बधेत्यनेन

वा यथेष्कर्त्तारमध्वरे' ॥ * ॥ अथ वा छान्दसो वर्णलोपो भविष्यति । 'यथेष्कर्त्तारमध्वरे' । तद्यथा—'तुभ्येदमग्ने' ॥ तुभ्यमिदमग्न इति प्राप्ते । 'आम्बानां चरुः' । नाम्बानां चरुरिति प्राप्ते । 'आव्याधिनी रुगणाः' । आव्याधिनीः सुगणा इति प्राप्ते । 'इष्कर्तारमध्वरस्य' । निष्कर्तारमिति प्राप्ते । 'शिवा उद्रस्य भेषजीः' । शिवा रुद्रस्य भेषजीरिति प्राप्ते ॥ तस्मात्सिज्ग्रहणं कर्तव्यम् ॥

न कर्तव्यम् । यदेतद्रात्सस्येति सकारग्रहणं तत्सिचो ग्रहणं विज्ञास्यते ॥ कथम् ? ॥ 'रात्सस्ये'त्युच्यते न चाऽन्यो रेफात्परः सकारोऽस्त्यन्यदतः सिचः ॥

ननु चायमस्ति 'मातुः' 'पितु'रिति । तस्मात्सिचो ग्रहणं कर्तव्यम् ॥ न कर्तव्यम् ॥ कस्मान्न भवति 'चकाद्धि पलितं शिर'इति ? ॥

इष्टमेवैतत्सङ्गृहीतं, 'चकाधी'त्येव भवितव्यम् ॥

* ॥ घिसकारे सिचो लोपश्चकाद्धीति प्रयोजनम् ।

आशाध्वं तु कथं ते स्याज्जश्त्वं सस्य भविष्यति ॥ १ ॥
सर्वत्रैवं प्रसिद्धं स्याच्छ्रुतिश्चापि न भिद्यते ।
लुङश्चापि न मूर्द्धन्ये ग्रहणं सेटि दुष्यति ॥ २ ॥
घसिभस्योर्न सिध्येत्तु तस्मात्सिज्ग्रहणं न तत् ।
छान्दसो वर्णलोपो वा यथेष्कर्तारमध्वरे ॥ ३ ॥ ❀ ॥

दादेर्धातोर्घः । ८।२।३२ ।

इह दोग्धा दोग्धुमिति घत्वस्याऽसिद्धत्वाड्ढत्वं प्राप्नोति ॥ नैष दोषः ।

प्र.] त्वादित्याहुः । छान्दस इति । घसिभस्योः सकारस्य लोपे वा रूपसिद्धिरित्यर्थः । 'इष्कर्तारमध्वरस्ये'त्येकदेशानुकरणादिष्कर्तारमध्वरशब्दात्सप्तमी । यदेतदिति । तदेव चोत्तरत्रानुवर्तत इति भावः । मातुरिति । उभयोः स्थाने भवत एकादेशस्यान्यतरतो व्यपदेशादुः स्थानिकत्वाद्रपरत्वे सति सकारस्य लोपः ।

दादेः । घत्वस्यासिद्धत्वादिति । 'पूर्वत्रासिद्ध'मित्यस्य प्रतियोगोपस्थाना-

---

उ.] नित्यं सन्निधानादिति भावः । अर्थान्तरे तत्र प्रयोगाऽभाव एवेति बोध्यम् । तत्र सिचो ग्रहणेऽपि प्रकृते किमायातमत आह—तदेव चेति । [घि च] ॥

उक्तमेतत्–'अपवादो वचनप्रामाण्या'दिति । अथ वैवं वक्ष्यामि–'होढो-ऽदादेः' । हो ढो भवत्यदादेः। ततो 'धातोर्घः' इति । 'दादे'रित्यनुवर्तते 'ने'ति निवृत्तम् ॥ [एवमपि 'घो'] दादे'रित्युच्यते तत्रेदं न सिध्यति–अधोक् ॥ क तर्हि स्यात्?॥ मा स्म धोक् ॥ नैष दोषः। 'धातो'रिति नैषा दादिसमानाधिकरणा षष्ठी 'दादेर्धातो'रिति ॥ का तर्हि ? ॥ अवयवयोगैषा षष्ठी–'धातोर्यो दादिरवयव' इति । सा चावश्यमवयवयोगा षष्ठी विज्ञेयोत्तरार्था ॥ किं प्रयोजनम् ? ॥ 'एकाचो बशो भष्झषन्तस्य स्ध्वो'रिति, इहापि यथा स्याद्गर्दभयतेरप्रत्ययो गर्धबिति ॥ यद्यवयवयोगा षष्ठी,–दोग्धा दोग्धुमित्यत्र न प्राप्नोति ॥ एषोऽपि व्यपदेशिवद्भावेन धातोर्दादिरवयवो भवति ॥

प्र.] देतत्सूत्रारम्भाच्च घत्वढत्वयोर्विकल्पप्रसङ्गः। **उक्तमिति** । न ह्युत्सर्गापवादयोर्विकल्पो युक्तः । द्रुहेश्च विकल्पविधिरनर्थकः स्यात् । **अदादेरिति** । असमर्थसमासो 'दादेर्न भवती'ति । 'धातोर्घ' इत्यत्र दादिग्रहणमनुवर्तते न तु नञ् । **एषोऽपीति** । प्रयोगभेदाद्भिन्नस्य धातोरयमवयव इति बुद्ध्या परिकल्पनात् ।

उ.] **दादेर्धा । विकल्पेति ।** एवं चाऽसिद्धवच्छास्त्रबाधो नेतिभावः । **नहीति** । श्रुत्या प्रकरणबाध एव युक्त इत्याशयः । न्यायसिद्धेऽर्थे लिङ्गमप्याह–**द्रुहेश्चेति** । असमर्थसमासे नञो दादिग्रहणेन संबन्धाऽभावात्तस्य केवलस्योत्तरत्रानुवृत्तिरपि सुलभेत्याह–**धातोर्घ इति** । निषेधार्थकः 'अ'शब्दस्तु अप्रामाणिक इति तात्पर्यम् । न चाऽत्र न्यासे द्रुहेर्ढत्वाऽनापत्तिः । 'वा द्रुहे'त्यनेन विकल्पद्वारा ढानुवृत्त्या तस्यापि विधानादितिभावः । नन्वेवमप्युत्तरत्र दादिग्रहणानुवृत्तिर्व्यर्था, असिद्धत्वेन दादिभिन्नविषये ढत्वस्यैव प्रवृत्त्या व्यावर्त्याऽभावादिति चेन्न; 'दादे'रित्यस्य उपदेशवद्दादिलक्षकत्वात् । तेन दामलिट् पादलिडित्यादौ वक्ष्यमाणवैयधिकरण्यान्वयेऽपि न घत्वं । नच ढत्वमपि न स्याददादेरिति निषेधादिति वाच्यम्, अर्थाधिकारानुरोधेनोपदेशवद्दादेरेव तेन निषेधादिति भावः । उक्तमर्थमजानानः शङ्कते भाष्ये–**एवमपीति** । 'एकाच' इत्युत्तरसूत्रार्थं प्रसङ्गान्निर्णेतुम् 'अधो'गित्यस्य दादिपदलक्षणाऽसाधारणफलत्वाऽभावं च दर्शयितुं तदुपेक्ष्य समाध्यन्तरमाह–भाष्ये–**नैष दोष इति । सा चावश्यमिति । उत्तरार्थेति च** । अनेनात्र सूत्रे तस्याऽनावश्यकता ध्वनिता । तद्बीजन्तु दादिपदलक्षणया निर्वाह इति । अन्यथा 'अधो'गित्यादौ घत्वप्रवृत्तिरूपप्रयोजनान्तरसिद्धयेऽत्रैव सूत्रे वैयधिकरण्यान्वयस्यावश्यकत्वेनोत्तरार्थत्वेनावश्यकत्वप्रतिपादनस्य निर्बीजतापत्तिरिति दिक् । **प्रयोगभेदादिति** । यथा 'शिलापुत्रकस्य शरीरं' 'राहोः शिर'इत्यादौ । [**दादेर्धातोर्घः**]

॥ * ॥ हृग्रहो[र्भ]श्छन्दसि हस्य ॥ * ॥ हृग्रहोश्छन्दसि हस्य भत्वं वक्तव्यम् । गर्दभेन संभरति । मरुदस्य गृभ्णाति । सामिधेन्यो जभ्रिरे । उद्ग्राभञ्च निग्राभञ्च ब्रह्म देवा अवीवृधन् ॥ [दादेर्धातोर्घः] ।

दधस्तथोश्च ।८।२।३८ ।

किमर्थश्चकारः ?॥ [॥*॥ चकारस्स्ध्वोरनुकर्षणार्थः ॥*॥] ॥ स्ध्वोरित्येतदनुकृष्यते ॥ नैतदस्ति प्रयोजनं–सिद्धं स्ध्वोः पूर्वेणैव ॥ न सिध्यति ॥ किं कारणम् ?॥ अबशादित्वात् ॥ ननु च जश्त्वे कृते बशादिः ॥ असिद्धं जश्त्वं, तस्याऽसिद्धत्वान्न बशादिः ॥ एवं तर्हि सिद्धकाण्डे पठितम्'भ्यासजश्त्वचर्त्वमेत्त्वतुको'रिति ॥ एत्त्वतुकोर्ग्रहणं न करिष्यते। 'अभ्यासजश्त्वचर्त्वं सिद्ध'मित्येव ॥ एवमप्यझषन्तत्वान्न प्राप्नोति ॥ लोपे कृते झषन्तः ॥ स्थानिवद्भावान्न झषन्तः। अत उत्तरं पठति—॥*॥ दधस्तथोरनुकर्षणानर्थक्यं स्थानिवत्प्रतिषेधात् ॥ * ॥ दधस्तथोरनुकर्षणमनर्थकम् ॥ किं कारणम् ?॥ 'स्थानिवत्प्रतिषेधात्' । प्रतिषिध्यतेऽत्र स्थानिवद्भावः 'पूर्वत्रासिद्धे न स्थानिव'दिति ॥ स चावश्यं प्रतिषेध आश्रयितव्यः ॥ * ॥ इतरथा ह्यलोपे प्रतिषेधः ॥*॥ यो हि मन्यतेऽनुकर्षणसामर्थ्यान्मेऽत्र भवति, अलोपे तेन प्रतिषेधो वक्तव्यः स्यात्—दधाति दधासि ॥ तथोश्चापि ग्रहणं शक्यमकर्तुम् ॥ कथम् ?॥ 'झलि झषन्तस्ये'त्युच्यते तथोश्चाऽयं झलि झषन्तो भवति नान्यत्र॥

अथाप्येतन्नास्ति 'पूर्वत्रासिद्धे न स्थानिव'दिति, एवमपि नैवाऽर्थोऽनुकर्षणार्थेन चकारेण, नापि तथोर्ग्रहणेन। आनन्तर्यमिहाश्रीयते–'झलि झषन्तस्ये'ति । क्व चिच्च सन्निपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यं,

---

प्र.] दधस्त । एत्त्वतुकोर्ग्रहणमिति । फलिभजिग्रहणं सामान्येन सिद्धत्वस्य ज्ञापकमिति भावः । झलि झषन्तस्येति । झषन्तग्रहणाऽनुवृत्तौ सत्यां झषन्त-

---

उ.] दधस्तथोश्च । 'दध'इति कृतद्वित्वस्य धाञो ग्रहणं । फलिभजीति । यद्यभ्यासजश्त्वादेरसिद्धत्वं स्यात् फलिभजिग्रहणं न कुर्यात्, अनादेशादित्वात्पूर्वेणैव सिद्धेः। तत्कृतं तयोः सिद्धत्वं सर्वकार्यविषयं ज्ञापयति, नत्वेत्त्वविषयमेवेत्यर्थः । भाष्ये–तथोश्चापीति । चेन स्ध्वोश्चेत्यर्थः । 'झली'ति मण्डूकप्लुत्या संबध्यते, मसादिव्यावृत्यर्थं, झषन्तस्येत्यनुवृत्तिरपि दधातीत्येतद्व्यावृत्त्यर्था । झषन्तत्वान्यथानुपपत्त्येति । सर्वत्र स्थानिवद्भा-

क चिन्नैव सन्निपातकृतं नापि शास्त्रकृतम् । लोपे सन्निपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यम् , अलोपे नैव सन्निपातकृतं नापि शास्त्रकृतम् । यत्र कुतश्चिदेवानन्तर्यं तदाश्रयिष्यामः ॥ [दधस्तथोश्च] ॥

झषस्तथोर्धोऽधः ।८।२।४०।

'अध' इति किमर्थम् ? ॥ धत्तः । धत्थः ॥ ॥ ❀ ॥ 'अध' इति शक्यमवक्तुम्[1] ॥ ❀ ॥ कस्मान्न भवति–धत्तः धत्थ इति ? ॥

॥❀॥ जश्त्वे योग[2]विभागः ॥❀॥ [जश्त्वे[3] योगविभागः] करिष्यते । इदमस्ति 'दधस्तथोश्चे'ति । ततो वक्ष्यामि–'झलां जशः'[4] । झलां जशो भवन्ति दधस्तथोः । ततः 'अन्ते' । अन्ते च झलां जशो भवन्तीति । तत्र जश्त्वे कृतेऽझषन्तत्वान्न भविष्यति ॥

॥ ❀ ॥ इति श्रीमद्भगवत्पतञ्जलिमुनिविरचिते व्याकरणमहाभाष्ये अष्टमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकम् ॥ ❀ ॥

रदाभ्यां निष्ठातो नः पूर्वस्य च दः ।८।२।४२।

रदाभ्यामिति किमर्थम् ? ॥ चरितं मुदितम् ॥ ननु च 'रदाभ्या'मित्युच्यमानेऽप्यत्र प्राप्नोति । अत्रापि हि[5] रेफदकाराभ्यां परा निष्ठा ॥ न रेफ-

---

प्र.] त्वाऽन्यथानुपपत्त्या श्रुतिकृतमानन्तर्यमाश्रीयते । स्थानिवत्त्वकृतं तु व्यवधानं वचनादप्रतिबन्धकमित्यर्थः[6] । [दधस्तथोश्च] ।

झषस्त । तत्र जश्त्व इति । 'पूर्वत्राऽसिद्ध'मिति भष्भावे जश्त्वस्याऽसिद्धत्वात् झषन्तत्वं । धत्वे तु परस्मिन्सिद्धं जश्त्वमिति धत्वा[7]ऽभावः ॥

इति श्रीकैयटकृते महाभाष्यप्रदीपेऽष्टमस्य द्वितीये प्रथममाह्निकम् ॥

रदा । विचारस्य सद्भावादत्र प्रत्युदाहरणोपन्यासः । **अत्र प्राप्नोतीति ।** निष्टेत्यसमस्तं लुप्तषष्ठीकं पदं, तेन रदाभ्यां परा या निष्ठा तस्यास्तकारस्य नत्व-

---

उ.] वादिति भावः। **श्रुतिकृतमिति।** तेन 'दधासी'त्यादौ न। एवं 'तथोश्चे'ति प्रत्याख्यातम् ।

झषस्त । यदि दधस्तथोर्जश्त्वं विधीयते तदाऽझषन्तत्वात् 'धत्त'इत्यादौ भष्भावो न स्यादत आह–**पूर्वत्रेति । इतिभाष्यप्रदीपोद्योतेऽष्टमस्य द्वितीये प्रथममाह्निकम् ।**

रदाभ्यां निष्ठा । भाष्ये प्रत्युदाहरणोपन्यासोऽनर्थक इत्यत आह–**विचारस्येति ।** ननु समासे गुणभूतनिष्ठापदस्य विशेषणसंबन्धाऽयोगेना'ऽत्र प्राप्नोती'त्यसङ्गतमत आह–

-दकाराभ्यां निष्ठा विशेष्यते ॥ किं तर्हि ? ॥ तकारो विशेष्यते–'रेफदकारा-भ्यामुत्तरस्य तकारस्य नो भवति स चेन्निष्ठाया' इति ॥

अथ [निष्ठादेशे] पूर्वग्रहणं किमर्थम् ? ॥*॥ निष्ठादेशे पूर्वग्रहणं परस्यादेशप्रतिषेधार्थम् ॥*॥ निष्ठादेशे पूर्वग्रहणं क्रियते ॥ [किं प्रयोजनं ? ॥ परस्यादेशप्रतिषेधार्थम्'] । परस्यादेशो मा भूदिति । भिन्नवद्भ्याम् । भिन्नवद्भिः । छिन्नवद्भ्याम् । छिन्नवद्भिः ॥*॥ पञ्चमीनिर्दिष्टाद्धि परस्य ॥*॥ 'पञ्चमीनिर्दिष्टाद्धि परस्ये'ति परस्य प्राप्नोति ॥*॥ वृद्धिनिमित्तात्प्रतिषेधः ॥*॥ वृद्धिनिमित्तात्प्रतिषेधो वक्तव्यः ॥ किं प्रयोजनम् ?॥ ॥*॥ प्रयोजनं कार्तिक्षैतिफौल्लयः॥*॥ [प्रयोजनं कार्तिक्षैतिफौल्लयः]। कार्तिरिति वृद्धौ कृतायां 'रदा-

प्र.] मिति सूत्रार्थाश्रयणात् । न रेफेति । 'निष्ठात' इति समासनिर्देशः । तत्र निष्ठायां उपसर्जनत्वाद्विशेषणेनाऽसम्बन्धः । प्रधानस्य तु तकारस्य सम्बन्धः ।

अथेति । 'भिन्नवद्भ्या'मित्यादौ निष्ठादकारस्य बहिरङ्गत्वाल्लाक्षणिकत्वाच्च नत्वाऽभावात्पूर्वस्यैव भविष्यतीति प्रश्नः । निष्ठादेश इति । असति पूर्वग्रहणे पाठक्रमे निष्ठा प्रत्यासन्नेति तद्दकारस्यैव नत्वेन भाव्यं नाऽन्यस्येति बहिरङ्गलाक्षणिकत्वयोरहेतुत्वम् । किञ्च–पदस्येत्यधिकारात्पदावयवस्य दस्य नत्वविधानाद्बहिरङ्गत्वं नास्ति । केवलस्य च वर्णस्यानुपदेशाद्वर्णग्रहणेषु लक्षणप्रतिपदोक्तपरिभाषाया अव्यापारः । पञ्चमीनिर्दिष्टादिति । यद्यपि प्रत्यासत्तिर्नापेक्ष्यते तथापि रदाभ्यां परस्य दस्य नत्वेन भाव्यमिति सामर्थ्यान्निष्ठादकारस्यैव नत्वप्रसङ्गः ।

क्षैतिरिति । वृद्धिरेवाऽत्र नत्वस्य निमित्तं, 'क्षियो दीर्घा'दिति वचनात् ।

उ.] निष्ठेतीति । ननु पूर्वग्रहणाऽभावे रदाभ्यां निष्ठातस्य नो दस्य च प्रत्यासत्त्या निष्ठाया एवेत्यर्थेन रदाभ्यां परस्य दस्य निष्ठासंबन्धिन एव संभवेन च भिन्नवद्भ्यामित्यादौ दोषोऽत आह–भिन्नवद्भ्यामित्यादाविति । अहेतुत्वमिति । वाक्यार्थबोधकालिकप्रत्यासत्तिन्यायेन तयोर्बाध इति भावः । वस्तुतस्तयोः प्रसक्तिरेव नास्तीत्याह–किंचेति । त्रिपाद्यां बहिरङ्गपरिभाषाऽभावाच्चेत्यपि बोध्यं । केवलस्यचेति । साक्षादुच्चारणेन बोधितं हि प्रतिपदोक्तम् , अनुमेयं च लाक्षणिकं, नं च दकारादिस्तथा, समुदायघटकत्वेनैवोच्चारणेन तस्य सर्वथानुमेयत्वादिति भावः । इदमोत्सूत्रस्थभाष्यविरुद्धं । नापेक्ष्यते इति । लक्ष्यानुरोधादिति भावः । तत्पुरुषे क्षैतेः सङ्ग्रहं कार्त्तेरसङ्ग्रहं च दर्शयति–वृद्धिरेवेत्यादिना । बहुव्रीहिपक्षे क्षैतौ वृद्धिरेव ऐकारो नतु वृद्धिनि-

भ्या'मिति नत्वं प्राप्नोति । क्षैतिरिति वृद्धौ कृतायां 'क्षियो दीर्घा'दिति नत्वं प्राप्नोति । फौल्लिरिति वृद्धौ कृतायामुदुपधत्वसन्नियोगेन लत्वमुच्यमानं न प्राप्नोति ॥ अथोच्यमानेऽपि प्रतिषेधे 'वृद्धिनिमित्ता'दिति कथमिदं विज्ञायते,—वृद्धिरेव निमित्तं वृद्धिनिमित्तं, वृद्धिनिमित्तादिति, आहो स्विद्वृद्धिर्निमित्तमस्य सोऽयं वृद्धिनिमित्तः, वृद्धिनिमित्तादिति ? ॥ किं चातः ? ॥ यदि विज्ञायते वृद्धिरेव निमित्तं वृद्धिनिमित्तं वृद्धिनिमित्तादिति,—क्षैतिः सङ्गृहीतः कार्त्तिरसङ्गृहीतः । अथ विज्ञायते वृद्धिर्निमित्तमस्य सोऽयं वृद्धिनिमित्तः, वृद्धिनिमित्तादिति,—कार्तिः सङ्गृहीतः क्षैतिरसङ्गृहीतः । उभयथा च फौल्लिरसङ्गृहीतः ॥ यथेच्छसि तथाऽस्तु ॥ अस्तु तावद्वृद्धिरेव निमित्तं वृद्धिनिमित्तं, वृद्धिनिमित्तादिति ॥ ननु चोक्तं—'क्षैतिः सङ्गृहीतः कार्तिरसङ्गृहीत'इति ॥ कार्तिश्च संगृहीतः ॥ कथम् ? ॥ वृद्धिर्भवति गुणो भवतीति[2] रेफशिरा गुणवृद्धिसंज्ञ[3]कोऽभिनिर्वर्त्तते । अथ वा पुनरस्तु—वृद्धिनिमित्तमस्य सोऽयं वृद्धिनिमित्तः, वृद्धिनिमित्तादिति ॥ ननु चोक्तं—'कार्तिः सङ्गृहीतः क्षैतिरसङ्गृहीतः'इति ॥ क्षैतिश्च सङ्गृहीतः ॥ कथं ? ॥ यत्तद्वृद्धि-

---

प्र.] **कार्तिरिति ।** नत्वस्याऽऽकारो न निमित्तं, किं तु रेफ इति प्रतिषेधो न प्राप्नोति । **उभयथेति ।** न हि वृद्धिर्लत्वस्य निमित्तं नापि वृद्धिहेतुकात्परो निष्ठातकारः । न चाऽत्र लत्वनिषेध इष्यते । **रेफशिरा इति ।** ननु चाऽक्तरूपस्याऽक्तपरिमाणस्य च वृद्धिसंज्ञाविधानात्कथमारित्यस्य वृद्धिसंज्ञा । अथ पूर्वान्तत्वाद्रेफस्य वृद्धिग्रहणेन ग्रहणमित्युच्यते तदा किमनेनोक्तेन—'रेफशिरा गुणवृद्धिसंज्ञक'इति । यद्यपि प्रसज्यमानोऽण् रपरो न भवेदपि तूत्तरकाले रपरत्वं विधीयते तथापि तद्भक्तत्वात्कार्तिः सङ्गृहीत एव । एवं तर्हि स्थितपक्षप्रदर्शनात्पूर्वोक्तदोषाऽभावः ।

उ.] मित्तक इति तदसङ्ग्रहः । **नहीति ।** उदुपधत्वमेव हि तस्य निमित्तं, न वृद्धिः । बहुव्रीहावप्यसङ्ग्रहं दर्शयति—**नापीति ।** यथा कार्तिरित्यत्र वृद्धिनिमित्ताद्रेफात्परो निष्ठातकारो नैवमिहेत्यर्थः । **नचात्रेति ।** एवं च फौल्लिरनेन निषेधेनाऽसङ्गृहीत इत्यर्थः । **अक्तरूपस्य**—आ इत्येवं रूपस्य । **अक्तपरिमाणस्य**—द्विमात्रस्य । नत्वर्द्धतृतीयमात्रस्य । एवं च रेफशिरस्कस्य वृद्धिसंज्ञकत्वाऽभावात्कथं कार्तौ प्रतिषेधप्राप्तिरिति भावः । **अथेति ।** एवं च वृद्धिग्रहणेन ग्रहणाद्वृद्धिसंज्ञकत्वव्यवहार इति भावः । **किमनेनोक्तेनेत्युक्तं,** तदुक्तेर्वैफल्यं स्पष्टयति—**यद्यपीत्यादिना । एवं तर्हीति ।** प्रसज्यमानोऽण्रपर इत्यस्यैव तत्र सिद्धान्ते

शास्त्रं तस्मिन्वृद्धिशब्दो वर्तते ॥ स तर्हि प्रतिषेधो वक्तव्यः ? ॥ ॥*॥ न वा बहिरङ्गलक्षणत्वात् ॥*॥ न वा वक्तव्यः[1] ॥ किं कारणम् ? ॥ 'बहिरङ्गलक्षणत्वात्' । बहिरङ्गा वृद्धिरन्तरङ्गं त्वम् । 'असिद्धं बहिरङ्गमन्तरङ्गे' ॥ एवं च कृत्वा त्वमपि सिद्धं भवति फौल्लिरिति ॥ [रदाभ्यां निष्ठातः]

ल्वादिभ्यः ।८।२।४४।

॥ * ॥ ॠकारल्वादिभ्यः क्तिन्निष्ठावत्[2] ॥*॥ ॠकारल्वादिभ्यः क्तिन्निष्ठावद्भवतीति वक्तव्यम् । कीर्णिः गीर्णिः लूनिः धूनिः[3] ॥ ॥ * ॥ दुग्वोर्दीर्घश्च ॥ * ॥ दुग्वोर्दीर्घश्चेति वक्तव्यम् । आदूनः विगूनः । ॥ * ॥ पूञो विनाशे ॥ * ॥ पूञो विनाश इति वक्तव्यम् । पूना यवाः ॥ विनाश इति किमर्थं ? ॥ पूतं धान्यम् ॥ * ॥ सिनोतेर्ग्रासकर्मकर्तृकस्य ॥ * ॥ सिनोतेर्ग्रासकर्मकर्तृकस्येति वक्तव्यम् । सिनो ग्रासः स्वयमेव[4] ॥ ग्रासकर्मकर्तृकस्येति किमर्थं ? ॥ सिता पाशेन सूकरी ॥ [ल्वादिभ्यः] ॥

क्षियो दीर्घात् ।८।२।४६।

प्र.] यत्तदिति । एवं प्रतिषेधस्य व्यापकत्वाश्रयणादनुग्रहो भवतीति गौणः शब्दार्थ आश्रीयते । फौल्लिसाधारणं परिहारं ब्रवीति—न वेति । [रदाभ्यां निष्ठातो नः] ॥

ल्वादिभ्यः । कीर्णिरिति । कॄगॄल्पूञां रूपाणि । दुग्वोरिति । दु दु गतावित्यस्य दोर्ग्रहणं न तु टुदु उपताप इत्यस्य, सानुबन्धकत्वात् । पूना इति । अनेकार्थत्वाद्धातूनां पूङ् विनाशार्थः । सिनो ग्रास इति । बन्धनक्रियायामानुकूल्यात्तत्कर्माऽपि ग्रासः कर्तृत्वेन विवक्ष्यते । [ल्वादिभ्यः] ।

उ.] स्थितपक्षत्वात्तदनुसारेण 'रेफशिरा' इत्याद्युक्तमिति भावः । यद्यपि रेफो निमित्तं, न वृद्धिविशिष्टा, तथापि अवयवद्वारा सैव निमित्तमिति बोध्यम् । ननु गौणमुख्यन्यायेन कथमस्य ग्रहणमत आह—एवं प्रतिषेधस्येति । [रदाभ्यां निष्ठातो नः]

ल्वादिभ्यः । ॠकारेति दीर्घग्रहणं । नत्वस्यैवायमतिदेशो न कार्यान्तरस्य । तेन पूनिरित्यादौ 'पूञश्छन्दसी'तीड्विकल्पो न । न तु टुदु इति । दूने तदर्थस्यैव प्रतीतेरिदं चिन्त्यं । 'पूञ्विनाशार्थ' इति पाठः । पूङिति त्वपपाठः । तत्र पाठे 'चोःकु'रिति कुत्वं वा । बन्धनक्रियायामिति । यदा वध्यमानः पिण्डीक्रियमाणो ग्रासो दध्यादिव्यञ्जनवशात्तत्रानुकूल्यं प्रतिपद्यते तदा कर्मणः कर्तृत्वेऽयं प्रयोगः । प्रत्युदाहरणे—पाशेनेति करणे तृतीया ॥

दीर्घादिति किमर्थम् ? ॥ अक्षितमसि मा मे क्षेष्ठाः। दीर्घादिति शक्य-मकर्त्तुम्[1] ॥ कस्मान्न भवति—अक्षितमसि मा मे क्षेष्ठा इति ? ॥ निर्देशा-शादेवेदमभिव्यक्तं[2] दीर्घस्य ग्रहणमिति। यदि ह्रस्वस्य ग्रहणं स्यात् 'क्षे'रित्येव[3] ब्रूयात् ॥ नाऽत्र निर्देशः प्रमाणं शक्यं कर्तुम्[4]। यथैवाऽत्राऽप्राप्ता[5] विभक्ति-रेवमियङादेशोऽपि ॥ नाऽत्राऽप्राप्ता विभक्तिः, सिद्धाऽत्र विभक्तिः 'प्राति-पदिका'दिति ॥ कथं प्रातिपदिकसंज्ञा ? ॥ 'अर्थवत्प्रातिपदिक'मिति ॥

ननु चाऽधातुरिति प्रतिषेधः प्राप्नोति ॥ नैष धातुर्धातोरेषोऽनुकरणम्[6] ॥ यद्यनुकरणमियङादेशो न प्राप्नोति ॥ 'प्रकृतिवदनुकरणं भवती'तीयङादेशो भविष्यति ॥ यदि 'प्रकृतिवदनुकरणं भवती'त्युच्यते स्वाद्युत्पत्तिर्न प्राप्नोति॥ एवं तर्ह्यातिदेशिकानां स्वाश्रयाण्यपि न निवर्तन्ते[7] इति। अथाप्येतन्नास्ति-

---

प्र.] **क्षियो।** **अक्षितमिति।** क्षयः क्षितमिति भावे क्तः। भावश्च ण्यदर्थ इति दीर्घाऽभावान्नत्वाऽभावः। **क्षेरिति।** इयङादेशात्परत्वाद्धेर्ङितीति गुणस्य न्याय्यत्वात्। **नात्र निर्देश इति।** न हीयङादेशाद्दीर्घस्य ग्रहणं प्रत्येतुं शक्यते, इयङ्निमित्तस्य विभक्तेर्दुर्लभत्वात्ततोऽप्राप्ता यथा विभक्तिः सौत्रत्वान्निर्देशस्य भव-त्येवं ह्रस्वस्यापीयङादेशः स्यादिति दीर्घग्रहणमर्थवत्। **नैष धातुरिति।** क्रियावा-चिनो धातुसंज्ञाविधानसामर्थ्यान्निर्देशे चाऽक्रियावाचित्वात्। **प्रकृतिवदिति।** अर्थभेदादनुकार्यानुकरणयोर्भेदाद्वाचनिकः कार्याऽतिदेशः। **स्वाद्युत्पत्तिर्नेति।** अधातुरिति प्रकृतेः प्रातिपदिकसंज्ञानिषेधादनुकरणस्यापि तत्प्रसङ्गात्। **आति-देशिकानामिति।** अतिदेशः प्रयोजनं येषां तान्यातिदेशिकानि। अतिदेशभा-ञ्ज्युच्यन्ते। ननु यदतिदेशकार्येणाऽविरुद्धं स्वाश्रयं कार्यं तन्मा निवृतत्, यत्तु

उ.] **क्षियो दी।** **क्षयः क्षितमिति।** यदा त्वकर्मकत्वात्कर्त्तरि क्तः आक्रोशदैन्ययोर्वा क्षियो वृत्तिस्तदा दीर्घसद्भावादस्योदाहरणं बोध्यम्। ननु विभक्तेर्दुर्लभत्वे तदर्थमेव यत्नः कार्यः, इयङादेशस्तु दीर्घनिर्देशे प्रमाणमेवेत्यत्राह—**ततोऽप्राप्तेति।** एवं च सन्देह-निवृत्तये 'दीर्घा'दितीति भावः। ननु 'क्षी'त्यस्य गणे पाठात्कुतो न धातुत्वमत आह—**क्रियेति।** निर्देशे स्वरूपपरत्वादिति भावः। **निषेधादिति।** पर्युदासपक्षेऽपि आनुमानिको निषेधोऽस्त्येव शास्त्रतात्पर्यविषयभूत इति भावः। **अतिदेशः प्रयोजनमिति।** येषामतिदेश-निमित्तकार्यमिष्यते तानीत्यर्थः। तदाह—**अतिदेशभाञ्जीति।** **यत्तु विरुद्धमिति।** प्राति-

'आतिदेशिकानां स्वाश्रयाण्यपि न निवर्तन्ते' इत्येवमपि न दोषः। अवश्यमत्र सर्वतो नैर्देशिकी विभक्तिर्वक्तव्या। तद्यथा—'नेर्विशः' 'परिव्यवेभ्यः क्रियः' 'विपराभ्यां जे'रिति॥ अथाप्येतन्नास्ति 'प्रकृतिवदनुकरणं भवती'त्येवमपि न दोषः। धातोरजादौ यद्रूपं तदनुक्रियते॥[क्षियो दीर्घात्]॥

प्र.] विरुद्धं तत्कथं न निवर्त्तेत?। एवं तर्ह्यधातुरिति पर्युदासो न प्रसज्यप्रतिषेध इत्यातिदेशिकस्य कार्यस्याऽभावाद्धातोरन्यत्वात् स्वाश्रया प्रातिपदिकसंज्ञा प्रवर्तते, प्रसज्यप्रतिषेधे तु निषेध एवातिदेशिकः स्यात्। इयङादेशस्त्वातिदेशिको धातोर्विधीयमानत्वाद्भवति, स च दीर्घस्यैवेति दीर्घग्रहणमनर्थकम्। **अथापीति**। यद्यप्यधातुरिति प्रसज्यप्रतिषेध इति भावः। **अवश्यमिति**। यस्मात्प्रातिपदिकसंज्ञानिषेधादप्राप्ता यस्माच्चोत्पन्ना लुप्ता तस्मात्सर्वस्मादित्यर्थः। **नेर्विश इति**। 'ने'रिति लुप्तविभक्तिकाव्ययानुकरणान्निर्देशाऽर्था विभक्तिः, विश इति निर्देशादेवाऽप्राप्ता विभक्तिः। इयङ् तु दीर्घानुकरणस्यैवेति दीर्घग्रहणमनर्थकम्।

अथापीति। इहानुकर्ता कदाचित्सामान्यमनुकरोति कदाचिद्विशेषम्। तत्र यदा सामान्यमनुक्रियते तदा विशेषनिबन्धनस्य कार्यस्य सामान्येऽभावात्प्रकृतावदृष्टत्वादनुकरणेऽप्यभावः। यदा तु विशेषोऽनुक्रियते तदा तन्निबन्धनं कार्यमनुकरणे प्रवर्तते। तत्र यदा धात्वधातुसामान्यं क्षिमात्रमनुक्रियते तदेयङोऽप्राप्तिरिति 'चिक्षियतु'रित्यादौ कृतेयङादेशस्येदमनुकरणमिति दीर्घादिति कर्त्तव्यम्।

उ.] पदिकत्वं। तद्धि आतिदेशिकतदभावेन विरुद्धम्। **प्रसज्यप्रतिषेधेत्विति**। वस्तुतः पर्युदासपक्षेऽप्यतिदेशेन धातुत्वे बोधिते धातुभिन्नत्वाऽभावेन प्रातिपदिकत्वाऽभावोऽतिदेशफलमिति तत्प्रवृत्तिरस्त्येव। यद्यप्येतत्साक्षान्न शास्त्रीयं तथापि शास्त्रतात्पर्यविषयं भवत्येव। तद्विरुद्धं च स्वाऽऽश्रयं प्रातिपदिकत्वं न भवेत्, यथाऽपचत्तण्डुलानित्यादौ प्रातिपदिकत्वं नेति वक्तुं शक्यम्। 'अथाप्येतन्ने'ति भाष्यस्याऽयमेवाऽर्थः। 'विरुद्धानि स्वाऽऽश्रयाणि निवर्त्तन्त एवे'ति कैयटोक्तव्याख्या त्वयुक्ता, सामान्यप्रवृत्तभाष्यस्य विनाऽनुपपत्तिमधातुरितिप्रातिपदिकसंज्ञारूपविशेषपरत्वाऽयोगात्, 'आतिदेशिकाना'मित्यादिबहुवचनाऽसङ्गतेश्च। 'ब्राह्मणवत्क्षत्रिय'इत्यादावतिदेशाविरुद्धमद्यपानादिनिवृत्तेश्च। **विश इति**। 'अप्राप्ता विभक्तिर्निर्देशादेवे'त्यन्वयः। अप्राप्तिश्चानुकरणत्वेन धातुत्वादिति भावः। ननु वचने जाग्रति कथं नास्तीत्युच्यतेऽत आह—**इहानुकर्त्तेति। सामान्यं**—धात्वधातुसाधारणं क्षिरूपमित्यर्थः। **विशेषमिति**। धातुमात्रमित्यर्थः। अग्रे 'धात्वधातुसामान्यं क्षिमात्र'मिति पाठः। **तदेयङोऽप्राप्तिरिति**। धातुत्वाऽभावादिति भावः। **कर्तव्यमिति**। इदमेव दीर्घग्रहण-

अञ्चोऽनपादाने ।८।२।४८ ।

॥ * ॥ अञ्चेर्नत्वे व्यक्तप्रतिषेधः ॥ * ॥ **अञ्चेर्नत्वे व्यक्तस्य प्रतिषेधो वक्तव्यः । व्यक्तमनृतं कथयतीति** ॥ * ॥ अञ्जिविज्ञानात्सिद्धम् ॥ * ॥ [अञ्जिविज्ञानात्सिद्धमेतत्] ॥ **नैतदञ्चे रूपम् । अञ्जेरेतद्रूपम्** ॥ **अञ्चत्यर्थो वै गम्यते ॥ कः पुनरञ्चत्यर्थः ?॥ अञ्चतिः प्रकाशने वर्तते । अञ्चितं गच्छति, प्रकाशयत्यात्मानमिति गम्यते ॥ न वै लोकेऽञ्चितं गच्छतीति प्रकाशनं गम्यते ॥ किं तर्हि ? ॥ समाधानं गम्यते । समाहितो भूत्वा गच्छतीति ॥**

एवं तर्ह्यञ्चतेरङ्कः, अङ्कश्च प्रकाशनम् । अङ्किता गाव इत्युच्यते, अन्याभ्यो गोभ्यः प्रकाश्यन्ते ॥ * ॥ अञ्चत्यर्थ इति चेदञ्जेस्तदर्थत्वात्सिद्धम् ॥ * ॥

प्र.] **अञ्चो । अञ्चेरिति** । प्रकाशनार्थे व्यक्तशब्दे नत्वं प्राप्नोति, न चेष्यते इति वचनम् । **अञ्चितं गच्छतीति** । गमनक्रियाविशेषणमेतत् । प्रकाशत्वेनच गमनं पूज्यत इति पूजानिबन्धनो नलोपप्रतिषेधः । **न वै लोक इति** । सर्वस्य गन्तुस्तत्समये तस्य च गमनस्य प्रकाशत्वादिति भावः । **समाधानमिति** । गमनस्याऽव्याकुलत्वमि[ती]त्यर्थः । तथा च 'नागाश्चाञ्चितगामिन' इति प्रयोगो दृश्यते । गमनस्य च समाधानमेव पूजा । **अङ्कश्चेति** । प्रकाश्यतेऽनेनेति ल्युट् । 'अङ्क' इत्यत्र तु 'हलश्चे'ति करणे घञ् । 'अङ्क पदलक्षणयो'रित्यस्याप्येतद्रूपं भवति । अञ्चेस्त्वङ्क इति न सिध्यति । **अङ्किता इति** । अङ्कयुक्ताः कृता इत्यर्थः । मत्वन्तादङ्कशब्दात्तत्करोतीति णिचि कृत इष्ठवद्भावान्मतु-

---

उ.] मत्र विभक्तिकरणं चातिदेशाऽनित्यत्वे ज्ञापकमिति तत्त्वम् । 'सामान्यानुकरण'मिति तु चिन्त्यं; फलाऽभावात् । न च 'चिक्षियतु'रित्यादिरूपस्याऽनुकरणे कथं ततः परा निष्ठा, न हि तद्रूपानुकरणेन धातुः प्रत्याययितुं शक्यो नापि 'क्षि' इति रूपमिति वाच्यं, दीर्घादिति सामर्थ्येन क्षिय इति दीर्घविधानसामर्थ्येन च स्वानुकार्यमूलभूतस्यापि ग्रहणज्ञापनान्न दोषः ॥

अञ्चोऽनपादाने । प्रकाशनेति । 'समङ्क'इत्युदाहरणेषु गतिरेवाञ्चत्यर्थ इति भावः । नन्वञ्चितमित्यत्र प्रकाशनार्थत्वे पूजार्थत्वाऽभावान्नाञ्चेरिति नलोपनिषेधो नस्यात्, अञ्चेः पूजायामितीट् च न स्यादत आह–**प्रकाशत्वेनेति** । भाष्ये–'प्रकाशयत्यात्मान'-मित्यादि फलितार्थकथनं, गमनस्य प्रकाशत्वं कर्तुः प्रकाशत्व एव भवतीति भावः ।

प्रतिषेध इति । इट्चेत्यपि बोध्यम् । **सर्वस्य गन्तुरिति** । एतच्च तदर्थकविशेषणवैयर्थ्यं, नापि तेन गमनस्य पूजाप्रतीतिरिति भावः । **तत्समये**–गमनसमये, **सर्वो**–गन्ता, तदीयं गमनं च प्रकाशमानमेवेत्यर्थः । **पूजेति** । पूजाप्रयोजकमिति भावः । **'अञ्चतेरङ्क'**

अञ्चत्यर्थ इति चेदञ्जिरप्यञ्चत्यर्थे वर्तते ॥ कथं पुनरन्यो नामाऽन्यस्यार्थे वर्तते ?[1] कथमञ्जिरञ्चत्यर्थे वर्तते ?॥ अनेकार्था अपि धातवो भवन्तीति[2] ॥ अस्ति पुनः क्व चिदन्यत्राऽप्यञ्जिरञ्चत्यर्थे वर्तते ? ॥ अस्तीत्याह । अञ्जेरञ्जनम्, अञ्जनं च प्रकाशनम् । 'अङ्क्तेऽक्षिणी' इत्युच्यते यत्तत्सितं[3] चाऽसितं चैतत्प्रकाशयति[4] । तथाऽञ्जेर्व्यञ्जनं, व्यञ्जनं च प्रकाशनम् । यत्तत्स्नेहेन मधुरेण च जडीकृतानामिन्द्रियाणां स्वस्मिन्नात्मनि व्यवस्थापनं स रागस्तद्व्यञ्जनम् । अन्वर्थं खल्वपि निर्वचनं 'व्यज्यतेऽनेनेति व्यञ्जन'मिति ॥ [अञ्चोऽनपा] ।

प्र.] ब्लुकि टिलोपे च रूपम् । **अञ्जेरिति** । ननु यद्यप्यञ्जिस्तदर्थस्तथाप्यञ्चतेः सोऽर्थो भवतीति तस्य 'व्यक्त'मिति न सिध्यति, 'व्यक्न'मिति प्राप्नोति। एवं तर्हि 'व्यक्न'मित्युक्ते प्रकाशनं न गम्यत इति व्यक्तशब्दप्रकृतिरञ्जिरेव प्रकाशने वर्तते न त्वञ्चिरित्यदोषः। **कथं पुनरिति** । अर्थान्तरे रूढोऽन्यः—अन्यस्याऽर्थान्तरवाचिनोऽर्थे—कथं प्रवर्त्तत इत्यर्थः । **अनेकार्था इति** । धातुपाठे तु क्रियावाचित्वप्रदर्शनपरोऽर्थनिर्देशो न तु नियमार्थः । तथा च 'कुर्द खुर्द गुर्द गुद क्रीडायामेवे'त्येवकारः पठितः । **अस्ति पुनरिति** । अन्यत्र दर्शने व्यक्तशब्देऽपि तदर्थत्वमञ्जेः शक्यते साधयितुं नाऽन्यथेति प्रश्नः । **अञ्जनमिति** । अज्येते येनाऽक्षिणी तदञ्जनम् । तत्रैतत्स्याद्रूढिशब्दोऽयम्, रूढिषु च व्युत्पत्तिनिमित्तमेव क्रिया न तु शब्दप्रवृत्तिनिमित्तमित्याशङ्क्याऽरूढिशब्दमुदाहरति—**अङ्क्ते इति** । व्यत्ययेन छन्दस्यात्मनेपदम् । **यत्तत्सितं चेति** । सिताऽसिते सुतरां विभागेन प्रकाशयतीत्यर्थः । **तथेति** । व्यज्यतेऽनेन रस इति व्यञ्जनम् । **राग इति** । रज्यतेऽनेनेति रागो व्यञ्जनमेव । **अन्वर्थमिति** । यौगिको व्यञ्जनशब्द इत्यर्थः ।

उ.]इति भाष्यादङ्क्ष पदे लक्षणे चेति धातुरनार्ष इत्यन्ये । **टिलोपे चेति** । विन्मतोर्लुकि भाष्यकारेण टिलोपस्याऽनिष्टेश्चिन्त्यमिदं, तस्मादङ्कशब्दात्तारकादित्वादितच्प्रत्ययेऽङ्कित इति साध्वित्यन्ये । **नन्विति** । अनिष्टनिवृत्त्यर्थं वचनमावश्यकमिति भावः । **नत्वञ्चिरिति** । प्रकाशनार्थाञ्चतेरनभिधानेन निष्ठाऽभाव इति भावः । **अर्थान्तर इति** । 'अञ्जू व्यक्तिम्रक्षणगति'ष्विति पाठात् । **अर्थान्तरेति** । प्रकाशनादिवृत्तेः । **अन्यत्रेति** । अन्यत्राऽदर्शने तु विवादविषये निर्णेतुं न शक्यत इत्यर्थः । **अज्येते**—प्रकाश्येते इत्यर्थः । अञ्जः परस्मैपदित्वादाह—**व्यत्ययेनेति** । **व्यज्यतेऽनेनेति** । जिह्वाया जडीभावनिराकरणेन रसो व्यज्यत इत्यर्थः । भाष्येऽपि—'इन्द्रिय'शब्देन जिह्वैव । व्यक्तिवहुत्वाद्बहुवचनं । भाष्ये—**स्वस्मिन्ना**-

निर्वाणोऽवाते ।८।२।५० ।

॥ * ॥ अवाताऽभिधाने॥ *॥ अवाताभिधान इति वक्तव्यम् । इहापि यथा स्यात्–निर्वाणोऽग्निर्वातेन । निर्वाणः प्रदीपो वातेन[इति][निर्वाणोऽवाते]॥

अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः ।८।२।५५ ।

अनुपसर्गादित्युच्यते तत्रेदं न सिध्यति–परिकृशमिति ॥ * ॥ कृशेः क एषे विहित इगुपधात् ॥ * ॥ नैतन्निष्ठान्तम् ॥ किं तर्हि ? ॥ कृश एष इगुपधात्को विहितः ॥ नैवं शक्यम् ॥*॥ स्वरे हि दोषो भवति परिकृशे ॥*॥ नैवं शक्यम् ॥ इह हि परिकृश इति, स्वरे दोषः स्यात् । 'अन्तः' 'थाथघञ्क्ताजबित्रकाणा'मित्येष स्वरः प्रसज्येत ॥ * ॥ पदस्य लोपो विहित इति मतम् ॥ * ॥ एवं तर्हि पदस्य लोपोऽत्र द्रष्टव्यः । पर्यागतः कार्श्येन

प्र.] **निर्वाणोऽवाते** । **अवाताभिधान इति** । तेन 'निर्वातो वात' इत्यत्रैव नत्वनिषेधो न तु भावे निष्ठायामिति 'निर्वाणं वातेने'ति भाव्यमिति वार्तिककारस्य दर्शनम् । अन्ये तु वातकर्तृके धात्वर्थे सर्वत्र निषेधमिच्छन्ति–'निर्वातो वातो' 'निर्वातं वातेने'ति । 'निर्वाणः प्रदीपो वातेने'त्यत्र तु वातः करणमिति प्रतिषेधाऽभावः । [निर्वाणोऽवाते] ।

अनुपसर्गात् । यद्यपि फुल्लादयः पचाद्यचीगुपधलक्षणे के च सिध्यन्ति तथापि 'निष्ठा च द्व्यजना'दित्यादिकार्यसिद्धये क्षीबितोद्यनिष्टशब्दनिवृत्तये च निपातनम् । **स्वर इति** । तनूकरणवृत्तेः कर्मणि क्ते 'गतिरनन्तर' इत्याद्युदात्तं पदं भवति । तनूभवनवृत्तेस्तु कर्तरि क्तेऽन्तोदात्तं पदं स्यात् । **पदस्येति** । गम्यमानाऽर्थत्वा-

---

उ.] **त्मनीति** । रसास्वादग्राहकत्वलक्षणे स्वस्वरूपे इत्यर्थः । **यौगिक इति** । न तु क्रमुकादिवद्रूढ इत्यर्थः । [अङ्गोऽनपादाने] ॥

निर्वाणोऽवाते । **तेनेति** । वाते निष्ठान्तेनाभिधेये नेत्यर्थः । **इत्यत्रैवेति** । वातेरकर्मकत्वात्कर्तरि क्तः । **अन्येत्विति** । अत्राऽरुचिस्तु भाष्यवार्तिकविरोधः, कर्त्रन्तरानुपादानाद्वातःकरणमित्यपि चिन्त्यम् । [निर्वाणोऽवाते] ॥

अनुपसर्गात्फुल्ल । **पचाद्यचीति** । फुल्लक्षीबलाघृधातुभ्य इत्यर्थः । कृशेश्चेगुपधलक्षणे के कृश इति सिद्धं । ननु निष्ठान्तेऽपि थाथादिस्वरेण भाव्यमिति कः स्वरे दोषोत आह–**तनूकरणेति** । **तनूभवनेति** । तदर्थेऽकर्मकत्वात्कर्तरि क्तः स्यादिति थाथादि-

परिक्लशः[1] ॥ * ॥ जगत्यनूना भवति हि रुचिरा ॥ * ॥ [जगत्यनूना[2] भवति हि रुचिरा] ॥ * ॥ फलेर्लत्वे उत्पूर्वस्योपसङ्ख्यानम् ॥ * ॥ फलेर्लत्वे उत्पूर्वस्योपसङ्ख्यानं कर्तव्यम्। उत्फुल्लो[3]ऽनृतं कथयति॥ अत्यल्पमिदमुच्यते उत्पूर्वादिति ॥*॥ उत्फुल्लसंफुल्लयोरिति वक्तव्यम् ॥*॥ उत्फुल्लः। संफुल्लः ॥

क्लशेः क एष हि विहित इगुपधात्स्वरे हि दोषो भवति परिक्लशे ॥
पदस्य लोपो विहित इति मतं जगत्यनूना भवति हि रुचिरा ॥ १ ॥

नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ।८।२।५६।

किमयं विधिराहो स्वित्प्रतिषेधः ? ॥ किं चातः ? ॥ यदि तावद्विधिर्नकारग्रहणं कर्तव्यम् ॥ न कर्तव्यं । प्रकृतमनुवर्तते ॥ क्व प्रकृतं ?॥ 'रदाभ्यां निष्ठातो नः पूर्वस्य च द' इति ॥ तद्वा अनेकेन निपातनेन व्यवच्छिन्नं न शक्यमनुवर्तयितुम् ॥ अथ प्रतिषेधो, ह्रीग्रहणमनर्थकं[6], न ह्येतस्माद्विधिरस्तीति ॥ यथेच्छसि तथास्तु ॥ अस्तु तावद्विधिः ॥ ननु चोक्तं—"नकारग्रहणं

प्र.] दप्रयोग एव लोपस्तत्र गमिं प्रति परिरुपसर्गो न तु क्लशिमित्यनुपसर्गत्वात्परेर्निष्ठान्त एव क्लशशब्दः । अव्ययस्वरेणाद्युदात्तः परिक्लशशब्दः, परेर्गतित्वाऽभावात् । जगतीति । येयं परिक्लशशब्दस्य व्युत्पत्तिः प्रदर्शिता सा रुचिरा अनूना—परिपूर्णा, रूपे स्वरे च दोषाऽभावात् । [अनुपसर्गात्फुल्ल] ॥

नुदविद । किमयमिति । कश्चिद्विधिनाऽर्थी, कश्चिन्निषेधेन, ततो वक्ष्यमाणोऽभिप्रायः । नकारग्रहणमिति । प्रतिषेधे तु नुदादिभ्यो यत्प्राप्नोति तन्न

उ.] स्वरेणान्तोदात्तः स्यात्, तच्च नेष्यत इति तनूकरणवृत्तिरेवात्र क्लशिः । एवं चाद्युदात्तत्वमेवेष्यते, न च क्लशेः कर्तरि के तत्सिध्यतीति भावः । 'कर्तरि के'इति पाठस्तु युक्तः । निष्ठान्त एवेति । एवशब्दः प्रसिद्धौ । कथं पुनरेवं सतीष्टस्वरोऽत आह—अव्ययस्वरेणेति । 'तत्पुरुषे तुल्यार्थे'त्यनेन । गतित्वाऽभावादिति । तेन थाथघञित्यन्तोदात्तत्वं नेतिभावः । भाष्ये-पर्यागतः कार्श्येनेति । परिक्लशशब्दे क्लशशब्दो भावप्रधानः । क्लशत्वेन परितः प्राप्त इत्यर्थः । तेन परितः क्लश इत्यर्थलाभ इति भावः । जगति—शब्दव्यवहारे सर्वत्र । [अनुपसर्गात्फुल्ल] ॥

नुदविदोन्द । कश्चिदिति । ह्रीधातुः । तस्याऽप्राप्तत्वादिति भावः । कश्चिदिति । तद्व्यतिरिक्तः सर्वः । तेषां प्राप्तत्वादिति भावः । ननु प्रतिषेधपक्षेऽपि निषेध्यसमर्पणाय नकारग्रहणं कर्तव्यमेवेत्यत आह-प्रतिषेधे त्विति । उत्तरसूत्रस्थो नञत्रैव पठनीय इति

कर्तव्यं न कर्त्तव्यं प्रकृतमनुवर्तते, क्व प्रकृतं, रदाभ्यां निष्ठातो नः पूर्वस्य च द इति, तद्वा अनेकेन निपातनेन व्यवच्छिन्नं न शक्यमनुवर्तयितु''मिति ॥ संबन्धमनुवर्तिष्यते । अथ वा क्रियते न्यास एव द्विनकारको निर्देशः । 'नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्यां न ध्याख्याप मूर्च्छिमदा'मिति ॥ अथ वा पुनरस्तु प्रतिषेधः ॥ ननु चोक्तं 'ह्रीग्रहणमनर्थकं नह्येतस्माद्विधिरस्ती'ति ॥ नानर्थकम् । एतदेव ज्ञापयत्याचार्यो 'भवत्येतस्माद्विधि'रिति यदयं ह्रीग्रहणं करोति ॥

वित्तो भोगप्रत्यययोः ।८।२।५८ ।

बहव इमे विदयः पठ्यन्ते तत्र न ज्ञायते कस्य नित्यं नत्वं कस्य विभाषा कस्य प्रतिषेधः कस्य इडिति ? ॥ अत उत्तरं पठति—॥ * ॥ यस्य विदेः श्नशकौ 'त'परत्वे तनवचने तद्वु वा-प्रतिषेधौ ॥ * ॥ श्नविकरणस्य विभाषा, शविकरणस्य प्रतिषेधः ॥ * ॥ श्यन्विकरणान्नविधिश्छिदितुल्यः ॥*॥ श्यन्विकरणाद्विदेर्नविधिश्छिदिना तुल्यः ॥*॥ लुग्विकरणो वलि पर्यवपन्नः ॥*॥ लुग्विकरणो विदिर्वलादौ पर्यवपन्नः ॥ एष एवार्थः—

प्र.] भवतीत्यन्तरेणापि नकारग्रहणं सिध्यति । प्राकरणिकस्य प्रतिषेधविज्ञानादतिप्रसङ्गाऽभावः । **द्विनकार(क) इति** । 'वा पदान्तस्ये'ति परसवर्णाऽभावपक्षे एको नकार आदेशो द्वितीयो नञः सम्बन्धी । परसवर्णपक्षे तु 'हलो यमां यमि लोप' इति मध्यमनकारलोपः । **एतदेवेति** । न ह्यप्रसक्तस्य प्रतिषेधः सम्भवति । [**नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्**] ।

वित्तो भोगप्रत्यययोः । यस्य विदेरिति । 'नुदविदे'त्यत्रोन्दिना रौधादिकेन साहचर्याद्विद विचारण इत्यस्मान्नत्वविकल्पः । यद्यपि नुदिना तौदादिकेन साहचर्यं तथापि शब्दपरविप्रतिषेधादुन्दिरत्र व्यवस्थाहेतुर्न तु नुदिः ।

उ.] तात्पर्यम् । नन्वेवं क्तादयोऽपि न स्युरत आह—**प्राकरणिकस्येति** । ननु परसवर्णेन त्रयो नकारा इति 'द्विनकारक'इत्ययुक्तमत आह—**वा पदान्तस्येति** । नन्वतदभावपक्षेऽपि मध्यमनस्य 'नलोप' इति लोपो दुर्वारः, सौत्रत्वान्नेति भावः । [**नुदविदोन्द**] ॥

वित्तो भो । श्लोके-यस्य विदेरिति सामान्येन विदिद्वयनिर्देशः । **श्नशकाविति** । कप्रत्ययःस्वार्थिकः । ययोर्विदोः श्नशौ विहितौ **तद्वु** तयोस्तशब्दपरत्वे नशब्दसंबन्धिनत्वविधिविषये यथाक्रमं विकल्पप्रतिषेधावित्यर्थः । **छिदितुल्य इति** । यथा छिदेश्छिन्न इत्यत्र नित्यं

'येयोर्विद्योः श्नशावुक्तौ तयोर्नत्वस्य वानञौ ।
ययोस्तु श्यँल्लुकौ ताभ्यां छिदिवच्चेड्ढदिष्यते ॥

अपर आह—

॥ * ॥ वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते ।
विन्तेर्विन्नश्च वित्तश्च वित्तो भोगेषु विन्दतेः ॥ * ॥

भित्तं शकलम् ।८।२।५९।

'भित्तं शकल'मित्युच्यते तत्रेदं न सिध्यति–भित्तं भिन्नमिति ॥

प्र.]'विदॢ लाभे' इत्यस्मात्तु भोगप्रत्यययोर्नत्वनिषेधोऽन्यत्र नत्वम् । 'विद सत्ता-या'मित्यस्मात्तु नत्वम् । 'विद ज्ञाने' इत्यस्मात्त्विटा व्यवधानान्नत्वाऽभावः । तौदादिकात्तु 'विभाषा गमहने'ति क्वसौ विकल्पविधानाद्यस्य विभाषेति निष्ठा-यामिट्प्रतिषेधः । **तनवचन इति** । तस्य नस्तनः, तस्य वचनमिति समासः । **तदु इति** । 'त'दिति लुप्तषष्ठीकम् । 'उ' इत्यनर्थको निपातः पादपूरणार्थः । **विन्तेरिति** । विन्त इति तिङन्तानुकरणात्षष्ठी । **[वित्तो भोगप्रत्यययोः]** । **भित्तं । भिन्नमिति** । शकलवाचिना भित्तशब्देन सामानाधिकरण्या-

---

उ.] नत्वं तथा विद्यतेरित्यर्थः। **पर्यवपन्न इति** । इटि सति रूपान्तरं प्राप्त इत्यर्थः । यद्यपि प्रत्ययस्येट् तथापि प्रयोगे धातोरनन्तरं श्रूयमाणत्वात्तदवयवत्वप्रतिभानाद्विदिः पर्यवपन्न इत्युक्तं, तत्र बीजान्याह–**नुदेति । शब्दपरविप्रतिषेधादिति** । यद्यपि विप्रतिषेधसूत्रे कार्यशब्देन शास्त्रीयं ग्रहीतुमुचितं, तथापि विरोधे परस्य बलवत्त्वदर्शनादत्रापि तथैव कल्पनं । यद्यप्यचः परस्मिन्निति सूत्रस्थभाष्यरीत्या पूर्वसाहचर्यमन्तरङ्गं तथापि व्याख्या-नादेव निर्णयो बोध्यः। एवं 'विभाषागमहनविदविशा'मिति सूत्रेपि बोध्यम् । **विदॢलाभ इति** । अस्यैव भोगप्रत्यययोर्वृत्तिसंभवादिति भावः । सत्ताविचारणयोर्हि तदसंभव इति तात्पर्यम् । क्वचित्तु 'विदिर्लाभ'इति कैयटे पाठः । श्यनित्यादि भाष्यं व्याचष्टे–**विद सेति** । ननु तौदादिकस्याऽनिट्कारिकासु पाठाऽभावात्तस्य कुतो नेडित्यत आह-**तौदादिकात्त्विति**। तत्र हि व्याख्यानात्तौदादिकस्यैव ग्रहणं नतु ज्ञानार्थलुग्विकरणस्येत्यर्थः। भाष्ये **वानञाविति** । विकल्पप्रतिषेधावित्यर्थः । ननु रौधादिकस्य श्तिपा निर्देशे विनत्तेरिति भवितव्यं कथं विन्तेरित्युक्तिरत आह–**तिङन्तेति** । तेन तदर्थो धातुर्लक्ष्यत इति भावः । भाष्ये–**वित्तो भोगेष्विति**। भोगग्रहणं प्रत्ययस्याऽप्युपलक्षणं । **[वित्तो भोगप्रत्यय] भित्तं श** । पक्षान्तरेऽपि समाधिमाह–**विशेषोपक्रमेऽपीति** । क्रियाप्रवृत्तिनिमि-

नैष दोषः—सर्वत्रैवाऽत्र भिदिर्विदारणसामान्ये वर्तते, तत्रावश्य विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः,—भिन्नं ॥ किं ?[1] ॥ भित्तमिति ।

॥ * ॥ तत्वमभिधायकं[2] चेच्छकलस्याऽनर्थकः[3] प्रयोगः स्यात् ॥
शकलेन चाप्यभिहिते न[1] भवति तत्वं निगमयामः ॥ * ॥

क्निप्रत्ययस्य कुः ।८।२।६२।

प्रत्ययग्रहणं किमर्थं न 'क्निनः कु'रित्येवोच्येत ?॥ 'क्निनः कु'रितीयत्युच्यमाने वकारस्यैव तु कुत्वं प्रसज्येत ॥ ननु च लोपे कृते न भविष्यति ॥

प्र.] छिन्नशब्दस्याऽपि शकलार्थवृत्तित्वान्नत्वाऽप्रसङ्गः । ततश्च भित्तं भित्तमित्येव[4] स्यान्न तु भित्तं भिन्नमिति चोद्यम् । **सर्वत्रेति** । शकले पटादौ च । **विदारणसामान्य इति** । ततश्च सामान्यार्थे पदे संस्क्रियमाणे शब्दान्तरप्रयोगसमधिगम्यः शकलाऽर्थो बहिरङ्गत्वान्नत्वाऽभावस्याऽनिमित्तम् । **तत्रावश्यमिति** । सामान्योपक्रमे विशेषाऽभिधानमिति भावः । विशेषोपक्रमेऽप्यभिधाने भित्तशब्दः शकले रूढ इति भिदिक्रिया केवलं व्युत्पत्तिनिमित्तं न तु प्रवृत्तिनिमित्तम् । अथवा यया विदारणक्रियया शकलं निर्वर्तते तामेव भित्तशब्दोऽन्तर्भावयति, या तु निष्पन्नस्य शकलस्याऽन्या विदारणक्रिया तत्प्रतिपादनायाऽनेकक्रियासम्बन्धसम्भवे क्रियान्तरव्यवच्छेदाय भिन्नशब्दस्याऽप्यविरुद्धः प्रयोगः । **तत्त्वमिति**। भित्तशब्दशकलशब्दयोः पर्यायत्वाद्युगपदप्रयोग इत्यर्थः । **[भित्तं]** ।

क्निन् । **प्रत्ययग्रहणमिति** । क्निनः प्रत्ययत्वाऽव्यभिचारात्प्रश्नः । **वकारस्यैवेति** । प्रत्ययग्रहणे यस्मात्स तदादेस्तदन्तस्ये'ति वचनाल्लोपापवादो वकारस्यैव कुत्वं

उ.] तत्वेऽप्याह—**अथवेति** । **क्रियान्तरव्यवच्छेदायेति** । भिन्नमेव भित्तं, नत्वमवतिष्ठत इत्यादीत्यर्थः । 'भित्तमिति निपात्यते शकलं तत्वेन रूढ्या उच्यते चे'दिति सूत्रार्थः । भाष्ये—**तत्त्वमिति** । तत्वशब्देन तद्युक्तो भित्तशब्दो लक्ष्यते। यदि भित्तशब्दः प्रयुज्यते तदा शकलशब्दस्य न प्रयोगः । पर्याययोः सह प्रयोगाऽभावात् । एवं शकलशब्दप्रयोगे भित्तशब्दस्य न प्रयोग इति **तत्त्वभूतं** वस्तु **निगमयामः**—स्थिरीकुर्मः । स्थिरीकरणं हि निगमनं, यथा पञ्चावयवेऽनुमानप्रयोगे 'तस्मादग्निमान् पर्वत' इति । तस्माद्रूढोऽयमिति भावः । तत्फलितमाह—**भित्तशब्देति** ।

क्निन्प्रत्ययस्य । **प्रत्ययग्रहण इति** । प्रत्ययपदसत्त्वे तु बहुव्रीहिणा पूर्वस्यैवेति न दोष इति भावः । **लोपाऽपवाद इति** । 'वेरपृक्तस्ये'ति लोपे प्राप्ते कुत्वारम्भादिति भावः ।

अनवकाशं कुत्वं लोपं बाधेत[1] ॥ सावकाशं कुत्वम् ॥ कोऽवकाशः ? ॥ अनन्त्यः ॥ कथं पुनः सत्यन्त्येऽनन्त्यस्य[2] कुत्वं स्यात् ?॥ आचार्यप्रवृत्तिर्ज्ञापयति 'नान्त्यस्य कुत्वं भवती'ति यदयं 'क्विनः कु'रिति कवर्गनिर्देशं करोति, इतरथा हि तद्गुणमेवाऽयं निर्दिशेत् ॥ इदं तर्हि प्रयोजनं—येभ्यः क्विन्प्रत्ययो विधीयते तेषामन्यप्रत्ययान्तानामपि पदान्ते[3] कुत्वं यथा स्यात् ,—मानो अस्राक् । मानो अद्राक् ॥

क्विनः कुरिति वक्तव्ये प्रत्ययग्रहणं कृतम् ।
क्विन्प्रत्ययस्य सर्वत्र पदान्ते कुत्वमिष्यते ॥ १ ॥

प्र.] स्यात् । लोपे कृत इति । अन्तरङ्गो लोपः, कुत्वं तु बहिरङ्गं, पदस्येति विधानात् । अनवकाशमिति । क्विबादिषु सावकाशं लोपं विशेषविहितं कुत्वं बाधेतेति भावः । अनन्त्य इति । क्विन्प्रत्ययापेक्षयाऽनन्त्यः, पदस्य त्वन्त्य इति ज्ञेयम् । 'पदस्ये'ति हि स्थानषष्ठ्या अन्त्येऽल्युपसंहारादन्त्यस्यैव कुत्वेन भाव्यं, यदि तु पदस्येत्यवयवषष्ठी स्यात्तदा घृतस्पृशेत्यादावपि कुत्वं स्यात् । कथं पुनरिति । 'सत्यपि सम्भवे बाधनं भवती'ति लोपं बाधित्वा कुत्वेन भाव्यमिति भावः । यदयमिति । अनेकस्य स्थानिनोऽनेकादेशप्रतिपत्तये वर्गग्रहणं, वकारस्यैव तु स्थानित्वे घकार एव निर्दिश्येत । 'वर्गाणां तृतीयचतुर्थाः' इति शिक्षायां वकारघकारयोर्गुणसाम्यप्रतिपादनात् । इदं तर्हीति । क्विन्प्रत्ययस्त त्प्रकृतिधातूपलक्षणमिति तस्मिन्सत्यसति वा तत्प्रकृतेर्धातोः पदस्य कुत्वं भवति । अस्रागिति । सृजिदृशिभ्यां माङि लुङ् । तिप् । सिच् । 'बहुलं छन्दसी'ति विधानादीण्न भवति । हल्ङ्यादिलोपः । 'सृजिदृशोर्झल्यमकिती'त्यमागमः । 'वदव्रजे'ति वृद्धिः । 'बहुलं छन्दस्यमाङ्योगेऽपी'त्यडागमः । 'संयोगान्तस्य लोपः' । 'व्रश्चभ्रस्जे'ति षत्वे प्राप्ते कुत्वं जस्य गः, शस्य खः । 'वावसाने'

उ.] अन्तरङ्ग इति । प्रत्ययमात्रापेक्षत्वादिति भावः । त्रैपादिकतयाऽप्यसिद्धं कुत्वमिति बोध्यम् । ननु पदस्येत्यधिकारादलोन्त्यपरिभाषया पदान्तस्यैव कुत्वं स्यादिति कथमनन्त्योऽवकाशः स्यादत आह—क्विन्प्रत्ययेति । ननु पदस्येत्यस्य विशेषणताया अप्युक्तत्वेन कथं स्थानषष्ठी स्यादत आह—यदि त्विति । शिक्षायामिति । दन्त्योष्ठ्यवस्यापि महाप्राणता तत्रोक्तेत्याहुः । धातूपलक्षणमिति । अतद्गुणसंविज्ञानबहुव्रीहिणेत्यर्थः । जस्य ग इति । अस्रागित्यत्र । अद्रागित्यत्राह—शस्य ख इति । 'वर्गाणां प्रथमद्वितीया'

अहन् ।८।२।६८।

॥*॥ रुत्वविधावह्नो रूपरात्रिरथन्तरेषूपसङ्ख्यानम् ॥*॥ **रुत्वविधावह्नो रूपरात्रिरथन्तरेषूपसङ्ख्यानं कर्तव्यम् । अहोरूपम् । अहोरात्रः । अहोरथन्तरं साम** ॥ [अहन्] ॥

रोऽसुपि ।८।२।६९।

॥ * ॥ असुपि रादेशे उपसर्जनसमासे प्रतिषेधोऽलुकि ॥ * ॥ **असुपि रादेशे उपसर्जनसमासेऽलुकि प्रतिषेधो वक्तव्यः । दीर्घाहा निदाघ इति ।**

प्र.]इति चर्त्वं ककारः । 'पूर्वत्रासिद्ध'मित्यसिद्धत्वं षत्वे कुत्वस्य नास्ति, प्रत्ययग्रहणसामर्थ्यात्षत्वाद्यपवादत्वात्कुत्वस्य । [**क्विन्प्रत्ययस्य कुः**] ॥

अहन् । रुत्वविधाविति । समासाऽसमासयोर्लुमता लोपाद्रादेशे प्राप्ते रुत्वमुत्वार्थमुच्यते । **अहोरूपमिति** । [अह्नो रूपमिति] षष्ठीसमासः । गतमहो रूपं पश्येत्यसमासः। **अहोरात्र इति** । इकारलोपे कृतेऽप्येकदेशविकृतस्यानन्यत्वाद्रुत्वम् । रात्रग्रहणं तु न कृतं, गतमहो रात्रिरागतेत्यत्रापि रुत्वार्थम् । [**अहन्**] ।

रोऽसुपि । 'असुपि रादेश' इति पर्युदासं मत्वेदमुच्यते-**दीर्घाहा निदाघ** इति । अत्र च सुप्सदृशो हल्परोऽस्तीति रादेशप्रसङ्गः, रुत्वं चाऽत्र यत्वार्थमि-

---

उ.] इत्यत्र शब्दयोर्गुणसाम्यप्रतिपादनादिति भावः । **षत्वाद्यपवादत्वादिति** । आदिना जश्त्वं । 'कुः क्विन्यत'इति न्यासेन 'दृष्ट' इत्यध्याहारेण च बहुव्रीह्यर्थलाभे सिद्धे प्रत्ययग्रहणस्यान्यपदार्थांशे वीप्सागर्भबहुव्रीहिलाभार्थत्वेन विशिष्य तादृशादिविषयकलक्षणोपप्लवेन तद्विषये जश्त्वषत्वयोरवश्यं प्राप्त्या तस्य तदपवादत्वमिति भावः । इदं चिन्त्यं, भाष्यकृता बहुव्रीहिमात्रमूलकताया एव प्रत्ययग्रहणस्योक्तत्वात् । तस्मादुष्णिगञ्चुयुजिक्रुञ्चुषु कुत्वस्य चारितार्थ्येन न तदपवादत्वमिति । यत्तु क्विन्प्रकृतौ षत्वप्राप्तियोग्येऽपि कृते षत्वे कुत्वस्य चारितार्थ्यं, तस्मात्षत्वे जश्त्वे च कुत्वमिति बोध्यमिति, तन्न, तत्प्रवृत्तिकालेऽवश्यप्राप्तेरेवापवादत्वबीजत्वात् । एतदेवोच्यते 'सत्यपि संभवे' इत्यादि ।

अहन् । समासासमासयोरिति । न लोपः प्रातिपदिकेति सूत्रस्थभाष्यप्रामाण्येनास्य संबुद्धावप्रवृत्तिरिति बोध्यम् । **लुमतेति** । समासे-'सुपो धात्वि'ति । असमासे-'स्वमो'रिति । **एकदेशविकृतस्येति** । टचः प्राग्वर्तिभागस्येत्यर्थः । 'न लोप'इति सूत्रभाष्ये 'रात्रे'ति पाठो दृश्यते । अत्र चातिदेशिकमहोरात्र इत्येवोदाहृतमिति गतमहो रात्रिरित्यादेरनभिधानमित्यन्ये । [**अहन्**] ॥

रोऽसुपि । पर्युदासपक्षे दोषान्तरमाह-**पर्युदासेचेति** । एवं च पश्चाद्ददातीति पदा

॥ * ॥ सिद्धं तु सुपि प्रतिषेधात् ॥ * ॥ **सिद्धमेतत् ॥ कथम् ? ॥ 'सुपि प्रतिषेधात्' । प्रसज्याऽयं प्रतिषेधः-'सुपि ने'ति ॥ इहाऽपि तर्हि न प्राप्नोति** अहर्ददाति अहर्भुङ्क्ते इति ॥ * ॥ लुकि चोक्तम्[१] ॥ * ॥ [लुकि चोक्तम्[२]] ॥ **किमुक्तम्[१] ? ॥ 'अह्नो रविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवती[२]'ति ॥**

अम्नरूधरवरित्युभयथा छन्दसि ।८।२।७०।

॥*॥ छन्दसि[३] भाषायां[४] च प्रचेतसो राजन्युपसङ्ख्यानम् ॥*॥ **छन्दसि भाषायां[१] च प्रचेतसो राजन्युपसङ्ख्यानं कर्तव्यम् । प्रचेतो राजन् । प्रचेता राजन्** ॥ * ॥ अहरादीनां पत्यादिषूपसङ्ख्यानम्[१] ॥ * ॥ **अहरादीनां पत्यादिषूपसङ्ख्यानं कर्तव्यम् । अहर्पतिः । अहः पतिः । [अह⨯पतिः] अहर्पुत्रः । अहः पुत्रः[६] । [अह⨯पुत्रः ।] गीर्पतिः । गीः पतिः । [गी⨯पतिः] । धूर्पतिः । धूःपतिः । [धू⨯पतिः]** [अम्नरूधरवरि]

वसुस्रंसुध्वंस्वनडुहां दः ।८।२।७२।

इह कस्मान्न भवति–पपिवान् तस्थिवानिति ? ॥ 'सस्ये'ति वर्तते ॥

प्र.] ष्यते। पर्युदासे चाऽहरित्यत्र रुत्वमेव भवति न तु रः । **सिद्धं त्विति** । प्रत्ययलक्षणेन दीर्घाहा निदाघ इत्यत्र सुप्परत्वाद्रत्वाँऽभावः । 'पूर्वत्रासिद्ध'मिति रुत्वस्याऽसिद्धत्वात्पूर्वं नोपधालक्षणो दीर्घः, पश्चाद्रुत्वम् । अहरित्यत्र तु र एव भवति । **इहापीति** । प्रत्ययलक्षणेन रप्रतिषेधप्रसङ्गः । [**रोऽसुपि**] ।

अम्नरूध । प्रचेता राजन्निति । सकारस्य रेफः, तस्य रो रीति लोपे ढ्रलोप इति दीर्घः । **अहर्पतिरिति** । रेफस्य रेफो विसर्जनीयबाधनाय पक्षे छन्दोभाषयोर्विधीयते । [**अम्नरूधरवरि**]

वसुस्रं । पपिवानिति । सस्येत्यस्याऽननुवृत्तौ नकारस्य दत्वं प्राप्नोति,

---

उ.] न्तरसन्निधाने उत्वं स्यादित्यर्थः। **रुत्वस्यासिद्धत्वादिति** । वस्तुस्थितिप्रदर्शनमेतत् । भाष्ये **लुमता लुप्ते इति** । प्रत्यये परतः पूर्वस्य कार्ये न लुमतेति निषेधादिति भावः ।

अम्नरू । रेफ इति । रुत्वे एव प्राप्ते इति भावः । रेफस्य रेफविधाने फलमाह–**रेफस्येति** । अहःपत्यादौ पक्षे उपध्मानीयः । [**अम्नरू**] ॥

वसुस्रंसुध्वंस्व । लोपं बाधित्वेति । संयोगान्तलोपमित्यर्थः । परत्वादिति भावः ।

एवमप्यत्र प्राप्नोति ॥ लोपे कृते न भविष्यति ॥ अनकाशं दत्वं लोपं बाधेत[1] ॥ सावकाशं दत्वम् ॥ कोऽवकाशः ? ॥ पपिवद्भ्यां पपिवद्भिरिति ॥ [नैषोऽस्त्यस्यावकाशः[2]]–अत्रापि रुः प्राप्नोति, तद्यथैव रुं बाधते एवं लोपमपि बाधेत ॥ न बाधते ॥ किं कारणम् ? ॥ येन नाऽप्राप्ते तस्य बाधनं भवति, न चाऽप्राप्ते रौ दत्वमारभ्यते, लोपे पुनः प्राप्ते चाऽप्राप्ते च ॥ यदि तर्हि 'सस्ये'ति वर्तते–अनडुद्भ्यामनडुद्भिरित्यत्र न प्राप्नोति ॥ वचनादनडुहि भविष्यति ॥ यद्येवम्–॥ * ॥ अनडुहो दत्वे नकारप्रतिषेधः ॥ * ॥ अनडुहो दत्वे नकारस्य प्रतिषेधो वक्तव्यः । अनड्वान् ॥ * ॥ सिद्धं तु प्रतिपदविधानान्नुमः ॥ * ॥ सिद्धमेतत् ॥ कथम् ? ॥ प्रतिपदविधानान्नुमः[3]' । नुमः प्रतिपदविधानसामर्थ्याद्दत्वं न भविष्यति[4] ॥ यदि तर्हि यद्यदनडुहः प्राप्तं तत्तन्नुमः प्रतिपदविधानसामर्थ्याद्बाध्यते रुत्वमपि[5] न प्राप्नोति–अनड्वांस्तत्रेति ॥ नैष दोषः–'यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते' । दत्वं च प्रति नुमः प्रतिपदविधिरनर्थको, रोः पुनर्निमित्तमेव ॥ [वसुस्रंसुध्वंस्वनडुहां दः] ॥

प्र.] तदनुवृत्तौ तु लोपं बाधित्वा सकारस्य दत्वं प्राप्नोति । **लोपे कृत इति ।** 'पूर्वत्रासिद्ध'मिति दत्वस्याऽसिद्धत्वाल्लोपः । **अनवकाशमिति ।** कार्यान्तरेण सर्वस्य विषयस्याक्रान्तत्वात्। **येन नाप्राप्त इति ।** सर्वविषयव्यापि लक्षणं दत्वेन बाध्यते, न तु सर्वं कार्यं सर्वं वा लक्षणम् । **यदि तर्हीति ।** एकसमासनिर्दिष्टानां वस्वादीनां सर्वेषां विशेषणसंबन्धस्य न्याय्यत्वात् । **वचनादिति ।** एकस्माद्ग्रहणकवाक्यादनेकस्य प्रक्रियावाक्यस्योपप्लवात्संभवव्यभिचाराभ्यां च विशेषणसंबन्धादनडुहोऽसंभवात्सस्येति विशेषणेनाऽयोगः । **सिद्धं त्विति ।** यदि नकारस्य दत्वं स्यान्नुमोऽनर्थकः स्याद्विधिरिति हकारस्यैव दत्वं विधीयते । **यदि तर्हीति ।** विधानसामर्थ्यात्सर्वत्राऽविकृतेन नुमा भवितव्यमिति भावः ।

उ.] असिद्धत्वमाच्छाद्येदं । ननु परत्वाद्दलोपं बाधित्वा दत्वं स्यादत आह–**पूर्वत्रेति । कार्यान्तरेणेति ।** क्वचिद्रुत्वेन, क्वचिल्लोपेन । तत्राऽविशेषादुभयोरपि बाधः स्यादिति भावः । **अनडुहोः संभवादिति ।** यद्यपि स्रंसुध्वंसोर्विज्नास्त्यनभिधानात् , अत एवानुवृत्तौ पपिवानित्यत्रैव भगवता दोषः शङ्कितः, एवञ्च तयोरपि विशेषणं व्यर्थमव्यभिचारात्तथापि उपरञ्जकतया तद्विशेषणत्वेऽपि न दोष इत्यभिप्रायः । [**वसुस्रंसुध्वंसु**]

उपधायां च ।८।२।७८।

किमर्थमिदमुच्यते न 'हलि'त्येव सिद्धम् ? ॥ न सिध्यति । 'धातो'रिति [तत्र] वर्तते' तत्र रेफवकाराभ्यां धातुर्विशेष्यते—रेफवकारान्तस्य धातो'रिति ॥ किं पुनः कारणं पूर्वस्मिन् योगे रेफवकाराभ्यां धातुर्विशेष्यते [न पुनः पदं विशेष्यते ?] । नैवं शक्यम् ॥ इहापि प्रसज्येत—अग्निर्वायुरिति ॥ एवं तर्हि पूर्वस्मिन्योगे यद्धातुग्रहणं तदुत्तरत्र निवृत्तम् ॥ एवमपि 'कुर्कुरः' मुर्मुर'इत्यत्रापि प्राप्नोति ॥ एवं तर्ह्यनुवर्तते तत्र धातुग्रहणं, न तु रेफवकाराभ्यां धातुर्विशेष्यते ॥ किं तर्हि ? ॥ इग्विशेष्यते—'रेफवकारान्तस्येको धातो'रिति ॥ एवमपि कुर्कुरीयति मुर्मुरीयतीत्यत्रापि प्राप्नोति ॥ तस्माद्धातुरेव विशेष्यः । धातौ च विशेष्यमाणे उपधायां चेति वक्तव्यम् । ॥ * ॥ उपधादीर्घत्वेऽभ्यासजिव्रिचतुर्णां प्रतिषेधः ॥ * ॥ **उपधादीर्घत्वेऽभ्यासजिव्रिचतुर्णां प्रतिषेधो वक्तव्यः** । अभ्यासे—रियतुः रियुः । संविव्यतुः

प्र.] **उपधायां च** । **पूर्वस्मिन्निति** । 'र्वोरुपधाया' इत्यत्रेत्यर्थः । **उत्तरत्रेति** । 'हलि चे'त्यत्र । **कुर्कुर इति** । पदावयवस्य रेफस्य उपधाया इको दीर्घो विधीयमानोऽत्रापि प्राप्नोति । धात्वधिकारे तु रेफवकारान्तस्याऽधातुत्वान्न भवति । **रेफवकारान्तस्येकइति** । अन्तशब्दः समीपवाची, रेफवकारयोर्हल्परयोर्य उपधेक् तस्य धात्ववयवस्य दीर्घो विधीयमानो 'मूर्च्छिते'त्यादौ भविष्यति न तु 'कुर्कुर' इत्यादावित्यर्थः । **कुर्कुरीयतीति** । क्यजन्तस्य धातोरवयव इगिति दीर्घप्रसङ्गः । **तस्मादिति** । रेफवकारान्तस्य धातोर्हल्परस्योपधाया इको दीर्घो विधीयमानो 'मूर्च्छिते'त्यादौ न प्राप्नोतीति वचनम् । तेन धातोरुपधे यौ रेफवकारौ तयोरुपधाया इको दीर्घः । **उपधादीर्घत्व इति** । 'जिव्रि'शब्दो 'जीर्यतेः

उ.] **उपधायां च** । भाष्ये-**हलीत्येवेति** । 'गीर्ण'मित्यादिसिद्धये पदावयवरेफान्तस्योपधाया दीर्घ इत्यर्थं मन्यते । **पूर्वस्मिन्नि**त्यस्य हलिचेत्यत्रेत्यर्थेऽग्निरिति उदाहरणाऽसङ्गतिरत आह-**र्वोरिति** । अत्र धातुग्रहणानुवृत्तौ उत्तरत्राप्यनुवृत्तिः संभाव्येत नान्यथेत्याशयेन प्रश्न इत्यर्थः । नन्विको रेफाद्यवयवत्वमनुपपन्नं, विशेष्याऽसन्निधानात्तदन्तविधेर्दुर्लभत्वं चात आह-**अन्तशब्द इति** । तेन धातोरित्युपधाग्रहणं र्वोर्विशेषणं । षष्ठीद्विवचनस्य स्थाने सप्तम्येकवचनं । धातोरित्यनुवर्तमानं वैयधिकरण्येन र्वोर्विशेषणं । प्रकृतमुपधाग्रहणमिको विशेषणं । तच्च र्वपेक्षं पूर्वत्वमाचष्टे इति भावः । **धातोरुपधारेफ इति** । बहिरङ्गत्वेऽनालो

संविव्युः । [अभ्यासे] ॥ जिव्रिः । चतुर्यिता चतुर्यितुम् ॥ * ॥ उणादिप्रतिषेधश्च ॥ * ॥ उणादीनां च प्रतिषेधो वक्तव्यः । किर्योः गिर्योरिति ॥ अभ्यासप्रतिषेधस्तावन्न वक्तव्यः । 'हली'त्युच्यते न चात्र हलादिं पश्यामः ॥ यणादेशे कृते प्राप्नोति ॥ स्थानिवद्भावान्न भविष्यति ॥ प्रतिषिध्यतेऽत्र स्थानिवद्भावो 'दीर्घविधिं प्रति न स्थानिव'दिति ॥ नैषोऽस्ति प्रतिषेधः । उक्तमेतत्–'प्रतिषेधे स्वरदीर्घयलोपेषु लोपाऽजादेश'इति ॥ जिव्रिप्रतिषेधश्च न वक्तव्यः । 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' ॥ चतुर्यिता चतुर्यितुमिति–'सुपि ने'ति वर्तते ॥ यद्येवं गीर्भ्यां गीर्भिरित्यप्रसिद्धिः ॥ न सुपो विभक्तिविपरिणामाद्गीर्भ्यां गीर्भिरित्यदोषः ॥ 'उणादिप्रतिषेधो वक्तव्य' इति,–परिहृतमेतत्,–'उणादयोऽव्युत्पन्नानि प्रातिपदिकानी'ति ॥ [उपधायां च] ।

अदसोसेर्दादु दो मः ।८।२।८०।

॥ * ॥ अदसोऽनोस्रेः ॥ * ॥ अदसोऽनोस्रेरिति वक्तव्यम् ॥ किमिदमनोऽस्रेरिति ? ॥ अनोकारस्य, असकारस्य, अरेफस्येति । अनोकारस्य–अदोऽत्र ॥ असकारस्य–अदस्यति । अरेफस्य–अदः ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । क्रियते न्यास एव । अविभक्तिको निर्देशः–'अदस्-ओ असे'-रिति । ओकारात्परः प्रतिषेधः पूर्वभूतः । ततः सकारः । ततो रेफ इति ॥

प्र.] क्रिन् रश्च व' इति व्युत्पन्नः । तत्रोणादिप्रतिषेधश्चेति सिद्धे प्रपञ्चार्थः पाठः । चतुर्यितेति। चतुर इच्छतीति क्यच् । तृच् । इट् । अतो लोपे कृते धातोरुपधारेफ इति दीर्घत्वप्रसङ्गः । स्वरेति । 'पूर्वत्राऽसिद्धे न स्थानिव'दिति स्थानिवत्त्वनिषेधाद्दीर्घः प्राप्नोति, तस्मादभ्यासप्रतिषेधो वक्तव्य एवेत्याहुः । न सुप इति। सुपः परो यो हल् तत्परयोर्वोर्दीर्घो न भवतीत्यर्थः । [उपधायां च] ।

उ.]पस्याऽसिद्धत्वं तु न,त्रैपादिकेऽन्तरङ्गे तदप्रवृत्तेः। इत्याहुरिति। 'पूर्वत्रासिद्धेने'त्यस्यापि स नियम इति तु भाष्याशय इत्यत्राऽरुचिः । भाष्ये–सुपिनेति वर्तत इति । आधारत्वविवक्षया सप्तमी । सुबन्तावयवस्येको नेत्यर्थ इति भावः । एतेन चतुर्यितेत्यादौ अन्तर्वर्त्तिसुपो लुका लुप्तत्वेन विशिष्टोत्तरं सुपो व्यवहितत्वेन च दोष इत्यपास्तम् । सुपः पर इति । सप्तम्यन्तस्य पञ्चम्या विपरिणाम इति भावः । [उपधायां च]॥

अदसोऽसेः । वार्तिके–अनोस्रेरिति बहुव्रीहिः । इकार उच्चारणार्थः । अविद्यमानौकार-

अथ वा नैवं विज्ञायते—'अदसोऽसकारस्ये'ति ।। कथं तर्हि ?।। अकारोऽस्य सकारस्य सोऽयमसिः, असेरिति ।। यद्येवममुमुयङ्ङिति न सिध्यति, अदद्र्यङ्ङिति प्राप्नोति ।। अदमुयङ्ङिति भवितव्यम् 'अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवती'ति ।।

।। ❀ ।। अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत् ।
केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते ।। ❀ ।।

।। ❀ ।। तत्र पदाधिकारादपदान्तस्याऽप्राप्तिः ।। ❀ ।। तत्र पदाधिकारादपदान्तस्य न प्राप्नोति—अमुया अमुयोरिति ।। ❀ ।। सिद्धन्तु सकारप्रतिषेधात् ।। ❀ ।। सिद्धमेतत् ।। कथम् ? ।। 'सकारप्रतिषेधात्' । यदयमसेरिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्योऽपदान्तस्यापि भवतीति ।।

प्र.] अदसोऽसे । ओकारात्पर इति । सूत्रे तावत्पदानि निर्दिष्टान्युत्तरकालं तु यथेष्टमभिसंबन्धे लक्ष्यसंस्कारकवाक्यमुपप्लवमानमभिमतमर्थं संपादयति । असेरिति । यत्र सकारस्य त्यदाद्यत्वं क्रियते तत्र मुत्वं नान्यत्रेत्यर्थः । यद्येवमिति । त्यदाद्यत्वाऽभावान्मुत्वाऽप्रसङ्गः । अदमुयङिति । अःसेर्यस्येत्येवमनाश्रयणेऽपि नैवाऽमुमुयङिति भाव्यमित्यर्थः । अदसोऽद्रेरिति । ये—न सिः असिरिति सकारान्तप्रतिषेधमाश्रयन्ति नाऽन्त्यसदेशपरिभाषां, तेऽमुमुयङितीच्छन्ति । यथा 'चलीक्लृप्यत'इति रेफद्वयस्य लत्वम् । अन्त्यसदेशपरिभाषाश्रये त्वदमुयङिति ये तु त्यदाद्यत्वविषये एव मुत्वमिच्छन्ति ते 'अदद्र्य'ङिति मन्यन्ते। असेर्हीति। अः सेर्यस्य सोऽसिस्तस्येत्यर्थः । यदयमिति । 'अदस्यती'त्यत्र 'नः क्ये'इति नियमाददसोऽपदत्वान्मुत्वं न भविष्यतीति किं निषेधेन ?। निषेधात्त्वपदस्याऽप्यदसो मुत्वं भवति—अमुयेति, पदस्याऽपि—अमुष्य अमूभ्यामिति । अन्त्य-

---

उ.] सकाररेफस्याऽदस इत्यर्थः। 'अद'इति विसर्गस्याऽसिद्धत्वाद्रेफान्तं । भाष्ये—ओकारात्परः प्रतिषेधः पूर्वभूत इति । भूतपूर्वः—पूर्वरूपं प्राप्त इत्यर्थः । 'ओ'इति लुप्तषष्ठीकं । 'सेर'इति रेफान्तं । तथैव इकार उच्चारणार्थ इति बोध्यम्। 'असे'रित्यसमर्थसमासः। ओकारसकाररेफान्तस्याऽदसो न मुत्वमित्यर्थः। तदाह—सूत्रे इति । अत एवादोऽनुपदेश इति निर्देशः सङ्गच्छते। अकारोऽस्येति भाष्येण व्यधिकरणबहुव्रीहिरित्युक्तं। तदाह—यत्रेति। त्यदाद्यत्वमित्युपलक्षणमाकारस्यापि । तेनाऽमूदृक् सिद्ध्यति । अदसोद्रेरिति । एवञ्च तन्त्रेणार्थद्वयेऽपि सूत्रतात्पर्यं, लक्ष्यानुरोधाच्च व्यवस्था । आचार्यमतभेदाच्च रूपत्रयमपि

अथ दाद्ग्रहणं किमर्थम् ? ।। ।। * ।। दाद्ग्रहणमन्त्यप्रतिषेधार्थम् ।। * ।। दाद्ग्रहणं क्रियते ।। [किं प्रयोजनम् ? ।।] 'अन्त्यप्रतिषेधार्थम्' ।। अलोऽन्त्यस्य मा भूत् । अमुया अमुयोरिति ।। [अदसोऽसेर्दादुदोमः] ।

एत ईद्बहुवचने ।८।२।८१।

।। * ।। ईत्वं बहुवचनान्तस्य ।। * ।। ईत्वं बहुवचनान्तस्येति वक्तव्यम् । 'बहुवचन' इतीयत्युच्यमाने इहैव स्यात्—अमीभिः अमीषु। इह न स्यात्—अमी अत्र, अमी आसते इति ।। तत्तर्हि वक्तव्यं ? ।। न वक्तव्यम् । नेदं पारिभाषिकस्य बहुवचनस्य ग्रहणं ।। किं तर्हि ? ।। अन्वर्थग्रहणमेतत् । बहूनामर्थानां वचनं बहुवचनं, बहुवचन इति ।। [एत ईद्बहु] ।

वाक्यस्य टेः प्लुत उदात्तः ।८।२।८२।

वाक्याधिकारः किमर्थः ? ।। * ।। वाक्याधिकारः पदनिवृत्त्यर्थः ।। * ।। वाक्याधिकारः क्रियते । [किं प्रयोजनं ?] ।। 'पदनिवृत्त्यर्थः' । पदाधिकारो

प्र.] स्येति । 'अलोऽन्त्यस्ये'ति वचनादमुयेत्यत्र यकारस्योत्वं स्यात् ।

एत ईद्बहुवचने । ईत्वमिति । 'कृत्रिमाऽकृत्रिमयोः कृत्रिमे संप्रत्यय'इति वचनात्प्रत्ययस्य बहुवचनस्य ग्रहणेन भाव्यं, ततश्च 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति परिभाषोपस्थानाद्बहुवचने परत एकारस्येत्त्वेन भाव्यममीभिरित्यादौ, नत्वमी इत्यत्रेति भावः। नेदमिति। उभयगतिरिह शास्त्रे भवतीति प्रतिपादितं, तत्र व्याप्तिन्यायाश्रयादिहाऽर्थग्रहणम् । [अदसोऽसेर्दादु दो मः]

वाक्यस्य टेः । वाक्यस्थस्यैव पदस्य प्रयोगो न केवलस्येति मत्वाह- वाक्याधिकार इति । पदनिवृत्त्यर्थ इति । पदस्येति यत्प्रस्तुतं तन्निवृत्त्यर्थः ।

उ.] साध्विति भावः । परंतु 'यद्येव'मित्यादिपूर्वपक्षोक्तरमदमुयङिति भवितव्यमिति भाष्योक्तेरेतदेव रूपं भाष्याभिप्रेतम् । अथवेति व्याख्यादूषणमेवेदं, श्लोकश्लोक्तपक्षद्वयप्राप्तरूपानुवादमात्रमेकदेशिनः। अतएवाग्रेऽसेरिति प्रतिषेधं शास्तीत्युक्तमित्याहुः ।

एत ईत् । प्रत्ययस्य बहुवचनस्य- तत्संज्ञकस्य । ग्रहणेन भाव्यं । 'बहुवचनग्रहणेने'ति शेषः । [एत ईद्बहुवचने] ॥

वाक्यस्य टेः । ननु वाक्यस्थस्यैव पदस्य यथा स्यान्न तु केवलस्येति पदविशेषणार्थं वाक्याधिकारः स्यादत आह-वाक्यस्थस्येति। ततश्चाऽव्यभिचारान्न पदविशेषणेनाऽर्थ इति भावः। 'प्रविश पिण्डी'मिति केवलस्यापि प्रयोगदर्शनादिदं चिन्त्यं। नन्वधिकारस्याधिकारान्तर-

निवर्त्यते ॥ न हि काको वाश्यत इत्यधिकारा निवर्त्तन्ते । दोषः खल्वपि स्याद्यदि वाक्याधिकारः पदाधिकारं निवर्तयेत् । इष्यन्त एवोत्तरत्र पदकार्याणि, तानि न सिध्यन्ति—'नश्छव्यप्रशा'निति ॥

पदनिवृत्त्यर्थमिति नैवं विज्ञायते,—पदस्य निवृत्त्यर्थं पदनिवृत्त्यर्थमिति ॥ किं तर्हि ? ॥ पदे निवृत्त्यर्थं पदनिवृत्त्यर्थमिति । वाक्ये यावन्ति पदानि तेषां सर्वेषां टेः प्लुतः प्राप्नोति, इष्यते च वाक्यपदयोरन्त्यस्य स्यादिति, तच्चान्तरेण यत्नं न सिध्यतीत्येवमर्थो वाक्याधिकारः ॥

अथ टिग्रहणं किमर्थम् ? ॥*॥ टिग्रहणमलोन्त्यनियमे व्यञ्जनान्तार्थम् ॥*॥ टिग्रहणं क्रियते । [किं प्रयोजनम् ? ॥ 'अलोऽन्त्यनियमे व्यञ्जनान्तार्थम्'] । अलोन्त्यनियमे व्यञ्जनान्तस्यापि यथा स्यात्—अग्निचीउत् सोमसूउत् ॥ अस्ति प्रयोजनमेतत् ? ॥ किं तर्हीति ॥

॥ * ॥ सर्वादेशप्रसङ्गस्तु ॥ * ॥ सर्वादेशस्तु टेः प्लुतः प्राप्नोति ॥ किं कारणम् ? ॥ 'अच' इति वचनादन्त्यस्य न, 'अन्त्यस्येति' वचनादचो न,

---

प्र.] नहि काक इति । नहि वाक्यग्रहणस्य पदाधिकारनिवृत्तिर्वाच्या यथा काकवाशितस्येत्यर्थः । विरोधाऽभावाच्चाऽशक्यः पदाधिकारो निवर्त्तयितुं, वाक्यस्थस्यैपदस्यैव कार्याभ्युपगमादित्याह—दोष इति । नश्छवीति । हन्तीत्यादावपदान्तस्य रुर्न भवति । नैवमिति । 'पदस्ये'त्यनुवर्तत एव । पदस्य टेः प्लुतो मा भूत्पदवाक्ययोर्यष्टिस्तस्यैव यथा स्यादित्येवमर्थं तु वाक्यग्रहणमित्यर्थः । टिग्रहणमिति । असति टिग्रहणे प्लुतश्रुत्याऽच्परिभाषोपस्थानादचा तदन्तविधौ सत्यजन्तस्यैव वाक्यस्याऽलोऽन्त्यस्येति वचनादन्त्यस्याचो नपुंसकह्रस्व इव प्लुतः स्यात् । टिग्रहणे तु तदुपादानसामर्थ्याट्टिनाऽज्विशेष्यते, नत्वचा टिरिति हलन्तस्यापि प्लुतः सिध्यति । सर्वादेशप्रसङ्गस्त्विति । 'अचश्चे'त्ययमलोन्त्यशेष इति भावः । अच इति वचनादिति । इह तस्याऽनुपस्थानादिति भावः । सर्वादेश इति ।

उ.] निवर्त्तकत्वं दृष्टमित्यत आह—विरोधाभावाच्चेति । भाष्ये—पदे निवृत्त्यर्थमिति । पदे परतः पूर्वपदान्तस्य प्लुतनिवृत्त्यर्थमित्यर्थः । वाक्यान्तस्यैव पदान्तस्य यथा स्यादित्यर्थमिति भावस्तदाह—पदस्य टेरिति । भाष्ये—अलोन्त्यनियमे इति । अऽलोन्त्यनियमे सति व्यञ्जनान्तस्य न स्यात्तदर्थमित्यर्थस्तदाह—असतीति । सति तु पदावयवटेरवयवस्याऽच इत्यर्थ इति भावः । इह तस्येति । अच इत्यस्याऽलोन्त्यस्येत्यस्य चेत्यर्थः ।

उच्यते च प्लुतः ॥ स सर्वादेशः प्राप्नोति ॥*॥ उक्तं वा ॥*॥ [उक्तं वा] ॥ किमुक्तम् ? ॥ 'ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयादच इत्येतत्तत्रोपस्थितं द्रष्टव्य'मिति ॥ [वाक्यस्य टेः प्लुतः]

प्रत्यभिवादेऽशूद्रे। ८।२।८३।

अशूद्र इति किमर्थम् ? ॥ कुशल्यसि तुषजक ! ॥ अत्यल्पमिदमुच्यते 'अशूद्र' इति । ॥*॥ अशूद्रस्त्र्यसूयकेषु ॥*॥ अशूद्रस्त्र्यसूयकेष्विति वक्तव्यम् । तत्र शूद्र उदाहृतम् । स्त्रियां-गार्ग्यहं भोः, आयुष्मती भव गार्गि ! । असूयके—स्थाल्यहं भोः ॥ आयुष्मानेधि स्थाली३न् ॥ नैषा मम संज्ञा स्थालीति

प्र.]हलन्तस्य टेः सर्वस्य स्थाने इत्यर्थः। **उक्तंवेति।** द्वितीया षष्ठी 'अच' इति प्रादुर्भाव्यते, तत्र टिनाऽचो विशेषणादच एव स्थाने प्लुतो भवति । **[वाक्यस्य टेः]** ॥

प्रत्यभिवादे । गार्ग्यहं भो इति । केचिदाहुः—'न स्त्र्यभिवादयते पादोपसङ्ग्रहणान्येव तु करोति' । अन्ये त्वाहुः—'अभिवादयते न तु स्वनाम गृह्णाति । अभिवादप्रत्यभिवादौ च नामगोत्राभ्यामिति स्त्रीप्रतिषेधो न विधेयः' । ये तु स्त्रिया नाम्नाऽभिवादप्रत्यभिवादाविच्छन्ति तन्मतेनाऽयं प्रतिषेधः। **नैषा ममेति ।** असूयकः प्रत्याचष्टे—प्रत्यभिवादवाक्यान्तस्थस्य नाम्नो गोत्रस्य च प्लुत इष्यते नान्यस्येति यौगिकस्य प्लुतो न विधेयः । तत्र प्रत्यभिवादयित्रा स्थालीशब्दं संज्ञां मत्वा प्लुतो विहितः । यदा तूपहासार्थमसूयकस्तमाक्षिपति तदाऽसौ प्रत्यभिवादं नार्हत्याशीर्वचनं हि प्रत्यभिवादो गृह्यते । प्रतिसम्भाषणमात्रन्तु प्रत्यभिवाद मत्वा वार्तिककृताऽसूयके प्रतिषेध उक्तः। शूद्रेऽप्याशीर्वचनरूपप्रत्यभि-

---

उ.] परस्परविरोधेनोभयोरपि त्यागादिति भावः । भाष्ये-**स सर्वादेशः प्राप्नोती**त्युत्तरं । तस्मादच इति वक्तव्यमिति शेषो बोध्यस्तदेवाह—**उक्तं वेति** । उक्तं चेति 'च' घटितपाठे तु सम्यगेव । त्वर्थे वा वाशब्दः । **द्वितीयेति** । पदोपस्थितिपक्ष एव तत्र स्थितो न तु तच्छेषपक्ष इति भावः । **[वाक्यस्य टेः प्लुत उदात्तः]**

प्रत्यभिवादे । अभिवादयितर्यनुग्रहद्योतकमाशीरूपं कुशलादिप्रश्नरूपं वा वाक्यमात्रं प्रत्यभिवादः। तदाह—भाष्ये-**कुशल्यसि तुषजकेति । नस्त्र्यभिवादयते इति।** अभिवादाऽभावे प्रत्यभिवादस्य सुतरामभाव इत्यर्थः। **ये त्विति** । इदमेव भाष्यसंमतं। भाष्ये 'एधी'ति भवेत्यर्थकम्। 'आयुष्मान्भव सौम्ये'ति स्मृतौ भवेत्यर्थपरं। **नाम्न इति** । रूढस्य संज्ञाभूतस्येत्यर्थः। **प्रत्यभिवादं नार्हतीति** । विपरीतं शापमेवार्हतीत्यर्थः। **आशीर्वचनं हीति ।** इदं हि प्रत्यभिवादयितर्यनुग्रहद्योतककुशलप्रश्नादेरप्युपलक्षणं । । **प्रतिसंभाषणमात्र**

[ति[1]] ॥ किं तर्हि ? ॥ दण्डिन्यायो मम विवक्षितः स वक्तव्यः—स्थाल्यहं भोः॥ आयुष्मानेधि स्थालिन् ॥ न मम दण्डिन्यायो विवक्षितः ॥ किं तर्हि ? ॥ संज्ञा ममैषा ॥ असूयकस्त्वमसि जाल्म न त्वं प्रत्यभिवादमर्हसि भिद्यस्व वृषल ! स्थालिन् ! ॥*॥ भोराजन्यविशां वा ॥*॥ भो राजन्यविशां वेति वक्तव्यम् । देवदत्तोऽहं भोः, आयुष्मानेधि देवदत्त भोः ३ । [आयुष्मानेधि[1]] देवदत्त भोः । भोः ॥ राजन्य—इन्द्रवर्माऽहं भोः । आयुष्मानेधीन्द्रवर्मा३न् । [आयुष्मानेधि[1]] इन्द्रवर्मन् ॥ राजन्य ॥ विट्—इन्द्रपालितोऽहं भोः । आयुष्मानेधीन्द्रपालिता ३ । [आयुष्मानेधि[1]] इन्द्रपालित ।

अपर आह—॥*॥ सर्वस्यैव नाम्नः प्रत्यभिवादे भोशब्द आदेशो वा[1] वक्तव्यः ॥*॥ देवदत्तोऽहं भोः । आयुष्मानेधि भोः ३ । आयुष्मानेधि देवदत्ता ३ इति वा ॥ इह कस्मान्न भवति—देवदत्त कुशल्यसीति ? ॥ इह किं चिदुच्यते किंचित्प्रत्युच्यते । प्रधानमुच्यतेऽप्रधानं[2] प्रत्युच्यते[3] ।

प्र.]वादाभावात्प्रतिषेधो न विधेय इति केचिदाहुः। स वक्तव्य इति। अभिवादयिता प्रत्यभिवादयित्रैवं वक्तव्य इत्यर्थः । भिद्यस्वेति । कर्मकर्तर्यात्मनेपदम् । भोराजन्यविशां वेति । भोःशब्दो—भवच्छब्दः, सम्बुद्ध्यन्तो निपातो वा । सर्वेति। नामगोत्रशब्दमन्तरेण प्रत्यभिवादो नास्तीति समाचारे भोःशब्दस्याऽसाधुत्वे प्राप्ते वचनम् । इह किं चिदिति । पदस्येति वर्तते तद्विशेषणं प्रत्यभिवाद इति, तेन प्रत्यभ्युद्यमानार्थवाचिनः पदस्य वाक्यान्तस्य टेः प्लुत्या भाव्यं नान्यस्येत्यर्थः । प्रधानस्थस्येति । संस्क्रियमाणस्य प्राधान्यं । कुशल्यसीति । साध्याया

उ.] मिति । अभिवादयितर्यनुग्रहद्योतकमन्यादृशं वेत्यर्थः । केचिदाहुरिति । अनुग्रहद्योतककुशलप्रश्नाद्यपि प्रत्यभिवाद इत्यत्राऽरुचिः । कर्मकर्तरीति । स्वयमेव भिन्नो भवेत्यर्थः ।

ननु संबुद्ध्यन्तेन निपातेन वा भोःशब्देन सिद्धे आदेशविधानं व्यर्थमत आह—नामगोत्रेति । एवञ्च सर्वत्रेयं प्राप्तविभाषेति तात्पर्यम् । आद्यमते तु भोःशब्दांशेऽप्राप्तविभाषा, इतरयोस्तु प्राप्तविभाषेति बोध्यम् । तेनेति । 'प्रत्यभिवादे' इति विषयसप्तमी । यत्पदं प्रत्यभिवादविषयं साक्षाद्वक्ति तस्य लुप्तः । तच्च नाम गोत्रं वा । अत्र तु नामपदं न वाक्यान्ते इति भावः। ननु क्रियाया एव सर्वतः प्राधान्यमत आह-संस्क्रियमाणस्येति । अभिवादयित्रनुग्रहार्थकत्वात्तस्य तेन तस्य संस्कार्यत्वमिति भावः । साध्याया अपीति । अतएव शब्दतः प्रधानाया अपीत्यर्थः। भाष्ये-प्रधानमुच्यते अप्रधानं प्रत्युच्यते इति। अयमर्थः-प्रधानं संस्कार्यं देवदत्तादिकं प्रथमत उच्यते । अप्रधानं संस्कारकं

तत्र[1] प्रधानस्थस्य च[2] टिसंज्ञकस्य प्लुत्या भवितव्यं न चाऽत्र प्रधानस्थं टिसंज्ञम् ॥ इहापि तर्हि न प्राप्नोति–आधेयोऽग्नी३र्नाधेया[4] ३ इति ॥ नैतद्विचार्यते–आधेयोऽनाधेयोऽग्निश्चेद्भवतीति ॥ किं तर्हि? ॥ इहाऽग्निसाधना[5] क्रिया विचार्यते–आधेयोऽग्निर्नाधेय इति ॥ यद्येवं द्वितीयोऽग्निशब्दस्य[6] प्रयोगः प्राप्नोति ॥ 'उक्तार्थानामप्रयोग' इति न भविष्यति ॥

यद्येवमाधेयशब्दस्यापि[7] तर्हि द्वितीयस्य प्रयोगो न प्राप्नोति–'उक्तार्थानामप्रयोगो भवती'ति ॥ नैष दोषः । उक्तार्थानामपि प्रयोगो दृश्यते । तद्यथा

प्र.] अपि क्रियायाः संस्कारिकात्वेन विवक्षितत्वादप्राधान्यम् । क्वचित्पाठः–'अप्रधानमुच्यते प्रधानं प्रत्युच्यते' इति । तस्याऽर्थः–अभिवादवाक्ये श्रुतो देवदत्तादिरेव प्रत्युच्यते, कुशल्यसीत्येतत्तु पूर्वमश्रुतत्वान्न प्रत्युच्यते, किं त्वपूर्वमेवैतदुच्यते । **इहापीति ।** द्रव्यस्य विचार्यमाणत्वात्प्राधान्यं मन्यते । **नैतदिति ।** न ह्याधानाऽनाधानकर्मविशेषविषयो विचारो, नाप्यग्निविशेषविषयः–किमाहवनीयोऽथ दक्षिणाग्निरिति, किं तर्ह्याधानं कर्तव्यं न कर्तव्यमिति तत्साधनक्रियाविचारः । **यद्येवमिति ।** 'नाधेयोऽग्नि'रित्येवमग्निशब्दो निर्देश्यः । **उक्तार्थानामिति ।** अग्निरेव प्रकृतत्वादपेक्ष्यत इत्यर्थः । **उक्तार्थानामपीति ।** उक्ताऽर्था-

उ.] कुशल्यसीत्येत[त्तु][2] **प्रत्युच्यते**–पश्चादुच्यते । एवञ्च वाक्यान्ते प्रधानस्य टेरभावान्न भवतीति भावः । तद्बीजं तु कैयटेनोक्तमेव । **अभिवादवाक्ये इति ।** अन्यत्र सिद्धस्यैव हि संस्कारार्थमनुवादो युज्यते इति भावः । अतएव संबोधनविभक्त्या निर्देशः । भाष्यस्थ–'प्रत्युच्यत' इत्यस्याऽनूद्यत इत्यर्थः । **अपूर्वमिति ।** विधेयत्वादिति भावः । एवञ्चाऽनूद्यमानस्य वाक्यान्तस्थत्वाभावान्न प्लुत इति तात्पर्यम् । अत्र पक्षे 'प्रधानस्थस्ये'त्यस्याऽनूद्यमानस्थस्येत्यर्थः । **द्रव्यस्येति ।** अग्निरूपस्येत्यर्थः । एवञ्च तद्वाचिन एव वाक्यान्तस्य टेः प्लुतः स्यान्न तु 'नाधेय' इत्यस्यापीति भावः । **विचार्यमाणत्वादिति ।** द्वयोर्बलज्ञानं विचारस्तद्विषयत्वादित्यर्थः । **न हीति ।** 'आधेयोऽग्नि'रित्यत्र त्रितयमस्ति, अग्निशब्दवाच्यं द्रव्यं । धातुवाच्या क्रिया, प्रत्ययवाच्यं कर्म । तत्र क्रियाविषय एव विचारो नेतरविषयः । तत्राग्निः किमाधानक्रियाकर्म तत्साध्यत्वादुत्तानाधानक्रियाया इति न विचार्यते इत्यर्थः । कोऽग्निराधेय इत्यपि नेत्याह–**नापीति । तत्साधनक्रिया**–अग्निसाधनाधानक्रिया । आधेयोऽग्निरित्यत्र तु क्रियावाचिनोऽन्त्यपदत्वाऽभावात्तदुपलक्षितद्रव्यवाचिनो वाक्यान्तस्याऽग्निपदस्यापि प्लुत इति बोध्यम् । प्रधानस्थस्य प्रधानक्रियोपलक्षितस्थस्य च **तेन** प्लुतो विधीयते, अत्र चा'धेयोऽग्निर्नाऽऽधेया ३' इति भाष्यप्रयोग एव मानं । नन्वर्थप्रत्यायनाय शब्दप्रयो-

'अपूपौ द्वावानय' 'ब्राह्मणौ द्वावानये'ति ॥ [प्रत्यभिवादेऽशूद्रे]

दूराद्धूते । च ८।२।८४ ।

दूराद्धूत इत्युच्यते दूरशब्दश्चाऽयमनवस्थितपदार्थकस्तदेव हि कंचित् प्रति दूरं कंचित्प्रत्यन्तिकं भवति । एवं हि कश्चित्कंचिदाह–'एष पार्श्वतः करकस्तमेनमानये'ति । स आह—'उत्थाय गृहाण, दूरं न शक्ष्यामी'ति । अपर आह–'दूरं मथुरायाः पाटलिपुत्र'मिति । स आह–'न दूरमिदमन्तिक'-मिति । एवमेष दूरशब्दोऽनवस्थितपदार्थकस्तस्याऽनवस्थितपदार्थकत्वान्न ज्ञायते–'कस्यामवस्थायां प्लुत्या भवितव्य'मिति ? ॥ एवं तर्हि ह्वयतिनाऽयं निर्देशः क्रियते-'ह्वयतिप्रसङ्गे यद्दूरम्' ॥ किं पुनस्तत् ? ॥ यत्र प्राकृतात्प्रयत्नात्प्रयत्नविशेषेऽनुपादीयमाने सन्देहो भवति, 'श्रोष्यति न श्रोष्यती'ति, तद्दूरमिहाऽवगम्यते ॥ [दूराद्धूते च] ॥

हैहेप्रयोगे हैहयोः । ८।२।८५ ।

प्र.]भिमता उक्तार्थाः सादृश्यादुच्यन्ते, तत्त्वतस्तु यथा वृषवृषभशब्दौ भिन्नौ, तथाऽपूपावानय अपूपौ द्वावानयेत्येतौ, समुदायावेवार्थवन्तौ लोके प्रयुज्येते । प्रयोगानुसारेण लक्षणव्यवस्थाश्रीयते, तेनोक्तार्थानां प्रयोगेऽव्यवस्था नोद्भावनीया ।

दूराद्धूते च । तदेवेति । दूरस्याऽनवस्थितत्वात्प्लुतस्य विषयविभागो न व्यवतिष्ठत इत्यर्थः । ह्वयतीति । ह्वानक्रियापेक्षं दूरत्वमाश्रीयते न तु श्रोत्रादिपुरुषापेक्षमित्यर्थः । [दूराद्धूते च] ।

हैहैप्रयोगे हैहयोः । पूर्वेण हूयमानार्थस्य पदस्य वाक्यान्तस्य टेः प्लुतवि-

---

उ.] गाच्छब्दान्तरेणोक्ते किमर्थं तत्प्रयोगोऽत आह-**तत्त्वतस्त्विति** । यथा वृषवृषभयोरखण्डपदवादेऽत्यन्तभेदेऽपि अवयवे ध्वनिसाम्याद्वृषशब्दत्वभ्रमस्तथानयोरत्यन्तभेदेऽपि सादृश्यादवयवे तत्त्वभ्रम इति न पौनरुक्त्यमिति भावः । नन्वेवं 'वृषो वृषभ' इत्यपि प्रयोगः स्यादित्याशङ्क्य 'स्थितस्य गति'रित्ति न्यायेन प्रयोगानुसाराद्व्यवस्थेत्याह–**प्रयोगेति** ।

दूराद्धूते च । ह्वानेति । दूरस्थपुरुषश्रवणाय यदाह्वानमित्यर्थः । **दूरादिति** । 'दूरान्तिकार्थेभ्य' इति पञ्चमी । भाष्ये यत्र प्राकृतात्प्रयत्नाद्विशेषे अनुपादीयमाने इति पाठः । **विशेषे**–अधिके यत्ने । **[दूराद्धूते च]** ।

हैहेप्र । ननु दूराद्धूते हैहयोर्दूराद्धूतेचेति सूत्रान्तरेण सिद्धत्वादिदमनर्थकमित्यत

हैहेग्रहणं किमर्थम् ? ॥*॥ हैहेप्रयोगे हैहेग्रहणं हैहयोः प्लुत्यर्थम् ॥ * ॥ हैहेप्रयोगे हैहेग्रहणं क्रियते ॥ **किमर्थम् ?** ॥ [**'हैहयोः प्लुत्यर्थम्'**] । हैहयोः प्लुतिर्यथा स्यात् । देवदत्त है३ देवदत्त हे३ । अक्रियमाणे हि हैहेग्रहणे तयोः प्रयोगेऽन्यस्य स्यात् ॥ **अथ प्रयोगग्रहणं किमर्थम् ?॥*॥ प्रयोगग्रहणमर्थवद्ग्रहणेऽनर्थकार्थम् ॥*॥** प्रयोगग्रहणं क्रियते । [किं प्रयोजनम् ? ॥ **'अर्थवद्ग्रहणेऽनर्थकार्थम्'** ।] अर्थवद्ग्रहणेऽनर्थकयोरपि यथा स्यात् । देवदत्त है३ । देवदत्त हे३ ॥ **अथ पुनर्हैहेग्रहणं किमर्थम् ? ॥*॥ पुनर्हैहेग्रहणमनन्त्यार्थम् ॥ * ॥** [पुनर्हैहेग्रहणं क्रियते ॥ किं प्रयोजनम् ? ॥ **'अनन्त्यार्थम्'**] । अनन्त्ययोरपि यथा स्यात् । है३ देवदत्त' हे३ देवदत्तेति ॥ [हैहेप्रयोगे]

गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ।८।२।८६ ।

॥ * ॥ गुरोः प्लुतविधाने लघोरन्त्यस्य प्लुतप्रसङ्गोऽन्येन विहितत्वात् ॥ * ॥ **गुरोः प्लुतविधाने लघोरन्त्यस्य प्लुतः प्राप्नोति । दे३वदत्त ॥ किं कारणम् ? ॥** 'अन्येन विहितत्वात्' । अन्येन हि लक्षणेन लघोरन्त्यस्य प्लुतो विधीयते

प्र.]धानाद्धैहयोर्न प्राप्नोतीति वचनम्। **हैहयोः प्लुत्यर्थमिति** । अन्यथाऽऽरम्भसामर्थ्यादनन्त्यस्यापि हूयमानवाचिन एव प्लुतः स्यात्—देवदत्त है ३ इत्यादौ । **अनर्थकयोरपीति** । यदा तु प्राक् सम्बोधनपदं प्रयुज्यते तदा हैहयोर्द्योत्यार्थाऽभावादानर्थक्यं, यदा तु तयोः प्राक् प्रयोगस्तदाऽऽमन्त्रणाभिव्यक्त्यर्थत्वादर्थवत्त्वम् । **अनन्त्ययोरपीति** । अन्यथा वाक्यस्य टेरित्यधिकारादनन्त्ययोर्न स्यात् ।

गुरोः । गुरोः प्लुतविधान इति । 'अनन्त्यस्यापी'त्यपिशब्देन गुरोः सन्निधानात्स एवाऽन्त्यः समुच्चीयते, तेन यत्र गुरुरन्त्यस्तत्रैव पर्यायः स्याल्लघौ त्वन्त्ये पूर्वेण तस्य स्यादनेन चाऽनन्त्यस्य गुरोरित्यर्थः । **न वेति** । अपिशब्देन

उ.]आह-**पूर्वेणेति** । नामगोत्रयोरेव हूयमानार्थवृत्तित्वं, हैहयोस्तु न तदर्थत्वमाभिमुख्यद्योतकत्वादित्यर्थः । भाष्ये-**हैहयोरिति** । अतादृशयोरित्यर्थः । **अन्यथेति** । 'हैहेप्रयोगे' इतीयत्युच्यमाने इत्यर्थः । है देवदत्तेत्यादौ पूर्वेणैव सिद्धेरिति भावः । आनर्थक्यं व्युत्पादयति-**यदेति** । **द्योत्यार्थाभावादिति** । संबोधनेनैवाऽऽभिमुख्यस्य द्योतितत्वादिति भावः । प्रयोगग्रहणे तु यथा कथञ्चित्तयोः प्रयोग एव सिद्धे षष्ठयुच्चारणसामर्थ्याद्धैहयोः प्लुतसिद्धिरित्यर्थः । [**हैहेप्रयोगे हैहयोः**] ।

गुरोरनृतो । लघौ त्वन्त्ये इति । तत्र प्लुतयोर्यौगपद्यप्रसङ्ग इत्यर्थः । **प्रकृताद्वि**

'दूराद्धूते चे'ति ॥*॥ न वाऽनन्त्यस्यापीति वचनमुभयनिर्देशार्थम् ॥*॥ न वैष दोषः ॥ किं कारणम् ? ॥ ['अनन्त्यस्यापीति वचनमुभयनिर्देशार्थम्']। अनन्त्यस्यापीति वचनमुभयनिर्देशार्थं भविष्यति 'अनन्त्यस्यापि गुरोरन्त्यस्यापि टे'रिति ॥ ननु चैतद्व्यपेक्षं स्यात्-अनन्त्यस्यापि गुरोरन्त्यस्यापि गुरोरिति ? ॥ नेत्याह । व्यपेक्षमेतत् । अनन्त्यस्यापि गुरोरन्त्यस्यापि टेरिति ॥ अथ प्राग्वचनं किमर्थम् ? ॥ * ॥ प्राग्वचनं विभाषार्थम् ॥*॥ प्राग्वचनं क्रियते ॥ [किं प्रयोजनं ? ॥ 'विभाषार्थम्']॥ विभाषा यथा स्यात् ॥ * ॥ प्राग्वचनानर्थक्यं चैकैकस्येति वचनात् ॥ * ॥ [प्राग्वचनमनर्थकम् ॥ किं कारणम् ?॥ 'एकैकस्येति वचनात्']। एकैकग्रहणं क्रियते तद्विभाषार्थं भविष्यति ॥ अस्त्यन्यदेकैकग्रहणस्य प्रयोजनम् ॥ किम् ?॥ युगपत्प्लुतो मा भूदिति ॥ 'अनुदात्तं पदमेकवर्ज'मिति वचनान्नाऽस्ति यौगपद्येन संभवः ॥ असिद्धः प्लुतस्तस्याऽसिद्धत्वान्नियमो न प्राप्नोति ॥ नैष दोषः । यद्यपीदं तत्राऽसिद्धं तत्त्विह सिद्धम् ॥ कथम् ? ॥ 'कार्यकालं संज्ञापरिभाष'मिति। यत्र कार्यं तत्रोपस्थितं द्रष्टव्यं । 'गुरोरनृतोनन्त्यस्याप्येकैकस्य प्राचाम्' । उपस्थितमिदं भवत्यनुदात्तं पदमेकवर्जमिति ॥ इहापि तर्हि समावेशो न प्राप्नोति—देवदत्ता ३ ॥ सिद्धाऽसिद्धावेतौ । यौ हि

प्र.] प्रकृतष्टिः समुच्चीयते न तु गुरुरेवाऽन्त्य इत्यर्थः । **विभाषार्थमिति** । तेन पक्षे न कस्यचित्प्लुतो भवति । इतरस्तु पक्षेऽनन्त्यस्य प्लुतः पक्षे त्वन्त्यस्य टेरित्येवमर्थं प्राग्ग्रहणमनेनोक्तमिति मत्वाह—**प्रागिति** । **यद्यपीदमिति** । यथोद्देशपक्षे । **इहापीति** । आमन्त्रितस्यादिरुदात्त इत्युदात्तः प्लुतोदात्तत्वेन न समाविशेत्, वर्ज्यमानस्वरप्रसङ्गात् । यदा चाऽऽम एकान्तरमित्यनेन निघातैकश्रुतिनिषेधस्तदेदमुदाहरणम् । **सिद्धासिद्धाविति** । आमन्त्रितस्यादिरुदात्तः सिद्धः,

---

उ.] **रिति** । तेन सर्वत्र पर्यायसिद्धिरिति भावः । भाष्ये—**उभयनिर्देशार्थमिति** । गुर्वगुर्वोरित्यर्थः । **इत्येवमर्थमिति** । अन्यथोदात्तानुदात्तयोः प्लुतयोः समावेशः स्यादिति वक्ष्यते । भाष्ये—**तस्यासिद्धत्वादिति** । कार्यकालपक्षेऽपि स्वरितत्वप्रतिज्ञानात्तस्यास्त्रिपाद्यामप्रवृत्तिः । ध्वनितं चेदं षष्ठे, स्वरितो वानुदात्ते इति सूत्रे च भाष्ये । एकदेश्याह—**नैष दोष इति** । 'यद्यपी'त्यादि भाष्यं 'पूर्वत्रे'त्यत्र व्याख्यातम् । ननु देवदत्त इत्यादावेकश्रुति दूरात्संबुद्धावित्यस्य प्रसङ्गात्कथं षाष्ठिकमाद्युदात्तत्वं स्यादत आह—**यदा चेति** ।

सिद्धावेव असिद्धावेव वा तयोर्नियमः ॥ यस्तर्हि स्वरितः प्लुतस्तेन समावेशः प्राप्नोति—'स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सने'ष्विति ॥ स्वरितेऽप्युदात्तोऽस्ति ॥ यस्तर्ह्यनुदात्तः प्लुतस्तेन समावेशः प्राप्नोति 'अनुदात्तं प्रश्नान्ताभिपूजितयो'रिति । तस्मात्प्राग्वचनं कर्तव्यम् ॥ [गुरोरनृतो]

ये यज्ञकर्मणि ।८।२।८८।

॥ * ॥ ये यज्ञकर्मणीत्यतिप्रसङ्गः ॥ * ॥ ये यज्ञकर्मणीत्यतिप्रसङ्गो भवति । इहापि प्राप्नोति–ये देवासो दिव्येकादशस्थेति ॥ * ॥ सिद्धं तु ये यजामह इति ब्रूह्यादिषूपसङ्ख्यानात् ॥*॥ सिद्धमेतत् ॥ कथम् ?॥ ['ये यजामह इति ब्रूह्यादिषूपसङ्ख्यानात्']। ये यजामहेशब्दो ब्रूह्यादिषूपसङ्ख्येयः ।

प्र.] तस्मिंस्त्वपेक्षिते प्लुतोदात्तोऽसिद्ध इति तदाश्रयो निघातो न भवति। **स्वरितेऽपीति** । 'अनुदात्तं पदमेकवर्ज'मित्यत्राऽविद्यमानोदात्तमनुदात्तमाश्रीयते । न च पारिभाषिक उदात्तो गृह्यते किं तर्ह्युभयगतिरिह शास्त्र इति धर्मो गृह्यते, स च स्वरितेऽस्तीत्युदात्तस्वरितयोर्यौगपद्याऽभावः । **यस्तर्हीति** । उदात्तानुदात्तप्लुतयोः समावेशनिवृत्त्यर्थमेकैकग्रहणं, प्राग्ग्रहणं तु पक्षे सर्वेषां प्लुताऽभावार्थम् ॥

उ.] आम् पचसि देवदत्तेत्यादौ । **अन्ये** तु दूरात्संबुद्ध्यभावे इदम्, 'आम एकान्तर'मित्येतद्विषये प्लुताऽप्रवृत्तेरतत्सूत्रे भाष्ये स्पष्टमुक्तेः । दूराद्धूते इत्यनुवर्तमानमप्यत्र बोधनमात्रोपलक्षणम् । अतएव 'प्रत्यभिवादे' इत्येतद्विषयेप्यस्य प्रवृत्तिः । स्पष्टं चेदं वृत्तौ । पादादिस्थस्योदाहरणत्वाच्चात्र न निघात इत्याहुः । **तस्मिंस्त्वपेक्षिते इति** । प्लुतस्याऽसिद्धत्वे तदेकवाक्यतापन्नस्यानुदात्तं पदमित्यस्याप्यसिद्धत्वान्न निघात इति भावः । भाष्ये— **यस्तर्हि स्वरितः प्लुत इति** । विहितस्वरितगुणक इत्यर्थः । 'स्वरितमाम्रेडित'मित्यादिभिर्लाघवात्स्वरितगुण-मात्रस्यैव विधानात् । एवमनुदात्तं प्रश्नान्तेत्यत्रापि बोध्यमिति केचित् । 'एकं वर्जयित्वा शिष्टमनुदात्तगुणयोगी'ति सूत्रार्थात्स्वरितेऽप्यनुदात्तगुणयोगसत्त्वात्समावेशः स्यादिति भावः । 'अनुदात्त'पदं यौगिकमिति परिहाराशयमाह–**अनुदात्तं पदमिति** । एवं च स्वरितेऽप्युदात्तगुणसद्भावान्न समावेश इति भावः । 'अनुदात्तशब्देनापि पारिभाषिकस्य स्वतन्त्रस्याऽच एव ग्रहणं न स्वरितैकदेशस्ये'ति शङ्कां समाधत्ते–**न चेति** ।

यस्तर्ह्यनुदात्त इति । एतदन्तमेकदेश्युक्तिः । आचार्यस्य तु सर्वेषामुक्तानां समावेशवारणायैकैकस्येतीत्याशयः । उक्तरीत्या त्रिपाद्यां शेषनिघाताऽप्रवृत्तेः । किञ्च देवदत्तेत्यादौ प्लुताऽसिद्धत्वात्पूर्वं षाष्ठाद्युदात्तत्वे ततः प्लुते तदेकवाक्यतापन्नशेषनिघातो दुर्वारः । तत्प्रवृत्त्युत्तरमस्याऽसिद्धत्वेऽपि क्षत्यभावात् । भाष्यकृता तु षष्ठे एव त्रिपाद्याम्

प्रणवष्टेः ।८।२।८८।

'प्रणव' इत्युच्यते कः प्रणवो नाम?॥ पादस्य वाऽर्द्धर्चस्य वाऽन्त्यमक्षरमुपसंहृत्य तदाद्यक्षरशेषस्य स्थाने त्रिमात्रमोङ्कारं त्रिमात्रमोकारं वा विदधति तं 'प्रणव' इत्याचक्षते ॥ अथ टिग्रहणं किमर्थम् ? ॥ ॥※॥ टिग्रहणं सर्वादेशार्थम् ॥※॥ [टिग्रहणं क्रियते ॥ किं प्रयोजनं ? ॥ 'सर्वादेशार्थम्'] । यदा ओकारस्तदा सर्वादेशो यथा स्यात् । यदा [हि] ॐकारस्तदाऽनेकाल्शित्सर्वस्येति सर्वादेशो भविष्यति ॥ [प्रणवष्टेः]

प्र.] **प्रणवष्टेः** । **कः प्रणव इति** । शास्त्रेऽस्मिन्नपरिभाषितत्वात्प्रश्नः । **पादस्येति** । शास्त्रान्तरे प्रसिद्ध आश्रीयते देवतावत् । अक्षरम्—अच् । अन्त्यमचं गृहीत्वेत्यर्थः । **तदाद्यक्षरशेषस्येति** । अक्षरं च शेषश्च—हल्, अक्षरशेषं । तदन्त्यमक्षरमादिर्यस्य तत्तदादि । तदादि च तदक्षरशेषं च तदाद्यक्षरशेषं—टिसंज्ञकमित्यर्थः ।

अथेति । टिस्थानिकयोरेवोङ्कारौकारयोः शास्त्रान्तरे प्रणवसंज्ञाविधानात्प्रश्नः । **ॐकार इति** । असति टिग्रहणेऽलोन्त्यस्येति वचनाट्टेर्योऽन्त्यो हल्तस्यौकारः स्यात् । प्लुतत्वेन प्रणवस्य व्यभिचाराऽभावादविशेषणात् । संज्ञया च विधानेऽच्परिभाषोपस्थानात् । अथाऽप्यच्परिभाषोपस्थानाट्टिनाऽज्विशेष्यते तथापि टेर्योऽच् तस्य स्यान्न तु सर्वस्य टेः । ॐकारस्त्वज्झल्समुदायत्वात्प्लुतो न भवतीति

उ.] अस्या अप्रवृत्तेः सिद्धान्तितत्वेनाऽत्रत्यस्य स्पष्टमेकदेशयुक्तित्वप्रत्ययेन च न पराक्रान्तमत्रेति बोध्यम् । [**गुरोरनृतोऽनन्त्यस्यापि**] ॥

ये यज्ञकर्मणि । **सिद्धन्त्विति** । एवञ्चेदं सूत्रं तु कर्त्तव्यमिति भावः ॥

प्रणवष्टेः । यज्ञकर्मणि ऋगादीनां टेः प्लुतः प्रणवोऽनेनादेशो विधीयते । यद्यप्यक्षरशब्देन वर्णमात्रं, तथा पीहाऽज्विवक्षित इत्याह—**अक्षरमजिति** । **तदाद्यक्षरशेषशब्दे** बहुव्रीहिद्वन्द्वगर्भः कर्मधारय इत्याह—**अक्षरञ्च शेषश्चेति** । अजपेक्षशेषशब्देन हलुच्यते । एतद्विसर्गादेरप्युपलक्षणं । तत्राऽक्षरस्य तदादित्वं व्यपदेशिवद्भावेन, शेषस्य तु मुख्यं । **पादस्यार्धर्चस्य वेति** । वाशब्दश्चार्थे । तेन ऋचोऽपि सङ्ग्रहः । ननु 'टे'रित्यनुवर्तमाने पुनष्टिग्रहणं किमर्थमत आह—**असतीति** । ननु प्लुतश्रुत्याऽच्परिभाषोपस्थित्याऽन्त्यस्याऽच्च एवोङ्कारः स्यान्न तु हलोऽत आह—**प्लुतत्वेनेति** । **प्रणवस्य**—ओङ्काररूपस्य । **अथापी**त्यभ्युपगमवादः । उपरञ्जकतया प्लुतेन विशेषणसम्भवेनाऽच्परिभाषोपस्थितिरिति भावः ।

याज्याऽन्तः ।८।२।९०।

अन्तग्रहणं किमर्थम् ? ।। याज्या नामर्चो वाक्यसमुदायस्तत्र यावन्ति वाक्यानि सर्वेषां टेः प्लुतः प्राप्नोति, इष्यते चाऽन्त्यस्य स्यादिति । तच्चा-न्तरेण यत्नं न सिध्यतीत्येवमर्थमन्तग्रहणम् ।। [याज्याऽन्तः] ।

अग्नीत्प्रेषणे परस्य च ।८।२।९२।

।। * ।। अग्नीत्प्रेषण इत्यतिप्रसङ्गः ।। * ।। अग्नीत्प्रेषणे इत्यतिप्रसङ्गो भवति । इहापि प्राप्नोति–अग्नीदग्नीन्विहर । ।।*।। सिद्धं त्वोश्रावये परस्य चेति वचनात् ।। * ।। सिद्धमेतत् ।। कथम् ? ['ओश्रावये परस्य चेति वचनात्']। ओश्रावये परस्येति वक्तव्यम् । ओ३श्रा३वय ।। अपर आह–ओश्रावयाश्राव-ययोरिति वक्तव्यम् । ओ३श्रा३वय । आ३श्रा३वय । ।।*।। बहुलमन्यत्र ।।*।। बहुलमन्यत्रेति वक्तव्यम् । उद्धरा ३ उद्धर । आहरा ३ आहर ।। तर्त्तर्हि

प्र.] सर्वस्य टेर्वाक्यस्य टेरित्यधिकारात्सिध्यति । केचित्तु टिस्थानिकस्यैवौकारस्य प्रणवसंज्ञाविधानाट्टिग्रहणमनर्थकमिति प्रतिपन्नाः । [प्रणवष्टेः] ।

याज्यान्तः । अन्तग्रहणमिति । 'वाक्यस्य टे'रित्यधिकारादन्त्यस्यैव भवि-ष्यतीति प्रश्नः । याज्या नामेति । ऋक्समुदायो याज्याः, तत्र प्रत्यृचं प्लुतः प्राप्नोतीति, ऋक्समुदायस्य योऽन्तस्तस्य प्लुतार्थमन्तग्रहणं । तेनाऽयमर्थो– 'याज्यानामन्तो यष्टिस्तस्य योऽच्तस्य प्लुतः' । [याज्यान्तः] ।

अग्नीत् । बहुलमिति। तेनौश्रावयाश्रावयाभ्यामन्यत्राग्नीत्प्रेषणे बहुलं प्लुतो भवति, बहुलवचनाच्च नादेर्न परस्य, अपि त्वन्त्यस्यैव प्लुतः । उद्धरा ३ उद्धरेति ।

उ.] यदा हीत्यादि भाष्यं व्याचष्टे–ॐकारस्त्विति । प्रतिपन्ना इति । तदा हि सूत्रमेव व्यर्थमित्यरुचिः । [प्रणवष्टेः] ।।

याज्यान्तः । वाक्यस्य टेरिति । 'टे'रित्यनेन त्वव्यभिचारादन्तस्य टेरिति विशेषण-मनर्थकं । टिग्रहणनिवृत्तौ त्वजन्ताया एव याज्यायाः स्यादिति तात्पर्यम् । ऋक्समुदाय इति । याज्यानां वाक्यस्य टेरित्यर्थो ह्यन्तग्रहणाऽभावे स्यादिति भावः । ऋचो वाक्य-समुदाय इति भाष्ये । ऋक्समुदायरूपो वाक्यसमुदाय इत्यर्थः । [याज्यान्तः] ।।

अग्नीत्प्रे । अग्नीध ऋत्विग्विशेषस्य प्रेषण इति कर्मषष्ठ्या समासः । 'अग्नीत्कर्मके-ऽध्वर्युकर्तृके प्रेषणे आदेः प्लुतो भवति, ततः परस्य द्वितीयाऽचश्च' इति सूत्रार्थः । भाष्ये– ओश्रावयेपरस्येति । परस्य चाऽऽदेश्चेत्यर्थः । अपि त्वन्त्यस्यैवेति । उद्धर उद्धरेत्यादौ

वक्तव्यं ? ॥ न वक्तव्यम् । योगविभागः करिष्यते—'अग्नीत्प्रेषणे परस्य च विभाषा' । ततः 'पृष्टप्रतिवचने हेः' । 'विभाषे'त्येव । अपर आह—॥ * ॥ सर्वे एव प्लुतः साहसमनिच्छता विभाषा वक्तव्यः ॥ * ॥ [अग्नीत्प्रेषणे] ॥

आम्रेडितं भर्त्सने ।८।२।९५।

॥ * ॥ भर्त्सने पर्यायेण ॥*॥ भर्त्सने पर्यायेणेति वक्तव्यम् । चौरा३ चौर । चौर चौरा ३ । कुशीला ३ कुशील । कुशील कुशीला३ ॥

स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु ।८।२।१०३।

॥ * ॥ असूयादिषु वावचनम् ॥ * ॥ असूयादिषु वेति वक्तव्यम् । कन्ये ३ कन्ये । कन्ये कन्ये । शक्तिके ३ शक्तिके । शक्तिके शक्तिके ॥

प्लुतावैच इदुतौ ।८।२।१०६।

किमर्थमिदमुच्यते ? ॥*॥ ऐचोरुभयं विवृद्धिप्रसङ्गादिदुतोः प्लुतवचनम् ॥*॥

प्र.] चापले द्विर्वचनम् । योगविभाग इति । व्यवस्थितविभाषा चाश्रीयते इति भावः । एवमुद्धर उद्धरेत्यन्त्यँप्लुतो न लभ्येत इति केचिदाहुः । व्यवहितेऽपि परशब्दो वर्तत इति भाष्यकाराभिप्रायमन्य आहुः । साहसमिति । शास्त्रत्यागः साहसं । तेन शास्त्रमत्यजताऽभियुक्तस्मरणात्सर्वः प्लुतो विभाषा विधेय इत्यर्थः । एतच्च प्राग्ग्रहणस्य सर्वत्र संबन्धात्सिध्यतीति मन्यन्ते । [अग्नीत्प्रेषणे] ।

स्वरित । असूयादिष्विति । 'सर्व एव प्लुत'इति वचनमन्यदीयमिति वचनम् । [स्वरितमाम्रेडिते] ॥

प्लुतावैच । लक्षणान्तरेणैचः प्लुतप्रसङ्गे तदवयवयोरिदुतोः प्लुतार्थं वचनम् ।

उ.] पूर्वान्त्यस्येत्यर्थः । बहुलग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वादिति भावः । अन्त्यस्य प्लुतो नेति । पूर्वान्त्यस्येत्यर्थः । विभाषाग्रहणस्य विकल्पार्थत्वेनोपाधिव्यभिचारार्थकत्वाऽभावादिति भावः । व्यवहितेऽपीति । व्यवस्थितविभाषाश्रयणादेव नादेर्नाव्यवहितपरस्य । कचित्तु तस्यैवेति भावः । अविमृश्यकारित्वं—साहसं । तदिह शब्दप्रयोगे शास्त्राननुसरणं । तदाह—शास्त्रत्याग इति । प्राग्ग्रहणस्येति । केचित्तु 'विभाषे'ति अत्र योगं विभज्य 'उक्तं वक्ष्यमाणं च प्लुतजातं वा'—इत्याहुः । [अग्नीत्प्रेषणे परस्य च]॥

प्लुतावैच । नेदं प्लुतविधायकं किन्तु अन्यशास्त्रविहितप्लुतस्य विषयशोधकमित्याह—

ऐचोरुभयविवृद्धिप्रसङ्गादिदुतोः प्लुत उच्यते ॥ किमुच्यते 'उभयविवृद्धिप्रसङ्गा'दिति ?। यदा नित्याः शब्दाः । नित्येषु च शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमनपायोजनविकारिभिः ॥ नैष दोषः । 'उभयविवृद्धिप्रसङ्गा'-दिति नैवं विज्ञायते-'उभयोर्विवृद्धिरुभयविवृद्धिरुभयविवृद्धिप्रसङ्गा'दिति ॥ कथं तर्हि ? ॥ उभयोर्विवृद्धिरस्मिन् सोऽयमुभयविवृद्धिः, उभयविवृद्धिप्रसङ्गादिति । इमावैचो समाहारवर्णौ, मात्राऽवर्णस्य मात्रोवर्णोवर्णयोरिति तयोः प्लुत उच्यमान उभयोर्विवृद्धिः प्राप्नोति । तद्यथा,-गर्भो वर्धमानः सर्वाङ्गपरिपूर्णो वर्धते ॥ अस्ति प्रयोजनमेतत् ? ॥ किं तर्हीति ॥ ॥*॥ तत्रा-

---

प्र.] **ऐचोरिति** । समाहारवर्णत्वादवर्णस्येदुतोश्च विवृद्धिः प्राप्नोतीति वचनं, तत्र वचनसामर्थ्याद्वर्णैकदेशयोरपीदुद्ग्रहणेन ग्रहणम् । **किमुच्यत इति,**-उभयविवृद्धिशब्दं तत्पुरुषं मत्वा सिद्धान्तविरोधमुद्भावयति । विवृद्धिर्नित्यता च विरुध्यते, तादवस्थ्यं हि नित्यता । यद्यप्यनित्येष्वपि वर्णेषूच्चरितप्रध्वंसित्वाद्विवृद्धिर्नोपपद्यते, नापि रूपान्तरप्राप्तिस्तथापि स एवेमामवस्थां प्राप्त इति युज्यते वक्तुं। तथा च दीर्घीभूत इति च्विना निर्देशः क्रियते। नित्यत्वेत्वे तद्विरुध्यते । **कूटस्थैरिति** । कूटस्थादयः शब्दाः पृथगपि प्रयुज्यमानाः नित्यतामाचक्षते, युगपत्तु प्रयोगे केन चिच्छब्देन कश्चिन्नित्यताविशेष उच्यते । तत्र 'कूटस्थ'-शब्देन स्वभावाऽपरित्याग उक्तः। स चाऽवयवविचालेऽप्यस्ति-नित्या पृथिवीति। अविचालिग्रहणेनाऽवयवाऽविचालः प्रतिपाद्यते । अविचालित्वस्य हेतुकथनम्-**अनपायेति**। इतरः शब्दान्तरमेव प्राप्नोति यस्मिन्विवृद्धिरिवोभयोर्लक्ष्यत इत्याह **नैवमिति । तद्यथेति** । यथा गर्भे नाऽवस्थिता एवावयवा विवर्धन्ते, किं तर्हि,

---

उ.] **लक्षणान्तरेणेति** । एवं स्वरितमित्याद्यपि बोध्यम् । **समाहारवर्णत्वादिति** । समाह्रियमाणाऽवयववर्णरूपत्वादित्यर्थः । ननु वर्णैकदेशयोः कथमिदुद्ग्रहणेन ग्रहणमत आह-**तत्रेति। सिद्धान्तविरोधमिति** । शब्दार्थसम्बन्धानां नित्यत्वरूपः सिद्धान्तः। **यद्यपीति** । वृद्धिरूपान्तरप्राप्तं किञ्चित्कालं स्थितस्यैवोपपद्येते नतु क्षणनश्वरस्येति भावः । **तथापीति** । बुद्धिकल्पितो गौणो व्यपदेश इति भावः । एवंविधव्यवहार एव प्रचुर इत्याह-**तथा-चेति । नित्यत्वे त्विति** । तत्र गौणव्यपदेशोऽप्यनुपपन्न इति भावः । कूटस्थादीनां पर्यायत्वमाशङ्क्य निराकरोति-**कूटस्थादय इति** । ननु बहुव्रीहावपि नित्यताविरोधस्तदवस्थोऽत आह-**इतर इति** । बहुव्रीह्याश्रयणसामर्थ्यात्साद्दृश्यगर्भः समास आश्रीयते इति भावः । ननु गर्भदृष्टान्तोऽनुपपन्नः, तत्रावयववृद्ध्युपलब्धेरत आह-**यथा गर्भे इति** ।

ऽयथेष्टप्रसङ्गः ॥ * ॥ तत्राऽयथेष्टं प्रसज्येत । चतुर्मात्रः प्लुतः प्राप्नोति ॥
॥ * ॥ सिद्धं त्विदुतोर्दीर्घवचनात् ॥ * ॥ सिद्धमेतत् ॥ कथम् ? ॥
['इदुतोर्दीर्घवचनात्']॥ इदुतोर्दीर्घो भवतीति वक्तव्यम् ॥ तदेतत्कथं कृत्वा
सिद्धं भवति ? ॥ यदि समः प्रविभागो–मात्राऽवर्णस्य मात्रेवर्णोवर्णयोः ॥

अथ ह्यर्द्धमात्राऽवर्णस्याऽध्यर्द्धमात्रेवर्णोवर्णयोरर्द्धतृतीयमात्रः[1] प्राप्नोति ।
अथ हि[2] ह्यध्यर्द्धमात्राऽवर्णस्याऽध्यर्द्धमात्रेवर्णोवर्णयोरर्द्धचतुर्थमात्रः[3] प्राप्नोति ।
सूत्रं च भिद्यते ॥ यथान्यासमेवाऽस्तु ॥ ननु चोक्तं–'तत्रायथेष्टप्रसङ्ग'
इति ॥ तत्र सौर्यभागवतोक्तमनिष्टिज्ञो वाडवः पठति । इष्यत एव चतु-
र्मात्रः प्लुतः । [प्लुतावैच इदुतौ] ॥

एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्द्धस्यादुत्तरस्येदुतौ ।८।२।१०७।

॥ * ॥ एचः प्लुतविकारे पदान्तग्रहणम् ॥ * ॥ एचः प्लुतविकारे

प्र.]पूर्वमूर्तिविनाशे मूर्त्यन्तरोत्पत्तिः, एवं शब्दान्तरमेवोभयविवृद्धिः प्राप्नोतीत्युच्यते।
चतुर्मात्र इति । प्लुतावयवत्वात्प्लुत उच्यते, नहि चतुर्मात्रस्य प्लुतसंज्ञाऽस्ति,
'ऊकालोऽ'जिति वचनात् । **तदेतदिति** । भाष्यकारो वार्तिककारं पर्यनुयुङ्क्ते ।
'ऐचोश्चोत्तरभूयस्त्वा'दिति वदता वार्तिककारेण समप्रविभागत्वं नेष्टमिति भावः।
इष्यत एवेति । 'ऊकाल एवाऽ'जिति नियमो नाश्रीयते, तेन चतुर्मात्र-
स्याप्यच्कार्यं भवति, 'प्रत्यङ्ङ४तिकायने'ति 'ङमो ह्रस्वा'दिति ङमुङ्भवति ।
'ग्लौ ४त्राते' त्यत्राऽनचि चेति तकारस्य द्विर्वचनं भवति । **सौर्यभागवतेति** ।
सौर्यं नाम नगरं तत्रत्येनाचार्येणेदमुक्तम् । **[प्लुतावैच इदुतौ]** ।

उ.]अवस्थिता एव वर्धन्त इति नेत्यन्वयः । **प्लुतावयवत्वादिति** । प्लुतसदृशावयवत्वादि-
त्यर्थः । त्रिमात्रत्वेन च सादृश्यं । कुतो गौणवृत्त्याश्रयणमत आह–**न हीति** । नाप्यवयवस्य
मुख्यं प्लुतत्वम्, अच्त्वाऽभावादित्यपि बोध्यम् । **इति वदतेति** । एवञ्च वार्तिककारस्य
पूर्वाऽपरविरोध इत्यर्थः । तत्रोत्तरस्य भूयस्त्वं पूर्वस्य वेत्यत्र विनिगमनाविरहस्य भाष्यकृतोक्त-
तया समप्रविभागपक्ष एव भगवतो भाष्यकारस्य सम्मत इति बोध्यम् । ननु एक मात्रिक-
द्विमात्रिकत्रिमात्रिकाणामेवाऽच्त्वात् कथं चतुर्मात्रिकस्याऽच्कार्याणि स्युरत आह–**ऊकाल
एवेति** । तत्र त्रिमात्रग्रहणं एकद्विमात्रभिन्नोपलक्षणमिति भावः। **ग्लौ ४–त्रातेति** समस्तं ।
'सिद्धं त्विदुतो'रिति वार्तिकं वाडवस्य, तदाह–**वाडवः पठतीति** । [प्लुतावैच इदुतौ] ॥

पदान्तग्रहणं कर्तव्यम् । इह मा भूत्-भद्रं करोषि गौ३रिति ॥ * ॥ विषय-परिगणनं च ॥ * ॥ **विषयपरिगणनं च कर्तव्यम् । 'प्रशान्ताभिपूजित-विचार्यमाणप्रत्यभिवादयाज्यान्तेष्वि'ति वक्तव्यम् ।** प्रशान्त-**अगमा३ः पूर्वा३न् ग्रामा३नग्निभूता३ इ ? । पटा३उ ? । प्रशान्त ॥** अभिपूजित-**सिद्धोऽसि माणवकाऽग्निभूता३इ । पटा३उ । अभिपूजित ॥** विचार्यमाण-हो-**तव्यं दीक्षितस्य गृहा३इ । विचार्यमाण ॥** प्रत्यभिवाद-आयुष्मानेधि **अग्निभूता३इ । प्रत्यभिवाद ॥** याज्यान्त-**उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे स्तोमैर्विधेमाग्नया३इ ॥** * ॥ आमन्त्रिते छन्दस्युपसङ्ख्यानम् ॥ * ॥ **आमन्त्रिते छन्दस्युपसङ्ख्यानं कर्तव्यम् । अग्ना३इ पत्नीर्वा३ः सजूर्देवेन त्वष्ट्रा सोमं पिब ॥** [एचोऽप्रगृह्यस्याऽदूरा]

तयोर्य्वावचि संहितायाम् ।८।२।१०८।

अथ कयोरिमौ य्वावुच्येते ?॥ 'इदुतो'रित्याह ॥ तदिदुतोर्ग्रहणं कर्तव्यं ॥

एचोऽप्र। गौ३रिति। अथ यदा सावपि पदं भवति तदा कस्मान्न भवति?, उक्तमेतद्वाक्यपदयोरन्त्यस्येति। विसर्जनीयश्चाऽत्र वाक्यस्याऽन्तो न त्वेच्। पदान्तग्रहणमित्यत्र पदशब्देन वाक्यमुच्यते, पद्यते प्रतीयतेऽनेनार्थ इति पदमित्यन्वर्थग्रहणात्। एतच्च 'याज्यान्त' इत्यतोऽन्तग्रहणानुवृत्त्या लभ्यते।

अग्निभूता३यिति । अग्निभूतिशब्दस्य संबुद्धौ रूपम् । **आमन्त्रित इति ॥** अप्राप्तएव प्लुते वचनम् । [**एचोऽप्रगृह्यस्यानुनासिकः**] ।

उ.] **ऐचोऽप्रगृह्यस्या॥ अथ यदेति ।** यदा 'असर्वनामस्थाने' इति यजादौ सर्वनामस्थाने प्रतिषेध इति व्याख्यानं तदेत्यर्थः । न च परिगणनेऽदूराद्धूत इति व्यर्थं स्यात् । किञ्च तत्सत्त्वे तत्रत्य'दूराद्धूत'इति पदस्य सम्बोधनोपलक्षणत्वेन सम्बोधनोदाहरणमसङ्गतमिति वाच्यम , उपलक्षणत्वे मानाभावात् । किन्तु यथाश्रुतमेव तत् । एवञ्च दूरादाह्वानविशिष्टाऽभिपूजितार्थे 'स्वागच्छ भो माणवकाग्निभूते' इत्यादौ नास्य प्रवृत्तिरित्याहुः । **वृत्तिकारास्तु** परिगणनेऽदूराद्धूत इति न वक्तव्यं । तस्य सम्बोधनोपलक्षणत्वेन सम्बुद्ध्यन्त-भाष्योदाहरणविरोधापत्तेरित्याहुः । तच्चिन्त्यम् । **अप्राप्त एव प्लुत इति ।** प्लुतविकारे इत्यर्थः । दूरादाह्वानसत्त्वात्परिगणनाच्चाऽप्राप्तिः । प्लुतस्तु 'गुरोरनृत' इति प्राप्नोत्येव । तेन वाक्यान्तपदानन्त्यस्यैव प्लुत इत्यत्र न मानं । केचित्तु गुरोरिति सूत्रं दूराद्धूत इत्यादि विहितप्लुतस्य स्थानिविशेषमात्रसमर्पकं नतु विधायकमिति यथाश्रुतमेव व्याचक्षते ।

न कर्तव्यम् । प्रकृतमनुवर्तते ॥ क्व प्रकृतम् ?॥ 'पूर्वस्यार्द्धस्यादुत्तरस्येदुता'-विति ॥ तद्वै प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहाऽर्थः ॥ 'अची'त्येषा सप्तमीदु-ताविति प्रथमायाः षष्ठीं प्रकल्पयिष्यति-'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति ॥

किमर्थमिदमुच्यते नेको यणचीत्येव सिद्धम् ?॥ न सिध्यति । असिद्धः प्लुतः, प्लुतविकारौ चेमौ । सिद्धः प्लुतः स्वरसन्धिषु ॥ कथं ज्ञायते ? ॥ यदयं 'प्लुतप्रगृह्या अची'ति प्लुतस्य प्रकृतिभावं शास्ति ॥ कथं कृत्वा ज्ञापकं ? ॥ सतो हि कार्यिणः कार्येण भवितव्यम् ॥ इदं तर्हि-

॥*॥प्रयोजनं-दीर्घशाकलप्रतिषेधार्थम् ॥*॥ [दीर्घशाकलप्रतिषेधार्थं प्रयो-जनम्] ॥ दीर्घत्वं शाकलं च मा भूदिति । अग्ना३यिन्द्रम् । पटा३वुदकम् ॥ एतदपि नास्ति प्रयोजनम् । आरभ्यते प्लुतपूर्वस्य 'यणादेशः प्लुतपूर्वस्य (च)दीर्घशाकलप्रतिषेधार्थ'मिति; तन्नव क्तव्यं भवति ॥ अवश्यं तद्वक्तव्यं यौ प्लुतपूर्वाविदुतावप्लुतविकारौ तदर्थं-भो३यिन्द्र भो३यिडेति ॥ यदि तर्हि तस्य निबन्धनमस्ति तदेव वक्तव्यमिदं न वक्तव्यम् ॥ इदम[प्य]वश्यं वक्तव्यं

प्र.] तयोः । कयोरिति । प्रश्नद्वारेण 'तयो'रिति प्रत्याख्यायते, तदन्तरेणाप्य-धिकारात्स्थानिलाभात् । प्लुतविकाराविति । प्लुतविषयत्वात्प्लुतविकारावुच्येते, तौ चाऽसिद्धकाण्डे पाठाद्यणादेशे कर्तव्येऽसिद्धौ । सिद्धः प्लुत इति । ननु प्लुतस्य सिद्धत्वे कथमिदुतोः सिद्धत्वम् ? । उच्यते । प्लुतप्रकरणे यत्कार्यं तत्स्वर-सन्धिषु सिद्धमिति सामान्यविषयानुमानाश्रयणात् । भो३यिन्द्रेति । इशब्दस्य निपातत्वात्प्रगृह्यत्वात्प्रकृतिभावप्रसङ्गे तद्बाधनार्थोऽपि यण्विधिः । वर्णव्यत्यये-

---

उ.] तयोर्वा । ननु तयोरित्यनेनेदुतोः स्थानिनोर्निर्देशात्कयोरिति प्रश्नोऽनुपपन्न इत्या-शङ्क्याशयमाह-कयोरितीति। भाष्ये तदिदुतोर्ग्रहणं कर्तव्यमिति । तदर्थकं तयोरिति कर्तव्यमित्यर्थः । नन्वेच उत्तरार्धविकाराविदुतौ न प्लुतस्येति प्लुतविकारावित्ययुक्तमत आह-विषयत्वादिति । प्लुतसहितौ विकाराविति मध्यमपदलोपी समासः । आकारस्य प्लुतस्य विधानात्तत्सन्नियोगशिष्टतयाऽनयोरपि तद्विषयत्वमिति भावः। कथमिदुतोरिति । तयोः प्लुतत्वाऽभावादिति भावः । भाष्ये-दीर्घं च शाकलञ्चेति । दीर्घः सवर्णदीर्घः । शाकलोदाहरणम्-अग्नायाशेति । सामर्थ्यादसिद्धावपि दीर्घशाकलयोः-अपवादावित्यर्थः ।

स्वरार्थम् । तेन हि सति 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्ये'त्येष स्वरः प्रसज्येत, अनेन पुनः सत्यसिद्धत्वान्न भविष्यति ॥ यदि तर्ह्यस्य निबन्धनमस्तीदमेव वक्तव्यं तन्न वक्तव्यम् ॥ ननु चोक्तं 'तदप्यवश्यं वक्तव्यं, यौ प्लुतपूर्वाविदुतावप्लुतविकारौ तदर्थं–भो३ ई इन्द्र । भो३यिडेति ॥ छान्दसमेतत्, दृष्टानुविधिश्छन्दसि भवति ॥ यत्तर्हि न छान्दसं-भो३इन्द्रं [भो ३ यिन्द्रं] साम गायति ? ॥ एषोऽपि छन्दसि दृष्टस्यानुप्रयोग इति ॥

॥ * ॥ किं[3] तु[4] यणा भवतीह न सिद्धं य्वाविदुतोर्यदयं विदधाति ।
तौ च मम स्वरसन्धिषु सिद्धौ शाकलदीर्घविधी तु निवर्त्यौ ॥१॥

प्र.] नाऽत्र छान्दसः प्लुतः । **स्वरार्थमिति ।** आकारो यथाविषयमुदात्तादियुक्तः प्लुतः, ईदुतौ तु सर्वत्रोदात्तौ, तत्राऽनयोर्य्वोरुदात्तस्वरितयोरिति स्वरिते कर्तव्येऽसिद्धत्वात्स्वरितो न भवति । प्लुतप्रकरणे विहितं च कार्यं स्वरसन्धिषु सिद्धमिति ज्ञापितं, स्वरस्तु स्वरसन्धिर्न भवतीति तत्राऽसिद्धत्वं य्वोर्भवत्येव । **छान्दसमेतदिति ।** ततश्चोपसङ्ख्यानमन्तरेण वर्णव्यत्ययेन यण्सिद्धः । **यत्तर्हीति ।** अप्रतिपन्नविकारस्याऽनुकरणत्वादच्छान्दसत्वाद्यण्न प्राप्नोति । **एषोऽपीति ।** कृतयणादेशस्यैवेदमनुकरणमित्यर्थः । पूर्वोक्तार्थसङ्ग्रहश्लोकद्वयम्–**किं न यणेति ।** 'इको यणची'ति यणादेशेन किं न सिद्धं रूपं यत इदुतोर्य्वौ विदधात्याचार्यस्तौ चेदुतौ स्वरसन्धिषु सिद्धौ, प्लुतप्रगृह्या अचीति ज्ञापकात् । एवं तर्हि इकोऽसवर्ण इति शाकलः प्रकृतिभावः प्राप्नोति, सवर्णदीर्घश्च, तन्निवृत्तये य्वौ विधीयेते । एतदपि न प्रयोजनम्, इकःप्लुतपूर्वस्य वार्तिककारेण शाकलदीर्घस्यापवादस्य यणो विधानात् । एवं तर्ह्युदात्तस्वरितयोरिति यणाश्रयस्वरितप्रसङ्गनिवृत्तये य्वौ विधी-

---

उ.] **छान्दसः प्लुत इति ।** अनन्त्यत्वात् । गुरोरनृत इति सूत्रस्य एकैकग्रहणेनानेकाच्क एव प्रवृत्तिरिति भावः । **यथाविषयमिति ।** विचार्यमाणादिषूदात्तः, प्रश्नान्तादावनुदात्तः, असूयादौ स्वरित इत्यर्थः । **इदुतौ त्विति ।** अनुवृत्तोदात्तपदेन तयोः संबन्धादित्यर्थः । **तत्रानयोरिति ।** उदात्तेदुत्स्थानिकयवयोरित्यर्थः । ननु प्लुतप्रकरणस्य कार्यस्य सिद्धत्वज्ञापनात्कथं न स्वरोऽत आह–**प्लुतप्रकरण इति । वर्णव्यत्ययेनेति ।** प्लुतवदिति भावः । तदेवमुपसङ्ख्यानं प्रत्याख्यातं, सूत्रं तु स्वरसिद्ध्यर्थं कर्तव्यमिति स्थितम् । **अनुकरणमिति ।** भाष्येऽनुप्रयोगशब्दस्यानुकरणमर्थ इति भावः । **किं न सिद्धमिति ।** सिद्धमेवेत्यर्थः । श्लोके यच्छब्दो निपातो हेतावित्याह–**यत इति ।** नन्वनयोरि-

इक्षु यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम् ।
तेन तयोश्च न शाकलदीर्घौ यण्स्वरबाधनमेव तु हेतुः ॥२॥ *

इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्येऽष्टमस्याध्यायस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च द्वितीयः ॥

मतुवसो रु संबुद्धौ छन्दसि ।८।३।१।

॥ * ॥ मतुवसोरादेशे वन उपसङ्ख्यानम् ॥ * ॥ **मतुवसोरादेशे वन उपसङ्ख्यानं कर्तव्यम् ।** यस्त्वायन्तं वसुना प्रातरित्वः । ॥ * ॥ विभाषा भवद्भगवदघवतामोच्चाऽवस्य ॥*॥ **छन्दसि भाषायाञ्च 'भवत्' 'भगवत्' 'अघव'दित्येतेषां विभाषा रुर्वक्तव्यः, ओच्चाऽवस्य वक्तव्यः । भोः । भवन् । भगोः । भगवन् ।** अघोः । अघवन्निति ॥ **संबुद्धावित्युच्यते तत्रेदं न सिध्यति—भो ब्राह्मणा इति ।** तथा 'विभक्तौ लिङ्गविशिष्टग्रहणं नेती'ह न प्राप्नोति भो ब्राह्मणि ! ॥ **नैष दोषः । अव्ययमेष भोःशब्दो नैषा भवतः प्रकृतिः ॥**

प्र.] येते । इति भाष्यप्रदीपेऽष्टमस्य द्वितीयपादे द्वितीयमाह्निकम् ॥ पादश्च समाप्तः॥

मतुवसो । वन इति । क्वनिब्वनिपोः सामान्यग्रहणम्, अनुबन्धस्याऽनिर्देशात्, तदनुबन्धकपरिभाषानुपस्थानात्क्वनिपोऽपि ग्रहणम् । **प्रातरित्व इति ।** प्रातरेतीति । 'अन्येभ्योऽपि दृश्यन्त' इति क्वनिप् । **भो ब्राह्मणा इति ।** जसि रुत्वौत्वे न प्राप्नुतो, नापि रुत्वौत्वयोर्भो इति रूपं सिध्यति । तथा '**भो ब्राह्मणी**'त्यत्रापि भवतिशब्देकारस्य रुत्वे, अवस्य चौत्वेऽपि कृते, संयोगान्तलोपे कर्तव्ये रुत्वस्या-

---

उ.] द्रुतोरसिद्धत्वात्कथं तयोरिको यणचीति यणत आह- **तौ चेति ॥** इति श्री**नागोजीभट्ट**कृते भाष्यप्रदीपोद्द्योतेऽष्टमस्य द्वितीये पादे द्वितीयमाह्निकम् ॥ पादश्च द्वितीयः समाप्तः ॥

मतुवसो रुः । 'वन' इत्युक्त्वा प्रातरित्वेति क्वनिबुदाहरणमसङ्गतमत आह—**सामान्यग्रहणमिति ।** तदनुबन्धकग्रहण इत्यस्यैकानुबन्धोच्चारणे इत्यर्थ इति भावः । भाष्ये—**ओच्चावस्येति ।** 'नानर्थके' इति परिभाषया विशिष्टस्य स्थानिन उच्चारणाच्चौकारः सर्वादेशः । **जसीति ।** सूत्रस्थसंबुद्धावित्यस्य वार्तिकेऽपि संबन्धात् । **नापीति ।** जसः श्रवणप्रसङ्गात् । लिङ्गविशिष्टपरिभाषाऽभ्युपगमेऽपि रूपाऽसिद्धिरित्याह—**तथेति ।** संयोगान्तलोपेऽपि भोदिति स्यादिति रूपाऽसिद्धिः, यणः प्रतिषेधारंभाच्च स दुर्लभ इत्यपि बोध्यम् ।

भाष्ये—**नैषा भवतः प्रकृतिरिति ।** एषा—प्रकृतिः। अव्ययत्वे सुप उत्पत्तेरस्य प्रकृतित्वव्यवहारः । सा च **न भवतः**—न भवच्छब्दजन्येत्यर्थः। **प्रवृत्तिरिति** पाठे प्रयोग इत्यर्थः।

कथमव्ययत्वम् ? ॥ 'विभक्तिस्वरप्रतिरूपकाश्च निपाता भवन्ती'ति निपात-संज्ञा । 'निपातोऽव्यय'मित्यव्ययसंज्ञा ॥ [मतुवसो रु]

समः सुटि ।८।३।५। पुमः खय्यम्परे ।८।३।६। कानाम्रेडिते ।८।३।१२।

॥ * ॥ संपुंकानां सत्वम् ॥ * ॥ संपुंकानां सत्वं वक्तव्यम् । सँस्स्कर्ता । पुँस्कामा । काँस्कानिति ॥ * ॥ रुविधौ ह्यनिष्टप्रसङ्गः ॥ * ॥ रुविधौ हि

प्र.] ऽसिद्धत्वाद्रूपाऽसिद्धिः । **विभक्तिस्वरेति** । केचिदाहुः—भूशब्दस्य विजन्तस्य सौ यद्रूपं रेफान्तं तत्प्रतिरूपको निपातः, तत्र रेफस्य यत्वे लोपे च भो ब्राह्मणा इत्यादिः सिध्यति । भवच्छब्दस्याऽपि भोःशब्दसिद्धये वार्तिकारम्भः । तेनेतराभ्योऽपि दृश्यन्त इति भवदादियोगे विधीयमानास्तसिलादयस्ततो भोस्तत्र भो इत्येत्रापि भवन्ति । एवं च भवच्छब्दप्रकृतिक-भोःशब्दप्रतिरूपकत्वमेव निपातत्वमाश्रयणीयं, भवतेर्विजदर्शनादित्यन्य आहुः॥

समः सुटि । तुल्यविचारत्वाद्भाष्ये त्रिसूत्रीं पठित्वा वाक्यं पठितम्—**सम्पुकानामिति । सँस्स्कर्त्तेति** । मकारस्य सत्वे कृते यदा पूर्वस्याऽनुनासिकः तदा सत्वस्याऽसिद्धत्वाद्रुत्वाऽभावादनचि चेति सकारस्य द्विर्वचने, 'झरो झरि सवर्णे' इति पाक्षिके लोपे द्विसकारकस्त्रिसकारको वा प्रयोगो, यदा त्वनुस्वारः (तदा) अयोगवाहानां च प्रत्याहारेषु विशेषेणोपदेशस्तस्मिन् पक्षे एक-सकारको, यदा त्वनुस्वारस्य हल्त्ववदच्त्वमपीष्यते तदा ततः परस्य सकारस्य द्विर्वचने च सकारत्रयमपि भवति । यदा चैकीयमतेन मकारलोपस्तदा-

---

उ.] ननु 'भो' इति विभक्त्यन्तस्याऽभावात्कथं तत्प्रतिरूपकत्वमत आह—**केचिदाहुर्भूशब्दस्येति** । नन्वेवं वार्तिके भवद्ग्रहणं न कर्तव्यं किमत आह—**भवच्छब्दस्यापीति । एवञ्चेति** । एवञ्च विभक्तिप्रतिरूपकत्वस्य निपातगणसूत्रे शब्दतोऽर्थतश्चाश्रयणेऽपि न दोष इत्याहुः । [**मतुवसो रु**] ॥

समः सुटि । भाष्येऽत्रत्यं सूत्रद्वयं प्रदेशान्तरस्थश्च सहपठितं, तत्राशयमाह—**तुल्येति** । भाष्ये—**सत्वं वक्तव्यमिति** । स इति प्रक्रम्य सूत्रत्रयं पठनीयमित्यर्थः। 'स'शब्दः शब्दप्रधानः। तदर्थे प्रकारे भावप्रत्यय इति सत्वं सकार इत्यर्थः । रुणा सस्य समफलत्वं दर्शयति—**मकारस्येति** । यदाऽनुस्वारोऽयोगवाहानां च प्रत्याहारेषु विशेषेणोपदेशस्तस्मिन्पक्षे इति पाठः । विशेषेणेत्यस्य शर्ष्वेवेत्यर्थः । तथा चाऽनुस्वारस्य हल्त्वाज्झरो झरीति लोपः । **अच्त्वमपीति** । अविशेषेण पाठादिति भावः । **त्रयमपीति** । अपिना द्वयमपीत्यर्थः । **यदा-चैकीयेति** । अत्र पक्षे द्वित्वे द्विसकारकं, पक्षेत्वेकसकार(क)मेव । अनुनासिकपक्षेऽप्येवमेव ।

सत्यनिष्टं प्रसज्येत । इह तावत्–सँस्स्कर्त्तेति[1],–'वा शरी'ति प्रसज्येत । 'पुँ'स्कामे'ति,–'इदुदुपधस्ये'ति षत्वं प्रसज्येत । 'काँस्का'निति,–कुप्वोः [ꣿकꣿपौ'विति[2]]ꣿकः प्रसज्येत-॥ तर्त्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । क्रियते न्यास एव 'समः स्सुटी'ति[3] द्विसकारको निर्देशः । समः स्सुटि[4] सकारो भवति । तत्प्रकृतमुत्तरत्रानुवर्तिष्यते ॥ यदि तदनुवर्तते,-'नश्छव्य-प्रशा'नित्यत्रापि प्राप्नोति, 'भवाँस्तत्रे'ति[5] ॥ सम्बन्धमनुवर्तिष्यते । समः सुटि[6] । 'पुमः खय्यम्परे' । सो भवति । 'नश्छव्यप्रशान्' । रुर्भवति 'पुमः खय्यम्परे' सकारः । 'उभयथर्क्षु' 'दीर्घादटि समानपादे' 'न्नपे' 'स्वतवान्पायौ' । रुर्भवति, 'पुमः खय्यम्परे सकारः' । 'कानाम्रेडिते'-

सकारः । 'पुमः खय्यम्पर'इति निवृत्तम् ।॥ * ॥ समो वा लोपमेके ॥ * ॥ समो वा लोपमेक इच्छन्ति ॥ संस्कर्ता । सँस्कर्ता ॥ [समः सुटि] ॥

ढो ढे लोपः ।८।३।१३।

॥ * ॥ ढलोपेऽपदान्तग्रहणम् ॥ * ॥ ढलोपेऽपदान्तग्रहणं कर्तव्यम् । इह मा भूत्-श्वलिड्ढौकते गुडलिड्ढौकते ॥ तत्तर्हि वक्तव्यं ? ॥ न वक्तव्यं। जश्त्वमत्र बाधकं भविष्यति ॥*॥ जश्भावादिति चेदुत्तरत्र ढस्याऽभावादपवादप्रसङ्गः ॥*॥ जश्भावादिति चेदुत्तरत्र ढकारस्याऽभावादसिद्धत्वादपवादोऽयं विज्ञायेत ॥ कस्य ? ॥ जश्त्वस्य ॥ * ॥ तस्मात्सिद्धवचनम् ॥ * ॥ तस्मात्सिद्धत्वं वक्तव्यम् ॥ कस्य ? ॥ ष्टुत्वस्य ॥ * ॥ सङ्ग्रहणं वा ॥ * ॥

प्र.] सम्बन्धं न हास्यतीत्यर्थः । अनुपूर्वस्य वृत्तेः सकर्मत्वात्सम्बन्धमिति द्वितीया । कर्मणि वा घञ् । स च नपुंसकेऽपि बाधकाऽभावाद्भवति । स्त्रियां तु क्तिन्नादिभिर्बाध्यमानत्वान्न भवति । [समः सुटि] ॥

ढो ढे । ढलोप इति । क्वचित्स्थानी नास्ति, क्वचिन्निमित्तं नास्तीति वचनसामर्थ्याद्वचनान्तरबाधनादुभयत्र लोपप्रसङ्गः । जश्त्वमत्रेति । एकपदाश्रयत्वादन्तरङ्गत्वात् 'पूर्वत्राऽसिद्ध'मिति वा लोपस्याऽसिद्धत्वात्पूर्वं जश्त्वे प्रवृत्ते लोपस्याऽप्राप्तिरेव बाधा । जश्भावादिति चेदिति । उत्तरत्र ढे [यो] लोप इष्यते स न प्राप्नोति, लोपे कर्तव्ये ष्टुत्वस्याऽसिद्धत्वात्परस्य ढत्वाऽभावादित्यर्थः । जश्त्व इति । लोपेन तावदसिद्धत्वमवश्यं बाध्यं, तत्र 'लीढ'मित्यादावेकमेव पूर्व-

---

उ.] माह-भवांस्तरतीति । सकर्मकत्वादिति । अहीनार्थत्वादिति भावः । कर्मणि वा घञिति । अत्रेतरसंबद्धं 'स' इति उत्तरत्रोपतिष्ठते इत्यर्थः । नपुंसकेऽपीति । 'घञजपाः पुंसि' इति प्रायोवाद इति भावः । [समः सुटि] ॥

ढो ढे लोपः । क्वचित्स्थानीति । श्वलिड्ढौकत इत्यत्र जश्त्वात् । क्वचिन्निमित्तमिति । 'लीढ'इत्यादौ ष्टुत्वस्याऽसिद्धत्वादिति भावः । वचनान्तरबाधनादिति । स्वैकवाक्यतापन्नस्य ष्टुत्वैकवाक्यतापन्नस्य च पूर्वत्रासिद्धमित्यस्य बाधाल्लीढ इत्यादाविव प्रकृतेऽपि जश्त्वात्परत्वाल्लोपप्रसङ्ग इति भावः । ननु लोपस्याऽसिद्धत्वात्कथं जश्त्वेन लोपस्य बाधोऽत आह-अप्राप्तिरेव बाधेति । वार्तिकेऽपवादशब्दो भावप्रधानः । भाष्ये कस्य जश्त्वस्येति । लीढ इत्यादाप्रवृत्तेः जश्त्वस्यापवादोऽयं स्यादित्यर्थः । तस्मादिति । ष्टुत्वस्य सिद्धत्वेन जश्त्वापवादत्वाऽसंभवात् लोपस्याऽसिद्धत्वेन पूर्वं जश्त्वे प्रवृत्ते लोपाऽप्राप्तिरिति भावः । सङ्ग्रहणं चेति । 'गुडलिड् ढौकते'इत्यादावप्राप्त्युपायेन विकल्प-

सङ्ग्रहणं वा कर्तव्यम् । 'सङि ढ' इति वक्तव्यम् ॥ तत्तर्हि वक्तव्यं ? ॥ न वक्तव्यम् । आनन्तर्यमिहाश्रीयते-'ढकारस्य ढकार' इति ॥ क्व चिच्च सन्निपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यं, क्व चिच्च नैव सन्निपातकृतं नापि शास्त्रकृतम् । ष्टुत्वे संनिपातकृतमानन्तर्यं शास्त्रकृतमनानन्तर्यं, जश्त्वे नैव संनिपातकृतं, नापि शास्त्रकृतम् । यत्तु कुतश्चिदेवानन्तर्यं तदाश्रयिष्यामः ।

खरवसानयोर्विसर्जनीयः ।८।३।१५।

॥ * ॥ विसर्जनीयोऽनुत्तरपदे ॥ * ॥ विसर्जनीयोऽनुत्तरपद इति वक्तव्यम् । इह मा भूत्-नार्कुटो नार्पत्य इति ॥ [तत्तर्हि वक्तव्यं विसर्जनी-

---

प्र.] त्रासिद्धत्वमतस्तदेव बाध्यते, श्वलिड्ढौकत इत्यत्र तु ढलोपस्य जश्त्वापेक्षया बहिरङ्गत्वात्परत्वाच्च द्विविधमसिद्धत्वमिति न तद्बाध्यते । ततो जश्त्वे कृते नश्रुतिकृतमानन्तर्यं, नापि शास्त्रकृतं, जश्त्वस्याऽसिद्धत्वाऽभावादिति लोपस्याऽयमविषयः । [ढो ढे लोपः] ॥

खरव । विसर्जनीय इति । उत्तरपदे सति यो रेफो निष्पन्नस्तन्निमित्तकस्तस्य विसर्जनीयो न भवतीति वाक्यार्थः संपद्यते । तेन दास्याःपुत्रादौ भवत्येव । न ह्यत्र सकारस्य रेफ उत्तरपदनिमित्तकः, किं तर्हि, पदत्वनिमित्तकः । 'नार्कुटः' इत्यादौ तु तद्धितनिमित्तत्वे रेफस्योत्तरपदं निमित्तं, तदपेक्षत्वादकारस्यादित्वस्य । **नार्कुट इति ।** नृकुट्यां भव इत्यण् । **नार्पत्य इति ।** नृपतेरपत्यमिति दित्यदित्येति ण्य । तत्र वृद्धौ कृतायां रपरत्वे च पूर्वभक्तत्वाद्रेफस्य

उ.] बोधको वाशब्दः । ननु सामर्थ्यात् ष्टुत्वाऽसिद्धत्वबाधे स्वासिद्धत्वमपि बाध्यतां, विनिगमकाऽभावादत आह-**द्विविधमिति।** किञ्च स्वैकवाक्यतापन्नपूर्वत्रासिद्धबाधापेक्षया पश्चादुपस्थितपराङ्गतद्बाधस्यैव न्याय्यत्वमित्यपि बोध्यम् । एतेन त्रिपादीस्थेऽन्तरङ्गे बहिरङ्गाऽसिद्धत्वाऽप्रवृत्तेरिदं चिन्त्यमित्यपास्तम् । अतएव 'झलाञ्जशोन्ते झशी'ति न्यासः खरिचेत्यतः पूर्वं न कृतः । [ढो ढे लोपः] ॥

खरवसानयोर्विसर्जनीयः । नन्वेवं 'यशःसमूह' इत्यादौ उत्तरपदे विसर्गो न स्यादत आह-**उत्तरपदे सतीति ।** नेयं परसप्तमी विधेयविशेषणं, किन्तु सत्सप्तमी रेफविशेषणं । तेन निमित्तत्वं फलतीत्याह-**तन्निमित्तक इति ।** ननु नार्कुटेऽपि नोत्तरपदनिमित्तको रेफ इत्यत आह-**नार्कुट इत्यादौ त्विति ।** ऋकारगताऽऽदित्वस्य वृद्धिनिमित्तस्य तदपेक्षत्वादित्यन्वयः । **पूर्वभक्तत्वादिति ।** रपरोऽण् यद्भक्तः स्थानिद्वारा स्वतो

योऽनुत्तरपद इति ?] ॥ * ॥ नं वा बहिरङ्गलक्षणत्वात् ॥ * ॥ **न वा वक्तव्यम्** ॥ **किं कारणम् ?**॥ 'बहिरङ्गलक्षणत्वात्'। बहिरङ्गो रेफोऽन्तरङ्गो विसर्जनीयः। 'असिद्धं बहिरङ्गमन्तरङ्गे' ॥ नैष युक्तः परिहारः। अन्तरङ्गं बहिरङ्गमिति प्रतिद्वन्द्वभाविनावेतौ पक्षौ, सत्यन्तरङ्गे बहिरङ्गं, सति च[2] बहिरङ्गेऽन्तरङ्गं भवति[2]। न चात्रान्तरङ्गबहिरङ्गयोर्युगपत्समवस्थानमस्ति[3]॥ किं कारणम् ? ॥ 'असिद्धत्वात्' ॥ [कथमसिद्धत्वम् ?॥ पूर्वत्रासिद्धमिति]। न

प्र.] पदान्तत्वाद्विसर्जनीयः प्राप्तः प्रतिषिध्यते। **न वेति**। बहिरङ्गं लक्षणं निमित्तं स्वभावो वा यस्य रेफस्य स तथोक्तः। अपत्यार्थविहिततद्धितापेक्षवृद्धिनिमित्तत्वाद्रेफो बहिरङ्गस्तस्याऽसिद्धत्वात्स्थान्यभावाद्विसर्जनीयाऽभावः। अन्तः अङ्गं यस्य, बहिः अङ्गं यस्येति बहुव्रीहिः। ततः सर्वलिङ्गावन्तरङ्गबहिरङ्गशब्दावुपपन्नौ। अङ्गशब्दश्चात्रोपकारकवाची। **प्रतिद्वन्द्वभाविनाविति**। द्वन्द्वं युग्ममुच्यते। प्रतिकूलं परस्परविरुद्धं द्वन्द्वं-प्रतिद्वन्द्वं, तत्र भवतोऽवश्यमित्यावश्यके णिनिः। **सत्यन्तरङ्ग इति**। अन्तरङ्गे बुद्ध्यापेक्षिते तदपेक्षया बहिरङ्गं भवति, बहिरङ्गे चाऽपेक्षिते तदपेक्षयाऽन्तरङ्गं भवति, अन्तरङ्गव्यपदेशं लभत इत्यर्थः। **न चात्रेति**। अत्र विषयेऽन्तरङ्गबहिरङ्गयोर्युगपदेकस्यां बुद्धावपेक्षितपरस्परमवस्थानं नास्ति, पूर्वस्यां परिभाषायां परस्य विसर्जनीयस्याऽसिद्धत्वादन्तरङ्गाऽभावाद्रेफस्य

उ.] वा तद्धृत्तत्वादित्यर्थः। बहिरङ्गं—बहिर्भूतनिमित्तं शास्त्रमित्यर्थः। **स्वभावो वेति**। स्वस्य **भावः**—उत्पत्तिः। **अपत्येति**। अपत्यार्थविहिततद्धितमपेक्षते निमित्ततया या वृद्धिः तन्निमित्तत्वं रेफस्य, तया सह विधानात् रेफशिरस्को हि वृद्धिशब्देन विधीयते विसर्जनीयस्तु पदान्तमात्राश्रितोऽन्तरङ्ग इत्यर्थः। पूर्वमनयोः पुँल्लिङ्गेन निर्देशं कृत्वा अग्रे नपुंसकत्वेनोल्लेखोऽसङ्गतोऽत आह—**अन्तः अङ्गमिति**। अङ्गशब्दः संज्ञिविशेषवाची शरीरावयववाची वा न गृह्यते इत्याह—**अङ्गशब्दश्चेति**। **द्वन्द्वंयुग्ममिति**। अत्यन्तसहचरिताभिव्यक्ते द्वन्द्वशब्दनिपातनादिति भावः। **तत्र भवतोऽवश्यमिति**। विरोधेनैव तावर्थौ नियमेन भवतो नतु कदाचिदपि अविरोधेनेत्यर्थः। भाष्ये **पक्षौ**—असिद्धपरिभाषायाः पक्षाविव पक्षौ तत्संबद्धौ पदार्थावित्यर्थः। न वास्तवसत्ता विवक्षिता किन्तु बौद्धीत्याह—**बुद्ध्येति**। **तदपेक्षयेति**। तत्प्रतियोगित्वेनेत्यर्थः। **बहिरङ्गं भवतीति**। तद्व्यपदेशभाग्भवतीत्यर्थः। **अपेक्षितपरस्परम्**—अपेक्षितपरस्परधर्मावच्छिन्नम्। **अवस्थानं**—विषयत्वं। तदुपपादयति—**पूर्वस्यामिति**। वाह ऊठित्येद्देशस्थायामित्यर्थः। एवञ्चाऽस्याः परिभाषायास्त्रैपादिकेऽन्तरङ्गे न प्रवृत्तिरिति भावः। युक्त्यन्तरमाह—**अन्तरङ्गाभावाद्रेफस्येति**। त्रैपादिकाऽ-

चाऽनभिनिर्वृत्ते बहिरङ्गेऽन्तरङ्गं प्राप्नोति, तत्र निमित्तमेव बहिरङ्गमन्तरङ्गस्य भवति। [॥*॥ अनिमित्तं बहिरङ्गमन्तरङ्गस्याऽसिद्धत्वात् ॥*] ॥ अनिमित्तं बहिरङ्गमन्तरङ्गस्य ॥ किं कारणम्?॥ 'असिद्धत्वात्' ॥ कथमसिद्धत्वं यावता 'पूर्वत्राऽसिद्ध'मित्यसिद्धा परिभाषा। असिद्धं बहिरङ्गमन्तरङ्गे' ॥ कथम्?॥ 'कार्यकालं संज्ञापरिभाष'मिति। 'खरवसानयोर्विसर्जनीयः'। उप-

प्र.] तदपेक्षबहिरङ्गत्वाऽभावाद्बहिरङ्गपरिभाषानुपस्थानात्प्राप्नोत्येव विसर्जनीयः। **नानभिनिर्वृत्त इति**। वस्तुतत्त्वकथनम्। **तत्र निमित्तमेवेति**। पराभ्युपगमेनाऽन्तरङ्गबहिरङ्गव्यपदेशः। बहिरङ्गाभिमतं बहिरङ्गम्। अन्तरङ्गाभिमतस्यान्तरङ्गस्येत्यर्थः। **असिद्धत्वादिति**। बहिरङ्गस्य रेफस्याऽन्तरङ्गे विसर्जनीयेऽसिद्धत्वाद्विसर्जनीयाऽभावः। **कथमसिद्धत्वं यावता पूर्वत्रासिद्धमित्यसिद्धा परिभाषेति**। 'पूर्वत्रासिद्ध'मिति वचनेन विसर्जनीयस्य पूर्वस्यां परिभाषायामसिद्धत्वात्तदनुपस्थानात्कथं रेफस्याऽसिद्धत्वमित्यर्थः। अप्रवृत्तिरेव परिभाषाया असिद्धिः। बहिरङ्गपरिभाषा हि 'विप्रतिषेधे परं कार्य'मित्यत्रोपसङ्ख्यानात्तद्देशा' 'वाह ऊ'डित्यत्र ज्ञापितत्वादेतद्देशा वेति पूर्वा। इतरः कार्यकालत्वमाश्रित्याह—**असिद्धमिति**। यथोद्देशत्वमाश्रित्य चोदयति—**कथमिति**। इतर आह—**कार्यकालमिति**। तत्र का चित्परिभाषा विधिवाक्येनैकवाक्यत्वं गता स्वकार्यं निष्पादयति, यथेक्परिभाषा मिदेरिको गुणं व्यवस्थापयति। काचित्तु

उ.] न्तरङ्गस्य सपादसप्ताध्यायीस्थरेफविधायकदृष्ट्याऽसिद्धत्वेनैतन्निरूपितबहिरङ्गत्वमेव तस्य नास्तीत्यर्थः। **पूर्वत्रासिद्धमिति**। विसर्गस्याऽसिद्धत्वे सति रेफस्य यथा विसर्गप्राप्तिस्तदाह—भाष्ये—**न चानभिनिर्वृत्ते इति**। तत्र निमित्तमेव बहिरङ्गमित्याद्येव वक्तव्ये अस्य प्रकृते उपयोगाभावादाह—**वस्तुतत्त्वेति**। **पराभ्युपगमेनेति**। एवञ्च बहिरङ्गत्वाऽभावेन परिभाषाऽप्रवृत्तौ प्राप्नोत्येव विसर्ग इति चोद्यं पर्यवसितम्। अत्राशयमजानतः प्रत्युत्तरम्-अनिमित्त**मिति**। तद्व्याचष्टे-**बहिरङ्गस्येति**। इतरः स्वाशयं प्रकटयति—**कथमित्यादि**। स च परिभाषे'त्यन्त एकवक्तृक एको ग्रन्थ इत्याशयेन कृत्स्नं भाष्यमुपादत्ते—**कथमित्यादि**। कथमित्याक्षेपेनैवा'नेनासिद्धत्वं प्राप्नोतीत्यर्थः। तदुपपादयति—**पूर्वत्रेति**। **असिद्धा परिभाषेत्यस्या**प्रवृत्तान्तरङ्गपरिभाषेत्यर्थः। इत्याह—**अप्रवृत्तिरेवेति**। **कार्यकालत्वमिति**। तत्पक्षे हि विसर्जनीयस्याऽसिद्धत्वेऽपि परिभाषायाः सिद्धत्वात्तेन तस्याः स्वैकवाक्यता संपादनमिति भावः। तत्र परिभाषाणां विधिशेषत्वं क्वचित्पदैकवाक्यतया, क्वचिद्वाक्यैकवाक्यतयेति दर्शयति— **तत्र काचिदिति**। **विषये**—उदाहरणविशेषे। **निमित्तापेक्षा**—

स्थितमिदं भवत्यसिद्धं बहिरङ्गमन्तरङ्ग इति। एवमेषा सिद्धा परिभाषा भवति॥ कुतो नु खल्वेतद्द्वयोः परिभाषयोः सावकाशयोः समवस्थितयोः

प्र.]विषये निमित्तापेक्षा वाक्यभेदेन प्रधानकार्ये व्याप्रियते, यथा 'विप्रतिषेधे परं कार्य'मिति। एषा हि 'वृक्षे'ष्वित्यादौ 'बहुवचने झल्ये'दित्यस्मिन्प्रवृत्ते 'वृक्षेभ्य' इत्यादावेत्वदीर्घत्वयोर्विप्रतिषेधे परमेत्त्वं प्रवर्तयति। तद्वदसिद्धपरिभाषा [हि]'वृक्षस्तिष्ठती'त्यादौ विसर्जनीयशास्त्रे प्रवृत्ते नार्कुटादौ रेफस्याऽसिद्धत्वं विदधती प्रधानं विसर्जनीयं विषयविशेषे व्यवस्थापयन्ती विषयं संस्कुरुते। न च 'पूर्वत्राऽसिद्ध'मित्यनेन योगेन बहिरङ्गपरिभाषा रेफे पूर्वस्मिन्नसिद्धा क्रियते। प्रधानसंन्निधौ गुणानां परस्परेणाऽसंबन्धात्। तदुक्तं–**'गुणानां च परार्थत्वादसंबन्धः समत्वात्स्या'**दिति। विध्यन्तरशेषभावाच्च वाक्यभेदेनाप्युपतिष्ठमाना वाक्यान्तरे विसर्जनीयेनैकवाक्यभावात्पौर्वापर्याऽभावात् 'पूर्वत्रासिद्ध'मित्यनेन विसर्जनीये कर्तव्ये नाऽसिद्धा क्रियते, पूर्वोक्ताद्गुणत्वाद्वा। **कुतो न खल्विति।** 'असा आदित्य' इत्यादि 'पूर्वत्राऽसिद्ध'मित्यस्याऽवकाशः। 'पचावेद'मित्यादि बहिरङ्गपरिभाषायाः। नार्कुट'इत्यादौ तु द्वयोः सन्निपातः। यद्यपि 'पूर्वत्राऽ-

---

उ.]विप्रतिषेधादिरूपनिमित्तापेक्षा। **व्याप्रियत इति।** प्रधानकार्यं विशेषेऽवस्थापयतीत्यर्थः। **वृक्षेष्वित्यादाविति।** अनेन एत्वशास्त्रस्य विनाऽपि परिभाषां स्वविषये प्रवृत्तिं दर्शयति। **तद्वदिति।** 'विप्रतिषेधे पर'मितिवदित्यर्थः। **विषयं**–लक्ष्यं। **रेफे पूर्वस्मिन्नसिद्धेति।** कार्यकालपक्षे बहिरङ्गपरिभाषायास्त्रिपादीस्थत्वेन पूर्वरेफदृष्ट्या असिद्धतया कथं तस्य विसर्गं प्रत्यसिद्धत्वं प्रतिपादयेदिति शङ्कार्थः। **प्रधानेति।** 'पूर्वत्रे'त्यनेनाऽसिद्धपरिभाषाया नासिद्धत्वं प्रतिपाद्यत इत्यर्थः। नन्वेवं विसर्गविधौ उपस्थिताऽसिद्धपरिभाषाया 'आगन्तूनामन्ते निवेश'इति न्यायेन तदुत्तरत्वात्पूर्वत्र विसर्जनीये तस्या असिद्धत्वात्कथं सा रेफाऽसिद्धत्वं प्रतिपादयेदत आह—**विध्यन्तरेति। वाक्यान्तरे इति।** वाक्यैकवाक्यतापन्ने महावाक्ये इत्यर्थः। **पूर्वोक्तादिति।** कार्यकालपक्षे अस्या उपस्थितिसामर्थ्यादेव रेफं प्रत्यपि न विसर्गोऽसिद्धत्वमिति कथं तन्निरूपितं बहिरङ्गत्वमित्यपि न वाच्यम्। अनया एव युक्त्या सर्वशङ्काकलङ्कपरिहारः सुकर इति बोध्यम्। **एवमेषा परिभाषा सिद्धा भवतीति।** बहिरङ्गपरिभाषाऽत्र प्राप्ता भवतीत्यर्थः। यद्वा **एवमेषा परिभाषा**–पूर्वत्रासिद्धत्वमित्येषा–अप्राप्ता भवतीत्यर्थः। **असा आदित्य इति।** अत्र वलोपस्यासिद्धत्वाद्दीर्घो न। **बहिरङ्गेति।** तथा ह्यत्रैत ऐ इत्यैत्वं न। सावकाशत्वमुक्त्वा एकत्र युगपत्प्राप्तिरूपसमवस्थितत्वं दर्शयति-**नार्कुट इति। यद्यपीति।** एवञ्च परिभाऽ

'पूर्वत्रासिद्ध'मिति च 'असिद्धं बहिरङ्गमन्तरङ्ग' इति च,-'पूर्वत्रासिद्ध'मित्येतामुपमृद्याऽसिद्धं बहिरङ्गमन्तरङ्ग इत्येतया व्यवस्था भविष्यति, न पुनरसिद्धं बहिरङ्गमन्तरङ्ग इत्येतामुपमृद्य 'पूर्वत्रासिद्ध'मित्येतया व्यवस्था स्यात् ? ॥ अतः किम् ? ॥ अतोऽयुक्तः परिहारो 'न वा बहिरङ्गलक्षणत्वा'दिति ॥

रोः सुपि ।८।३।१६।

किमर्थमिदमुच्यते न 'खरवसानयोर्विसर्जनीय' इत्येव सिद्धम् ?॥ ॥ * ॥ नियमार्थोऽयमारम्भः ॥*॥ [नियमार्थोऽयमारम्भः] 'रोरेव सुपि

प्र.] सिद्ध'मित्यधिकारस्तथापि सपादां सप्ताध्यायीं प्रति पादत्रयपठितस्य सर्वस्याऽसिद्धत्वप्रतिपादनात्परिभाषासाधर्म्यात्परिभाषाव्यवहारः। तत्रैतयोः परिभाषयोः सावकाशत्वात्तुल्यबलयोरप्रतिपत्तावाश्रीयमाणायां नार्कुटादौ विसर्जनीयप्रसङ्गः। पर्याये चाश्रीयमाणे पक्षेऽनिष्टविसर्जनीयप्राप्तिः। अनयोश्च परस्परनिमित्तव्याघातात्परस्परस्योपमर्दकत्वम्। तथा हि-बहिरङ्गपरिभाषा रेफस्याऽसिद्धत्वं कुर्वती पूर्वलक्षणविषयाऽभावा'त्पूर्वत्रासिद्ध'मित्यस्या अप्रवृत्तिं साधयति। 'पूर्वत्रासिद्ध'मित्येषाऽपि विसर्जनीयाऽसिद्धिविधानेनाऽन्तरङ्गाऽभावाद्रेफस्याऽपि तदपेक्षबहिरङ्गत्वाऽभावाद्बहिरङ्गपरिभाषायाः प्रवृत्तिं विहन्ति। ततश्चा'ऽयुक्तोऽयं परिहारो न वा बहिरङ्गलक्षणत्वा'दिति चोद्यान्तमेवेदं भाष्यम्। ततश्च 'विसर्जनीयोऽनुत्तरपद' इति वक्तव्यमेव। यदा तु लक्ष्यदर्शनवशाद्बहिरङ्गपरिभाषाऽऽश्रीयते यथा चक्रकेष्विष्टतो व्यवस्था, तदा युक्त एव परिहारो 'न वा बहिरङ्गलक्षणत्वा'दिति। [**खरवसानयोर्विसर्जनीयः**]।

रोः सुपि। नियमार्थ इति। अथ 'सुपी'ति प्रत्याहाराश्रयणात् 'पयोभ्या'-

---

उ.] योरित्ययुक्तमिति भावः। **अप्रतिपत्ताविति।** क्वचित्प्रवृत्त्या शास्त्रस्य चरितार्थत्वाद्विरोधेऽप्रतिपत्तिरित्यर्थः। **पर्याये त्विति।** तृजादिवदित्यर्थः। भाष्योक्तमुपमर्दकत्वं व्युत्पादयति-**परस्परेति।** एवञ्च कार्यकाले यथोद्देशे च त्रिपाद्यां बहिरङ्गासिद्धत्वाऽप्रवृत्तिरिति भाष्याल्लभ्यते। वस्तुतः प्रत्यक्षत्वेन बलवता पूर्वत्रासिद्धमित्यनेनानुमानिक्या असिद्धपरिभाषाया बाध एवोचितः। भाष्ये-**अयुक्त इति।** संयोगान्तस्य लोपो रदाभ्या मित्यत्राऽन्यत्र चोक्तोऽसङ्गत इत्यर्थः। **यदा त्विति।** लक्ष्यवशात्क्वचिदानुमानिकेनाऽपि प्रत्यक्षबाध इत्यभिमानः। लक्षणैकचक्षुषां तु वचनान्येवावश्यकानीति बोध्यम् ॥ १५ ॥

नान्यस्य सुपि' ॥ क्व मा भूत् ? ॥ गीर्षु धूर्षु ॥ [रोः सुपि] ।

भोभगोअघोअपूर्वस्य योऽशि ।८।३।१७।

॥ * ॥ अश्ग्रहणमनर्थकमन्यत्राऽभावात् ॥ * ॥ **अश्ग्रहणमनर्थकम् ।** किं कारणम् ? ॥ 'अन्यत्राऽभावात्' । न ह्यन्यत्र रुरस्त्यन्यदतोऽशः ॥

नुनु चायमस्ति—छन्दःसु पयःस्विति ॥ किं पुनः कारणं सुकारपर एवोदाह्रियते न पुनरयं वृक्षस्तत्र प्लक्षस्तत्रेति ? ॥ अस्त्यत्र विशेषः—विसर्जनीये कृते न भविष्यति ॥ इहापि तर्हि विसर्जनीये कृते न भविष्यति—छन्दःसु पयःस्विति ॥ स्थानिवद्भावात्प्राप्नोति ॥ ननु चेहापि स्थानिवद्भावात् प्राप्नोति—वृक्षस्तत्र प्लक्षस्तत्रेति ॥ अनल्विधौ स्थानिवद्भावः ॥ अथाऽयमल्विधिः स्या-

---

प्र.] मित्यादौ विध्यर्थः कस्मादारम्भो न भवति ? । 'खरी'त्यनुवृत्त्या खरादेः सुपो ग्रहणात्, न च सप्तमीबहुवचनादन्यः खरादिः सुबस्तीति तस्यैव ग्रहणाद्विध्यर्थानुपपत्त्या नियमार्थ आरम्भः । **रोरेवेति ।** 'रोः सुप्येवे'ति तु नियमो न भवति, 'हलोऽनन्तराः संयोग 'इत्यादिनिर्देशात् । [**रोः सुपि**] ।

भोभगो । **अन्यत्राऽभावादिति ।** यत्राऽशोऽन्यः खर्भवति तत्र 'पूर्वत्राऽसिद्ध'मिति यत्वस्याऽसिद्धत्वाद्विसर्जनीयेन भाव्यमित्यश्येव रुरस्तीत्यर्थः ।

स्थानिवद्भावादिति । ननु च रोरुकारस्यानुबन्धत्वाद्रेफः स्थानीत्यल्विधित्वात्स्थानिवद्भावेन न भाव्यम् । उच्चारणकाले यः श्रुतः स स्थानित्वेनाश्रीयते

उ.] **रोः सुपि ।** **विध्यर्थ इति ।** कथं चिदपि विध्यर्थत्वे संभवति नियमो न युक्त इति भावः । **विध्यर्थानुपपत्त्येति ।** विधिरूपाऽर्थस्यानुपपत्त्येत्यर्थः ॥ १६ ॥

भो भगो अघो । भाष्ये—**अन्यत्वं कुत** इत्याशङ्कायामुक्तम्—**अन्यदतोऽश इति ।** भाष्ये—**छन्दःस्विति ।** अत्र हि 'रोः सुपी'ति विसर्गः । तत्र रोः स्थानित्वेन स्थानिवद्भावेन रुत्वं सुलभं । वृक्षस्तत्रेत्यत्र तु 'खरवसे'ति रेफस्य विसर्गः । न हि तस्य स्थानिवद्भावेन रुत्वं सुलभं, स्थानिभूताऽल्धर्मत्वात् । स्थानिभूताल्धर्माश्रये कार्ये निषेध इति भावः । **अल्विधित्वादिति ।** अल्स्थानिकोऽयं विसर्गविधिः न तु रुस्थानिक इति,—अत्रापि स्थान्यल्धर्मत्वाद्विसर्गस्य रुत्वं दुर्लभमिति भावः । **इति मन्यत इति ।** सिद्धान्तत्वेनाङ्गीकरोतीत्यर्थः । इदमेवाभिप्रेत्य 'विशिष्टं ह्येषोऽनलमाश्रयते इटं नामे'ति स्थानिवत्सूत्रभाष्ये उक्तमिति अयं सिद्धान्त एव । नियमसूत्राणि वाच्यार्थमर्यादया विधायकान्येव,आर्थिकस्तु निषेध इति पस्पशायां भाष्ये ध्वनितम् । भाष्ये—**ननु चेहापि स्थानिवद्भावादिति ।** स्थानि-

छक्यमश्ग्रहणमवक्तुम् ? ॥ बाढं शक्यम् ॥ अल्विधिस्तर्हि भविष्यति ॥ कथम् ?॥ इदमस्ति 'रो री'ति । ततो वक्ष्यामि—'खरवसानयोर्विसर्जनीय'— रः' । ततो 'रोः सुपि' । 'विसर्जनीयो र'इत्येव ॥

उत्तरार्थं तर्ह्यश्ग्रहणं कर्तव्यं,—'हलि सर्वेषां',—हल्यशीति यथा स्यादिह मा भूत्—वृक्षवयतेरप्रत्ययो—वृक्षव्करोति । [भोभगोअघो] ॥

प्र.] न तु प्रतिपत्तिकाले इति मन्यते। अल्विधिस्तर्हीति । रुनैव स्थानी, किं तु तद्विशेषणं, रोर्यो रेफस्तस्य विसर्जनीय इत्यर्थः। ततो वक्ष्यामीति। व्याख्यास्यामीत्यर्थः । वृक्षवयतेरिति । केचिद्वृक्षवन्तमाचष्ट इति णिचि टिलोपे च रूपमित्याहुः । तदयुक्तम् । इष्टवद्भावान्मतुपो लुका भाव्यं, न टिलोपेन तस्माद्वृश्चतेर्वृक्षं वृश्चतीति क्विप्, संप्रसारणे कृते वृक्षवृश्चमाचष्ट इति णिचि टेर्लोपे च विच्प्रत्ययः क्रियते । क्विपि तु सत्येकदेशविकृतस्यानन्यत्वाद्वृश्चतिग्रहणेन ग्रहणाद्वकारस्य सम्प्रसारणं स्यात्,'लोपो व्योर्वली'ति लोपो वा । न च णेर्लोपस्य स्थानिवद्भावः, 'क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसङ्ख्यान'मिति प्रतिषेधात् । विचि तु णिलोपस्य स्थानिवत्त्वाद्वलोपो नास्ति, 'हलि सर्वेषा'मित्यनेन तु वलोपे कर्तव्ये पूर्वत्रासिद्धे न स्थानिवदिति स्थानिवत्त्वनिषेधाद्वलोपः स्यादिति हल्विशेषणार्थमश्ग्रहणं क्रियते । वेतेर्वा वृक्षं वेति वृक्षवीः, वृक्षव्य-

---

उ.] भूताऽल्मात्रवृत्तिधर्माश्रयो नायं यत्वविधिः, समुदाये वर्तमानस्य रुत्वस्य निमित्तत्वाद्भवदेवात्रापि स्थानिवत्त्वमिति भावः । उत्तरम्—अनल्विधाविति। उक्त आशयः। विसर्जनीय इत्यर्थ इति । एवञ्च 'रोः सुपी'ति सूत्रेऽपि रेफस्यैव स्थानित्वमित्यल्विधित्वात्स्थानिवत्त्वाभाव इति भावः। न टिलोपेनेति। मतुब्लुकष्टिलोपापवादत्वादिति भावः । ननु णौ परतस्तत्प्रकृतिभूतप्रातिपदिकस्य लोपविधानेन वृश्चतेः स्थानित्वे मानाऽभावाद्वकारे श्चतित्वस्य दुर्लभत्वात्संप्रसारणाऽप्राप्तिः । न च छिन्नपुच्छश्वन्यायेन वृश्चतित्वं । वह्वयवापगमेन वृश्चतित्वाऽप्रत्यभिज्ञानात् । एतेन व्रश्चभ्रस्जेति षत्वं स्यादित्यपास्तम् । न च पदस्येत्यधिकारेण वृश्चान्तत्वस्यापि निमित्तत्वात्तत्वं स्थानिवत्त्वेन सुलभम् । झलां जशोऽन्त इत्यन्तग्रहणेनेदृशेषु पदस्येत्यस्य वैयधिकरण्येनैवान्वयादत आह—लोपो व्योरिति । इदं च तदपवादस्य ऊठ उपलक्षणं । न च णिलोपस्येति । न च पदान्तविधित्वं, प्रातिपदिकादेव णिजुत्पत्त्या पदान्तत्वाऽभावात्, लोपस्य चरमावयवत्वाभावाच्च । क्विलुगिति । णौ लुप्तत्वात्क्वौ विधेश्चेति भावः । विचि त्विति । अन्तर्भूतक्रियाश्रयवलोपस्तु न, बहिर्भूतणजाद्यपेक्षटिलोपादेरसिद्धत्वात् । अत्र 'अत उपधाया' इति वृद्धिप्राप्तेराह—वेतेर्वेति । अत्र

ओतो गार्ग्यस्य ।८।३।२०।

किमर्थमिदमुच्यते न 'लोपः शाकल्यस्ये'त्येव सिद्धम् ? ॥

॥*॥ ओकाराल्लोपवचनं नित्यार्थम् ॥*॥ **ओकाराल्लोपवचनं क्रियते** ॥ **किमर्थम् ?** ॥ **'नित्यार्थम्'** । नित्यार्थोऽयमारम्भः ॥ [ओतो गार्ग्यस्य] ॥

उञि च पदे ।८।३।२१।

पद इति किमर्थम् ? ॥ तन्त्रे उतं, तन्त्रयुतं, तन्त्र उतम् ॥

॥ * ॥ पद इति शक्यमवक्तुम् ॥ * ॥ [पदे इति शक्यमवक्तुम्] । **कस्मान्न भवति–तन्त्रे उतं तन्त्रयुतं तन्त्र उतमिति?॥ 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवे'ति ॥ उत्तरार्थं तर्हि पदग्रहणं कर्तव्यं–'ङमो ह्रस्वादचि ङमुण्नित्य'मित्यपदे मा भूत्–दण्डिना शकटिना** ॥ [उञि च पदे] ॥

प्र.] माचष्ट इति पूर्वर्वाणणजादिः। अथ ककारे परतो 'लोपो व्योर्वली'ति लोपः कस्मान्न भवति ?। न च णिलोपस्य स्थानिवद्भावोऽस्ति, पदान्तविधौ तन्निषेधात् । नैष दोषः । पदान्ते विधीयमाने स्थानिवत्त्वनिषेधो, न च लोपः पदान्तस्तस्याऽभावरूपत्वात् । अग्रहणाऽनुरोधेन चैतद्भाष्यकारेणोदाहृतम् । तथा हि लणित्यत्रोक्तं 'न पदान्ता हलोऽणः सन्ती'ति । [**भोभगोअघो**] ।

ओतो गा । **किमर्थमिति** । 'लोपः शाकल्यस्ये'त्यनेन पाक्षिकः सिद्ध एव लोपोऽनेनापि-गार्ग्यस्य मतेन लोपो नान्येषामिति-विकल्पेनैव विधेय इति **प्रश्नः** । **ओकारादिति** । गार्ग्यः स्वस्यां स्मृतावोतो नित्यमेव लोपं स्मरतीति पाणिनिरपि तथैवेच्छति । एवञ्च 'भो अत्रे'ति नित्यं भवति, न तु 'भो यत्रे'ति ॥

उञि च पदे । अयमपि नित्याऽर्थो योगः । [**उञि च पदे**] ।

उ.] टिलोपस्य स्थानिवत्त्वान्न वृद्धिरिति भावः। **पदान्तविधाविति** । विजन्तोत्तरसुपा पदत्वमिति भावः। **पदान्ते विधीयमान इति** । विधिशब्दो भावसाधनः, अन्तशब्दश्चर-मावयववाचीति भावः। **अनुरोधेन चेति** । एवञ्चेदं भाष्यं पूर्वपक्ष्येकदेशयुक्तिः । 'हलि सर्वेषा'मित्यनेन भोसादिसाहचर्येण रोरित्यस्यानुवृत्त्या च रुस्थानिकयस्यैव लोपादित्यपि बोध्यम् । [**भोभगोअघोअपूर्वस्य**] ॥

ओतो गार्ग्यस्य । **इति प्रश्न इति** । न च स्वमतप्रच्युत्यभावायेदं, गार्ग्यशाकल्याभ्यां लोपस्यैव स्मृतया तद्वाक्येऽन्यग्रहणेन तयोरग्रहणादिति भावः। [**ओतो गार्ग्यस्य**]।

उञि च पदे । भाष्ये–**दण्डिनेति** । न च पदस्येत्यधिकारेण विभक्तिविपरिणामेन च ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो विधीयमानो ङमुट् कथमत्र प्राप्नोति

हे मपरे वा ।८।३।२६।

॥ * ॥ यवलपरे यवला वा ॥ * ॥ यवलपरे हकारे यवला वेति वक्तव्यम् । किं ह्यः किँय्ह्यः[1] । किं ह्वलयति । किँव्ह्वलयति[1] । किं ह्लादयति । किँल्ह्लादयति[1] । [हेमपरे वा] ।

ङः सि धुट् ।८।३।२९। नश्च ।८।३।३०।
शि तुक् ।८।३।३१। ङ्णोः कुक्टुक् शरि ।८।३।२८।
ङमो ह्रस्वादचि ङमुण्नित्यम् ।८।३।३२।

इह धुडादिषु केचित्पूर्वान्ताः क्रियन्ते केचित्परादयः । यदि पुनः सर्व एव पूर्वान्ताः स्युः सर्व एव वा[2] परादयः कश्चात्र विशेषः ? ॥ * ॥ धुगादिषु[3] ष्टुत्वणत्वप्रतिषेधः ॥ * ॥ धुगादिषु[3] सत्सु ष्टुत्वणत्वयोः प्रतिषेधो वक्तव्यः । ष्टुत्वस्य तावत्—श्वलिट्त्साये मधुलिट्त्साये । 'ष्टुना ष्टु'रिति ष्टुत्वं प्राप्नोति । परादौ पुनः सति 'न पदान्ताट्टोरनाम्'मिति प्रतिषेधः सिद्धो भवति । णत्वस्य-कुर्वन्नास्ते कृषन्नास्ते । 'रषाभ्यां नो णः समानपद'इति णत्वं प्राप्नोति । परादौ पुनः सति 'पदान्तस्य न'ेति प्रतिषेधः सिद्धो भवति ॥ सन्तु तर्हि परादयः ॥ * ॥ परादौ छत्वषत्वविधिप्रतिषेधः[4] ॥ * ॥ यदि परादयश्छत्वं

प्र.] ङः सि धुट् । योऽयमिह पूर्वान्तपरादिविचारः स स्थितलक्षणस्यार्थस्य लौकिकस्य विरोधाऽभावात् कृतः । ततो यदेके चोदयन्ति–'पूर्वान्तपक्षे हि तत्सहितेन पूर्वेणाऽर्थः प्रत्याय्यः, परादिपक्षे हि तत्सहितेन परेण पदेनेत्ययुक्तो विचार' इति । तदसम्बद्धम् । सत्यप्यस्मिन् भेदे संहितायां वाक्यार्थाऽभेदात् ।

उ.] ङमन्तस्य पदत्वाभावादिति वाच्यं, वैयधिकरण्येनानुवृत्तस्यान्वयोपपत्तौ विभक्तिविपरिणामे मानाभावादित्याशयः । एवञ्च पदग्रहणमपि अन्तग्रहणवत्पदाधिकारस्य विशेषणत्वे ज्ञापकं बोध्यम् । भाष्येऽनुक्तमपि सूत्रप्रयोजनं दर्शयति–**अयमपीति ।**

हे मपरे वा । वार्तिकेन यवला निरनुनासिका एव, विधीयमानत्वात् । उदाहरणेषु सानुनासिकलेखस्तु लेखकप्रमादादित्याहुः । [**हे मपरे वा**] ॥

ङः सि धुट् । स्थितलक्षणस्येति । स्थितम्–अप्रच्युतं **लक्षणं**–स्वरूपं यस्य सः । कोऽसौ?, लौकिको वाक्यार्थरूपस्तस्येत्यर्थः। प्रकृतिप्रत्यययोः पदानां चावापोद्वापलक्षणो बुद्ध्या पृथक् निष्कृष्य कल्पितोऽर्थो न तु स्थितलक्षणः । स हि आगमादेशादिभिरन्यत्रान्यत्रोपसंक्रमत इतिभावः । **संहितायां**–प्रकृतिप्रत्यययोः पदानाञ्च विभागाऽभावकाले । **वाक्यार्थाऽभेदादिति।** वाक्यस्यैवास्मन्मते बोधकत्वात्, अस्तिर्भवन्तिपर इत्युक्तेरिति भावः।

विधेयं, षत्वं च प्रतिषेध्यम् । छत्वं विधेयं–कुर्वञ्च्छेते कृषञ्च्छेते । यद्धि तच्छश्छोटीति 'झयः पदान्ता'दित्येवं तत् ॥ किं पुनः कारणं–'झयः पदान्ता'-दित्येवं तत् ? ॥ इह मा भूत् 'पुरा क्रूरस्य विसृपो विरप्शि'न्निति । षत्वं च प्रतिषेध्यं–प्रत्यङ्क्सिञ्च उदङ्क्सिञ्च । 'आदेशप्रत्यययो'रिति षत्वं प्राप्नोति । पूर्वान्ते पुनः सति 'सात्पदाद्यो'रिति प्रतिषेधः सिद्धो भवति । तस्मात्सन्तु यथान्यासमेव केचित्पूर्वान्ताः केचित्परादयः । अयं तु खलु शितुक्छत्वार्थं नियोगतः पूर्वान्तः कर्तव्यः । तत्र कुर्वञ्च्छेते कृषञ्च्छेत इति 'रषाभ्यां नो णः समानपद' इति णत्वं प्राप्नोति ॥ नैष दोषः-श्चुत्वे योगविभागः करिष्यते । इदमस्ति 'क्षुभ्नादिषु च' । [क्षुभ्नादिषु] न णकारो भवति । ततः–'स्तोः श्चुना' । स्तोः श्चुना संनिपाते न णकारो भवति ॥ ततः–'श्चुः' । श्चुश्च भवति स्तोः श्चुना सन्निपाते ॥ [ङः सि धुट्] ।

ङमो ह्रस्वादचि ङमुण्नित्यम् ।८।३।३२।

॥ * ॥ ङमुटि पदादिग्रहणम् ॥ * ॥ ङमुटि पदादिग्रहणं कर्त्तव्यम् । इह मा भूत्–दण्डिना शकटिनेति ॥ तर्त्तर्हि वक्तव्यं ? ॥ न वक्तव्यम् ॥ 'पदा'दिति वर्तते ॥ एवमपि–परमदण्डिना परमच्छत्रिणेत्यत्र प्राप्नोति ॥

प्र.] नियोगत इति । परादौ छत्वं न सिध्यतीति वचनादवश्यं पूर्वान्तः कर्तव्य इत्यर्थः । तत्र नकारस्याऽपदान्तत्वाण्णत्वप्रसङ्गः । न च 'नश्चापदान्तस्य झली'ति नकारस्याऽनुस्वारे परसवर्णे च रूपं सिध्यति । अनुस्वारे कर्तव्ये तुकोऽसिद्धत्वात् । श्चुत्व इति । णत्वप्रतिषेधे श्चुत्वमाश्रयात्सिद्धम् । [ङः सि धुट्] ।

उ.] धुटो विधायकभेदेन भेदमवलम्ब्य डुट् णुट् नुटोऽवलम्ब्य च भाष्ये केचित्परादय इति बहुवचनम् । वचनादिति । यथान्यासं वचनादित्यर्थः । अपदान्तत्वादिति । परादौ तु पदान्तत्वेन 'पदान्तस्य ने'ति णत्वप्रतिषेधसिद्धिरिति भावः । ननु पूर्वस्मिन् णत्वप्रतिषेधे कर्तव्ये परस्य श्चुत्वस्याऽसिद्धत्वात्कथं सिद्ध्येदत आह–णत्वप्रतिषेध इति ।

ङमो ह्रस्वादचि । भाष्ये–पदादिग्रहणमिति । पदादेरच इत्यर्थः । अचि इति षष्ठ्यर्थे सप्तमी । यद्यपि पदस्येत्यनुवृत्तस्याऽचीति विशेषणं तथा च 'तस्मान्नुडची'त्यादाविवाजादेः पदस्येत्यर्थेनापि तद्वारणं संभवति तथापि यत्र विशेषणे विशेष्ये च सप्तमी तत्रैव यस्मिन्विधिरिति न्यायप्रवृत्तेस्तादृशार्थाऽसंभव इति भावः । अतएव 'गुडलिट्त्सु' इत्यादौ धुडादिसिद्धिः । अन्यथा सादेः पदस्यैव स्यात् । अतएव आर्धधातुकस्येति सूत्रे वलादेरित्यादिग्रहणं चरितार्थम् । अन्यथा वलीत्येव वदेत् । पदादिति वर्त्तत इति । एवञ्च

'पदस्ये'ति वर्तते 'ङम' इति च नैषा पञ्चमी ॥ का तर्हि ?॥ संबन्धषष्ठी । 'पदान्तस्य ङमो ङमुड्भवति ह्रस्वादुत्तरस्याऽची'ति ॥ यदि ङम एव ङमुट् क्रियते कुर्वन्नास्ते कृषन्नास्ते,–'रषाभ्यां नो णः समानपदे'इति णत्वं प्राप्नोति ॥ 'पदान्तस्य ने'ति प्रतिषेधो भविष्यति ॥ 'पदान्तस्ये'त्युच्यते नैष पदान्तः ॥ पदान्तभक्तः पदान्तग्रहणेन ग्राहिष्यते ॥ एवमपि न सिध्यति ॥

नैष दोषः । उक्तमेतत्–'उत्तरपदत्वे चाऽपदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवती'ति ॥ एवमपि पदादिति वक्तव्यं, यद्धि तत्प्रकृतं, 'प्राक् सुपि कुत्सना'दित्येवं तत ॥ एवं तर्हि ङम एवायं ङमुट् क्रियते ॥ कथम् ?॥

प्र.] ङमो ह्रस्वादचि ङमुण्नित्यम् । **एवं तर्हीति** । ङमा पदस्य विशेषणात्तदन्तविधिना ङमन्तस्य पदस्यागमो विधीयमानो 'दण्डिने'त्यादौ ङमन्तस्याऽपदत्वान्न भवति । यद्येवं पदस्यादिर्ङमुट् प्राप्नोति । नैष दोषः। 'ह्रस्वा'दित्यनेन ङमा ह्रियेते 'ङमन्तस्य पदस्य ह्रस्वात्परो यो ङम् तस्य ङमुड्भवति'। **नचेति** । न हि पदस्येत्येतद्विशेष्यं किं तर्हि, विशेषणमिति तदन्तविध्यभावाद्दण्डिनेत्यादौ-

उ.] ङमन्तपदात्परस्याऽच इत्यर्थेन दण्डिनेत्यादौ न दोषः । दण्डिनित्यस्य भत्वादिति तात्पर्यम् । **एवमपीति** । अन्तर्वर्तिविभक्त्या पदत्वमिति भावः । सिद्धान्त्येकदेश्याह– **उक्तमेतत्–उत्तरपदत्वे चेति** । अत्राऽपदादीति पर्युदासेन पदान्तविधावेवाऽस्य प्रवृत्त्या न लुमतेति सूत्रस्थभाष्यसंमततया अत्र प्रवृत्त्यभावात् , माषकुंभवापेनेत्यादौ णत्वस्य पदव्यवायेऽपीति निषेधसिद्धये यत्र उत्तरपदस्य कार्यित्वं तत्रैव तत्प्रवृत्तेश्च नेयं सिद्धान्त्युक्तिः । एतत्प्रत्याख्यानप्रकारोऽपि तद्भाष्य उक्तो योगविभागस्य इष्टसिद्ध्यर्थतया पदान्तविधिविषय एवेति न दोष इति बोध्यम् । कैयटे 'ह्रस्वादित्यनेन ङमाक्षिप्यते'इति पाठः । आगमित्वेनाक्षिप्यत इति तदर्थः । **ङमन्तस्य पदस्य ह्रस्वादिति** । 'पदस्ये'त्यवयवषष्ठी । 'ङम'इति च तद्विशेषणं । ङमन्तपदावयवस्य ह्रस्वात्परस्य ङमुडित्यर्थः। ह्रस्वात्परश्च प्रत्यासत्त्योपस्थितो ङमेवेति भावः । भाष्ये–णत्वं **प्राप्नोतीति** । आगमनस्येति भावः । भाष्ये– **पदान्तभक्त इति** । अयं भावः–'यदागमा'इत्यस्यायमप्यर्थः–'आगमी यद्यद्धर्मवैशिष्ट्येन भासते आगमस्याऽपि तद्धर्मवैशिष्ट्येन ग्रहण'मिति स गृह्यते येन धर्मेण तेन तद्गुणीभूतागमानामपि ग्रहणमित्यक्षरार्थः परिभाषायाः स येन शब्देन गृह्यते तेन तद्विशिष्टस्य ग्रहणमिति चेति । एतेन 'यदागमा'इति परिभाषया समुदायस्य पदान्तत्वेऽपि केवलागमनकारस्य तत्त्वाभावः । नत्वं तु तस्याप्यस्त्येवेति अपास्तम् । **न हि पदस्येति** । विशेष्यत्वे ह्रस्वात्पर-

किं कारणम् ? ॥ **उक्तमेतत्—'न वा पदाधिकारस्य विशेषणत्वा'दिति । [तेन दण्डिना शकटिनेत्यत्र प्राप्नोति]** ॥ **एवं तर्हि पद इति वर्तते** ॥ **क्व प्रकृतम् ?** ॥ **'उञि च पदे' इति** ॥ [ङमो ह्रस्वादचि ङमुण्नित्यम् ।]

मय उञो वो वा ।८।३।३३।

किमर्थं 'मय उत्तरस्य उञो वो वे'त्युच्यते नेको यणचीत्येव सिद्धम् ?॥ न सिध्यति । 'प्रगृह्यः प्रकृत्ये'ति प्रकृतिभावः प्राप्नोति ।। यदि पुनस्तत्रैवोच्येत—'इको यणचि मय उञो वे'ति?।। नैवं शक्यमिह हि दोषः स्यात्— 'किम्वावपनं महत्' । 'मोऽनुस्वारो हली'त्यनुस्वारः प्रसज्येत । वत्वे पुनः सत्यसिद्धत्वान्न भविष्यति।। [मय उञो वो वा] ॥

प्र.] ङमुट्प्रसङ्गः। **एवं तर्हीति** । तत्सम्बन्धानुवृत्त्या च पूर्वयोगेष्वसम्बन्धाद्कुङलिट्त्स्वित्यादौ धुडादयोऽपि भवन्ति । [**ङमो ह्रस्वादचि**]

मय उञो वो वा । किमर्थमिति । 'उञ' इति योगविभागेन शाकल्यस्य मतेन प्रगृह्यसञ्ज्ञाविधानात्पक्षे यणादेशः सिद्ध इति प्रश्नः । **प्रगृह्य इति** । 'उञ' इत्यत्रेतावित्यनुवर्तनादनितिपरस्योञो निपात एकाजनाङिति नित्यं प्रगृह्यसञ्ज्ञा । **यदि पुनरिति** । यण्ग्रहणानुवर्तनाद्वग्रहणं न कर्तव्यं भवतीति भावः ।

वत्व इति । अनुस्वारे कर्तव्ये वत्वस्याऽसिद्धत्वादनुस्वाराऽभावः, हल्परत्वाऽभावात् । यदा त्वितिपर उञ्भवति तदा 'किं विति' 'किम्विति' 'किमु इति' 'किमूँ इती'ति रूपचतुष्टयं भवति । प्रगृह्यसञ्ज्ञाऽभावपक्षे वत्वस्यासिद्धत्वाद्यणादेशे सत्यनुस्वारो भवति । प्रगृह्यसञ्ज्ञापक्षे त्वनेन वा वत्वम्। 'ऊँ' आदेशस्यापि स्थानिवद्भावादान्तरतम्यादनुनासिके पाक्षिके वकारे सति रूपपञ्चतयेन भाव्यमित्याहुः।

उ.] ङमन्तपदाऽचि ङमुङित्येवार्थः स्यान्नतु त्वदुक्त इति महदेवाऽनिष्टं स्यादिति भावः । एवं च 'ह्रस्वात्परो यो ङम् पदावयवस्तस्य ङमु'ङित्यर्थे दण्डिनेत्यादौ दोषस्तदवस्थः । पदावयवङमः परस्याऽच इत्यर्थेऽप्यत्र दोष एव । विभक्तिविपरिणामेन 'ङमन्तपदात्परस्ये'त्यर्थस्तु न युक्तो विभक्ति(वि)परिणामे मानाऽभावात् । तत्पक्षेऽपि परमदण्डिनेत्यादौ दोषवारणाय पदे इत्यनुवृत्तिः । उत्तरपदत्वे चेत्यस्य तु नात्र प्रवृत्तिरित्युक्तम् । [**'ङमो ह्रस्वादचि'**] ।

मय उञो वो वा । ननूञः प्रगृह्यत्वात् कथमिको यणचीत्यनेन यणित्यत आह— **उञ इतीति** । **नित्यमिति** । तथा च शमु अस्तु वेदिरित्यादौ पक्षे वत्वं न स्यादितिभावः । **इत्याहुरिति** । विधीयमानत्वेन सवर्णाऽग्राहकत्वमणुदित्सूत्रेऽण्ग्रहणेन यण्—

विसर्जनीयस्य सः ।८।३।३४।

इह कस्मान्न भवति—वृक्षः प्लक्ष इति।। 'संहिताया'मिति वर्तते ।। एव-मप्यत्र प्राप्नोति ।। किं कारणम् ? ।। 'परः संनिकर्षः संहिते'त्युच्यते स यथैव परेण परः सन्निकर्ष एवं पूर्वेणाऽपि ।। एवं तर्ह्यनवकाशाऽवसानसंज्ञा संहितासंज्ञां बाधिष्यते ।। अथ वा संहितासंज्ञायां प्रकर्षगतिर्विज्ञास्यते,— 'साधीयो यः परः सन्निकर्ष'इति ।। कश्च साधीयः ? ।। यः पूर्वपरयोः ।।

यद्येवाऽनवकाशाऽवसानसंज्ञा संहितासंज्ञां बाधतेऽथापि संहिता-संज्ञायां प्रकर्षगतिर्विज्ञायते उभयथा दोषो भवति । इष्यन्ते इत उत्तरमव-

---

प्र.] **विसर्जनीयस्य । इहेति ।** स्थानिमात्रं निर्दिष्टं न तु निमित्तविशेष इति प्रश्नः । **संहितायामिति ।** पौर्वापर्यमकालव्यपेतं संहिता, न चाऽत्र परमस्तीति संहिताया अभावः । अन्यथा दधि अत्रेतीगचोरसंहितायामपि इकः पूर्वेणाचः परेण च संहितास्तीति यण् प्रसज्येत । **एवमप्यत्रेति ।** विशेषानुपादानादिति भावः । इको यणचीत्यत्र तु स्थानिनिमित्तयोरुपादानात्तयोरेव संहिता गृह्यते । **एवं तर्हीति ।** एकसञ्ज्ञाधिकारात्सामान्यविहिता संहिता सञ्ज्ञाविशेषविहितयाऽवसा-नसञ्ज्ञया बाध्यते । ननु सञ्ज्ञिभेदाद्बाधानुपपत्तिः, परस्य सन्निकर्षस्य संहिता-सञ्ज्ञा, अवसानसञ्ज्ञा तु विरामस्य वर्णस्य विरतेर्वा । उच्यते । संहितावसान-कार्ययोरेकवर्णविषयत्वात्कायार्थत्वाच्च सञ्ज्ञानां सञ्ज्ञयोरप्येकविषयत्वाद्बाध्य-बाधकभावं मन्यते । **अथ वेति ।** सन्निकर्षः संहितेतीयता सिद्धे परशब्दः प्रकर्ष-गत्यर्थ उपादीयते तेन पूर्वपरविषयः सन्निकर्षः संहितासञ्ज्ञो भवति । **यद्येवेति ।**

उ.]विषये गुणानां भेदकत्वमेव चेत्यरुचिः । अतएव मतुपो मस्य नानुनासिको वकारः । अतएव तद्वानासामिति निर्देशः सङ्गच्छते । अन्यथा नित्योऽनुनासिकः स्यात् । **[मय उञो वो वा]।**

विसर्जनीयस्य सः । 'संहिताया'मित्यनुवृत्त्याऽतिप्रसङ्गनिवृत्तिं दर्शयति—**पौर्वा-पर्यमिति ।** इदं हि तत्र वार्तिककृतोक्तम् । ननु 'वृक्ष' इत्यदावपि पूर्वेण संहिताऽस्तीत्यत आह—**अन्यथेति । असंहितायामपीति ।** कालव्यवायेऽपीत्यर्थः । यथान्यासेऽपि सन्नि-कर्षस्योभयसापेक्षत्वात् पूर्वपरयोरित्यर्थ लाभ इति बोध्यम् । ननु पूर्वेण संहिताया 'दधि-अत्रे'त्यत्राऽसंहितायामपि सत्त्वेन यणादेशापत्तिरत आह—**इको यणचीत्यत्रत्विति । विरामस्येति ।** करणे घञिति भावः । **विरतेर्वेति ।** भावे घञिति भावः । **प्रकर्षगत्यर्थ इति ।** कार्यिणः पूर्वस्य परेण सन्निकर्ष इत्यर्थः । 'यद्येवे'त्यभ्युपगमवाद इत्याह—**संज्ञिभे-**

साने संहिताकार्याणि, तानि न सिध्यन्ति–'अणोऽप्रगृह्यस्यानुनासिक' इति ॥ एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति–'न सर्वस्य विसर्जनीयस्य सत्वं भवती'ति यदयं 'खरवसानयोर्विसर्जनीय' इत्याह । इतरथा 'खरवसानयोः सो भवती'त्येव ब्रूयात् । तच्च[1] लघु भवति, 'विसर्जनीयस्य स' इ[2]त्येतच्च न वक्तव्यं भवति ॥ अवश्यं 'शर्परे विसर्जनीय' इत्यत्र प्रकृतिनिर्देशार्थं विसर्जनीयग्रहणं कर्तव्यम् ॥ अथेदानीमेतदपि रसा[3]न्निध्यार्थं पुरस्तादपकृ[4]ष्यते–'खरवसानयोः स' इत्यत्रैव, एवमपि 'कुप्वोः ⨯क⨯पौ चे'त्ये-

प्र.] सञ्ज्ञिभेदात्सञ्ज्ञयोर्बाध्यबाधकभावोऽनुपपन्न इति भावः । **अणोप्रगृह्यस्येति** । 'वावसान' इति तत्रानुवर्तते, संहिताधिकारश्चोत्तरार्थोवश्यानुवर्त्यः । तोर्लीति परसवर्णोऽसंहितायां मा भूदग्निचित् लुनातीति । ततश्च संहितावसानोभयाश्रयोऽनुनासिको दधिँ मधुँ इत्यत्र सिद्धो भवति । यदि तु सत्यपि बाध्यबाधकभावे यत्रैवावसानाश्रयं कार्यं तत्रैव संहिताग्रहणेनाऽसम्बन्धः, उत्तरत्र त्वनुवृत्तिरेव तदा न कश्चिद्दोषः । किं तु प्रतियोगिना विच्छिन्नस्य संहिताग्रहणस्योत्तरत्रोपस्थानं सन्दिह्येतेति भिन्नविषयत्वात्समावेश एवानयोः सञ्ज्ञयोरेष्टव्य इति भाष्यकाराभिप्रायः । **प्रकृतिनिर्देशार्थमिति** । स्थानिनिर्देशार्थमित्यर्थः । अन्यथा कस्य शर्परे विसर्जनीयः स्यात् । **अथेदानीमिति** । एवमत्र (सूत्र)सन्निवेशः क्रियते–'रोरि' 'खरवसानयोः सः' 'रोः सुपि' 'शर्परे विसर्जनीय' इति । तत्र 'शर्पर' इत्यत्र 'र' इति वर्तते न तु 'रो'रिति । **एवमपीति** । यदि 'रोः सुपी'त्यस्यानन्तरं 'शर्परे विसर्जनीयः' 'वा शरि' 'कुप्वोः ⨯क⨯पौचे'त्यादि'र'स्थानिकादेशविधानार्थं

उ.] **दादिति** । नन्वणोऽप्रगृह्यस्येत्यत्र संहिताऽधिकाराभावे को दोषोऽत आह–**संहिताधिरश्चेति** । **सत्यपि बाध्यबाधकभावे इति** । पूर्वपरयोः सन्निकर्षस्यैव वा संहितात्वे इत्यपि बोध्यम् । तर्हि तथैवाश्रीयतामत आह–**किंत्विति** । **प्रतियोगिनेति** । विरोध्यर्थप्रतिपादकेन 'अवसाने' इत्यनेनेत्यर्थः । **परेतु**-व्याख्यानान्नियताऽवधिपरिच्छिन्नेष्वधिकारेषु न मण्डूकप्लुतिः । नदीस्रोतोन्यायेन तेषामधिकाराद्वृत्त्यन्तरसंभवाच्च । विषयभेदेऽपि सत्यपि संभवे बाधनं भवतीति न्यायेन बाधः प्राप्नोत्येव, अवसानकार्याणां संहिताधिकारे पाठसामर्थ्यात् । आकडारादिति सूत्रं शुद्धस्वशास्त्रपरिभाषितसंज्ञाविषयम्, अनयोस्तु लोकविदितत्वात् केवलशास्त्रीयाऽभावेन न बाध्यबाधकभाव इति भाष्याशयः । 'अणोऽप्रगृह्यस्ये'त्युपलक्षणम् अवसानविसर्गस्याऽपि, तस्याऽपि संहिताऽधिकारे पाठादित्याहुः । **ननु रोरितीति** । तेन 'पुनः क्षरद्भि'रित्यादौ विसर्जनीयसिद्धिः । ननु यत्वमपि रस्यैव विधेयं, तत्राह–तदा

वमादिनाऽनुक्रमणेन व्यवच्छिन्नं 'भोभगोअघोअपूर्वस्य योशी'त्यत्र रुग्रहणं कर्तव्यं स्यात् ॥ एवमप्येकं विसर्जनीयग्रहणं व्याजो भवति । सोऽयमेवं लघीयसा न्यासेन सिद्धे सति यद्गरीयांसं यत्नमारभते तज्ज्ञापयत्याचार्यो 'न सर्वस्य विसर्जनीयस्य सत्वं भवती'ति ॥ एवमप्यनैकान्तिकं ज्ञापकम्, एतावज्ज्ञाप्यते 'न सर्वस्य विसर्जनीयस्य सत्वं भवती'ति, तत्र कुत एतदिह भविष्यति—वृक्षस्तत्र प्लक्षस्तत्रेति, इह न भविष्यति-वृक्षः प्लक्ष इति ॥

एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति—'नास्य विसर्जनीयस्य सत्वं भवती'ति यदयं 'शर्परे विसर्जनीय' इत्याह ॥ अथ वा 'हली'ति वर्तते॥ क्व प्रकृतम्? ॥ 'हलि सर्वेषा'मिति ॥ यदि तदनुवर्तते 'मय उञो वो वा' 'हलि चे'ति

प्र.] पठित्वा 'भोभगो' इति यत्वं रस्य स्थाने विधीयते तदा 'स्वरत्रे'त्यादावपि प्राप्नोति, रुग्रहणस्य विच्छिन्नत्वात् पुनरुपादानं कर्तव्यं भवतीत्यर्थः । **एवमपीति** । यथान्यासे त्रीणि ग्रहणानि भवन्ति द्वे विसर्जनीयग्रहणे तृतीयं सग्रहणम्, अन्यथान्यासे तु द्वे ग्रहणे—'स' ग्रहणं 'रु'ग्रहणं च। तत्र 'खरवसानयोः स' इति सग्रहणं 'खरवसानयोर्विसर्जनीय' इति विसर्जनीयग्रहणेन निमीयते, रुग्रहणं 'विसर्जनीयस्य स' इति 'स'ग्रहणेन। 'तत्र विसर्जनीयस्ये'ति विसर्जनीयग्रहणमधिकत्वाद्व्याजो भवति । अजेः क्षेपणार्थस्य घञि रूपं विक्षिप्यते तेन न पठितव्यं भवतीत्यर्थः । अथ वा व्याजोऽनृतमुच्यते । आनर्थक्यादनृतं भवति। न कर्तव्यं भवतीत्यर्थः। तस्मात्सर्वस्य विसर्जनीयस्य सकारो न भवति । **यदयमिति** । विपर्यये हि विज्ञायमाने 'पुरुषः त्सरुक' इत्यादौ सत्वाऽभावा-

---

उ.] **स्वरत्रेति । निमीयत इति** । परिवर्त्यत इत्यर्थः । नच तस्य लघुत्वाद्गुरुणा कथं निमानमिति वाच्यं, कुप्वो≍क≍पौचेतिवत्खरवसानयो र इत्येव सिद्धे पर्यायेषु लाघवगौरवानादरेणैव विसर्जनीयपदस्य सत्त्वेन वर्णकृतलाघवगौरवस्याऽप्रयोजकत्वमित्याशयात् । न च कवर्गतृतीयादौ 'कुप्वो'रिति अत्र न्यासे दुर्वारं, मण्डूकानुवृत्त्या खरीत्यस्य 'कुप्वो'रिति सूत्रे संबन्धेनाऽदोषात् । न चैवमपि गीर्ष्वित्यादौ 'वा शरी'ति पाक्षिकविसर्गो दुर्वारः । 'रोः सुपी'ति चाऽनन्तरस्येति न्यायात्सस्यैव नियमः । 'वा शरी'त्यस्याऽसिद्धत्वाच्च । यथान्यासे तु 'वा शरी'त्यस्य विसर्गस्थानिकतया नियमेन विसर्गस्यैवाऽभावान्न दोष इति वाच्यम् । 'वा शरी'त्यत्राऽपि 'रोःसुपी'त्यत्यनुवर्त्य वाक्यभेदेनाऽर्थाधिकारान्नियमपरतया व्याख्यानेनाऽदोषादिति भावः । **घञीति** । कर्मणि च सः । **यद्येतावदिति** । विसर्जनीयपदं च

इत्यपि वत्वं प्राप्नोति । शमु[1] नः, शमु योरस्तु ॥ एवं तर्हि 'विसर्जनीयस्य स' इत्यत्र 'खरी'त्यनुवर्तिष्यते ॥ अथ वा संबन्धमनुवर्त्तिष्यते ॥

वा शरि ॥८।३।३६॥

॥ * ॥ वा[2] शर्प्रकरणे खर्परेलोपः ॥ * ॥ वा शर्प्रकरणे खर्परे लोपो वक्तव्यः । वृक्षा स्थातारः । वृक्षाः स्थातारः ॥ [वा शरि] ।

कुप्वोः ≍क≍पौ च ।८।३।३७।

॥ * ॥ सस्य कुप्वोर्विसर्जनीयजिह्वामूलीयोपध्मानीयाः ॥ * ॥ सस्य कुप्वोर्विसर्जनीयजिह्वामूलीयोपध्मानीया वक्तव्याः ॥*॥ विसर्जनीयादेशे[3] हि शर्परयोरेवादेशप्रसङ्गः ॥*॥ विसर्जनीयादेशे हि सति शर्परयोरेव कुप्वोः≍क≍पौ

प्र.] द्विसर्जनीयोऽस्त्येवेति किं तद्विधानेन ? । ननु ≍क≍पनिवृत्त्यर्थं विसर्जनीयविधानं स्यात्—'वासः क्षौममद्भिः प्सात'मिति । नैतदस्ति । यद्येतावत्प्रयोजनं स्यात् 'कुप्वोः≍क≍पौ चा[3]ऽशरी'ति ब्रूयात् । अथवेति । लोपसम्बद्धं हल्ग्रहणमनुवर्तत इति पूर्वयोगेषु कार्यान्तरेण न सम्बध्यते, इह तु हलीति वर्तते लोप इति निवृत्तमित्यर्थः । [वा शरि] ।

कुप्वोः≍क≍पौ च । सस्येति । ब्राह्मणः पचति ब्राह्मणः करोतीत्यादावुपध्मानीयजिह्वामूलीयविसर्जनीया इष्यन्ते । वासः क्षौममद्भिः प्सातमित्यादौ तु शर्परयोः कुप्वोर्विसर्जनीय एवेष्यते । एतच्च सस्येति स्थानिनिर्देशे सिध्यति । यो विसर्जनीयस्य सस्तस्य स्थाने कुप्वोरादेशत्रयविधानाच्छर्परयोः कुप्वोः सकारापवादविसर्जनीयविधानात्सकाराऽभावादादेशाऽप्रसङ्गः । यदा तु विसर्जनीयस्थानेऽनेन आदेशत्रयं विधीयते तदा शर्परयोरेव कुप्वोः प्राप्नोत्यशर्परयोस्तु कुप्वोः पूर्वत्रासिद्धमिति ≍क≍पयोरसिद्धत्वात्सकार एव प्राप्नोति । न च सकारस्य स्थानिवद्भावोस्ति, अयोगवाहानामविशेषेण प्रत्याहार उपदेशचोदनादल्विधि-

---

उ.] 'वा शरी'त्येतत् संबद्धं पठनीयमिति भावः । अत्र पक्षे'सेयं महतो वंशस्तम्बाल्लट्वानुकृष्यत' इति ऋलृक्सूत्रोक्तन्यायविरोधोऽतो भाष्ये पक्षान्तरमाह—अथवेति ।

कुप्वोः≍क≍पौ च । विसर्जनीयस्येति । स्थानिनि प्रकृते स्थान्यन्तरनिर्देशे फलमुपपादयति—ब्राह्मण इति । ननु अशर्परयोरपि विसर्जनीयस्य सं बाधित्वा परत्वात् ≍क≍पौ स्यातामित्यादेशत्रयं सिद्ध्यतीत्यत आह—अशर्परयोस्त्विति । न च सस्येति । स्थानिवत्त्वेन विसर्गत्वं तस्य स्यादित्यर्थः ।

स्याताम्—अद्भिः प्सातं वासः क्षौमम् ॥ वचनान्न भविष्यतः ॥

अस्ति वचने प्रयोजनम् ॥ किम्?॥ पुरुषः त्सरुकः॥ तत्तर्हि वक्तव्यं?॥ न वक्तव्यम्। यदेतद्विसर्जनीयस्य स इत्यत्र विसर्जनीयग्रहणमेतदुत्तरत्रानुवर्तिष्यते, तस्मिंश्च शर्परे विसर्जनीयोऽसिद्धः ॥ नाऽसिद्धः ।। कथम् ? ॥ अधिकारो नाम त्रिप्रकारः । कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति ।

प्र.] त्वात्। **वचनादिति**। यदि 'शर्परे विसर्जनीय' इत्यस्य विसर्जनीयस्य ×क×पौ स्यातां तदैतद्विसर्जनीयविधानमनर्थकं स्यात्। **अस्तीति**। यत्र कुप्भ्यामन्यः शर्परः खरस्ति तत्र सकारापवादविसर्जनीयविधानमर्थवत्। कुप्वोस्तु शर्परयोर्विसर्जनीयस्य ×क×पप्रसङ्गः। **यदेतदिति**। 'विसर्जनीयस्य स' इत्यत्र सकारस्य स्थानी यो विसर्जनीय उपात्तः स द्विविधः सम्भवति, खरवसानलक्षणः शर्परलक्षणश्च। तत्र 'पूर्वत्रासिद्ध'मिति सत्वे शर्परलक्षणस्याऽसिद्धत्वादितरः सस्य स्थानी विज्ञायते। स एव चेहानुवर्तते, तदर्थो वा शब्द इति स एवेह स्थानी गृह्यते। तत्र वचनप्रामाण्यादुत्सर्गे सत्वे कर्तव्येऽपवादयोः ×क×पयोरसिद्धत्वाऽभावात्प्रवृत्तौ सत्यां यथेष्टं सिध्यतीत्यर्थः। शर्परलक्षणश्च विसर्जनीय आदेशोऽपूर्वो विसर्जनीयस्य विधीयते न तु तस्यैव सत्त्वबाधनार्था प्रत्यापत्तिरिति दर्शनमाश्रित्यैतदुच्यते। प्रत्यापत्तौ हि विसर्जनीयस्य भेदाऽभावादयुक्तोऽनन्तरोऽर्थः स्यात्। ननु च वक्ष्यत्येतत्—'न योगे योगोऽसिद्धः किन्तु प्रकरणे प्रकरणमसिद्ध'मिति, तत्रैकप्रकरणत्वात्सत्वे 'शर्परे विसर्जनीय' इत्यस्याऽसिद्धत्वं नास्ति। नैष दोषः। कार्यभेदात्प्रकरणभेदात्। एकेन हि सकारो विधीयते, अन्येन विसर्जनीयः। **कश्चिदिति**। यद्यपि सर्वशास्त्रावज्वलनं परि-

---

उ.] स एवेति। स्वरितत्वेन तदर्थस्य तस्यैव शब्दस्योत्तरत्रोपस्थानादिति भावः। शब्दान्तराऽनुमानपक्षेऽप्याह—**तदर्थो वेति**। सति संभवे तदर्थ एव शब्द उत्तरत्राऽनुमीयते नार्थान्तरयुक्त इत्यर्थः। **उत्सर्गे इति**। सत्वे प्राप्तेऽस्यारंभादितिभावः। **न तु सत्त्वबाधनार्थेति**। तथाहि सति 'शर्परेने'त्येव वदेत्। 'कुप्वो'रिति सूत्रेऽपि चेन सत्वं नेत्यनुकृष्य तत्सामर्थ्यात्पक्षे विसर्गसिद्धिरिति भावः। **भेदाभावादिति**। खरवसानलक्षणशर्परलक्षणयोरविशेषादुभयोरपि स्थानित्वं स्यादिति भावः। **एकप्रकरणत्वादिति**। सर्वस्य विधेर्विसर्गस्थानिकत्वादिति भावः।

कार्यभेदादिति। स्थानिभेदाऽभावेपीत्यर्थः। वस्तुतो 'योगे योगोऽसिद्ध' इत्येव सिद्धान्त इति चतुर्थपादे निरूपयिष्यामः। **सर्वशास्त्रावज्वलनमिति**। तच्च यथोद्देश-

यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माऽभिज्वलयति । अपरो यथा—रज्ज्वाऽयसा वा बद्धं काष्ठमनुकृष्यते तद्वत् । अपरोऽधिकारः प्रतियोगं तस्याऽनिर्देशार्थ इति योगे योगे उपतिष्ठते । यद्यदैष पक्षः—'प्रतियोगं तस्याऽनिर्देशार्थ' इति तदा हि यदेतद्विसर्जनीयस्य स इत्यत्र विसर्जनीयग्रहणमेतदुत्तरत्राऽनुवृत्तं सदन्यत्संपद्यते । तस्मिंश्च शर्परे विसर्जनीयः सिद्धः । एवं च कृत्वा शर्परयोरेव कुप्वोः ⨯क⨯पौ स्याताम्, वासः क्षौममद्भिः प्सातमिति ॥ एवं तर्हि योगविभागः करिष्यते । 'शर्परे विसर्जनीयः' । 'वा शरि' । ततः 'कुप्वोः' । कुप्वोश्च शर्परयोर्विसर्जनीयस्य विसर्जनीयो भवतीति ॥

किमर्थमिदम् ? ॥ कुप्वोः ⨯क⨯पौ वक्ष्यति तद्बाधनार्थं । [ततः '⨯कं⨯पौ च'] । ⨯क⨯पौ च भवतः । 'कुप्वो'रित्येव ।

प्र.] भाषाधर्मस्तथापि परार्थत्वसामान्याद्भेदाऽपरामर्शेनैतदुक्तम् । **तद्वदिति ।** चकारेणेति भावः । **प्रतियोगमिति ।** यस्य स्वरितत्वमासज्यते तत्सदृशानि शब्दान्तराणि योगान्तरेष्वनुमीयन्ते सादृश्यात्तु तत्त्वाध्यवसायः । योगान्तरोपयोग्यर्थस्य वा तस्यैवाऽनुमानम् । अर्थभेदात्त्वभिन्नस्यापि भेदावसायः। तत्र 'विसर्जनीयस्य स' इति लिङ्गाऽभावान्न परिभाषा, नाऽपि चकारेणोत्तरत्र स्थानिनोऽनुकर्षः । स्वरितत्वात्त्विह सम्बध्यमानोऽपि विसर्जनीयशब्दः सिद्धं विसर्जनीयं स्थानित्वेन प्रतिपादयतीति 'शर्परे विसर्जनीय' इत्यस्यैव ⨯क⨯पप्रसङ्गः । स

उ.] पक्षे एकदेशस्य स्पष्टमेव, कार्यकालेऽपि सर्वैः शास्त्रैरेकवाक्यतया परत्वादिनियामकदेशस्य पाठस्थानरूपस्यैव सत्त्वेन च एकदेशस्थत्वमव्याहतमेव । **भेदापरामर्शेनेति ।** अभेदाऽध्यवसायादित्यर्थः । **चकारेणेति ।** यथा 'लुटि च क्लृप' इत्यादौ चेन स्यसनोरनुकर्षः । **यस्य स्वरितत्वमिति ।** अत्र पक्षे योगान्तरेष्वर्थान्तरप्रतिपत्तिर्युज्यते इत्यर्थः। प्रत्यभिज्ञा तु सादृश्यमूलेत्याह—**सादृश्यात्त्विति ।** अर्थभेदेऽप्येकशब्दत्वमिति पक्षमालंब्य प्रत्यभिज्ञानुपपत्तिं परिहरति—**योगान्तरोपयोग्यर्थस्य वा तस्यैवेति ।** अत्र पक्षे शब्दान्तरव्यवहारः कथं, तदाह—**अर्थभेदात्त्विति ।** 'यद्यदैष पक्ष' इति भाष्येणाऽस्यैवात्र संभव इति दर्शयत इत्याह—**तत्रेति ।** एवञ्च यद्यप्यर्थाधिकारे न दोषस्तथापि शब्दाधिकारपक्षे दोष एवेत्यर्थः । भाष्ये—**कुप्वोः ⨯क⨯पौ वक्ष्यतीति ।** इदं सोऽपदादौ' 'इणः ष' 'इदुदुपधस्ये'ति प्रकरणस्यैवोपलक्षणमिति केचित् । वस्तुतः सोऽपदादाविणः ष इत्यनयोः पाशकल्पककाम्येष्वेव प्रवृत्त्या तद्विषये शर्परयोः कुप्वोरसंभवः । एवञ्च सत्वापवादजिह्वा-

'शर्परयो'रिति निवृत्तम् ॥ अथवा'शर्परे विसर्जनीय' इत्येतत् 'कुप्वोः ᳲकᳲपौ चे'त्यत्रानुवर्तिष्यते ॥

सोऽपदादौ ।८।३।३८।

॥ * ॥ सोऽपदादावनव्ययस्य ॥ * ॥ सोपदादावनव्ययस्येति वक्तव्यम् । इह मा भूत्—प्रातःकल्पम् पुनःकल्पम् ॥ * ॥ रोः काम्ये नियमार्थम् ॥ * ॥ रोः काम्य इति वक्तव्यम् ॥ किं प्रयोजनम् ?॥ 'नियमार्थम्' । रोरेव काम्ये नान्यस्य । पयस्काम्यति ॥ क्व मा भूत् ? ॥ गीःकाम्यति धूः काम्यति पूः काम्यति ॥*॥ उपध्मानीयस्य च ॥ * ॥ उपध्मानीयस्य च सत्वं वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ अयमुᳲब्जिरुपध्मानीयोपधः पठ्यते तस्य सत्वे कृते जश्भावे च 'अभ्युद्गः' 'समुद्ग' इत्येतद्रूपं यथा स्यात् ॥ यद्युपध्मानीयोपधः पठ्यते—उब्जिजिषतीत्युपध्मानीयस्य द्विर्वचनं प्राप्नोति । दकारोपधे पुनः सति 'न न्द्राः संयोगादय'इति प्रतिषेधः

प्र.] हिᳲकᳲपयोः कर्तव्ययोः सिद्धः । **अथ वेति ।** योगविभागे प्रसक्तयोः ᳲकᳲपयोर्निवृत्तिः, अनुवृत्तौ तु प्रसङ्ग एव नास्तीति विशेषः । [कुप्वोःᳲकᳲपौच]।

सोपदादौ । प्रातःकल्पमिति । यद्यपि प्रातःशब्दोऽधिकरणवाची तथापि वृत्तिविषये शक्तिमद्वाचीति ईषदसमाप्त्या योग उपपद्यते । यथा दोषाभूतमहर्दिवाभूता रात्रिरित्यादावभूततद्भावः । **उपध्मानीयोपध इति ।** उपध्मानीयस्य पकारमन्तरेणोच्चारयितुमशक्यत्वादुᳲपूर्जे आर्जवे इत्येतदुच्चारणार्थः पकारः पठ्यते, न तु श्रवणार्थ इत्युपधात्वमुपध्मानीयस्य। कुप्वोः प्रकरणाच्च यत्र जकारस्य कुत्वं तत्रैवोपध्मानीयस्य सकारोऽन्यत्र प्रत्याहारे उपदेशचोदनात् झलां

उ.] मूलीयादिबाधकत्वमस्येति 'खरवसानयो'रिति विसर्गस्यैव तत्र स्थानिवत्त्वमिति बोध्यम् । एवञ्चेदुदुपधस्येत्यत्राऽपि तथैवोचितम्, अर्थाधिकारानुरोधादिति तद्विषयेऽपि शर्परकुप्वोर्विसर्ग एवेत्याहुः । ननु योगविभागापेक्षया संपूर्णानुवृत्त्या वाक्यभेदेन व्याख्याने गौरवमत आह—**योगविभागे इति ।** एवञ्च प्रतिपत्तिगौरवं तत्रापीति भावः। [कुप्वोःᳲकᳲपौ च]।

सोऽपदादौ । उत्तरसूत्रेऽप्यस्य संबन्ध इति ध्वनयन्नुदाहरति—भाष्ये—**गीः काम्यतीति ।** ननूपध्मानीयोपधत्वमसिद्धं पकारस्योपधात्वादित्यत आह—**उपध्मानीयस्येति ।** ननूब्जितेत्यादावप्यनेन सत्त्वं स्यादित्यत आह—**कुप्वोरिति । अन्यत्र**—कुत्वविषयाऽभावे । **बकार इति ।** आन्तरतम्यादिति भावः । ननु कुत्वनिषेधार्थेन न निपातने कथं बो

सिद्धो भवति ॥ यदि दकारोपधः पठ्यते का रूपसिद्धिः—उब्जिता उब्जितुमिति? ॥ * ॥ असिद्धे भ उदूजेः ॥ * ॥ इदमस्ति—'स्तोःश्चुना श्चुः। ततो वक्ष्यामि—'भ उदूजेः'। उदूजेश्च श्चुना सन्निपाते भो भवतीति ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । निपातनादेतत्सिद्धम् ॥ किं निपातनम् ? ॥ 'भुजन्युब्जौ पाण्युपतापयो'रिति ॥ इहापि प्राप्नोति—अभ्युद्गः समुद्गः ॥ अकुत्वविषये निपातनम् । अथ वा नैतदुब्जे रूपम् ॥ किन्तर्हि ? ॥ गमेर्द्व्युपसर्गाड्डो विधीयते—अभ्युद्गतः—अभ्युद्गः । समुद्गतः समुद्गः । [सोऽपदादौ] ॥

इणः षः ।८।३।३९।

किमविशेषेण सत्वमुक्त्वा इण उत्तरस्य सकारस्य षत्वमुच्यते आहोस्विदिण उत्तरस्य विसर्जनीयस्यैव षत्वं विधीयते ? ॥ किञ्चातः ? ॥ यद्यविशेषेण सत्वमुक्त्वेण उत्तरस्य सकारस्य षत्वमुच्यते, निष्कृतं निष्पीतमित्यत्र सत्वस्याऽसिद्धत्वात्षत्वं न प्राप्नोति । अथेण उत्तरस्य विसर्जनीयस्यैव

प्र.] जश् झशीति जश्त्वं बकारः । **निपातनादिति** । यत्र जकारः श्रूयते तत्र दकारस्य स्तोःश्चुनाश्चुरिति चुत्वे प्राप्ते 'झलां जश् झशी'त्यनेनानन्तरतमोऽपि बकारो भवतीति निपातनेन कुत्वनिषेधार्थेनाप्यनुमीयत इति भावः । तेन 'पूर्वत्रासिद्ध'मिति 'न न्द्राः संयोगादय' इति द्विर्वचननिषेधे बत्वस्याऽसिद्धत्वाद्दकारस्य द्विर्वचननिषेधः । **गमेरिति** । एवं च दकारोपदेशो द्विर्वचननिषेधार्थ एवेति द्विर्वचने कृते बत्वमिति रूपप्रक्रियायामानुपूर्व्याश्रीयते अनभिधानाच्च घञभावादुब्ग इति न भवति । न चाभ्युद्ग इत्यत्र गमेर्डे घञि वोब्जेः स्वरे विशेषः । डे कृत्स्वरेणाऽन्तोदात्तत्वाद्घञ्यपि थाथादिस्वरेण । **[सोऽपदादौ]**

इणः षः । सत्वस्याऽसिद्धत्वादिति । 'इणः ष'इत्यनेन यदा सस्य षत्वं

उ.] लभ्यतेऽत आह—**यत्र जकार इति । अनुमीयत इति** । बकारोच्चारणान्यथाऽनुपपत्त्येति भावः । एवञ्च द्विर्वचननिषेधोऽपि सिद्ध इत्याह—**तेनेति** । 'पूर्वत्रासिद्धीयमद्विर्वचने'इति हि द्वित्वे निषेधो नतु तन्निषेध इति भावः । **एवञ्चेति** । अत्रापि पक्षे दोपधः पठितव्यः । उब्जितसिद्धये उब्जेर्भो वक्तव्यः, ज्ञापकं वाश्रयणीयम् । तत्र ज्ञापकेन साक्षादेव बत्वमिति पक्षेऽपि दकारोपदेशसामर्थ्यात्पूर्वं द्वित्वं पश्चाद्बत्वमिति । **रूपप्रक्रियायामिति** । प्रयोगप्रक्रियायामित्यर्थः । 'इत्येवंरूपा प्रक्रियायामानुपूर्वी'ति क्वचित्पाठः । नन्वेवमुद्जेर्घञि उब्ग इत्यनिष्टं स्यादत आह—**अनभिधानाच्चेति** । 'उब्ग इति न भवती'ति पाठः ।

इणः षः । भाष्ये—**इण उत्तरस्य सकारस्येति** । 'स' इति विपरिणतविभक्तिक

षत्वं विधीयते सत्वमप्यनुवर्त्तते उताहो न ? ॥

किं चातः[2] ? ॥ यद्यनुवर्त्तते सत्वमपि प्राप्नोति । अथ निवृत्तं 'नमस्पुरसोर्गत्यो'रित्यत्र सकार[3]ग्रहणं कर्त्तव्यम् ॥

तस्मिंश्च क्रियमाणे षत्वमप्यनुवर्त्तते उताहो न ? ॥

किं चातः[2] ? ॥ यद्यनुवर्तते षत्वमपि प्राप्नोति, अथ निवृत्तम्–'इदुदु[4]पधस्य चाऽप्रत्ययस्ये'त्यत्र षकारग्रहणं कर्त्तव्यम् ॥

तस्मिंश्च क्रियमाणे सत्वमप्यनुवर्त्तते उताहो न ? ॥

किञ्चातः ?॥ यद्यनुवर्त्तते सत्वमपि प्राप्नोति। अथ निवृत्तं 'तिरसोऽन्यतरस्या'मित्यत्र सकारग्रहणं कर्त्तव्यम् ॥

तस्मिंश्च क्रियमाणे षत्वमप्यनुवर्त्तते उताहो न ? ॥ किञ्चातः[2] ॥

यद्यनुवर्त्तते षत्वमपि प्राप्नोति । अथ निवृत्तं–'द्विस्त्रिश्चतुरिति कृत्वोर्थे' 'इसुसोः सामर्थ्ये' 'नित्यं समासेऽनुत्तरपदस्थस्ये'ति षकारग्रहणं कर्त्तव्यम् ॥

तस्मिंश्च क्रियमाणे सत्वमप्यनुवर्त्तते उताहो न ? ॥

प्र.] विधीयते तदा 'सोपदादा'वित्यस्यैव सस्य सर्पिष्कादौ षत्वं स्यात्। वक्ष्यमागयोगेन विधीयमानस्य तु सस्य षत्वेऽसिद्धत्वात्षत्वं न प्राप्नोतीत्यर्थः। **असमासेपिग्रहणमिति**। अन्तरेणाऽप्यसमासेऽपिग्रहणं विशेषानुपादानात्समासाऽसमासयोर्णत्वं सिध्यति। न च समासे 'पूर्वपदात्संज्ञायामग'इति नियमेन णत्वस्याऽप्राप्तिः। नियमे कर्तव्ये 'उपसर्गा'दित्यस्य णत्वस्याऽसिद्धत्वान्नियमाऽभावात्। तदेतदसमासेऽपिग्रहणं यथोक्तमर्थं ज्ञापयति। यद्यपि स्थानिभेद आदेश-

---

उ.] मनुवर्तत इति भावः। **इणः स इत्यनेनेति**। अत्र पक्षे उत्तरत्र सर्वत्र 'कुप्वो'रित्यधिकृत्य सो विधीयते। अनेन तु तस्यैव विसर्जनीयस्येत्यनुवृत्त्या विसर्जनीयस्थानिकस्य सस्येण उत्तरस्य षत्वं क्रियते। तत्र 'विसर्जनीयस्थानिके'ति विशेषणात्पुंस्पुत्र इत्यादौ न दोषः। तत्र हि मस्थानिकः स इत्युक्तं प्राक्। उत्तरत्र विसर्जनीयपदस्य मण्डूकानुवृत्तिश्च न। अनव्ययेति चात्र पक्षेऽत्र न सम्बध्यते। तेन 'द्विष्कृत'मित्यादौ न दोषः। 'काम्ये रो'रित्यपि न सम्बध्यते,तेन दुरो 'दुष्काम्यती'त्यादौ षत्वसिद्धिः। 'गीः काम्यती'त्यादौ तु सकाराऽभावादेव न दोषः। अपदादाविति चाऽत्र न सम्बध्यते। तेन 'दुष्करोती'त्यादौ न दोषः। पक्षान्तरे तु त्रितयमपि सम्बध्यते। तेनोच्चैःकं गीःकाम्यति गीःकरोतीत्यत्र न दोषः। ननु समासे पूर्वपदादिति नियमान्न प्राप्नोतीत्यसमासेऽपि इत्युच्यते इत्याशङ्क्य परिहरति–**नचेति**। भिन्नप्रकरणत्वमाशङ्क्य परिहरति–**यद्यपीति**। वस्तुतस्तु 'सूत्रे-

किञ्चातः ?[1] ॥ यद्यनुवर्त्तते सत्वमपि प्राप्नोति । अथ निवृत्तम् 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्ये'ति सकारग्रहणं कर्त्तव्यम् ॥

यथेच्छसि तथास्तु । अस्तु तावदविशेषेण सत्वमुक्त्वा इण उत्तरस्य सकारस्य षत्वमुच्यते ॥ ननु चोक्तं–"निष्कृतं निर्ष्पीतमित्यत्र सत्वस्याऽसिद्धत्वात्षत्वं न प्राप्नोती"ति ॥ नैष दोषः । आचार्यप्रवृत्तिर्ज्ञापयति 'न योगे योगोऽसिद्धः॥ किं तर्हि?॥ प्रकरणे प्रकरणमसिद्ध'मिति, यदयमुपसर्गादसमासेऽपि णोपदेशस्येत्यसमासेऽपिग्रहणं करोति ॥ अथ वा पुनरस्तु 'इण उत्तरस्य विसर्जनीयस्य षत्वं विधीयते' ॥ ननु चोक्तं–"सत्वमप्यनुवर्तते उताहो न । किञ्चातः[1], यद्यनुवर्तते सत्वमपि प्राप्नोती"ति । नैष दोषः । सम्बन्धमनुवर्त्तिष्यते[2]। 'सोऽपदादौ' 'इणः षः'। 'नमस्पुरसोर्गत्योः' सकारः, इण उत्तरस्य षकारः । 'इदुदुपधस्य[2] चाऽप्रत्ययस्य' षकारः । 'नमस्पुरसोर्गत्योः' सकारः । 'तिरसोऽन्यतरस्यां' सकारः । 'इदुदुपधस्य[3] चाप्रत्ययस्य' षकारः । 'द्विस्त्रिश्चतुरिति कृत्वोर्थे' 'इसुसोः सामर्थ्ये' 'नित्यं समासेऽनुत्तरपदस्थस्ये'ति, षकारः । 'तिरसोऽन्यतरस्यां' सकारः । 'अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य' । सकारोऽनुवर्त्तते । षकारग्रहणं निवृत्तम् ॥ [इणः षः]

इदुदुपधस्य चाऽप्रत्ययस्य ।३।१।४१।

॥ * ॥ इदुदुपधस्य[3] चाप्रत्ययस्येति चेत्पुंमुहुसोः प्रतिषेधः ॥ * ॥

प्र.] मेदश्च, सस्य विसर्जनीयस्थानित्वात्षस्य सकारस्थानित्वात्तथापि कुप्वोरधिकारादेकनिमित्तत्वादेकप्रकरणत्वावसायः । सम्बन्धमिति । नचेणः परस्य सकारः प्राप्नोति, षकारेण तस्य बाधनाच्चकाराऽकरणाच्च । तत्र 'स' इति 'ष' इति च स्वरितत्वादुत्तरत्रानुवर्त्तते । उत्तरेऽपि योगाः स्वरितत्वप्रतिज्ञानाद्योगान्तरेषु केचित्षकारसम्बद्धाः केचित्सकारसम्बद्धा अनुवर्त्तन्ते इति यथेष्टं सकारषकारादेशप्रवृत्तिः । [इणः षः]॥

उ.] सूत्रमसिद्ध'मिति पक्षेऽपि न दोषः, परेषामसिद्धत्वे सोपदादाविति सत्वे एवाऽस्य प्रवृत्तिः स्यात् । तथा चाऽपदादौ विसर्गस्यैव षत्वविधानेन सिद्धे सस्य विभक्तिविपरिणामेन स्थानित्वकल्पनस्य वैयर्थ्यं स्यादिति। 'तत्सामर्थ्यादुत्तरेषामसिद्धत्वाऽभाव'इति भाष्यन्तु एकदेश्युक्तिः, अतएवाऽस्य ज्ञापकस्याऽग्रे दूषितत्वेऽपि न दोषः । यद्वैतद्दोषादयं पक्षोऽसङ्गत एवेति तात्पर्यम् । नचेण इत्यादि । 'इदुदुपधस्येत्यादियोगै'रिति शेषः । [इणः षः]

इदुदुपधस्य चाऽप्रत्ययस्येति चेत्पुंमुहुसोः प्रतिषेधो वक्तव्यः । पुँस्कामा । मुहुः कामेति ॥ * ॥ वृद्धिभूतानां षत्वम् ॥ * ॥ [वृद्धिभूतानां षत्वं] वक्तव्यम् । दौष्कुल्यम् । नैष्पुरुष्यम् ॥*॥ प्लुतानां तादौ च ॥*॥ प्लुतानां तादौ च कुप्वोश्चेति वक्तव्यम् । सर्पी३ष्टर । वर्ही३ष्टर । नी३ष्कुल । दू३ष्पुरुष ॥ ॥ * ॥ न वा बहिरङ्गलक्षणत्वाद्वृद्धेः ॥ * ॥ न वा वक्तव्यम् ॥ किं कारणम् ? ॥ 'बहिरङ्गलक्षणत्वाद्वृद्धेः' । बहिरङ्गलक्षणा वृद्धिः ॥ इह कस्मान्न भवति पितुः करोति मातुः करोति ?, 'अप्रत्ययविसर्जनीयस्ये'ति षत्वं प्रसज्येत ॥ 'अप्रत्ययविसर्जनीयस्ये'त्युच्यते प्रत्ययविसर्जनीयश्चाऽयम् ॥

प्र.] इदुदुपधस्य चाप्रत्ययस्य । पुंमुहुसोरिति । अव्युत्पन्नावेताविति प्रतिषेधश्चोद्यते । 'सम्पुंकानां सो वक्तव्य' इति वचनात्षत्वं न भविष्यतीति नाऽर्थः पुंसः प्रतिषेधेन । सकारश्चावश्यं वक्तव्यः । रुत्वे हि क्रियमाणे विसर्जनीयस्य प्रतिषिद्धेऽपि षत्वे ×क×पविसर्जनीयश्रवणप्रसङ्गः । ननु सकारस्याऽपि षत्वं प्राप्नोति, 'सकारस्य षत्व'मित्येषोऽपि स्थितः पक्षः । नैतदस्ति । सकारविधानसामर्थ्यात्षत्वं न भविष्यति । षत्वे हि सति रोः सस्य च विशेषाऽभावात्किं सत्वविधानेन ? । मातुरिति । उभयादेशस्याऽन्यतरतो व्यपदेशाद्प्रत्यत्वे सत्यप्रत्ययविसर्जनीयत्वात्षत्वप्रसङ्गः । प्रत्ययविसर्जनीयश्चायमिति । उभयादेशत्वान्ना-

---

उ.] इदुदुपधस्य । ननु प्रत्ययावयवत्वेन सूत्रेणैव निषेधसिद्धेराह—अव्युत्पन्नाविति । अतएव 'चतुष्कपाल'मित्यादौ षत्वमुदाहरिष्यति । नन्विदमेवास्तु, सश्च न वक्तव्योऽत आह—सकारश्चेति । विपक्षे बाधकमाह—रुत्वे हीति । सत्वे तु तस्याऽसिद्धत्वाद्रोरभावेन विसर्जनीयाऽभावान्न दोषः । ध्वनितं चेदं 'पुंस्कामे'त्यत्र षत्वापत्त्या 'पुमः खयी'त्यत्र भाष्ये ।

ननु सकारस्यापीति । विसर्जनीयस्थानिकसस्यैव षत्वविधानान्निर्दलेयं शङ्का । सकारविधानेति । वस्तुतः सामर्थ्यसिद्धस्यैवानुवादो वार्तिके मन्दान्प्रति 'न वा बहिरङ्गे'तिभाष्ये । एवञ्च पूर्वमेव षत्वप्रवृत्तेर्जातस्य निवृत्त्ययोगाच्च कृतसन्धिकार्यादेव तद्धितोत्पत्तेश्च न दोष इति भावः । अप्रत्ययविसर्जनीयत्वादिति । सकारसन्निधिकालेऽकारेण नैव लब्धा प्रत्ययसंज्ञा, समुदायनिवेशिनीत्वात्तस्या इति तदादेशस्योरः प्रत्ययत्वाऽभावः । यश्चोत्वे कृतेऽवशिष्टः सकारः प्रत्ययसंज्ञकः, स लुप्त एवेति भावः । नचाऽन्तादिवद्भावेनोर्सित्यस्य प्रत्ययत्वेन सलोपे एकदेशविकृतत्वेनोर्सित्यस्य प्रत्ययतया प्रत्ययावयवत्वं सुलभं, त्रिपाद्या असिद्धत्वेन तत्रान्तवद्भावाऽप्रवृत्तेरिति पूर्वपक्षतात्पर्यं । विस्तरेण चैत

लुप्यतेऽत्र प्रत्ययविसर्जनीयो 'रात्सस्ये'ति ॥ एवं तर्हि——॥*॥ भ्रातुष्पुत्रग्रहणं ज्ञापकमेकादेशनिमित्तात् षत्वप्रतिषेधस्य ॥ * ॥ यदयं कस्कादिषु भ्रातुष्पुत्रशब्दं पठति तज्ज्ञापयत्याचार्यो 'नैकादेशनिमित्तात्षत्वं भवती'ति ॥

द्विस्त्रिश्चतुरिति कृत्वोर्थे ।३।१।४३।

द्विस्त्रिश्चतुर्ग्रहणं किमर्थम् ? ॥ इह मा भूत्—पञ्चकृत्वः करोति ॥ अथ कृत्वोर्थग्रहणं किमर्थम् ? ॥ इह मा भूत्—चतुष्कपालः चतुष्कण्टक इति ॥ नैतदस्ति । अस्त्वनेन विभाषा, पूर्वेण नित्यो विधिर्भविष्यति ॥ नाप्राप्ते पूर्वेणेयं विभाषाऽऽरभ्यते, सा यथैवेह बाधिका भवति चतुःकरोति चतुष्करोतीत्येवं चतुष्कपालेऽपि बाधिका स्यात् ॥ नाऽत्र पूर्वेण षत्वं प्राप्नोति ॥ किं कारणम् ?॥ 'अप्रत्ययविसर्जनीयस्ये'त्युच्यते प्रत्ययविसर्जनीयश्चाऽयम् ॥ लुप्यतेऽत्र प्रत्ययविसर्जनीयो रात्सस्येति ॥ तस्मात्कृत्वोर्थग्रहणं कर्त्तव्यम् ॥

प्र.] यमुः स्थान इति रपरत्वाऽभावात्सकारस्यैव रुत्वविसर्जनीयौ मन्यते। **लुप्यत इति** । पूर्वोक्तेन न्यायेन रपरत्वं भवत्येव । **कस्कादिष्विति** । एकादेशशास्त्रं निमित्तं यस्य तस्मात्परस्य विसर्जनीयस्य षत्वं न भवतीति ज्ञाप्यते ॥

द्विस्त्रिश्चतुरिति कृत्वोर्थे । **द्विस्त्रिश्चतुर्ग्रहणमिति** । वक्ष्यमाणेनाऽभिप्रायेण दूषणार्थः प्रश्नः । इतरस्त्वगृहीताभिप्रायः प्रत्युदाहरति—**पञ्चकृत्व इति** । अत्र सकारः प्रसज्येत । **अथेति** । द्विस्त्रिःशब्दौ कृत्वोर्थावेवेति प्रश्नः । इतरश्चतुःशब्दार्थमेतद्विशेषणमित्याह—**चतुष्कपाल इति** 'इदुदुपधस्ये'ति नित्यं षत्वं भवति, अव्युत्पन्नत्वादुणादीनामप्रत्ययविसर्जनीयत्वात् । यदा तु साहचर्यं व्यवस्थाहेतुत्वेनाश्रीयते तदा चतुःशब्दार्थमपि कृत्वोर्थग्रहणं न कर्तव्यम् । **प्रत्ययविसर्जनीय इति** । सकारस्य रुत्वे कृते पूर्वस्य 'रो री'ति लोपः क्रियत इति

उ.] दुरणरपर इत्यत्र भाष्यप्रदीपोद्द्योते निरूपितं तत एवावधार्यम् । **लुप्यतेऽत्र प्रत्ययविसर्जनीय इति** । योऽत्र प्रत्ययस्थानिकत्वेन तवाऽभिमतो विसर्जनीयः **स लुप्यते**—न दृश्यते, स्थानिनः प्रत्ययस्यैव लोपादिति भावः । **ज्ञाप्यत इति** । एवञ्च त्रिपाद्यामप्यन्तरङ्गत्वादिप्रवृत्तिरनेन ज्ञाप्यते । तेनामी क्षीरपेणेत्यादौ मीत्वणत्वे सिद्ध्यत इति भावः ।

द्विस्त्रिश्चतुः । **वक्ष्यमाणेनेति** । 'इदुदुपधस्ये'त्यनुवृत्तिरूपेणेत्यर्थः । **दूषणार्थ इति** । तद्ग्रहणकर्तव्यत्वप्रतिपादनायेत्यर्थः । **सकार इति** । षसयोरुभयोरप्यनुवर्तनेन इणः परस्य षोऽन्यस्य स इति व्याख्यानादिति भावः । **न कर्तव्यमिति** । एवञ्च तद-

द्विस्त्रिश्चतुर्ग्रहणं शक्यमवक्तुम् ॥ कस्मान्न भवति-पञ्चकृत्वः करोतीति?। 'इदुदुपधस्ये'ति वर्त्तते । नैवं शक्यम्, अक्रियमाणे द्विस्त्रिश्चतुर्ग्रहणे कृत्वोर्थग्रहणेन विसर्जनीयो विशेष्येत[1] ॥ तत्र को दोषः ? ॥ इहैव स्याद्द्विष्करोति द्विःकरोति[2], त्रिष्करोति[3] त्रिः करोति[3] [इति]। इह न स्याच्चतुः[2] करोति चतुष्करोतीति[2] । द्विस्त्रिश्चतुर्ग्रहणे पुनः क्रियमाणे कृत्वोर्थग्रहणेन द्विस्त्रिश्चतुरो विशेष्यन्ते, 'द्विस्त्रिश्चतुर्णां[4] कृत्वोर्थे वर्त्तमानानां यो विसर्जनीय' इति ॥ एतदपि नास्ति प्रयोजनं, 'पदस्ये'ति वर्तते । तत्कृत्वोर्थग्रहणेन विशेषयिष्यामः-'पदस्य कृत्वोऽर्थे वर्तमानस्य यो विसर्जनीय' इति ॥

॥ * ॥ कृत्वसुजर्थे षत्वं ब्रवीति कस्माच्चतुष्कपाले मा[6] ।
षत्वं विभाषयाऽभून्ननु सिद्धं तत्र पूर्वेण ॥ १ ॥
सिद्धे ह्ययं विधत्ते चतुरः षत्वं यदापि कृत्वोर्थे ।
लुप्ते कृत्वोऽर्थीये रेफस्य विसर्जनीयो हि ॥ २ ॥

प्र.] भावः । **लुप्यत इति** । 'रात्सस्ये'ति लोपे कर्तव्ये रुत्वस्याऽसिद्धत्वात् । रोरीति लोपे च 'ढ्लोप' इति दीर्घप्रसङ्गः । **द्विस्त्रिश्चतुर इति** । चतुःशब्दः सुजन्तस्यानुकरणमिति प्रकृतावेवाऽदृष्टत्वादाम्न कृतः । 'द्विस्त्रिश्चतुर्णा'मित्यत्र त्वसुजन्तानुकरणत्वान्नुट् कृतः । **पदस्य कृत्वोर्थ इति** । ननु 'पूर्वत्रासिद्ध'मिति विकल्पस्याऽसिद्धत्वाच्चतुष्करोतीति नित्यं षत्वप्रसङ्गः । नैष दोषः । 'प्रकरणे प्रकरणमसिद्धं

उ.] नित्यत्वज्ञापनार्थमिदमित्यर्थः । परत्वाद्रुत्वं स्यादत आह-**असिद्धत्वादिति** । रुत्वे दोषमप्याह-**रोरीतीति** । 'प्रकृतिवदनुकरण'मिति न्यायेनाऽऽम् स्यादत आह-**चतुःशब्द इति** । अतिदेशाऽनित्यत्वादव्ययत्वेऽपि सुपो लुङ् । एवं च तत एवाऽऽम्वारणं सुकरमित्यपि बोध्यम् । **नुट् कृत इति** । नुट्करणादेवाऽसुजन्तानुकरणत्वमनुमीयत इत्यर्थः । **इदुदुपधस्य कृत्वोर्थेति** । द्विस्त्रिःशब्दांशेऽप्रत्ययस्येति निषेधेन इकारग्रहणं चिन्त्यम् । 'उदुपधस्ये'त्येव युक्तः पाठः । भाष्ये उक्तार्थसङ्ग्राहकाः श्लोकाः-**कृत्वसुजर्थ इति** । **कस्मादिति** । किमर्थं 'कृत्वसुजर्थ' इत्युच्यते इत्यर्थः । उत्तरयति-**चतुष्कपाले मेति** । षत्वं विभाषया माभूदित्यन्वयः । इतर आह-**ननु सिद्धं पूर्वेणेति** । आरम्भवाद्याह-**सिद्धे ह्ययमिति** । तथा चाऽसति कृत्वोऽर्थग्रहणेऽसुजन्तस्यापि विभाषा स्यादित्यर्थः । **यदापीति** । यदा तु अयमाचार्यः कृत्वोऽर्थे इति करोति तदा न दोष इत्यर्थः । ननु

एवं सति त्विदानीं द्विस्त्रिश्चतुरित्यनेन किं कार्यम्? ।
अन्यो हि नेदुदुपधः कृत्वोर्थे कश्चिदप्यस्ति ॥ ३ ॥
अक्रियमाणे ग्रहणे विसर्जनीयस्तदा विशेष्येत ।
चतुरो न सिध्यति तदा रेफस्य विसर्जनीयो हि ॥ ४ ॥
तस्मिंस्तु गृह्यमाणे युक्तं चतुरो विशेषणं भवति ।
प्रकृतं पदं तदन्तं तस्यापि विशेषणं न्याय्यम् ॥ ५ ॥ * ॥

नित्यं समासेऽनुत्तरपदस्थस्य ।८।३।४५।

अनुत्तरपदस्थस्येति किमर्थम् ? ॥ परमसर्पिःकुण्डिका ॥ अथेदानीमनेन मुक्ते पूर्वेण षत्वं विभाषा कस्मान्न भवति—'इसुसोः सामर्थ्ये' इति ? ॥

॥ * ॥ नाना पदार्थयोर्वर्तमानयोः ख्यायते यदा योगः ।
तस्मिन् षत्वं कार्यं तद्युक्तं तच्च मे नेह ॥ १ ॥ * ॥

प्र.] न तु योगे' इत्युक्तत्वात् । अथ वा इदुदुपधस्य कृत्वोर्थवृत्तेर्नाऽप्राप्ते नित्ये षत्वेऽस्यारम्भादस्याऽपवादत्वमित्यपवादो वचनप्रामाण्यान्नाऽसिद्धो भवति ।

नित्यं समासे । अथेदानीमिति । इह समासग्रहणादेकार्थीभाव एव सामर्थ्यं गृह्यते। पूर्वसूत्रे तु विशेषाश्रयणे प्रमाणाऽभावाद्द्विविधसामर्थ्यग्रहणस्य न्याय्यत्वादेतद्विधीयमाननित्यषत्वाभावे पूर्वेण विकल्पः प्राप्नोत्येव। **नानापदार्थयोरिति ।** नानाभूतयोः पदार्थयोर्यौ शब्दौ वर्त्तेते तयोर्यो योगो व्यपेक्षालक्षणः स ख्यायते ज्ञायते न त्वेकार्थीभावो गृह्यते। **तस्मिन्निति ।** व्यपेक्षालक्षणे सम्बन्ध इत्यर्थः । **तदुक्तमिति ।** व्यपेक्षालक्षणं सामर्थ्यमाश्रयितुं युक्तं, लक्ष्यानुरोधात् । अथ वा पदविधित्वात्समर्थपरिभाषोपस्थानात्सामर्थ्ये लब्धे पुनः सामर्थ्यग्रहणाद्विशिष्टसामर्थ्यपरिग्रहः । **तच्चेति ।** व्यपेक्षालक्षणसामर्थ्यमिह परमसर्पिः-

---

उ.] प्रत्ययविसर्गत्वात्पूर्वेण न प्राप्नोतीत्यत आह- **लुप्ते इति ।** एवञ्च उणादीनामव्युत्पन्नत्वान्न प्रत्ययविसर्गोऽयमिति भावः । **एवं सतीति ।** कृत्वोऽर्थग्रहणे सतीत्यर्थः । **तदा रेफस्येति ।** स च न कृत्वोऽर्थ इति भावः । आरम्भवाद्याह—**तस्मिंस्त्विति ।** प्रत्याख्यानवाद्याह- **प्रकृतं पदमिति । तदन्तमिति ।** विसर्जनीयान्तमित्यर्थः ॥

नित्यं समासे । ननु पूर्वत्र व्यपेक्षालक्षणसामर्थ्याश्रयणात् कथं समासे तस्य प्राप्तिरत आह—**इहेति । अथवा पदविधित्वादिति ।** इदं चिन्त्यं, तद्विध्युद्देश्ययोस्तद्विध्युद्देश्यविधेययोर्वा यत्रैकार्थीभावयोग्यता तत्रैव तत्प्रवृत्तिः, नचैवं प्रकृते पदकवर्गादेरेवात्रो-

व्यपेक्षासामर्थ्ये पूर्वयोगो[1] न चाऽत्र व्यपेक्षासामर्थ्यम् ॥

किं पुनः कारणं [पूर्वस्मिन्योगे[2]] व्यपेक्षासामर्थ्यमाश्रीयते न पुनरेकार्थीभावो, यथाऽन्यत्र ? ॥

॥ * ॥ ऐकार्थ्ये सामर्थ्ये वाक्ये षत्वं न मे प्रसज्येत ॥ * ॥

ऐकार्थ्ये सामर्थ्ये सति वाक्ये षत्वं न स्यात्–सर्पिष्करोति, सर्पिः करोतीति ॥

॥ * ॥ तस्मादिह व्यपेक्षां[3] सामर्थ्यं साधु मन्यन्ते ॥

अथ चेत्कृदन्तमेतत्ततोऽधिकेनैव मे भवेत्प्राप्तिः ॥ * ॥

यदि कृदन्तमेतत्ततोऽधिकस्य षत्वं न प्राप्नोति ॥ किं कारणम् ? ॥ 'प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवती'ति ॥ वाक्येऽपि तर्हि न प्राप्नोति परमसर्पिष्करोति परमसर्पिः करोतीति ॥

प्र.] कुण्डिकेत्यादौ नास्तीति षत्वाऽभावः। **यथान्यत्रेति**। समासतद्धितसुब्धातुषु यथैकार्थीभाव आश्रीयते तथेह कस्मान्नाश्रीयत इत्यर्थः। **ऐकार्थ्य इति**। यद्येकार्थीभावलक्षणं सामर्थ्यं पूर्वत्राश्रीयेत तदा वाक्ये षत्वविकल्पो न स्यात्। ननु केवलमैकार्थ्यं पूर्वत्र मा ग्राहि, द्विविधस्यतु सामर्थ्यस्य ग्रहणं कस्मान्न भवति। उक्तमत्रोत्तरम्। अथ वेह समासग्रहणाद्गोबलीवर्दन्यायात्पूर्वत्रापेक्षितप्रवृत्ति निमित्तविशेषः समर्थशब्द आश्रीयते,–सम्प्रेक्षितार्थं समर्थमिति। **अथ चेदिति**। स्यादेतत्। द्विविधस्यापि सामर्थ्यस्य पूर्वत्र ग्रहणे कृत्प्रत्यययोरिसुसोर्ग्रहणात्प्रत्ययग्रहणपरिभाषया परमसर्पिःकुण्डिकेत्यादौ पाक्षिकं षत्वं न भविष्यतीति। तदयुक्तम्। परमसर्पिष्करोतीत्यादावपि षत्वाऽप्रसङ्गात्। **वाक्ये चेति**। अनु-

---

उ.] द्देश्यता। न च एतौ तद्योग्याविति आद्यपक्ष एव श्रेयान्। 'परमसर्पिःकुण्डिके'ति षष्ठीतत्पुरुषः। **उत्तरं**–लक्ष्यानुसाररूपं। प्रवृत्तिनिमित्तविशेषं दर्शयति–**सम्प्रेक्षितार्थमिति**। पृथगुपस्थितत्वे पृथक् शक्तिग्रहविषयत्वे वा सति परस्परसाकाङ्क्षार्थमित्यर्थः। **अथ चेदि**त्यादि श्लोकार्थं व्याचष्टे–**स्यादेतदिति**। सर्पिरादिशब्दा व्युत्पन्नाः। अतएव 'सर्पिषे'त्यादौ षत्वसिद्धिरिति भावः। अत्र पक्षे प्रत्ययविसर्गत्वान्न नित्यषत्वप्राप्तिः। प्रत्ययरूपो विसर्ग इत्यर्थस्त्वेतद्भाष्यविरुद्धः। अतएव 'कविभिः कृत'मित्यादौ न षत्वं। तस्मात्प्रत्ययपदस्य तदवयवलक्षणया प्रत्ययावयवविसर्गस्येत्यर्थ एव न्याय्य इति बोध्यम्। न चेसुस्भ्यां तदन्तविधौ तेन पदविशेषणे तदन्तान्तेत्यर्थात् 'परमसर्पिष्कुण्डिके'त्यत्र षत्वं स्यादेवेति वाच्यम्। उपात्तविशेष्यसम्भवे आक्षिप्तेनानन्वयेन तदर्थस्य दुर्लभत्वात्। आक्षेपे मानाऽभावाच्चेत्याशयः। 'वाक्येऽपि तर्ही'त्यादि भाष्यं व्याचष्टे–**तदयुक्तं परमेति**। **अनुत्तर**-

॥ * ॥ वाक्ये च मे विभाषा प्रतिषेधो न प्रकल्पेत ॥ * ॥

यदयमनुत्तरपदस्थस्येति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो 'भवति वाक्ये विभाषे'ति ॥*॥ अथ चेत्संविज्ञानं नित्ये षत्वे ततो विभाषेयम् ॥*॥ **अथाऽव्युत्पन्नं प्रातिपदिकं ततो नित्ये षत्वे प्राप्ते इयं विभाषा आरभ्यते** ॥

॥ * ॥ सिद्धं च मे समासे ॥ * ॥ **[सिद्धं च मे समासे] षत्वम्। किमर्थं तर्हीदमुच्यते ?** ॥ * ॥ प्रतिषेधार्थस्तु यत्नोऽयम् ॥ * ॥ **[प्रतिषेधार्थोऽयं यत्नः]। अनुत्तरपदस्थस्येति प्रतिषेधं वक्ष्यामीति।**

॥*॥ नानापदार्थयोर्वर्तमानयोः ख्यायते यदा योगः।
तस्मिन् षत्वं कार्यं तद्युक्तं तच्च मे नेह ॥ १ ॥
ऐकार्थ्ये सामर्थ्ये वाक्ये षत्वं न मे प्रसज्येत।
तस्माद्दिह व्यपेक्षां सामर्थ्यं साधु मन्यन्ते ॥ २ ॥

प्र.]त्तरपदस्थस्येति प्रतिषेधाज्ज्ञापकाद्वाक्ये परमसर्पिष्करोतीत्यादौ षत्वं भविष्यतीत्यर्थः। यदि हि षत्वे प्रत्ययग्रहणपरिभाषोपास्थास्यत, अनुत्तरपदस्थस्येति प्रतिषेधो न व्यधास्यत। केचित्तु 'नित्यं समास' इत्येको योगः, 'अनुत्तरपदस्थस्ये'ति द्वितीय इति योगविभागेन समासे सर्वा षत्वप्राप्तिरुत्तरपदस्थस्य प्रतिषिध्यत इति वर्णयन्तो द्विविधसामर्थ्याश्रयेऽपि न दोष इत्याहुः। **अथ चेदिति।** यद्यव्युत्पन्नं सर्पिरादिकं शब्दरूपं संविज्ञानं वाचकं तदाऽप्रत्ययविसर्जनीयत्वादिदुदुपधस्येति नित्ये षत्वे प्राप्ते 'इसुसोःसामर्थ्ये'इत्यनेन विकल्पः क्रियते तत्र प्रत्ययग्रहणाऽभावात्प्रत्ययग्रहणपरिभाषानुपस्थानात्परमसर्पिष्करोतीत्यादावपि षत्वविकल्पः सिध्यति।

किमर्थमिति। 'इसुसोः सामर्थ्ये'इत्यत्र व्यपेक्षालक्षणसामर्थ्यग्रहणात्समासे 'इदुदुपधस्ये'ति नित्यं षत्वं सिद्धं, तत्किमर्थं 'नित्यं समास' इति सूत्रमिति प्रश्नः। **प्रतिषेधार्थ इति।** उत्तरपदस्थस्य समासे षत्वनिवृत्त्यर्थं सूत्रमित्यर्थः। नित्य-

---

उ.] पदस्थस्येति। यतः प्रतिषेधो न प्रकल्पेताऽतो वाक्ये मे विभाषा सिद्धेत्यर्थः। प्रतिषेधस्य ज्ञापकत्वमुपपादयति–**यदि हीति।** तस्मादनेन प्रतिषेधेनाक्षिप्तस्याऽपि पृथग्विशेष्यता ज्ञाप्यत इति भावः। एवञ्च 'परमसर्पिःकुण्डिके'त्यादौ वैकल्पिकषत्ववारणाय पूर्वसूत्रे व्यपेक्षैवाश्रयणीयेति तात्पर्यम्। **केचित्त्विति।** भाष्याऽसम्मतिरत्राऽरुचिः। 'संविज्ञान'-पदार्थमाह–**यद्यव्युत्पन्नमिति।** भाष्येऽथशब्दो यद्यर्थे इति भावः। नन्वेतदभावे समासेऽपि 'इसुसो'रित्यनेन विकल्पः स्यादत आह–**इसुसोरिति। व्युत्पत्तिपक्ष एवेति।**

अथ चेत्कृदन्तमेतत्ततोऽधिकेनैव मे भवेत्प्राप्तिः ।
वाक्ये च मे विभाषा प्रतिषेधो न प्रकल्पेत ॥ ३ ॥
अथ चेत्संविज्ञानं नित्ये षत्वे ततो विभाषेयम् ।
सिद्धं च मे समासे, प्रतिषेधार्थस्तु यत्नोऽयम् ॥ ४ ॥*॥

अपदान्तस्य मूर्द्धन्यः ।८।३।५५।

अथ मूर्द्धन्यग्रहणं किमर्थं, नाऽपदान्तस्य षो भवतीत्येवोच्येत, तत्रा यमप्यर्थः षकारग्रहणं न कर्तव्यं भवति । प्रकृतमनुवर्तते ॥ क्व प्रकृतम् ?॥ 'इणः ष' इति ॥ **नैवं शक्यम् । अवश्यं मूर्द्धन्यग्रहणं कर्तव्यम्-** इहार्थमुत्तरार्थं च ॥ इहार्थं-तावत्-**इणः षीध्वंलुङ्लिटां धोऽङ्गादि-** त्यत्र **मूर्द्धन्यग्रहणं न कर्तव्यं भवति ।** उत्तरार्थम्-**'रषाभ्यां नो णः समान-** पद' **इत्यत्र णकारग्रहणं न कर्तव्यं भवति । तत्रायमप्यर्थः 'पदान्तस्य ने'ति** प्रतिषेधो न वक्तव्यो भवति । अपदान्ताभिसम्बद्धं मूर्धन्यग्रहणमनुवर्तते ॥**

॥*॥ इति श्रीभगवत्**पतञ्जलि**मुनिविरचिते व्याकरण**महाभाष्ये**ऽष्टमस्याऽध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥*॥

प्र.] ग्रहणं तु न कर्तव्यम् । 'समासेऽनुत्तरपदस्थस्ये'ति प्रतिषेधार्थं सूत्रं पठितव्यम् । अव्युत्पत्तिपक्षे त्वाश्रीयमाणे 'सर्पिषा' 'यजुषे'त्यादि न सिध्यतीति षत्वाय व्युत्पत्तिपक्ष एवेसुसन्तस्याश्रयणीयः । [**नित्यं समासे**] ॥

अपदान्तस्य मूर्द्धन्यः । अथेति । मूर्द्धन्यग्रहणं गुर्विति प्रश्नः । **इणः षीध्वमिति ।** इहाऽक्रियमाणे मूर्द्धन्यग्रहणे 'इणः षीध्व'मित्यत्र ढग्रहणं कर्तव्यं, ततः 'समासेङ्गुले'रित्यत्र षग्रहणं कर्तव्यम् । **अपदान्ताभिसम्बद्धमिति ।** रषाभ्यामित्य-

---

उ.] एवं च नित्यग्रहणमपि कार्यमिति भावः। परेत्वथ **चेत्संविज्ञानमिति** पाणिनेः पक्षः, सर्पिषेत्यादौ बहुलग्रहणात्क्वचिदन्यदेवेत्यर्थकात्षत्वं सिद्धम् । ध्वनितं **चायनेयीति** सूत्रे 'प्रातिपदिकविज्ञानाच्च भगवतः सिद्ध'मिति वदताऽस्य पाणिनिपक्षत्वमित्यलम् ॥

अपदान्तस्य । ननु पदेन पदान्तरप्रत्याख्यानमसङ्गमत आह-**मूर्द्धन्येति ।** मूर्धन्यवर्णबोधकं ग्रहणमिति भाष्यार्थ इत्याह-**ढग्रहणं कर्तव्यमिति ।** 'ढग्रहण'मित्येव वक्तव्ये मूर्द्धन्यग्रहणफलमाह—**ततः समासे इति ।** ढग्रहणेन विच्छिन्नतयाऽनुवृत्त्ययोगादिति भावः । भाष्ये-**अत्र णकारेति ।** न चैवं ष्टुत्वपदप्राप्यमूर्द्धन्यपदप्राप्यमाणयोर्विशेषाभावात्प्रियाष्टु इत्यादौ 'पूर्वसूत्रासिद्धीय'इत्यस्य 'तस्य दोष'इत्यनेन निषेधे स्थानिवद्भावेन ष्टुत्वाऽ-

सहेः साडः सः ।८।३।५६।

'स'ग्रहणं किमर्थं न 'सहेस्साडो मूर्द्धन्यो भवती'त्येवोच्येत ? ॥ 'सहेस्साडो मूर्द्धन्यो भवती'त्युच्यमानेऽन्त्यस्य प्रसज्येत॥ ननु चाऽन्त्यस्य मूर्द्धन्यवचने प्रयोजनं नास्तीति कृत्वा सकारस्य भविष्यति॥कुतो नु खल्वेतदनन्त्यार्थे आरम्भे सकारस्य भविष्यति न पुनराकारस्य स्यात् ? ॥ 'स्थानेन्तरतमो भवती'ति सकारस्य भविष्यति ॥ भवेत्प्रकृतितोऽन्तरतमनिर्वृत्तौ सत्यां सिद्धं स्यात्। आदेशतस्त्वन्तरतमनिर्वृत्तौ सत्यामाकारस्य प्रसज्येत। तस्मात् सकारग्रहणं कर्तव्यम् । [॥*॥ सकारग्रहणमुत्तरार्थम् ॥*॥] उत्तरार्थं च सकारग्रहणं

प्र.] त्रापदान्तग्रहणानुवर्तनात्पदान्तस्येति सूत्रं न कर्त्तव्यं भवतीति लाघवं सम्पद्यते ॥

॥ इति कैयटीये महाभाष्यप्रदीपेऽष्टमस्य तृतीये प्रथममाह्निकम् ॥

सहेः साडः सः । **प्रयोजनं नास्तीति** । ननु भिन्नरूपमूर्द्धन्यार्थं वचनं स्यात् । नैतदस्ति । 'स्थानेऽन्तरतम' इत्यस्य बाधप्रसङ्गादपदान्तस्येत्यधिकारादन्त्यस्य न भविष्यतीत्ययमप्यत्र परिहारोऽस्ति । **कुतो नु खल्वेतदिति** । ननु वचनसामर्थ्यादनुसंहारे बाधिते सर्वादेशो मूर्द्धन्यः प्राप्नोति । अयमपरोऽस्य दोषोऽस्तु । **स्थानेन्तरतम इति** । षग्रहणमिहानुवर्तेत इति भावः । मूर्द्धन्यग्रहणानुवृत्तौ तु ऋकार आकारस्य प्राप्नोति । **भवेदिति** । यद्यन्तरतम इति सप्तम्याश्रीयेत तदायं परिहारः । षग्रहणानुवृत्तौ स्यात्। सप्तमीपक्षस्तु दोषदर्शनात्यक्तः । सप्तम्यां हीको यणचीति यणोऽर्द्धमात्राकालस्य मात्रिक एवान्तरतमः

उ.] नापत्तिः, णग्रहणे तु प्रतिपदोक्तेऽत्रैव स निषेध इति स्थानिवत्त्वाभावात् ष्टुत्वं स्यादेवेति वाच्यम् , एतद्भाष्यप्रामाण्येनाऽनित्यतया णत्वांशे प्रतिपदोक्तपरिभाषासाहचर्यपरिभाषयोरप्रवृत्त्याऽक्षतेः। प्रियाष्ट्न इत्यादेरनभिधानस्य ष्णान्तेति सूत्रे उक्तत्वाच्च । इति श्रीनागोजीभट्टविरचिते भाष्यप्रदीपोद्द्योतेऽष्टमस्य तृतीये प्रथममाह्निकम् ॥

सहेः सा । भिन्नरूपेति । ऋवर्णादीत्यर्थः । **बाधप्रसङ्गादिति** । अबाधेनोपपत्तौ बाधस्याऽन्याय्यत्वादिति भावः । भाष्यमुपलक्षणमित्याह—**अपदान्तस्येति** । भाष्ये 'प्रयोजन'शब्दः प्रयोजकनिमित्तपरोऽपि, तेन अपदान्तत्वरूपं प्रयोजकं नास्तीत्यप्यर्थ इति बोध्यम् । **अयमपर इति** । पूर्वपक्षत्वाद्दोषान्तरसद्भावो न दोषायेत्यर्थः। वस्तुतस्तु अग्रे 'इणको' रित्यस्याधिकारादवध्यवधिमतोः साजात्यस्यौचित्येन मूर्धन्यं प्रति वर्णस्यैव स्थानित्वेनाऽपदान्तस्येत्यस्याऽत्रापि वर्णपरत्वमेवेति भाष्याशय इत्यन्ये । **षग्रहणमिति** । 'इणः ष'

क्रियते । आदेशप्रत्यययोस्सकारस्य यथा स्यादिह मा भूत्,-चितं स्तुतम् ॥ अथ सहिग्रहणं किमर्थं न 'साडः सो भवती'त्येवोच्येत ? ॥ सहेरेव साड्रूपं भवति नान्यस्य [भवति]। यद्येवं-॥*॥ साडः षत्वे समानशब्दप्रतिषेधः ॥ * ॥ साडः षत्वे समानशब्दानां प्रतिषेधो वक्तव्यः । साऽडो दण्डः, साऽडो वृश्चिक इति ॥ * ॥ अर्थवद्ग्रहणात्सिद्धम् ॥ * ॥ अर्थवतः साड्[रूप]शब्दस्य ग्रहणं, न चैषोऽर्थवान् ॥ * ॥ अर्थवद्ग्रहणात्सिद्धमिति चेत्तद्धितलोपेऽर्थवत्त्वात्प्रतिषेधः ॥ * ॥ अर्थवद्ग्रहणात्सिद्धमिति चेत्तद्धितलोपेऽर्थवत्त्वात्प्रतिषेधो वक्तव्यः । सह अडेन साऽडः, साऽडस्यापत्यं साऽडिरित्यत्र प्राप्नोति ॥ [स तर्हि वक्तव्यः ?] ॥ न वक्तव्यः । षत्वतुकोरेकादेशस्याऽसिद्धत्वान्नैष साड्शब्दः ॥ एवमपि सह डेन सडः, सडस्यापत्यं साडिः,-अत्र प्राप्नोति ॥ तस्मात्सहिग्रहणं कर्तव्यम् ॥ [सहेः साडः सः] ।

इण्कोः ।८।३।५७।

नुम्विसर्जनीयशर्व्यवायेऽपि ।८।३।५८।

॥ * ॥ नुम्विसर्जनीयशर्व्यवाये निंसेः प्रतिषेधः ॥ * ॥ नुम्विसर्जनीयशर्व्यवाये निंसेः प्रतिषेधो वक्तव्यः । निंस्से निंस्स्वेति ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । नुमैव व्यवाये, विसर्जनीयेनैव व्यवाये, शरैव व्यवाये इति ॥

प्र.]स्थानी स्यान्न द्विमात्रः । चितमिति । मूर्द्धन्याऽनुवृत्तौ तकारस्य टः प्रसज्येत । षकारानुवृत्तौ तु षः । साड इति । दण्डस्य वृश्चिकस्य वा अडोऽवयवविशेषः ।

नुम्विसर्जनीयशर्व्यवायेपि । निंसेरिति । यथा'वृषलैर्न प्रवेष्टव्य'मिति वृषलप्रवेशनिषेधपरत्वाद्वाक्यस्य प्रत्येकं सहितानां च प्रवेशाऽभाव एवं नुमादीनां षत्वाऽप्रतिबन्धहेतुत्वप्रतिपादनायोपादानात्प्रत्येकं समुदायेन च व्यवाये षत्वप्रसङ्गः।

उ.] इत्यत इत्यभिमानः । षकारानुवृत्तौ त्विति । इदं प्रौढ्या, न तु तदनुवृत्तौ मानमस्ति, पूर्वोक्तपूर्वपक्षाऽनुसारेण वा । भाष्ये-तद्धितलोप इति । तद्धितनिमित्ते लोप इत्यर्थः ।

नुम्विसर्जनीय श । ननु प्रत्येकं वाक्यपरिसमाप्तिन्यायान्नुमादिभिः प्रत्येकं व्यवाये षत्वेन भाव्यं, समुदायव्यवायाऽसंभवाच्च । एवञ्च प्रकृते न दोषः, नुम्शर्भ्यां व्यवायादित्यत आह- यथा वृषलैरिति । षत्वप्रसङ्ग इति । णत्ववदिति भावः । ननु समुदायेन व्यवायाऽसम्भवात्कस्तन्न्यायावसरोऽत आह-सर्वैश्चेति । प्रत्येकपरिसमाप्तिन्यायाऽभावे तात्पर्यमिति भावः । एतद्वाक्योपायानीति । एतत्सङ्ग्राहक-

किं वक्तव्यमेतत् ? ॥ न हि कथमनुच्यमानं गंस्यते ? ॥ प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टेति । तद्यथा गुणवृद्धिसंज्ञे प्रत्येकं भवतः ॥ ननु चायमप्यस्ति दृष्टान्तः–समुदाये वाक्यपरिसमाप्तिः । तद्यथा–'गर्गाः शतं दण्ड्यन्तामर्थिनश्च राजानो हिरण्येन भवन्ति, न च प्रत्येकं दण्डयन्ति' ॥ एवं तर्हि–

॥*॥ योगविभागात्सिद्धम् ॥*॥ [योगविभागात्सिद्धमेतत्[1]] । योगविभागः करिष्यते । 'नुम्व्यवाये' । ततो,–'विसर्जनीयव्यवाये' । ततः 'शर्व्यवाये' ॥ स तर्हि योगविभागः कर्तव्यः ? ॥ न कर्तव्यः । प्रत्येकं व्यवायशब्दः परिसमाप्यते ॥

आदेशप्रत्यययोः ।८।३।५९।

आदेशप्रत्यययोः षत्वे सरकः प्रतिषेधः ॥ * ॥ आदेशप्रत्यययोः षत्वे सरकः[2] प्रतिषेधो वक्तव्यः । कुसरः धूसरः ॥ अत्यल्पमिदमुच्यते 'सरक' इति ॥*॥ सरगादीनामिति वक्तव्यम् ॥*॥ इहापि यथा स्यात्–वर्सं तर्समिति॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । "उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' । न वा एतत्[4]षत्वे शक्यं विज्ञातुम्-'उणादयोऽव्युत्पन्नानि प्रातिपदिका-

प्र.] नुमैवेति । एवमुच्यमानेऽनेकव्यवाये षत्वाऽप्रसङ्गः । ननु चायमिति । सर्वैश्च व्यवायाऽसम्भवाद्यथासम्भवं क्वचित्प्रत्येकं क्वचिद्द्वाभ्यां व्यवाये षत्वप्रसङ्गः । एवं तर्हीति । योगविभागे सति द्वाभ्यां व्यवाये षत्वाऽभावः । 'इण्को'रिति पञ्चमीनिर्देशादानन्तर्ये षत्वप्रतिपादनाद्योगत्रयेण[3] चैकैकव्यवाये षत्वाऽभ्यनुज्ञानात् । प्रत्येकमिति । लक्ष्यदर्शनवशाल्लक्षणव्यवस्था ततश्चैतद्वाक्योपायानि प्रक्रियावाक्यानि त्रीण्युपप्लवन्त इति योगविभागसाध्यफलसिद्धिः । [नुम्विसर्ज] ।

आदेशप्रत्यययोः । कुसर इति । 'अशेःसर'न्नित्यतः सरन्प्रत्ययो 'कृधूमादिभ्यः कि'दित्यत्रानुवर्तते । कित्त्वातिदेशाच्च कित्कार्यलाभाद्भाष्यवार्तिकयोः सरक्पठितः । वर्समिति । 'वृतृवदि'इति सप्रत्ययः । उणादय इति । अबुधबोधनाय व्युत्पाद्यमाना अप्युणादयो व्युत्पत्तिनिमित्तं कार्यं न लभन्ते, 'अतः कृकमिकंसे'-त्यत्र पृथक्कंसग्रहात् । नवै एतदिति । षत्वं व्युत्पत्तिहेतुकमुणादीनामवश्याभ्युपेयं

उ.] वाक्यमुपायो येषाम्, 'अपाय'इति पाठे अपादानं वा येषामित्यर्थः । क्वचित्तु 'एतद्वाक्यात्प्रक्रियावाक्यानी'त्येव पाठः । [नुम्विसर्जनीय] ।

आदेशप्रत्यययोः । सरक उणादिष्वप्रसिद्धत्वादाह–अशेरिति । ननु व्युत्पत्तिमभिधायाऽव्युत्पन्नत्वकथनमसङ्गतमत आह–अबुधेति । वृक्षे व्रश्चेः सक्प्रत्ययः । षत्वे कर्तव्ये

नी'ति। इह हि न स्यात्—सर्पिषः[1] यजुष इति॥ एवं तर्हि—॥ * ॥ बहुल वचनात्सिद्धम्॥ * ॥ [बहुलवचनात्[2]सिद्धमेतत्]। बहुलं प्रत्ययसंज्ञा भवति[3]।

अथ किं पुनरियमवयवषष्ठी—'आदेशस्य यः सकारः' 'प्रत्ययस्य यः सकार' इति, आहो स्वित् समानाधिकरणा—'आदेशो यः सकारः' 'प्रत्ययो यः सकार' इति॥ कश्चात्र विशेषः?॥ ॥*॥ आदेशप्रत्यययोरित्यवयवषष्ठी चेद्विर्वचने प्रतिषेधः॥*॥ आदेशप्रत्यययोरित्यवयवषष्ठी चेद्द्विर्वचने प्रतिषेधो वक्तव्यः। बिसं बिसम्। मुसलंमुसलम्॥*॥ समानाधिकरणानां चाऽप्राप्तिः॥*॥ समानाधिकरणानां च षत्वस्याऽप्राप्तिः। एषः अकार्षीत्॥ अस्तु समानाधिकरणा॥ यदि समानाधिकरणा सिषेच सुष्वाप,—अत्र न प्राप्नोति॥ न धातु-

---

प्र.] सर्पिषा वृक्ष इत्यादिसिद्ध्यर्थमित्यर्थः। **एवं तर्हीति**। कृसरादिषु षत्वे कर्तव्ये प्रत्ययसंज्ञा न भवति। **अथेति**। अवयवषष्ठ्यामस्यां 'स' इत्यस्यानुवृत्तस्य वचनविपरिणामो न कर्तव्यो भवति, कार्येण त्वादेशप्रत्यययोरसम्बन्धः सकारविशेषणत्वात्, सामानाधिकरण्ये त्वादेशप्रत्यययोः सकारयोरिति द्विवचनं विपरिणाम्यं, कार्येण त्वादेशप्रत्यययोश्चोदनाया अनुग्रह इति साम्यात्पक्षद्वयसम्भवः। **बिसंबिसमिति**। 'स्थाने द्विर्वचन'मिति मत्वा दोषोपन्यासः। **एष इति**। एतदस्तकारस्य 'तदोः सः सावनन्त्ययो'रिति सकार आदेशो नादेशावयव इति षत्वं न प्राप्नोति। एवमकार्षीदित्यत्रादेशः प्रत्ययो वा सकारो, न तु तदवयवः। **सिषेचेति**। स्थाने

उ.] **इति**। एतेन 'वर्स'मित्यादावन्तरङ्ग[6]त्वादिनिमित्ते गुणे प्रत्ययसंज्ञा भवतीति सूचयति—**प्रत्ययसंज्ञानेति**। परे तु 'सर्पिष' इत्यादावव्युत्पत्तिपक्षेऽपि 'बहुल'मित्युक्तेर्बाहुलकात्प्रत्ययसंज्ञानिमित्तं षत्वं भवतीत्यर्थः। सरगादिविषयं तु नेदं। तथा सति बहुलवचनात्प्रत्ययसंज्ञा न भवतीत्येव वदेत्। अतएव 'नित्यं समास' इति सूत्रस्थम**थचेत्संविज्ञान**मित्यादि सर्पिःशब्दोपक्रमेण प्रवृत्तं भाष्यं वार्तिकं च सङ्गच्छते **'एवन्तर्हि बहुलवचनात्सिद्ध'**मित्यस्य सर्पिष इत्यादीति शेषोऽपि[इति]। पक्षद्वयेऽपि दोषपरिहारार्थमेवोक्तं। भाष्ये—'उणादयो बहुल'मित्यस्योणाद्यन्ताः शब्दाः प्रत्ययप्रकृतिविभागेन व्याकरणान्तरे साधितास्तत्र सकलकार्यसिद्ध्यर्थं बहुलग्रहणं, मच्छास्त्रे चाव्युत्पन्नानामपि तेषां सकलकार्यसिद्ध्यर्थं बहुलग्रहणं कर्तव्यमितर्थं इत्याहुः। ननु सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्याऽन्याय्यत्वात्प्रश्नानुपपत्तिरत आह—**अवयवेति**। **कार्येणेति**। **कार्येण** षत्वेनादेशप्रत्यययोर्या **चोदना** साक्षाच्छ्रुतिस्तस्या **अनुग्रह** इत्यर्थः। साक्षाच्छ्रुतयोरेव कार्येण सम्बन्ध इति भावः। **साम्या-**

द्विर्वचने स्थाने द्विर्वचनं शक्यमास्थातुम्, इहापि[1] हि प्रसज्येत–सरीसृप्यत इति । तस्मात्तत्र द्विःप्रयोगो[2] द्विर्वचनम् ॥ इह तर्हि करिष्यति हरिष्यति,– 'प्रत्ययो यः सकार' इति षत्वं न प्राप्नोति ॥ अस्तु तर्ह्यादेशो यः सकारः प्रत्ययस्य यः सकार इति ॥ इह तर्हि–अकार्षीत्,–प्रत्ययस्य यः सकार इति षत्वं न प्राप्नोति ॥ मा भूदेवम्, 'आदेशो यः सकार' इत्येवं भविष्यति । इह तर्हि जोषिषत्, मन्दिषदिति,–प्रत्ययस्य यः[5] सकार इति षत्वं न प्राप्नोति । एषोऽपीटि कृते प्रत्ययस्य सकारः ॥ इह तर्हि,-इन्द्रो मा वक्षत्, स देवान्यक्षत् ॥*॥ नानाविभक्तीनां च समासानुपपत्तिः ॥*॥ नानाविभक्तीनां च समासो नोपपद्यते आदेशप्रत्यययोरिति ॥*॥ योगविभागात्सिद्धम् ॥*॥ [योगविभागात्सिद्धमेतत्][6] । योगविभागः करिष्यते । 'आदेशस्य' । [आदेशस्य] षो भवतीति । ततः 'प्रत्ययस्य' । प्रत्ययस्य[3] सकारस्य षो भवतीति ॥ स तर्हि योगविभागः कर्तव्यः? ॥ न कर्त्तव्यः ॥ कथम् ?॥ अस्तु तावदवयवषष्ठी ॥ ननु चोक्तमादेशप्रत्यययोरित्यवयवषष्ठी चेद्द्विर्वचने प्रतिषेध इति ॥ नैष दोषः । द्विःप्रयोगो[6] द्विर्वचनम् ॥ यदप्युच्यते–समानाधिकरणानां चाप्राप्तिरिति । [नैष दोषः] ॥

प्र.] द्विर्वचन आदेशावयवः सकारो न त्वादेश इति षत्वाप्रसङ्गो,यथा विससित्यादौ । **सरीसृप्यत इति** । ननु समानाधिकरणपक्षे षत्वस्याऽत्राऽप्रसङ्गः । उच्यते । सिषेचादिसिद्धये यदि व्यधिकरणपक्ष आश्रीयते तदा स्थाने द्विर्वचने सरीसृप्यत इत्यत्रापि प्राप्नोति । द्विःप्रयोगे त्वत्र न दोषः । 'सिषेचे'त्यादौ तु 'धात्वादेः षः स' इति य आदेशस्तस्य सामानाधिकरण्याश्रयेण षत्वं सिध्यति । **जोषिषदिति** । लेट् । व्यत्ययेन परस्मैपदं । तिप् । 'इतश्च लोप'इत्यादिनेकारलोपः । 'लेटोऽडाटा'वित्यट् । 'सिब्बहुलं लेटी'ति सिप् । **इटि कृत इति** । सागमकस्य प्रत्ययत्वात्तदवयवः सकारः । **वक्षद्यक्षदिति** । वचियजिभ्यां लेट् । **नानाविभक्तीनामिति** । आदेशस्येति षत्वापेक्षया स्थानषष्ठी, प्रत्ययस्येति सकारापेक्षयाऽवयव-

---

उ.] **दिति** । युक्तिसाम्यादित्यर्थः । **आदेशः प्रत्ययो वेति** । च्लेः सिज्विधानादादेशत्वं, स्थानिवद्भावेनाधिकारेण वा प्रत्ययत्वमिति भावः । भाष्ये–**इहापि तर्हीति** । तर्हि स्थाने द्विर्वचनत्वे इत्यर्थः । **ननु समानेति** । समानाधिकरणपक्षं प्रक्रम्य ह्येतदुक्तं । ननु द्विःप्रयोगे 'सिषेचे'त्यस्याऽसिद्धिरत आह–**सिषेचेत्यादौ त्विति** । **षत्वापेक्षयेति** । सकार-

व्यपदेशिवद्भावेन भविष्यति ॥ अथ वा पुनरस्तु समानाधिकरणा ॥ कथं करिष्यति हरिष्यति ?॥ आचार्यप्रवृत्तिर्ज्ञापयति 'भवत्येवंजातीयकानां षत्व'मिति, यदयं 'सात्पदाद्यो'रिति सात्प्रतिषेधं शास्ति ॥ अथ वा पुनरस्त्वादेशो यः सकारः प्रत्ययस्य यः सकार इति ॥ कथमिन्द्रो मा वक्षत्, स देवान्यक्षत् ?॥ व्यपदेशिवद्भावेन भविष्यति ॥ स तर्हि व्यपदेशिवद्भावो वक्तव्यः ?॥ न वक्तव्यः ॥ उक्तं वा ॥*॥ [उक्तं वा] ॥ किमुक्तम् ?॥ 'तत्र व्यपदेशिवद्वचनमेकाचो द्वे प्रथमार्थं, षत्वे चादेशसंप्रत्ययार्थम्, अवचनाल्लोकविज्ञानात्सिद्ध'मिति । यदपि—'नानाविभक्तीनां च समासानुपपत्ति'रिति। आचार्यप्रवृत्तिर्ज्ञापयति—'नानाविभक्त्योरेप समास' इति, 'यदयं शासिवसिघसीनां चे'ति घसिग्रहणं करोति ॥

कथं कृत्वा ज्ञापकम् ? ॥ यदि ह्यादेशस्य यः सकार इत्येवं स्याद्घसिग्रहणमनर्थकं स्यात् । पश्यति त्वाचार्यः—'आदेशो यः सकारस्तस्य षत्व'मिति,—ततो घसिग्रहणं करोति ॥ [आदेशप्रत्यययोः] ।

प्र.]षष्ठीति सहविवक्षाऽभावाद्द्वन्द्वानुपपत्तिः । **व्यपदेशिवद्भावेनेति** । ननु सिप्सिचोरर्थस्य त्यागोपादानाभ्यां युक्तो व्यपदेशिवद्भावः इडागमभावभावाभ्यामनेकरूपत्वाद्वा । 'एष'इत्यत्र तु सकारस्यानर्थक्यादयुक्तो व्यपदेशिवद्भावः । तथा चोक्त-'मर्थवता व्यपदेशिवद्भाव'इति । एवं तर्ह्यवयवसमुदायापेक्षो व्यपदेशिवद्भावः, स्यः सः एषोऽसाविति सकारसमुदायस्यादेशस्यैष इत्यत्र सकारोवयवो भवतीति षत्वं प्रवर्तते । **यदयमिति** । प्रत्ययावयवस्यापि सकारस्य षत्वं भवति न केवलं प्रत्ययस्य सकारस्येति प्रतिषेधेन ज्ञाप्यते । **नानाविभक्त्योरिति** । नन्वाचार्यस्यार्थेष्ववैभवात्कथं भिन्नप्रस्थानयोर्द्वन्द्वः । उच्यते । एकविभक्त्योरयं द्वन्द्वो, नानाविभक्तितुल्यफलत्वान्नानाविभक्तिरुक्तः । साद्ग्रहणाद्घसिग्रहणाच्च नोभयत्र सामानाधिकरण्यं वैयधिकरण्यं च । तत्र प्रत्ययावयववृत्तित्वात्प्रत्ययशब्दस्य सामानाधिकरण्येऽपि वैयधिकरण्यफल लाभः ।

उ.]रूपादेशस्य प्रत्ययावयवसस्य चेत्यर्थादिति भावः । **सिप्सिचोरर्थवत्त्वादिति** । द्योत्यार्थेनाऽर्थवत्त्वादित्यर्थः । इदं चिन्त्यमित्याद्यन्तवत्सूत्रे निरूपितमतः पक्षान्तरमाह—**इडित्यादि** । **सकारोऽवयव इति** । आहार्यारोपेण लोकसिद्धेन शास्त्रव्यवहारोपपत्तेरयं प्रयासो वृथा । **ज्ञाप्यत इति** । सातेः सकारस्याऽप्रत्ययत्वात् प्राप्त्यभावेन प्रतिषेधोऽनर्थकः सन् प्रत्ययस्य विधीयमानं षत्वं तदवयवस्यापि भवतीति ज्ञापयतीत्यर्थः । **साद्ग्रहणादिति** । साद्ग्रहणान्नोभयत्र मुख्यार्थेन सामानाधिकरण्यं, घसिग्रहणाच्च नोभयत्र वैयधि-

स्तौतिण्योरेव षण्यभ्यासात् ।८।३ ६१ ।

स्तौतिणिग्रहणं किमर्थम् ?॥ अस्तौतिण्यन्तानां मा भूत्–सिसिक्षति ॥ अथैवकारः किमर्थः ॥*॥ एवकारो नियमार्थः ॥*॥ [एवकारो नियमार्थः] । 'स्तौतिण्यन्तानामेव नान्येषा'मिति ॥ नैतदस्ति प्रयोजनं, सिद्धे विधिरारभ्यमाणोऽन्तरेणैवकारकरणं नियमार्थो भविष्यति ॥ 'इष्टतोऽवधारणार्थस्तर्हि' । यथैवं विज्ञायेत 'स्तौतिण्योरेव षणी'ति, मैवं विज्ञायि–'स्तौतिण्योः षण्येवे'ति । इह न स्यात्–तुष्टाव ॥

अथ षणीति किमर्थम् ?॥ सेषीव्यते । को विनतेऽनुरोधः?॥ अविनते नियमो मा भूत्–सुषुप्सतीति ॥ कः सानुबन्धेऽनुरोधः ? ॥ षशब्दमात्रे नियमो मा भूत्–सुषुपिष इन्द्रम् । सुषुपिष इहेति ॥ अभ्यासादिति किमर्थम् ? ॥ अभ्यासाद्या प्राप्तिस्तस्या नियमो यथा स्यादुपसर्गाद्या प्राप्तिस्तस्या नियमो मा भूत्–अभिषिषिक्षति ॥ नैतदस्ति, असिद्धमुपसर्गात्षत्वं, तस्याऽसिद्धत्वान्नियमो न भविष्यति ॥ इदं तर्हि प्रयोजनं,-सनि योऽभ्यासस्तस्माद्या प्राप्तिस्तस्या नियमो यथा स्याद्यङि योऽभ्यासस्तस्माद्या प्राप्तिस्तत्र नियमो मा भूत्–

प्र.] स्तौति । नियमार्थ इति । विशिष्टेष्टनियमार्थ इत्यर्थः । सुषुपिष इन्द्रमिति । स्वपेर्लिट् । छान्दसत्वाद्व्यत्ययेन थास् । थासः से । तस्य षत्वेऽयादेशे यलोपे च नियमाऽभावादभ्यासात्परस्य धातुसकारस्य षत्वं भवत्येव । अभिषिषिक्षतीति । 'स्थादिष्वभ्यासेने'ति वर्तमान 'उपसर्गात्सुनोती'ति षत्वम् । असिद्धमिति । 'प्रकरणे प्रकरणमसिद्धं न तु योगे योग'इत्येतन्नाश्रितम् । सनि योऽभ्यास इति । यथाऽत एकहल्मध्य इत्यत्र लिटाऽऽदेशो विशेष्यते तथेह सनाऽभ्यासः,–'सनि योऽभ्यासस्तस्मात्स्तौतिण्योरेवे'ति । तेन यङि योऽ-

उ.] करण्यं, घसेरादेशत्वेनादेशावयवस्येति षत्वस्य सिद्धत्वेन 'शासिवसी'ति सूत्रे घसिग्रहणवैयर्थ्यापत्तेः । तस्मात्प्रत्ययशब्दस्य लक्षणयोभयत्रापि सामानाधिकरण्यमिति भावः ।

स्तौतिण्योरेव । एवकारं विनाऽपि आरम्भसामर्थ्यान्नियमसिद्धेराह–विशिष्टेति । भाष्ये–को विनत इति । 'विनाम'शब्देन षत्वमुच्यते व्याकरणान्तरप्रसिद्ध्या । अनुरोधः–प्रयोजनं । कृतषत्वनिर्देशे किं प्रयोजनमित्यर्थः । स्वपेः परस्मैपदित्वादाह–व्यत्ययेनेति । नियमाऽभावादिति । नकारानुबन्ध एव नियमादित्यर्थः । इतिषत्वमिति । उभयोरपीत्यर्थः । तथेह सनेति । 'गुणः कृतात्मसंस्कार'इति न्यायादिति भावः । अत्राऽ-

सोषुप्यते: सन्–सोषुपिषते ॥ अथ वाऽभ्यासाद्या प्राप्तिस्तस्या नियमो यथा स्याद्धातोर्या प्राप्तिस्तस्या नियमो मा भूत्–अधीषिषति प्रतीषिषतीति ॥ ननु च षणीत्युच्यते; 'षणी'ति नैषा परसप्तमी शक्या विज्ञातुम् । सन्यङन्तं हि द्विरुच्यते, तस्मादेषा सत्सप्तमी 'षणि सती'ति। सत्सप्तमी चेत्प्राप्नोति ॥

प्र.] भ्यासस्तस्माद्धात्वन्तरस्यापि षणि षत्वं भवति । **सोषुपिषत इति** । अत्र तु शक्यं वक्तुमन्तरङ्गं षत्वं बहिरङ्गो नियमस्ततोऽसिद्धं बहिरङ्गमन्तरङ्ग इति सिद्धं षत्वम् । अथ वा सनः षत्वं बहिरङ्गत्वादसिद्धम् । यङ्निमित्तादभ्यासाद्धातुसकारस्य षत्वे कर्तव्येऽविनते च नियमाऽभावो यथा–'सुषुप्सती'ति । **अधीषिषतीति** । इणो बोधनार्थत्वाद्गम्यादेशाऽभावः । 'अजादेर्द्वितीयस्ये'ति 'स'शब्दस्य द्विर्वचनम् । 'सन्यत' इतीत्वम् । धात्वाश्रयमभ्यासस्य षत्वमभ्यासाश्रये प्रत्ययस्य षत्वे कृते नियमाऽभावात्प्रवर्तते । **ननु च षणीति** । 'षणी'ति परसप्तमी, ततश्च'षणि परतः स्तौतिण्योरेव षत्व'मिति नियमः क्रियमाणस्तुल्यजातीयस्य षण्परस्य 'सिसिक्षती'त्यादौ षत्वं व्यावर्तयति । अधीषिषतीत्यादौ तु सन एव द्विर्वचनविधानात्षण्परत्वाऽभावात्तस्य नियमो न प्रवर्तिष्यत इति नार्थोऽभ्यासग्रहणेनेत्यर्थः । **सन्यङन्तमिति** । समुदाय एव सन्यङन्तोऽवयवद्वारेण द्विर्वचनभागित्यर्थः । **सत्सप्तमीति** । तुल्यजातीयस्यापि नियमेन निवृत्तिः क्रियमाणा सन्नन्तसमुदायावयवत्वेन धर्मेण तुल्यजातीयस्याधीषिषती-

उ.] स्वरसाद्भाष्ये पक्षान्तरमित्याह–**अत्र त्विति। अन्तरङ्गमिति।** यङ्निमित्तद्वित्वाश्रयत्वात्। सनः षत्वस्याऽसिद्धत्वे किं जातमित्याह–**अविनत इति** । 'अत्र त्वि'त्यारभ्य 'यथा सुषुप्सती'त्यन्तं चिन्त्यं, त्रिपाद्यां बहिरङ्गपरिभाषाया अप्रवृत्तेः । **षत्वे कृते इति** । नित्यत्वादिति भावः । धात्वाश्रयमभ्यासस्य षत्वं, तस्मिन्कृते सामान्यनियमपक्षे न प्राप्नोतीत्यनित्यमिति बोध्यम् । **परसप्तमीति** । स्वरसतः प्राप्तत्वात् । **सन एव द्विर्वचनविधानादिति** । स्थाने द्विर्वचने इदम् । तदा हि स्थानिवत्त्वेन समुदायस्य सन्त्वं, द्विः प्रयोगे तु न दोषः । उत्तरखण्डस्य सन्त्वात् । अतएवाऽऽटिटदित्यादौ उत्तरखण्डे णिलोप इति बोध्यम् । एवञ्च स्थाने द्विर्वचनवादिनः शङ्का, 'नैषे'त्याद्येकदेशिन उत्तरम् । 'सन्यङन्तं ही'त्यस्य सन्यङन्तावयवैकाच इत्यर्थः । तथा च सर्वत्र सनवयवसहितस्य सन एव वा स्थाने द्विर्वचनोक्तेः षण्परत्वमभ्यासस्याऽसम्भवति भावः । तदाह–**समुदाय एवेति** । भाष्ये **सत्सप्तमीति** । 'षणि सति षण्यन्तसमुदायावयवस्य चेत्षत्वं तदा स्तौतिण्योरेवे'ति सूत्रार्थः । तदाह–**षणन्तसमुदायावयवत्वेन धर्मेणेति** । 'अन्य-

स्थादिष्वभ्यासेन चाभ्यासस्य ।८।३।६४।

किमर्थमिदमुच्यते ? ॥ * ॥ स्थादिष्वभ्यासवचनं नियमार्थम् ॥ * ॥ नियमार्थोऽयमारम्भः–'स्थादिष्वभ्यासस्य यथा स्यादिह मा भूत्–अभिसुसूषति ॥ अथ किमर्थमभ्यासेन चेत्युच्यते ?॥ ॥*॥ तद्व्यवाये चाषोपदेशार्थम् ॥ * ॥ तद्व्यवायेऽभ्यासव्यवाये चाऽषोपदेशस्यापि यथा स्यात् । अभिषिषेणयिषति ॥ * ॥ अवर्णान्ताभ्यासार्थं षणिप्रतिषेधार्थं च ॥ * ॥ अवर्णान्ताभ्यासार्थं तावत्–अभितष्ठौ । षणिप्रतिषेधार्थम्–अभिषिषिक्षति ॥

उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ।८।३।६५ ।

प्र.] त्यादावपि स्यादित्यभ्यासग्रहणम्। यदि च सन्प्रदेशेषु परसप्तमी स्यात्तदा सन्यत इतीत्वमधीषिषतीत्यत्र न स्यात्समुदायस्य सन्रूपत्वात्पौर्वापर्याऽभावात् ।

स्थादिष्वभ्यासेन चाभ्यासस्य । अभिसुसूषतीति । 'षू प्ररणे'। सन्। 'सनिग्रहगुहोश्चे'तीट्प्रतिषेधः । अत्र धातुसकारस्य 'स्तौतिण्यो'रिति नियमात्षत्वाऽभावः। अभ्याससकारस्य त्वस्मान्नियमात् । **अभिषिषेणयिषतीति ।** अव्युत्पन्नः सेनाशब्दः । अथ वा सहेनेन सेना, 'सहस्य सः संज्ञाया'मिति सादेशः । यदा तु'कृवृजॄषी'ति सिनोतेर्नप्रत्ययेन सेनाशब्दो व्युत्पाद्यते तदाऽस्त्येव षोपदेशत्वम्।

उ.] विल्वेने'ति त्वपपाठः । **सर्वत्रैव सनीति ।** सत्सप्तम्याश्रयणीयेतीहापि तदाश्रयणे न दोष इत्याह—**यदि च सन्प्रदेशेष्विति ।** सनि सति योऽभ्यासः प्रत्यासत्त्या सनन्तत्वनिमित्तक इत्यर्थः । अतएव पापचिषत इत्यादौ न दोषः । 'द्विःप्रयोग'इति सिद्धान्ते तु परसप्तमीपक्षेऽपीदं फलं बोध्यम् । 'सन्यत'इत्यादौ च न दोष इति तत्त्वम् ।

स्थादिष्व । भाष्ये–**किमर्थमिति ।** अभ्यासस्योपसर्गात्सुनोतीत्यादिना सिद्धेरिति भावः । न चाऽभ्यासस्य नैरर्थक्यात्कथं तेन सिद्धिरित्यस्य विध्यर्थत्वमेवोचितं । सुनोतीत्यादीनां यः सकार इत्यत्रावयवत्वमिव तत्सम्बन्ध्यवयवत्वस्यापि षष्ठ्यर्थत्वेनाऽदोषात् । **षू प्रेरण इति ।** अस्यैव उत्तरसूत्रेण प्राप्तेः । दैवादिकाऽदादिकयोस्तु सुवतीति निर्देशात्षत्वाऽप्राप्तेः । **अत्रेति ।** 'आदेशप्रत्यययो'रिति प्राप्तिः । **धातुसकारस्येति ।** उत्तरखण्डस्यैव धातुत्वमिति भावः । **अथ किमर्थमिति ।** 'आदेशप्रत्यययो'रित्यनेनैव सिद्धेरिदं किमर्थमिति प्रश्नः । **तदास्त्येवेति ।** एवञ्च नेदं प्रयोजनमिति भावः । वस्तुत 'उणादयोऽव्युत्पन्ना एवे'ति पाणिनीयमतेनेदं भाष्यम् । भाष्ये—**षणिप्रतिषेधार्थमिति ।** न च 'उपसर्गा'दित्यस्य बहिरङ्गत्वं, त्रिपाद्यां बहिरङ्गपरिभाषाया अप्रवृत्तेः । [स्थादिष्व]।

॥ * ॥ उपसर्गात्षत्वे निस उपसङ्ख्यानमनिणन्तत्वात् ॥ * ॥ **उपसर्गात्षत्वे निस उपसङ्ख्यानं कर्तव्यम्** । **निष्षुणोति** । **निष्षिञ्चति ॥ किं पुनः कारणं न सिध्यति ?** ॥ **'अनिणन्तत्वात्'** । **इणन्तादुपसर्गात्षत्वमुच्यते न च निसिणन्तः** ॥ * ॥ न वा वर्णाश्रयत्वात् षत्वस्य तद्विशेषक उपसर्गो धातुश्च ॥*॥ **न वा वक्तव्यम् ॥ किं कारणम् ?** । **'वर्णाश्रयत्वात् षत्वस्य'** । **वर्णाश्रयं षत्वम्** । **'तद्विशेषक उपसर्गो धातुश्च'** । **नैवं विज्ञायते–'इणन्तादुपसर्गा'दिति ॥ कथं तर्हि ?** ॥ **'इण उत्तरस्य सकारस्य, स चेदिणुपसर्गस्य', 'स चेत्सकारस्सुनोत्यादीना'मिति । तत्र 'शर्व्यवाये'इत्येव सिद्धम् ॥**

प्र.] **उपसर्गात्** । **अनिणन्तत्वादिति** । इण्ग्रहणेन प्रकृतेनोपसर्गो विशेष्यत इति तदन्तविधिनेणन्तादुपसर्गात्षत्वेन भाव्यम् । **न वेति** । उपसर्गेणेण्विशेष्यत इति तदन्तविध्यभावः । शर्व्यवायश्चाश्रित इति सिद्धं षत्वम् । **वर्णाश्रयत्वादिति** । वर्णाविवर्णसकारावाश्रयो यस्य तद्वर्णाश्रयम् । **यद्येवमिति** । यद्युपसर्गेणेण्विशेष्यते न तु सुनोत्यादयस्तदाऽतिप्रसङ्गः । **सुनोत्यादिभिरिति** । सुनोत्यादिभिः सकारो न विशेष्यते, अपि तूपसर्गः । सुनोत्याद्युपसर्गस्थाच्चेणः **परः** सकारः सामर्थ्यात्सुनोत्याद्यवयव एव भवति । उपसर्गस्थस्य तु सकारस्याऽपदान्तस्येत्यधिकारात्षत्वस्याऽप्रवर्तनम् । ननु चोपसर्गादिति पञ्चमीनिर्देशात्कथमिण्विशेष्यते ? । तात्स्थ्यात्ताच्छब्द्यं भविष्यतीत्यदोषः । सुनोत्यादीनां य उपसर्गस्तत्स्थादिणः परस्य सकारस्य षत्वे विज्ञायमाने न कश्चिद्दोषः । **सुनोत्यादीनां षत्व इति** । यथा 'विसेचक'इत्यत्र गमेरुपसर्गो विशब्दो न सिचेरिति

उ.]**उपसर्गात्सुनो** । भाष्ये–**निस इति** । निरोऽपि विसर्गे 'वा शरी'ति कृतसत्वस्य प्रयोगस्थस्याऽनुकरणं, दुर्दुसोस्तूपसर्गत्वप्रतिषेध एवेति भावः । **इण्ग्रहणेनेति** । श्रुतस्य विशेष्यताया न्याय्यत्वादिति भावः । **उपसर्गेणेति** । लक्ष्यानुरोधादिति भावः । 'उपसर्गा'दिति तत्स्थलाक्षणिकम् । **वर्णाविति** । पौर्वापर्यमापन्नावित्यर्थः । नन्वेवं सकारस्तैर्न विशेषितः स्यात् । एवञ्चोपसर्गस्थसस्यापि 'निरषिच'दित्यादौ स्यादत आह–**सामर्थ्यादिति** । तत्र रुत्वं बाधकमिति भावः । युक्त्यन्तरमप्याह–**उपसर्गस्थस्येति** । **ननु चेति** । षष्ठीनिर्देशे हि तदुपपत्तिः । **तात्स्थ्यादिति** । इण्रूपोपसर्गाऽभावेन लक्षणेति भावः । **यथा विसेचक इति** । सुनोत्यादीनामर्थद्वारा सम्बन्धी य उपसर्गस्तत्स्थेणः परस्य सस्य सुनोत्याद्यवयवस्य षत्वमित्यर्थसत्त्वादिति भावः । भाष्ये–आधिक्यमर्थतो विवक्षितं **न**

यद्येवं धातूपसर्गयोरभिसम्बन्धोऽकृतो भवति ॥ तत्र को दोषः ? ॥ इहापि प्राप्नोति—विगताः सेचका[1] अस्माद्ग्रामात्—विसेचको ग्रामः ॥ धातूपसर्गयोश्चाऽभिसम्बन्धः कृतः ॥ कथम् ? ॥ सुनोत्यादिभिरत्रोपसर्गं विशेषयिष्यामः 'सुनोत्यादीनां य उपसर्गस्तस्य [उपसर्गस्य[2]] य इ'णिति ॥ * ॥ सुनोत्यादीनां षत्वे ण्यन्तस्योपसङ्ख्यानमधिकत्वात् ॥ * ॥ **सुनोत्यादीनां षत्वे ण्यन्तस्योपसङ्ख्यानं कर्तव्यम् । अभिषावयति ॥** किं कारणं[3] [न सिध्यति[2] ?] । **'अधिकत्वात्' । व्यतिरिक्तः सुनोत्यादिरिति कृत्वोपसर्गात्सुनोत्यादीनामिति षत्वं न प्राप्नोति ॥ * ॥** न वाऽवयवस्याऽनन्यत्वात् ॥ * ॥ **न वा वक्तव्यम् ॥ किं कारणम् ? ॥** 'अवयवस्यानन्यत्वात्' । अवयवोत्राऽनन्यः [इति[2]] ॥ * ॥ नामधातोस्तु प्रतिषेधः ॥ * ॥ **नामधातोस्तु प्रतिषेधो वक्तव्यः । सावकमिच्छत्यभिसावकीयति । परिसावकीयति[4] ॥ * ॥** न वाऽनुपसर्गत्वात् ॥*॥ **न वा वक्तव्यः ॥ किं कारणम् ? ॥** 'अनुपसर्गत्वात्' । **यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न चाऽत्र सुनोतिं प्रति क्रियायोगः ॥ किं तर्हि ? ॥ सावकीयतिं प्रति ॥ इहापि तर्हि न प्राप्नोति—** अभिषावयति । अत्रापि न[2] **सुनोतिं प्रति क्रियायोगः ॥ किं तर्हि ? ॥ सावयतिं प्रति ॥ सुनोतिं** प्रत्यत्र क्रियायोगः ॥ **कथम् ? ॥** नासावेवं प्रेष्यते—

प्र.]षत्वं न भवत्येवं ण्यन्तस्याभिषावयतीत्यादावभ्यादिरुपसर्ग इति षत्वाऽप्रसङ्गः । 'हेतुमति चे'त्यत्र प्रत्ययार्थविशेषणपक्षेऽर्थाधिक्यादधिकत्वमुच्यते । **नवेति ।** ण्यन्तस्य योऽवयवो णिच्प्रकृतिस्तस्याऽनन्यत्वात्तदपेक्षत्वादुपसर्गत्वस्य सिद्धं षत्वम् । **नामधातोरिति ।** तत्रापि स एव सुनोत्यादिरिति षत्वप्रसङ्गः । **नवेति ।** अभिः क्यजर्थस्येच्छाया विशेषणत्वात्तदुपसर्गो न सुनोतेः । सुनोत्युपसर्गत्वे त्वभिषावकमिच्छति अभिषावकीयतीति भवत्येव षत्वम् ।

उ.]तु शब्दतः । तदाधिक्यस्य प्रकृते हेतुत्वाऽयोगादित्याह—**हेतुमति चेत्यत्रेति । प्रत्ययार्थविशेषणपक्षे इति ।** प्रयोजकव्यापारस्य प्रत्ययार्थत्वपक्षे इत्यर्थः । स एव च तत्र सिद्धान्त इति भावः । तदाह-भाष्ये-**व्यतिरिक्तः सुनोत्यादिरिति ।** अतिरिक्तेन प्रयोजकव्यापारेण विशिष्ट इति प्रधानतया तस्यैवाभ्यादिरुपसर्ग इति सुनोत्युपसर्गाऽभावात्षत्वं न प्राप्नोतीत्यर्थः । **तस्यानन्यत्वादिति[2] ।** 'ण्यर्थान्वये न स्या'दिति पूर्वपक्षे **इष्टापत्त्या** इदमुत्तरमिति बोध्यम् । **भवत्येवेति ।** प्राग्वदेवेमे शङ्कोत्तरे विपर्यस्ताशयतया बोध्ये ।

'सुन्वभी'ति ॥ किं तर्हि ?॥ उपसर्गविशिष्टामसौ क्रियां प्रेष्यते–अभिषुणिवति ॥

स्तम्भेः ॥८।३।६७॥

अप्रतेरिति वर्तते उताहो निवृत्तम् ? ॥ 'निवृत्त'मित्याह ॥ कथं ज्ञायते ? ॥ योगविभागकरणसामर्थ्यात् । इतरथा हि 'सदिस्तम्भ्योरप्रते'-रित्येव ब्रूयात् ॥ अस्त्यन्यद्योगविभागकरणे प्रयोजनम् ॥ किम् ?॥ 'अवाच्चालम्बनाविदूर्ययो'रिति वक्ष्यति तत्स्तम्भेरेव यथा स्यात्सदेर्मा भूदिति ॥ नैतदस्ति प्रयोजनम् । एकयोगेऽपि सति यस्यालम्बनाविदूर्ये स्तस्तस्य भविष्यति ॥ कस्य चाऽऽलम्बनाविदूर्ये स्तः ? ॥ स्तम्भेरेव ॥ [स्तम्भेः] ॥

अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु ॥८।३॥

अथ यः प्राण्यप्राणी च कथं तत्र भवितव्यम्, अनुष्यन्देते मत्स्योदके इति, आहो स्विदनुस्यन्देते मत्स्योदके इति ? ॥ यदि तावदप्राणी विधिनाश्रीयते, अस्त्यत्राप्राणीति कृत्वा भवितव्यं षत्वेन, अथ प्राणी प्रतिषेधेनाश्रीयते, अस्त्यत्र प्राणीति कृत्वा भवितव्यं प्रतिषेधेन ॥

किं पुनरत्राऽर्थसतत्त्वं ? ॥ देवा एतज्ज्ञातुमर्हन्ति ॥

नासावेवमिति । यदा ण्यर्थस्याऽभिर्विशेषणत्वात्तदुपसर्गस्तदा नास्ति षत्वं, प्र.]यदा तूपसर्गविशिष्टायां क्रियायां प्रयोज्यो नियोज्यते तदा प्रतिबन्धकाऽभावात्षत्वं प्रवर्तत एवेत्यर्थः । सुनु अभीति । नायं लौकिकप्रयोगः, केवलस्योपसर्गस्य प्रयोगाऽभावात्, किन्तर्हि ?, सुनोतिसंबन्धाऽभावप्रदर्शनाय कल्पितः । प्रयोजकव्यापारेणाऽभेः संबन्धो न सुनोतिनेति ह्यनेन प्रतिपाद्यते ॥

अनुवि । देवा इति । पण्डिताः पर्युदासं मन्यन्ते, संभवत्येकवाक्यत्वे

उ.] नासावेव'मित्यादिना षत्वाषत्वप्रयोगस्य विषयविभागः प्रदर्श्यत इत्याह–यदेति । सुनोतिसम्बन्धाऽभावप्रदर्शनमेवोपपादयति—प्रयोजकेति । परे तु 'नासावेव'मिति भाष्येणोपसर्गाणां स्वभावात्प्रकृत्यर्थविशेषणत्वमेव न ण्यर्थविशेषणत्वमिति अतोऽभिसावयतीत्यसङ्गत एव प्रयोगः । अत एव वचनारम्भण समफलतेत्याहुः । [उपसर्गात्सुनोति] ।

अनुवि । 'किं पुनरत्राऽर्थसतत्त्व'मिति भाष्ये पाठः । 'सतत्त्व'शब्दस्तत्त्वपर्यायः । पर्युदासमिति । तत्पक्षेऽपि तस्यैव यत्र सत्ता तत्रैवेदमिति सर्वथाऽत्र षत्वाऽभाव एव न्याय्यः । प्रतिषेधपक्षे समासेऽवधारणाऽलाभादित्यन्ये ।

परेश्च ॥८।२।७४॥

अथाऽनिष्ठायामिति वर्तते उताहो निवृत्तम् ? ॥ 'निवृत्त'मित्याह ॥ कथं ज्ञायते ? ॥ योगविभागकरणसामर्थ्यात् । इतरथा हि 'विपरिभ्यां च स्कन्देरनिष्ठाया'मित्येव ब्रूयात् ॥ [परेश्च] ॥

इणः षीध्वंलुङ्लिटां धोऽङ्गात् ॥८।३।७८॥ विभाषेटः ॥८।३।७९॥

इण्ग्रहणं किमर्थम् ? ॥ * ॥ इण्ग्रहणं ढत्वे कवर्गनिवृत्त्यर्थम् ॥ * ॥ इण्ग्रहणं क्रियते ॥ [किं प्रयोजनम् ? ॥ 'ढत्वे कवर्गनिवृत्त्यर्थं] ॥ कवर्गाड्ढत्वं मा भूत् पक्षीध्वम् यक्षीध्वम् ॥ किं पुनरिदमिण्ग्रहणं प्रत्ययविशेषणम्—'इण उत्तरेषां षीध्वंलुङ्लिटां यो धकार' इति, आहो स्विद्धकारविशेषणम्—'इणः उत्तरस्य धकारस्य, स चेत्षीध्वंलुङ्लिटान्धकार'इति ॥ कश्चात्र विशेषः ? ॥ * ॥ तत्र प्रत्ययपरत्वे इटो लिटि ढत्वं परादित्वात् ॥ * ॥ तत्र प्रत्ययपरत्वे इटो लिटि ढत्वं न प्राप्नोति । लुलुविढ्वे लुलुविध्व इति ॥ किं कारणम् ? ॥ 'परादित्वात्' । इट् परादिः ॥ वचनाद्भविष्यति ॥ अस्ति वचने प्रयोजनम् ॥ किम् ? ॥ अलविढ्वम् अलविध्वम् ॥ अस्तु तर्हि धकार-

प्र.] वाक्यभेदाश्रयणस्याऽयुक्तत्वात् । प्रसज्यप्रतिषेधे हि वाक्यभेदोऽवश्य भावी ॥

इणः षी । इण्ग्रहणमिति । 'इण्को'रित्यत इण्ग्रहणमनुवर्तत एवेति प्रश्नः ॥ कवर्गनिवृत्त्यर्थमिति । पूर्वयोगेषु द्वयोरनुवर्तनात्केवलस्येण इहाऽनुवृत्तिर्दुर्लभा । किं पुनरिति । वार्तिकानुसारेण 'इङ्ग्रहण'मिति पाठो युक्तः । 'इण्ग्रहण'मिति तु भाष्ये प्रायेण पाठः । किं षीध्वमादयो विशेषणेन प्राक्संबध्यन्ते पश्चात्प्रधानेन धकारेणाऽथ धकार एव विशेषणद्वयेन संबध्यतइति प्रश्नः । प्रत्ययपरत्वे इति । इटः परेषां षीध्वंलुङ्लिटां धकारस्येति विज्ञायमान इटो लिङ्क्तत्वात्पौर्वापर्याऽयोगाद्विकल्पाऽप्रसिद्धिः । लिड्ग्रहणं चोपलक्षणं, षीध्वमोऽपि इटा पौर्वापर्याऽयोगात् । वचनादिति । लिङ्ग्रहणाऽनुवृत्तिसामर्थ्यादित्यर्थः । अस्तिवचन इति । समुदायानुवृत्तौ क्वचिदेकदेशे प्रवृत्तं कार्यं समुदाये प्रवृत्तं भवतीत्यर्थः ।

उ.] इणः षीध्वं । प्रायेण पाठ इति । स तु न युक्त इत्यर्थः । अतएव 'विभाषेट' इत्यस्य ग्रहणं प्राक्कृतम् । पक्षद्वयोपपत्तिमाह—किमिति । 'गुणः कृतात्मसंस्कार'इति न्याय आद्यपक्षबीजम् । अथेति । महत उपकारस्याऽदर्शनादुभयोरपि प्रधानसम्बन्ध

विशेषणम् ॥*॥ धकारपरत्वे षीध्वम्यनन्तरत्वादिटो विभाषाऽभावः ॥*॥ **धकारपरत्वे षीध्वम्यनन्तरत्वादिटो विभाषा न प्राप्नोति । लविषीध्वं लविषीढ्वम् ॥ वचनाद्भविष्यति ॥ अस्ति वचने प्रयोजनम् ॥ किम् ?॥ लुलुविढ्वे लुलुविध्वे इति** ॥ * ॥ इण्ग्रहणस्य चाऽविशेषणत्वात् ष्यादिमात्रे ढत्वप्रसङ्गः ॥ * ॥ **इण्ग्रहस्य चाऽविशेषणत्वात् ष्यादिमात्रे ढत्वं प्राप्नोति । पक्षीध्वं यक्षीध्वमिति ॥ नैष दोषः । अङ्गादिति वक्ष्यामि** ॥ अङ्गग्रहणाच्च दोषः ॥ * ॥ **अङ्गग्रहणाच्च दोषो भवति । इह न प्राप्नोति–उपदिदीयिध्वे उपदिदीयिढ्वे इति । यो ह्यत्राऽङ्गाऽन्त्य इण्न तस्मादुत्तर इट् । यस्मा-**

प्र.] धकारपरत्वे इति । 'इटः परस्य धकारस्ये'ति व्याख्याने षीशब्देन व्यवधानात्पाक्षिकढत्वाऽप्रसङ्गः । **वचनादिति ।** षीध्वमोऽनुवृत्तौ येन नाऽव्यवधानमाश्रीयत इत्यर्थः । **'अस्ति वचने प्रयोजनं, किं लुलुविढ्वे लुलुविध्वे'**इत्यस्याऽनन्तर**'मिण्ग्रहणस्ये'**ति–युक्तः पाठः । क्वचित्तु **'नैष दोषः इण उत्तरस्ये'**त्यादिपठ्यते, तदयुक्तम् । ग्रन्थसङ्गत्यभावात् । इण्ग्रहणेन यदा धकारो विशेष्यते न तु प्रत्ययस्तदा षीध्वमो धकार इणः परो न भवति, षीशब्देन व्यवधानात् । ईकारेण षीशब्दावयवेन व्यभिचाराऽभावाद्धकारस्य विशेषणाऽयोगः । **अङ्गादिति वक्ष्यामीति ।** 'इणन्तादङ्गादुत्तरस्य धकारस्य षीध्वमोऽवयवस्य ढत्वं भवती'त्यर्थः । तत्र 'येन नाव्यवधान'मिति 'च्योषीढ्व'मित्यादौ ढत्वं भवति, 'पक्षीध्व'मित्यादौत्वङ्गस्याऽनिणन्तत्वाड्ढत्वाऽभावः । **उपदिदीयिढ्व इति ।** युटः

उ.] एव न्याय्य इति भावः । **लिङ्ग्रहणानुवृत्तीति ।** इदमपि षीध्वमुपलक्षणं बोध्यम् । **क्वचिदेकदेश इति ।** लुङि सिच इडिधानेन पौर्वापर्यं युक्तमित्यर्थः । **षीशब्देनेति ।** लुङ्लिटोस्त्वव्यवधानाड्ढत्वं प्रवर्तते इति भावः । **सङ्गत्यभावादिति ।** षीध्वमि ढत्वाऽप्राप्तौ चोदितायां तत्परिहारत्वेनाऽयं ग्रन्थो न सङ्गत इति भावः । **इण्ग्रहणेनेति ।** यदि 'विभाषेट'इत्यत्रेङ्ग्रहणेन ध्वो विशेष्यते तदा 'इणः' षीध्वमित्यत्रेण्ग्रहणेनापि ध एव विशेष्येत, तुल्यप्रधानत्वात्, ततश्च षाध्वमि दोष इत्यर्थः । ननु षीध्वंशब्दावयवेकारमादाय इणः परत्वमस्त्येवेत्यत आह–**ईकारेणेति ।** एवञ्च षीध्वमि इण इत्यस्य धकाराऽविशेषणत्वेन सर्वत्र षीध्वमो धस्य ढत्वप्रसङ्ग इति भावः । तदुक्तं–भाष्ये **ष्यादिमात्रे इति । युटा व्यवधानादिति ।** समुदायभक्तो युट् तमेव न व्यवदध्यात्, इटं तु व्यवदधात्येवेति

चोत्तर इड्ढाऽऽसावङ्गान्त्य इति ॥ अर्थोऽस्ति तथाऽस्तु ॥ अस्तु तावत्थकारस्य विशेषणम् ॥ ननु चोक्तं— तत्र अन्तत्परत्वे इटो लिटि ढत्वं परादित्वात् लुलुविध्वे लुलुविढ्वे इति ॥ वचनाद्भविष्यति ॥ ननु चोक्तमस्ति वचने प्रयोजनं ॥ किम्?॥ अलविढ्वम् अलविध्वमिति ॥ यदेतस्मिन् योगे लिड्ग्रहणं तदनवकाशं तस्याऽनवकाशत्वाद्वचनाद्भविष्यति ॥ अथ वा पुनरस्तु—धकारविशेषणमिति ॥ ननु चोक्तं 'धकारविशेषणत्वे षीध्वम्यननन्तरत्वादिटो विभाषाऽभावो लविषीध्वं लविषीढ्वं' इति ॥ वचनाद्भविष्यति ॥ ननु चोक्तमस्ति वचने प्रयोजनं, किं, लुलुविध्वे लुलुविढ्वे इति ॥ यदेतस्मिन् योगे षीध्वंग्रहणं तदनवकाशं, तस्याऽनवकाशत्वाद्वचनाद्भविष्यति ॥ यदप्युच्यते—'इण्ग्रहणस्य चाऽविशेषणत्वात् ष्यादिमात्रे ढत्वप्रसङ्ग' इति॥ अङ्गादिति वक्ष्यामि॥ ननु चोक्तं—'मङ्गग्रहणाच्च दोष' इति ॥ पूर्वस्मिन् योगे यदङ्गग्रहणं तदुत्तरत्र निवृत्तम् । अथ वा पूर्वस्मिन् योगे इण्ग्रहणं प्रत्ययविशेषणमुत्तरत्र धकारविशेषणम् ॥

अग्नेः स्तुत्स्तोमसोमाः ८।३।८२ ॥

॥ * ॥ अग्नेर्दीर्घात्सोमस्य ॥ * ॥ अग्नेर्दीर्घात्सोमस्येति वक्तव्यम् । अग्नीषोमौ ॥ * ॥ इतरथा ह्यनिष्टप्रसङ्गः ॥ * ॥ इतरथा ह्यनिष्टं प्रसज्येत ।

प्र.] परादित्वादिणन्तादङ्गात्परत्वं न भवति, युटा व्यवधानात् । **यदेतस्मिन्निति ।** सर्वेषामवयवानामनुवर्तनसामर्थ्यात्कार्ययोग इति भावः । **पूर्वस्मिन्निति ।** अङ्गग्रहणाऽननुवृत्तौ युट एवेण उत्तर इडिति ढत्वविकल्पः सिध्यति । **अथ वेति ।** 'इणः परो यो धकार इटश्च तस्य षीध्वंलुङ्लिटां संबन्धिनो विभाषा मूर्द्धन्य' इत्यर्थः । तत्र 'येन नाव्यवधान'मिति षीशब्देन व्यवधानमाश्रीयते, उपदिदीयिढ्वे इत्यत्र यकारादेवेणः परो धकार इति सिद्धो ढत्वविकल्पः ।

अग्नेः स्तुत्स्तोमसोमाः । अग्नेर्दीर्घादिति । देवताद्वन्द्वे षत्वं भवतीत्यर्थः ।

उ.] भावः । एवञ्च 'विभाषेट' इत्यत्र दोष इति तात्पर्यम् । **सर्वेषामिति ।** अनुवृत्तिसामर्थ्यात्स्वावयवेनाऽपि पौर्वापर्यमाश्रीयते इत्यर्थः । **युट एवेति ।** अत्र पक्षे 'इण उत्तरो य इट ततः परस्य धकारस्य षीध्वादिसम्बन्धिनो मूर्धन्य' इत्यर्थः । **इणः परो यो धकार इटश्चेति ।** तत्रेटोऽनन्तरम्, इणस्त्विटा व्यवहित इति सामर्थ्यात्सिद्ध्यतीत्यर्थः । षीध्वमि—इटोऽप्यनन्तरो नास्तीत्यनुवृत्तिसामर्थ्येन नाव्यवधानमाश्रीयत इत्याह—**तत्रेति ।**

अग्नेः स्तुत्स्तो । देवताद्वन्द्व इति । 'ईदग्नेः सोमे'ति तत्रैव ईकारविधानादिति

अग्निसोमौ माणवकाविति ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । 'गौणमुख्ययोर्मुख्ये सम्प्रतिपत्तिः'[1] । तद्यथा 'गौरनुबन्ध्योऽजोऽग्नीषोमीय'[2]इति न वाहीकोऽनुबध्यते ॥ कथं तर्हि वाहीके वृद्ध्यात्वे भवतो—गौस्तिष्ठति गामानयेति ? ॥ अर्थाश्रय एतदेवं भवति । यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति ॥ शब्दाश्रये च वृद्ध्यात्वे ॥ [अग्नेःस्तुत्स्तोमसोमाः] ।

प्र.] गौणमुख्ययोरिति । लौकिक एवाऽयं न्यायः शास्त्रे आश्रीयते 'स्वं रूपं शब्दस्ये'ति रूपग्रहणादर्थवद्रूपमाश्रीयते । स चार्थो मुख्य एव गृह्यते न तु गौणः । तत्र प्रसिद्ध्यप्रसिद्धिभ्यां मुख्यगौणव्यवस्थेति माणवके संज्ञात्वेन विनियुक्तावग्निसोमशब्दौ गौणार्थाविति षत्वाऽभावः । शब्दाश्रये चेति । प्रातिपदिकस्य वृद्ध्यात्वे, प्रातिपदिकन्तु न लौकिकेनार्थेनाऽर्थवत्, किं त्वन्वयव्यतिरेकाभ्यां कल्पिताभ्यां कल्पितेन । तस्यां चावस्थायां लौकिकार्थत्वाऽभावाद्गौणमुख्याभावाद्रूपमात्राश्रयं कार्यं प्रवर्तते । तस्मिन्प्रवृत्ते मुख्येऽर्थे गौणे वाऽर्थे[3] प्रयोगः । अथ वा शब्दो

उ.] भावः । भाष्ये-अग्निसोमाविति । तन्नामानावित्यर्थः । यद्वाऽयं माणवकोऽग्निरयं सोम इति केनचिदुक्ते तयोर्द्वन्द्वप्रयोगेण किञ्चित्कार्यं बोधयितुं यदा 'अग्निसोमौ भोजये'ति प्रयुज्यते तदेदमुदाहरणम । रूपग्रहणादिति । 'स्व'मित्येवान्तरङ्गत्वादिहेतुभी रूपपरिग्रहे सिद्धे रूपग्रहणं रूपवदर्थपरिग्रहार्थम् । स चार्थ इति । शीघ्रोपस्थितिकत्वादित्यर्थः । ननु यदि सादृश्यादग्निषोमशब्दस्यान्यत्र वृत्तिस्तदान्तरङ्गत्वात्स्वार्थमादाय षत्वप्रवृत्तिरस्त्येव । संज्ञाशब्दयोर्द्वन्द्वे तु कथं गौणत्वमत आह-तत्र प्रसिद्धीति । ननु 'गोत' इत्यादौ गोशब्दादेः प्रातिपदिकस्यान्वयव्यतिरेकाभ्यां कल्पितार्थवत्त्वसत्त्वात् कुतो न गौणमुख्यन्यायावतार इत्यत आह-प्रातिपदिकस्येति । तस्याञ्चेति । शब्दान्तरसन्निधानाद्धि गौणार्थप्रतिपत्तिः । न च तत्प्रातिपदिकस्य, केवलस्य लोकेऽप्रयोगादिति भावः । गौणमुख्यत्वं लोकव्यवहारगम्यमिति लौकिकाऽर्थनिष्ठमेव तत्, नत्वन्वयव्यतिरेककल्पितार्थनिष्ठमिति तात्पर्यम् । वस्तुतस्त्वेवं सति 'महद्भूत'इत्यादिघटकमहदादीनामपि शास्त्रीयप्रक्रियायां कल्पितैवार्थवत्तेति तत्रापि न्यायाऽप्रवृत्त्यापत्तिः । तस्मात्कल्पितार्थवत्त्वमादायाऽर्थवत्परिभाषाया यथा प्रकृतिप्रत्ययविषये प्रवृत्तिस्तथा कल्पितगौणमुख्यत्वमादाय गौणमुख्यन्यायस्याऽपि प्रवृत्तिरावश्यकीति चिन्त्यमेतत् । गामित्यादौ यथात्वप्रवृत्तिस्तथा ओत्सूत्रे निरूपितम् । इत एवाऽस्वरसात् -'गोत्वादियोगो वाहीके निमित्तात्कैश्चिदिष्यते । अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थित'इति रीत्या प्रातिपदिककार्येषु तन्न्यायाऽप्रवृत्ति

मातुः पितुर्भ्यामन्यतरस्याम् । ८।३।८५ ॥

॥*॥ सान्ताभ्यां च ॥*॥ **सान्ताभ्यां चेति वक्तव्यम् । इहापि यथा स्यात्–मातुःष्वसा मातुःस्वसा । पितुःष्वसा पितुस्वसा [इति]** ॥*॥ मातुः पितुरिति सान्तग्रहणानर्थक्यमेकदेशविकृतस्यानन्यत्वात् ॥ * ॥ **मातुः पितुरिति सान्तग्रहणमनर्थकम् ॥ किं कारणम् ? ॥ 'एकदेशविकृतस्यानन्यत्वात्' ॥ 'एकदेशविकृतमनन्यवद्भवती'ति सान्तस्यापि भविष्यति ॥**

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । ८।३।८७ ॥

अस्तिग्रहणं किमर्थम् ? ॥ इह मा भूत्–अनुसृतं विसृतमिति ॥ नैतदस्ति प्रयोजनं-यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो न चैतं

प्र.] न कदाचित्स्वार्थपरित्यागेनाऽर्थान्तरे प्रवर्तते, अर्थस्त्वर्थान्तरे समारोपितो यदा शब्दप्रवृत्तिनिमित्तं भवति तदा गौणव्यवहारः। तत्र प्रातिपदिकं स्वार्थे एव वर्तमानं वृद्ध्याख्ये प्रतिपद्यते, पश्चात्तु पदार्थान्तरारोपितस्वार्थस्य गौणत्वमिति पदाश्रयेष्वेव कार्येषु गौणमुख्यव्यवस्थाश्रयणम् । [**अग्नेःस्तुत्**] ॥

मातुः। सान्ताभ्यामिति । रेफान्तयोर्निर्देशान्न प्राप्नोति । **एकदेश[विकृत]स्येति** । स्वसृशब्दे परतो नास्ति रेफस्य श्रवणं, 'वा शरी'ति पक्षे विसर्जनीयस्य विसर्जनीयविधानात् , पक्षे 'विसर्जनीयस्य स'इति सकारविधानात् । तस्माद्रेफनिर्देशस्तद्विकारप्रतिपत्त्यर्थः ॥ [**मातुःपितुर्भ्याम्**] ॥

उपस । अस्तिग्रहणमिति । अस्तिसकार एवाऽकारे लुप्ते क्रियावाचित्वा-

---

उ.] दर्शयति–**अथवेति । न कदाचिदिति** । शब्दार्थसम्बन्धाऽनित्यत्वप्रसङ्गादिति भावः । **पदान्तरारोपितेति** । पदान्तरसन्निधानेनाऽऽरोपितस्वार्थस्येत्यर्थः । 'पदार्थान्तरे'ति पाठे पदार्थान्तर आरोपितस्वार्थस्येत्यर्थः । **स्वार्थः**–स्वप्रवृत्तिनिमित्तम् । [**अग्नेःस्तुत्**] ॥

मातुःपितुर्भ्यां । रेफान्तयोरिति । उत्तरपदे रेफान्तत्वं स्पष्टं, पूर्वपदेऽपि तत्साहचर्यात्तत्त्वमेव, विसर्गस्तु लाक्षणिकः । तत्र रेफान्तस्य स्वसृशब्दे परे क्वाप्यप्रयोगात्सामर्थ्येन साक्षात्तत्स्थानिकविकारोपलक्षणत्वेन विसर्गान्त एव स्यात् , न तु विसर्गस्थानिकसाऽन्त इति वार्तिकारम्भ इति भावः । ननु रेफान्ताभ्यां परस्य षत्वे सम्भवत्येकदेशविकृतन्यायाश्रयेण सान्तग्रहणं व्यर्थमत आह–**स्वसृशब्द इति** । एवञ्च उभयत्राऽप्येकदेशविकृतन्यायेनैव सूत्रप्राप्तिरिति भावः । भाष्ये–**सान्तस्यापीति** । अपिना विसर्गान्तम् ।

उपसर्गप्रा । अस्ति सकार एवेति । सकारस्य प्रस्तुतत्वात्तदर्थान्वयिनोरेवोपसर्ग-

सकारं प्रति क्रियायोगः ॥ इहापि तर्हि न प्राप्नोति,–अभिषन्ति विषन्तीति। न ह्यस्तिः क्रियावचनः ॥ कः पुनराह 'नाऽस्तिः क्रियावचन' इति । क्रियावचनोऽस्तिः । आतश्च क्रियावचनः,–व्यत्यनुषते–'कर्तरि कर्मव्यतिहारे' इत्यनेनात्मनेपदं भवति ॥ कर्मव्यतिहारश्च कः ? ॥ क्रियाव्यतिहारः ॥ प्रादुःशब्दात्तर्हि मा भूत् ॥ प्रादुःशब्दश्च नियतविषयः कृभ्वस्तियोग एव वर्तते ॥ उपसर्गात्तर्हि स्यतेर्मा भूदिति ॥ इष्यते उपसर्गात्स्यतेः षत्वम् । आतश्चेष्यते–एवं [तर्हि[1]] ह्याह–'उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जा'मिति॥ प्रादुःशब्दात्तर्हि स्यतेर्मा[1] भूत्॥ प्रादुःशब्दश्च नियतविषयः कृभ्वस्तियोग एव वर्तते ॥ इदं तर्हि प्रयोजनमिह मा भूत्,–अनुसूतेरप्रत्ययः–[अनुसूः[1]], अनुस्वोऽपत्यमानुसेयः ॥

सुविनिर्दुर्भ्यः सुपिसूतिसमाः ।८।३।८८॥

किमर्थं स्वपेः सुपिभूतस्य ग्रहणं क्रियते ? ॥ * ॥ सुपेः षत्वं[2] स्वपेर्मा भूत् ॥ * ॥ सुपेः षत्वमुच्यते तत्स्वपेर्मा भूदिति । सुस्वप्नः[3] विस्वप्नगिति । ॥ * ॥ विसुष्वापेति केन न ॥ * ॥ विसुष्वापेत्यत्र कस्मान्न भवति ? ॥

प्र.]दुपसर्गप्रादुर्भ्यां परः संभवति नान्य इति प्रश्नः । **न ह्यस्तिरिति**। परिस्पन्दनरूपस्यैवाऽर्थस्य क्रियात्वादिति भावः । **क्रियावचन इति** । न परिस्पन्द एवैकः क्रियेति भावः । 'कर्मस्थभावकानां कर्मस्थक्रियाणा'मित्यत्र तु भावक्रिययोर्भेदेनोपादानात्परिस्पन्दलक्षणविशिष्टक्रियावृत्तिः क्रियाशब्दः, 'यत्क्रियायुक्ता' इत्यादौ तु क्रियामात्रवृत्तिरित्यविरोधः । **व्यत्यनुषत इति** । व्यत्यनुभवन्त इत्यर्थः । **प्रादुःशब्दश्चेति** । केषांचिच्छब्दानां नियतविषयत्वदर्शनात् । **अनुसूतेरिति** । अनुसूत इत्यनुसूः । 'सत्सूद्विषे'ति क्विप् । 'चतुष्पाद्भ्यो ढ'ञिति ढञ् ।'ढे लोपोऽकद्र्वा' इत्युकारलोपे कृते सकारमात्रं क्रियावाचीति षत्वप्रसङ्गः ।

सुविनिर्दु। **विस्वप्नगिति**। 'स्वपितृषोर्नजि'ङिति नजिङ्प्रत्ययः । ताच्छीलि-

---

उ.] प्रादुसोर्ग्रहणमिति भावः । **न परिस्पन्द एवेति**। किन्तु धात्वर्थमात्रमिति भावः । भूवादिसूत्रे विस्तरेणैतत्प्रतिपादितम् । **व्यत्यनुभवन्त इति** । परस्परमनुभवन्त इत्यर्थः । भाष्ये–**प्रादुःशब्दात्तर्हीति** । 'प्रादुःसृत'मित्यादाविति भावः । **नियतविषयत्वेति** । यथोक्तं भाष्ये–'समाने रक्ते वर्णे गौर्लोहितोऽश्वःशोण'इत्यादि । **[उपसर्गप्रादुर्भ्यामस्ति]**।

सुविनिर्दुर्भ्यः । ननु ताच्छीलिकानां रूढिशब्दत्वेन क्रियाप्रवृत्तिनिमित्तत्वाऽभावा-

॥ * ॥ हलादिशेषान्न[1] सुपिः ॥ * ॥ **हलादिशेषे कृते नैष सुपिर्भवति ॥ इदमिह संप्रधार्यं**[1] **हलादिशेषः क्रियतां संप्रसारणमिति; किमत्र कर्तव्यम् ?॥ परत्वाद्धलादिः शेषः** ॥ * ॥ इष्टं पूर्वं प्रसारणम्[1] ॥ * ॥ **इष्यते हलादिः शेषात्पूर्वं संप्रसारणम्** ॥ आतश्चेष्यते—एवं [तर्हि] ह्याह[2]—'अभ्यासस**म्प्रसारणं हलादिः शेषाद्विप्रतिषेधेने'ति ॥ एवं तर्हि 'स्थादिष्वभ्यासेन चाभ्या**[3]**सस्ये'त्येतस्मान्नियमान्न भविष्यति** ॥ * ॥ स्थादीनां नियमो नात्र प्राक्सितादुत्तरः[3] सुपिः ॥ * ॥ **प्राक्सितसंशब्दनात्स नियमः, उत्तरश्च सुपिः पठ्यते ॥ एवं तर्ह्यर्थवद्ग्रहणेनानर्थकस्येत्येवमेतस्य न भविष्यति** ॥*॥ अनर्थके विषुषुपुः[3] ॥*॥ **यद्यर्थवतो ग्रहणं 'विषुषुपु'रिति न सिध्यति ॥ नैष दोषः ॥ कथम् ?** ॥*॥ सुपिभूतो[4] द्विरुच्यते ॥*॥ **सुपिभूतस्य द्विर्वचनम्** ।

प्र.] केष्वपि क्व चिदस्ति क्रियाणामुपसर्गयोगः—'आगामुक'मित्यादौ। साधुकारिणि प्रत्ययविधानात् । **विसुष्वापेति** । 'लिट्यभ्यासस्योभयेषा'मिति संप्रसारणे कृतेऽकृत एव हलादिःशेषे धातूपसर्गाश्रयस्य कार्यस्याऽन्तरङ्गत्वात्षत्वप्रसङ्गः। **कृते वा** हलादिःशेषे एकदेशविकृतस्याऽनन्यत्वात्। **हलादिः शेषादिति**। संप्रसारणात्प्रागेव परत्वाद्धलादिशेषः। **इष्टं पूर्वमिति** । 'विव्याधे'त्यादिसिद्धये। **स्थादिष्विति**। स्थादीनामेवाभ्याससकारस्य षत्वं न धात्वन्तरस्येति नियमादत्र षत्वाऽभावः । **स्थादीनामिति** । स्थादीनां संबन्धी नियमो नाऽत्र प्रवर्तते । यस्मात्स्थासूत्रे प्राक्सितादिति वर्तते, तेन 'प्राक्सिताद्ये धातवस्तेषां स्थादिष्वेवाभ्यासस्य षत्व'मित्येवं नियमेन सुनोतिसुवतिस्यतय एव निवर्त्यन्ते, सुपिस्तु सितादुत्तर इति न निवर्त्यते । **अर्थवद्ग्रहण इति**। स्थाने द्विर्वचने समुदाय एवाऽर्थवानवयवयोश्चा-

---

उ.] त्कथमुपसर्गयोगोऽत आह—**ताच्छीलिकेष्विति** । 'उपसर्गा'दिति अत्रापि सम्बध्यत इति कैयटस्वरसः। 'पूर्वं धातुः साधनेने'ति पक्षे । त्रिपाद्यामन्तरङ्गपरिभाषाया अप्रवृत्तिपक्षे त्वाह—**कृते वेति । प्रागेव परत्वादिति** । अभ्यासविकारेषु बाधकानामबाधकत्वस्य च समावेशे तात्पर्यं । स च न्याय्यक्रमेणैवेति भावः । एवं च वकारस्य सम्प्रसारणेऽपि सुपिरूपाऽभाव इति तात्पर्यम्। **विव्याधेति** । परत्वाद्धलादिः शेषे यकारधकारयोर्निवृत्तौ वस्य सम्प्रसारणेऽपि रूपाऽसिद्धयेति भावः। तस्मात्पूर्वविप्रतिषेधेनोभयेषांग्रहणेन **वा** पूर्वं सम्प्रसारणं, पश्चाद्धलादिः शेष एष्टव्यः। ततश्च सुपिरूपत्वात्षत्वप्रसङ्गः। **स्यतय एवेति** स्तौतिस्तोभत्योस्तु 'शर्पूर्वाः' इति खयः शेषे षत्वप्राप्तेरेवाऽभावादिति भावः । **अवयवयो**

॥*॥ सुपेः षत्वं स्वपेर्मा भूद्विसुष्वापेति केन न।
हलादिःशेषान्न सुपिरिष्टं पूर्वं प्रसारणम् ॥ १ ॥
स्थादीनां नियमो नाऽत्र प्राक्सितादुत्तरः सुपिः।
अनर्थके विषुषुपुः सुपिभूतो द्विरुच्यते ॥ २ ॥*॥

कपिष्ठलो गोत्रे ।८।३।९१।

॥ * ॥ कपिष्ठलो गोत्रप्रकृतौ ॥ * ॥ **कपिष्ठलो गोत्रप्रकृताविति वक्तव्यम् । 'गोत्र' इत्युच्यमाने इहैव स्यात्—कापिष्ठलिः । इह न स्यात्—कपि-**

प्र.]नर्थक्यं,द्विःप्रयोगेऽप्यर्थस्यानावर्त्तनाद्द्वाभ्यामर्थः प्रत्याय्यत इत्येकस्यानर्थक्यम् ।

सुपिभूत इति। परत्वात्संप्रसारणे कृते सुपेर्द्विर्वचनम्। तत्र स्थानिवत्त्वात्सुब्ग्रहणेन समुदायस्य ग्रहणात्सिद्धं षत्वम् । द्विःप्रयोगेऽपि स एव सुपिर्द्विरुक्त इति समुदायाश्रयमेव षत्वम् । 'विसुष्वापे'त्यत्र तु स्वपेर्द्विर्वचनं न सुपेरिति षत्वाऽभावः । केचित्तु 'षुपिभूतो द्विरुच्यत' इति पठन्ति ।पूर्वत्रासिद्धीयमद्विर्वचन इति कृतषत्वस्य द्विर्वचनमिति तेषां भावः । [**सुविनिर्दुर्भ्यः**]।

कपिष्ठलो । कपिष्ठल इति । गोत्रमिह पारिभाषिकं पौत्रप्रभृति गृह्यते, तेन यत्र गोत्राभिधानं तत्र कपेः परस्य 'स्थल'सकारस्य षत्वेन भाव्यं न तु परमप्रकृतौ, नापि यूनीति वार्त्तिकारम्भः। यस्माद्गोत्रे प्रक्रियते प्रवर्तते गोत्रस्य

उ.] **श्चानर्थक्यमिति**। उत्तरखण्डस्याऽर्थवत्त्वधातुत्वादेरेकाचो द्वे दर्यतेर्दिगीत्यादिसूत्रस्थभाष्यादावश्यकत्वेन द्विवचनमयुक्तम् । 'अभ्यासस्यानर्थक्य'मित्येव तु भाष्याशयः। यथा चैतत्तथा 'एकाचो द्वे'इत्यत्र निरूपितम् । **परत्वादिति**। 'वचिस्वपी'ति यत्सम्प्रसारणं तस्य द्वित्वात्परत्वात्। लिट्यभ्यासस्येति त्वभ्यासस्य विधानाद्द्वित्वोत्तरमेव। तद्वक्ष्यति-**विसुष्वापेत्यत्रत्विति । समुदायाश्रयमेवेति** । सुपेरेवायं द्विः प्रयोग इति पर्यालोचनया समुदाये सुप्त्वबुद्धिरित्यर्थः। इदमपि चिन्त्यं,समुदाये तत्त्वस्य दुरुपपादत्वात्। अन्यथैच्छिकद्विःप्रयोगेऽपचपचदित्यादेः साधुत्वापत्तिस्तुल्यन्यायादिति। अतएव पाठान्तरं दर्शयति—**केचित्त्विति ।** परे तु स्वादिभ्यः परेषां सुप्यादीनां सस्य षत्वमिति सूत्रार्थः। तत्रावयवत्ववत्तत्सम्बन्ध्यवयवत्वमपि षष्ठ्यर्थ इति तत्सिद्धिः। अतएव 'स्थादिष्वि'त्यस्य नियमार्थत्वमुपपद्यते। यद्वाऽत्र प्रकरणे तत्तद्धातोस्तत्समानाकारस्य च ग्रहणमिति न दोष इत्याहुः।

कपिष्ठलो गोत्रे । पारिभाषिकमिति । कृत्रिमाऽकृत्रिमन्यायादिति भावः। 'अपत्याधिकारादन्यत्र लौकिकं गोत्र'मिति तु ज्ञापकसिद्धस्याऽसार्वत्रिकत्वान्नाश्रीयते, अस्य ज्ञापकसूत्रदृष्ट्याऽसिद्धत्वाद्वेति बोध्यम्। **गोत्राभिधानमिति** । गोत्रप्रत्यय इत्यर्थः। प्रकृतिग्रहणे सर्वत्र सिद्धिं दर्शयति-**यस्मादिति ।** 'अकर्त्तरि कारके'इत्यपादाने क्तिन्।

ष्ठलः कापिष्ठलायनः ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । नैव विज्ञायते 'कपिष्ठल इति गोत्रे निपात्यत' इति ॥ कथं तर्हि ? ॥ 'गोत्रे यः कपिष्ठल शब्दस्तस्य षत्वं निपात्यते यत्र वा तत्र वे'ति ॥ [कपिष्ठलो गोत्रे] ॥

अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः ।८।३।९७।

'स्थ' इति किमिदं धातुग्रहणमाहो स्विद्रूपग्रहणम् ? ॥ किं चातः ? ॥ यदि धातुग्रहणं–'गोस्थान'मित्यत्र प्राप्नोति। अथ रूपग्रहणं सव्येष्ठाः[1] परमेष्ठी सव्येष्ठा सारथिरित्यत्र न प्राप्नोति ॥ यथेच्छसि तथास्तु ॥ अस्तु तावद्धातुग्रहणम् ॥ कथं गोस्थानमिति ? ॥ सवनादिषु पाठः करिष्यते ॥

अथ वा पुनरस्तु रूपग्रहणम् ॥ कथं सव्येष्ठाः परमेष्ठी सव्येष्ठा सारथिरिति ? ॥ ॥ * ॥ स्थःस्थास्थिन्स्थृणामिति वक्तव्यम् ॥ * ॥

प्र.] वा या प्रकृतिः कारणं तदभिधाने षत्वं। तेन[4] सर्वमिष्टं सिद्ध्यति। **नैवं विज्ञायत इति**। न गोत्रं षत्वस्य विषयत्वेन निर्दिष्टं, किं तर्हि, दर्शनस्य गोत्रे यो दृष्टः कपिष्ठलशब्दः स साधुर्भवतीति। तेन कपिस्थानवाचिनः षत्वं न भवतीत्युक्तं भवति। अथ वा प्रवराध्यायपठितं गोत्रं गृह्यत इति षत्वविषयत्वेनापि गोत्रस्याश्रयणेन दोषः। [**कपिष्ठलो गोत्रे**]।

अम्बा। किमिदमिति। यदि स्थशब्दः प्रथमया निर्दिश्यते, 'स्थशब्दः[2] सकारस्य मूर्द्धन्यं प्रतिपद्यत' इति, तदा रूपग्रहणम्। अथ स्थःशब्दः षष्ठ्या निर्दिश्यते ततो धातुग्रहणमिति भावः। **सवनादिष्विति**। आदिशब्दस्य प्रकारार्थत्वाद्गोस्थानभूमिस्थानादयोऽनिष्यमाणषत्वाः सर्वे सवनादयः। **स्थःस्थास्थिन्स्थृणामिति**[2]। स्थाशब्दः क्विबन्तः 'ईत्वे वकारप्रतिषेध'इति वचनात्प्रत्ययलक्षणेनेत्वं[6] न भवति। 'स्थि'न्नितीन्प्रत्ययान्तः[3]। 'स्थृ'शब्द ऋप्रत्ययान्तः।

उ.] **कपिस्थानवाचिन इति।** यौगिकस्येत्यर्थः। **प्रवराध्यायेति।** स्वसन्तानस्य व्यपदेशहेतुराद्यः पुरुषो वसिष्ठादिरपि तत्र गोत्रशब्देनोच्यते॥ [**कपिष्ठलो गोत्रे**] ॥ ९१ ॥

अम्बाम्बगो। प्रथमयेति। अत्र पक्षे 'मूर्द्धन्य'इत्यनुवृत्तं द्वितीयया विपरिणम्यते। 'प्रतिपद्यते' इति वाऽऽध्याहियत इत्याह–**स्थशब्द इति। प्रकारः**–सादृश्यं। तच्च प्रयोगेऽनिष्टषत्वेनेत्याह–**अनिष्यमाणषत्वा इति। वचनादिति**। भाष्यप्रयोगादेवेत्यन्ये। अत्र विजेवेत्यन्ये। [**अम्बाम्बगोभूमि**] ॥ ९७ ॥

सुषामादिषु च ।८।३।९८।

[॥*॥ अविहितलक्षणमूर्धन्यःसुषामादिषु ॥ * ॥] अविहितलक्षण-मूर्द्धन्यः सुषामादिषु द्रष्टव्यः ।

ह्रस्वात्तादौ तद्धिते ।८।३।१०१।

॥ * ॥ ह्रस्वात्तादौ तिङ्प्रतिषेधः ॥ * ॥ ह्रस्वात्तादौ तिङः प्रतिषेधो वक्तव्यः । भिन्द्युस्तराम् । छिन्द्युस्तरामिति ॥ [ह्रस्वात्तादौ तद्धिते] ॥

स्तुतस्तोमयोश्छन्दसि ।८।३।१०५।

॥ * ॥ स्तुतस्तोमयोश्छन्दस्यनर्थकं वचनं पूर्वपदादिति सिद्धत्वात् ॥*॥ स्तुतस्तोमयोश्छन्दसि वचनमनर्थकम् [इत्येव] ॥ किं कारणम् ? ॥ 'पूर्वपदादिति सिद्धत्वात्' । पूर्वपदादित्येव सिद्धम् ॥ [स्तुतस्तोमयोः] ॥

सनोतेरनः ।८।३।१०८।

॥ * ॥ सनोतेरन इति च ॥ *॥ [सनोतेरन इति च]॥ किम् ? ॥ वचनमनर्थकमित्येव ॥ किं कारणम् ? ॥ [पूर्वपदादिति सिद्धत्वात्] ॥ पूर्वपदादित्येव सिद्धम् ॥ नियमार्थं तर्हीदं वक्तव्यम्–'सनोतेरनकारस्यैव यथा स्यादिह मा भूत्–गोसनि'मिति ॥*॥ सनोतेरन इति नियमार्थमिति चेत्सवनादिकृतत्वात्सिद्धम् ॥*॥ सनोतेरन इति नियमार्थमिति चेत्सवनादि [कृतत्वात्सिद्धम् । सवनादि]षु पाठः करिष्यते ॥*॥ सन्नर्थं तु ॥ * ॥ सन्नर्थं त्विदं वक्तव्यम् । सिसनिषति ॥ एतदपि नास्ति प्रयोजनम् । 'स्तौतिण्योरेव षण्यभ्यासा'दित्येतस्मान्नियमान्न भविष्यति ॥ ण्यर्थं तर्हीदं

प्र.] स्तुतस्तो । पूर्वपदादिति सिद्धत्वादिति । पूर्वं पदं पूर्वपदमिति सामान्येन तत्राश्रीयते न तु समासावयव एवेति वाक्येऽपि षत्वं प्रवर्तते । तदत्र स्तुत-स्तोमग्रहणं प्रत्याख्यायते, छन्दोग्रहणं तूत्तरार्थं वक्तव्यमेव । [स्तुतस्तोम] ।

सनोतेरनः । सिसनीरिति । एतस्मिंश्च प्रयोजने सति सामर्थ्याऽभावा-

---

उ.] सुषामा । भाष्ये–अविहितलक्षणेति । अविहितो लक्षणेन मूर्द्धन्यो यस्येत्यर्थः । भिन्नपदपाठे–मूर्द्धन्य इत्यर्श आद्यजन्तम् । 'अविहितलक्षण'इत्यस्याऽकृतशास्त्र इत्यर्थः ॥९८॥ स्तुतस्तोम । ननु पूर्वपदादित्येतदुत्तरसूत्रे पूर्वपदशब्दस्य समासाद्यावयवे रूढत्वात् 'नृभिष्टु-तस्ये'ति वाक्ये कथं तेन सिद्धिरत आह–पूर्वपदमिति । सर्वत्र पूर्वपदशब्द एवमेवेत्याहुः ।

सनोतेरनः । अस्य 'गोषा' इति विडन्तमुदाहरणम् । सवनादिष्विति । एवञ्च

वक्तव्यं—सिसानयिषतीति[1] ॥ कथं पुनरण्यन्तस्य प्रतिषेधे ण्यन्तः शक्यो विज्ञातुम् ? ॥ सामर्थ्यात् । 'अण्यन्तस्य प्रतिषेधवचने प्रयोजनं नास्ती'ति कृत्वा ण्यन्तो[2] विज्ञास्यते ॥ अथ वाऽयमस्त्यण्यन्तः सिसनिषतेरप्रत्ययः—सिसनीः ॥ [सनोतेरनः] ।

न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् ।८।३।११०।

किमर्थं सवनादिष्वश्वसनिशब्दः पठ्यते ? ॥*॥ षत्वबाधनार्थम् ॥*॥ 'पूर्वपदा'दिति षत्वं प्राप्नोति तद्बाधनार्थम् ॥ नैतदस्ति प्रयोजनम्, इणन्तादिति तत्रानुवर्तते,अनिणन्ताश्चायं, नैव प्राप्नोति नाऽर्थः प्रतिषेधेन ॥ एवं तर्हि सिद्धे सति यत्सवनादिष्वश्वसनिशब्दं पठति तज्ज्ञापयत्याचार्योऽनिणन्तादपि षत्वं भवती'ति॥ किमेतस्य ज्ञापने प्रयोजनम् ?॥ जलाषाहं माष इत्येतत्सिद्धं भवति ॥ अथ वैकदेशविकृतार्थोऽयमारम्भः । अश्वषा इति ॥

सिचो यङि ।८।३।११३।

अथोपसर्गादिति[1] या प्राप्तिः—भवितव्यं तस्याः प्रतिषेधेनोताहो न ? ॥ न भवितव्यम् ॥ किं कारणम् ? ॥ उपसर्गात् षत्वं प्रतिषेधविषये आरभ्यते, तद्यथैव पदादिलक्षणं[3] प्रतिषेधं बाधते एवं 'सिचो यङी'त्येतमपि बाधते[4] ॥ न बाधते[4] ॥ किं कारणम् ? ॥ येन नाऽप्राप्ते तस्य बाधनं भवति ।

प्र.] ण्यन्तस्य नियमाऽभावात्सिषाणयिषतीति षत्वेन भाव्यमित्याहुः ।[**सनोतेरनः**]।

न रपर । **माष इति** । मानं माः, मां सनोतीति । जनसनेति विट् । विड्वनोरित्यात्वम् । विभक्तौ ङसि परत 'आतो धातो'रित्याल्लोपः। **एकदेशविकृतार्थं इति**। अश्वशब्दविषयमेव ज्ञापकम्—अनिणन्तादप्यश्वशब्दात्षत्वं भवतीति । माषो जलाषाहमित्यत्र तु सुषामादित्वात्षत्वसिद्धिः । [**न रपर**] ॥

सिचो यङि । **तस्मादभिसेसिच्यत इति** । ननु 'पूर्वत्राऽसिद्ध'मिति प्रति-

---

उ.] 'गोषणि'मिति सषत्वपाठो वेदे प्रामादिकः । 'सर्वविधीनां छन्दसि वैकल्पिकत्वात्सोऽपि साधु'रिति **कश्चित्** । **इत्याहुरिति** । अत्राऽरुचिबीजन्तु प्रकृतिभागस्य सनोतित्वाऽनपायः । सवनादिपाठो वा । [**सनोतेरनः**] ॥

नरपर । **माष** इत्यत्र सनोतेरन इति षत्वप्राप्तिं दर्शयति—**मानं मा इति** । जलाषाहे पूर्वपदादिति षत्वं । पूर्वपरिहारादुत्तरस्य विशेषं दर्शयति—**अश्वेति** । [**नरपर**] ॥

सिचो यङि । **प्रकरणे इति** । वस्तुतस्त्वेवं सत्यादेशप्रत्यययोरित्यस्यैवेदं बाधकं

न चाऽप्राप्ते पदादिलक्षणे[1] प्रतिषेधे उपसर्गात् षत्वमारभ्यते, 'सिचो यङी'-त्येतस्मिन् पुनः प्राप्ते चाऽप्राप्ते च ॥ अथ वा 'पुरस्तादपवादा अनन्तरान्विधीन् बाधन्त' इत्येवमुपसर्गात्षत्वं पदादिलक्षणं प्रतिषेधं बाधिष्यते । 'सिचो यङी'त्येतन्न बाधिष्यते । तस्मादभिसेसिच्यते इति भवितव्यम् ॥

सोढः ।८।३।११५।

किमर्थं सहिः सोढभूतो गृह्यते ? ॥ यत्रास्यैतद्रूपं तत्र यथा स्यादिह मा भूत्परिषहत इति ॥ [सोढः] ।

स्तम्भुसिवुसहां चङि ।८।३।११६।

॥ * ॥ स्तम्भुसिवुसहां चङ्युपसर्गात् ॥ * ॥ स्तम्भुसिवुसहां चङ्युपसर्गादिति वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ उपसर्गाद्या प्राप्तिस्तस्याः प्रतिषेधो यथा स्यादभ्यासाद्या प्राप्तिस्तस्याः प्रतिषेधो मा भूदिति । पर्यसीषहत् ॥ [स्तम्भुसिवु सहां]

सुनोतेः स्यसनोः ।८।३।११७ ॥

सनि किमुदाहरणम् ? ॥ सुसूषति ॥ नैतदस्ति प्रयोजनं 'स्तौतिण्योरेव षण्यभ्यासा[2]'दित्येतस्मान्नियमान्न भविष्यति ॥ इदं तर्हि—अभिसुसूषति ॥ एतदपि नास्ति प्रयोजनम् । 'स्थादिष्वभ्यासेन चाऽभ्यासस्ये[3]'त्येतस्मान्नियमान्न भविष्यति ॥ इदं तर्हि प्रयोजनम्—अभिसुसूतेरप्रत्ययः—अभिसुसूः । विसुसूः[4] । निसुसूः[4] ॥ [सुनोतेःस्यसनोः] ॥

सदेः परस्य लिटि ।८।३।११८ ।

॥ * ॥ सदो लिटि प्रतिषेधे स्वञ्जेरुपसङ्ख्यानम् ॥ * ॥ सदो लिटि प्रतिषेधे स्वञ्जेरुपसङ्ख्यानं कर्तव्यम् । परिषस्वजे ॥

॥ ꕥ ॥ इति श्रीमद्भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्येऽष्टमस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम् ॥ पादश्च तृतीयः समाप्तः ॥ ꕥ ॥

प्र.]षेधस्यासिद्धत्वादुपसर्गादिति षत्वं प्राप्नोति । उच्यते । 'प्रकरणे प्रकरणमसिद्धं न तु योगे योगः' । विधिप्रतिषेधयोश्चैकं प्रकरणमिति सिद्धमिष्टम् । [नरपर]

ꕥ इति कैयटीये भाष्यप्रदीपेऽष्टमस्य तृतीये द्वितीयमाह्निकम् ॥ पादश्च ॥ ꕥ

उ.] स्यात् । एवञ्च स्पष्टप्रतिपत्तये 'उपसर्गा'दित्यतः प्रागेव निषेधप्रकरणे कर्त्तव्ये उत्तरत्र

रषाभ्यां नो णः समानपदे ।८।४।१।

॥ * ॥ रषाभ्यां णत्वे ऋकारग्रहणम् ॥ * ॥ **रषाभ्यां णत्वे ऋकारग्रहणं कर्तव्यम् । 'रषाभ्यां नो णः समानपदे' 'ऋकाराच्चे'ति वक्तव्यम् । इहापि यथा स्यात्—मातॄणां पितॄणामिति ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यं । योऽसावृकारे रेफस्तदाश्रयं णत्वं भविष्यति ॥ न सिध्यति ॥ किं कारणम् ? ॥ न हि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते ॥** ॥*॥ एकदेशे नुडादिषु चोक्तम् ॥*॥ **किमुक्तम् ? ॥** अग्रहणं चेन्नुड्विधिलादेशविनामेष्वृकारग्रहण'मिति । तस्मा-

---

प्र.]रषाभ्यां नो णः समानपदे । रषाभ्यामुच्यमानं णत्वं वर्णान्तरान्न प्राप्नोतीति मत्वाह—**रषाभ्यामिति । योऽसावृकार इति ।** येषां दर्शनमर्द्धमात्राकालो रेफ ऋकारेऽस्तीति, तन्मतेन केवलस्याऽप्रयोगादास्तीर्णादिषु वर्णान्तरोपाश्रयाद्रेफाण्णत्वं भवत्येवं मातॄणामित्यादावपि भविष्यति । येषामपि दर्शनं मात्राचतुर्भागो रेफ ऋकार इति, तन्मतेऽपि 'रषाभ्या'मिति रेफो गृह्यमाणोऽण्त्वाद्भिन्नकालस्यापि ऋकारस्थस्य ग्राहक इति णत्वं सिध्यति । यत्तूच्यते रेफोष्मणां सवर्णा न सन्तीति, तद्भिन्नाऽऽस्यप्रयत्नवर्णान्तरापेक्षया । अथवा रषाभ्यामिति रेफाकृतिर्निर्दिश्यत इति ऋकारस्थादपि रेफाण्णत्वं सिध्यतीति भावः । **न हि वर्णैकदेशा इति ।** नाऽव्यपवृक्तस्याऽवयवे तद्विधिर्यथा द्रव्ये'ष्वित्युक्तं सन्ध्यक्षरवार्त्तिके । तथा च 'मांसं न विक्रेतव्य'मिति सत्यपि निषेधे गावो विक्रीयन्ते, तत्र मांसबुद्धेरभावात् । यदप्युक्तम्—अण्त्वाद्रेफ ऋकारस्थं रेफं सावर्ण्याद्गृह्णातीति । तदयुक्तम् । नहि ऋकारस्थरेफस्य

उ.] करणेन, 'निषेधाश्च बलीयांस' इति न्यायेन चाऽस्य निषेधस्य बलवत्त्वान्न दोषः ॥
इति श्रीनागोजीभट्टकृते भाष्यप्रदीपोद्द्योतेऽष्टमस्य तृतीये द्वितीयमाह्निकम् । पादश्च समाप्तः ॥

रषाभ्यां । न च संसृष्टस्याऽर्द्धमात्रिकस्य रेफस्य सम्भवे कथमृकारस्थस्य ग्रहणं स्यादित्यत आह—**येषां दर्शनमिति । केवलस्येति ।** वर्णान्तरानुपाश्रितस्येत्यर्थः । **आस्तीर्णेति ।** 'यथे'तिशेषः । **तदभिन्नस्येति ।** रेफातिरिक्तवर्णान्तरं सर्वं रेफेन भिन्नाऽऽस्यप्रयत्नमेवेत्यर्थः । एकदेशस्याऽण्ग्रहणेनाऽग्रहणे ग्राहकसूत्रेऽण्ग्रहणप्रत्याख्याने वा युक्त्यन्तरमाह—**अथवेति ।** ऋकारादेर्नरसिंहवद्वर्णान्तरत्वादवयवे तज्जातिसत्त्वे मानाऽभावाच्च नेदं युक्तं । 'रश्रुतिर्निर्दिश्यत' इति युक्तं वक्तुम् । **नाव्यपवृक्तस्येति ।** अभिन्नबुद्धिविषयस्य समुदायस्य योऽवयवस्तस्मिंस्तद्विधिः—पृथग्भूतवर्णविधिर्न भवतीति वार्तिकार्थः । अथवा 'रेफाकृतिनिर्देशा'—

गृह्यन्ते ॥ एवमपि न सिध्यति ॥ किं कारणम् ? ॥ 'अनन्तरत्वात्' । यत्तद्रेफात्परं भक्तेस्तेन व्यवहितत्वान्न प्राप्नोति ॥ 'अड्व्यवाये' इत्येवं भविष्यति ॥ न सिध्यति ॥ किं कारणम् ? ॥ वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते ये व्यपवृक्ता अपि वर्णा भवन्ति । यच्चात्र रेफात्परं भक्तेर्न तत्कचिदपि व्यपवृक्तं दृश्यते ॥ एवं तर्हि योगविभागः करिष्यते-'रषाभ्यां नो णः समानपदे' । ततो 'व्यवाये' । व्यवाये च रषाभ्यां नो णो भवतीति । तत 'अट्कुप्वाङ्नुम्भि'रिति ॥ इदमिदानीं किमर्थं ? ॥ नियमार्थम्-'एतैरेवाक्षरसमाम्नायिकैर्व्यवाये नान्यै'रिति । अथ वाऽऽचार्यप्रवृत्तिर्ज्ञापयति 'भवति

प्र.]स्थानप्रयत्नवत्त्वं । तस्मादसति सावर्ण्ये कुतो ग्राह्यत्वम् । यथा च नरसिंहावयवानां नरत्वसिंहत्वजातियोगाऽभावात्पुरुषमृगराजाभ्यामेकाकृतियोगाऽभावः, एवं वर्णवर्णैकदेशयोरपीति भावः । नुडादिषु चोक्तमिति । अग्रहणपक्षे नुडादिषु ऋकारग्रहणं कर्तव्यं भवेदिति ग्रहणपक्ष आश्रीयते । इह समुदायस्य कार्येषु व्यापारे अवयवस्य स्वनिमित्ते कार्ये मा भूद्व्यापारः, यथा अग्न इन्द्र इत्यादावेकारोऽयादेशं प्रतिपद्यते न तु तदवयव इकारः सवर्णदीर्घत्वम् । इह तु 'मातृणा'मिति समुदायस्य न कस्मिंश्चिद्विधौ निषेधे वा व्यापार इत्यवयवः स्वाश्रयकार्यं प्रति कस्मान्निमित्तत्वं न प्रतिपद्यते ? ॥ भेदेन चोपलम्भान्नाव्यपवृक्तस्येति न्यायो नास्ति । यत्तद्रेफादिति । रेफ एव भक्तिस्तस्या यत्परमित्यर्थः । ऋकारभागं च व्यवधायकमिच्छन्ति । न तत्कचिदिति । मात्रातुर्यस्य पृथगभावात् । एतैरेवेति । येऽक्षरसमाम्नाये पठ्यन्तेऽकारादयः, ये च तैर्गृह्यन्ते आकारादयः

उ.] दिति यदुक्तं तत्राह-यथा चेति । पुरुषमृगराजाभ्यामेकाकृतीति । अत्र नरसिंहावयवानामित्यनुकृष्टव्यं । ननु समुदाये एवाऽवयवानां गुणभावेन प्रधाने कार्यसंप्रत्यय इति न्यायात्कथं कार्ययोगः स्यादित्याशङ्क्य प्रधानकार्याऽभावे गुणा अपि कार्यं प्रतिपद्यन्त इत्याह-इह समुदायस्येति । भेदेन चेति । यथा 'माषा न भोक्तव्या' इति निषेधो मिश्रेष्वपि प्रवर्त्तते, तत्र तद्बुद्धिसद्भावात्, एवमृकारस्थो रेफो भेदेन प्रतिभासात्कार्यं प्रतिपद्यत एवेत्यर्थः । 'रेफाद्भक्ते'रिति समानाधिकरणमित्याह-रेफ एवेति । भक्तिः-भागः । ऋकारभागं-तदन्तर्वर्त्त्यज्भागमित्यर्थः । 'इकारभाग'मिति पाठोऽज्भाग इकारसदृश इति मतेन बोध्यः । अतएवाऽवकहडचक्रे ऋ ॠ ऌ ॡ इति चतुर्णामिकारराश्या निर्णय उक्तः स्वरशास्त्रे । मात्रातुर्यस्येति । रेफोऽर्द्धमात्र, उभयतोऽज्भक्तिरर्द्ध-

ऋकाराण्णत्व'मिति यदयं क्षुभ्नादिषु नृनमनशब्दं पठति ॥ नैतदस्ति ज्ञापकम् । वृद्ध्यर्थमेतत्स्यात्—नार्नमनिरिति ॥ यत्तर्हि तत्रैव 'तृप्नोति'शब्दं पठति ॥ यच्चाऽपि नृनमनशब्दं पठति ॥ ननु चोक्तं 'वृद्ध्यर्थमेतत्स्या'दिति । बहिरङ्गा वृद्धिरन्तरङ्गं णत्वम् । 'असिद्धं बहिरङ्गमन्तरङ्गे' । अथ वोपरिष्टाद्योगविभागः करिष्यते । [इदमस्ति 'छन्दस्यृदवग्रहा'दिति । 'ऋतः' ।] ऋतो [उत्तरस्य] नो णो भवति । ततः 'छन्दस्यृवग्रहात्' । 'ऋत' इत्येव ॥

अट्कुप्वाङ्नुम्व्यवायेऽपि ।८।४।२।

॥ * ॥ अड्व्यवाये णत्वेऽन्यव्यवाये प्रतिषेधः ॥ * ॥ अड्व्यवाये णत्वेऽन्यव्यवाये प्रतिषेधो वक्तव्यः । आदर्शेन । अक्षदर्शेन ॥*॥ न वाऽन्येन व्यपेतत्वात् ॥*॥ न वा वक्तव्यः ॥ किं कारणम् ? ॥ 'अन्येन व्यपेतत्वात्' । अन्येनाऽत्र व्यवायः ॥ यद्यप्यत्रान्ये व्यवायोऽटाऽपि तु व्यवायो-

---

प्र.] सर्वे ते आक्षरसमाम्नायिकाः । अत्र च 'बह्वचोऽन्तोदात्ताट्ठ'ञिति भवार्थे ठञ्, 'प्रयोजन'मित्यनेन वा । यदयमिति । इदं ज्ञापकमृकारादपि नो णो भवतीत्यनुमापयति । अथ वा वर्णैकदेशोऽपीह रेफो गृह्यते, रेफाकृतिर्वा निर्दिश्यते, भक्तिव्यवधानेऽपि वा णत्वं भवतीत्यनुमीयते । [रषाभ्यां नो णः] ॥

अट्कुप्वा । अड्व्यवाये इति । एतत्सूत्रारम्भाद्रषाभ्यामित्यत्राऽडादिव्यवायविषये 'तस्मादित्युत्तरस्ये'ति परिभाषा निर्दिष्टाङ्गविकलोपतिष्ठत इति यत्राऽड्डादिव्यवायोऽन्यव्यवायश्च तत्र णत्वप्रसङ्गः । न वेति । 'रषाभ्या'मित्यत्र 'तस्मा'दिति परिभाषोपस्थानाद्व्यवाये णत्वाऽप्रसङ्गादेतत्सूत्रमारभ्यमाणमडादि-

---

उ.] मात्रा । अत्र मानं प्रत्याहाराह्निके उक्तम् । एवञ्च परभागो मात्रातुर्य इति स्पष्टमेव । एवञ्च 'नाव्यपवृक्तस्ये'तिन्यायादङ्ग्रहणेन ग्रहणाऽभाव इति भावः । प्रयोजनमित्यनेन वेति । प्रयोजनशब्दश्च प्रकृते प्रयोजकपरः । शेषं भाष्यं प्रत्याहाराह्निके व्याख्यातम् । तत्र बहिरङ्गा वृद्धिरित्येतद्वार्तिकमतेन । भाष्यकृता 'खरवसानयो'रिति सूत्रे कार्यकालपक्षेऽपि त्रैपादिकेऽन्तरङ्गे तदप्रवृत्तेः सिद्धन्तितत्वात् । [रषाभ्यां नो णः] ।

अट्कुप्वा । ननु व्यवाये 'तस्मादित्युत्तरस्ये'ति परिभाषोपस्थित्या णत्वाऽप्राप्तेः किं प्रतिषेधेनेत्यत आह—एतत्सूत्रेति । अडादिव्यवाये इति । तद्व्यवाये विधानसामर्थ्यात्तावन्मात्रकृतानन्तर्याऽभावेऽपि णत्वं भवति । अन्यव्यवाये तु निर्दिष्टग्रहणेन तद्व्या-

ऽस्ति । तत्रास्त्यड्व्यवाये इति प्राप्नोति ॥ अटैव व्यवाये भवति ॥ किं वक्तव्य-मेतत्?॥ न हि॥ कथमुच्यमानं गंस्यते?॥ अड्ग्रहणसामर्थ्यात्। यदिहि यत्राऽटा चाऽन्येन च व्यवायस्तत्र स्यादड्ग्रहणमनर्थकं स्यात्। 'व्यवाये नो णो भवती'त्येव ब्रूयात्॥ अस्त्यन्यदड्ग्रहणस्य प्रयोजनम् ॥ किम्? ॥ योऽनिर्दिष्टैरेव व्यवाय-स्तत्र मा भूत्—कृत्स्नं मृत्स्नेति ॥ यद्येतावत्प्रयोजनं स्याच्छर्व्यवाये नेत्येव ब्रूयात् ॥*॥ तत्समुदाये णत्वाऽप्रसिद्धिर्यथान्यत्र ॥*॥ तत्समुदाये—व्यवाय-समुदाये—णत्वस्याऽप्रसिद्धिः—अर्केण अर्घेण । ['यथान्यत्र'] । यथाऽन्यत्रापि व्यवायसमुदाये कार्यं न भवति ॥ क्वाऽन्यत्र ? ॥ 'नुम्विसर्जनीयशर्व्यवा-येऽपि' । निंस्से निंस्स्वेति ॥ किं पुनः कारणमन्यत्रापि व्यवायसमुदाये कार्यं न भवति ? ॥ 'प्रत्येकं वाक्यपरिसमाप्तिर्दृष्टे'ति । तद्यथा—वृद्धिगुणसंज्ञे प्रत्येकं भवतः ॥ ननु चायमप्यस्ति दृष्टान्तः—'समुदाये वाक्यपरिसमाप्ति'-रिति। तद्यथा 'गर्गाः शतं दण्ड्यन्ता'मिति, अर्थिनश्च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति ॥ यद्येवमेकेन व्यवाये न प्राप्नोति—किरिणा गिरिणेति॥ उभयथापि वाक्यपरिसमाप्तिर्दृश्यते, तद्यथा—'गर्गैः सह न भोक्तव्य'मिति, प्रत्येकं च न भुज्यते समुदितैश्च ॥*॥ कुव्यवाये हादेशेषु

प्र.] व्यवाये णत्वमनुजानाति नाऽन्यव्यवाये, तस्य निर्दिष्टग्रहणेन निवर्तितत्वादिति-भावः । अड्ग्रहणसामर्थ्यादिति । सामर्थ्येनाऽप्यनन्तरोक्तमर्थं प्रतिपादयति । अड्व्यवायमन्तरेणान्येन केवलेन व्यवायाऽसम्भवाद्व्यवाय इत्येवाऽड्व्यवा-यस्याक्षिप्तत्वादड्ग्रहणमटैव व्यवाय इत्यवधारणार्थं विज्ञायत इत्यर्थः । अनिर्दि-ष्टैरिति । अडादिव्यतिरिक्तैः । शर्व्यवाये नेति । अस्मादेव च निषेधादन्यव्य-वाये णत्वमुपास्यते । यद्येवमेकेनेति । द्वाभ्यामपि व्यवाये न प्राप्नोति-अर्केणेति । उभयथेति । व्यवायोपलक्षणायाऽडादीनामुपादानादेकेन द्वाभ्यां बहुभिश्च यथा-

उ.]वृत्तेर्न प्रवर्तते इति भावः । न च व्यवायपदश्रुत्या विरोधान्निर्दिष्टांऽशाऽप्रवृत्तिः । निर्दिष्ट-पदस्य तदतिरिक्ताऽक्षरसमाम्नायिककृताऽव्यवायपरत्वात् । तदाह—सामर्थ्येनापीति । अने-नास्यैकदेशयुक्तित्वं ध्वनयति । अन्यथा नञ्घटितेन गुर्वर्थेन न्यासेन कथमन्यथासिद्धिमस्य वदेत्। भाष्ये—शर्व्यवायेनेति । शर्ग्रहणं चुटुतुलानामप्युपलक्षणम् । अतएवाऽऽर्त्नीत्यादौ न दोषः । द्वाभ्यामपीति । समुदाये वाक्यपरिसमाप्तिरिति न्यायाश्रयणे सर्वैरेव व्यवाये णत्वं स्यान्नैकेन न द्वाभ्यामित्यर्थः। व्यवायोपलक्षणायेति । व्यवायकर्तृबोधनायेत्यर्थः । यथा

प्रतिषेधः[1] ॥*॥ कुव्यवाये हादेशेषु प्रतिषेधो वक्तव्यः ॥ किं प्रयोजनम् ? ॥

॥ * ॥ प्रयोजनं वृत्रघ्नः स्रुघ्नः प्राघानीति ॥ * ॥ [वृत्रघ्नः[3] स्रुघ्नः प्राघानीति प्रयोजनम्] ॥ हन्तेरत्पूर्वस्येत्यत्पूर्वग्रहणं न कर्तव्यं भवति ।

॥ * ॥ नुम्व्यवाये णत्वेऽनुस्वाराऽभावे प्रतिषेधः ॥ * ॥

नुम्व्यवाये णत्वेऽनुस्वाराऽभावे प्रतिषेधो वक्तव्यः । प्रेन्वनम् प्रेन्वनीयम् ॥ * ॥ अनागमे च णत्वम् ॥ * ॥ अनागमे च णत्वं वक्तव्यम्[4] । तृम्फणम्[5] तृम्फणीयम्[6] ॥ * ॥ अनुस्वारव्यवाये वचनात्तु[7] सिद्धम् ॥ * ॥ अनुस्वारव्यवाये नो णो भवतीति वक्तव्यम् ॥ तदनुस्वारग्रहणं कर्तव्यम् ? न कर्तव्यम् । क्रियते न्यास एव । नकारेऽनुस्वारः परसवर्णीभूतो निर्दिश्यते ॥ इहापि तर्हि प्राप्नोति—प्रेन्वनं प्रेन्वनीयम् ॥ अनुस्वारविशेषणं नुम्ग्रहणं—'नुमो योऽनुस्वार'इति ॥ इहापि तर्हि न प्राप्नोति—तृम्फणं[6] तृम्फणीयम् ॥

एवं तर्ह्ययोगवाहानामविशेषेणोपदेशश्चोदितस्तत्राऽनुस्वारे कृतेऽड्व्यवाये इत्येव सिद्धम् ॥ यद्येवं नार्थो नुम्ग्रहणेन । अनुस्वारे कृतेऽड्व्यवाय इत्येव सिद्धम् ॥ [अट्कुप्वाङ्]

प्र]. सम्भवं व्यवाये णत्वं भवति । वृत्रघ्न इति । 'प्रातिपदिकान्ते'ति णत्वप्रसङ्गः । स्रुग्घ्न इति । स्रुचो हन्यन्तेऽस्मिन्निति घञर्थे कविधानमिति कः । प्रेन्वनमिति । 'इजादेः सनुम' इति णत्वप्रसङ्गः । नकारेऽनुस्वार इति । द्विनकारको निर्देश इति भावः । नुमो योऽनुस्वार इति । सौत्रत्वान्निर्देशस्य षष्ठ्यन्तस्य परनिपातः ॥

उ.] 'वृषलैर्न प्रवेष्टव्य'मिति वृषलस्य प्रवेशनिषेधपरनोदनायां प्रत्येकं संहतानाञ्च प्रवेशो निषिध्यते एवमिहापीत्यर्थः । प्रातिपदिकान्तेति । 'कुमति च'त्यस्याप्युपलक्षणमिदम् । 'स्रुग्घ्न' इत्यत्र 'पूर्वपदात्संज्ञाया'मिति प्राप्तिः । अतएव ऋगयने निपातनमाश्रित्य 'अग' इति तत्र प्रत्याख्यातं भाष्ये । अत्पूर्वग्रहणं न कर्तव्यं भवतीति । तत्करणेऽपि 'बहुवृत्रहाणी'त्यसिद्धेः, उपसर्गसंबन्धसत्त्वेन 'वृत्रघ्न' इत्यसिद्धेश्च, 'प्रघनाघन' इत्यत्र णत्वापत्तेश्चेति भावः । वार्तिकस्य तत्र करणात्सर्वणत्वनिषेधकत्वमिति बोध्यम् । 'हादेशेष्वि'ति विशेषणात् 'द्रुघण' इत्यादौ 'पूर्वपदा'दितिणत्वं भवत्येव । तत्र हि द्रावुपपदे हन्तेरप् घनादेशश्च हन्तेरन्तोदात्तो विधीयते । द्विनकारक इति । तत्र पूर्वो नकारोऽनुस्वारस्य परसवर्णेन निर्दिष्ट इति व्याख्यास्यत इति भावः । [अटकुप्वाङ्नुम्] ।

पूर्वपदात्संज्ञायामगः ।८।४।३।।

।।*।। पूर्वपदात्संज्ञायामुत्तरपदग्रहणम् ।। * ।। **पूर्वपदात्संज्ञायामुत्तरपदग्रहणं कर्तव्यम् ।। किं प्रयोजनम् ?** ।।*।। तद्धितपूर्वपदस्थाऽप्रतिषेधार्थम् ।।*।। **तद्धितस्थस्य पूर्वपदस्थस्य च प्रतिषेधो मा भूत् । खारपायणः, करणप्रियः ।। तत्तर्हि वक्तव्यम् ? ।। न वक्तव्यम् । पूर्वपदमुत्तरपदमिति संबन्धिशब्दावेतौ। सति पूर्वपदे उत्तरपदं भवति, सति चोत्तरपदे पूर्वपदं भवति । तत्र सम्बन्धादेतदवगन्तव्यं—'यत्प्रति पूर्वपदमित्येतद्भवति तत्स्थस्य नियम' इति ।। किं च प्रत्येतद्भवति ? ।। उत्तरपदं प्रति** ।।*।। संज्ञायां नियमवचनेऽगप्रतिषेधान्नियमप्रतिषेधः ।।*।। **संज्ञायां नियमवचनेऽगप्रतिषेधान्नियमस्याऽयं प्रतिषेधो विज्ञायते—'अग' इति ।। तत्र को दोषः ? ।।** * ।। तत्र नित्यं णत्वप्रसङ्गः ।। * ।। **तत्र पूर्वेण संज्ञायां चाऽसंज्ञायां च नित्यं णत्वं प्राप्नोति ।।** ।।*।। योगविभागात्सिद्धम्[१] ।।*।। **योगविभागः करिष्यते—'पूर्वपदात्संज्ञायाम्'। ततः 'अगः'। गान्तात्पूर्वपदाद्या च यावती च[२] णत्वप्राप्तिस्तस्याः सर्वस्याः**

प्र.]पूर्वपदा। तद्धितेति। 'पूर्वपदे यौ रषौ ताभ्यां परस्य नकारस्य संज्ञायामेव णत्व'मिति नियमादसंज्ञायां तद्धितपूर्वपदस्थस्यापि णत्वं न प्राप्नोतीत्युत्तरपदग्रहणं कर्तव्यम् । **खारपायण इति ।** खरपस्यापत्यं गोत्रं । नडादित्वात् फक् ।

सम्बन्धिशब्दाविति । पूर्वपदावयवो रेफः षकारश्च पूर्वपदशब्देनोच्यते । समुदायेषु हि वृत्ताः शब्दा अवयवेष्वपि वर्तन्ते । पूर्वपदत्वं चोत्तरपदापेक्षमिति तद्धितपूर्वपदस्थस्य णत्वं भवत्येव । **समान[पदे[२]]मेवेति ।** समासे च पूर्वपदोत्तरपदविभागाऽपेक्षया भिन्नपदत्वमप्यस्तीति णत्वाऽप्रसङ्गः । एवं च विध्यर्थमेतत्सूत्रं, न नियमार्थम् । अथ खारपायण इत्यत्र कथं णत्वं, यावता खरशब्दस्यापि पदत्वमस्तीति, तत्स्थत्वाद्रेफस्य समानपदत्वमेव नास्ति । अत्राहुः—यत्र द्वावपि निमित्तनिमित्तिनौ समानपदस्थत्वं व्यभिचरतस्तत्र णत्वा-

---

उ.] पूर्वपदात् । पूर्वपदे यावित्ति । पूर्वपदग्रहणं तत्स्थे लाक्षणिकमिति भावः । **नियमादिति ।** समासे समानपदत्वात्पूर्वेण सिद्धेऽस्यारंभादित्यर्थः । **पूर्वपदावयव इति ।** आक्षेपोऽप्युत्तरपदावयवनस्येति भावः । पूर्वपदशब्दो रूढ इति तात्पर्यम् । भाष्ये—**नित्यं णत्वप्रसङ्ग इति ।** सर्वत्र संज्ञायामसंज्ञायां च णत्वप्रसङ्ग इत्यर्थः । **ऋगयनादिभ्य इति ।** ऋगयनव्यतिरिक्तानां तु गव्यवधाने णत्वप्राप्तियोग्यानामनभिधानमिति

प्रतिषेधः ॥*॥ अप्रतिषेधो वा यथा सर्वनामसंज्ञायाम् ॥*॥ न वाऽर्थः प्रतिषेधेन ॥ णत्वं कस्मान्न भवति ?॥ 'यथा सर्वनामसंज्ञायाम्' । उक्तं च सर्वनामसञ्ज्ञायां 'सर्वनामसंज्ञायां निपातनाण्णत्वाभाव'इति ॥ यथा पुनस्तत्र निपातनं क्रियते–सर्वादीनि सर्वनामानीति, इहेदानीं किं निपातनम् ? ॥ इहापि निपातनमस्ति ॥ किम् ?॥ 'अणृगयनादिभ्य' इति ॥ नैव वा पुनरत्र णत्वं प्राप्नोति ॥ किं कारणम् ? ॥ 'समानपद' इत्युच्यते, न चैतत्समानपदम् ॥ समासे कृते समानपदम् ॥ समानपदमेव यन्नित्यं । न चैतन्नित्यं समानपदमेव ॥ किं वक्तव्यमेतत् ? ॥ न हि ॥ कथमनुच्यमानं गंस्यते ? ॥ 'समानग्रहणसामर्थ्यात्' । यदि हि यत्समानं चाऽसमानं च तत्र स्यात्समानग्रहणमनर्थकं स्यात् ॥ [पूर्वपदात्संज्ञायामगः] ॥

विभाषौषधिवनस्पतिभ्यः ।८।४।६।

॥ * ॥ द्व्यक्षरत्र्यक्षरेभ्यः ॥ * ॥ द्व्यक्षरत्र्यक्षरेभ्य इति वक्तव्यम् । इह मा भूत्–देवदारुवनम् ॥ * ॥ इरिकादिभ्यः प्रतिषेधः ॥ * ॥ इरिकादिभ्यः प्रतिषेधो वक्तव्यः । इरिकावनम् । तिमिरवनम् ॥ [विभाषौषधिवन] ।

अह्नोऽदन्तात् ।८।४।७।

॥*॥ अदन्तादन्तस्य ॥*॥ अदन्तादन्तस्येति वक्तव्यम् । इह मा भूत्–दीर्घाह्नी शरदिति ॥ तर्हि वक्तव्यम् ? ॥ न वक्तव्यं । नैषाऽहच्छब्दात्षष्ठी ॥ का तर्हि ? ॥ अह्नशब्दात्प्रथमा ।

प्र.]ऽभावः । इह तु रेफस्य व्यभिचारेऽपि नकारस्य समानपदस्थत्वाऽव्यभिचाराण्णत्वं प्रवर्तते । समानग्रहणमिति । 'पद'इत्येवाऽपदस्थयोर्निमित्तनिमित्तिनोरसम्भवात्सामर्थ्यादेकत्वसङ्ख्याया विवक्षया समानत्वे लब्धे समानश्रुतिरङ्गीकृताऽवधारणा विज्ञायत इत्यर्थः । [पूर्वपदात्] ॥

उ.] भावः । यत्र द्वावपीति । एवं च निमित्तानधिकरणनिमित्तिमत्पदाऽघटितत्वमेव समानपदत्वमिति भावः । सामर्थ्यादेकत्वेति । अनुवादगतत्वेऽपि सामर्थ्यात्तद्विवक्षेति भावः । इदं चिन्त्यं, पदान्तरेऽप्रवृत्त्यापत्तेः । तस्मात्पदे इत्युक्त्यैव प्रत्यासत्त्या रषनानामेक पदस्थत्वे लब्धे तत्सामर्थ्यात्तल्लाभ इति बोध्यम् । [पूर्वपदात्सञ्ज्ञायामगः] ॥

विभाषौषधि । भाष्ये–द्व्यक्षरेति । अत्राऽक्षरशब्देनाऽच्सहितं व्यञ्जनम् । अतएवेरिकादिभ्यः प्रतिषेधः सार्थकः । [विभाषौषधिवनस्पतिभ्यः] ॥

'पूर्वसूत्रनिर्देशश्च' ॥ अथ वा युवादिषु पाठः करिष्यते ॥ [अह्नोऽदन्तात्]॥

वाहनमाहितात् ।८।४।८।

॥*॥ आहितोपस्थितयोः ॥*॥ आहितोपस्थितयोरिति वक्तव्यम् । इहापि यथा स्यात्–इक्षुवाहणम् शरवाहणम् ॥ अपर आह ॥*॥ वाहनं वाह्यादिति वक्तव्यम् ॥*॥ यदा हि गर्गाणां वाहनमपविद्धं तिष्ठति तदा मा भूत्–गर्गवाहनमिति ॥ [वाहनमाहितात्] ।

वा भावकरणयोः ।८।४।१०।

॥*॥ वाप्रकरणे गिरिनद्यादीनामुपसङ्ख्यानम् ॥*॥ वाप्रकरणे गिरिनद्यादीनामुपसङ्ख्यानं कर्तव्यम् । गिरिणदी गिरिनदी । चक्रणितम्बा चक्रनितम्बा ।

प्रातिपदिकान्तनुम्विभक्तिषु च ।८।४।११।

॥*॥ प्रातिदिकान्तस्य णत्वे समासान्तग्रहणमसमासान्तप्रतिषेधार्थम्॥*॥ प्रातिपदिकान्तस्य णत्वे समासान्तग्रहणं कर्तव्यम् ॥ किं प्रयोजनम् ? ॥ 'असमासान्तप्रतिषेधार्थम्' । असमासान्तस्य मा भूत्–गर्गभगिनी

प्र.] अह्नोऽदन्तात् । पूर्वसूत्रनिर्देशश्चेति । पूर्वाचार्याः कार्यभाजः षष्ठ्या न निरदिक्षन्नित्यर्थः । अथवेति । अवश्यकर्तव्यश्च युवादिषु पाठः, 'प्रातिपदिकान्ते'ति विकल्पेन णत्वं मा भूत् । [अह्नोऽदन्तात्] ।

वाह । आहितोपस्थितयोरिति । आहितशब्देन भूतकालक्रियानिर्देशाद्यदा-वाह्यं नारोपितं केवलं सन्निहितं तदा न प्राप्नोतीति वचनम् । 'स्वस्वामिभाव-निवृत्तिपरत्वाद्भूतकालस्येहाविवक्षे'त्यन्ये आहुः । वाहनं वाह्यादिति । वह-नीयवाचिन इत्यर्थः । अपविद्धमिति । वहनशक्तिविकलं प्रनष्टमित्यर्थः । यदा गर्गा वाह्यत्वेन विवक्ष्यन्ते न तु स्वामित्वेन तदा णत्वं भवत्येव । [वहिनमाहितात्]

प्रातिपदिका । समासान्तग्रहणमिति । समासस्य प्रातिपदिकस्य योऽन्त्यो

उ.] अह्नोऽदन्तात् । अवश्येति । एवं चाऽदन्तानुकरणक्लेशो वृथैवेति भावः ।

वाहनमा । आहितम्–आरोपितं । वाह्यम्–उपस्थितम् । अनारोपितवाह्यमपि सन्निहितवाह्यं । वचनमिति । उपस्थितेत्येतदित्यर्थः । सूत्राक्षरैरेवाऽस्याऽर्थस्य सिद्धिं दर्शयति–स्वस्वामीति । वहनीयेति । वहनीयाऽर्थवाचकात्परस्य वाहनस्य णत्व-मित्यर्थः । तर्कि गार्ग्यवाहणमित्यसाध्वेव, नेत्याह–यदेति । [वाहनमाहितात्] ॥

प्रातिपदिकान्त । ननु कृतेऽपि समासान्तग्रहणे समासप्रातिपदिकावयवत्वात्-

दक्षभगिनीति ।। न वा भवति--गर्गभगिणीति ? ।। भवति यदैतद्वाक्यं गर्गाणां भगो गर्गभगः, गर्गभगोऽस्याऽस्तीति । यदा त्वेतद्वाक्यं भवति-गर्गाणां भगिनी गर्गभगिनीति, तदा न भवितव्यं, तदा मा भूदिति ।। यदि समासान्तग्रहणं क्रियते माषवापिणी व्रीहिवापिणीत्यत्र न प्राप्नोति ।। ।। * ।। लिङ्गविशिष्टग्रहणे चोक्तम् ।। * ।। [लिङ्गविशिष्टग्रहणे चोक्तम्] ।। किमुक्तम् ? ।। 'गतिकारकोपपदानां कृद्भिस्सह समासवचनं प्राक् सुबुत्पत्ते'रिति ।। * ।। तत्र युवादिप्रतिषेधः ।। * ।। तत्र युवादीनां प्रतिषेधो वक्तव्यः । आर्ययूना क्षत्रिययूना । प्रपक्वानि परिपक्वानि । दीर्घाह्नी शरदिति ।।

कुमति च ।८।४।१३।

अथेह कथं भवितव्यं--माषकुम्भवापेण व्रीहिकुम्भवापेणेति, नित्यं णत्वेन भवितव्यमाहोस्विद्विभाषया ? ।। यदा तावदेतद्वाक्यं भवति--कुम्भस्य वापः कुम्भवापः, माषाणां कुम्भवापो माषकुम्भवाप इति,--तदा

प्र.] नकारस्तस्य णत्वमित्यर्थः । गर्गभगिनीति । 'भगि'न्नित्येतस्य प्रातिपदिकस्याऽन्तो नकार इति णत्वप्रसङ्गः । अन्तशब्दश्चाऽवसानवत्त्र्यैकदेशवाची । यथा वस्त्रान्त इति । गर्गभगोऽस्यास्तीति । खारपायणवत्समानपदस्थत्वाद्रेफनकारयोः पूर्वेणैवाऽत्र णत्वं न त्वनेन । माषवापिणीति । ईकारान्तेन समास इति पूर्वपक्षः । नकारान्तेन समासः पश्चादीकार इति सिद्धान्तः । प्रपक्वानीति । अत्र 'कुमति चे'ति नित्यं णत्वं प्राप्नोति । [प्रातिपदिकान्त] ।

कुमति च । अथेति विचारो निष्प्रयोजन इत्याहुः । विग्रहद्वयेऽप्यर्थाभेदाद्रूपद्वयसिद्धौ च विकल्पस्यैव समर्थनान्नित्यणत्वोपन्यासस्य गजस्नानतुल्यत्वात् । न चाऽत्र णत्वेन भाव्यम्, 'पदव्यवाय' इति प्रतिषेधात् । केचित्त्वाहुः--यदा माषाणां कुम्भो माषकुम्भस्तस्य वाप इति प्रक्रिया तदोत्तरपदत्वे चाऽपदादिविधाविति प्रत्ययलक्षणनिषेधात्पदत्वाऽभावान्निषेधाऽप्रवृत्तिः ।

उ.] णत्वं स्यादेवेत्यत आह--अन्तशब्दश्चेति । न त्वेकदेशमात्रवाचीति भावः। नत्वनेनेति । समासप्रातिपादिकान्तत्वाऽभावान्नकारस्येति भावः । [प्रातिपदिकान्तनुम्] ।

कुमति च । निष्प्रयोजनत्वमुपपादयति--विग्रहद्वयेऽपीति । निषेधप्रतिषेधप्रतियोगिनः प्राप्तिमात्रनिरूपणपरं भाष्यमित्यन्ये । केचिदाहुरिति । अत्राऽरुचिबीजन्तु प्रत्यासत्त्योत्तरपदस्य कार्यित्व एव निषेधप्रवृत्त्याऽत्र तस्य दुर्लभत्वं । किं चाऽपदादिविधाविति

नित्यं णत्वेन भवितव्यम् । यदा त्वेतद्वाक्यं भवति,–माषाणां कुम्भो माषकुम्भः, माषकुम्भस्य वापो माषकुम्भवाप इति,–तदा विभाषया भवितव्यम् ॥

उपसर्गादसमासेऽपि णोपदेशस्य ।८।४।१४।

असमासग्रहणं किमर्थम् ? ॥ समास इति वर्त्तते, असमासेऽपि यथा स्यात्-प्रणमति परिणमति ॥ क्व पुनः समासग्रहणं प्रकृतम् ? ॥ 'पूर्वपदात्संज्ञायामग' इति ॥ कथं पुनस्तेन समासग्रहणं शक्यं विज्ञातुम् ? ॥ पूर्वपदग्रहणसामर्थ्यात् । समास एवैतद्भवति पूर्वपदमुत्तरपदमिति ॥

अथाऽपिग्रहणं किमर्थम् ? ॥ समासेऽपि यथा स्यात्–प्रणामकः । परिणामकः ॥ यदि तर्हि समासे चाऽसमासे चेष्यते नार्थो'ऽसमासेऽपि'ग्रहणेन । निवृत्तं पूर्वपदादिति । अविशेषेणोपसर्गाण्णत्वं वक्ष्यामि ॥ समासे नियमान्न प्राप्नोति ॥ असिद्धमुपसर्गाण्णत्वं, तस्याऽसिद्धत्वान्नियमो न भविष्यति ॥

प्र.] कुम्भस्य वापः कुम्भवापो, माषाणां कुम्भवापो माषकुम्भवाप इत्यस्यां तु प्रक्रियायां णत्वप्रतिषेध [इति] । [कुमति च] ।

उपसर्गा । समास एतद्भवतीति । ननु 'सुबामन्त्रित' इत्यत्रोक्तम्—'अविशेषेणैतद्भवति पूर्वपदमुत्तरपदमिति, तेन चर्मनमन्नित्यत्र णत्वं न भविष्यती'ति । उच्यते । स्वरग्रहणप्रत्याख्यानाय तदुक्तं न त्वेष पक्षः स्थितः । **समासे नियमादिति** । यदा 'पूर्वपदात्संज्ञायामग' इति सूत्रं नियमार्थमिति पक्षस्तदैतदुच्यते । समासपदे हि समाने निमित्तनिमित्तिनोर्भावात्सिद्धं णत्वं नियम्यते । यदा तु समानग्रहणात्समानमेव यन्नित्यं पदं तदाश्रीयते तदा पूर्वपदादित्यस्य विध्यर्थत्वादसमासेपिग्रहणस्य ज्ञापकत्वाऽनुपपत्तिः । न्यायात्तु प्रकरणे प्रकरण-

---

उ.] पर्युदासेनाऽपदान्तविधावेव तत्प्रवृत्तेर्न लुमतेति सूत्रभाष्ये ध्वनितत्वम् । एवञ्चेदं भाष्यमेकदेश्युक्तिरिति तात्पर्यम । [**कुमति च**] ।

उपसर्गाद । स्वरग्रहणप्रत्याख्यानार्येति । तत्र हि चर्मनमन्, कूपे सिंचनित्यादौ णत्वषत्ववारणाय स्वरग्रहणमित्युक्ते, पूर्वपदादिति नियमाण्णत्वं न भविष्यति–इति चोदिते 'समासे एतद्भवतिपूर्वपद'मित्याद्युक्त्वा 'नेत्याह अविशेषणे' त्यादिना स्वरग्रहणं प्रत्याख्यात । तच्चाऽयुक्तमिति 'रूढियोंगमपहरती' ति न्यायसिद्धैतद्भाष्याद्विज्ञायते, तदाह–**नत्वेष इति** । **विध्यर्थत्वादिति** । अयमेव युक्तः पक्षस्तत्र सिद्धान्तितश्चेति ज्ञापकत्वमसङ्गतम् । एवं चाऽसमासेऽपीति सूत्रं व्यर्थमेवेति भावः । ननु प्रत्येकं योगानामानर्थक्ये मानाभावात् स्वस्व

एवं तर्हि सिद्धे सति यदसमासेऽपिग्रहणं करोति तज्ज्ञापयत्याचार्यो 'न योगो योगेऽसिद्धः ॥ किं तर्हि ? ॥ 'प्रकरणे प्रकरणमसिद्ध'मिति ॥ किमेतस्य ज्ञापने प्रयोजनम् ? ॥ यत्तदुक्तं–निष्कृतं निष्पीतमित्यत्र सत्वस्याऽसिद्धत्वात् षत्वं न प्राप्नोती'ति, न स दोषो भवति ॥ * ॥ णोपदेशं प्रत्युपसर्गाभावादनिर्देशः ॥*॥ [णोपदेशं प्रत्युपसर्गाभावादनिर्देशः] । अगमको निर्देशोऽनिर्देशः । यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो, न च णोपदेशं प्रति क्रियायोगः ॥ एवं तर्ह्याहाऽयमुपसर्गादसमासेऽपि णोपदेशस्येति, न च णोपदेशं प्रत्युपसर्गोऽस्ति, तत्र वचनाद्भविष्यति ॥ * ॥ वचनप्रामाण्यादिति चेत्पदलोपे प्रतिषेधः ॥ * ॥ [वचनप्रामाण्यादिति चेत्पदलोपे प्रतिषेधो] वक्तव्यः । प्रगता नायका अस्माद्ग्रामात्–प्रनायको ग्राम इति ॥ ॥*॥ सिद्धं तु यं प्रत्युपसर्गस्तत्स्थस्येति वचनात् ॥*॥ सिद्धमेतत् ॥ कथम् ? ॥ ['यं प्रत्युपसर्गस्तत्स्थस्येति वचनात्'] । यं प्रत्युपसर्गस्तत्स्थस्य णो भवतीति वक्तव्यम् ॥ सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवाऽस्तु ॥ ननु चोक्तं 'णोपदेशं प्रत्युपसर्गाऽभावादनिर्देश'इति ॥ नैष दोषः । णोपदेश इति–नैवं विज्ञायते-ण उपदेशः णोपदेशः, णोपदेशस्येति ॥ कथं तर्हि ? ॥ ण उपदेशोऽस्य सोऽयं णोपदेशः, णोपदेशस्येति ॥

प्र.]स्यासिद्धत्वं व्यवस्थाप्यते, प्रकरणस्यार्थवद्वाक्यत्वात्तदन्तर्गतानां योगानामानर्थक्याद्योगे योगस्याऽसिद्धत्वायोगात् । असिद्धत्वेन कार्याऽसम्पादनादनर्थकत्वमितिभावः । प्रकरणाऽसिद्धत्वेपि तस्यार्थवद्वाक्यत्वाद्बहूनामानर्थक्यम् । अथवा 'निष्कृत'मित्यादौ विसर्जनीयस्यैव षत्वं विधेयं न तु सकारस्य । **णोपदेशं प्रतीति** । उपदिश्यत इत्युपदेशो, णश्चासावुपदेशो णोपदेश इति कर्मधारयं मत्वा चोद्यते । **नैवं विज्ञायत इति** । उपसर्गग्रहणस्य मा भूद्गौणार्थत्वमिति मुख्यार्थग्रहणाय बहुव्रीहिराश्रीयते । **[उपसर्गादसमासे]** ।

उ.]साध्यप्रयोगसाधनेन सार्थक्याच्चेत्यत आह **अथवेति**। एवञ्चैतत्पक्षाश्रयणे न किंचित्फलमिति भावः । **कर्मधारयमिति** । अन्तरङ्गत्वादिति भावः । भाष्ये–**सिद्धन्तु यं प्रतीति** । यं प्रत्युपसर्गस्तत्स्थस्य णोपदेशस्य नस्य ण इत्यर्थ इति भावः । नन्वन्तरङ्गकर्मधारये संभवति कथं बहिरङ्गबहुव्रीह्याश्रयणमत आह–**उपसर्गेति** । तदा उपसर्गग्रहणं प्राद्युपलक्षणमित्याश्रयणीयं स्यादिति भावः । **[उपसर्गादसमासेऽपि]** ।

हिनुमीना ।८।४।१५।

॥*॥ हिनुमीनाग्रहणे विकृतस्योपसङ्ख्यानम् ॥*॥ हिनुमीनाग्रहणे विकृतस्योपसङ्ख्यानं कर्त्तव्यम् । प्रहिणोति प्रमीणीते ।। वचनाद्भविष्यति ॥ अस्ति वचने प्रयोजनम् ।। किम् ? ।। प्रहिणुतः प्रमीणाति ।।*॥ सिद्धमचः स्थानिवत्त्वात् ॥*॥ सिद्धमेतत् ।। कथम् ? ।। 'अचः स्थानिवत्त्वात्' । स्थानिवद्भावादत्र णत्वं भविष्यति ।। प्रतिषिध्यतेऽत्र स्थानिवद्भावः 'पूर्वत्रासिद्धे न स्थानिव'दिति ।। दोषा एवैते तस्याः परिभाषायाः—'तस्य दोषः संयोगादिलोपलत्वणत्वे'ष्विति ।। [हिनुमीना] ।

आनि लोट् ।८।४।१६।

लोडिति किमर्थम् ?॥ प्रहिमानि कुलानि, प्रवपानि मांसानि ।।*॥ आनिलोड्ग्रहणानर्थक्यमर्थवद्ग्रहणात्॥*॥ आनिलोड्ग्रहणमनर्थकम् ।। किं कारणम् ?॥ 'अर्थवद्ग्रहणात्' । अर्थवत आनिशब्दस्य ग्रहणं, नैषोऽर्थवान् । ॥*॥ अनुपसर्गाद्वा ॥*॥ अथ वा यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवतो, न चैतमानिशब्दं प्रति क्रियायोगः।। इहापि तर्हि न प्राप्नोति—प्रयाणि,परियाणीति, अत्रापि नाऽऽनिशब्दं प्रति क्रियायोगः ।। आनिशब्दं प्रत्यत्र क्रियायोगः ।। कथम् ?।। यत्क्रियायुक्ता इति,—नैवं विज्ञायते 'यस्य क्रिया यत्क्रिया, यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत' इति.।। कथं तर्हि ?।। या क्रिया यत्क्रिया, यत्क्रियायुक्तास्तं प्रति गत्युपसर्गसंज्ञे भवत इति ।।

प्र.] आनि लोट् । आनिशब्दमिति । क्रियायोगग्रहणस्यैव 'यत्क्रियायुक्तास्तं प्रती'ति व्याख्यानम् । योगश्चाऽर्थलक्षणः । तत्र प्रयोगविषया क्रियाऽऽश्रीयते । सा च न क्व चिदसंसृष्टाऽस्तीति समुदायस्था आश्रीयत इति आनिशब्दान्तसमुदायं प्रति क्रियायोगः । तत्राऽयं सूत्रार्थः—'उपसर्गात्परस्य समुदायस्य य आनिशब्दस्तन्नकारस्य णत्व'मिति । तदेवं प्रत्याख्यातं लोड्ग्रहणम् । [आनिलोट्]।

उ.] हिनुमी । भाष्ये—स्थानिवत्त्वादिति । बहिरङ्गाऽसिद्धत्वंतु न, त्रिपादीस्थेऽन्तरङ्गे तदप्रवृत्तेः । एकदेशविकृतन्यायेनापीदं सिध्यतीतीदं भाष्यमेकदेश्युक्तिरिति केचित् ॥

आनि लोट् । यत्क्रियेत्यत्र कर्मधारयाश्रयणे हेतुं दर्शयन् तत्पक्षे इष्टसिद्धिं दर्शयति—क्रियायोगेति । प्रयोगविषयेति । तस्या एव मुख्यत्वात् । नतु शास्त्रीयान्वयव्यतिरेकविषयेति भावः । न क्वचिदिति । पदस्यैव लोके प्रयोगात् । एतेन निरा समन्तान्नयति तत्कुलं

नेर्गद्नद्पतपद्घुमास्यतिहन्तियातिवातिद्रातिप्सातिवपति-वहतिशाम्यतिचिनोतिदेग्धिषु च ।८।४।१७।

॥ * ॥ नेर्गदादिषु अड्व्यवाय उपसङ्ख्यानम् ॥ * ॥ नेर्गदादिष्वड्व्यवाय उपसङ्ख्यानं कर्त्तव्यम् । प्रण्यगदत् । परिण्यगदत् ॥*॥आङा च ॥*॥ आङा चेति वक्तव्यम् । प्रण्यागदत् । ननु चाऽयमड् गदादिभक्तो गदादिग्रहणेन ग्राहिष्यते ॥ न सिध्यति । अङ्गस्याऽडुच्यते, विकरणान्तं चाऽङ्गम् । सोऽसौ सङ्घातभक्तोऽशक्यो गदादिग्रहणेन ग्रहीतुम् ॥ एवं तर्ह्यड्व्यवाय इति वर्त्तते ॥ क्व प्रकृतम् ? ॥ 'अट्कुप्वाङ्नुम्व्यवायेऽपी'ति ॥ तद्वै कार्यिविशेषणं निमित्तविशेषणेन चेहार्थः ॥ तत्रापि निमित्तविशेषणमेव ॥

अनितेः ।८।४।१९। अन्तः ।८।४।२०।

अन्तग्रहणं किमर्थम् ? ॥*॥ अनितेरन्तग्रहणं संबुद्ध्यर्थम् ॥*॥ अनितेरन्तग्रहणं क्रियते ॥ [किं प्रयोजनं ?] ॥ 'संबुद्ध्यर्थम्' । हे प्राण् ।

अपर आह—॥*॥ अनितेरन्तः पदान्तस्य ॥*॥ अनितेरन्तग्रहणं क्रियते, 'पदान्तस्य ने'ति प्रतिषेधः प्राप्नोति तद्बाधनार्थम् ॥*॥यो वा तस्मादनन्तरः॥*॥

प्र.] नेर्गदन । तदिति । तत्र हि निमित्तयो रेफषकारयोर्निमित्तिनश्च नकारस्याऽटा व्यवाय आश्रितः । इह तु नेः परे गदादयो व्यवहिता इति णत्वाऽप्रसङ्गः । तत्रापीति । यत्र यन्निमित्तं तत्राऽस्याऽडादिभिर्व्यवाये णत्वमिति गदादीनामपि निमित्तत्वसद्भावाद्व्यवाये णत्वं सिध्यतीत्यर्थः । [नेर्गदनद] ।

अनितेः । सम्बुद्ध्यर्थमिति । अनितेर्नकारोऽन्त एवेऽत्यन्तग्रहणसामर्थ्यात्पदस्याऽन्तो विज्ञायत इति 'पदान्तस्ये'ति प्रतिषेधो योगविभागेन बाध्यते । अपर आहेति—पाठभेदं दर्शयति । वस्तुतस्तु नाऽस्ति भेदः । यो वा तस्मा-

---

उ.] निरानीत्यादौ णत्वव्यावृत्त्यर्थं, तदुपसर्गत्वादर्थवत्त्वाच्चेति परास्तं, भाष्यप्रामाण्येन तथाप्रयोगानभिधानादिति दिक् । [आनि लोट्] ।

नेर्गद । कार्यिशब्देन नकारो गृह्यत इत्याह—नकारस्येति । 'नेः परे गदादय' इति पाठः । यत्र यदिति । पूर्ववत्परस्यापि निमित्तत्वान्निमित्तनिमित्तिनोरटा व्यवाये णत्वमित्यर्थः समान इत्यर्थः । [नेर्गदनदपतपदघुमास्यति] ।

अनितेरन्तः । संबुद्ध्यर्थत्वेऽपि योगविभागस्य पूर्वसूत्रेऽन्त इत्यपकृष्यते इत्याह—यो वेति । वाशब्दश्चाऽर्थे । सामर्थ्यादिति । अनितेः समीपे यो रेफस्तस्मान्नस्येति

अथ वा—अयमन्तशब्दोऽस्त्येवाऽवयववाची। तद्यथा—वस्त्रान्तो वसनान्त इति। अस्ति सामीप्ये वर्त्तते। तद्यथा—उदकान्तं गतः। उदकसमीपं गत इति गम्यते। तद्यः सामीप्ये वर्त्तते तस्य ग्रहणं विज्ञायते[2] अनितेः समीपे यो रेफस्तस्मान्नस्य यथा स्यात्—प्राणितीति। इह मा भूत्—पर्यनितीति[1]।

उभौ साभ्यासस्य ।८।४।२१।

॥ * ॥ साभ्यासस्य द्वयोरिष्टम् ॥ * ॥ साभ्यासस्य द्वयोर्णत्वमिष्यते, प्राणिणिषति ॥ [उभौ साभ्यासस्य] ॥

प्र.] दिति। अस्मिन् पक्षे 'प्रा'णिति सम्बुद्ध्यर्थमावर्त्तनीयमन्तग्रहणम्। **तद्यः सामीप्य इति**। एकवर्णव्यवधानं च सामर्थ्यादाश्रीयते। 'पर्य्यनिती'त्यत्र तु वर्णद्वयव्यवधानाण्णत्वाऽभावः। **[अनितेः]**।

उभौ साभ्यास। साभ्यासस्य द्वयोरिति—उभौग्रहणस्य प्रयोजनं दर्शयति। उभावित्यस्मिन्नसति साऽभ्यासस्यानितेर्णो भवतीत्युच्यमाने वचनसामर्थ्याच्च पूर्वत्रासिद्धीयमद्विर्वचन इत्यनाश्रीयमाणेऽकृतणत्वस्य द्विर्वचने कृतेऽनन्तरस्य पूर्वेण णत्वस्य सिद्धत्वाद्व्यवहितार्थमिदं णत्वं स्यात्। अनन्तरस्य तु तक्रकौण्डिन्य-न्यायेन न स्यादित्युभावित्युच्यते। **[उभौ साभ्यासस्य]**॥

उ.] भाष्योक्तेरेकादेशस्य परादिवद्भावेन रेफस्याऽनितिसमीपत्वाऽक्षतेरिदं किमर्थमिति चिन्त्यं। यत्तु 'न पदान्त'सूत्रे नव्यैर्निमित्तसमीपस्थो योऽनितेर्नकार इति, निमित्तसमीपस्थाऽनितेर्यो-नस्तस्य णत्वमिति द्वेधा व्याख्यानं भाष्ये स्थितमित्युक्तं, तत्कथं भाष्याक्षरस्वरससिद्धमिति चिन्त्यम्। अन्तशब्दश्चाऽत्राऽव्यवहितसमीपवाची, व्याख्यानात्। प्राणितीत्यत्र स्थानिवत्त्वं तु न, अपूर्वविधित्वात्पञ्चमीसमासस्याऽनित्यत्वाच्चेति दिक्। भाष्ये—**समीपे यो रेफ इति**। 'अन्त' इति विभक्त्यन्तरेण विपरिणम्यते इति भावः। **[अनितेरन्तः]**।

उभौ साभ्या। वचनसामर्थ्याच्चेति। अनेन तदनित्यत्वस्यापि ज्ञापनादिति भावः। 'साभ्यासस्ये'ति च 'गुणः कृतात्मसंस्कार' इति न्यायेनाऽनितेर्विशेषणं, न नस्य। एतेनाऽभ्याससहितनस्येत्यर्थे रमागमेन रोपधयोरिवाऽभ्यासनिवृत्त्यापत्तिरित्यपास्तम्। **तक्रकौण्डिन्येति**। वस्तुतस्तु एवं हि 'न' इत्यस्य षष्ठ्यन्तस्याधिकारादुभयोरिति वदेत्, अपूर्वस्येतिवत्। अतएव 'यो रेफस्तस्मान्नस्ये'ति 'अनिते'रित्यत्र भाष्ये उक्तं। किञ्चा-ऽभ्यासस्यानर्थकत्वात्तस्य पूर्वेण सिद्धिरित्यपि चिन्त्यं। तस्मात्साभ्यासग्रहणप्रयोजनपर-तयैवेदं भाष्यं योज्यम्। तथाहि—अभ्यासस्यानर्थक्यादुत्तरखण्डस्य व्यवहितत्वान्न पूर्वेणैक-स्याऽपि सिद्धिः। अत्र सूत्रेऽभ्यासेनेत्यभ्यासस्येति वा करणेऽपि द्वयोर्न सिद्धिः। अतः

हन्तेरत्पूर्वस्य ८।४।२२।

हन्तेरत्पूर्वस्येति किमर्थम् ? ।। प्रघ्नन्ति परिघ्नन्ति ।। ❀ ।। हन्तेत्पूर्वस्य वचने उक्तम् ।। ❀ ।। [हन्तेरत्पूर्वस्य वचने उक्तम्][1] । किमुक्तम् ? ।। 'कुव्यवाये हादेशेषु प्रतिषेध' इति ।। [हन्तेरत्पूर्वस्य] ।।

उपसर्गादनोत्परः ८।४।२८।

कथमिदं विज्ञायते–ओकारात्परः–ओत्परः, न ओत्परोऽनोत्पर इति, आहो स्विदोकारः परोऽस्मात्सोऽयमोत्परः, न ओत्परोऽनोत्पर इति ? ।। किं चातः ? ।। यदि विज्ञायते 'ओकारात्परः ओत्परः, न ओत्परोऽनोत्पर इति,–प्र नो मुञ्चतम्—अत्रापि प्राप्नोति । अथ विज्ञायते–ओकारः परोऽस्मात्सोऽयमोत्परः, न ओत्परोऽनोत्पर इति,–प्राणो वनिर्देवकृता,–अत्र[2] न प्राप्नोति ।। उभयथा च प्रक्रमे दोषो भवति । प्र नः मुञ्चतम्–प्र नो मुञ्चतम् । प्र उ नः–प्रोनः ।। ❀।। भाविन्यप्योति नेष्यते ।। ❀ ।। भाविन्यप्योकारे णत्वं नेष्यते ।। एवं तर्ह्युपसर्गाद्बहुलमिति वक्तव्यम् ।। [उपसर्गादनोत्परः] ।।

प्र.] उपसर्गादनोत्परः। उभयथा च प्रक्रम इति । प्रक्रमो ग्रन्थपरिच्चयाऽर्थः क्रमपाठः । भाविन्यपीति । यद्यपि क्रमपाठे ओकारो नास्ति, संहितापाठे तु भावीति णत्वं न प्रवर्त्तते, सांप्रतिकसद्भावे तु भाविगतिर्दुलभेति पाठान्तरमाश्रितम् । अथवोभयथा च प्रक्रमे इत्यस्याऽयमर्थः,–उभयथा चाश्रीयमाणे इह दोष इति । भाविनीति । ओकारार्थ उकार ओशब्देनोच्यत इत्यर्थः । मुख्यार्थसम्भवे गौणार्थग्रहणमयुक्तमिति पाठान्तरसमाश्रयः ।

उ.] साभ्यासस्येत्युक्तमिति। अतएव वार्तिककृता साभ्यासस्येति पदं गृहीत्वा 'द्वयोरिष्ट'मित्युक्तम्। उभौग्रहणप्रयोजनं तु 'एकःपूर्वपरयो'रित्यत्र भाष्ये उक्तम्–आदेशद्वयलाभार्थमिति । अन्यथा ऊडत् रम्वच्च सकृत्प्रवृत्त्यैवोभयोर्निवृत्तौ स्थान्यभावादेव पुनः प्रवृत्त्यभावेनादेशद्वयलाभो न स्यात् । एवं च भाष्ययोर्न विरोध इति दिक् । [उभौ साभ्यासस्य] ।

उपसर्गादनोत्परः । भाष्ये–उभयथा चेति । तन्त्रेण समासद्वयाऽङ्गीकारे इत्यर्थः । प्रक्रमे दोष इत्यत्र 'प्रक्रम'शब्दार्थमाह–ग्रन्थेति। क्रमपाठ इति। पदसंहितयोर्द्वयोरपि तुल्यकालमभ्यासार्थः पाठः क्रमपाठ इत्युच्यते। अत्र व्याख्याने 'क्रमे' इत्येव सिद्धे 'प्र'शब्दो व्यर्थोऽतः पक्षान्तरमाह–अथवेति । ओकारार्थ इति । ओकारे[1] उकारश्च ओकारशब्देनोच्यत इत्यर्थः । मूलेऽन्यतर[2]ग्रहणमुपलक्षणं बोध्यम् । अत्र पाठान्तराश्रयणे बीजमाह–

कृत्यचः । ८।४।२९ ॥

॥ * ॥ कृत्स्थस्य णत्वे निर्विण्णस्योपसङ्ख्यानम् ॥ * ॥ **कृत्स्थस्य णत्वे निर्विण्णस्योपसङ्ख्यानं कर्तव्यम् । निर्विण्णोऽहमनेन वासेन॥** [कृत्यचः]॥

णेर्विभाषा । ८।४।३० ॥

॥ * णेर्विभाषायां साधनव्यवाये उपसङ्ख्यानम् ॥ * ॥ **णेर्विभाषायां साधनव्यवाये उपसङ्ख्यानं कर्त्तव्यम् । प्राप्यमाणं प्राप्यमानम्** ॥*॥ तद्वि[3]धानात्सिद्धम् ॥*॥ **[तद्वि[1]धानात्सिद्धम्]। विहितविशेषणं णिग्रहणं 'ण्यन्ताद्यो विहित' इति** ॥*॥ अडधिकाराद्वा ॥ * ॥ **अथ वाऽड्व्यवाय इति वर्तते ॥**

इजादेः सनुमः ।८।४।३२ ॥

किमर्थमिदमुच्यते न 'कृत्यच' इत्येव सिद्धम् ? ॥ * ॥ नियमार्थो[3]यमारम्भः॥*॥**[नियमार्थो[1]ऽयमारम्भः]।इजादेरेव च सनुम्कान्नान्य[3]स्मात्सनुम्कादिति । क्व मा भूत् ? ॥ प्रमङ्गनं परिमङ्गनम्** ॥*॥ सनुमो णत्वेऽवधारणाऽ-

---

प्र.] कृत्यचः । निर्विण्णस्येति । अचः परः कृत्स्थो नकारो न भवतीति वचनम् । तत्र परस्य णत्वं, पूर्वस्य ष्टुत्वम् । **[कृत्यचः]** ।

णेर्वि । णेरिति पञ्चमीनिर्देशादनन्तर एव कृति णत्वं स्यादिति णेरितिवार्त्तिकारम्भः । **साधनव्यवाय इति** । साधनाऽभिधायिनि सार्वधातुके विधानाद्विकरणः 'साधन'शब्देनोच्यते । विकरणः साधनाभिधायीति केषांचिन्मतेन वा । **तद्विधानादिति** । सूत्रेषु यथेष्टं वाक्यशेषाध्याहाराण्ण्यन्ताद्यो विहितः कृदित्याश्रीयते । **अडधिकाराद्वेति** । 'ण्यन्तात्परो यः कृ'दित्येवमप्याश्रीयमाणे न दोषो, ण्यन्तस्य कृतां चाड्व्यवायेपि णत्वाभ्यनुज्ञानात् । **[णेर्विभाषा]** ।

इजादेः । सनुमो णत्व इति । नियमे प्राप्तबाधः, सिद्धस्य पुनरुपादानादनु-

---

उ.] मुख्यार्थेति । पाठान्तरेति । उभयथाचार्येण शिष्येभ्यः सूत्रं पाठितमिति भावः । यद्वा **पाठान्तर**शब्देन न्यासान्तरम् । **[उपसर्गादनोत्परः]** ।

णेर्विभाषा । साधनाभिधायिनीति । निमित्तनिमित्तिनोरभेदोपचाराद्गौणोऽयं व्यपदेश इत्यर्थः । **विकरण इति** । अत्र पक्षे साधनशब्देन साधनाभिधायी उच्यते । तस्मादिति परिभाषायां सत्यां कथं विहितविशेषणलाभोऽत आत-**सूत्रेष्विति** । विहितपदाध्याहारसामर्थ्यात्तस्या अत्राऽप्रवृत्तिरिति भावः । परिभाषाप्रवृत्त्यभिप्रायेण पक्षान्तरमित्याह-**ण्यन्तात्पर इति** । [णेर्विभाषा] ।

प्रसिद्धिर्विधेयभावात् ॥*॥ सनुमो णत्वेऽवधारणस्याऽप्राप्तिः ॥ किं कारणम् ?॥ 'विधेयभावात्' ॥ कैमर्थ्यान्नियमो भवति ? ॥ विधेयं नास्तीति कृत्वा ॥ इह चाऽस्ति विधेयम् ॥ किम् ? ॥ ण्यन्ताद्विभाषा प्राप्ता तत्र नित्यं णत्वं विधेयम् ॥ तत्राऽपूर्वो विधिरस्तु नियमोऽस्त्विति, अपूर्वो विधिर्भविष्यति न नियमः ॥ * ॥ सिद्धं तु प्रतिषेधाधिकारे सनुम्-ग्रहणात् ॥ * ॥ सिद्धमेतत् ॥ कथम् ? ॥ 'प्रतिषेधाधिकारे सनुम्ग्रहणात्'। प्रतिषेधाधिकारे सनुम्ग्रहणं कर्त्तव्यं 'न भाभूपूकमिगमिप्यायीवेपि-सनुमा'मिति ॥ इहापि तर्हि न प्राप्नोति–प्रेङ्खणीयम् । प्रेङ्खणम् ॥ * ॥ कृत्स्थस्य च णत्वे इजादेः सनुमो ग्रहणम् ॥*॥ कृत्स्थस्य च णत्वे इजादेः सनुमो ग्रहणं कर्त्तव्यम् ॥ सिध्यति । सूत्रं तर्हि भिद्यते ॥ यथान्यासमेवास्तु ॥ ननु चोक्तं–'सनुमो णत्वेऽवधारणाप्रसिद्धिर्विधेयभावा'दिति ॥ नैष दोषः । 'हल' इति वर्त्तते ॥ क्व प्रकृतम् ? ॥ 'हलश्चेजुपधा'दिति ॥ तद्वै तत्रादि-विशेषणमन्तविशेषणेन चेहार्थः॥ कथं पुनर्ज्ञायते–'तत्रादिविशेषण'मिति ?॥ 'इजुपधा'दित्युच्यते तत्र नाऽर्थोन्तविशेषणेन ॥ तत्रादिविशेषणं सदिहाऽन्तविशेषण भविष्यति ॥ कथम् ? ॥ 'इजादे'रित्युच्यते तत्र नाऽर्थ आदि-विशेषणेन ॥ अथ वा 'इजादेः सनुम' इत्यत्र 'णेर्विभाषे'त्येतदनुवर्त्तिष्यते॥

न भाभूपूकमिगमिप्यायीवेपाम् ।८।४।३४।

॥ * ॥ भादिषु पूञ्ग्रहणम् ॥ * ॥ भादिषु पूञ्ग्रहणं कर्त्तव्यम् ।

प्र.] वाददोषश्च । विधौ तु न प्राप्तबाधो नाप्यनुवाददोष इति विधिनियमसंभवे विधिरेव ज्यायानिति भावः। **सिद्धं त्विति ।** तेन 'प्रमङ्कन'मित्यादौ णत्वं न भवति । तत 'इजादेः सनुम' इति योगो विध्यर्थः सम्पद्यते । **तत्र नाऽर्थोऽन्तविशेषणेनेति ।** इजुपधस्य हलन्तत्वाऽव्यभिचारात्सामर्थ्यात्तत्रादिविशेषणं हल्ग्रहणम् । **तत्र नार्थ इति ।** इजादेर्हलादित्वाऽसम्भवादन्तविशेषणं हल्ग्रहणं सम्पद्यत इति 'हल-न्तादिजादेः सनुमो यो विहितः कृत्तत्रस्थस्ये'त्येवं विज्ञायमाने ण्यन्ताद्विध्यर्थोऽयं योगो न भवतीति नियमाय सम्पद्यते । [**इजादेः सनुमः**] ।

उ.] इजादेः सनुमः । नियमाद्विधेर्ज्यायस्त्वे बीजमाह–**नियम इति । विध्यर्थं इति ।** सर्वत्र सनुमो निषेधेनाऽप्राप्तेरिति भावः । [**इजादेः सनुमः**] ।

इह माभूत्—प्रपवणं सोमस्येति ॥ * ॥ ण्यन्तस्य चोपसङ्ख्यानम् ॥ * ॥ ण्यन्तस्य चोपसङ्ख्यानं कर्त्तव्यम् ॥ किं पूञ एव ? ॥ 'ने'त्याह ॥ * ॥ अविशेषेण[1] ॥ * ॥ प्रभापनं परिभापनम् ॥

षात्पदान्तात् ।८।४।३५।

॥ * ॥ षात्पदादिपरवचनम् ॥ * ॥ षात्पदादिपरग्रहणं कर्त्तव्यम् । इहैव यथा स्यात्-निष्पानं दुष्पानम् । इह मा भूत्–सुसर्पिष्केण[2] सयजुष्केण[3] ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । नैवं विज्ञायते–'पदस्यान्तः पदान्तः, पदान्ता'दिति ॥ कथं तर्हि ? ॥ पदे अन्तः पदान्तः, पदान्तादिति ॥

नशेः षान्तस्य ।८।४।३६।

॥*॥ नशेरशः ॥*॥ नशेरश इति वक्तव्यम् । इहापि यथा स्यात्–प्रनङ्क्ष्यति । परिनङ्क्ष्यति ॥ तत्तर्हि वक्तव्यं ? ॥ न वक्तव्यम् । इह पुनर्नशेः[4] ष इतीयता सिद्धं, सोऽयमेवं सिद्धे सति यदन्तग्रहणं करोति तस्यैतत्प्रयोजनं षान्तभूतपूर्वस्यापि यथा स्यात् ॥ [नशेः षान्तस्य] ॥

पदव्यवायेऽपि ।८।४।३८।

प्र.] न भा । ण्यन्तस्य चेति । ण्यन्तस्य धात्वन्तरत्वान्निषेधो न प्राप्नोतीति वचनम् ।

षात्प । षात्पदादीति । 'पदादौ परतो यः षकारस्तस्मात्परस्य पदस्य यो नकारस्तस्य णत्वं न भवती'त्यर्थः । पदेऽन्त इति । 'षात्पदा'दित्येव षकारेण पदस्य विशेषणात्षान्तात्पदादिति लब्धेऽर्थेऽन्तग्रहणात्सप्तमीसमास आश्रीयते ॥

नशेः षान्त । प्रनङ्क्ष्यतीति । नशेः षत्वे 'षढोः कः सी'ति कत्वे कृते रूपं । 'मस्जिनशोर्झली'ति नुमागमः । स च षत्वात्पूर्वमेव प्रवर्त्तते, पूर्वत्राऽसिद्धमिति-वचनात् । षान्तेति । अन्तग्रहणसामर्थ्याद्यश्च संप्रति षान्तो यश्च भूतपूर्वस्तस्य सर्वस्य णत्वनिषेधः । [षात्पदान्तात्] ॥

उ.] न भाभू । धात्वन्तरत्वादिति । 'प्रभायमान'मित्यादि सिद्धये 'भादिभ्य' इति विहितविशेषणमिति भावः । [नभाभूपू] ।

षात्पदा । सप्तमीसमास इति । 'पदे' इत्येव तु नोक्तं, विधेयविशेषणत्वशङ्कावारणार्थत्वात् । अत्र पक्षे 'निष्पान'मित्यादौ सुबुत्पत्त्यनन्तरमेव समासोऽङ्गीकार्यः । पदग्रहणं वा तद्योग्यपरम् । [षात्पदान्तात्] ।

॥ * ॥ पदव्यवायेऽतद्धिते ॥ * ॥ पदव्यवायेऽतद्धित इति वक्तव्यम्। इह मा भूत्–आर्द्रगोमयेण शुष्कगोमयेण ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् । नैवं विज्ञायते 'पदेन व्यवायः पदव्यवायः, पदव्यवाये' इति ॥ कथं तर्हि ? ॥ पदे व्यवायः पदव्यवायः, पदव्यवाय इति ॥ [पदव्यवायेऽपि] ॥

क्षुभ्नादिषु च ।८।४।३९।

॥ * ॥ अविहितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु ॥ * ॥ [अविहितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु] द्रष्टव्यः ॥ [क्षुभ्नादिषु च] ॥

स्तोः श्चुना श्चुः ।८।४।४०।

किमर्थं तृतीयानिर्देशः क्रियते न श्चावित्येवोच्येत ?॥ आनन्तर्यमात्रे श्चुत्वं यथा स्यात्–यज्ञः राज्ञः याच्ञा ॥ अथ सङ्ख्यातानुदेशः कस्मान्न भवति ?॥ आचार्यप्रवृत्तिर्ज्ञापयति–'सङ्ख्यातानुदेशो ने'ति यदयं शात्प्रतिषेधं शास्ति ॥

ष्टुना ष्टुः ।८।४।४१।

किमर्थं तृतीयानिर्देशः क्रियते न ष्टावित्येवोच्येत ? ॥ आनन्तर्यमात्रे

क्षुभ्नादिषु । अविहितेति । 'न भाभूपूकमिगमी'त्यादयस्तु योगा अस्यैव प्रपञ्चार्थाः ।

उ.] पदव्यवायेऽपि । भाष्ये–अतद्धित इति । व्यवधायकपदस्य तद्धितभिन्नपरत्वं चेदित्यर्थः । पदव्यवाय इति । सविशेषणत्वेऽपि सौत्रत्वाद्वृत्तिरिति भावः । नस्य तु न विशेषणम् , आर्द्रगोमयेणेत्युदाहरणाऽसङ्गतेः । पदे व्यवाय इति । अतएव 'रम्यवीणे'-त्यादौ 'प्रातिपादिकान्ते'ति णत्वं भवत्येव । वार्तिकमतेऽपि एकवाक्यतया णत्वाश्रयातिरिक्त-तद्धितभिन्ने परतः पदेन व्यवाये नेत्यर्थान्न दोषः । न चोत्तरपदत्वे चापदादिविधाविति निषेधादुदाहरणदौर्लभ्यम् । अदादिविधाविति पर्युदासेन पदान्तविधावेव निषेधप्रवृत्तेः,प्रत्या-सत्त्योत्तरपदस्य कार्यित्वे एव तत्प्रवृत्तेश्च, 'असर्वनामस्थाने यचि भ'मिति तत्प्रत्याख्यान-प्रकारोऽपि योगविभागस्येष्टसिद्ध्यर्थतया पदान्तविधिविषय एवेति भावः ।

क्षुभ्नादि । अविहितेति । अविहितो लक्षणेन णत्वप्रतिषेधो यस्येत्यर्थः । भिन्नपद-पाठे णत्वप्रतिषेधशब्देनाऽर्शआद्यचा तद्वानुच्यते। 'अविहितलक्षण'इत्यस्याऽकृतशास्त्र इत्यर्थः।

स्तोः श्चु । आनन्तर्यमात्रे इति । पूर्वस्मिन् परस्मिंश्चेत्यर्थः । अत्र संयोग इत्यध्या-ह्रियते । तेन 'चित'मित्यादौ न दोषः । अतएव 'चिततूलभारिषु', 'डतरादिभ्य' इत्यादि-निर्देशाः सङ्गच्छन्ते । [स्तोः श्चुना श्चुः] ॥

ष्टुत्वं यथास्यात्-पेष्टा लेढा ॥ अथ सङ्ख्यातानुदेशः कस्मान्न भवति ? ॥ आचार्यप्रवृत्तिर्ज्ञापयति 'नेह सङ्ख्यातानुदेशो भवती'ति, यदयं 'तोःषी'ति प्रतिषेधं शास्ति ॥ [ष्टुना ष्टुः] ॥

न पदान्ताट्टोरनाम् ।८।४।४२।

अनामिति किमर्थम् ? ॥ षण्णां भवति काश्यपः ॥ अत्यल्पमिदमुच्यते–'अना'मिति ॥ * ॥ अनाम्नवतिनगरीणां चेति वक्तव्यम् ॥ * ॥ षण्णाम् । षण्णवतिः । षण्णगर्यः ॥ [न पदान्ताट्टोरनाम्] ।

यरोऽनुनासिकेऽनुनासिको वा ।८।४।४५।

॥*॥ यरोऽनुनासिके प्रत्यये भाषायां नित्यवचनम् ॥*॥ । यरोऽनुनासिके प्रत्यये भाषायां नित्यमिति च वक्तव्यम् । वाङ्मयम् । त्वङ्मयमिति ॥

अनचि च । ८।४।४७।

॥*॥ द्विर्वचने यणो मयः ॥*॥ द्विर्वचने यणो मय इति वक्तव्यम् ॥ किमुदाहरणम् ? ॥ यदि यण इति पञ्चमी मय इति षष्ठी उल्का वल्म्मीकमित्युदाहरणम् ॥ अथ मय इति पञ्चमी यण इति षष्ठी दध्ध्यत्र मध्ध्वत्रेत्युदाहरणम्? ॥*॥शरःखयः॥*॥ शरःखय इति वक्तव्यम्॥ किमुदाहरणम्? ॥ यदि'शर' इति पञ्चमी'खय'इति षष्ठी 'स्थ्थाली स्थ्थाते'त्युदाहरणम् । अथ 'खय' इति पञ्चमी 'शर' इति षष्ठी, वत्स्स[र]ः क्ष्षीरम् अफ्स्सरा इत्युदाहरणम् । ॥*॥ अवसाने च ॥*॥ अवसाने च द्वे भवत इति वक्तव्यम् । वाक्क् । वाक् । त्वक्क् त्वक् । स्रुक्क्स्रुक् ॥ तत्तर्हि वक्तव्यम् ? ॥ न वक्तव्यम् ॥ नायं प्रसज्यप्रतिषेधः–'अचि ने'ति ॥ किं तर्हि ? ॥ पर्युदासोऽयं 'यदन्यदच' इति ॥

प्र.] अनचि च । नायं प्रसज्यप्रतिषेध इति । पाठोऽयं लेखकप्रमादान्नष्टः,– "पर्युदासे ह्यच्सदृशस्य वर्णान्तरस्य निमित्तत्वेनोपादानादवसाने द्विर्वचनस्याऽ-

---

उ.] अनचि च । भाष्ये–क्षीरमिति । अव्युत्पत्तिपक्षे इदं । व्युत्पत्तिपक्षे घसः कीरन्प्रत्यये अल्लोपे पूर्वत्रासिद्धमद्वित्वे इति चर्त्वे खयः परत्वं बोध्यम् । एतेन 'द्वित्वे परसवर्णत्वं सिद्धं वक्तव्य'मिति वचनसामर्थ्यादस्य वर्णद्वित्वेऽप्रवृत्तेः, प्रवृत्तौ वा द्वित्वभाज एवाऽसिद्धत्वनिषेधकमेतदित्यपास्तम । मानाभावाच्च । तस्मादस्यैव तत्प्रपञ्च इति बोध्यम् । 'शरोऽची'ति तु सौत्रस्यैव निषेधः । तदेव ध्वनयन्नाह–वाक्क् इति । अन्यथा चर्त्वस्याऽसिद्धत्वाद्गस्यैव

नादिन्याक्रोशे पुत्रस्य ।८।४।४८।

॥*॥ नादिन्याक्रोशे पुत्रस्येति तत्परे च ॥*॥ **नादिन्याक्रोशे पुत्रस्ये-त्यत्र 'तत्परे चे'ति वक्तव्यम् । पुत्रपुत्रादिनि** ॥*॥ वा हतजग्धपरे च ॥*॥ **वा हतजग्धपरे इति वक्तव्यम् । पुत्रहती । पुत्रहती । पुत्रजग्धी । पुत्र-जग्धी ।** ॥ * ॥ चयो द्वितीयाः शरि पौष्करसादेः ॥ * ॥ **चयो द्वितीया भवन्ति शरि परतः पौष्करसादेराचार्यस्य मतेन । वथ्सः । ख्षीरम् । अफ्सराः ।** [नादिन्याक्रोशे पुत्रस्य] ॥

प्र.] प्रसङ्गात् । तस्मात् "नायं पर्युदासो यदन्यदच इति ॥ किं तर्हि—प्रसज्यप्रति-षेधोऽचि ने"त्ययं पाठः । तत्र प्रसज्यप्रतिषेधे विधिरनुमीयते । अच उत्तरस्य यरो नूनं द्विर्वचनं सर्वत्राऽस्ति यतोऽचि प्रतिषिध्यते । एवं चाऽनैमित्तिकं द्विर्वचन-मवसानेऽपि भवति । वेत्यधिकाराच्च वा भवति । [**अनचि च**] ॥

नादिन्या । वा हतजग्धपर इति । हत जग्धं च तत्परं चेति विशेषणसमासो, राजदन्तादित्वाच्च परशब्दस्य परनिपातः । **पुत्रहतीति ।** बहुव्रीहिः । 'अस्वाङ्ग-पूर्वपदाद्वे'ति वा ङीष् । [**नादिन्याक्रोशे**] ॥

उ.] द्वित्वेऽन्त्यस्य वाऽवसान इति चर्त्वे पूर्वत्र गस्यैव श्रवणं स्यात, न च तस्यापि 'खरि'चेति चर्त्वं,वाऽवसान इत्यस्यासिद्धत्वेन खर्परत्वाऽभावात् । प्रकरणे 'प्रकरणमसिद्ध'मिति पक्षस्त्वभ्युच्चय इति स्पष्टमेव 'असमासेऽपी'ति सूत्रे कैयटे । न चाऽसिद्धत्वाभावेऽपि वावसान इति चर्त्वस्याऽसिद्धत्वाद्गकारे झशि परे झलां जशिति जश्त्वे उक्तरीत्यैव चर्त्वाभावे गश्र-वणं दुर्वारम् । अस्मादेव भाष्योदाहरणात्पूर्वत्रासिद्धमित्यस्य द्वित्वे कर्तव्येऽसिद्धत्वं न, कृते च तस्मिन्प्रत्यासत्त्या द्वित्वाश्रयस्य कार्ये कर्तव्ये द्वित्वातिरिक्तस्यासिद्धत्वं नेत्यर्थान्न दोष इत्याहुः । **इत्ययं पाठ इति ।** पूर्वपाठेऽपि ' न वक्तव्य'मित्यस्य 'सूत्रेण सिद्धेरि'ति शेषः । तत्खण्डयति आरंभवादीति योजनीयमित्यन्ये । **अचउत्तरस्येति ।** चकारो वा विध्यर्थं इति बोध्यम् । द्वित्वाभावविशिष्टस्यापि भाष्ये उदाहरणादाह—**वेत्यधिकाराच्चेति ।** 'सर्वत्र शाकल्यस्ये'ति वा विकल्प इति बोध्यम् । [**अनचि च**] ।

नादिन्या । तत्परे इति, षष्ठ्यर्थे सप्तमी । पुत्रशब्दपरे पुत्रशब्दे विद्यमानस्य यर इति वार्थः । सूत्रे आदिनीति लुप्तसप्तमीकमित्याशयेनोदाहरति—**पुत्रपुत्रादिनीति ।** आक्रो शस्य स्त्रीष्वेव प्रसिद्धत्वाच्च । अतएव पूर्वसाहचर्याच्च हतजग्धयोरपि स्त्रियामेव । तदाह—**पुत्रहतीति । अस्वाङ्गेति ।** तत्र 'जाते' रित्यस्य संबन्धादिदं चिन्त्यम् । पुत्रशब्दस्याऽ-जातित्वात् । तस्माद्गौरादिष्विमौ पाठ्यावित्याहुः । **वथ्साः अफ्सरा इति ।** नचात्राऽऽद्ये

उदः स्थास्तम्भोः पूर्वस्य ।८।४।६१।

॥ * ॥ उदः[3] पूर्वत्वे स्कन्देश्छन्दस्युपसङ्ख्यानम् ॥ * ॥ उदः पूर्वत्वे स्कन्देश्छन्दस्युपसङ्ख्यानं कर्त्तव्यम् ॥ अघ्ये दूरमुत्कन्दं[2] ॥ ॥*॥ रोगे च[3]॥*॥ रोगे चेति वक्तव्यम् । उत्कन्दको रोगः ॥

शश्छोऽटि ।८।४।६३।

॥*॥ छत्वममि [तच्छ्लोकेन तच्छ्मश्रुणेति प्रयोजनम्] ॥*॥ छत्वममीति वक्तव्यम् ॥ किं प्रयोजनम् ? ॥ तच्छ्लोकेन तच्छ्मश्रुणेति ॥

[अभ्यासे[1] चर्च ।८।४।५४।

प्रकृतिचरां प्रकृतिचरो भवन्ति । चिचीषति । प्रकृतिजशां प्रकृतिजशश्च भवन्ति । जिजनिषति । बुबुधे । ददौ ॥ [अभ्यासेचर्च] ॥]

झरो झरि सवर्णे ।८।४।६५।

सवर्णग्रहणं किमर्थम् ॥ * ॥ झरो झरि सवर्णग्रहणं समसङ्ख्यप्रतिषेधार्थम् ॥ * ॥ झरो झरि सवर्णग्रहणं क्रियते ॥ [किं प्रयोजनं ?] ॥ 'समसङ्ख्यप्रतिषेधार्थम्' ॥ सङ्ख्यातानुदेशो मा भूदिति ॥ किं च स्यात् ? ॥ इह न स्यात्–शिण्ढि पिण्ढि ॥ [झरो झरि]

अ अ इति[1] ।८।४।६८।

किमर्थमिदमुच्यते ? ॥ अकारोऽयमक्षरसमाम्नाये विवृत उपदिष्टस्तस्य

प्र.] झरो झरि सवर्णे। शिण्ढीति। डकारस्य ढकारे परतो लोपः । यथासङ्ख्याश्रयणे[3] तु न स्यात्। सवर्णग्रहणात्तु–यथासङ्ख्याऽभावः । नहि यथासङ्ख्ये सत्यसवर्णो झरस्ति यद्व्यावृत्त्यर्थं सवर्णग्रहणं स्यात् । [**झरो झरि**]

अ अ । किमर्थमिति । अकारस्याऽकारवचने प्रयोजनाऽभावात्प्रश्नः । **अका-**

उ.] वदेः सः, अन्त्येऽप्पूर्वात्सर्तेरसिः उभयत्रापि चर्त्वेन चर्यिति चर्त्वस्याऽसिद्धत्वात्कथमेतदुदहरणमिति वाच्यम् । पाणिनिमतसिद्धाऽव्युत्पत्तिपक्षाभिप्रायेण सत्त्वात् ।

उदःस्था । उत्कन्दक इति । न च सस्यान्तरतम्यात्थकारे तस्याऽसिद्धत्वाच्चर्त्वं दुर्लभं, भाष्येऽभ्यासे चर्चेत्यस्य परत्र पाठेन चर्त्वस्यैव परत्वेन तं प्रत्यस्याऽसिद्धत्वाभावादित्याहुः । वृत्त्युक्तः पाठस्तु चिन्त्य एव । [**उदःस्थास्तम्भोः**]

अभ्यासे चर्च । अन्तरतमपरिभाषालब्धार्थमन्वाचष्टे–**प्रकृतिचरामिति ॥**

झरो झरि सवर्णे । डकारस्य ढकार इति । ष्टुत्वजश्त्वादीनां पूर्वत्वादिति भावः।

संवृतताप्रत्यापत्तिः क्रियते ॥ किं पुनः कारणं विवृत उपदिश्यते ? ॥

॥*॥ आदेशार्थं सवर्णार्थमकारो विवृतः स्मृतः ।
आकारस्य तथा ह्रस्वस्तदर्थं पाणिनेर अ ॥*॥१॥

आदेशार्थं तावत्—**वृक्षाभ्याम् । देवदत्ता३ । आन्तर्यतो विवृतस्य विवृतो दीर्घप्लुतौ यथा स्याताम् ।** सवर्णार्थं च—**अकारः सवर्णग्रहणेनाऽऽकारमपि यथा गृह्णीयात् ।** अकारस्य तथा ह्रस्वः । **तथा [च] अतिखट्वः अतिमाल इत्यत्र आकारस्य ह्रस्व उच्यमानो विवृतः प्राप्नोति, संवृतः स्यादित्येवमर्थो प्रत्यापत्तिः ॥ अस्ति प्रयोजनमेतत् । किं तर्हीति** ॥*॥ अकारस्य प्रत्यापत्तौ दीर्घप्रतिषेधः ॥ * ॥ **अकारस्य प्रत्यापत्तौ दीर्घस्य प्रतिषेधो वक्तव्यः ॥ खटा माला ॥ नैष दोषः ॥ यथैव प्रकृतितः सवर्णग्रहणमेवमादेशतोऽपि भवितव्यं, तत्रान्तर्यतो ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घो भविष्यति ॥**

प्र.]शेयमिति । सवर्णार्थमिह शास्त्रे विवृतदोषयुक्तोऽकार उपदिष्टस्तस्य प्रयोगे संवृतस्यैवोच्चारणार्थमिदं प्रत्यापत्तिवचनम् । अक्षरसमाम्नायग्रहणं सकलशास्त्रोपलक्षणम् । **किं पुनरिति ।** कस्मात्पुनः कारणादित्यर्थः । 'निमित्तकारणहेतुषु सर्वासां प्रायदर्शन'मिति प्रथमा । श्लोकोपन्यासाय प्रश्नः । प्रयोजनं तु 'अकारस्य विवृतोपदेश आकारग्रहणार्थः । तस्य विवृतोपदेशादन्यत्रापि विवृतोपदेशः सवर्णग्रहणार्थ' इति वार्तिककृता पूर्वमेव प्रतिपादितम् । **आदेशार्थमिति ।** अत्रापि प्रयोजनं विवृतोपदेशस्योक्तम् ,—वृक्षभ्यामिति । यद्यपीदं प्रयोजनमकारवार्तिके भाष्यकृता प्रत्याख्यातं 'नैव लोके नचवेदे दीर्घप्लुतौ संवृतौ स्तः किं तर्हि विवृतौ' यौ स्तस्तौ भविष्यत'इति; तथापि प्रयोजनान्तरसद्भावादिह प्रत्याख्यानादरो न कृतः, पूर्वमेव वा प्रत्याख्यानात् । **आकारस्येति ।** इदमपि प्रत्याख्यातं प्रयोजनं—'नैव लोके नच वेदेऽकारोऽस्ति विवृत'इति । **दीर्घप्रतिषेध इति ।** दीर्घस्योपलक्षणा·

उ.] अ अ । सवर्णार्थमिति । सवर्णग्रहणार्थमित्यर्थः । **तस्य प्रयोगे इति ।** शास्त्रे विवृतोपदेशात्प्रयोगेऽपि तथैव श्रूयेताऽतस्तन्निवृत्त्यर्थमित्यर्थः । **प्रत्यापत्तीति ।** संवृत एव कार्यार्थं विवृतत्वारोपाद्दोषमात्रनिरासेन तथा व्यवहार इति भावः । **उपलक्षणमिति ।** संपूर्णशास्त्रदृष्ट्याऽस्याऽसिद्धत्वादिति भावः । ननु विवृतोपदेशप्रयोजनस्य अइउणित्यत्रोक्तत्वात् पुनः प्रश्नो व्यर्थोऽत आह—**श्लोकेति ।** श्लोकवार्तिकव्याख्यानायेत्यर्थः । प्रयोजनान्तरकथनाच्च न पौनरुक्त्यमित्याह—**अत्रापीति । प्रयोजनान्तरेति ।** सवर्णग्रहणार्थत्वरूपेत्यर्थः । **इदमपीति ।** एवञ्च सवर्णार्थैव प्रत्यापत्तिरिति भावः । प्रतिषे-

॥*॥ आदेशस्य चानण्त्वान्न सवर्णग्रहणम् ॥*॥ आदेशस्य चाऽनण्त्वात्सवर्णानां ग्रहणं न प्राप्नोति ॥ केषाम् ? ॥ उदात्तानुदात्तस्वरितानुनासिकानाम् । ॥*॥ सिद्धं तु तपरनिर्देशात् ॥ * ॥ सिद्धमेतत् ॥ कथम् ? ॥ 'तपरनिर्देशात्' । तपरनिर्देशः कर्तव्यः—'अद्' इति ॥

अपर आह—॥*॥ अकार[स्य]प्रत्यापत्तौ दीर्घप्रतिषेधः ॥ * ॥ अकारस्य प्रत्यापत्तौ दीर्घस्य प्रतिषेधो वक्तव्यः । खट्वा माला ॥ नैष दोषः ॥ दीर्घोच्चारणसामर्थ्यान्न भविष्यति ॥ इदं तर्हि—वृक्षाभ्यां प्लक्षाभ्याम् ॥ अत्रापि दीर्घवचनसामर्थ्यान्न भविष्यति ॥ इदं तर्हि—अपि काकः श्येनायते ॥ ननु चाऽत्रापि दीर्घवचनसामर्थ्यादेव [तत्] न भविष्यति ॥ अस्त्यन्यद्दीर्घवचने प्रयोजनम् ॥ किम् ? ॥ दधीयति मधूयति ॥ [* ॥ आदेशस्य चानण्त्वात्सवर्णाग्रहणम् ॥ *]॥ आदेशस्य चाऽनण्त्वात्सवर्णानां ग्रहणं न प्राप्नोति ॥ केषाम् ? ॥ उदात्तानुदात्तस्वरितानुनासिकानाम् ॥ * ॥ सिद्धं तु तपरनिर्दे-

---

प्र.] र्थत्वात्प्लुतस्याऽपि प्रतिषेधो वक्तव्यः। क्वचित्तु 'दीर्घप्लुतप्रतिषेध'इति पाठः। इह स्थान्यकारो विवृतोऽण्त्वात्सवर्णानां ग्राहक इति दीर्घप्लुतयोरपि स्थाने संवृतोऽकारः प्राप्नोतीति प्रतिषेध उच्यते । आदेशस्येति । संवृताऽकारोऽण्न भवतीति सवर्णानां ग्रहणं न प्राप्नोति । भाव्यमानत्वाच्च । उदात्तेति । ततश्च यद्गुणयुक्तः संवृत उच्चारितस्तद्गुण एव त्रयाणामपि ह्रस्वदीर्घप्लुतानां प्राप्नोतीत्यनिष्टप्रसङ्गः, इष्टं च न सिध्यतीति, सर्वगुणस्य मात्रिकस्य प्रत्यापत्तेरिष्टत्वात् । सिद्धं त्विति । 'अद्'इति सूत्रं कर्तव्यम् । तत्र तः परो यस्मादिति पूर्वोऽकारस्तपरः । तात्परस्तपर इत्येवं द्वितीयस्तपरः । एवन्त्विति । यतस्त-

---

उ.] थस्य वक्तव्यतामुपपादयति—इह स्थान्यकार इति । 'अ अ' इति सूत्रे इत्यर्थः। वार्तिके हेतुकथनमुपलक्षणमित्याह—भाव्यमानत्वाच्चेति । इष्टं चेति । उदात्तादिगुणयुक्तह्रस्वस्थाने तद्गुणकस्यैव प्रत्यापत्तिरिष्टा, सा च सवर्णग्रहणाऽभावे न सिध्यतीत्यर्थः । अत्र सिद्धन्त्विति प्रथमवार्तिके 'अत् अ' इति, उत्तरत्र तपरत्वरहितः पाठः । 'अपर आहे'ति पक्षे उभयत्रापि तपरनिर्देश इति भेदः । तद्व्याचष्टे—अद् इति सूत्रमिति । तः पर इति । तपरसूत्रे तन्त्रेणार्थद्वयाश्रयणादिति भावः । भिन्नकालाविति । नियमफलकविध्यर्थं च तत्सूत्रं । तद्ध्वनयन्नाह—आदेशस्तु तत्कालानिति । 'अपर आहे'त्येतद्व्याचष्टे—केचिदिति । षण्मात्रिका इति । एकश्रुतिविषयेण सहोदात्तानु-

शात् ॥ * ॥ **सिद्धमेतत् ॥ कथम् ? ॥ तपरनिर्देशात्' । तपरनिर्देशः कर्तव्यः । 'अद्'दिति** ॥ * ॥ एकशेषनिर्देशाद्वा स्वरानुनासिक्यभिन्नानां भगवतः पाणिनेः सिद्धम् ॥*॥ **एकशेषनिर्देशाद्वा स्वरभिन्नानां भगवतः पाणिनेराचार्यस्य सिद्धम् । 'एकशेषनिर्देशोऽयम्'—अ अँ अ इति ॥**

इति श्रीमद्भगवत्पतञ्जलि[मुनि]विरचिते व्याकरणमहाभाष्येऽष्टमस्याऽध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥ चतुर्थः पादोऽष्टमोऽध्यायश्च समाप्तः ।

प्र.]परस्ततः स्थान्यकारो भिन्नकालौ दीर्घप्लुतौ न ग्रहीष्यति । आदेशस्तु तत्कालान्गुणान्तरयुक्तान्ग्रहीष्यति । केचिददददिति द्वावपि तपरौ पठितव्याविल्याहुः । **एकशेषनिर्देशाद्वेति** । षण्मात्रिका अकाराः स्थानिनो निर्दिश्यन्ते । एवमादेशा अपि षडेव । ततश्चैकशेषः, तत्र षण्णां स्थानिनां निर्देशसामर्थ्याद्भिन्नकालौ दीर्घप्लुतौ स्थानिभिर्न गृह्येते । तत्र यथासङ्ख्यं षण्णां विवृतानां स्थाने षडादेशाः संवृता भवन्तीति सिद्धमिष्टम् ॥

श्रुत्वा शास्त्राणि विद्वद्भ्योयथाप्रज्ञं यथाऽऽगमम् । भाष्यदीपं व्यधत्तेमं कैय्यटो जैय्यटात्मजः॥१॥

इत्युपाध्यायजैयटपुत्रकैयटकृते भाष्यप्रदीपेऽष्टमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥ पादोऽध्यायश्च समाप्तः ।

उ.]दात्तस्वरितानुनासिकाऽननुनासिकाः षडित्यर्थः । यद्वा उदात्तादित्रयमनुनासिकत्वतदभावाभ्यां द्विधेति षट् । **सामर्थ्यादिति** । अन्यथैकशेषाश्रयणमनर्थकं स्यादिति भावः । **स्थानिभिरिति** । आदेशैस्त्वनण्त्वादेव न गृह्येतेति भावः । **सिद्धमिष्टमिति** । अनेन व्याकरणाध्ययनप्रयोजनाभ्यां सकलपुरुषार्थसिद्धिं दर्शयति । अन्ते मङ्गलाचरणं च कृतं भवति । एवं सूत्रकारेणाऽपि विष्णुवाचकाऽकारस्य द्विरुच्चारणाद्विर्विष्णुस्मरणरूपं मङ्गलमाचरितम् । किं चा'ऽकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना नानारूपा भवती'ति श्रुतेरकारस्य सर्वशब्दप्रकृतित्वात्, 'अ'इति ब्रह्मे'ति शब्दब्रह्मरूपत्वश्रवणाच्च महामङ्गलार्थता । वार्तिककृताऽपि 'भगवतः पाणिनेः सिद्ध'मिति सिद्धशब्दोच्चारणेन कृतं मङ्गलं । भगवता पतञ्जलिनाऽपि 'एकशेषनिर्देशोऽयम अ' इत्यन्ते वदता कृतं मङ्गलम् । एवञ्च तदध्यायिनां प्रवक्तॄणां च सकलपुमर्थसिद्धिर्दर्शिता । यथोक्तम्—'**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् । इयं सा मोक्षमाणानामजिह्मा राजपद्धतिरिरितिसर्वेष्टसिद्धिः॥**

भाष्याब्धेः सप्रदीपस्य भगवत्कृपया मया । यथामति कृता व्याख्या प्रीयतां भगवांस्तया॥१॥
गङ्गा शिवश्च शेषश्च रक्षन्त्वेनां तु सर्वशः । सतां हृदयपद्मेषु प्रसिद्धिं प्रापयन्तु च ॥ २ ॥

इति श्री शिवभट्टसुतसतीगर्भजकालोपनामकनागोजीभट्टकृतेमहाभाष्यप्रदीपोद्योतेऽष्टमाध्यायस्य चतुर्थे पादे **प्रथम**माह्निकम् ॥ पादोऽध्यायश्च समाप्तः ।